CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।

श्रीविष्णुसहस्रनाम-सत्यभाष्यम्

भागः १

श्री १०८ पं. सत्यदेवो वासिष्ठः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीविष्णुसहस्रनाम-सत्यभाष्यम्

महर्षिवेदव्यासप्रणीतस्य महाभारतस्यानुशासनपर्वण एकोनपञ्चाशदुत्तरैक शततमेऽध्याये कीर्तितस्य श्रीविष्णुसहस्रनामस्तोत्रस्य वेदप्रमाणोपवृंहितं श्रीविष्णुसहस्रनाम-सत्यभाष्यं श्री १०८ पं० सत्यदेववासिष्ठेन द्वादशवर्षैः पूरितम्। अस्मिन् भाष्ये श्रीविष्णुर्विश्वं व्यश्नुवानस्य ब्रह्मणः सूर्यस्य च पर्यायत्वेन गृहीतः।इत्थमाध्यात्मिकस्तरे विष्णुर्ब्रह्म, आधिदै- विकस्तरे च सूर्योऽस्ति। अस्मिन् भाष्ये ग्रन्थकर्तुर्वेद-वेदाङ्गानामायुर्वेदस्य लोकव्यवहारस्य च ज्ञानं सम्यक्तया प्रतिबिम्बितमास्ते। ग्रन्थकर्त्रा विश्वार्तिजिहीर्षयास्य सत्यभाष्यस्य रचना कृता-

न मे प्रयासोऽस्ति यशोऽधिगन्तुं
नार्थं तथा काममथापि कञ्चित्।
तथापि विश्वार्तिजिहीर्षयाहं
प्रावर्तिषीहातुलभाष्यकार्ये ।।

भाष्यस्वरूपं ग्रन्थकर्त्रैवं निर्दिष्टम्-"इदमत्र ज्ञेयं यदयं महर्षिवेदव्यासकृपातो लब्धस्वरूपो विष्णुसहस्रनामसङ्ग्रहो मया व्याख्यातस्तत्र प्रतिनाम यथोपयोगि व्याकरणं, नाम्नो व्याप्तिः, लोके तदनुकृतिः, शरीरेषु समन्वयः, तन्नाम्नः प्रमापयिता मन्त्रश्च सलोकोदाहरणं निर्दिष्टः।" १४५६ पृष्ठात्मके भागद्वयात्मके चास्मिन् ग्रन्थे भाष्यकर्तृपरिचयः, ग्रन्थरचनेतिहासः, विविधानि परिशिष्टानि च दीयन्ते। सत्यभाष्यान्तर्गतं श्रीविष्णुकाव्यम् पृथक्शः परिशिष्टरूपेण दीयते यद्धि गद्यात्मकस्य सत्यभाष्यस्य पद्यात्मकं निष्कृष्टं तत्त्वमस्ति। आर्षशैल्यां रचितमिदं सत्यभाष्यं संस्कृत-भाष्यपरम्परायां कामप्यपूर्वाममिख्यां दधाति।

मूल्यम् सम्पूर्णग्रन्थस्य रू०-११००.००
Price Full Set (Volumes 1&2)
Rs. 1100.00 (In India)
U.S. $ 45 (Abroad)
ISBN 81-900679-0-7 (Volumes 1&2)
ISBN 81-900679-1-5 (Volumes 1)

के मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

SCANNED

यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

महर्षिवेदव्
शततमेऽध्
श्रीविष्णुस
पूरितम् ।
पर्यायत्वेन
सूर्योऽस्ति
च ज्ञानं र
सत्यभाष्य

भाष्यस्वरू

सत्यभाष
रचितमि
दधाति ।

मूल्यम्
Price
Rs. 1
U.S. $
ISBN
ISBN

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीविष्णुसहस्रनाम-सत्यभाष्यम्-१

ŚRĪVIṢṆUSAHASRANĀMA-SATYABHĀṢYAM-I

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ओ३म्

श्रीविष्णुसहस्रनाम-सत्यभाष्यम्

{महाभारतानुशासनपर्वान्तर्गतस्य
श्रीविष्णुसहस्रनामस्तोत्रस्य
वेदप्रमाणोपवृंहितं
सत्यभाष्यम्}

प्रथमो भागः

(पूर्वार्द्धम्)

भाष्यकर्ता

श्री १०८ पं० सत्यदेवो वासिष्ठः, साङ्गोपवेदवेदचतुष्टयी

भूतपूर्व-लवपुर-दिल्ली-भिवानीस्थ-सनातनधर्मायुर्वेद-महाविद्यालयीय
प्रधानाध्यापकः, गुरुकुलझज्झरस्यायुर्वेदविभागाध्यक्षश्च,
सामस्वरभास्करः, वेद - व्याकरण - निरुक्त -
छन्दः - साहित्य-ज्योतिषायुर्वेदाद्यनेक-
शास्त्रपारावारीणः
सत्याग्रहनीतिकाव्यस्य नाडीतत्त्वदर्शनस्य च प्रणेता

१९९९

संशोधितं नवीनं संस्करणम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीविष्णुसहस्त्रनाम-सत्यभाष्यम् (प्रथमो भागः)

भाष्यकर्ता; वासिष्ठः, श्री १०८ पं० सत्यदेवः

प्रकाशकः

श्री १०८ पण्डितसत्यदेवो वासिष्ठः

देवसदनम्, महममार्गः, भिवानी-१२५०२१ (हरियाणा)

प्राप्तिस्थानम्

देवसदनम्,

महममार्गः, भिवानी-१२५०२१ (हरियाणा)

संस्करणम्

प्रथमं संस्करणम् १६६६

द्वितीयं मुद्रणम् १६८६

तृतीयं मुद्रणम् संशोधितं नवीनं संस्करणम् १६६६

मुद्रितानि प्रतिरूपाणि ११००

I.S.B.N. 81-900679-0-7 सम्पूर्णग्रन्थः (१–२)

I.S.B.N. 81-900679-1-5 प्रथमो भागः

सर्वेऽधिकारा ग्रंथकाराधीनाः

अक्षरयोजनाकाराः

मोहित ग्राफिक्स

५३, बापू पार्क, कोटला मुबारकपुर, नई दिल्ली–११०००३

मुद्रकः

सिण्डिकेट बाइण्डर्स

प्रिण्टर्स एण्ड बाइण्डर्स

बी. १६७ ओखला औद्यौगिक क्षेत्र, फेज–१ नई दिल्ली–११००२०

सम्पूर्णग्रन्थस्य मूल्यम् :

रू०–११००.०० (भारते), यू.एस.डालराः $ ४५ (विदेशेषु)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ŚRĪVIṢṆUSAHASRANĀMA SATYABHĀṢYAM

A COMMENTARY IN SANSKRIT LANGUAGE ON ŚRĪVIṢṆUSAHASRANĀMA-STOTRAM [VOL-1]

AUTHOR

SHRI 108 PT. SATYADEVA VASISHTHA

SANGOPAVEDAVEDACHATUSHTAYI

EX-Principal,Sanatan Dharm Ayurveda College,
Lahore, Delhi,Bhiwani

Ex.Head of the Department of Ayurveda,
Gurukul, Jhajjar

'Samasvarabhaskara'

Eminent Scholar of
Vedas,Vyakarana,Nirukta,Chhandas,Sahitya,Jyotish,Ayurveda
etc.

Author of
'Satyagrahanitikavyam'
and
'Naditattvadarshanam'

1996

NEW REVISED EDITION

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ŚRIVISNUSAHASRANĀMA SATYABHASYAM

A COMMENTARY IN SANSKRIT LANGUAGE ON

SRĪVIṢṆUSAHASRANĀMA-STOTRAM

[VOL-1]

BY VASISHTHA, SHRI 108 PT. SATYA DEVA

Published by

Shri 108 Pt.Satya Deva Vasishtha,

Devasadanam, Maharn Rood, Bhiwani Pin-125021

Available from

Devasadanam.

Maham Road,Bhiwani-125021[Haryana]INDIA

ALL RIGHTS ARE RESERVED WITH THE AUTHOR

I.S.B.N. 81-900679-0-7 full set [Volumes 1&2]

I.S.B.N. 81-900679-1-5 [Volume-1]

Edition

First Printing in 1969

Second Printing in 1986

Third Printing[New Revised Edition]in 1996

Copies Printed: 1100

Price :Full Set (Vol.1&2) Rs.1100.00 (In INDIA) $-45 (ABROAD)

Type-Setting by

Mohit Graphics

53, Bapu Park, Kotla Mubarakpur,

New Delhi-110003

Printed by

Syndicate Binders

(Printers and Binders)

B-167,Okhla Industrial Area Phase-1,New Delhi-110020

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सम्पादक-मण्डलम्

प्रबन्धसम्पादकः

महेश कुमारः एम.ए. (आंग्लसाहित्ये), आइ.आर.एस.

उपप्रबन्धसम्पादकः

आनन्द कुमारः एम.ए. (आंग्लसाहित्ये), एल् एल्. बी.

●

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम.ए. (हिन्दी–संस्कृतयोः), पीएच.डी., साहित्याचार्यः, सांख्ययोगाचार्यः

सहसम्पादकः

पं० रत्नलाल शर्मा शास्त्री,

●

ग्रन्थसज्जा-परामर्शदाता

शरददत्तः, उपनिदेशकः, दिल्ली दूरदर्शनम्

अक्षरयोजना-परामर्शदाता

सुदर्शन कुमार मल्होत्रा, बी.ए., एल एल.बी.

आवरणचित्रकारः

नन्द कत्यालः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Editorial Board

Managing Editor
Mahesh Kumar,M.A.[English Litt.],I.R.S.

Co Managing Editor
Anand Kumar,M.A.[English Litt.],LL.B

Editor-in-Chief
Dr. Rama Kant Shukla
M.A.[Hindi-Sanskrit],Ph.D.,Sahityacharya,
Sankhyayogacharya

Co Editor
Pt. Ratna Lal Sharma,Shastri

Production Advisor
Sharad Dutt
Deputy Director,Delhi Doordarshan

Type Setting Adviser
S.K.Malhotra, B.A., LL.B.

Cover Designer
Nand Katyal

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीविष्णुसहस्रनाम-सत्यभाष्यकर्ता

श्री १०८ पं० सत्यदेवो वासिष्ठः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ग्रन्थकर्तुः पिता श्री अनन्तरामसहजपालः



इदं श्रीवसिष्ठगोत्रोद्भवानां सहजपालोपाह्वानां श्रीकृष्णात्मजानां पं० 'अनन्तरामशर्मणां' विष्णुसहस्रनाम्नां सत्यभाष्यकर्तुः पितॄणां चित्रं येषां सर्वं जीवनं श्रीविष्णुसहस्रनाम-स्तोत्रस्य पठने श्रवणे मनने च व्यतीतम्। येषां च श्रीमुरारीलाल-सत्यदेवनामानौ द्वौ पुत्रौ तिस्रश्च कन्याः समभूवन्।

प्रादुर्भावः—**विक्रमसम्वत्** १९३८ आषाढ कृष्णा १४ चतुर्दशी, शनिः ।

निर्वाणम्—**विक्रमसम्वत्** १९९७ मार्गशीर्षकृष्णा ४ चतुर्थी, भौमः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ग्रन्थकर्तुर्विद्यागुरुः श्रीब्रह्मदत्त जिज्ञासुः



'तत्र (विरजानन्द-ब्रह्मचर्याश्रमे) चाहं
तदध्यक्षैस्त्यागतपोमूर्तिभिराचार्यचरणैः
श्रीब्रह्मदत्तजिज्ञासुमहोदयैर्वर्णोच्चारणतआरभ्यार्षप्रक्रियया
अष्टाध्यायीक्रमपूर्वकं
पातञ्जलमहाभाष्यान्तं निरुक्ताङ्गपुरस्सरं व्याकरणं पाठितो धर्मशास्त्रञ्च।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ओ३म्

श्रीमन्तो नमो वः
आशा है ईश्वर कृपा से आप
सर्व प्रकार से प्रसन्न होंगे
आपका पत्र मिला प्रसन्नता हुई
यह जानकर अत्यधिक प्रसन्न
ता हुई कि आप का पुस्तक बनाने का
कृपा मेरा विद्वानों के पास भ्रम
ण का काम सफल हो रहा है
मुझ से अधिक और किसे प्रसन्न
ता हो सकती है। जिसका छात्र इतना
परिश्रमी हो किं बहुना इति॥

भवदीय —
ब्र॰ ति॰ रा॰

पोस्ट-कार्डे भाष्यकर्तुरायुर्वेदगुरुणा
श्रीतिलकरामब्रह्मचारिणा
(३१.१०.१९४९ ई० तारिकायां)
स्वाक्षरैर्लिखितं पत्रम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सत्यभाष्यस्य हिन्दीभाषानुवादकर्ता
श्री पं० मुंशीराम शर्मा शास्त्री



तालुग्रामस्य वास्तव्यो 'मुन्शीरामः' सुधीरयम्।
भाष्ये सहायको मेऽभूच्चिरमव्यग्रमानसः ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विश्रुतो विद्वान् पं० युधिष्ठिरो मीमांसकः



'श्री पं० सत्यदेवजी वासिष्ठ आयुर्वेदाचार्य का सतीर्थ्य होनेके नाते मेरा आपके परिवार के साथ सन् १९२२ से सम्बन्ध है।'
(पं० युधिष्ठिर मीमांसकः)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सत्याग्रही सत्यदेवो वासिष्ठः

(हैदराबाद-सत्याग्रहे गच्छतः श्रीवासिष्ठस्येदं छायाचित्रं
१९३९ तमेशवीयेऽब्दे शोलापुरेऽङ्कितमासीत्)।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सन्मित्रम्

श्री १०८ पं० सत्यदेवो वासिष्ठः श्रीमता पं० केशवदेव आत्रेयेण साकम् ।

भिवान्याम्मे सखा पूर्वः केशवः सत्यवाक् सुहृत् ।

Kirtikant Sharma Collection, Najafgarh



संगीताचार्यश्रीत्रिलोकचन्द्रवसुना साकं सितारवाद्यमभ्यसन्
श्री पं० सत्यदेवो वासिष्ठः (१९६९ तः पूर्वम्)

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वाध्यायः



स्वाध्यायपरः श्री १०८ पं० सत्यदेवो वासिष्ठः (१५-१-१९९६)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हस्ताक्षराणि



मकरसंक्रान्त्यां (वि. सं. २०५२) १५-१-१९९६ तारिकायां भिवानीस्थे देवसदने 'श्रीविष्णुसहस्त्रनाम-सत्यभाष्य'स्य नवीनसंस्करणमधिकृत्य लिखिताया अवतरणिकाया संगणकयन्त्रसिद्धायां पाण्डुलिप्यां हस्ताक्षराणि कुर्वन् श्री १०८ पं० सत्यदेवो वासिष्ठः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

देवसदने स्थितमखण्डज्योतिः



ज्वलता ज्योतिषाखण्डं विशुद्धान्तरभूपदम्।
तमसास्पृष्टमद्यापि बिभ्रदादियुगश्रियम्।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हस्तलेखः



श्रीसत्यदेववासिष्ठहस्तलिखिताः   सामवेदमन्त्राः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सामस्वरभास्करः



ॐ

नमः सच्चिदानन्दाय ।

प्रमाणपत्रम्

पञ्चापप्रान्त-जालन्धरमण्डलान्तर्गत-माहलगहला-ग्रामवास्तव्यानां शुभगुणसम्पन्नानां श्रीपं० अनन्तरामशर्म्मणां सहजपालाभणिकानां मात्मजाय अधीतप्राचीनव्याकरणनिरुक्तशास्त्राय वेदाध्ययनरुचिमते सत्यदेवशर्म्मणे कौथुमीयराणायनीयशाखानुसारं गेय-आरण्यक-ऊह-ऊह्यगानेषु सामसंहितायाञ्च कृतसुपरिश्रमाय वयमाशीः पुरः सरं ।

सामस्वरभास्करोपाधिं

सहर्षं वितरामो विद्यावाञ्छ्रीमानारोग्यतन्वायुष्मांश्च भूयादित्याशास्महे ।

पं० गोपीनाथत्रिपाठी सामवेदी

अग्निहोत्री हरिशंकरत्रिपाठी सामवेदी

श्री संवत् १९९१

भाद्रपद कृष्ण ११ मंगलवार, भाद्रपद प्रविष्टे १८ ईसवी सन् ४-९-१९३४

स्थान काशी

४-९-१९३४ तारिकायां काश्यां श्रीसत्यदेवशर्मवासिष्ठाय प्रदत्तं 'सामस्वरभास्करोपाधि'-प्रमाणपत्रम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2



ॐ

नमः परमात्मने ।

प्रमाणपत्रम्

पञ्चनद प्रान्त (जिला) जालन्धरान्तर्गत- माहलगहला-ग्राम वास्तव्यानां शुभगुणसम्पन्नानां श्री पं० अनन्तरामशर्म्मणां सहज पाला भणिकाना मात्मजाय सुशीलाय सत्यदेवशर्म्मणे अधीत प्राचीन व्याकरण निरुक्त शास्त्राय परिज्ञात दर्शपौर्णमासप्रक्रियायतश्च प्राप्तनैपुण्याय ऋग्वेदे यजुर्वेदे गेय-आरण्यक ऊह ऊह्यगानैः सह सामवेदे अथर्ववेदे च कृतसुभूरिपरिश्रमाय वयं साशिषा

चतुर्वेद्युपाधिं

सहर्षं वितरामः। तेजस्वी यशस्वी ब्रह्मवर्चस्वी धर्मात्मा दीर्घायुश्च भूयात् ।

श्री संवत् १९९१
भाद्रपद कृष्णा ११ मंगलवार, भाद्रपद प्रविष्टे २०, ई०सन्
{स्थान काशी}
४-९-१९३४

काश्यां ४-९-१९३४ ई. तारिकायां श्रीसत्यदेववासिष्ठाय समर्पितं
चतुर्वेद्युपाधिपत्रम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2



श्री १०८ पं० सत्यदेववासिष्ठस्य वामं करतलम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2



श्री १०८ पं० सत्यदेववासिष्ठस्य दक्षिणं करतलम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भिवान्या उत्तरेणास्मद् देवसदन'मारभम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

देवसदनस्थो वटवृक्षः



वटवृक्षो महानत्र सदने सघनः स्थितः।
शाखाहस्तैरिहास्माकं सन्तापं शमयत्यलम्।।

(चित्रांकन-तिथिः १५-१-१९९६)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भिवान्यां देवसदने २०५२ तमे वैक्रमाब्दे मकरसंक्रान्तिपर्वणि (१५.१.१९९६ ई०) नवीनसंस्करणस्य अवतरणिकायां हस्ताक्षरानन्तरं श्री १०८ पं० सत्यदेवो वासिष्ठः सम्पादक - मण्डल - सदस्यैः देवसदनकार्यकर्तृभिरभ्यागतैश्च सह। श्रीवासिष्ठस्य दक्षिणस्कन्धपार्श्वे प्रबन्धसम्पादकः श्रीमहेश कुमारः, उपप्रबन्ध सम्पादकः श्री आनन्द कुमारः, वामस्कन्धपार्श्वे च प्रधानसम्पादको डा० रमाकान्त शुक्लः अक्षरयोजनापरामर्शदाता श्री सुदर्शनकुमार मल्होत्रा च तिष्ठन्ति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रमः

प्रथमो भागः (पूर्वार्द्धम्)

	कृतिः	कर्त्ता	सुपर्णाङ्कः
१.	क्रमः		अ—आ
२.	सम्पादकीयम्		इ—ऋ
३.	अवतरणिका	श्री १०८ पं. सत्यदेवो वासिष्ठः	१— ६
४.	सहस्रनामसङ्ग्रहीतारं प्रति सत्य-भाष्यकृतः कृतज्ञताप्रकाशनम्	,,	७—१०
५.	विष्णुसहस्रनामस्तोत्रस्य सत्यभाष्यकर्तुरात्मपरिचयः	,,	११—१४
६.	श्री पं० सत्यदेव वासिष्ठ का संक्षिप्त परिचयः	पं० युधिष्ठिर मीमांसकः	१५—१८
७.	भाष्यकारविषयको मेऽनुभवः	पं० मुंशीराम शास्त्री	१६—२४
८.	विणुसहस्रनामस्तोत्रस्य माहात्म्यम्	पं० मुंशीराम शास्त्री	२५—३३
६.	विष्णुसहस्रनामस्तोत्रमधिकृत्य आत्रेयपुनर्वसोर्वचनम्	(चरकसंहितातः)	३४—३४
१०.	सत्यभाष्यकर्तुर्मङ्गलाचरणम्	श्री १०८ पं. सत्यदेवो वासिष्ठः	३५—३८
११.	भाष्यकर्तुरात्मभावप्रकाशनम्	,,	३६—४०
१२.	भूमिकारूपाः पञ्चदश श्लोकाः	,,	४१—४४
१३.	समाहात्म्यं साङ्गविन्यासञ्च श्रीविष्णुसहस्रनामस्तोत्रम्	महाभारतस्यानुशासनपर्वणः १४६ तमाध्यायात्	४५—५८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

१४.	विष्णुसहस्रनामसत्यभाष्यम् (नामसंख्या १—५००)	श्री १०८ पं. सत्यदेवो वासिष्ठः	१-५७०
१५.	परिशिष्टम् (क) श्रीविष्णुसहस्रनाम्नां वर्णानुपूर्व्या सूची (१—५००)		क—न

द्वितीयो भागः (उत्तरार्द्धम्)

	कृतिः	कर्त्ता	सुपर्णाङ्कः
१६.	श्रीविष्णुसहस्रनाम-सत्यभाष्यम् (नामसंख्या ५००—१०००)	श्री १०८ पं. सत्यदेवो वासिष्ठः	५७१—१०३४
१७.	परिशिष्टानि (१—४)		१०३५—१०३८
	१. श्रीविष्णुसहस्रनाम्नां चतुर्थ्यन्तरूपाणि		१०३६—१०५०
	२. श्रीविष्णुसहस्रनाम्नां वर्णानुपूर्व्या सूची (१-१०००)		१०५१—१०८८
	३. श्री १०८ पं० सत्यदेव-वासिष्ठप्रणीतं श्रीविष्णु-काव्यम्		१०८६—१३३०
	४. श्रीविष्णुसहस्रनाम्नां वर्णानुपूर्व्या सूची (५०१-१०००)		१३३१—१३५०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सम्पादकीयम्

परमस्पष्टस्य स्पष्टाक्षरस्य गुरोर्गुरुतमस्य श्रीविष्णोः सहस्रनाम्नां परमस्पष्टं स्पष्टाक्षरञ्च सत्यभाष्यं गुरोर्गुरुतमेन ब्रह्मर्षिणा श्री १०८ पं० सत्यदेवासिष्ठमहाभागेन भिवान्यां निर्मापिते 'देवसदने' स्थित्वा द्वादशवर्षैर्महता तपसा पूरितम्। तस्य मुद्रणद्वये प्रकाशितेऽपि (१९६९-७१, १९८६-८७) ग्रन्थकर्तुर्मानसं मुद्रणगतत्रुटीर्वीक्ष्य तोषं नाप्नोतिस्म। अवदातं भाष्यं त्वार्षपरम्परानुसारि किन्तु मुद्रणं न तथावदातमासीदिति वाचो मुद्रणलिप्याश्चासमंजसं वीक्ष्य गुरोर्वासिष्ठस्य पञ्चविंशतिप्रायेषु वर्षेष्वतीतेषु सत्यभाष्यस्य शुद्धं संस्करणमवलोकयितुमुत्सुकं मानसं प्रीणयितुं २०५२ तमे वैक्रमाब्दे श्रावणीपर्वणि तत्प्रियशिष्येण वसिष्ठगोत्रेण नित्यं विष्णुस्मरणपरेण सानुजेन श्रीमहेश कुमार एम० ए०, आई० आर० एस०-महाभागेन तदाशिषो गृहीत्वा संकल्पितं यच्छ्रीविष्णुसहस्रनाम -सत्यभाष्यस्य नवीनं संशोधितं संस्करणं वर्षाभ्यन्तरे साधनीयमिति। गुरोर्वासिष्ठस्य आशीर्वादमुद्रयांकितोऽयं सत्सङ्कल्प इदानीं पूर्णतां यातीति वीक्ष्य कस्य शुचि मनो नानन्दितं स्यात्। अस्मिन्नवसरे श्रीविष्णुसहस्रनाम-सत्यभाष्यस्य नवीनमिदं संशोधितं संस्करणमधिकृत्य किञ्चिन्निवेद्यते।

अस्य संस्करणस्य संक्षिप्तेतिहासः

२०५२ तमे वैक्रमाब्दे श्रावणशुक्लपौर्णमास्यां (१०.८.१९९५) 'देवसदने' समायोजिते श्रावणीपर्वणि श्रीमहेशकुमारभाडामहोदयेन श्रीविष्णुसहस्रनाम-सत्यभाष्यस्य नवीनसंस्करणस्य प्रबन्धार्थं संकल्पो गृहीतः। तदनन्तरं दिल्ल्यां 'मोहित ग्राफिक्स' संगणकयन्त्रकेन्द्रेऽस्याक्षरयोजनं प्रारब्धम्। ग्रन्थस्य आधारपाठसंशोधनाय सम्पादनाय च श्रीरत्नलालशास्त्री रमाकान्तशुक्लश्च ब्रह्मर्षिवासिष्ठेन अवसरं लम्भितौ। १५-१-१९९६ तारिकायां (मकरसंक्रान्तिपर्वणि) भिवान्यां देवसदने संगणकयन्त्रसिद्धाया पाण्डुलिप्या अधिनवीनसंस्करणं प्रणीतावतरणिका ब्रह्मर्षिणा श्रीवासिष्ठमहाभागेन स्वहस्ताक्षरैर्विभूषिता। अतोऽनन्तरमपि ग्रन्थस्य सूक्ष्मेक्षिकयाधारपाठोऽक्रियत। विगतसंस्करणे लब्धानां मुद्रणगतानामशुद्धीनां संशोधनं यथाशक्ति अक्रियत। क्वचिद् ग्रन्थे ग्रन्थकर्त्रा कानिचित् परिवर्तनानि परिवर्धनान्यपि कृतानि। अत एकवारं पुनरपि ग्रन्थस्य अक्षरयोजनायां संशोधनमनिवार्यममन्यत। २०५३ तमे वैक्रमाब्दे वैशाखकृष्णसप्तमीतो (१०.४.१९९६ तः) भिवान्यां देवसदने श्रीविष्णुसहस्रनाम- सत्यभाष्यस्य नवीनसंस्करणावसरे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ग्रन्थकर्त्रा श्रीविष्णुसहस्रनाम-सहस्राधिकपाठानुष्ठानमायोजितं यदद्य पण्डितश्रीरत्नलाल शास्त्रिवर्यस्याचार्यत्वे पूर्णतां गतम्। अस्मिन्ननुष्ठाने पठितस्य सङ्कल्पस्य पाठोऽग्रे दीयते:–

"संकल्प:–देशकालौ संकीर्त्य वासिष्ठगोत्र: सत्यदेवशर्माहं श्रीसाम्बसदाशिव-कृपया बहुलायासं विविधशास्त्रज्ञानं यथायथमधिगत्य अनेकजन्म- सिद्धसंस्कार: ईशप्रेरणया तेनैव ज्ञानसन्दोहेन पूर्णस्य ब्रह्मण: प्रसादेन मम बुद्धौ वाचि लेखन्यां कृताधिकारस्य परमस्पष्टस्य महाबुद्धेर्महावीर्यस्य गुरोर्गुरुतमस्य श्रीविष्णो: वाङ्मयीं मूर्तिम् आराधयितुं सर्वशक्तिमत: शक्त्या लिखित्वा यज्ञेशरूपस्य श्रीविष्णुसहस्र-नामस्तोत्रस्य सत्यभाष्ययज्ञं पूरयित्वा कृतज्ञं भगवन्तं प्रति स्वां कृतज्ञतां प्रकटयन् पूर्वं प्रकाशितस्य सम्प्रति दिव्यभव्यरूपेण प्रकाशितत्वात् मूलग्रन्थवत् सत्यभाष्यस्यापि सर्वपापभयापहत्वसिद्धये सर्वं सर्वरूपाय समर्प्य तत्प्रसादत: आत्मन: दीर्घायुरारोग्यप्राप्तये स्वस्तिदस्य कृपया प्रियाणां सहायकानां स्वस्तये च श्रीविष्णुसहस्रनामस्तोत्रस्य सहस्राधिकान् पाठान् सप्तभि: ब्राह्मणै: सप्तभिर्दिवसै: कारयिष्ये।

एतस्य कर्मण: निर्विघ्नतापूर्तये गणेशजलेशग्रहादीनाम् पूजनं ब्राह्मणवरणं प्रतिनिधिवरणं च करिष्ये।"

इत्थं २०५२ वैक्रमाब्दस्य श्रावणशुक्लपूर्णिमात: २०५३ तमवैक्रमाब्दस्य चैत्रशुक्लपूर्णिमां (३-४-१९९६) यावदयं ग्रन्थो मुद्रणालये प्रापयितुमर्हतां गत:। २०५३ तमवैक्रमाब्द–वैशाखकृष्णसप्तमीतस्त्रयोदशीपर्यन्तं विष्णुसहस्रनाम-सहस्राधिकपाठानुष्ठानेऽस्य ग्रन्थस्य छायाप्रतिलिपि: साक्षित्वेन व्यराजत। अद्यप्रभृति चास्य मुद्रणप्रक्रिया प्रारभ्यते। विंशतिदिवसाभ्यन्तरे पुटबन्धद्वये ग्रन्थोऽयं सज्जितो भवेदित्याशास्यते।

ग्रन्थस्य पूर्वसंस्करणाभ्यामस्य नवीनस्य संस्करणस्य स्वरूपे किञ्चित्परिवर्तनं सञ्जातम्। तद्यथा -

(१) **नाम**–अस्य ग्रन्थस्य नाम **'श्रीविष्णुसहस्रनाम-सत्यभाष्यम्'** इति मुद्रापितम्। १९७१ तमेशवीयेऽब्दे प्रकाशितस्य 'श्रीविष्णुसहस्रनामस्तोत्र'स्य द्वितीय भागस्य पृष्ठे इदं नाम अंकितमस्ति यद्यप्यावरणपृष्ठे 'श्रीविष्णुसहस्रनामस्तोत्रम् (सत्यभाष्यसहितम्)' इति मुद्रापितं वर्तते। भाविषु संस्करणेष्वप्येतन्नामैव ग्रन्थकारानुमतं भवेत्। इत: पूर्वं प्रकाशितेषु चतुर्षु भागेषु 'श्रीविष्णुसहस्रनामस्तोत्रम्' इत्येतच्छीर्षकमपि अस्य नाम्न: पर्यायतया विद्वद्भिर्ग्राह्यम्। आयत्यां 'श्रीविष्णुसहस्रनाम-सत्यभाष्यम्' इत्येव नाम प्रसिद्धं भवेत्। पूर्वमयं ग्रन्थश्चतुर्षु भागेषु पं० मुंशीरामशर्मशास्त्रिकृतेन हिन्दी-भाषानुवादेन सहित: प्रकाशितोऽभूत्। इदानीञ्च भागद्वयेऽयं ग्रन्थ: संस्कृतमूलमात्रमेव प्रकाश्यते। प्रथमे भागे (पूर्वार्द्धे) श्रीविष्णो: पञ्चशतनाम्नां

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(१-५००) किञ्च द्वितीये भागे (उत्तरार्द्धे) अपि पञ्चशतनाम्नां (५००-१०००) सत्यभाष्यमन्तर्भवति।

(३) **क्रमः पृष्ठसंख्या च** –ग्रन्थस्य भागद्वयेऽपि प्रारम्भिकपृष्ठेषु आभ्यन्तरमावरणपृष्ठद्वयं संस्कृत आङ्गलभाषायां च दीयते। ततोऽस्य संस्करणस्य सम्पादकमण्डलसदस्यानां सूची, तदनु च '**क्रमः**'-इति शीर्षकेण विषयसूची दीयते। अत्र '**क्रमः**' '**कृतिः**' '**कर्ता**', **सुपर्ण**–इत्येतानि श्रीविष्णोर्नामान्येव सूचीपृष्ठे नेत्रपथमवतरन्ति। ततश्च सम्पादकीयं दीयते। एतेषु पृष्ठेषु पृष्ठसंख्या 'अ-ए' पर्यन्तं दीयते। सत्यभाष्यात्प्राक् ग्रन्थकर्तुरवतरणिका, सहस्रनामसंग्रहीतारं प्रति सत्यभाष्यकृतः कृतज्ञताप्रकाशनम्, पं० युधिष्ठिरमीमांसकप्रणीतः ग्रन्थकर्तुः परिचयः, पं० मुंशीरामशर्मशास्त्रिलिखितो भाष्यकारविषयकोऽनुभवः किञ्च विष्णुसहस्रनामस्तोत्रस्य माहात्म्यम्, आत्रेयपुनर्वसोर्वचनं, सत्यभाष्यकर्तुर्मङ्गलाचरणं, भाष्यकर्तुरात्मभावप्रकाशनम्, भूमिकारूपा पञ्चदश श्लोकाः, विष्णुसहस्रनामस्तोत्रस्य समाहात्म्याङ्गविन्यासो मूलपाठः, ततश्च सत्यभाष्यं दीयन्ते। प्रथमभागस्य 'क' परिशिष्टे एकतः पञ्चशतपर्यन्तं (१-५००) श्रीविष्णोर्नाम्नां संस्कृतवर्णानुपूर्व्या सूची दीयते। भूमिकाभागे सुपर्णाङ्काः १-५८ पर्यन्तं, सत्यभाष्ये १-१०३४ पर्यन्तं प्रथमभागस्य परिशिष्टे च क-न पर्यन्तं दीयन्ते। द्वितीयभागे प्रथमपरिशिष्टे नमस्कारार्थं हवनार्थं च श्रीविष्णुसहस्रनाम्नां चतुर्थ्यन्तानि रूपाणि दीयन्ते। द्वितीये परिशिष्टे श्रीविष्णुसहस्रनाम्नां (१-१०००) संस्कृतवर्णमालानुसारं सूची दीयते। तृतीये परिशिष्टे 'सत्यभाष्ये' समागतानि "भवति/भवतः/भवन्ति चात्रास्माकम्' इति वाक्यानुगतानि पद्यानि 'श्रीविष्णुकाव्यम्' इत्येतच्छीर्षकान्तर्गतं संकल्यन्ते। चतुर्थे च परिशिष्टे द्वितीयभागस्थानां श्रीविष्णुनाम्नां (५०१-१०००) संस्कृतवर्णानुपूर्व्या सूची दीयते। परिशिष्टेषु पृष्ठसंख्या १०३५-१३५० पर्यन्तं दीयते। ततोऽनन्तरं पूर्वसंस्करणस्थे सम्मत्यौ दीयेते।

(४) **अक्षरयोजना**- ग्रन्थे श्रीविष्णुसहस्रनामस्तोत्रं, तत्पदच्छेदः, सत्यभाष्यम्, उद्धृतानि व्याकरणसूत्राणि, वेदमन्त्राः, विष्णुकाव्यपद्यानि टिप्पण्यश्च विभिन्नाकारेष्वक्षरेषु दीयन्ते। संगणकयन्त्रे पञ्चमवर्णसंयुक्ताक्षराणां सौलभ्यात्तान्येव प्राधान्येन प्रयुक्तानि। देवनागरीलिप्यां पञ्चमाक्षराणां कृतेऽनुस्वारस्य प्रचलनात् क्वचित्क्वचित् अनुस्वारोऽपि प्रयुक्तो दृश्येत। संख्यासूचनार्थं देवनागरीलिप्यामेवाङ्का दीयन्ते।

(५) श्रीविष्णुकाव्यस्य पद्येषु किञ्च सत्यभाष्ये ग्रन्थकर्तृसम्मतानि कतिपयानि शब्दपरिवर्तनानि संजातानि येषां ज्ञानं पूर्वसंस्करणयोस्तुलनात्मकेऽध्ययने कृते सुगमतया लभ्येत। अस्मिन् संस्करणे तानि पद्यान्यपि ग्रन्थकृता पूरितानि यानि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पूर्वसंस्करणयोर्मुद्रकानवधानेन अपूर्णत्वेन मुद्रापितान्यासन्। चतुर्थ्यन्तरूपसूच्यां कोष्ठकेषु केषुचित् संस्करणेषु सम्प्राप्तानि रूपाण्यपि वैकल्पिकतया दीयन्ते।

(६) **चित्राणि** -ग्रन्थे यथास्थानं कानिचन चित्राण्यपि दीयन्ते। सत्याग्रहिणः श्रीसत्यदेववासिष्ठमहाभागस्य १९३९ तमेशवीयेऽब्दे गृहीतं छायाचित्रमप्येतेषु चित्रेष्वन्तर्भवति। १९९६ तमेशवीयेऽब्दे गृहीतान्यपि चित्राण्यत्र सन्ति। चित्राणामधस्तात् सत्यभाष्यकर्तुः परिचायकश्लोका गद्यपंक्तयो वाप्यनेकत्र दीयन्ते।

ग्रन्थे यथामति अशुद्धीनां विलोपार्थं यत्नो विहितस्तथापि मानवस्वभावदौर्बल्यात् सम्पादकमण्डलस्य अनवधानात् अन्यान्यपि संशोधनान्यपेक्षेरँस्तदा विद्वांसोऽत्र विषयेऽस्मान् सूचयित्वा सानुक्रोशा भवेयुः। प्रूफगतानामशुद्धीनां कृते सम्पादक-मण्डलमेव उत्तरदायित्वमावहति। तदर्थं संम्पादक-मण्डलं क्षमिणां वरं भगवन्तं तद्भक्तान् पाठकाँश्च सविनयं क्षमां याचते।

ग्रन्थसज्जायै विविधपरामर्शदानार्थं दिल्लीदूरदर्शनोपनिदेशकः श्री शरददत्तः, आवरणचित्रस्य रचनार्थं चित्रकृत् श्रीनन्दकत्यालः, छायाचित्रकारः श्री आर.के. शर्मा, अक्षरयोजकौ श्रीशंकरप्रसाद-हरिदयालसिंहौ, अक्षरयोजनापरामर्शदाता 'मोहित ग्राफिक्स'-स्वामी श्रीसुदर्शनकुमारमल्होत्रा आधारपाठ (प्रूफ) संशुद्धौ परिशिष्ट-सूचीनिर्माणकर्मणि च सहयोगदातारो डा० रामेश्वरदत्तशर्मा आनन्दवर्धना-भिनवशुक्ल -दिनेशवत्स-दीपक-मीनाक्षी- विनोद अरोडा-प्रभृतयः साधुवादैः सभाज्यन्ते। दिल्लीतो भिवानीं भिवानीतश्च दिल्लीं नैकधा मां प्रापयन् श्रीमहेशकुमारस्यातन्द्रितः सारथिः श्रीमहेन्द्रः सम्पादकमण्डलसदस्येभ्यः सर्वविधसौख्यानि प्रयच्छन्तो देवसदनस्य व्यवस्थाकारिणः सर्वश्री जनकराजशर्मा, कमलेन्द्रः, पं० जगन्नाथ शर्मा, प्रभुदयालुः लक्ष्मीनारायणः राजवीरश्च ससाधुवादैः शुभाशीर्भिः सभाज्यन्ते।

प्रबन्धसम्पादकस्य प्रबन्धकौशलेन स्नेहशालीन्यगुणेन च निबद्ध एतत्पंक्तिलेखकोऽनेकशो देवसदने आगत्य गुरोर्मुखात्तत्त्वप्रतिपादकान् विचारानश्रौषीत्। तस्य जीवनस्य प्रेरकप्रसङ्गा अप्यनेन श्रुताः। तं विषयीकृत्य देवसदने कार्यव्यापृतानां कर्मकराणाम्, अभ्यागतानाम् चिकित्सार्थं समागतानाञ्चातुराणाञ्च मुखादनेके कथाप्रसङ्गा अनेन जनेनाकर्णिताः। श्रुतदृष्टप्रमाणैरस्य महात्मनो गुरुवर्यस्य यद् व्यक्तित्वं साक्षात्कृतं तस्य सम्यक् प्रतिपादनं शब्दैः कर्तुं न शक्यते। यथा पं० युधिष्ठिरमीमांसकेन यथा च पं० मुंशीरामशर्मशास्त्रिणा बहोः कालात्पूर्वमस्य महात्मनः स्वभावः साक्षात्कृतस्तथैवानेन जनेनाप्यस्य विगतमासचतुष्टये सर्वप्राणिहितावहा दिनचर्या दृष्टा। ब्राह्मे मुहूर्त उत्थाय परमेश्वरं ध्यात्वा, स्वाध्याय-प्रवचने कृत्वा, सुदूरस्थितेभ्यो ग्रामेभ्यो नगरेभ्यश्च समागतानामातुराणां नाडीं परीक्ष्य तेभ्य आरोग्यं प्रयच्छन्नयं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

महात्मा प्राप्तधनेन परोकृतिव्रतमेव नित्यमाचरति। अस्याश्रमे आगत्य मयूराः, मर्कटाः, शुकाः, पिकाः, श्वानोऽपि स्वभागधेयं तथैव प्रेम्णा साधिकारञ्च लभन्ते यथात्र प्राप्ता नरनार्यः। कदापि कश्चिद्वनीपकः, कदापि कश्चित् कम्बलार्थी साधुः, कदापि च कश्चिद्विद्वान्–एतस्य सकाशे आगच्छति। सकामो वा स स्यान्निष्कामो वा स्यात्, वासिष्ठगुरुस्तं पूर्णकामं विधायैव विसर्जयति। सदैव मधुरसौम्यवदनः सात्त्विकतां वितरन्नयमाशुतोषः शिव इवाभाति। षडंगवेदानामप्रतिमो विद्वान् अप्रतिमो विनयी अप्यस्ति। अस्य वैदुष्यस्य के वयं मातारः स्मः ! विष्णुसहस्रनामस्तोत्रस्य ब्रह्म-सूर्य-परकं व्याख्यानं यथानेन व्यधायि न तस्य समता केनापि व्याख्यानेन कर्तुं शक्यते। पञ्चाशद्वर्षेभ्योऽखण्डज्योतिः साक्षात्कृत्य जातवेदसमुपासमानोऽयं ऋषिवरः स्वदर्शनमात्रेण जनानां दुर्बुद्धिमपनयति। यमप्यसावेकवारमङ्गीचकार न तं कदापि तत्याज। अस्मिन्नेव जन्मनि समेषामानृण्यमिच्छति। ऋषेर्वासिष्ठस्य जीवनदर्शनं 'सत्याग्रहनीतिकाव्ये (५/३/१०) इत्थं श्लोकबद्धमस्ति–

लोकज्ञश्चेन्न वेदज्ञो वेदज्ञश्चेन्न लोकवित्।
एकपक्षखगस्येव वाक्यं तस्यावसीदति।।

इदमेव जीवनदर्शनं श्रीविष्णुकाव्येऽभिव्यक्तिमाप–

यो वेद लोकं स हि वेद सूत्रं
यो वेद सूत्रं स हि वेद विष्णुम्।। (सत्यभाष्यम्, पृ० ३५)

भाष्यकर्तुर्निश्चिता धारणास्ति–

'जगद्वेदस्य व्याख्यानं वेदो विश्वप्रकाशकः।'

(सत्याग्रहनीतिकाव्यम् २/३/९)

सत्यभाष्यकर्तुः श्रीवासिष्ठस्य चरकसंहितास्थिते आत्रेयपुनर्वसोः

विष्णुं सहस्रमूर्धानं चराचरपतिं विभुम्।
स्तुवन्नामसहस्रेण ज्वरान् सर्वान् व्यपोहति।। (चरकसंहिता ३/३१२)

इत्यस्मिन् वचने श्रद्धा यथा यौवने आसीत्तथैवाद्य चतुरशीतिवयसि अपि विद्यते। श्रीवासिष्ठो मासद्वयपूर्वं रुजाक्रान्तो बभूव। पीडां पिबन्निव सः सौम्याननो विष्णोर्नामानि जपन्नेव ज्वरकष्टं तीर्णवान्। रोगकष्टाक्रान्तोऽप्ययं स्थितप्रज्ञः पार्श्वे समागतानां जनानां जिज्ञासानां यथोत्तरं ददातिस्म तद्वीक्ष्य विस्मयमारोहति अस्मादृशः सर्वोऽपि जनः।

ग्रन्थकर्तुः 'सत्याग्रहनीतिकाव्यस्य' 'नाडीतत्त्वदर्शनस्य' चापि नवीने संस्करणे मुद्रणाधीने स्तः। पं०मुंशीरामशर्मशास्त्रिणा कृतस्य सत्यभाष्य- हिन्दीभाषानुवादस्यापि नवीनं संस्करणं मुद्रणाधीनमस्ति। श्रीविनोदकुमारशर्मणा सत्यभाष्यस्य अंग्रेजीभाषायां रूपान्तरं कृतम्। तस्यापि प्रकाशनस्य योजना वर्तते। एतेषां ग्रन्थानां प्रकाशनं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शीघ्रमेवाशास्यते। यथा पूर्वं प्रकाशितानामेतेषां ग्रन्थानां काले काले प्रकाशितानां सर्वेषामपि संस्करणानां सम्पूर्णोऽपि व्ययः गुरुवर्यैर्वासिष्ठमहाभागैः स्वसत्कर्मार्जितेन धनेन कृतस्तथैव सत्यभाष्यस्यास्य संस्करणस्य सर्वोऽपि व्ययस्तैरेव कृतः।

षट्त्रिंशद्वर्षेषु देवसदनेऽनवरतं गुरोर्वासिष्ठस्य तपसा, औदार्येण, परोपकारेण, विष्णोराराधनया, जगत्कल्याणवितरणेन अन्यैश्च लोकहितावहैराचरणैर्भिवान्या भूमिः पावनतपोभूमिरेवाबभौ। १९५९-६० वर्षतः, यदाप्रभृति, वासिष्ठमहाभागेन सत्यभाष्यस्य रचना प्रारब्धा, भिवानीवास्तव्यः पण्डितसत्यनारायणदाधीचः प्रतिदिनं श्रीविष्णुसहस्रनामस्तोत्रस्य पञ्च पाठान् करोति तदर्थञ्च श्रीवासिष्ठगुरुस्तस्मै समुचितां दक्षिणां प्रयच्छति। इत्थं हि विगतषट्त्रिंशत्प्रायवर्षेषु श्रीवासिष्ठ-प्रेरणया भिवान्यां नित्यमेव विष्णोर्नामानि पठ्यन्ते। गतसप्ताहे सप्तभिर्ब्राह्मणैः श्रीविष्णुसहस्रनामस्तोत्रस्य ये सहस्राधिकाः पाठाः अक्रियन्त ते पूर्वोक्तां शृङ्खलामेव पुष्णन्ति।

अस्माकं प्रार्थना- अस्मिन्नवसरे विश्वेश्वरं वयं प्रार्थयामहे यद् विष्णुसहस्रनामस्तोत्रमिव सत्यभाष्यमप्यधीयानाः शृण्वानाः परिकीर्तयन्तश्च जना नाशुभं किञ्चित् प्राप्नुयुः। धर्मार्थिनो धर्मम्, अर्थार्थिनोऽर्थान्, कामार्थिनः कामान्, प्रजार्थिनः प्रजाञ्च प्राप्नुयुः। विपुलं यशः, ज्ञातिप्राधान्यम्, अचलां श्रियं, अनुत्तमं श्रेयश्च ते प्राप्नुयुः। ते न भयं क्वचिदाप्नुयुः, वीर्यं तेजश्च विन्देयुः, अरोगा द्युतिमन्तो बलरूपगुणान्विताश्च भवन्तु। रोगार्ता रोगात्, बद्धा बन्धनात्, भीता भयात्, आपन्ना आपदो मुच्येरन्। ते दुर्गाण्याश्वतितरन्तु; सर्वपापविशुद्धात्मानश्च भवन्तु; न तेषां क्वचिदशुभं भवतु; तेषां जन्ममृत्युजराव्याधिभयं न जायताम्-

सत्यभाष्यमधीयानः श्रद्धाभक्तिसमन्वितः।
युज्येतात्मसुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः॥

सम्पादक-मण्डल-सदस्याः ब्रह्मर्षेर्वासिष्ठस्य शुभाशीर्वादान् स्वजीवनस्य पुण्योदर्कत्वेन स्वीकृत्यात्मनः कृतकृत्यान् मन्यन्ते। सत्यभाष्यकर्तुरियं कामना सफला भवतु-

सर्वे सुखेन वर्धन्तां विष्णुस्तेषां प्रसीदतु।
सत्यभाष्यं सदा तिष्ठेद् यावच्चन्द्रदिवाकरौ॥



(रमांकान्त शुक्लः)
प्रधानसम्पादकः

देवसदनम्, भिवानी-१२५०२१
वैशाखकृष्णत्रयोदशी, २०५३ वि.सं.
दिनांकः-१६.४.१९९६

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अवतरणिका

विष्णोर्नामसहस्रस्य वेदोक्तास्ति प्रहेलिका ।
यस्या जिज्ञासया सम्यक् प्रायतन्त महर्षिणः ।।१।।

नष्टे कालेन तज्ज्ञाने या तथैव प्रहेलिका ।
नृणां ज्ञानविशुद्धानां पुरतो झिल्मिलायते ।।२।।

यत्र तत्र यथाज्ञानं ज्ञाननिर्धूतकल्मषाः ।
विग्रहीतुं यतन्ते तां गूढामर्थप्रहेलिकाम् ।।३।।

परिश्रममिमं तेषां दुष्करं ज्ञानचक्षुषाम् ।
सङ्ग्रहीता विजानाति, कीदृक् तत्तात्त्विकं पदम् ।।४।।

बाल्ये पितृमुखादेतदश्रौषं स्तोत्रमन्वहम् ।
तदाविर्भूतसंस्कारः कालेनाभूत्तिरोहितः ।।५।।

ग्रस्तस्य कालवेगान्मे सन्निपातेन यौवने ।
तापिता हेमरेखेव स्मृतिरुज्ज्वलतां गता ।।६।।

श्रद्धावर्धत मे नित्यं विष्णुस्तोत्रजपे ततः ।
अग्निवेशो ज्वरघ्नेषु चास्य योगमुपादिशत् ।।७।।

तथा च चरके—

'विष्णुं सहस्रमूर्द्धानं चराचरपतिं विभुम् ।
स्तुवन्नामसहस्रेण ज्वरान् सर्वान् व्यपोहति'।।

पठतो वैष्णवं स्तोत्रं वर्षाणि बहुलानि मे ।
व्यतीतानि तदायम्मे दिव्यो भावः समुत्थितः ।।८।।

विष्णोर्नामसहस्रस्य कुर्यां भाष्यं सविस्तरम् ।
विष्णोर्वास्तविकाख्यानं वेदवाक्यसमर्थितम् ।।९।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विष्णुः स्वयं मदन्तःस्थं बोधयन्नात्मनः पदम् ।
सुस्पष्टं प्रेरयामास भाष्यलेखनकर्मणे ।।१०।।

बलं बुद्धिं वयो वीर्यं धनं साधनसम्पदम् ।
प्रादान्मे भाष्यनिर्माणे निमित्तं केवलं त्वहम् ।।११।।

नाहमालोचनां कुर्वे पूर्वभाष्यकृतामिह ।
स्वभाष्यं प्रणिनीषामि तेषामेव प्रसादतः ।।१२।।

मनोबुद्धी समाहृत्य त्यक्त्वा सर्वसुखस्पृहाः ।
आत्मनो हितमुद्दिश्य मया भाष्यं विनिर्मितम् ।।१३।।

त्रिदोषदोषमुग्धस्य यदज्ञातं भवेन्मम ।
तत्र मन्ये भवेद्दोषः स दोषो मन्निमित्तकः ।।१४।।

शम्भो ! समर्पये तुभ्यं भाष्यं यत्तव कीर्तनम् ।
एतेन नामयज्ञेन विघ्नान् सर्वान् परासुव ।।१५।।

अनेकविधविज्ञानं कणशः सञ्चितं मया ।
यत्तज्ज्ञेभ्योऽद्य पर्यन्तं भाष्ये पश्यन्तु तद्बुधाः ।।१६।।

वासिष्ठोपज्ञभाष्यस्य संश्रवात् पठनेन वा ।
स्मरणेनाथवैकोऽपि साक्षरो व्यक्षरोऽपि वा ।।१७।।

स्वान्तःसन्तोषमाप्नोति विष्णोर्गुणगणं स्मरन् ।
तदा मे सफलं सर्वं यत् सोढं व्ययितञ्च यत् ।।१८।।

संक्षिप्तो नामनिर्देशो भवत्येव निसर्गतः ।
व्याख्या सविस्तरा तस्य भवेदेव स्वभावतः ।।१९।।

तथा चोक्तं चरके—

*'विस्तारयति लेशोक्तं संक्षिपत्यतिविस्तरम् ।
संस्कर्ता कुरुते ग्रन्थं पुराणञ्च पुनर्णवम्' ।।*

गद्योक्तो यः पुनः पद्यैरर्थः समनुगीयते ।
तद्व्यक्तिव्यवसायार्थं द्विरुक्तः स न गर्ह्यते ।।२०।।

'भवती' तिक्रियायुक्तं 'चात्रास्माकम्' पदेन तु।
संकेत्य दर्शितः सारः पद्यैरेकादिसंख्यकैः ।।२१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मर्त्यो दोषमयो दोषान् नैकः स्वान् द्रष्टुमर्हति ।
तस्माद्विज्ञैरपेक्ष्यन्ते ज्ञानिनः स्वसहायकाः ।।२२।।

तालुग्रामस्य वास्तव्यो 'मुन्शीरामः' सुधीरयम् ।
भाष्ये सहायको मेऽभूच्चिरमव्यग्रमानसः ।।२३।।

विशोध्य संस्कृताशुद्धीस्तद्भावं चार्यभाषया ।
प्रकाशयन् यथाभावं साहाय्यमकरोन्मम ।।२४।।

सोऽयं साधुवादार्हः सुखं जीव्याच्छिवाशिषा ।
विघ्नबाधाविनिर्मुक्तो नामयज्ञपरायणः ।।२५।।

'रुद्रदेवस्त्रिपाठी' च मन्दसौरभवः सुधीः ।
साहाय्यमत्र भाष्ये मे प्रादाच्छोधनकर्मणि ।।२६।।

स्तुतिगर्भवचोभिस्तं संस्तौम्यानृण्यलिप्सया ।
अन्यानपि यथानाम युनज्मि शुभकाम्यया ।।२७।।

केशवदेव आत्रेयः—

भिवान्याम्मे सखा पूर्वः केशवः सत्यवाक् सुहृत् ।
क्षपयन् विफलं कालं यथाबुद्धिबलोदयम् ।।२८।।

सोऽयं बहूनि वर्षाणि व्यतियाप्य मदन्तिके ।
विष्णोर्नामसहस्रस्य पाठेन श्रवणेन च ।।२६।।

निजात्मोत्थानमालक्ष्य जातो ''भक्तवरः''सुधीः।
साधनानि समुच्चेतुं सर्वयत्नपरोऽभवत् ।।३०।।

देवसदनस्य निर्माणार्थं केशवदेवात्रेयाय प्रेरणाप्रदानम्—

चिरसाध्यानि कार्याणि न पूर्तिं यान्ति कर्हिचित् ।
यदि स्थानं न लभ्येत स्वतन्त्रं दोषवर्जितम् ।।३१।।

विघ्नञ्च भाष्यनिर्माणे स्थानाभावं विचिन्तयन् ।
उपेत्य केशवं सर्वमितिवृत्तं न्यरूपयम् ।।३२।।

मया संप्रेरितो भूमेर्दर्शने यत्नमास्थितः ।
सर्वथा सम्परीक्ष्यायं निरचेष्टैषकं स्थलम् ।।३३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथारोपितभारोऽयं स्वयमेव शुभे दिने ।
संगृह्यादिमारम्भान् पूजयित्वादिमेष्टकाः ।।३४।।

मत्करेणेष्टकान्यासं, यथाकालमकारयत् ।
येनात्र देवसद्मेदं शनैरात्मानमादधौ ।।३५।।

व्ययः सर्वो मदीयोऽत्र केशवो मे सहायकः ।
भाष्यविघ्नविघाताय प्रायतिष्ट सदा शुचिः ।।३६।।

निर्बलस्य यथा यष्टिर्वृद्धायाश्च यथा सुतः ।
तथा केशवदेवो मे देवसद्मविधावभूत् ।।३७।।

तत आनृण्यकामोऽहं तच्छुभाकाङ्क्षयान्वहम् ।
प्रार्थये देवदेवेशं चिरंजीव्यात्तदाशिषा ।।३८।।

'शास्त्री वेदव्रतो' नाम वेदविद्याविभूषितः।
प्रकाशयति यन्त्रे स्वे भाष्यं सद्भावमास्थितः ।।३६।।

सीसकाक्षरसन्धाने कियत् कष्टं भवेदिति ।
अहं वेद्मि स वा वेत्ति तं स्तौम्यानृण्यलिप्सया ।।४०।।

शैवराणो मनुर्देवो वेदविद्याविभूषितः ।
सत्यभाष्ये सदोत्साहः सिद्धो मेऽभूत् सहायकः ।।४१।।

'श्रीमाननन्तरामो' मे पिता सर्वसुलक्षणः ।
ब्राह्मणःः सत्त्वसम्पन्नः सश्रद्धो वेदवाङ्मये ।।४२।।

तथा मे 'द्रौपदी' नाम्नी माता गुणगणान्विता।
पतिचर्यारता नित्यं साध्वी सत्यपरायणा।।४३।।

स्थाननिर्देशः—

भिवान्या उत्तरेणास्मद् 'देवसदन'मारभम्।
नृमनो नन्दयन्नद्या उपकूलं विराजते।।४४।।

ज्वलता ज्योतिषाखण्डं विशुद्धान्तरभूपदम्।
तमसास्पृष्टमद्यापि बिभ्रदादियुगश्रियम् ।।४५।।

तदालिङ्ग्य पुरस्ताच्च प्रवहन्ती सुनिर्मला ।
कुल्या साव्यक्तशब्देनाकर्षतीव मनांसि नः ।।४६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

देवसद्मानुरागेण साक्षात् त्रिपथगेव या ।
विभज्य त्रिभिरात्मानं स्त्रोतोभिः शोभते भृशम् ।।४७।।

भूयः पुष्णाति तां शोभामुपकूलस्थितो वटः ।
प्रवहा सापि तं पाति पयःपानेन पुत्रवत् ।।४८।।

भाष्यनिर्माणसंलग्नकालनिर्देशः—

दैनिका नैशिकाश्चैव क्रिया व्युत्क्रम्य चिन्तयन् ।
हायनै रविभिर्भाष्यमनैषं पूर्णतामहम् ।।४६।।

स्थानपरिचयः—

नगरेऽम्भःप्रदानाय निर्मिताः सन्ति वापिकाः ।
"चाङ्ग" मार्ग प्रसिद्धस्य पार्श्वेऽस्ति सदनं मम ।।५०।।

वटवृक्षो महानत्र सदने सघनः स्थितः ।
शाखाहस्तैरिहास्माकं सन्तापं शमयत्ययम् ।।५१।।

देवसदनम्
चाङ्गमार्गः=महममार्गः, भिवानी ।
६।५।१६६६ ई० सन् सत्यदेवो वासिष्ठः

अधिनवीनसंस्करणम्

बाहुबाणनभोनेत्र(२०५२)मिते वैक्रमवत्सरे ।
माघे मासेऽसिते पक्षे नवम्यां चन्द्रवासरे।।१।।
सत्यभाष्यस्य सन्नूत्ने संस्करणे प्रकाशिते।
आनृण्याय सहायानां किञ्चिदत्रोच्यते मया।।२।।
शास्त्रिणो हरिरामस्य महोदारस्य धीमतः।
सुपुत्रः श्रीमहेशाख्यः पितृवत्सुव्रते स्थितः।।३।।
श्रावणीपुण्यवेलायां विष्णोर्नाम्नां तदीरया ।
पुनःसंस्करणार्थाय संकल्पं कृतवान् स्वयम्।।४।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आनन्दोऽवरजस्तस्य विधिशास्त्रविशारदः ।
आत्मानमत्र सत्कार्ये सोत्साहं सन्न्ययूयुजत्।।५।।
श्रीमहेशकुमारेण यथा ग्रन्थप्रकाशने ।
निष्ठा प्रदर्शिता तस्याः शब्दैर्न स्यात्प्रकाशनम्।।६।।
दिल्लीपुर्यां स्थितः श्रीमान् ब्रह्मानन्दतनूद्भवः।
श्रीरमाकान्तशुक्लाख्यः सुकण्ठः संस्कृतप्रियः।।७।।
परिश्रमी गुणग्राही नित्यमध्ययने रतः।
रत्नलालाभिधः शास्त्री विद्याविनयशोभितः ।।८।।
व्यापृतौ यौ नवीनस्य संस्करणस्य साधने।
सम्पादनेऽथ संशुद्धौ प्रूफपाठे दिवानिशम्।।६।।
श्रीविष्णोः कृपया स्यातां द्वावप्येतौ विपश्चितौ।
विष्णोर्नामसहस्रस्य पाठे नित्यमनुव्रतौ ।।१०।।
सुदर्शनकुमारोऽयं मल्होत्रोपाह्वविश्रुतः ।
वर्णयोजनयन्त्रेशो मुद्रणस्य प्रसाधकः ।।११।।
दूरदर्शनलब्धश्रीः शरद्दत्तो महायशाः ।
ग्रन्थसज्जाविधानाय सत्परामर्शदायकः ।।१२।।
कमलेन्द्रः सदोत्साही व्यलसः साधनार्जने ।
ये नानुकीर्तिताश्चात्र सत्यभाष्यसहायकाः।।१३।।
सर्वे सुखेन वर्धन्तां विष्णुस्तेषां प्रसीदतु।
सत्यभाष्यं सदा तिष्ठेद् यावच्चन्द्रदिवाकरौ।।१४।।

देवसदनम्
महममार्गः, भिवानी-१२५०२१
माघः कृष्ण-नवमी, २०५२ वि०,
मकरसंक्रान्तिः
१५।१।१६६६ ई० सन्

सत्यदेव वासिष्ठ

(सत्यदेवो वासिष्ठः)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सहस्त्रनामसङ्ग्रहीतारं प्रति सत्यभाष्यकृतः कृतज्ञताप्रकाशनम्

भवगतः सर्वदेवरूपत्वाद् देवानाञ्च गुणकृतनाम्नामनन्तत्वादनन्तनाम्नो भगवतो विष्णोः सहस्त्रं श्रेयस्कराणि नामानि वेदात् संगृह्य भगवन्तं स्तुतवता महर्षिणा वेदव्यासेन बहूपकृतो लोको वेदश्च, अन्यथा को नाम लौकिकबन्धनैर्बद्धो मानव एवंविधाद् गहनाद् वेदाद् विविच्य वक्तुं शक्नुयात्, लोकश्च कथं श्रेयोमार्गोपलब्ध्या श्रेयसा युज्येत। तथा हि—

एकोऽप्यग्निः सूर्यो वा बहुभिर्गुणकृतनामभिः—**"अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन्। अर्कस्त्रिधातू रजसो विमानोऽजस्त्रो घर्मो हविरस्मि नाम"** (ऋक् ३।२६।७) इत्यादिभिः स्तुतो भवति। तत्र को नामानित्यबुद्धिर्मानवस्तितउना सम्पूयेवायमेवाग्नेः श्रेयस्करन्नामेति विवेक्तुं शक्नुयात्, यदि भगवता महर्षिणेयान् प्रयासो न विहितः स्यात्। न चेयतेवालम्, अपितु बहुत्र सोद्घोषं वक्ति वेदो, यथा—**"एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः"** (ऋक् १।१०६।१); **"तदु चन्द्रमा तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः"** (यजुः ३२।१)।

यश्चायं विष्णुसहस्त्रनामस्तोत्रे सहस्त्रशब्दस्य निर्देशः, सोऽपि नियताया दशगुणितायाः शतसंख्याया आनन्त्यस्य वाचकः **"सहस्त्रिणं वज्रबाहुम्"** इत्यादि वेदमूलकश्च। कविरपि च्छन्दोभिः किञ्चिद् वस्तु वर्णयन् गुरुलघ्व्यादिमात्राभिर्निबद्धत्वाच्छन्दसां स्वयमपि च्छन्दोरज्ज्वा निबद्धस्तत् पर्यायनामभिर्वर्णयति, न पुनर्नूतनानि नामान्याविष्करोति, न च वस्तुतत्त्ववचनस्य प्राधान्यं जहाति। अमुथैव देवो देवानां गुह्यानि नामान्याविष्करोति। छाया यथात्र मन्त्रे—**"हरिः सृजानः पथ्यामृतस्येयर्त्ति वाचमरितेव नावम्। देवो देवानां गुह्यानि नामाविष्कृणोति बर्हिषि प्रवाचे।"** (ऋक् ६।६५।२); **"कविर्गीर्भिः काव्येना कविः सन्।"** (ऋक् ६।६६।१७) इत्यादि। अत एव मया स्वात्मनः शुद्ध्यै वाङ्मनसयोर्दोषापमृष्ट्यै च प्रतिनाम 'भवति चात्रास्माकम्' इति वाक्येन सङ्केत्य संक्षिप्तार्थो दर्शितः स्तुतश्च तन्नामनिर्दिष्टो विष्णुः सूर्यो वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्वचिदेकस्यैव नाम्नस्तदर्थकैरन्यैर्नामभिर्विस्तरो दर्शितः। यथा—भर्ग इति शुद्धार्थकन्नाम, तस्य च "**मार्गः, शुचिः, पवित्रम्, विशुद्धात्मा**" इत्यादिभिर्विस्तरः। "**स्वयम्भूरसि**" इति यजुर्वेदमन्त्रसिद्धः "**स्वयम्भूः**" इति नाम, तस्य "**आत्मयोनिः, स्वयञ्जातः**" आभ्यान्नामभ्यां विस्तरः। स्वयम्भूनामार्थकमेव "**स्वज**" इत्यपि नाम, तच्च "**स्वजो रक्षिताशनिरिषवः**" इत्यथर्व (३।२७।४) मन्त्रसिद्धम्। "**देवस्य नेतुः**" इत्यादियजुर्मन्त्रसिद्धं नेतेति नाम, तस्य च "**न्यायः**" इति विस्तरः। "**भूतभव्यभवत्प्रभुः**" इति नाम, तस्य "**भूतभव्यभवन्नाथ**" इति विस्तरः। दुर्ग इति नाम, तस्य "**दुर्लभः, दुर्गमः**" इति विस्तरः। "**अमरप्रभुः**" इति नाम, तस्य "**सुरेश्वरः सुरेशः सुराध्यक्ष**" इति विस्तरः। "**हिरण्यगर्भ**" इति नाम, तस्य "**रत्नगर्भ**" इति विस्तरः। "**सर्वदृग्**" इति नाम, तस्य "**सर्वदर्शी, सर्वतश्चक्षुः**" इति विस्तरः। "**अनेकमूर्तिः**" इति नाम, तस्य "**शतमूर्तिः**" इति विस्तरः। तथा "**पर्यवस्थितः**" इति नाम, तस्य च धातुभेदादर्थभेदात्समासभेदाच्च "**अजः**" इति विस्तरः।

भगवन्नाम्नां जपेन सुमतिरुदेति प्रार्थ्यते चात एव भगवान् तत्तन्नामभिः सुमतिप्राप्त्यै—तथा च मन्त्रः "**तमु स्तोतारः पूर्व्यं यथाविद ऋतस्य गर्भं जनुषा पिपर्तन। आस्य जानन्तो नामचिद् विवक्तन महस्ते विष्णो सुमतिं भजामहे**" (ऋक् १।१५६।३)। एतन्मन्त्रस्थ-आस्यपदेन विष्णोः समग्रस्य सम्बन्धिनो निर्देशः, तथा च "**वैष्णवमसि विष्णवे त्वा**" (यजुः ५।२१) तथा "**स्वयम्भूरसि**" (यजुः २।२६) इत्यादि मन्त्रलिङ्गम्। विष्णोर्वैष्णवस्य वा यत् तत् आस्यपदं निर्दिशति। प्रतिजानीते माहात्म्ये तथैव—

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे। (श्लोकः १२)

सम्पन्नो विपन्नो वा जीवः किञ्चिन्नाम भिक्षते, यन्नामजपेन सन्तुष्टो भगवान् विष्णुस्तन्मनोऽभिलषितं दद्यात्। तथा च मन्त्रलिङ्गम्—"**त्वं विश्वस्य धनदा असि श्रुतो य ई यजन्त्याजयः। तवायं विश्वस्य पुरुहूत पार्थिवोऽवस्युर्नाम भिक्षते**" (ऋक् ७।३२।१७)। तथा सनातनीं परम्परां जीवयन्तः शिष्या गुरोः सकाशान्नामभिक्षां भिक्षन्ते। उपदिशति च गुरुस्तान्—

सर्वे वेदा यत् पदमामनन्ति तपांसि सर्वाणि च यद् वदन्ति।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीम्योमित्येतत्।।
कठोप० १।२।१५।।

यानि च नामान्यग्नेः सूर्यस्य विष्णोर्वा तान्येव पवित्राणीति कृत्वा मरणशीला

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मनुष्या अप्यात्मानं तदर्थेन युयोजयिषन्तः स्वीकुर्वन्ति। तच्च यथा कश्चिन्मनुष्यो "रामानन्द" इत्याख्यां लभते, रामश्च विष्णुर्दशरथपुत्रो वा तत्र सन्देहः कोऽयं रामानन्द इति। कश्चिच्छिवानन्दाख्यां लभते, शिवश्च विष्णुः पार्वतीसहचरो वा, तत्र सन्देहः कोऽयं शिवानन्द इति। कश्चित् कृष्णानन्द इति नाम लभते, कृष्णश्च विष्णुर्महाभारतप्रसिद्धोऽर्जुनसखो वा, तत्र सन्देहः कोऽयं कृष्णानन्द इति। एवं कश्चित् स्वं भवानन्द इति नाम स्वीकुरुते, भवो विष्णुर्वृषवाहनो वा, तत्र सन्देहः कोऽयं भवानन्द इति। एवं सामान्यतो विवेचनेन ज्ञायते, यच्छनैः शनैः मनुष्यः पार्थिवगुणानुस्यूतानां मनुष्याणां रूपं ध्यायन् विस्मरति विष्णुं सत्यरूपमिति।

नामानि च तानि बहूनीति, नाम्नां बहुत्वे मन्त्रलिङ्गम्। यथा—"**प्रबुध्न्या य ईरते महांसि प्रनामानि प्रयज्यवस्तिरध्वरम्**" (ऋक् ७।५६।१४)। स्तोता क्वचित् स्तुतौ साभिप्रायं नामापि प्रयुङ्क्ते। यथा—"**प्र तत् ते अद्य शिपिविष्ट नामा**.......**ऽर्यः शंसामि वयुनानि विद्वान् तं त्वा गृणामि**" (ऋक् ७।१००।५)। प्रकृतिप्रत्ययाभ्यां भिन्नमपि नाम भवति समानार्थम्। यथा—

गोमायुरेको अजमायुरेकः पृश्निरेको हरति क एषाम्।
समानं नाम बिभ्रतो विरूपाः पुरुत्रा वाचम्।।

ऋक् ७।१०३।६।।

"**नाम रहे सांई का**" इति प्राकृतानामुक्तिरपि "**मर्ता अमर्त्यस्य ते भूरि नाम मनामहे। विप्रासो जातवेदसः**" (ऋक् ८।११।५) इत्यादि मन्त्रमूलिकैव। अत्र भूरिशब्दः पौनःपुन्यं नामसंघातञ्चाचष्टे। अत एव कश्चित्—"**ओ नमः शिवाय**", कश्चित् "**ओं नमो भगवते वासुदेवाय**" तथा कश्चित्—"**ओम्, ओम्**" इति नाममालां जपति, यतो हि लोको भिन्नरुचिर्भवति। स्वजापकाय च तन्नाम सुखं सन्तोषञ्च निश्चितं ददाति। तथा च मन्त्रलिङ्गम्—

भूरि नाम वन्दमानो दधाति पिता वसो यदि तज्जोषयासे।
कुविद् देवस्य सहसा चकानः सुम्नमग्निर्वनते वावृधानः ।।

ऋक् ५।३।१०।।

सुम्नं=सुखं, शर्मेत्यनर्थान्तरम्। तथा चोक्तं माहात्म्ये—

इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् ।
पठेद्य इच्छेत् पुरुषः श्रेयः प्राप्तुं सुखानि च।। (श्लोक २०)

नामसङ्कीर्तनपुरस्सरे नाम्नि च निदर्शनरूपाणि मन्त्रलिङ्गानि। यथा—"**दधाना नाम यज्ञियम्**" (ऋक् १।६।४), "**अग्नेर्वयं प्रथमस्यामृतानां मनामहे चारुदेवस्य नाम**" (ऋक् १।२४।२), "**देवत्वं नाम ऋतं सपन्तः**" (ऋक् १।६८।२), "**नाम**

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्वष्टुरपीच्यम्'' (ऋक् १।८४।१५), **''कीर्तेन्मं नाम मघवा बिभ्रत् वज्री युद्धसूनु'' श्रवसे नाम दधे''** (ऋक् १।१०३।४), **''अर्कस्त्रिधातू रजसो विमानोऽजस्त्रो धर्मा हविरस्मि नाम''** (ऋक् ३।२६।७), **''घृतस्य नाम गुह्यं यदस्ति''** (ऋक् ४।५८।३), **''परो मायाभिर्ऋत आरा नाम ते''** (ऋक् ५।४४।२), **''दधानो नाम महः''** (ऋक् ६।४४।८), **''त्वेषं शवो दधिरे नाम यज्ञियम्''** (ऋक् ६।४८।२१), **''आ नाम घृष्णु मारुतं दधानाः''** (ऋक् ६।६६।५), **''सदा ते नाम स्वयशो विवच्मि''** (ऋक् ७।२२।५), **''त्वेषं ह्यस्य स्थविरस्य नाम''** (ऋक् ७।१००।३), **''दिविश्रयो दधिषे नाम वीरः''** (ऋक् १०।२८।१२), **''भर्गो ह नामोत यस्य देवाः'' ''अग्निर्ह नामोत जातवेदाः''** (ऋक् १०।६१।१४) इत्यादीनि। अथापि स एक एव बहुधा स्तूयते। यथा—

त्वमर्य्यमा भवसि यत् कनीनां नाम स्वधावन् गुह्यं बिभर्षि ।
अञ्जन्ति मित्रं सुधितं न गोभिर्यद् दम्पती समनसा कृणोषि।।

ऋक् ५।३।२।।

यत्तूक्तं सामगायन इति नाम तत्र साम्नां कानिचिन्नामानि मन्त्रनिर्देशपुरस्सराणि निर्दिश्यन्ते। यथा—**''उप नो देवा अवसा गमन्त्वङ्गिरसां सामभिः स्तूयमानाः इन्द्रमिन्द्रियैर्मरुतो मरुद्भिरादित्यैर्नो अदितिः शर्म यंसत्''** (ऋक् १।१०७।२)। अत्र—ऐन्द्रं, मारुतं, तथादितेयमित्यादीनि सामवेदे साम्नो नामानि सन्ति, सामगायनक्रमश्च गुरुमुखादेवाभ्यसनीय इति मया सामनामव्याख्याने, गुरुनामनिर्देशपुस्सरः सामाध्ययनकालनिर्देशपुरस्सरश्च निर्दिष्टः। इदमत्र ज्ञेयं यदयं महर्षिवेदव्यासकृपातो लब्धस्वरूपो विष्णुसहस्रनामसङ्ग्रहो मया व्याख्यातस्तत्र प्रतिनाम यथोपयोगि व्याकरणनाम्नो व्याप्तिः, लोके तदनुकृतिः, शरीरेषु समन्वयः, तन्नाम्नः प्रमापयिता मन्त्रश्च सलोकोदाहरणं निर्दिष्टः।

अनभिमतत्वात् प्रतिनाम निर्दिष्टा मन्त्रा न व्याख्याता न च सामग्र्येणात्र लिखिता इति। यस्मै च यो मन्त्रो रोचते स तं मन्त्रं तन्नाम्नि पठेदित्यस्माभिरनुज्ञायते। तदेवं जीवानां हितमुद्दिश्य कृतसहस्रनामसङ्ग्रहो महर्षिवेदव्यासोऽस्माकं बहूपकारीति सविनयं ससाष्टाङ्गप्रणामञ्च स्तुत्यर्ह इति।

❖ ❖ ❖

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विष्णुसहस्रनाम-स्तोत्रस्य

सत्यभाष्यकर्तुरात्मपरिचयः

यद्यपि नाहमात्मपरिचायनं बहु मन्ये, तथापि नैसर्गिकमेतद् यत् कस्यचिद् ग्रन्थप्रणेतुर्भाष्यकर्तुर्वा ग्रन्थं भाष्यं वाधीयानानां तत्कर्तृविषयिका जिज्ञासोत्पद्यते, अतस्तन्निराकरणाय तथात्मानृण्यलिप्सयायम्म आत्मपरिचायनोपक्रमः।

अहं हि पञ्चनदप्रान्तस्थ-जालन्धरमण्डलान्तर्गत-माहलगहिलाख्यग्रामनिवासिनां सहजपालप्रवराणां सारस्वतब्राह्मणवंश्यानां **श्री श्रीकृष्ण** सूनूनां **श्रीमदनन्तराम**शर्मणामात्मजः, होशियारपुरमण्डलान्तर्गत 'साहिब' ग्रामलब्धजन्मनां 'हिल' इत्युपाह्वानां भारद्वाजगोत्रोद्भूत**श्रीजयदयाला**त्मजपण्डित**लक्ष्मणदासशर्मणां** चास्मि दौहित्रः।

पूज्यपितृचरणैरहं आद्ये वयसि दशवर्षाण्युर्दुभाषां पाठितः, तदनन्तरञ्च व्याकरणमेषोऽधीतामिति कृतमतिभिरेकोनाशीत्यधिकैकोनविंशे १९७९ वैक्रमाब्देऽमृतसरस्तो नातिदूरस्थिते विरजानन्दब्रह्मचर्याश्रमे प्रवेशितो व्याकरणाध्ययनाय।

तत्र चाहं तदध्यक्षैस्त्यागतपोमूर्तिभिराचार्यचरणैः **श्री ब्रह्मदत्त जिज्ञासु**-महोदयैर्वर्णोच्चारणत आरभ्यार्षप्रक्रियया अष्टाध्यायीक्रमपूर्वकं पातञ्जलमहाभाष्यान्तं निरुक्ताङ्गपुरस्सरं व्याकरणं पाठितो धर्मशास्त्रञ्च। एतस्मिन् काले मम स्मरणशक्तिरतीव तीव्रासीत्। ६-३-१९३० ख्रैस्ताब्दे अष्टाध्यायी-धातुपाठ-निघण्टु-परिभाषापाठ-लिङ्गानुशासनानां स्मरणविषयिका या परीक्षा श्रीमद्भिराचार्यपादैर्जिज्ञासुमहोदयैर्गृहीता, तत्राऽऽहत्य सर्वग्रन्थानां ८८५६ सूत्राणां समग्रः पाठो मया ४ घण्टा ४० मिनटपरिमिते काले श्रावितः। अस्यां परीक्षायां समग्राणां ५०० (पञ्चशत) अङ्कानां मध्ये ४९७ (त्रिन्यूनपञ्चशतम्) अङ्का उपलब्धाः। एतस्याः परीक्षाया आचार्यपादैः स्वहस्तलिखितमङ्कपत्रमद्यापि मम सकाशं विद्यते। व्याकरणं धर्मशास्त्रञ्चाधीत्य तेषामेव सौहार्देनाहं वाराणस्यां **श्रीमच्छङ्करराम-त्रिपाठि**महोदयेभ्यश्चतुर्विध (ग्रामगेय-आरण्यक-ऊह-ऊह्य) —पुरस्सरां समग्रां

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सामसंहितामपाठिषम्। वेदमूर्ति **श्रीरामभट्टरराटे**महोदयेभ्यश्च क्रियाकलाप-ज्ञानपुरस्सरां दर्शपौर्णमासप्रक्रियामुपादिषि।

पुनश्चाहं श्रीमद्भिर्गुरुवरजिज्ञासुमहोदयैः प्रेरितो महामहोपाध्यायसुधाकर "द्विवेद" शिष्याच्छ्री**पूर्णचन्द्रत्रिपाठि**ज्यौतिषाचार्यमहोदयाज्ज्यौतिषं शास्त्रमध्यगीषि। यस्य प्रत्यक्षमुपयोगो नाडीतत्त्वदर्शनस्य त्रिदोषसंगणनीयाध्याये विहित आस्ते। तथात्र भाष्येऽपि तस्य बहुत्रोपयोग इति यशोभाजां श्री पूर्णचन्द्रमहोदयानां सादरं कृतज्ञताभारं वहामि।

अत्र वाराणसेय-श्रीपद्मनाभशास्त्रितनुजाः **श्रीकेदारनाथ सारस्वता** अपि सन्ति स्मरणार्हाः। येषामनुग्रहतोऽहं काव्यनिर्माण-कौशलमलप्सि। यांश्चाहमु- पाश्लोकयं **सत्याग्रहनीतिकाव्ये**। यथा—

सन्तीह नाना कविकर्मदक्षाः
केदारनाथोऽस्ति मयात्र वन्द्यः।
यस्योपदेशैरुत शर्वदृष्ट्या
काव्याङ्कनं पूर्तिमगान्ममेदम्॥

एवमधीतविविधशास्त्रः सुतरामभ्यस्तश्चाहं लवपुरे श्री जिज्ञासुमहोदयानां दृग्गोचरोऽजमेरस्थ-परोपकारिणी-सभायां श्रीमद्दयानन्दस्वामिकृतपाणिनीयाष्टाध्यायी-तृतीय-चतुर्थाध्यायभाष्यस्य सम्पादनानुवादटिप्पणादि-लेखनकर्म वर्षत्रयमकार्षम्। स एव लेखनाभ्यासोऽस्य भाष्यस्य लिखने परमः सहायको मेऽभूत्।

समधीतायुर्वेदेन लवपुर एव च सम्पादनकर्म कुर्वता मया श्रीमन्तं वैद्यचूडामणिं **नाथुराममौद्गल्य**मुपेत्य तत आयुर्वेदीयार्षानार्षसंहितासु, प्रत्यक्षशारीरे, रसकर्मसु च विशिष्टा शिक्षाग्राहि। आयुर्वेदविज्ञाननैपुण्यञ्चावाप्यावाप्यावात्सममृतसरस्येव वैद्यवृत्तिं विदधानः। तत्राहमायुर्वेदविषयाद्यगुरुणा भिषक्शिरोमणिपूज्यपण्डित तिलकराम-ब्रह्मचारिमहोदयेन नाडीविज्ञाने, पञ्चीकृतपञ्चभूतानामूहापोहे च सविशेषं शिक्षितः। त एतेऽस्मद्गुरुचरणा यतिप्रवराः श्रीतिलकरामब्रह्मचारिणोऽस्म-ज्जीवनोपकरणे मूर्धाभिषिक्तं यशो भजन्ते।

नाडीतत्त्वदर्शनाख्यं निबन्धं निबध्नन्नेवाहममृतसरस्थ "फैन्सी लाण्ड्री" स्वामिना मास्टर-**हरिप्रसादमहोदयेन**, ज्यौतिष-विषयकं विशिष्टं ज्ञानमवाप्तुं क्षत्रियवंशोद्भव-**'लाला' हरभजधवन**-समीपे साग्रहं विनियुक्तः। तस्माच्चाहं कामरूपदेशान्तर्वर्तिशिलाङ्ग-पर्वतस्थमहात्मनः सकाशादधीतां ज्यौतिषगण-नाशिक्षामग्रहीषम्। यतो मया नाडीतत्त्वदर्शनगणिते महत् साहाय्यं प्रापीति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तयोर्मास्टरहरिप्रसाद-लालाहरभजयोर्महान् कृतज्ञताभारो मय्यस्ति।

प्रसङ्गवशतो यैर्यैः सादरवन्दनीयचरणैर्गुरुभिः स्वप्रदत्तज्ञानानुरूपं यो यो मह्यमुपाधिः प्रदत्तः स स वर्षमासदिननिर्देशपुरस्सरमिह प्रदर्श्यते— सर्वाङ्गसमुदित-सामवेदाध्ययनानन्तरं, भादप्रद कृ० एकादश्यां भौमे, १६६१ वि० संवत्सरे, १६ प्रविष्टायां तदनुसारं ४-६-१६३४ ख्रिष्टाब्दे **श्री पण्डितप्रवरशंकररामत्रि-पाठिभिर्गुर्जरब्राह्मणैरहं 'सामस्वरभास्कर'** इत्युपाधिना समयोजि।

सामवेदसंहितेतरवेदत्रय्यध्ययन-हेतुकश्च, भा० कृ० एकादश्यां भौमे १६६१ वि० संवत्सरे १६ प्रविष्टायां, तदनुसारम् ४-६-१६३४ खिष्टाब्दे पण्डितवररामचन्द्र-भट्टरराटाख्यैर्महाराष्ट्रब्राह्मणैश् **'चतुर्वेदः'** इत्युपाधिर्मह्यं प्रदत्तः। **'आयुर्वेदाचार्यः'** इत्युपाधिश्च मह्यं चैत्र कृ० पञ्चम्यां, वि० १६६५ संवत्सरे, तदनुसारम् १८-३-१६३६ खिष्टाब्दे श्री पं० नाथुराममौद्गल्यैस्तद्विद्यालयाध्यक्षैर्दत्तः।

''साङ्गोपवेदवेदचतुष्टयी'' इत्युपाधिर्मया १६ प्र० माघे १६६८ वि० संवत्सरे, तदनुसारम् जनवरी १६४२ खिष्टाब्दे श्री पं० **ब्रह्मदत्त-जिज्ञासुमहोदयेभ्यः** तद्विद्यालयाध्यक्षेभ्यः प्रापि। **'आयुर्वेदानूचानः'** इति च पदं मया १५ प्र० माघे वि० २००२ संवत्सरे **श्री पण्डित-तिलकराम-ब्रह्मचारिभ्यो** लब्धम्।

ज्योतिर्ज्ञानस्य सारभूतेन रहस्यमयेन चाष्टोत्तरशत १०८ इत्यङ्कविद्यापदेन सममान्यहं **श्रीलालाहरभजनेन,** ज्ञापितश्चाहमेतद्विषयकं ज्ञानम्, अत एव मयैतदङ्कविद्यापदं १०८ स्वनामतः पूर्वमङ्क्यते पद्यञ्च ममैतदत्र—

भानां विभ्रमतां भेषु रूपाण्यष्टोत्तरं शतम्।
वेद्मि वच्मि ततश्चार्थान्, ततोऽस्म्यष्टोत्तरं शतम्॥

नाडीतत्त्वदर्शनाख्यमस्मद्ग्रन्थमक्षरशः कर्णगोचरीकृत्य सम्यग्विमृश्य सत्यत्वेन प्रमाणीकृत्य चाहं पौष कृ० एकादश्यां, वि० २००५ संवत्सरे, **वाराणसेय-विद्वत्परिषदध्यक्षैः 'भिषक्-केसरी'** उपाधिना सममानि।

इतरास्वपि भाषासु मया प्रभाकर-मैट्रिकादि परीक्षाः समुत्तीर्य प्रागल्भ्यमासा-दितमिति विदाङ्कुर्वन्तु विद्वांसः। तथा च प्रयागवास्तव्येभ्यः **श्री त्रिलोकचन्द्रवसुभ्यो** मया वीणावादनमशिक्षि यद्घोषाणां सामनिरामपरिज्ञापनद्वारा मेऽत्यन्तं सहायकमभून्नाडीपरीक्षाविधौ।

'सत्याग्रहनीतिकाव्य'-'नाडीतत्त्वदर्शन' ग्रन्थयोः प्रणयनान्तरं व्यतीते कियतिचित् काले, एकदा मामकस्मात् सन्निपातरोगोऽग्रासिष्ट। विनिश्चिताशङ्कितमरणश्चाहम-दृष्टवशात् कथञ्चिदसमाप्तजीवनोऽजीविषम्। तदा मेऽभून्मनस्याकस्मिकी श्रीविष्णुसहस्रनामश्रवणेच्छा, सङ्कल्पितञ्च मनसा मया यल्लब्धपूर्णस्वास्थ्यो, भगवतो विष्णोर्नाम्नां सहस्रस्य भाष्यं विधास्ये। इत्येतन्मूलकोऽयम्मे भाष्यप्रणयनोपक्रमः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इह च भाष्ये मया विभिन्नगुरुभ्य शिक्षिता नामार्थानुसारिणः प्रासङ्गिका विविधशास्त्रविषयका विविधा विषया यथोपयोगमुपन्यासिषत पाठकहितानुबन्धिनः। भाष्यमिदं मदुपज्ञं, मदीया चात्र स्वतन्त्रा व्याख्यानशैली, याऽन्यभाष्यकारव्याख्यानशैलिभ्यो भिन्ना, शास्त्रानुगता वेदार्थप्रदीपिनी चेति विभावयन्तु सुधियः।

बहुकृतज्ञताभारवहश्च तेषामहं, यैर्ज्ञानप्रदानेन, सम्मति-प्रदानेन, लेखनशोधनादिसाहाय्यप्रदानेन वात्र भाष्ये मम कियांश्चिदप्युपकारोऽकारि। भाष्यनिर्माणोद्देश्यं, सहायकानां नामानि तथान्यदपि यत्किञ्चिदुपयुक्तं, तदवतरणिकायां सम्यङ् निर्दिष्टमिति।

देवसदनम्, भिवानी
कार्तिक पूर्णिमा, रविवासरः — विदुषां वशंवदः
वि०सं० २०२७
१५-११-१९७० ई० — **सत्यदेवो वासिष्ठः**

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विष्णुसहस्रनामस्तोत्र-सत्यभाष्य
के
रचयिता

श्री पं० सत्यदेव वासिष्ठ
का
संक्षिप्त परिचय

श्री पं० सत्यदेव जी वासिष्ठ आयुर्वेदाचार्य का सतीर्थ्य होने के नाते मेरा आपके परिवार के साथ सन् १९२२ से सम्बन्ध है। यह सम्बन्ध उत्तरोत्तर घनिष्ठ होता गया है। आपके स्व० पिता **श्री पं० अनन्तराम शर्मा** जी का जो महान् चरित्र मैंने प्रत्यक्षतः देखा, उसके अनुसार मैं कह सकता हूं कि **'सम्पत्तौ च विपत्तौ च महतामेकरूपता'** का जैसा साक्षात् दर्शन पाया, वैसा मुझे इस जीवन में अन्यत्र देखने को नहीं मिला। आपके जीवन में विविध उतार चढ़ाव आये। वह प्रारम्भिक स्थिति भी देखी जब लक्ष्मी की कृपा आप पर थी, और यह भी स्थिति देखी जब चंचला लक्ष्मी आप से रूठ कर नाता तोड़ गई। इतना ही नहीं, आर्थिक स्थिति के विषम हो जाने के साथ ही आपकी आँखों की ज्योति भी सदा के लिए चली गई। परन्तु आपको मैंने प्रत्येक अवस्था में एक ब्रह्मवेत्ता तत्त्वनिष्ठ व्यक्ति के समान जीवन-निर्वाह करते हुए देखा। मिथिला के विदेह जनक के शब्दों में **'मिथिलायां प्रदीप्तायां न मे दहति किंचन'** के समान आप के चेहरे पर मैंने कभी भी विषाद की अतिक्षीण रेखा भी नहीं देखी।

ऐसे देवदुर्लभ महनीय चरित्र के धनी पिता के गुणों का पुत्र पर आनुवंशिक प्रभाव पड़ना स्वाभाविक था। श्री वासिष्ठ जी के महनीय पिता जी

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ने जिस महती आकाङ्क्षा से अपने पुत्र को सच्चरित्र विद्वान् ब्राह्मण बनाने के लिये सन् १६२२ में **वीतराग श्रद्धेय स्वामी सर्वदानन्द जी महाराज** के द्वारा गण्डासिंहवाला अमृतसर में स्थापित **विरजानन्द आश्रम** में स्व० पूज्य गुरुवर्य श्री **पं० ब्रह्मदत्त जिज्ञासु** के चरणों में समर्पित किया, उसी के अनुरूप श्री वासिष्ठ जी ने श्री पूज्य गुरुवर्य की छत्र-छाया में रहकर निरन्तर १२-१३ वर्ष अध्ययन करके अपने को योग्य पिता का योग्य पुत्र कहलाने योग्य बनाया। जिसको अपने आद्य जीवन में ज्ञान का एक बार चस्का लग जाता है, वह जीवन भर के लिए चाहे किसी भी अवस्था में क्यों न रहे, सच्चे रूप में विद्यार्थी बन जाता है। यही अवस्था हमारे वासिष्ठ जी की है। आप इस सुदीर्घ काल के विद्याध्ययन के पीछे भी विद्यार्थी बने रहे, और अभी भी हैं। उसी का फल यह हुआ कि आपने शिक्षा, व्याकरण, निरुक्त, आदि शास्त्रों का अध्ययन करके वेद, ज्योतिष, आयुर्वेद, संगीत, प्रभृति अनेक विषयों में दक्षता प्राप्त की।

विद्यार्थी का जीवन अत्यन्त कष्टसाध्य होता है। शास्त्रकारों ने स्पष्ट कहा है-**'सुखार्थिनः कुतो विद्या विद्यार्थिनः कुतः सुखम्'**। आपने किन विषम परिस्थितियों में आयुर्वेद प्रभृति शास्त्रों का अध्ययन किया है, यह या तो वे ही जानते हैं, या प्रत्यक्षद्रष्टा होने से मुझे उसका कुछ आभास है।

संस्कृत भाषा में काव्य रचने की प्रेरणा—आपके पिता किस प्रकार अपने पुत्र की प्रवृत्तियों पर ध्यान रखते थे, इसका एक ज्वलन्त उदाहरण यह है कि एक बार वासिष्ठ जी ने पञ्जाबी में स्वनिर्मित कविता अपने पिता जी को सुनाई (सम्भवतः यह घटना सन् १६३७ की है)। पिता श्री ने उक्त कविता सुनकर बड़े मार्मिक शब्दों में अपने पुत्र से कहा-'काका तैनूं इन्ने वर्ष संस्कृत इसी वास्ते पढ़ाई कि तू म्लेच्छ भाखा में कविता करे। इस बात को सुनकर श्री वासिष्ठ जी की सहज कवित्व शक्ति देववाणी की ओर मुखरित हो गई। और उसका प्रथम सुमन **'सत्याग्रहनीति-काव्य'** के रूप में प्रस्फुटित हुआ।

संघर्षमय जीवन—अध्ययनकाल के पश्चात् भी श्री वासिष्ठ जी को विविध कठिनाइयों से निरन्तर जूझना पड़ा। परन्तु आप अपने पिता के तुल्य ही सभी परिस्थितियों में एकरूप रहकर निरन्तर अपने लक्ष्य की ओर बढ़ते गये। अध्ययन एवं **'कामये दुःखतप्तानां प्राणिनामार्तिनाशनम्'** आप्त वचनानुसार

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चिकित्सा-कार्य में व्यापृत रहते हुए अपने महनीय परिश्रम से सुरभारती-संस्कृतभाषा के भण्डार की श्रीवृद्धि करने का आपने जो साहसपूर्ण कार्य किया है, वह सदा ही स्मरणीय रहेगा। आपने अभी तक निम्न ग्रन्थ लिखे, और विना किसी अन्य व्यक्ति की सहायता के स्वयं छपवा कर प्रकाशित किये हैं—

१—**सत्याग्रहनीति-काव्य**—यह महनीय ग्रन्थ आपने हैदराबाद (दक्षिण) के सत्याग्रह के समय कारागार में रहकर लिखा है। इसमें कवि ने जो कुछ भी वृत्त निबद्ध किया है, वह स्वानुभूत होने के कारण अत्यन्त स्वाभाविक है। इसके सम्बन्ध में विशेष ज्ञान इस ग्रन्थ के अध्ययन से स्वयं हो जायेगा।

२—**नाडी-तत्त्व-दर्शन**—आयुर्वेदिक चिकित्सा में रोग-परीक्षार्थ नाड़ी-ज्ञान का महत्त्वपूर्ण स्थान है। परन्तु आजकल जिस भाँति आयुर्वेद का पठन-पाठन होता है, उससे छात्रों को नाड़ी-ज्ञान भली प्रकार नहीं होता। श्री वासिष्ठ जी ने अपने आयुर्वेद के गुरु स्व० वैद्यवर श्री नाथूराम जी मौद्गल्य से जहाँ चिकित्सा-शास्त्र विषयक गूढ़ तत्त्वों को प्राप्त किया, वहाँ नाड़ी-ज्ञान का भी सूक्ष्म तत्त्व अधिगत किया, और उसे आगे स्वयं विकसित किया। गुरुजनों से उपलब्ध एवं स्वयं विकसित नाड़ी-ज्ञान-विषयक तत्त्व को दार्शनिक रूप देकर आपने **'नाडीतत्त्व-दर्शनम्'** ग्रन्थ संस्कृत भाषा में लिखा और हिन्दी भाषा सहित इसे दो बार प्रकाशित किया। काशी वैद्यमण्डल के तत्त्वावधान में नाड़ीविषयक विशिष्ट ज्ञान की प्रत्यक्ष परीक्षा देकर **भिषक्केसरी** उपाधि एवं ५००० रुपयों का पारितोषिक प्राप्त किया। यह अपने विषय का एकमात्र सर्वाङ्गपूर्ण ग्रन्थ है।

३—**विष्णु-सहस्रनाम-स्तोत्र का सत्यभाष्य**—महाभारत के अनुशासनपर्व में निर्दिष्ट 'विष्णुसहस्रनाम-स्तोत्र' अत्यन्त महत्त्वपूर्ण है। अनेक श्रद्धालु व्यक्ति इसका नित्य पाठ करते हैं। यह महनीय स्तोत्र सांप्रदायिक रंग में रंग दिया जाने के कारण विष्णु के तथाकथित अवतारों के साथ सम्बद्ध हो गया। इससे इसका वास्तविक महत्त्व नष्ट हो गया। श्री वासिष्ठ जी को इसी स्तोत्र के आरम्भ में पठित **ऋषिभिर्बहुधा गीतम्** वाक्य में **'एकं सद् विप्रा बहुधा वदन्ति'** इस ऋङ् मन्त्र की प्रतिच्छाया देखकर इस स्तोत्र की महनीयता का ज्ञान हुआ। तत्पश्चात् उन्होंने चिरकाल तक इस स्तोत्र के प्रत्येक पद पर

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गम्भीर विचार करके २० वर्षों के सतत कठोर परिश्रम से इस स्तोत्र की वेदशास्त्रोपबृंहित अतिविस्तृत आध्यात्मिक एवं आधिदैविक संस्कृत व्याख्या लिखी। इस व्याख्या को स्वयं प्रकाशित किया। इसके मुद्रणमात्र में लगभग २ लाख रुपया व्यय हुआ है। अन्य सहस्रों रुपयों का व्यय जो इसके निर्माण में गत २० वर्षों में किया गया, वह इससे पृथक् है।

वासिष्ठ जी की उदारता—आपने इन तीनों पुस्तकों के मुद्रण पर गत वर्षों में लगभग १ लाख २५ हज़ार रुपया व्यय किया है। सब पुस्तकों का मुद्रण करके श्री वासिष्ठ जी ने ये सभी पुस्तकें दान कर दीं।

विक्रम सवत् २०४३ **युधिष्ठिर मीमांसक**
ई.सन्—१९८६

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भाष्यकारविषयको मेऽनुभवः

(पं० मुंशीराम शास्त्री)

वन्दनीयनामधेयाः सत्यभाष्यकाराः श्री १०८ सत्यदेव-वासिष्ठाः, आयुर्वेदविदुत्तमा नाडीतत्त्वविज्ञाननिपुणाश्चेति बहुशः श्रुतचरा अपि, षोडशोत्तरद्विसहस्रतमे वैक्रमे संवत्सरे श्रावणे मासि 'श्रीहरियाणाशेखावाटी-ब्रह्मचर्याश्रम' अध्यक्षैस्तत्राध्यापयितुमाहूतस्य मे प्रथमं दर्शनपथं गताः। तदानीमिमेऽचिरं सन्निपातरोगमुक्ता इति नितरां दुर्बला अपि स्वाभाविकीं गुणगणगरिमद्युतिमजहतो व्यराजन्त। बहुब्रह्मचारिविद्यार्थिगणसङ्कुलेऽप्याश्रम एषां जलस्थजलजायमानां रागापेतमुनीयमानाञ्च प्रकृतिं दर्शं दर्शमाश्चर्यसीमामत्यक्रमिषम्।

यावच्च तत्राश्रमेऽहमवात्सम्, तावदेषां महानुभावानां मनसि वचसि चरित्रे वा क्वचिदपि विषमतां नाद्राक्षम्। प्रत्युतैषामनपायिनी गम्भीरा प्रकृतिरविच्युतो मनोभावश्च जनमनांसि व्यमोहयत्। सर्वविस्मयकारिचरित्रविलोकनेन चैषु जातो म आन्तरः स्नेहः। किन्तु तदेतत्सम्पर्कसौभाग्यमल्पकालमलप्सि, यतो हि मया तत्राल्पकालमध्याप्य जातामयेन त्यागपत्रं प्रदत्तं, कियन्तञ्चित् कालञ्च गृह एवाकार्षं वासम्।

पूज्यैरेभिश्च मयि तत्राध्यापयत्येव प्रारब्धे श्रीसत्यभाष्यनिर्माण आश्रमवासं सबाधं समीक्ष्य भिवान्या उत्तरेणान्तिक एव माहमे पथि भव्यमाश्रमपदमेकं निर्मापितम्, यदिदानीं 'देवसदनम्' इतिनाम्ना लब्धास्पदम्। तत्रोषित्वा चेमे संलग्ना भाष्यकरणेऽनन्यमनसः। किन्त्वेवं स्थानसौविध्ये जातेऽपि केवलाः किं किं कुर्युः, यतो हि सर्वरात्रं भाष्यलिखनं, दिवा यावन्मध्याह्नोत्तरमार्तचिकित्सयार्थार्जनम्, पुना रात्रिलिखितस्य सावधानं निरीक्ष्य शोधनम्, शोधितस्य परिष्करणं हिन्द्यनुवादश्चेति महत् सङ्कटमापन्नाः।

भिवानीस्था योग्या विद्वांसः संशोधन-हिन्द्यादिकरणे सानुरोधं नियुक्ता अपि, दत्तञ्चापि तेभ्यो यथातदपेक्षं पारिश्रमिकम्, किन्तु न सन्तुष्टिमलभतान्तरं मनः। तत एकदौषधमादातुमागतस्य मे पुरत इदं सर्वं वृत्तं न्यवेदयन्, प्रैरयंश्च त्वमत्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मे सहायको भवेति सबलवचनम्। यद्यप्यासमहं तदानीमस्वस्थः, तथाप्यप्रत्याख्येया श्रेयोदा चैषामाज्ञेति मयाऽविमर्शमङ्गीकृता। तत एव प्रभृति संशोधनादिहिन्द्यनुवादं कुर्वतोऽत्रैव निवसतश्च पूज्यश्रीसत्यभाष्यकारविषयको योऽनुभवः समजनि, स इहांशतो विव्रियते।

यद्यपि साधारण्येन 'श्रीहरियाणा शेखावटी ब्रह्मचर्याश्रमे' अध्यापयत एव म एषामन्येभ्यो या सामान्यजनविस्मयकरी विशेषता सानुभवगोचरीभूता, तथापि दूरस्थस्य यथाकृतेः स्पष्टं प्रतीतिर्जायते, न तथा तत्स्वभावस्य तद्गुणानाञ्च। इत्यस्यैव पुष्टिकरं—

> ***आकृतिर्दूरतो लक्ष्या न स्वभावस्तथा गुणाः।***
> ***अन्तरङ्गो विजानाति यादृग्गुणस्वभावकः।।***

इति मदीयं वचनम्। सार्धचत्वारि वर्षाणि मयान्तरङ्गीभूयोषितेन यैषां परिश्रमक्षमता, त्यागक्षमता, विविधबाधासहनक्षमता, एकान्तनिश्चयिता तथा दानशीलता चादर्शि, तयात्यन्तं विस्मितोऽहम्। तथा हि—

भाष्यलेखनसमये यावान् यादृशश्च परिश्रमोऽकार्येभिस्तमिमेऽहं ता वा रात्र्यो जानन्ति, यासु सायं दशवादनत आरभ्य प्रातः सप्तवादनपर्यन्तं न क्षणमपि निमीलितेऽक्षिणी, यदा सर्वं चराचर सुखं स्वपिति। ततश्चोत्थाय यावदपराह्णं रोगिणश्चिकित्सद्भिर्भोजनमपि सायङ्काले कदाचिदकारि कदाचिन्नेति विलोकं विलोकं व्यस्मयिष्ट मे मनः।

त्यागक्षमताञ्चैषां विलोक्य न केवलमहमेवापि तु सभृत्यवर्गः सर्वोऽपि सहचरगणोऽसम्भवमप्येषां सम्भवतीति बह्वाश्चर्यममंस्त। तथा हि—सत्यपि सर्वविध-साधन-सम्पद्गणे सङ्कल्पमात्रलभ्ये च पदार्थजाते स्वयं शरीरावस्थान-मात्रप्रयोजनकं विरसं शुष्कं भोजनं, साधारणमल्पमूल्यञ्च वस्त्रगणमुपयुञ्जाना अपि स्वसहयोगिनः, आगन्तुकान्, भृत्यवर्गञ्च सविशेषं यथातदिच्छं सम्भोज्य परिधाप्य च महान्तं सन्तोषमाप्नुवन्तीति। किमिवाभिधीयेत भोगपराङ्मुखानामेषां त्यागक्षमता।

आकस्मिक-विविधबाधा-सहनक्षमताप्येषामस्मादृशजनमन आश्चर्यकरी। तद्यथा— प्रारब्धेऽस्मिन् 'श्रीविष्णुसहस्रनामस्तोत्रभाष्ये' बहुशो विषमाशनपानस्नानादिहेतुकाः शारीरिक्यः, तथाकस्मादागतबहुलव्ययरूपाश्चार्थिक्यो बाधा एभिर्महानुभावैर्ऋते मनोविकृतेरविमर्शं सोढा। जाते च सर्वथा रुचिविघातके प्रतिश्यायादिरोगे बहून्यहान्यभुञ्जानैरेवाहर्निशं यथापूर्वं व्याख्यानं व्यधायि।

प्रात्यक्षिका चेयमेका घटना या मदग्रे जाता—कदाचिदेकः स्वेच्छया भ्राम्यन्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

साधुरिहायातः, विहितश्चैभिस्तस्य साधुजनोचितः सत्कारः। सायञ्च यदासौ यथातद्रुचि सम्भोज्य शयनाय प्रार्थितस्तदा तदर्थमास्तीर्णां शय्यां प्रत्याख्याय, यत्काष्ठफलकमधिष्ठाय भाष्यकाराः प्रत्यहं भाष्यं लिखन्ति स्म, तदेवास्मै शयनायारोचत। एतेन स्वप्रात्यहिककर्मणि भूयसी बाधेति विमृश्यापि साधोरिच्छा पूरणीयेति साञ्जलिबन्धमेभिस्तदप्यमन्यत। स आस्थितेह पञ्चदशविंशान्यहानि। तावति काले तदपेक्षित-व्ययभारो भाष्यनिर्माणविधौ जातः कालातिपातश्चैभिः सहर्षमूढः। किमतोऽधिका सहनक्षमता यत्सोऽपरिचितोऽपि साधुर्यावन्त्यहानि स्थितस्तावद् गृहेश इवैते चागन्तुका इव तावत् स्थिताः।

इदञ्चापरमेषां वैशिष्ट्यं यद्—यत्कार्यमारभन्ते, तत् सम्यग् विविच्य दृढं निश्चित्य चारभन्ते। प्रारब्धञ्च पुनस्तत् कियदपि कठिनं भवेत्, कियन्तोऽपि वा तत्र विघ्नाः समुपतिष्ठेरन्, किन्त्विमे समाप्तिमन्तरा तदन्तरा न जहति, प्राणपणतो यतमानाः। तथा हि—कदाचिन्महता सन्निपातरोगेण ग्रस्तैरेभिः सङ्कल्पितं यत् स्वस्थोऽहं 'श्रीविष्णुसहस्रनामस्तोत्रभाष्यम्' करिष्यामि, यस्य नाम 'सत्यभाष्यम्' भविष्यतीति। तमेव सङ्कल्पं सफलयितुमगणयित्वाहर्निशं सोढा शारीरिक्यो भूयस्यो बाधाः महानार्थिको व्ययश्चासंग्रहिभिरपि। किं कश्चिदनैकान्तिकनिश्चयोऽर्थवानपीदृशे परमार्थोपयोगिनि कार्येऽशीतिसहस्रपरिमितं धनराशिर्व्ययेत? यच्च सर्वं धनं भाष्यप्रणयनसमकालमेव प्रत्यहमर्जितं न तु पूर्वतः सञ्चितम्।

सर्वतः प्रथममेभिः "डुमरावस्टेटीय" साहित्योत्तमपरीक्षायामुपविष्टैः तामन्तरैव बहिष्कृत्य सङ्कल्पितं यदात्मीयमेकं काव्यं प्रणेष्य इति। तस्यैव सङ्कल्पस्येदम् 'आर्यसमाज' द्वारासञ्चालितसत्याग्रहान्दोलन-निमित्तप्राप्त-हैदराबादकेन्द्रीय-कारागार-वासैर्लिखितं **'सत्याग्रहनीतिकाव्यम्'** सुन्दरं फलम्, यदास्वाद्य सर्वोऽपि प्रशंसन्न श्राम्यति।

काव्यप्रणयनानन्तरञ्च **'नाडीतत्त्वदर्शनम्'** नामको ग्रन्थः प्रणीतो य एषां प्रातिभज्ञानपरिचायको भिषग्गणस्य विस्मयापादकश्च। यमधीत्य विमुह्यन्ति महान्त आयुर्वेदविदोऽपि, किमुतान्ये साधारणा भिषजः। यस्मिंश्च भाष्यकारैर्वीणा-वादनज्ञानस्यापि नाडीतत्त्वविज्ञाने प्रादर्श्यौपकार्यम्।

किं बहुना, यदेकवारमपि विमृश्य मनसा सङ्कल्पितमिदं करिष्य इति, तत्साधनाय प्राणा अपि पणीकृताः। शयनाशनस्नानपानादिव्यवस्थाप्युपेक्षिता। मुख्यसाधनस्यार्थस्याभावोऽपि न किञ्चिद् गणितः। प्रदर्शिता चेयं कवीनामुक्तिः सफलीकृत्य—**"क्रियासिद्धिः सत्त्वे भवति महतान्नोपकरणे"** इति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

किमियमेषां प्रवृत्तिर्नाश्चर्यकरी यत् पार्श्वे पणकस्यैकस्याप्यभावः, कार्यञ्च लक्षसाध्यं प्रारभन्ते। न कुतश्चिदन्यतोऽर्थसाहाय्यमपेक्षन्ते, दीयमानञ्च नाददते। भवति चेयता महतार्थेन साध्यमपि तत् कार्यं कोट्यधीशस्येवाशुसिद्ध्युन्मुखं, न कदाचिदपि धनाभावकृतमवरोधं लभते।

श्रीविष्णुसहस्रनामस्तोत्रसत्यभाष्य-नाडीतत्त्वदर्शन-सत्याग्रहनीतिकाव्यग्रन्थानां संशोधनहिन्द्यनुवादादिकार्ये मुद्रापणे चासन्नसपादलक्षरूप्यकाणां व्ययोऽवशिष्टश्चातिरिक्तस्तदर्थस्थाननिर्मापणादिव्ययः, एष सर्वोऽपि व्ययः प्रत्यहं स्वयं समर्ज्य विहितो, न कुतश्चित् सानुरोधं दीयमानमपि कियच्चिदपि गृहीतमिति सर्वमेकान्तनिश्चयितायाः फलं, यदसम्भवमपि सम्भवि भवति।

सत्यपीयति व्यये कार्यव्यग्रतायाञ्चैषां सहजेव दानक्रियापि यथापूर्वमखण्डं प्रचलिता। तथा हि चिकित्सया सत्यपि भूयस्याये तमशेषं भृत्यपारिश्रमिकावशिष्टमायमर्थिभ्यः सहचरेभ्यश्च यथापेक्षं विभज्य प्रदाय द्वित्रमात्ररूप्यकधनिनो रात्रावशेरतेति प्रात्यहिकं कार्यं मया साक्षाददर्शि।

महर्घ्यतारूपनिशाचरीग्रस्त एवंविधे काले किञ्चिदवशेष्य देयमिति मयान्येन वा केनचिन्नीरुद्धा अपि यथापेक्षं श्व आगन्तेति दृढं विश्वासमाविष्कृत्य निराकार्षुस्तन्निरोधमिति, सततं प्रावर्तत एषामेवंविधे छलछिद्रादिदोषमलीमसे कालेऽपि दानाखण्डता। यदस्मदीयं नहि तत् परेषामित्येषां दृढो निश्चयः, अत एवैषां गोपनीयं बहुमूल्यमपि वस्तु सर्वदानावृतं तिष्ठति।

परहितकारणनिमित्तप्राप्तक्लेशमप्यगणयन्तः प्रेयोमार्गं विहाय परेषामात्मनश्च श्रेयसे निरन्तरं यतन्ते। अत एव च प्राणैषुरिदं 'श्रीविष्णुसहस्रनामस्तोत्रसत्यभाष्यम्', यदन्येषां कृतेऽर्थदृष्ट्या वैदुष्यदृष्ट्या परिश्रमदृष्ट्या च दुष्करमेव नापि तु दुष्करतममासीत्।

चिकित्सा चैषां बह्वल्पव्ययिका निरुपद्रवा चास्त्यत एव दूराद्दूरत इह रोगिणश्चिकित्सार्थमायान्ति स्वास्थ्यञ्चाप्नुवन्ति। यदि च कश्चिद् रोगी यदल्पमपि व्ययितुमक्षमस्तस्मा इमे निर्व्ययानुपानव्ययसहितमौषधं यातायातव्ययञ्च ददति। साधूनाञ्च कृते विशेषतश्चिकित्साभारस्तदर्थापेक्षितव्यय-भारश्चैभिरेवोह्यते।

वस्तुतस्त्विमे सर्वसम्पर्कशून्या अपि लोकनिर्वाहाय लोकभवानि कर्माणि कुर्वन्तोऽपि तत्फलेप्साशून्या अधीतसाङ्गवेदोपवेदा रागद्वेषादिद्वन्द्वरहिताः सर्वत्र दयावन्तः सरलस्वभावास्तटस्थवृत्तयो विविक्तसेविनो भोगेष्वनादरा इति जीवनमुक्तोपमं जीवनं व्यत्याययन्ति, इति मे प्रात्यक्षिकानुभूतिः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इमे च मेऽनुभूतार्थप्रतिपादकाः श्लोकाः—

गुण्याग्रणीरेष वदान्यधुर्यः
सदा तटस्थो मुनिमेयवृत्तिः ।
करोति कर्माणि फलानपेक्षो
विशेषतो विश्वजनीनबुद्धिः ॥१॥
सत्याग्रहः सत्प्रवणो विवेकी
वाग्मी सदोदारमना विधिज्ञः ।
समस्तवेदोक्तपथानुयायी
वर्त्मैहिकञ्चाप्यनुवर्तमानः ॥२॥
कामादिदोषा न कदाचिदस्य
हृद्यङ्कुरत्वं स्वपतोऽपि यान्ति।
प्रत्यक्षमेतन्मयकानुभूतं
स्थितेन कालं चिरमस्य पार्श्वे ॥३॥
दिवार्जितं तद्दिन एव सर्वं
विभज्य पात्रेष्वथ सेवकेषु ।
शेते विशङ्कोऽयमकिञ्चनः सन्
सुखेन रात्रौ जितषट्सपत्नः ॥४॥
सदाऽप्रमत्तो नियमान् यमांश्च
यथायथं सेवत एकनिष्ठः ।
परोपकारप्रवणो, मनीषी
मनीषया मानसतोषमेति ॥५॥
रजस्तमोधर्मगणं विधूय
सदावदातः शुचिकर्मनिष्ठः ।
सङ्गस्वरूपेऽपि विहाय सङ्गं
भवे तटस्थो मुनिभावमाप्तः ॥६॥
विज्ञोऽयमेनोगणसन्निवेशेऽ-
धर्माभिभूताखिलसाधुसार्थे ।
भवे पुनर्धर्ममदभ्रधर्मा
समुद्दिधीर्षुर्यततेऽप्रमत्तः ॥७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संसर्गजा दोषगुणा भवन्ति
    लोकोक्तिरेषेह मृषा भवन्ती ।
प्रभावमारोप्य तदाश्रितेषु
    सा चारितार्थ्यं लभते कथञ्चित् ॥८॥
यत्कामको योऽस्य समीपमेति
    प्रत्येति भूयस्तमवाप्य कामम् ।
विना व्ययं स्वास्थ्यमिहाप्नुवन्ति
    चिराय रुग्णा गतजीवनाशाः ॥९॥
सोढ्वा स्वयं कष्टमथापरेभ्यः
    सुखं सदा दातुमना मनस्वी ।
निर्लोभवैरः सरलस्वभावः
    सर्वस्वसन्तर्पितविष्णुदेवः ॥१०॥
धन्योऽस्त्ययं भारतभूमिभागो
    यो यत्पदन्याससरजोऽनुबद्धः ।
पूतोऽत एवागततीर्थभावः
    पुण्यः पुनात्यागतजीववर्गम् ॥११॥
इत्येवमत्राप्तयशा महात्मा
    सदानुकर्तव्यवरेण्यशीलः ।
'श्री सत्यदेवो' महनीयवृत्तो
    महीयते मण्डनमेष मह्याः ॥१२॥
आकृतिर्दूरतो लक्ष्या न स्वभावस्तथा गुणाः ।
अन्तरङ्गो विजानाति यादृग्गुणस्वभावकः ॥१३॥
सार्धचत्वारि वर्षाणि सह वसतेक्षितं मया ।
यदेषां तत्तदालेखि नांशतोऽपि मृषाङ्कितम् ॥१४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीविष्णुसहस्रनामस्तोत्रस्य माहात्म्यम्

य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
नाशुभं प्राप्नुयात् किञ्चित् सोऽमुत्रेह च मानवः ।।१।।

भावार्थः—जो व्यक्ति श्री विष्णु भगवान् के इन सहस्र नामों को प्रतिदिन श्रवण करता है, और जो इनका कीर्तन भी करता है, वह इस लोक और परलोक में तनिक भी अनिष्ट को कभी प्राप्त नहीं होता।

विशेषः—इन माहात्म्य के श्लोकों में वासुदेव, कृष्ण, पुण्डरीकाक्ष, अच्युत आदि पद सनातन विष्णु भगवान् के ही वाचक जानने चाहियें। सम्पूर्ण विष्णुसहस्रनाम स्तोत्र के पद अध्यात्म में परमात्मपरक हैं, और अधिदैवत में सूर्यपरक। यह ग्रन्थकार का मत है।।१।।

वेदान्तगो ब्राह्मणः स्यात् क्षत्रियो विजयी भवेत् ।
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात् ।।२।।

भावार्थः—(इन नामों के श्रवण तथा कीर्तन से) ब्राह्मण ब्रह्म का ज्ञाता होता है, क्षत्रिय (युद्ध में) विजय प्राप्त करता है, वैश्य धन-धान्य से सम्पन्न हो जाता है, और शूद्र सुख को प्राप्त करता है।।२।।

धर्मार्थी प्राप्नुयाद् धर्ममर्थार्थी चार्थमाप्नुयात् ।
कामानवाप्नुयात् कामी प्रजार्थी चाप्नुयात् प्रजाम्।।३।।

भावार्थः—धर्म चाहने वाला धर्म को, अर्थ चाहने वाला अर्थ को, कामनाओं की इच्छा वाला काम को और सन्तान की चाह रखने वाला सन्तान को प्राप्त करता है।।३।।

भक्तिमान् यः सदोत्थाय शुचिस्तद्गतमानसः ।
सहस्रं वासुदेवस्य नाम्नामेतत् प्रकीर्तयेत् ।।४।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च ।
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् ।।५।।

भावार्थः—जो भक्तिमान् पुरुष सदा प्रातः काल उठकर पवित्र और तद्गत चित्त से भगवान् वासुदेव=विष्णु के इस सहस्रनाम का कीर्तन करता है, वह महान् यश, जाति में प्रधानता, अचल लक्ष्मी और सर्वोत्तम कल्याण को प्राप्त करता है।।४-५।।

न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति ।
भवत्यरोगो द्युतिमान् बलरूपगुणान्वितः ।।६।।

भावार्थः—ऐसे व्यक्ति को कहीं भय नहीं होता। वह वीर्य और तेज प्राप्त करता है, तथा नीरोग रहता है। वह कान्तिमान् और बल रूप एवं गुण से सम्पन्न होता है।।६।।

रोगार्तो मुच्यते रोगाद् बद्धो मुच्येत बन्धनात्।
भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ।।७।।

भावार्थः—(विष्णु भगवान् के सहस्र नामों का श्रवण एवं कीर्तन करने से) रोगी रोग से मुक्त हो जाता है, सांसारिक बन्धनों में बँधा हुआ बन्धन से छुटकारा पा जाता है। भयभीत व्यक्ति भय से मुक्त हो जाता है, और आपत्तिग्रस्त आपत्तियों से छूट जाता है।।७।।

दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः ।।८।।

भावार्थः—पुरुषोत्तम विष्णु भगवान् की सहस्र नाम से भक्तिपूर्वक नित्यप्रति स्तुति करने से पुरुष शीघ्र ही कठिनाइयों को पार कर जाता है।।८।।

वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ।
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ।।९।।

भावार्थः—वासुदेव के आश्रित रहने वाला, वासुदेव की भक्ति में तत्पर मनुष्य सब पापों से शुद्धचित्त होकर सनातन ब्रह्म को प्राप्त होता है।।९।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।
जन्ममृत्युजराव्याधिभयं नैवोपजायते ।।१०।।

भावार्थः—वासुदेव के भक्तों का कहीं भी अशुभ नहीं होता। उन्हें जन्म-मृत्यु जरा और रोगों का भी भय नहीं रहता।।१०।।

इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ।
युज्येतात्मसुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः ।।११।।

भावार्थः—इस स्तोत्र का श्रद्धा-भक्ति पूर्वक पाठ करनेवाला व्यक्ति आत्मसुख, क्षमा, लक्ष्मी, धैर्य, स्मृति और यश से युक्त होता है।

विशेषः—इस श्लोक में भक्तियुक्त, पवित्र, सदा ही उद्योगशील, समाहितचित्त, श्रद्धालु एवं विशिष्ट अधिकारी पुरुष के लिये विशेष फल का निर्देश किया गया है। आस्तिकतायुक्त बुद्धि का नाम श्रद्धा है। भजना या तत्पर होना 'भक्ति' है। आत्मा के सुख को आत्मसुख कहते हैं। वासुदेव का भक्त उस आत्मसुख और क्षान्ति आदि गुणों से सम्पन्न हो जाता है।।११।।

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ।।१२।।

भावार्थः—पुरुषोत्तम भगवान् के पुण्यात्मा भक्तों को कभी क्रोध, मात्सर्य= पराये गुणों में दोषदृष्टि रखना, लोभ और अशुभ बुद्धि नहीं होती।।१२।।

द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ।
वासुदेवस्य वीर्येण विधृतानि महात्मनः ।।१३।।

भावार्थः—चन्द्रमा सूर्य और नक्षत्रों के सहित द्युलोक, आकाश, दिशायें, पृथिवी, महासमुद्र ये सब महात्मा वासुदेव=विष्णु के वीर्य=शक्ति से ही धारण किये गये हैं।।१३।।

ससुरासुरगन्धर्वं सयक्षोरगराक्षसम् ।
जगद् वशे वर्ततेऽदः कृष्णस्य सचराचरम् ।।१४।।

भावार्थः—देव, असुर, गन्धर्व, यक्ष, सर्प और राक्षसों के सहित यह सम्पूर्ण चराचर जगत् कृष्ण=विष्णु के वशवर्ती है।।१४।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ।।१५।।

भावार्थः—इन्द्रियाँ, मन, बुद्धि, अन्तःकरण, तेज, बल, धैर्य तथा क्षेत्र और क्षेत्रज्ञ=जीव इन सबको वासुदेवात्मक ही कहा गया है।।१४।।

सर्वागमानामाचारः प्रथमं परिकल्पते ।
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ।।१६।।

भावार्थः—सब शास्त्रों में सब से प्रथम आचार की ही कल्पना होती है। आचार=गति से ही धर्म स्वरूप स्थिति की उत्पत्ति है, और धर्म के प्रभु=उत्पत्तिस्थान श्री अच्युत=विष्णु भगवान् ही हैं।

विशेषः—'सर्वागमानामाचारः' इस वाक्य से यह दिखलाया गया है कि सब धर्मों का अधिकार आचारवान् को ही है।।१६।।

ऋषय पितरो देवा महाभूतानि धातवः ।
जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम् ।।१७।।

भावार्थः—ऋषि, पितर, देव, पञ्च महाभूत, धातुएँ और यह सब चराचर जगत् नारायण से ही उत्पन्न हुआ है।।१७।।

योगो ज्ञानं तथा सांख्यं विद्याः शिल्पादि कर्म च ।
वेदाः शास्त्राणि विज्ञानमेतत् सर्वं जनार्दनात् ।।१८।।

भावार्थः—योग, ज्ञान, सांख्य, विद्याएँ शिल्पादि कर्म, वेद, शास्त्र और विज्ञान ये सब भी जनार्दन से ही उत्पन्न हुए हैं।।१८।।

एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ।
त्रींल्लोकान् व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः।।१६।।

भावार्थः—एकमात्र विष्णु भगवान् ही महत्स्वरूप हैं। वह सर्वभूतात्मा, विश्वभोक्ता, अविनाशी प्रभु ही तीनों लोकों को व्याप्त कर नाना भूतों को तरह-तरह से भोगों को प्राप्त करता है।

विशेषः—पूर्वोक्त 'द्यौ सचन्द्रार्कनक्षत्रा' आदि श्लोकों से स्तुति किये जाने योग्य भगवान् वासुदेव का माहात्म्य बतलाते हुए दिखलाते हैं कि पूर्वोक्त फलों

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

की प्राप्ति बतलाना यथार्थ कथन ही है, अर्थवाद नहीं। प्रस्तुत श्लोक में 'भुङ्क्ते' पद अन्तर्णीतण्यर्थ वृत्ति से भोजयति=भोगों को प्राप्त कराता है, ऐसा जानना चाहिये।।१६।।

इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् ।
पठेद्य इच्छेत् पुरुषः श्रेयः प्राप्तुं सुखानि च।।२०।।

भावार्थः—जिस पुरुष को श्रेय (कल्याण) और सुख-प्राप्ति की इच्छा हो, वह श्री व्यास जी के कहे हुए भगवान् विष्णु के इस स्तोत्र का पाठ करे।

विशेष—'इमं स्तवम्' इत्यादि से यह दिखलाते हैं कि इस स्तोत्र को सहस्र-शाखाओं के ज्ञाता भगवान् कृष्ण द्वैपायन ने बनाया है। इसलिये सभी कामना वालों को सब प्रकार का फल प्राप्त करने के लिए इसे श्रद्धापूर्वक पढ़ना चाहिये।।२०।।

विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम् ।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ।।२१।।

भावार्थः—जो व्यक्ति विश्वेश्वर, अजन्मा, संसार की उत्पत्ति तथा लय के स्थान देवाधिदेव पुण्डरीकाक्ष को भजते हैं, वे कभी पराभव को प्राप्त नहीं होते।

विशेषः—'विश्वेश्वरम्' इत्यादि से यह दर्शाते हैं कि स्तुति करनेवाले भक्तजन श्री विश्वेश्वर की उपासना से ही धन्य—कृतार्थ अर्थात् कृतकृत्य हो जाते हैं। 'जिस प्रकार मनुष्य धन की इच्छा से धनवान् की आदरपूर्वक स्तुति करता है, उसी प्रकार यदि विश्वकर्ता की स्तुति करे, तो कौन बन्धन से मुक्त नहीं हो जायेगा ?।।२१।।

माहात्म्य-विषये विशिष्ट-विचारः

इदानीं **"य इदं शृणुयान्नित्यम्"** इत्यारभ्योक्तस्य भगवतो महात्मनो विष्णोर्माहात्म्यस्य विषये किञ्चिद् विचार्यते—किमिदं माहात्म्यमिति ? माहात्म्यशब्दो महतेः पूजार्थादुणाद्यतिप्रत्यये निपातितः। मह्यते=पूज्यते इति महान्=पूजार्ह इत्यर्थः। तस्य भावः कर्म वा माहात्म्यं, ताद्धितः ष्यञ्। माहात्म्यं, महत्त्वं, महिमेत्यनर्थान्तरम्। एवञ्च कस्यचित् पूजार्हस्य भावः कर्म वा माहात्म्य-शब्देनोच्यते। सामान्यतस्तु किञ्चिद्वस्तुविषयकं यत्तद्विशिष्टफलजननसामर्थ्यं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तदिह माहात्म्यशब्दस्य वाच्यम्। तच्च फलजननसामर्थ्यं महति महल्लघुनि च लघ्विति भिद्यते। सर्वत्रैव वस्तुनि किञ्चिन्न किञ्चिद् वैशिष्ट्यं भवत्येव, तदेव च तस्य माहात्म्यम्। इह तु महतो महीयसो भगवतो विष्णोर्यद् गुणकर्मानुबन्धि महत्त्वं, तद्गुणकर्मश्रवणानुबन्धि फलं वा तद् माहात्म्यशब्देनोच्यत इति। विष्णोस्तदपररूपस्य सूर्यस्य वा महत्त्वं मन्त्रैर्निर्दिश्यते। तद्यथा—''**बण्महाँ असि सूर्य**'' (यजुः ३३।३६); ''**यस्य नाम महद्यशः**'' (यजुः ३२।३); ''**महान्तमादित्यवर्णं तमसः परस्तात्**'' (यजुः ३१।१८) इत्यादि।

अस्यैव भगवतो महतः सच्चिदानन्दतारूपं भावं सर्गतदन्तर्गतविलक्षणं विविधपदार्थनिर्माणरूपं कर्म च स्मरन्नभ्यसंश्च मनुष्यो माहात्म्यानुगतं फलमाप्नोति। ''**य इदं शृणुयाद्**'' इति वाक्येन ''**मयि एवाऽस्तु मयि श्रुतम्**'' (अथर्व० १।१।२) इत्यथर्वश्रुत्यर्थो गृहीतः, सूचितश्चानेन यच्छ्रवणपठने परस्परमनुस्यूत इव फलं प्रयच्छेत इति। नाशुभं विद्यते क्वचिदित्यैहिकामुष्मिकाशुभनिवृत्तिरभिहिता, तथा चाशुभनिवृत्तिमिच्छन् मनुष्यो वर्तमानेऽपि शुभमेव कुर्यादित्यर्थत आयाति। एतदभिप्रेत्यैव छात्रो दिवाधीतं रात्रौ स्मरति, मा सति विस्मरणं गुरुदेवो मां प्रातर्हन्यादिति। भवति च सर्वत्र लोकेन साम्यम्। अत्र चास्मत्सत्याग्रहनीतिकाव्ये—

सायं विशुद्धं स्वकमाप्तिकामः
प्रातः प्रयत्नेन विशोधयेत् स्वम्।
प्रातः पुरो यत् परमत्र सायं
तथा जरोषाः परजन्म सायम्।। अ० ५।२।१०।।

एषाञ्च नाम्नां परात्परो विष्णुर्देवता। मूलञ्चात्र—''**यस्यां देवतायामार्थपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते, तद्दैवतः स मन्त्रो भवतीति**'' (निरुक्तम् ७।१)। एभिर्नामभिः स्तूयमानो विष्णुर्धर्मार्थिनामर्थार्थिनां कामार्थिनाञ्च धर्ममर्थं कामं च तेभ्यः ददातीति ''**सत्यधर्मपरायण—धर्मविदुत्तम—श्रीद—काम—कामप्रद**'' इत्यादिनामभिरेव स्पष्टमभिधीयते। **प्रजारेता** इति नाम्ना च विष्णोः प्रजाप्रदत्वमुच्यते प्रजार्थिन इति। नामानि चैतानि यथावसरं व्याख्यातानि, तत्र द्रष्टव्यानि।

समस्तवाङ्मयस्य सारभूतानि सहस्रनामानि कीर्तयन् मर्त्यो विष्णुपरायणः सन्नुत्तमं यशोऽचलां श्रियञ्चाप्नोति। विष्णुरेव व्यापकत्वाद् वासुदेवः सूर्यश्च। अत उक्तं—'**सहस्रं वासुदेवाय**' इति। तथा चोक्तमत्रैव माहात्म्ये—

वासुदेवाश्रयो मर्त्यो, वासुदेवपरायणः ।
वासुदेवविशुद्धात्मा, याति ब्रह्म सनातनम्।। (श्लोक ६)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तथा च यथा देवसदनं पृच्छन् देवसदनमाप्नोति, तथा वासुदेवं स्मरन् शृण्वन् पठंश्च वासुदेवमेवाप्नोति। एतच्चापि ज्ञेयम्—परतत्त्वाख्यं वासुदेवं स्मरन् जपन् वा ब्रह्म सनातनं याति, नतु वसुदेवापत्यं मरणधर्माणं वासुदेवमिति। भगवन्तं विष्णुं स्तुवन्नरो भयादशेषतो विमुच्यते, एतच्चेहैव स्तोत्रे पठितैः **''भयनाशन—महावीर्य-ओजस्तेजोद्युतिधर''** इत्यादिनामभिरुच्यते। एतज्जपतो नरस्य रोगाद् विमुक्तिः **''अव्यथितः, अनामयः''** इति भगवन्नाम्नाभिहिता। तथा चोक्तं चरके—

विष्णुं सहस्रमूर्द्धानं चराचरपतिं विभुम् ।
स्मरन् नामसहस्रेण ज्वरान् सर्वान् व्यपोहति।।

चिकित्सास्थान ३।३१२, ३१३।।

'ज्वर रोगे' धातोर्निष्पन्नो ज्वरशब्दः सामान्येन दुःखपर्यायः। विष्णोश्च **भेषजं भिषक्** च नाम्नी। विष्णुसहस्रनामजपाच्च—**''उदुत्तमं वरुण पाशमस्मदवाधमं''** (ऋक् १।२४।१५) इत्यादि ऋङ्मन्त्रार्थानुगता बद्धस्य बन्धनान्मुक्तिर्भवतीत्युच्यते। दुर्गातितरणञ्चाप्येतज्जपेन—**''जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः। स नः पर्षदति दुर्गाणि०''** (ऋक् १।९९।१) इत्यादि मन्त्रार्थानुगतमुच्यते। अग्निसूर्यविष्णूनां मूलतः एकत्वेऽपि कायौपाधिको भेदोऽपि। विष्णोः **पुरुषोत्तम** इति चतुर्विंशतितमं नाम यथास्थानं व्याख्यातम्, तेनैतज्जपतो मनुष्यस्य सर्वथोन्नतिः सूच्यते। भगवदर्पितसर्वारम्भस्य निरन्तरमनन्यगतमनसा स्तुवतश्च मनुष्यस्य**''तद्विप्रासो विपन्यवो जागृवा ँ सः समिन्धते। विष्णोर्यत् परमं पदम्''** इति याजुष (३४।४४) मन्त्रार्थानुसारिणी सुबोधता, स्वयम्प्रकाशमानता, अर्थात् पापराहित्येन शुचिशीलता च द्योत्यते, या स्पष्टं **''शुचि-भर्ग-मार्ग-अनघादि''** नामभिरभिहिता। वासुदेवभक्तानां निर्भयताऽशुभनिवृत्तिश्च प्रागुक्तैव, तां पुनः जन्ममृत्युजरा- व्याधिरूपमपि भयमस्य स्तोत्रपठितुर्न जायत इति**जन्ममृत्युजरे**त्यादि वचनेन द्रढयति।

'न क्रोधो न च मात्सर्यम्' इत्यादिश्लोकद्वयोक्तस्यार्थस्य स्तोतुः कालेन स्वयमनुभूतिर्भवतीत्यनुभूतमस्माभिः, यतो हि स्तोत्रजपेन सत्यबुद्धेरुदयः, सति च सत्यबुद्धेरुदये परभावोऽपूर्णता च नश्यति, यन्मूलं क्रोधाद्युदयः, पूर्णः सम्प्राप्तसर्वत्रात्मभावश्च कस्मै क्रुध्येत् किं वा लिप्सेत्। ततोऽसौ स्तोता स्वस्ति= अर्थात् निरवधिकेन श्रेयसा युज्यते, जहाति चाशुभां मतिमिति **'स्वस्तिकृद्'** इति भगवन्नाम्ना लभ्यते। सर्वञ्चैतत् पूर्वोक्तं फलं पुरुषोत्तमभक्तानां कृतपुण्यानां

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवतीति प्रतिजानीते—**''भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे''** इत्यादिवचनेन संग्रहीता। **''द्यौः सचन्द्रार्कनक्षत्रा०''** इत्यादिना भगवतो महावीर्यत्वमहाकर्मत्व-महाशक्तित्व-नक्षत्रनेमित्वाख्यानपूर्वकं सर्वाधारत्वं प्रतिपाद्यते।**''ससुरासुरगन्धर्व०''** इत्यादिवचनेन च सर्वस्यास्य चराचररूपस्य जगतः कृष्णवशवर्तित्वमुच्यते। **कृष्णश्च** विष्णुरेवेति नाम-संग्रहे पठितम्।

''इन्द्रियाणि मनोबुद्धिः'' इत्यादि पद्येनेन्द्रियादीनां प्रवर्तकस्य भगवतस्तद्रूपतोक्ता। **''सर्वागमानामाचारः०''** इत्यादिना च सर्वशास्त्रविहितकर्मानुष्ठानरूपस्याचारस्य प्रकृतिः=उद्भवस्थानं धर्मः, यद्वा आचारः=गतिः धर्मस्य च प्रकृतिरच्युतः=स्वनियमास्खलनस्वभावो भगवान् विष्णुरित्युक्तम्। स्वनियमात्=स्वरूपाच्च्युतं सर्वं विपद्यते, यथा स्वरूपेण स्थितोऽपि रथश्च्युते स्वचक्रे गतिन्न कर्तुं प्रभवति। आगमः=शास्त्रं वेदो वा, आगमयति=ज्ञपयति सर्वानर्थानिति। **''ऋषयः पितरो देवाः''** इत्यादिना पद्येन भगवतः प्रतिरूपं विभक्तभावः संगम्यते, तथैव यथा भृत्योपार्जितं धनं भृत्यस्य मनोरथसाधने नानाभावं बिभर्ति।

'सर्वज्ञः' इति नामात्र संग्रहे। तथा च—

विश्वतश्चक्षुरुत विश्वतोमुखः। ऋग् १०।८१।३।।
य इमा विश्वा भुवनानि चाक्लृपे। अथर्व ७।८७।१।।
प्रजापतिः ससृजे विश्वरूपम्। अथर्व १०।७।८।।
यस्मिन् भूमिरन्तरिक्षं द्यौर्यस्मिन्नध्याहिता।
यत्राग्निश्चन्द्रमाः सूर्यो वातस्तिष्ठन्त्यर्पिताः।। अथर्व १०।७।१२।।

एतेन सर्वज्ञत्वं—सर्वकर्तृकत्वं, सर्वाधारत्वं च विष्णोः सुस्पष्टमेव। अत एव **''सर्वज्ञानमयो हि सः''** इति तत्त्वविदां सिद्धान्तः परब्रह्मविषये। मनौ २।७ इत्यत्र श्लोके "सर्वज्ञानमयो हि सः" सन् विविधं व्याख्यातः। इह स नाद्रियते श्लोकांशत्वेन। भगवतः सर्वज्ञानमयत्वाद् योगादिसर्वविधानानां विष्णुरेव मूलम्। मूलत एकत्वेऽपि विष्णोर्व्यक्तेरारभ्य यावत्त्रिलोकीसमष्टिः तावत्तस्य व्याप्तिरिति वस्तुभेदात् विभक्तिरिति।**''द्वा सुपर्णा सयुजा सखाया''** (ऋक् १।१६४।२०) इति मन्त्रोक्तं संगमयन्**''विष्णुरेको महद् भूतं पृथग्भूतान्यनेकशः''** इति पद्यं संगतार्थं भवति। एवञ्च यः श्रेयः सुखानि च प्राप्तुमिच्छेत् स इमं स्तवं पठेत्। यदुक्तं कठोपनिषदि १।२।२—

श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः।
श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

''**विश्वेश्वर**'' शब्दः स्मर्तुः पराभवो जात्वपि न भवतीत्याचष्टे।

नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितमिति—''**विष्णोर्नामसहस्रं मे शृण्विति**''[1] तथा ''**ऋषिभिः परिगीतानीति**[2]'' स्वपूर्वप्रतिज्ञातवचनं माहात्म्यनिर्देशपुरःसरमुपसंहरति सुव्रतो भीष्मो ''**नाम्नां सहस्रं दिव्यानामशेषेणेति**'' विष्णोर्नाम्नां संख्याया अविषयत्वेऽपि सहस्रशब्देन ''**सहस्राण्यं वियतावस्य पक्षौ हरेर्हंसस्य पततः स्वर्गम्**'' (अथर्व १०।८।१८) इति मन्त्रोक्तमर्थं स्मारयन्नन्येषां नाम्नामेतेष्वेवान्तर्भावं गमयत्यशेषशब्देन। प्रत्यक्षं शतादशेति निर्देशो मन्त्रे— ''**इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शतादश**''(ऋग् ६।४७।१८)। यथा ''**स्वाश्रय**'' इति भगवतो नाम एतेन ''**स्वतन्त्रः, स्वावलम्बः**'' इत्यादीनि स्तोत्रेऽसंगृहीतानि नामान्यपि क्रोडीकृतानि, अर्थात् एतदर्थकानि सर्वाणि नामान्येतेनैव संगृहीतानि। अथाप्ययमशेषशब्दः पूर्वप्रतिश्रुतानुसारं नाम्नां सहस्रस्य समाप्तिं गमयति। दिव्यशब्देन चर्षिपरिगीतत्वमुक्तं भवति।

स्वतन्त्रनामवत् विष्णुनाम्ना व्यापकेत्यादीनां, सर्वनाम्ना सर्वव्यापकेत्यादीनां, तथा अग्राह्यनाम्ना निरङ्कनिरञ्जननिरङ्कारादीनां ग्रहणम्। निरङ्कारशब्दो निरुपसृष्टादञ्जतेः क्विपि निरञ्, तस्माच्च ककारमकारादिवत् ''**वर्णात्कारः**'' इति कारप्रत्यये सिध्यति। भगवतो गुणानामानन्त्यं ''**नहि ते शूर राधसो अन्तं विन्दामि सत्रा**'' (ऋक् ८।४६।११) इति ऋङ्मन्त्रेण पुष्यति। राध इति धनस्याभिधानस्य वा नाम। राध्यते=साध्यते, स्तूयते वानेनेति, नः पथः प्रदर्शनमात्रं प्रयोजनम्।

इदमत्र मे वक्तव्यम्—इदं माहात्म्यं विष्णुसहस्रनामस्तोत्रस्य सारगर्भितं स्वल्पाक्षरं चिरानुभूतमव्यभिचारि चातिसक्षिप्तं व्याख्यानमेवेति बोध्यम्।

—मुंशीराम शर्मणः

❖ ❖ ❖

१. महा० शान्ति० १४६/१२; २. महा० शान्ति० १४६/१३

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विष्णु-सहस्त्रनाम-स्तोत्रमधिकृत्य आत्रेयपुनर्वसोर्वचनम्

विष्णुं सहस्त्रमूर्धानं चराचरपतिं विभुम् ।
स्तुवन्नामसहस्त्रेण ज्वरान् सर्वानपोहति।।

(चरक-चिकित्सा० ३।३१२)

सहस्त्रमूर्धानं 'सहस्त्रशीर्षाः पुरुषः' (ऋ० १०।६०।१) इति श्रुत्युक्तमनन्तज्ञानाधिष्ठानं विष्णुं सर्वव्यापकं विभुम् 'अणोरणीयान् महतो महीयान्, इति निदर्शितस्वरूपं चराचरपतिं परमपुरुषं पुरुषः पुरिशयानः कायिकबन्धेन बद्धो जीवो नामसहस्त्रेण विष्णुनामसहस्राभिधानेन स्तोत्रेण भक्त्या स्तुवन् सर्वान् कायिक-मानसिक-आध्यात्मिकान् ज्वरान् सन्तापान् अपोहति दूरीकरोति। तथा सत्ययं स्तुतिकर्त्ता परमानन्दं लभते।

सहस्त्रमूर्धा='सहस्त्रशीर्षाः पुरुषः' (ऋ० १०।६०।१) इस श्रुति से उक्त अनन्त ज्ञानाधिष्ठान विष्णु=सर्वव्यापक विभु=सब से महान् चराचरपति परमपुरुष की यह पुरुष=कायिक बन्धनों से बद्ध जीव विष्णुसहस्त्रनाम से प्रसिद्ध स्तोत्र=स्तुतिसाधन से भक्ति स्तुति करता हुआ सर्वान्=कायिक मानसिक और आध्यात्मिक ज्वरों=सन्तापों को नष्ट करता है और उनके नाश से परमानन्द को प्राप्त होता है।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

।। श्रीविष्णवे नमः।।

महाभारतान्तर्गत-
श्रीविष्णुसहस्रनाम-स्तोत्रम्

(श्री १०८ सत्यदेव-वासिष्ठ-विरचित-
'सत्यभाष्य'-समन्वितम्)

सत्यभाष्यकर्तुर्मङ्गलाचरणम्

श्रीविष्णुसहस्रनामस्तोत्रं व्याचिख्यासुर्निर्विघ्नं परिसमाप्तिकामो भाष्यकारो विष्णोर्नमस्कारात्मकं मङ्गलं कुरुते दशभिः पद्यैः—

अथाऽऽनियन्तारमजं परेशं
पुरातनं नूतनवद्विभान्तम् ।
विश्वस्वरूपैरभिव्यज्यमान-
मव्यक्तरूपं पुरुषं नमामि ।।१।।

अथ+आङ्=समन्तात् नियन्तारमिति विग्रहः। अजप्रभृतीनि विष्णोर्नामानि तानि यथास्थानं व्याख्यास्यन्ते।।१।।

योऽव्यक्तमात्मानमनन्तकर्मा
स्वाभाविकज्ञानबलक्रियाभिः ।
विलक्षयन्नूतनतामुपैति
सनातनं तं पुरुषं नमामि ।।२।।

यदुक्तं नूतनतामुपैति तत्र मन्त्रलिङ्गं यथा—
सनातनमेनमाहुरुताद्यः स्यात् पुनर्णवः।
अहोरात्रे प्रजायेते अन्यो अन्यस्य रूपयोः। (अथर्व १०।८।२३।) ।।२।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यःपापभाजोऽपि पुनाति सद्यो
युनक्ति पुंसः पुरुपुण्यपङ्क्त्या।
स्वानन्यभावात् तमहं दयालुं
वन्दे शिवं विश्वशरण्यमीशम् ।।३।।

शरण्यः, शरणे रक्षणे साधुः शरण्यः। शिव इति सप्तदशे श्लोके सप्तविंशन्नाम।।३।।

स विश्वनिर्माणविधौ विधानं
सर्गादिकाले विहितं विधत्ते ।
यथाप्रतिज्ञं न विधानभङ्गं
करोति तं विश्ववशं नमामि।।४।।

विश्वविधानं यथा सृष्टेरादित आरब्धं, तथाधुना प्रलयञ्च विधत्ते, विधास्यते च, स्वारब्धविधानस्य भङ्गं न करोतीत्यर्थः।।४।।

पूर्णः स्वयं यो न कुतश्चनोनः
पूर्णं विधत्ते स जगद् यथात्मम्।
पूर्णाततं वैश्वमथापि पूर्णं
प्रणौमि पूर्णं परिपूर्णतेप्सुः ।।५।।

'न कुतश्चनोनः' (अथर्व १० ।८ ।४४)पूर्ण इत्यर्थः। यच्चोक्तं—'स जगत् पूर्णं विधत्ते। तत्र मन्त्रलिङ्गम्-**'पूर्णात् पूर्णमुदचति'** (अथर्व १० ।८ ।२९)।

अन्यच्च यदुक्तं पूर्णतेप्सुरिति, तत्र मन्त्रलिङ्गम्—
यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वाऽतितृण्णं बृहस्पतिर्मे तद्दधातु।
शन्नो भवतु भुवनस्य यस्पतिः ।। (यजुः ३६ ।२)।।५।।

यशोबलस्थानविशेषवीप्सोः
कर्मार्थसक्तस्य च नैव काव्यम्।
कवेः क्रियावद् भवतीति हेतो-
र्भूयाद् विरामो मम सव्य एकः ।।६।।

विशेषेण ईप्सुर्वीप्सुस्तस्य। क्रियावत्=क्रियाकरं सफलमित्यर्थः। विराम इति पञ्चनवत्युत्तरं त्रिशततमं नाम विष्णोः।।६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्यादेकतो विश्वमिदं समस्तं
किन्तेन विष्णुर्यदि मेऽस्ति सव्यः ।
ज्वरारिविष्णोः पदमाप्तुकामो
मन्ये स्तुवँस्तन्न जगत् तृणाय ।।७।।

सव्यः=अनुकूल इति विवक्षितार्थः। यदि भगवान् विश्वाध्यक्षो विष्णुर्मेऽनुकूलस्ततो जगत् तृणेन सममपि न मन्य इत्यर्थः। 'ज्वर' इति रोगसामान्यवाचकः शब्दः, ज्वरारिः=ज्वरनाशकः। यदुक्तं चरके—

विष्णुं सहस्रमूर्द्धानं चराचरपतिं विभुम् ।
स्तुवन्नामसहस्रेण ज्वरान् सर्वान् व्यपोहति ।।

(च० चि० स्था० अ० ३।३१२)।।

कायिक-वाचिक-मानसिक-रूपाणां तापानामरिर्नाशको विष्णुरेवौषधरूपेण भिषग्रूपेण च। 'औषधं' 'भिषग्' इति च विष्णोरेव नाम्नी, क्रमशोऽष्टसप्तत्युत्तरं पञ्चशततमं, तथा नवसप्तत्युत्तरं पञ्चशततमञ्च।।७।।

वाचस्पते ! वाचि विराज मेऽद्य
वाग्लेखनीदोषमपाकुरुष्व ।
स्पष्टाभिधानो मम बुद्धिवृत्तिं
स्पष्टां विधेहि स्पश विघ्नवर्गम् ।।८।।

'वाचस्पति' इति विष्णोश्चतुःसप्ततितमे पद्ये त्रिसप्तत्युत्तरं पञ्चशततमन्नाम, पञ्चपञ्चाशत्तमे श्लोके नवत्युत्तरं त्रिशततमं नाम 'परमस्पष्ट' इति। स्पश=बाधस्वेत्यर्थः।।८।।

सदा समुद्रेषु नदीनदेषु
स एव विष्णुर्गिरिगह्वरेषु ।
सर्वत्र विश्वे सुनिगूढरूपो
मह्यं मतिं यच्छतु भाष्यकर्त्रे ।।९।।

सदेति पद्येन भाष्यकारो बुद्धिशुद्ध्यै भगवन्तं प्रार्थयते, तस्य सर्वत्र सत्त्वाद् बुद्धावपि तस्य सत्ता।।९।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न मामकीना मयि शक्तिरस्ति
ज्ञानात्मिका वापि धनात्मिका वा।
त्वच्छक्त्यपेक्षस्तव दिव्यनाम्नां
भाष्याम्बुधेः पारमियां सुखेन ।।१०।।

न मामकीनेति पद्येन भाष्यकारो भाष्याम्बुधेः तरणाय स्वनैर्बल्यं प्रकटयन् भगवत्साहाय्यमपेक्षते ।।१०।।

❖ ❖ ❖

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भाष्यकर्तुरात्मभाव-प्रकाशनम्

(१)

वेदाम्बुधेः समाहृत्य ग्रथिता रत्नमालिका ।
विष्णोर्नामसहस्रस्य श्रीव्यासेन महर्षिणा ।।

(२)

ज्योतिर्मयी [१]निर्गुणनाममाला
[२]सद्भावसद्भावगुणानुबद्धा ।
धृता हृदा हार्दतमो निरस्य
चकास्तु सा मे [३]परमार्थदीपा ।।

(३)

सहस्रनेत्रः स सहस्रशीर्षा
सहस्रपाद् यश्च सहस्रबाहुः ।
सहस्रधामाथ सहस्रनामा
सनातनो मेऽस्तु सदा शिवाय ।।

---

१. 'निर्गुणः' इति भगवतश्चत्वारिंशदुत्तरमष्टशततमं नाम। २—सद्भावः=सत्स्वरूपे भगवति यो भावो=मानसोऽनुरागः, स एव सद्भावरूपो गुणस्तेनानुबद्धाऽनुस्यूता=अनुगतेत्यर्थः। ३. परमम् अर्थं दीपयति=प्रकाशयतीति, परमतत्त्वप्रकाशिकेत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(४)

जगन्नियन्तुर्गुणगातुकामः
करोमि तन्नामसहस्रभाष्यम् ।
सलोकदृष्टान्तसमन्त्रलिङ्ग-
मध्येतृदुःखान्तकरं समूलम् ।।

(५)

न कामये किञ्चिदिहत्यमर्थं
निष्कामयोगी परमार्थकामः ।
सदा यते विश्वजनीनबुद्धि-
रकाम[१]कामैकवितोषणाय ।।

(६)

न मेऽस्ति मेरुर्बहुमाननीयः
सुवर्णरूपो [२]जनयोगहीनः ।
मन्ये महीखण्डमनल्पयोगं
यद्युज्यतेऽशेषपदार्थशुद्ध्यै ।।

(७)

न मे प्रयासोऽस्ति यशोऽधिगन्तुं
नार्थं तथा काममथापि कञ्चित् ।
तथापि विश्वार्तिजिहीर्षयाहं
प्रावर्तिषीहातुल[३]भाष्यकार्ये ।।

---

१. न कामयन्ते किञ्चिदित्यकामा भक्तास्तान् कामयत इत्यकामकामो भगवान्, तस्य एकं=केवलं वितोषणं=प्रसादनं तस्मै। २. जनशब्दः साधारणतात्पर्येण प्रयुक्तो जनसाधारणसम्बन्धरहित इत्यर्थः। ३. अतुलं=असमं= उत्तममित्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भूमिकारूपाः पञ्चदश श्लोकाः

(१)

विश्वतः पाणिपादं तं विश्वतोऽक्षिशिरोमुखम्।
वन्दे विश्वचरं विष्णुं विश्वाद्यं विश्ववेदसम् ।।

(२)

सर्वेऽथ ते ब्रह्मविदः पुराणा
वेदार्थसृत्यै कृतभूरियत्नाः ।
वेदार्थबोधे विमुखेषु सम्यग्
ग्लानिं प्रयातेषु मनःसु नृणाम् ।।

(३)

नृणां मनोग्लान्यपनेतुकामा
वेदप्रसाराहितमूललक्ष्याः ।
तदर्थबोधौपयिकानि सर्वे
शास्त्राणि निन्युः प्र च ते बहूनि।।

(४)

धातून् परस्थानुत वाऽऽगमादीन्
प्रकल्प्य विच्छिद्य दयालवस्ते ।
सज्ज्ञानकोशं निखिलाधिमोषं
वेदं ररक्षुः प्रणमामि तांस्तान् ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(५)

तेषां तथाऽऽकारमिमं प्रयत्नं
समीक्ष्य नम्रो मिषतस्तु नाम्नाम् ।
भाष्यं तनोम्यात्ममनःप्रसत्त्यै
वेदस्य सत्यार्थसमर्पकस्य ।।

(६)

लोकेन वेदोऽपि च तेन लोकः
परस्परं तौ व्यतिपुष्यमाणौ ।
स्वज्ञानकर्मोभयरूपरूप्यं
विश्वं विधत्तः परिपूर्णरूपम् ।।

(७)

तस्मात्प्रसङ्गो न विवादवाचां
कृते प्रयत्ने मयकाल्पमात्रे ।
स्वान्तःसुखायैव मया प्रयस्तं
विज्ञा! विवादाय मतिर्न कार्या ।।

(८)

न ह्यन्तपारं भगवद्गुणानां
नाम्नां कुतः स्यात्तु गुणानुगानाम् ।
प्रख्यातमात्राणि च यानि तानि
व्यासेन नामानि समाहृतानि ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(६)

व्यासीकृतान्यत्र समीक्ष्य विज्ञाः
स्वच्छं मनः स्वं परिनन्दयन्तु ।
नन्द्यं वचो वा किमु वापि निन्द्यं
मह्यं ददत्वाग्रहमुक्तभावम् ।।

(१०)

न मेऽस्ति वाञ्छा यशसो न रायो
वाञ्छाम्यहं विघ्नविघातमेकम् ।
जीवं महेच्छं विविधा हि विघ्ना
आसर्वमायुःपरिखेदयन्ति ।।

(११)

रजस्तमोभ्यां तु मनोऽनुविद्धं
शश्वन्नरं सर्वपथीनमत्र ।
करोति विभ्रान्तमतिर्नरश्च
प्रेयःसु सर्वं वय आक्षिणोति ।।

(१२)

नाम्नां जपेनेह गुणप्रकाशं
वित्त्वा विदो वेदवचोऽनुरूपम् ।
श्रेयोऽथवा प्रेय उपेत्य वर्त्म
स्वैरं वयः स्वं परितो व्ययन्ताम् ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(१३)

भूराद्यमेकं पदमस्य भूम्नो
भुवर्द्वितीयं स्वरथो तृतीयम् ।
तुरीयपादेन च विक्रमोऽयं
कृताकृतं पश्यति लोकवृत्तम् ।।

(१४)

महार्थतन्नामविवेकजातं
तद्भावलेशो जपकाम्ययाहम् ।
महामहिम्नोऽमितनामभाष्यं
कर्तुं प्रवृत्तोऽस्मि मनःप्रसत्त्यै ।।

(१५)

को नाम मूढोऽमितदुःखदूनः
पराहतो विघ्नगणैरजस्रम् ।
तं दीननाथं जगदीशमाद्यं
जगच्छरण्यं शरणं न गच्छेत् ।।

देवसदनम्
महम-मार्गः,
भिवानी (हरियाणा)
६/५/१९६६ ई० सन् सत्यदेवो वासिष्ठः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भक्तानां प्रीतये
जापकानां सिद्धये च
समाहात्म्यं साङ्गविन्यासञ्च

विष्णुसहस्रनाम-स्तोत्रम्

अथ माहात्म्यम्

यस्य स्मरणमात्रेण जन्मसंसारबन्धनात् ।
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे ।।
नमः समस्तभूतानामादिभूताय भूभृते ।
अनेकरूपरूपाय विष्णवे प्रभविष्णवे ।।

वैशम्पायन उवाच

श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ।
युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ।।१।।

युधिष्ठिर उवाच

किमेकं दैवतं लोके किं वाप्येकं परायणम् ।
स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम् ।।२।।
को धर्मः सर्वधर्माणां भवतः परमो मतः ।
किं जपन्मुच्यते जन्तुर्जन्मसंसारबंधनात् ।।३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भीष्म उवाच—

जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ।।४।।
तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम् ।
ध्यायंस्तुवन्नमस्यंश्च यजमानस्तमेव च ।।५।।
अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ।।६।।
ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ।
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ।।७।।
एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ।।८।।
परमं यो महत्तेजः परमं यो महत्तपः ।
परमं यो महद् ब्रह्म परमं यः परायणम् ।।९।।
पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् ।
दैवतं देवतानां च भूतानां योऽव्ययः पिता ।।१०।।

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ।।११।।

तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर्नामसहस्रं मे शृणु पापभयापहम् ।।१२।।

यानि नामानि गौणानि विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये ।।१३।।

ऋषिर्नाम्नां सहस्रस्य वेदव्यासो महामुनिः ।
छन्दोऽनुष्टुप् तथा देवो भगवान्देवकीसुतः ।।१४।।

विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम् ।
अनेकरूपं दैत्यान्तं नमामि पुरुषोत्तमम् ।।१५।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ॐ अस्य श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रमहामन्त्रस्य श्रीभगवान् वेदव्यास ऋषिरनुष्टुप् छन्दः, श्रीकृष्णः परमात्मा देवता, आत्मयोनिः स्वयंजात इति बीजम्, देवकीनन्दनः स्रष्टेति शक्तिः उद्भवः क्षोभणो देव इति परमो मन्त्रः, शङ्खभृन्नन्दकी चक्रीति कीलकम्, श्रीकृष्णप्रीत्यर्थे सहस्रनामस्तोत्रजपे विनियोगः।

अथ ध्यानम्

ॐ शिरसि श्रीवेदव्यासऋषये नमः। ॐ मुखे अनुष्टुपछन्दसे नमः। ॐ हृदि श्रीकृष्णपरमात्मदेवतायै नमः। ॐ सर्वाङ्गशङ्खभृन्नन्दकी चक्रीति कीलकाय नमः।

अथ करन्यासः

ॐ उद्भवाय अंगुष्ठाभ्यां नमः। ॐ क्षोभणाय तर्जनीभ्यां नमः। ॐ देवाय मध्यमाभ्यां नमः। ॐ उद्भवाय अनामिकाभ्यां नमः। ॐ क्षोभणाय कनिष्ठिकाभ्यां नमः। ॐ देवाय करतलकरपृष्ठाभ्यां नमः।

अथ हृदयादिन्यासः

ॐ विश्वं विष्णुर्वषट्कार इति हृदयाय नमः। अमृतांशूद्भवो भानुरिति शिरसे स्वाहा। ब्रह्मण्यो ब्रह्मकृद्ब्रह्मेति शिखायै वषट्। सुवर्णविन्दुरक्षोभ्य इति कवचाय हुं। आदित्यो ज्योतिरादित्य इति नेत्रत्रयाय वौषट्। शार्ङ्गधन्वा गदाधरः इति अस्त्राय फट्।।

अथ ध्यानम्

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशम् ।
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्।।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यम् ।
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ विष्णुसहस्रनाम-प्रारम्भः

ॐ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः ।
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः ।।१४।।
पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ।।१५।।
योगो योगविदां नेता प्रधानपुरुषेश्वरः ।
नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः ।।१६।।
सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
सम्भवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ।।१७।।
स्वयम्भूः शम्भुरादित्यः पुष्कराक्षो महास्वनः ।
अनादिनिधनो धाता विधाता धातुरुत्तमः ।।१८।।
अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ।।१९।।
अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः ।
प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम् ।।२०।।
ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः ।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ।।२१।।
ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ।।२२।।
सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः ।
अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ।।२३।।
अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः ।
वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः ।।२४।।
वसुर्वसुमनाः सत्यः समात्मा सम्मितः समः ।
अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः ।।२५।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ।
अमृतः शाश्वतस्थाणुर्वरारोहो महातपाः ।।२६।।
सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ।
वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः ।।२७।।
लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः ।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ।।२८।।
भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः ।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ।।२९।।
उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ।
अतीन्द्रः सङ्ग्रहः सर्गो धृतात्मा नियमो यमः ।।३०।।
वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः ।
अतीन्द्रियो महामायो महोत्साहो महाबलः ।।३१।।
महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ।
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक् ।।३२।।
महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः ।
अनिरुद्धः सुरानन्दो गोविन्दो गोविदांपतिः ।।३३।।
मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ।
हिरण्यनाभः सुतपा पद्मनाभः प्रजापतिः ।।३४।।
अमृत्युः सर्वदृक्सिंहः संधाता संधिमान् स्थिरः ।
अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ।।३५।।
गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ।
निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ।।३६।।
अग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः ।
सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात् ।।३७।।
आवर्तनो निवृत्तात्मा संवृतः सम्प्रमर्दनः ।
अहःसंवर्तको वह्निरनिलो धरणीधरः ।।३८।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः।
सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः।।३६।।
असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः।
सिद्धार्थः सिद्धसङ्कल्पः सिद्धिदः सिद्धिसाधनः।।४०।।
वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः।
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः।।४१।।
सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः।
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः।।४२।।
ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः।
ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः।।४३।।
अमृतांशूद्भवो भानुः शशबिन्दुः सुरेश्वरः।
औषधं जगतः सेतुः सत्यधर्मपराक्रमः।।४४।।
भूतभव्यभवन्नाथः पवनः पावनोऽनलः।
कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः।।४५।।
युगादिकृद्युगावर्तो नैकमायो महाशनः।
अदृश्योऽव्यक्तरूपश्च सहस्रजिदनन्तजित्।।४६।।
इष्टोऽविशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः।
क्रोधहा क्रोधकृत् कर्ता विश्वबाहुर्महीधरः।।४७।।
अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः।
अपांनिधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः।।४८।।
स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः।
वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः।।४६।।
अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः।
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः।।५०।।
पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत्।
महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः।।५१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अतुलः शरभो भीमः समयज्ञो हविर्हरिः।
सर्वलक्षणलक्षण्यो लक्ष्मीवान्समितिञ्जयः।।५२।।
विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः।
महीधरो महाभागो वेगवानमिताशनः।।५३।।
उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः।
करणं कारणं कर्त्ता विकर्ता गहनो गुहः।।५४।।
व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः।
परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः।।५५।।
रामो विरामो विरतो (जो) मार्गो नेयोऽनयो नयः।
वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः।।५६।।
वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः।
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः।।५७।।
ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः।
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः।।५८।।
विस्तारः स्थावरस्थाणुः प्रमाणं बीजमव्ययम्।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः।।५९।।
अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः।।६०।।
यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः।
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम्।।६१।।
सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत्।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः।।६२।।
स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत्।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः।।६३।।
धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम् ।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ।।६४।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः।
आदिदेवो महादेवो देवेशो देवभृद् गुरुः।।६५।।
उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः।
शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः।।६६।।
सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः।
विनयो जयः सत्यसंधो दाशार्हः सात्वतां पतिः।।६७।।
जीवो विनयितासाक्षी मुकुन्दोऽमितविक्रमः।
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः।।६८।।
अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः।
आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः।।६९।।
महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः।
त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत्।।७०।।
महावराहो गोविन्दः सुषेणः कनकाङ्गदी।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः।।७१।।
वेधाः स्वाङ्गोऽजितः कृष्णो दृढः संकर्षणोऽच्युतः।
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः।।७२।।
भगवान्भगहानन्दी वनमाली हलायुधः।
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः।।७३।।
सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः।
दिवः स्पृक्सर्वदृग्व्यासो वाचस्पतिरयोनिजः।।७४।।
त्रिसामा सामगः साम निर्वाणं भेषजं भिषक्।
संन्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणम्।।७५।।
शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः।।७६।।
अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः।।७७।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः।
श्रीधरः श्रीकरः श्रेयः श्रीमाँल्लोकत्रयाश्रयः।।७८।।
स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः।
विजितात्मा विधेयात्मा सत्कीर्तिश्छिन्नसंशयः।।७९।।
उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतस्थिरः।
भूशयो भूषणो भूतिर्विशोकः शोकनाशनः।।८०।।
अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः।।८१।।
कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः।।८२।।
कामदेवः कामपालः कामी कान्तः कृतागमः।
अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः।।८३।।
ब्रह्मण्यो ब्रह्मकृद् ब्रह्मा ब्रह्म ब्रह्मविवर्धनः।
ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः।।८४।।
महाक्रमो महाकर्मा महातेजा महोरगः।
महाक्रतुर्महायज्वा महायज्ञो महाहविः।।८५।।
स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः।।८६।।
मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।
वसुप्रदो वासुदेवो वसुर्वसुमना हविः।।८७।।
सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः।
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः।।८८।।
भूतावासो वासुदेवः सर्वासुनिलयोऽनलः।
दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः।।८९।।
विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ।
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः।।९०।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एको नैकः सवः कः किं यत्तत्पदमनुत्तमम्।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः।।६१।।
सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी।
वीरहा विषमः शून्यो घृताशीरचलश्चलः।।६२।।
अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक्।
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः।।६३।।
तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः ।
प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः।।६४।।
चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात्।।६५।।
समावर्तो निवृत्तात्मा दुर्जयो दुरतिक्रमः।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा।।६६।।
शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः ।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः।।६७।।
उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः ।
अर्को वाजसनः शृङ्गी जयन्तः सर्वविज्जयी।।६८।।
सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः ।
महाह्रदो महागर्तो महाभूतो महानिधिः।।६९।।
कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः।
अमृतांशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः।।१००।।
सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ।
न्यग्रोधोदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ।।१०१।।
सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः।
अमूर्तिरनघो चिन्त्यो भयकृद् भयनाशनः।।१०२।।
अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान्।
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः।।१०३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भारभृत् कथितो योगी योगीशः सर्वकामदः।
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः।।१०४।।
धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः ।
अपराजितः सर्वसहो नियन्ता नियमो यमः।।१०५।।
सत्त्ववान् सात्त्विकः सत्यः सत्यधर्मपरायणः।
अभिप्रायः प्रियार्होऽर्हः प्रियकृत् प्रीतिवर्धनः।।१०६।।
विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग् विभुः।
रविर्विरोचनः सूर्यः सविता रविलोचनः।।१०७।।
अनन्तो हुतभुग् भोक्ता सुखदो नैकजोऽग्रजः।
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः।।१०८।।
सनात् सनातनतमः कपिलः कपिरप्ययः।
स्वस्तिदःस्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्तिदक्षिणः।।१०९।।
अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः।
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः।।११०।।
अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ।।१११।।
उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः।
वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः।।११२।।
अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः ।
चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः।।११३।।
अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः।
जननो जनजन्मादिर्भीमो भीमपराक्रमः।।११४।।
आधारनिलयोधाता पुष्पहासः प्रजागरः ।
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः।।११५।।
प्रमाणं प्राणनिलयः प्राणभृत् प्राणजीवनः ।
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः।।११६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः।।११७।।
यज्ञभृद् यज्ञकृद् यज्ञी यज्ञभुग् यज्ञसाधनः।
यज्ञान्तकृद् यज्ञगुह्यमन्नमन्नाद एव च।।११८।।
आत्मयोनिः स्वयं जातो वैखानः सामगायनः।
देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः।।११९।।
शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः।
रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः ।।
सर्वप्रहरणायुधोम् नमः ।।१२०।।
इतीदं कीर्तनीयस्य केशवस्य महात्मनः ।
नाम्नां सहस्त्रं दिव्यानामशेषेण प्रकीर्तितम्।।१२१।।
य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत्।
नाशुभं प्राप्नुयात् किञ्चित् सोऽमुत्रेह च मानवः।।१२२।।
वेदान्तगो ब्राह्मणः स्यात् क्षत्रियो विजयी भवेत्।
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात्।।१२३।।
धर्मार्थी प्राप्नुयाद् धर्ममर्थार्थी चार्थमाप्नुयात्।
कामानवाप्नुयात्कामी प्रजार्थी चाप्नुयात्प्रजाम्।।१२४।।
भक्तिमान् यः सदोत्थाय शुचिस्तद्गतमानसः।
सहस्त्रं वासुदेवस्य नाम्नामेतत् प्रकीर्तयेत्।।१२५।।
यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च।
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम्।।१२६।।
न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति।
भवत्यरोगो द्युतिमान् बलरूपगुणान्वितः।।१२७।।
रोगार्तो मुच्यते रोगाद् बद्धो मुच्येत बन्धनात्।
भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः।।१२८।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः।।१२६।।
वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ।
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम्।।१३०।।
न वासुदेवभक्तानामशुभं विद्यते क्वचित्।
जन्ममृत्युजराव्याधिभयं नैवोपजायते ।।१३१।।
इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ।
युज्येतात्मसुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः।।१३२।।
न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे।।१३३।।
द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः।
वासुदेवस्य वीर्येण विधृतानि महात्मनः।।१३४।।
ससुरासुरगन्धर्वं सयक्षोरगराक्षसम् ।
जगद्वशे वर्ततेऽदः कृष्णस्य सचराचरम्।।१३५।।
इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च।।१३६।।
सर्वागमानामाचारः प्रथमं परिकल्पते ।
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः।।१३७।।
ऋषयः पितरो देवा महाभूतानि धातवः ।
जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम्।।१३८।।
योगो ज्ञानं तथा सांख्यं विद्याः शिल्पादि कर्म च।
वेदाः शास्त्राणि विज्ञानमेतत् सर्वं जनार्दनात्।।१३६।।
एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः ।
त्रींल्लोकान्व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः।।१४०।।
इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम्।
पठेद्य इच्छेत् पुरुषः श्रेयः प्राप्तुं सुखानि च।।१४१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम् ।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम्।।१४२।।

इति श्रीमहाभारते शतसाहस्र्यां संहितायां
वैयासिक्यामनुशासनपर्वणि दानधर्मपर्वणि
विष्णुसहस्रनामकथने एकोनपञ्चाशद-
धिकशततमोऽध्यायः।।

❖ ❖ ❖
❖

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीविष्णुसहस्रनाम-सत्यभाष्यम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ

श्रीविष्णुसहस्त्रनाम-सत्यभाष्यम्

(महाभारतानुशासनपर्वान्तर्गतस्य (अ० १४६)
श्रीविष्णुसहस्त्रनामस्तोत्रस्य श्री १०८ पं. सत्यदेव-वासिष्ठ-विरचितं
वेदप्रमाणोपवृंहितं सत्यभाष्यम्)

पूर्वार्द्धम्

(नामसंख्या ००१ - ५००)

वैशम्पायनो जंनमेजयमुवाच—

श्रुत्वा धर्मानशेषेण, पावनानि च सर्वशः ।
युधिष्ठिरः शान्तनवं, पुनरेवाभ्यभाषत।।१।।

पदच्छेदः—

श्रुत्वा, धर्मान्, अशेषेण, पावनानि, च, सर्वशः।
युधिष्ठिरः, शान्तनवम्, पुनः, एव, अभ्यभाषत।।१।।

सत्यभाष्यम्—

वैशम्पायनो व्यासशिष्यः। यो हि व्यासादिष्टो जनमेजयाय भारतं श्रावितवान् यथोक्तं महाभारते (आद्यपर्वणि अ०१)

जनमेजयेन पृष्टः सन्, ब्राह्मणैश्च सहस्त्रशः।
शशास शिष्यमासीनं, वैशम्पायनमन्तिके।।
स सदस्यैः सहासीनः, श्रावयामास भारतम् ।
कर्मान्तरेषु यज्ञस्य, चोद्यमानः पुनः पुनः ।।

स वैशम्पायनो यजुर्वेदे तस्य व्यासस्य शिष्यः। यथाह—

अथ शिष्यान् प्रजग्राह, चतुरो वेदपारगान्।
जैमिनिञ्च सुमन्तुञ्च, वैशम्पायनमेव च।।
पैलं तेषां चतुर्थं च, पञ्चमं मां[१] महामुनिः।

१. पञ्चमं मां=सूतम् इतिहासप्रवक्तारम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ऋग्वेदश्रावकं पैलं, जग्राह स महामुने !
यजुर्वेद-प्रवक्तारं वैशम्पायनमेव च।

(कूर्मपुराणे वेदशाखाप्रणयन प्रकरणे ५२/१२, १३)

जनमेजयश्च परीक्षितस्य पुत्रः सर्पदमनयज्ञस्य कर्ता। तद्यथा—

सर्पापसर्प भद्रं ते, दूरं गच्छ महाविष !
जनमेजयस्य यज्ञान्ते, आस्तीकवचनं स्मर।।
आस्तीकवचनं श्रुत्वा, यः सर्पो न निवर्त्तते।
शतधा भिद्यते मूर्ध्नि, शिंशवृक्षफलं यथा।।

सर्पदमनयज्ञस्थानम्—'**सफीदम**' इति वर्तमाननाम्ना प्रसिद्धं नगरं 'जींद' मण्डलेऽस्ति।

अथ च सिद्धार्थां=पीतसर्षपं पूर्वोपन्यस्तश्लोकाभ्यामभिमन्त्र्यैकविंशतिधा पाठेन ससर्पे गृहे प्रकोष्ठे वा विकिरणात् सर्पोऽपसर्पतीति परीक्षितमस्माभिः।

धर्मान् लोकद्वयसुखसाधकान् कर्मकरणविधानान्, अभ्युदय- निःश्रेयस्करान् वा, अथवा चोदनालक्षणान् सत्कर्मणि प्रेरकानितिहासोपबृंहितान् भावानाचारान् वा, **अशेषेण** सर्वात्मना **श्रुत्वा** निशम्य तथा च **पावनानि** पापक्षयकराणि जप-होम-देवतार्चन-बलि-दानादीनि च सर्वशः सर्वतो भावेन श्रुत्वा **युधिष्ठिरो** धर्मपुत्रः **शान्तनवं** शन्तनोरपत्यं भीष्मं **पुनर्भूय एवमभ्यभाषत**। प्रत्यक्षतः प्रश्नैरात्मनो जिज्ञासां संशयान् वा परिमार्ष्टुं प्रश्नं चकार।

प्रश्नो हि द्विप्रयोजनको भवति अनुक्तजिज्ञासार्थम्, श्रुतस्य च निःसंशयार्थमिति कृत्वात्र स्वल्पप्रयाससाध्यं जन्मजराव्याधिविध्वंसकं घोरसंसारबन्धनाच्च विमोक्तृ किमप्यनुक्तं कर्म यद् धर्मार्थकाममोक्षसाधनं स्यात् तज्ज्ञातुं प्रश्नं चकार।।१।।

युधिष्ठिर उवाच—

किमेकं दैवतं लोके, किं वाप्येकं परायणम् ।
स्तुवन्तः कं कमर्चन्तः, प्राप्नुयुर्मानवाः शुभम्।।२।।

किम्, एकम्, दैवतम्, लोके, किम्, वा, अपि, एकम्, परायणम्।
स्तुवन्तः, कम्, कम्, अर्चन्तः, प्राप्नुयुः, मानवाः, शुभम्।।२।।

प्रथमः प्रश्नः —अत्र **दैवतमिति** पदस्य नपुंसकलिंगत्वात् किमिति च नपुंसके प्रयुक्तं, देव एव देवता ***'देवात्तल्'*** (पा० ५।४।२७) इत्यनेन स्वार्थे तद्धितस्तल्। तलन्तोऽयं देवता-शब्दः स्वभावादेव स्त्री-लिङ्ग एव निरूढः। देवता एव दैवतम्, प्रज्ञादित्वात् स्वार्थे तद्धितोऽण्, 'स्वार्थिकाः प्रत्ययाः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्त

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एव' इति वैय्याकरणानां समयः इति कृत्वा एक एव पुर्ल्लिगो देवशब्दः, देवता दैवतमिति च लिंगान्तरं प्राप्नोति।

लोके—लोकतेर्दर्शनार्थाद् घञि लोकः, लोकनं लोक इति। लोक्यते दृश्यते चराचरं येन यस्मिन् वा स 'लोकः', तस्मिन्। लोकृ भाषार्थो चुरादावपि दृश्यते, तेन लोकयति भाषते इति लोकः, लोक्यते भाष्यतेऽनेनास्मिन् वा स लोकः। एतेन सर्वविधवाग्विषयात्मको लोको गृहीतो भवति, वागाश्रया च सर्वा विद्या, तस्मात् समस्तविद्यास्थाने विद्यागम्ये भुवि वा। **''किमेकं दैवतं लोके''** इति प्रथमः प्रश्नः।

द्वितीयः प्रश्नः—किं वाप्येकं परायणम् ? किं वा अपि, अपि चार्थे। अस्मिन् लोक एकं केवलमन्यस्य सहायापेक्षारहितं परममुत्कृष्टं प्रशस्तं वा अयनं गमनं प्राप्तव्यं वास्ति यदधिकृत्य सर्वाः क्रियाः प्रवर्त्तन्ते, यदधिगम्य च द्वन्द्वातीतो भवति। विद्याविनयसम्पन्नो युधिष्ठिरो **''नान्यः पन्था विद्यतेऽयनाय''** यजुः० ३१-१८ इति मनसि ध्यायन् प्रश्नं चकार—किं वाप्येकं परायणमिति।

तृतीयः प्रश्नः—स्तुवन्तः कं मानवाः शुभं प्राप्नुयुरिति ? मानवाः मनोः सुताः, अत्र मानवा इति पदनिर्देशेन ज्ञाप्यते यत् सर्व एव ब्राह्मण-क्षत्रिय-वैश्य-शूद्राः, ब्राह्मणादिचतुर्भ्योऽप्यतिरिक्ताः पंचजनाः तत्संबन्धिन्यः स्त्रियश्च परिगृह्यन्ते। कं कतमं देवं स्तुवन्तः स्तुतिं श्लोकैः-रागरागिणीभिरुत वा सामभिः कुर्वन्तः, साम यथा—

१ २ ३ १ २ ३ १ २ ३ २ ३ २ २ ३ १ २ ३ १ २
उ प त्वाग्ने दि वे दि वे दो षा वस्त र्धिया व य म्। न मो भरन्त ए मसि।।

(साम सं०-प्र०-दशति-२, मं०-४)

अस्य गीतिर्यथा—

२ १ ४र ५र
उ पा त्वा २ ३ ग्ने दिवे दिवायि।

— — २ १र
दो षा २ वोस्ता २ र्। धि या व या म्म्।

१ — १ — २ १र २
न मो २ भा रा २। त ये मा २ ३ सा ३ ४ यि।

१
ओ २३४५इ । डा ।। थु ।। २४।। कौथुमीयशाखानुसारम्

तथा च—

त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ। अथा ते सुम्नमीमहे।।

(सामसं०-उत्तरार्चिक प्र०-४, द्वितीयार्धे म.-१३)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गीतिर्यथा–

१ — र १र
तु वा २॰ हा यि नः पि ता व सा उ।
१ र र — र १ र —
त्वं मा ता श त क्र तो ब भू विथा।
१ — — १ १ २ १ १ १ १ १—
अथौ २ हा उ २। ते २। सु म्न मी म हे २ ३ ४ ५ ।।

शुभं कल्याणं, कल्याणं कलनीयं कमनीयं वा भवति, काम्यते वा सर्वकैरिति, **प्राप्नुयुः** लभेरन्निति तृतीयः प्रश्न।

चतुर्थः प्रश्नः –कं कतमं देव**मर्चन्तः**, अन्तर्बहिश्च तस्य गुणप्रकाशनं कर्म अर्चनमुच्यते। तथा च वेदः–**'अर्चत प्रार्चत प्रियमेधासो अर्चत'।**

(अथर्व० २० ।६२ ।६)

अन्यच्च–**'गायन्ति त्वा गायत्रिणी अर्चन्त्यर्कमर्किणः'** (सामसं-प्र०-८, द-६ मं०-१) इत्यादिविविधमन्त्रप्रतिपादितमर्चनं कुर्वन्तो **मानवाः शुभं** कल्याणं कमनीयमर्थं **प्राप्नुयु**र्लभेरन्निति। शुभस्य वांछितार्थस्य बहुत्वात्। सहस्रनामसंग्रहान्ते फलानि कथयन् नानाविधानि फलानि वक्ति, भिन्नो भिन्नो हि वांछितार्थो लोकस्य, इति चतुर्थः प्रश्नः।।२।।

को धर्मः सर्वधर्माणां, भवतः परमो मतः।
किं जपन् मुच्यते जन्तुर्जन्मसंसारबन्धनात्।।३।।

कः, धर्मः, सर्वधर्माणाम्, भवतः, परमः, मतः।
किं, जपन्, मुच्यते, जन्तुः, जन्म-संसार-बन्धनात्।।३।।

पञ्चमः प्रश्नः– कः कतमो **धर्मः**, धर्म-शब्दो हि प्रथमे श्लोके व्याख्यातचरः, अथवा नानाविधकृतलक्षणव्यूहात्मकानां धर्माणां मध्ये परमः प्रकृष्टःश्रेष्ठ उत्कृष्टो वा, भवत इति पदेन प्रत्यक्षं भीष्मो लक्ष्यते। मतः अभिप्रेत आदृतो वेति **पञ्चमः प्रश्नः।**

षष्ठः प्रश्नः–किं जपन् मुच्यते जन्तुर्जन्मसंसारबन्धनात्? कतमं जप्यं जपन्, जपो हि नाम त्रिविधलक्षणः- उच्चैरुच्चार्यमाणः, उपांशुरुच्चार्यमाणो, मनसि चोच्चार्यमाण इति। पृथक्-पृथक् च त्रयाणां फलं स्मृतिषूक्तम्। जन्तुर्जन्मधर्मा,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जन्तुशब्दनिर्देशात् सर्व एव मनुष्यदेहधारिणो जपार्चनस्तवनादिषु लब्धाधिकाराः सन्तीति विज्ञापयति। जन्मसंसारबन्धनात्—जन्मबन्धनात् संसारबन्धनाच्चेति। जन्मनि मातृगर्भशय्याया अवश्यम्भावित्वेन बन्धात्। जन्मोत्तरं च शरीरेण सह रोग-शोक-जरामरणादीनि च बन्धनान्यपि जन्मबन्धनान्येव, तत्र विशेषं क्लेशमनुभवति जीव इति कृत्वा जन्म-बन्धनान्मुक्तेरुपायः पृष्टः।

संसारबन्धनात्—सम्यक् सरतीति 'संसारः,' समेकीभावेऽव्ययम्, एकीभावेन नियतगत्या सरणं गमनं यस्मिन् स 'संसारः'। यथा हि सर्गादौ सूर्यादीनामुदयास्तौ भवतः स्म तथैवाद्यापि, अमुथैवायं जीवोऽपि मातृभवं सम्बन्धबन्धनं, पितृभवं सम्बन्धबन्धनं, स्त्रीभवं सम्बन्धबन्धनम्, स्त्री च पतिभवं सम्बन्धबन्धनं, सहजस्वभावेन हातुं न शक्ता भवतीति, सर्वविधसम्बन्धेष्वेवं कल्पना कर्त्तव्या भवति। सम्बन्धो हि पूर्वजन्मकृतलेयदेयसमापनार्थं भवति। स च पुनर्द्विधा-योनिसम्बन्धो विद्यासम्बन्ध इति, तत्र मोहरज्जुर्महती दृढा सती सर्वान् परस्परं निबध्नन्ती जीवं पापे पुण्ये वा नियोजयति। तत्र चिराभ्यस्तै राजसतामसकर्मभिर्भूयो भूयो जन्मजरामरण-दुःखव्याधीननुभवन् जीवो विशेषमुद्विग्नः सन् संसारबन्धनान्मुक्तो भवितुमिच्छति, मार्गयति च तदुपायानिति कृत्वा षष्ठः प्रश्नः। यदुक्तं लक्षणव्यूहात्मको धर्म इति तत्र—

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ।। मनुःअ० ६।९२।।
इज्याध्ययनदानानि तपः सत्यं क्षमा घृणा ।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः।। विदुरनीतौ ३।५८।।

एवमादयः कृतव्यूहा धर्माः।

'किमेकं दैवतं लोक' इत्यारभ्य 'किं जपन्मुच्यते जन्तुर्जन्मसंसारबन्धना'-दित्यन्ताः षट्प्रश्नाः।।३।।

भीष्मो युधिष्ठिरं प्रत्युत्तरमुवाच—

भीष्म-शब्दमधिकृत्य किंचिदुच्यते, ***'भियः षुग्वा'*** (पंचपाद्युणादि १।१५८; दशपाद्युणादि—७। ३५) इत्यनेन 'ञिभी भये' जौहोत्यादिकान्मक्प्रत्ययो भवति षुगागमश्च विकल्पेन, अपादानकारके प्रत्ययः। बिभेति बिभ्यति वा यस्माद् यस्या वा स भीमो भीष्मो वा, स्त्री चेद् भीमा भीष्मा वा भयानका, भयानिका वा। ***'प्रत्ययस्थात् कात्पूर्वस्येदाप्यसुपः'*** (अ० ७।३।४४) इतीत्वम्। भीष्मः शान्तनोः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुतः प्रसिद्धः भीमः पाण्डोः सुतः प्रसिद्धः। प्रसंगतः—भीमा भीष्मा वा सेना यस्य स भीमसेनो भीष्मसेनो वा, स्त्रियां भीमसेना भीष्मसेना वा महाभारतप्रसिद्धो भीमो भीमसेननाम्नापि व्यवहृतो भवति।

विशदार्थः—शत्रवो बिभ्यति यस्मात् स भीमो भीष्मो वा, बहिः प्रवृत्तिमन्तीन्द्रियाण्यन्तःप्रवृत्तिमन्ति भवन्ति यस्मात् साधनविशेषात् तत् साधनं चापि भीमं भीष्मं वा। यस्मादुपदेशादात्ममनोदेहानां दोषा भीता इव परे दूरे यान्ति, स उपदेशोऽपि भीमो भीष्मो वा, याभ्यो युक्तिविशेषाभ्यः परिषदः संसदो वा पार्षदा वाममतिं जहति, सा युक्तिस्ता युक्तयो वा भीमा भीष्मा, भीमा भीष्मा वा। भीष्मा प्रतिज्ञा यस्य यस्या वा भीमः भीमा, भीष्मः, भीष्मा वा, एवमन्यदप्यूहनीयं भवति।

'जगत्प्रभु' मित्यादिना श्लोकेन 'किं जपन्मुच्यते'' इत्यात्मकस्य षष्ठस्य प्रश्नस्य समाधानमभिधीयते—

जगत्प्रभुं देवेदेवमनन्तं पुरुषोत्तमम् ।
स्तुवन्नामसहस्त्रेण, पुरुषः सततोत्थितः।।४।।

जगत्प्रभुम् देवदेवम् अनन्तम्, पुरुषोत्तम्।
स्तुवन्, नामसहस्त्रेण, पुरुषः, सततोत्थितः।।४।।

जगतः प्रभुः=जगत्प्रभुस्तं जगत्—गच्छतीति 'जगत्' तस्थौ इति तस्थिवान् स्थाधातोश्छन्दसि क्वसुः, स च लिटि। अत्र चरे जगति मनुष्य-पशु-पक्षि-सरीसृप-पिपीलिका-लिक्षादयो नेत्राभ्यामदृश्याः सूक्ष्मतमाश्च जंगमाः, पर्वत-वृक्ष-धरादयो तद्विकाराश्च स्थिराः। परन्तु सर्वमेतद् भ्रमणशीलमिति कृत्वा गच्छतिधर्मं मूलतो न जहाति तस्माज्जगच्छब्देन गच्छतां स्थावराणां च समावेशनं क्रियत एव। अथवा सेन्द्रियं निरिन्द्रियं च चेतनाचेतनपर्यायं 'जगत्' तस्य प्रभुरीश्वरः स्वामी वा। तथा चाह वेदः—

तमीशानं जगतस्तस्थुषस्पतिमित्यादि (यजुः २५।१८)। वक्ष्यति चाग्रे सहस्रनामसंग्रहे 'ईशानः' इति। देवदेवम्-देवानां देवं, देवास्त्रयस्त्रिंशत्, यथा-अष्टौ वसवः, एकादश रुद्राः, द्वादश आदित्याः, एक इन्द्रः=आत्मा। अथवा—ज्ञानदातृत्वेन ब्रह्मादीनां प्रसिद्धानां वा देव इति देवदेवस्तं, अनन्तं-देशतः कालतो वस्तुतश्चापरिच्छिन्नं, पुरुषोत्तमं—'परं ज्योतिः स उत्तमः पुरुषः' तं, तथा च गीतायां पञ्चदशाध्याये—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्वाविमौ पुरुषौ लोके, क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि, कूटस्थोऽक्षर उच्यते।।१६
उत्तमः पुरुषस्त्वन्यः, परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य, बिभर्त्यव्यय ईश्वरः ।।१७
यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च, प्रथितः पुरुषोत्तमः ।।१८

क्षराक्षराभ्यां कार्यकारणाभ्यां भिन्नः पुरुषस्तं, उक्तं च—

इन्द्रियेभ्यः परा ह्यर्था, अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ।।
महतः परममव्यक्तमव्यक्तात् पुरुषः परः ।
पुरुषान्न परं किंचित्, सा काष्ठा सा परा गतिः।।

कठोप० ३।११-१२।।

दिव्यो ह्यमूर्तः पुरुषः, स बाह्याभ्यन्तरो ह्यजः।
अप्राणो ह्यमनाः शुभ्रो, ह्यक्षरात् परतः परः।।

(मुण्डकोपनिषद् २।.२)

तथा च यजुषि—

एतावानस्य महिमातो ज्यायाँश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।। (यजु० ३१।३)

नामसहस्रेण=नाम्नां सहस्रेण। यद्यपि नाम्नां सहस्रेणानन्तस्येयत्तावधारणं न कर्तुं शक्यते, तथापि जापकस्य सौलभ्यायाल्पतमं परिगणनमेतत्। स्तुवन्—गुणानामाख्यानं त्रिविधजपविधानेन संकीर्त्तनं वा कुर्वन्, सततोत्थितः—यस्य कर्मणो यः कालस्तमनतिवर्त्तयन्। पुरुषः—पुरि शरीरे शेते तिष्ठति यस्मात् 'पुरुषो' जीवोऽत्र ग्राह्यः। तथा च वेदः—

अष्टचक्रा नवद्वारा देवानां पूरयोध्या ।
तस्यां हिरण्ययः कोशः स्वर्गो ज्योतिषावृतः।।
तस्मिन् हिरण्यये कोशे त्र्यरे त्रिप्रतिष्ठिते।
तस्मिन् यद् यक्षमात्मन्वत् तद्वै ब्रह्मविदो विदुः।।

(अथर्व० १०।२।३१-३२)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यक्षमत्र मनः यथा च वेदे—**यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु** (यजुः ३४।२) पुरि जगति शयनाद् व्यापनात् 'पुरुषः' परमात्मा चोच्यते। सर्व-दुःखातिगः-सर्वाणि दुःखान्यतिगच्छतीति सर्वदुःखातिगो भवेत् संपद्येत इति सर्वत्र संबध्यते ।।४।।

तमेव चार्चयन्नित्यमित्यादिश्लोकेन कमर्चन्तः प्राप्नुयुर्मानवाः शुभम् इत्यात्मकं चतुर्थं प्रश्नं समादधाति—

तमेव चार्चयन्नित्यं, भक्त्या पुरुषमव्ययम्।
ध्यायंस्तुवन्नमस्यंश्च, यजमानस्तमेव च ।।५।।

तम्, एव, च, अर्चयन्, नित्यम्, भक्त्या, पुरुषम्, अव्ययम्।
ध्यायन्, स्तुवन्, नमस्यन्, च, यजमानः, तम् एव, च ।।५।।

तमिति पदेन पूर्वनिर्दिष्टं जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमं संकेतयति। एव अत्र विनिश्चयार्थे, चकारोऽत्र समुच्चये बाह्यक्रियाकलापसहितः- ऋग्भिरर्चनं कुर्वन् तमेव चार्चयन्निति निर्देशेन सर्वासां पाषाणकृतानां मृत्स्नया वा साधितानां मसिना वा कल्पितानां मूर्तीनां पूजार्चनविधौ प्रतिषेध उक्तो भवति। नित्यं निरन्तरमभ्यस्यमानं कर्म साधकस्य दृढभूमिं निर्वर्त्तयति। तच्च नित्यमभ्यस्यमानं मनोवाक्कायिकं कर्म भक्त्या भक्तियुक्तया बुद्ध्या कृतं स्यात्।

तं कमिति विस्पष्टयति—पुरुषं पूर्णत्वात् पुरि ऊर्ध्वाधोलोकेषु शयितारं वर्त्तमानम्, पुनस्तं विशिनष्टि अव्ययं जन्मजरामरणादिशारीर- क्रियारहितमेकरसमेतेन जन्मवतां राम-कृष्णादीनां जगत्प्रभुत्वं निवारितं भवति। तमेव चाव्ययं पुरुषं ध्यायन् मनसि चिन्तयन् ऋग्भिः श्लोकैरुत वा रागरागिणीभिः स्तुवन् स्तुतिं कुर्वन्-तथा च वेदः ***'स्तोमैर्विधेमाग्नये'*** (अथर्व० २०।१।३)। च समुच्चयार्थे, नमस्यन् नमस्कारं कुर्वन् मन्त्रलिङ्गं च यथा—**'नमः सायं नमः प्रातर्नमो रात्र्या नमो दिवा'** (अथर्व० ११।२।१६)। **'नमस्ते रुद्र कृण्मः सहस्राक्षायामर्त्य'** (अथर्व० ११।२।३) पूजाङ्गभूताभ्यां स्तुतिनमस्काराभ्यां तमेवाव्ययं पुरुषं यजमानः=यजन् सर्वदुःखातिगो भवतीति शेषः।।५।।

अनादिनिधनमित्यादिस्थैस्त्रिभिः पादैस्तृतीयं प्रश्नं 'स्तुवन्तः कमिति' समादधाति—

अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत्।।६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनादिनिधनम्, विष्णुम्, सर्वलोकमहेश्वरम् ।
लोकाध्यक्षम्, स्तुवन्, नित्यम्, सर्वदुःखातिगः, भवेत्।।६।।

अनादिनिधनं षड्भावविकाररहितम्। षड्भावविकारा यथा—**जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, विनश्यति** (निरुक्ते १।२)। **अतोऽन्ये भावविकारा एतेषामेव विकारा भवन्तीति ह स्माह—ते च यथावचनमभ्यूहितव्याः** (नि० १।३)। विष्णुं वेवेष्टि चराचरं जगदिति तं, सर्वे लोकाः सर्वलोकाः, महांश्चासावीश्वरो महेश्वरः, सर्वलोकानां महेश्वरः सर्वलोकमहेश्वरस्तं, लोकाः सप्तोर्ध्वगाः सप्त चाधोगाः तथा च वेदः— **''स विधाता धामानि वेद भुवनानि विश्वा''** (यजु० ३२।१०)। लोकाध्यक्षं-लोकानधिकृत्याश्नुते व्याप्नोतीति लोकाध्यक्षस्तं, अशेर्देवने' इत्यनेनोणादिकेनाशेः सः प्रत्ययस्तेनाक्षः लोकस्वामीत्यर्थस्तं नित्यं=व्यवधानरिहतं स्तुवन् सर्वदुःखातिगो भवेत् स्यात्।

दुखं हि द्विप्रकारकं भवति—मानसं दुःखमाधिसंज्ञकं, शारीरं व्याधिसंज्ञकम्। उक्तं च स्वकृते **'सत्याग्रहनीतिकाव्ये'**—

आधिं जपेन दानेन, व्याधिं वैद्यस्य संगमात्।
प्राप्तं दुःखं हरेद्यत्नान्न मुग्ध्वा निष्क्रियो भवेत्।।

(अ० ४। पा १ श्लो० ६)

त्रिविधानि च पुनः—आध्यात्मिकाधिदैविकाधिभौतिकानीति।।६।।

ब्रह्मण्यमित्यादिना पुनरपि तमेव स्तोतुमर्हं विशिनष्टि—

ब्रह्मण्यं सर्वधर्मज्ञं, लोकानां कीर्तिवर्धनम्।
लोकनाथं महद्भूतं, सर्वभूतभवोद्भवम् ।।७।।

ब्रहण्यम्, सर्वधर्मज्ञम्, लोकानाम्, कीर्तिवर्धनम्।
लोकनाथम्, महद्भूतम्, सर्वभूतभवोद्भवम् ।।७।।

ब्रह्मण्यं—ब्रह्मणे ब्राह्मणाय वेदाय स्वयंभुवे तपसे हितं ***'तस्मै हितम्'*** (पा० ५।१।५) इति सूत्राधिकारे ***'खलयवमाषतिलवृषब्रह्मणश्च'*** (अ० ५।१।७) इत्यनेन यत् प्रत्ययः। तथा च कोषः—**वेदस्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः।** (अमरे तृतीयकाण्डे नानार्थवर्गे ११४)। सर्वधर्मज्ञं—सर्वान् धर्मान् जानातीति सर्वधर्मज्ञः— ***'इगुपधज्ञाप्रीकिरः कः'*** (पा० ३।१।१३५) इत्येनन 'कः' प्रत्ययः तं लोकानां

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मनुष्याणां कीर्तिवर्धनं– कीर्त्तयो यशांसि 'यशः' स्वयं ब्रह्मणो नाम, तथा च वेदः– ***'यस्य नाम महद्यशः'*** (यजुः ३२।३)। यशःस्वरूपत्वात् कीर्त्तकस्य यशांसि वर्धयति तस्मात् तत् कीत्तिवर्धनम् लोकनाथं– लोकानां नाथो लोकनाथस्तं, लोके नाथ्यते याच्ञार्थमुपस्थीयते, लोकानुपतापयते शास्ति लोकानामीष्टे, अत्र कर्मणि षष्ठी, ***'अधीगर्थदयेशां कर्मणि'*** (पा० सू०) इति वा लोकनाथस्तं, महद्भूतं महत्स्वरूपं मंत्रलिङ्गं च यथा– **'यस्य नाम महद्यशः'** (यजुः ३२।३)। तथा च–**'महांस्ते महतो महिमा'** (अथर्व० १३।२।२६)। सर्वजगत उत्कृष्टत्वात् पूजनीयत्वाद् वा महत्, तद्भावतां गतं महद्भूतं, सर्वभूतभवोद्भवं=सर्वभूतानां प्राणिनां भव उत्पत्तिर्यत्सकाशाद्भवतीति स सर्वभूतभवोद्भवस्तम्।।७।।

एष मे सर्वधर्माणामित्यादिना श्लोकेन ***'को धर्मः सर्वधर्माणां भवतः परमो मतः'*** इत्येतस्य पञ्चमस्य प्रश्नस्य समाधानं करोति–

एष मे सर्वधर्माणां, धर्मोऽधिकतमो मतः।
यद्भक्त्या पुण्डरीकाक्षं, स्तवैरर्चेन्नरः सदा।।८।।

एषः, मे, सर्वधर्माणाम्, धर्मः, अधिकतमः, मतः।
यत्, भक्त्या, पुण्डरीकाक्षम्, स्तवैः, अर्चेत्, नरः, सदा।।८।।

सर्वधर्माणां सर्वेषां चोदनालक्षणानामुत च लक्षणव्यूहीकृतानां धर्माणां मध्ये एष वक्ष्यमाणो धर्मोऽधिकतमो मे मम मतौ मतः पूजित आदृतोऽभिप्रेतो वा। यद् भक्त्या–सपर्यया पुण्डरीकाक्षं–पुण्डरीकं हृदयं तत्राश्नुते व्याप्नोतीति पुण्डरीकाक्षस्तं, हृदयं विशेषेण चेतनास्थानम् (सुश्रुतशा० ४।३१)। ***पुण्डरीकेण सदृशं हृदयं स्यादधोमुखम्*** (सुश्रुतशा० ४।३२)। उक्तं च गीतायां–***ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन! तिष्ठति*** (अ० १८।६१)।

तत्र स्वज्योतिषा प्रकाशमानस्य ज्योतिःस्वरूपस्य भगवतो गुणकीर्त्तनार्थं प्रवृत्ताभिश्छन्दोगीर्भिः सदा सूतकपातक-व्यवधानमनादृत्य प्रातर्मध्याह्ने सायाह्ने निशीथे वा, यदा वा मनुष्यो लब्धावकाशः स्यात्तदैव वक्ति च वेदः–**इन्द्राय साम गायत** (अथर्व २०।६२।५), तथा च–**अर्चत प्रार्चत प्रियमेधासोऽर्चत** (अथर्व २०।६२।६)। सत्कारपूर्वकमर्चनं कुर्यात् नरः मनुष्यः, यदेष धर्म इति संबन्धः।

किंचित् प्रसंगप्राप्तमुच्यते-सेवार्थाद् भौवादिकाद् भजधातोर्भावे क्तिनि प्रत्यये 'भक्तिः' शब्दो निष्पद्यते घञि च 'भाग' इति। समानार्थौ भक्तिभागौ शब्दौ, यथा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

किंचिद्वस्तु स्वकेनांशेन पृथग्भूतं **भाग** इति संज्ञां लभते, अमुनैव विधिना त्रिविधलौकिकैषणया पृथग्भूतं **इदन्न ममेति** भावभावितं कर्म भक्तिरित्युच्यते, कुतः-लौकिकार्थाप्तिभ्यः पृथग्भूतत्वात्। लौकिकार्थसिद्ध्यै यत् क्रियाकलापात्मकं कर्मास्ति तत् पृथक्तया करणीयम्। तद्यथात्र लौकिकमुदाहरणम्-परप्रीत्यर्थं प्रत्तं दुग्धं परस्यात्मानं तर्पयति, स्वात्मपरितुष्ट्यै च पुनः पृथक्क्रीतं सत् पानान्तरमात्मतोषाय कल्पते।

सारार्थः—नैत्यिकं जपादिकं कर्म कृत्वा पुनः लौकिकार्थप्राप्त्यै तद्विधानानुसारं कर्म कर्त्तव्यं भवति। एवं व्याख्याने भजनं पृथक्करणं भक्तिर्भागो वा। भक्तिर्हि जीवं लौकिकार्थबन्धनात् पृथक्करोति, तया इदन्न ममेति भाव—भावितया भक्त्येति।

स्तुतिलक्षणमर्चनं भीष्मेण केन हेतुनाधिक्येनाभिमतमित्यत्रोच्यते-स्तुतिर्हि केवलेनात्मसहायेन पुरुषेण द्रव्यमन्तरा साधनमन्तरा परपीडनमन्तरा यथालाभलभ्ये च काले कर्तुं शक्येति कृत्वा स्तुतिलक्षणार्चनाधिक्येनाभिमता।

स्मरणं चात्र—

जप्येनैव तु संसिद्ध्येद्, ब्राह्मणो नात्र संशयः।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ।। (मनुः २।८७)
'यज्ञानां जपयज्ञोऽस्मि' (गीता १०।२५)

महाभारतेऽपि—

जपस्तु सर्वधर्मेभ्यः, परमो धर्म उच्यते।
अहिंसया च भूतानां, जपयज्ञः प्रवर्त्तते।।

भवति चात्रास्माकम्—

जपन्नरो मन्त्रशतैर्यजंस्तथा
स्मरन् दददभूतबलिं प्रमुच्यते ।
कृताघतो [1]वर्षगणेष्वसम्मतात्
[2]त्रिधाविभक्तादुत भोजयन् द्विजम्।।१।।

किं वाप्येकं परायणमित्यनेन पूर्वपृष्टं द्वितीयं प्रश्नं समादधाति—

परमं यो महत्तेजः, परमं यो महत्तपः।
परमं यो महद्ब्रह्म, परमं यः परायणम्।।६।।

१. वर्षगणमेकं जन्म तेषु। २. त्रिधाविभक्तात्—मनोवाक्कायविभागात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परमम्, यः, महत् तेजः, परमम्, यः, महत्, तपः।
परमम्, यः, महत्, ब्रह्म, परमम्, यः, परायणम् ।।६।।

परममुत्कृष्टं प्रशस्तं यो महत् बृहत् तेजः तेजःस्वरूपम् तथा च वेदः—

पाहि नो अग्ने रक्षसः पाहि धूर्तेरराव्णः ।
पाहि रीषत उत वा जिघांसतो बृहद्भानो यविष्ठ्य।।

(ऋ० १।३६।१५)

बृहद्भानो! बृहतां भानूनां भानुरिति कृत्वा तेजः इति। तथा च वेदः—

स यथा त्वं भ्राजतां भ्राजोऽस्येवाहं भ्राजतां भ्राज्यासम्।

(अथर्व० १७।१।२०)।

तथा च ब्राह्मणम्—

येन सूर्यस्तपति तेजसेद्धः (तै० ब्रा० ३।१२।६७)।
एतद्देवो ज्योतिषां ज्योतिः (बृ० उ० ४।४।१६)।
न तत्र सूर्यो भाति न चन्द्रतारकम् (मु० उ० २।२।१०)।
यदादित्यगतं तेजः इति (गीता १५।१२)।

तथा च—

ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत।
ततो रात्र्यजायत ततः समुद्रोऽर्णवः ।।

(ऋग्वेदे अ० ८, अ० ८, व० ४५, म० ३)।

अभीद्धं तप एव 'महत्तप' इति। परमं यो महद् ब्रह्म महत् महनीयतमं सदात्मनि विराट्त्वं स्वराट्त्वं सम्राट्त्वं च बिभर्ति। तथा च वेदः—

विराजे नमः स्वराजे नमः सम्राजे नमः (अथर्व० १७।१।२२)।

'एष सर्वेश्वरः' (मा० उ० ६) परमं प्रकृष्टं यः परायणं परमं च तदयनं परायणमिति। न ह्येतदधिगमनमन्तरा परं गन्तव्यं प्राप्तव्यं वास्ति। तथा च वेदः—

तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय यजुः ३१।१८।

'य' इत्यनेन 'देवः' अध्याह्रियते यो देवः परमं तेजः, परमं तपः, परमं ब्रह्म, परमं परायणं स एकं सर्वभूतानां परायणमिति स्पष्टार्थः।।६।।

---

१. ना=पुरुषः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'पवित्राणां पवित्रं यो' इत्यादिना श्लोकेन प्रथमं 'किमेकं दैवतं लोके' इति प्रश्नं समादधाति—

पवित्राणां पवित्रं यो, मंगलानां च मंगलम्।
दैवतं देवतानां च, भूतानां योऽव्ययः पिता।।१०।।

पवित्राणाम्, पवित्रम्, यः, मंगलानाम्, च, मंगलम्।
दैवतम्, देवतानाम्, च, भूतानाम्, यः, अव्ययः, पिता।।१०।।

पवित्राणां पावनानां मध्ये पवित्रं पावनं स सर्वविदेक एव, निर्धारणे षष्ठी। अथवा—पवित्रकर्तॄणां वाय्वग्निजलपृथिवीनामपि पावनकर्त्ता स एक एव सर्वलोकभृत्। प्रसंगप्राप्तमुच्यते—

अद्भिर्गात्राणि शुद्ध्यन्ति, मनः सत्येन शुद्ध्यति।
विद्यातपोभ्यां भूतात्मा, बुद्धिर्ज्ञानेन शुद्ध्यति ।।

मनुः अ०५, श्लो० ५।

भवति चात्रास्माकम्—

पवित्रमेकं सकलेश्वरं यो
हृदा गिरा कायिकचेष्टया वा।
स्मरेज्जपेत् सत्यतपश्चरेद्वा
पवित्रता स्वीकुरुते नरं तम् ।।२।।

तथा च—

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम् (यजु० अ० ४०।८) इति मन्त्रलिङ्गात् पवित्रं ब्रह्मेत्युक्तं भवति। मंगलानां मध्ये मंगलं तदेव ब्रह्म। अत्रापि षष्ठी निर्धारणे। मंगलं कल्याणं तत्साधनभूतान्यपि तद्विना न मंगलाय कल्पन्ते। अत इदमुच्यते—मंगलानां च मंगलमिति।

भवति चात्रास्माकम्—

नामंगलं सद्मनि नैव बुद्धौ
भवेन्न सत्त्वे हृदि नापि काये।
तं मंगलं मंगलवर्गवर्यं
परं प्रधानं पुरुषं स्मरेद्यः।।३।।

मंगलवर्गेषु शकुनादिष्वपि यो वरितुमर्हस्तम्—मंगलवर्गवर्यम्। मंगलद्रव्याणि यथा—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विप्राद्यं मणिचोकचारुकलशं दीपान्नसत्पल्लवम्,
रम्भा-वन्दनवार-केतु-चमरं दूर्वांकुरारोपणम् ।
कन्या-तोर्ण-वितान-दर्पण-ध्वजा-ताम्बूल-दध्यक्षतम्,
छत्रं रोचन-गान-वाद्य-व्यजनं पुष्पाज्य-धूपांगनाः ।।
चतुरंगसेना चित्राभधेनुः
पौराणिका मागधवन्दिगायकाः।
पताकयुक्तं तु फलादि मीना
खवेदयुक्तं शुभमंगलांगाः ।।

देवतानां च दैवतमत्र निर्धारणे षष्ठी, देवतानां मध्ये स एव प्रधानो देवः। मन्त्रलिङ्गंञ्च च—**द्यावाभूमी जनयन् देव एकः** (अथर्व० १३।२।२६)।

यथा च श्वेताश्वतरोपनिषदि—

एको देवः सर्वभूतेषु गूढः, सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्षः सर्वभूताधिवासः, साक्षी चेता केवलो निर्गुणश्च ।।६।११।।
यो ब्रह्माणं विदधाति पूर्वं, यो वै वेदांश्च प्रहिणोति तस्मै ।
त ँ ह देवात्मबुद्धिप्रकाशं, मुमुक्षुर्वै शरणमहं प्रपद्ये ।।६।१८।।

भवति चात्रास्माकम्—

रक्षांसि भूतान्युत वा पिशाचका-
नुताथ निम्नानुत वा तमश्चरान्।
त्यक्त्वाखिलान् यो भुवनेशमीड्यं
देवं जपेद्देवमयः स ना[1] भवेत्।।४।।

भूतानां योऽव्ययः पिता यः स्वयमव्ययः सन् जन्मजरामृत्युमतां भूतानां प्राणिनां पिता पालकोऽस्ति, एक एव लोके दैवतं देव इति संगतार्थः।

भवति चात्रास्माकम्—

यो ना नरान् व्याधिजरोपरूढान्
श्रिया विहीनान् विकलांगकान् वा।
प्रीणाति पुष्णाति ददाति धैर्यं
मर्त्योऽप्यसौ सन् लभते पितृत्वम्।।५।।

मर्त्यो मनुष्यो मरणधर्मा सन्नपि पालकांशधारणात् 'पिता' इति संज्ञां लभत इति भावः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रसङ्गप्राप्तं किंचिदात्मकृतैः श्लोकैरुच्यतै—
स विभुर्मनस्वी ध्यातारं वांछितार्थेन योजयति—

निरस्तदम्भो मनुजो हि यः सदा
तमच्युतं ध्यायति वांछिताप्त्यै।
ध्यातः प्रसन्नः स विभुर्मनस्वी
ददाति भोगान् पुरुषाय दिव्यान्।।६।।

स सकलामयघ्नश्चिन्त्यः सन्—

यश्चिन्त्यमानः सकलामयघ्नः
पुष्णाति पोषैर्मनुजैरभीप्स्यैः।
लोकाः! परित्यज्य कथं नु देवं
बम्भ्रम्यमाणाः क्षिपतेह कालम् ।।७।।

क्षिपत लोटि मध्यमपुरुषबहुवचने, इह इति पृथक् तयोः सन्धिः।
स्तुतः सन् स देवः उदात्तभावं ददाति—

स्तवैः स्तुवन् देवमनन्तवीर्य-
मुदात्तभावं लभतेऽप्रकम्प्यम्।
गुणेशसाहाय्यमुपेत्य मर्त्यो
गुणानशेषानतिवर्तते च ।।८।।

परब्रह्मणि दृष्टे सति—

न संशयाः शेरत आत्मगर्भा
दृष्टे परे ब्रह्मणि सत्यरूपे।
तथा यथा पुस्तकपंक्तिपाठा-
न्न संशयाः काललवं स्पृशन्ति ।।९।।

स्मृतः सन् स जनः—

सनातनं लोकपतिं जनं शिवं
स्मरन् मनुष्यः सततं शुचिव्रतः।
विनष्टदुःखो भवतीह निश्चितं
क्रमेण कालेन च याति लभ्यम् ।।१०।।

सोऽच्युतः कीर्तितः सन्—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यस्मिन् न्यस्तमतिर्न याति नरकं स्वर्गोऽपि यच्चिन्तने,
विघ्नो यत्र निवेशितात्ममनसो ब्रह्माऽपि लोकोऽल्पकः।
बुद्धिं चेतसि यः स्थितोऽमलधियां पुंसां ददात्यव्ययः,
किं चित्रं यदघं प्रयाति विलयं तत्राच्युते कीर्तिते ।।

विष्णुपुराणे ६।८।५७।१०।।

'यतः सर्वाणि भूतानि' इत्यादिना श्लोकेन प्रस्तुतस्यैकदेवस्योपलक्षणं पुरस्करोति–

यतः सर्वाणि भूतानि, भवन्त्यादियुगागमे।
यस्मिंश्च प्रलयं यान्ति, पुनरेव युगक्षये ।।११।।

यतः, सर्वाणि, भूतानि, भवन्ति, आदियुगागमे ।
यस्मिन्, च, प्रलयम्, यान्ति, पुनः, एव, युगक्षये।।११।।

यतः यस्मात् सर्वाणि सकलानि भूतानि अघटितघटनापटीयस्या अव्यक्तप्रकृतेर्विकारभूतानि आदियुगागमे कल्पादौ भवन्ति जायन्ते।

तथा च वेदः–

ततो विराडजायत विराजो अधि पूरुषः।
स जातो अत्यरिच्यत पश्चाद् भूमिमथो पुरः।।५।।

तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम्।
पशूँस्ताँश्चक्रे वायव्यानारण्यान् ग्राम्यांश्च ये।।६।।

तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दा ँ सि जज्ञिरे तस्माद्यजुस्तस्मादजायत।।७।।

तस्मादश्वा अजायन्त ये के चोभयादतः।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः।।८।।

ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।
ऊरू तदस्य यद् वैश्यः पदभ्या ँ शूद्रो अजायत।।११।।

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ।।१२।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नाभ्या आसीदन्तरिक्षꣳ शीर्ष्णो द्यौः समवर्त्तत।
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ२ अकल्पयन्।।१३।।

प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते ।
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा।।१६।।

यजुः अ० ३१।।

यस्मिन् च प्रलयं विलयं विघटनतां यान्ति गच्छन्ति पुनर्भूय एव युगक्षये महाप्रलये एवाव्ययोऽत्रावधारणे विनिश्चये वा। चकारेण स्थितिरपि तदाश्रयैवेति विज्ञापयति।

तथा च तैत्तिरीयोपनिषदि—**यतो वा इमानि भूतानि जयन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति।।**३।१।इति।।

भवति चात्रास्माकम्—

एको विभुर्दीप्ततपो भवत्यरं
निमित्तमात्रं जगतो ह सर्जने।
ब्रह्माच्युतानंगरिपुश्च सन् स्वयं
सृजत्यवत्यत्ति जगच्चराचरम्।।११।।

तस्य लोकप्रधानस्य जगन्नाथस्य भूपते।
विष्णोर्नामसहस्त्रं मे, शृणु, पापभयापहम् ।।१२।।

तस्य, लोकप्रधानस्य, जगन्नाथस्य, भूपते।
विष्णोः, नामसहस्त्रम्, मे, शृणु, पापभयापहम्।।१२।।

तस्येति पूर्वश्लोकेषु विशेषणैर्विशदीकृतस्य लोकप्रधानस्य लोके प्रधानतां प्राप्तस्य जगन्नाथस्य जगत्स्वामिनः। 'भूपते' ! इति संबोधनं राजानं युधिष्ठिरमभिलक्ष्य विष्णोः सर्वत्रव्यापनशीलस्य नामसहस्त्रं नाम्नां सहस्त्रं, तच्च पुनर्नामसहस्त्रं कीदृशमिति विशिनष्टि पापभयापहं पापघ्नं भयघ्नं चेति। द्विविधं च पापं कर्म—तत्रेश्वरकृतसृष्टेर्नियमोल्लंघनात्मकमेकं पापं कर्म। राजकृतव्यवस्थाया उल्लंघनात्मकं कर्म पंचजनैर्वा कृताया व्यवस्थाया उल्लंघनात्मकं वा कर्म द्वितीयं पापं कर्म। तदुभयविधं कर्म प्रज्ञामपराध्यति, अपराधे वा वर्त्तयति, यथेच्छाचारिणं वा कुरुते, जपादिकं कर्म प्रज्ञां परिमार्ष्टि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवतश्चात्रास्माकम्—

जगत्कृता या विहिता व्यवस्था
तल्लंघनं पापमिहोक्तमेकम् ।
नृपेण वा पंचजनैः कृताया
व्यवस्थितेरुत्क्रमणं द्वितीयम्।।१२।।

तदु द्वयं कर्म करोति नूनं
प्रज्ञापराधी मनुजो यथेच्छी ।
जपादिकं कर्म नरस्य नूनं
प्रज्ञाप्रमार्ष्ट्यायलमाहुरार्याः।।१३।।

भयापहमिति—भयं हि द्वितीयाद् भवति आत्मनो बलिष्ठाद्वा, कृतान्तकभूतेभ्य उन्मत्तकरिसिंहसर्पादिभ्यो वेदलोकनिन्द्याच्च मानस-वाचिक-कायिककर्मणो भयं भवति। जपादिकं कर्म प्रज्ञां प्रमार्ष्टि मानवाय बुद्धिं बलं धैर्यं च प्रयच्छति।

प्रज्ञाप्रमार्ष्ट्यै + अलम्=प्रज्ञाप्रमार्ष्ट्यायलमिति सन्धिः।

भवति चात्रास्माकम्—

भयं द्वितीयात् सबलात् कृतान्तकात्
कृताच्च निन्द्यात्, त्रिविधात् स्वकर्मणः।
जपादिकं कर्म नराय नूनं
ददाति बुद्धिं सबलं च धैर्यम् ।।१४।।

तथा च श्रुतिः—

'व्यहं सर्वेण पाप्मना' (अथर्व ३।३१।१); **'अव मा पाप्मन् सृज'** (अथर्व ६।२६।१); **'अपेहि मनसस्पते! अपक्राम परश्चर'** (अथर्व २०।९६।२४); **'यत इन्द्र भयामहे ततो नो अभयं कुरु'** (अथर्व १९।१५।१); **'विवस्वान्नो अभयं कृणोतु'** (अथर्व १८।३।६१); **'यतो यतः समीहसे ततो नो अभयं कुरु। शं नः कुरु प्रजाभ्यो अभयं नः पशुभ्यः'** (यजुः ३६।२२)। इत्येवमाद्या बहवो मन्त्राः सन्ति। तन्मे मत्तो मया प्रोच्यमानं शृणु सावधानेन मनसावधारय।

विष्णोः सहस्रनामाधिकृत्य प्रसंगप्राप्तं किञ्चिदुच्यते—आत्मकृतैः श्लोकैः—

यथा वपुः पर्वशतैर्निबद्धं
बिभर्ति नामानि पृथक् च तेषाम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तथाखिलाङ्गं क्रमते क्रियायां
सजीवमेतन्न तु पर्वहीनम् ।।१५।।

तथा ह्यजोऽयं सकलान्तरात्मा
नामाश्नुते ज्ञानबलक्रियाभिः ।
एतद्विदं नामसहस्रमेतद्
भुनक्ति पापादुत सर्वभीत्या ।।१६।।

अनन्तवीर्यं तपसा तपन्तं
महाशयं सर्वनियन्तृवन्द्यम् ।
को नाम शक्नोति नरो नियन्तुं
तमच्युतं नामसहस्ररज्ज्वा ।।१७।।

तथाप्यलं स्युः पठितानि शम्भो-
र्नामानि नुर्मोहतमोऽपहर्तुम् ।
यच्छक्तिमन्नाम विभोर्निरुक्तं
ध्यायञ्जपन्नोति स तस्य तत्त्वम् ।।१८।।

स तत्त्वविद्धीरगुणो मनस्वी
विपत्सु सीदन्नपि नैत्यधैर्यम् ।
क्रमेण कालेन विपत्समूहं
विजित्य सर्वानतियाति लोके ।।१६।।

यथा वपुरनेकपर्वभिर्मिलितं सत् चेतनात्मकेन जीवेन युक्तं कार्यविधौ समर्थं भवति, तथैव ज्ञान-बल-क्रियाभिर्विविधनामवत् ब्रह्म सकलगुणौघैर्विश्वं व्याप्य विष्णुनाम बिभ्रत् सर्वस्मिन् चराचर आत्मानं विश्वरूपेषु व्यनक्ति। पर्वणां नामानि शारीरशास्त्रादवगन्तव्यानि, शिरस्तदवयवाः, हस्तौ तदवयवाश्चेत्येवमादीनि। यथा—अंगुलयः, अंगुलिशलाकाः, अंगुलिपुटकानि, हस्तपर्वाणि।।१२।।

तत्र—

यानि नामानि गौणानि, विख्यातानि महात्मनः।
ऋषिभिः परिगीतानि, तानि वक्ष्यामि भूतये।।१३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यानि, नामानि, गौणानि, विख्यातानि, महात्मनः।
ऋषिभिः, परिगीतानि, तानि, वक्ष्यामि, भूतये।।१३।।

यानि नामानि गौणानि=गुणहेतुना प्रवृत्तानि तेषु सहस्रनामसु विख्यातानि विशेषां प्रसिद्धिं प्राप्तानि सन्ति, तस्य महात्मनो विष्णोः, तानि नामानि कीदृशानि संगृहीतानि सन्ति, तं विशिनष्टि— ऋषिभिर्वेदैः, मन्त्रसमूहत्वाद्वेदस्य मन्त्रैः, साक्षात्कृतधर्मभिः, ऋषिभिर्वा।

तथा च मेदिनीकोषे—

ऋषिर्वेदे वसिष्ठादौ दीधितौ च पुमानयम्।
साक्षात्कृतधर्माण ऋषयो बभूवुः। (निरुक्त १।२०)।

तथा च ब्राह्मणम्—

यदेनान् तपस्यमानान् ब्रह्म स्वायम्भ्वभ्यानर्षत् तदृषीणामृषित्वमिति विज्ञायते। (निरुक्त २।११)।

ऋषिभिरिति पदनिर्देशेन पठिष्यमाणानां सहस्रनाम्नां गौरवातिशयत्वं महदर्थत्वं वा परिलक्षितं भवति। एतेनैतच्च विज्ञाप्यते यदतो भिन्नानि नामान्यपि सर्वव्यापिनो भवितुं शक्नुवन्ति। न हि तस्य भगवत इयत्तया परिच्छेदः कर्त्तुं शक्यत इति। परिगीतानि—बहुत्र बहुधा च शब्दितानि सन्ति 'परि' सर्वतोभावेऽव्ययम्। तानि नामानि वक्ष्यामि कथयिष्यामि। किमर्थमिति भूतये=पुरुषार्थचतुष्टयसिद्धये समृद्धये यशसे सुखावाप्त्यै वा।

उपनिषच्च—**भूत्यै न प्रमदितव्यमिति।**

अत्र किंचित् प्रसंगप्राप्तमुच्यते—वेदा हि स्वतः प्रमाणानि, तस्मादेतानि नामान्यपि स्वतः प्रमाणानि सन्ति। जापकाय जन्मजरामृत्युरहितस्य ब्रह्मणो विविधशक्तय आभासयन्ति। जपिता च स्वयं शनैः शनैस्ताद्भाव्यमादधत् कल्याणायाग्रणीर्भवति।

भवति चात्रास्माकम्—

स्वतः प्रमाणं भवतीह वेदो
वेदेन तुल्यं च सहस्रनाम।
तदुद्भवत्वात् न हि तत्र शंका
युधिष्ठिरं भीष्म उवाच दार्ढ्यात्।।२०।।

तानि नामानि चानुपदं व्याख्यातानि भविष्यन्ति।।१३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

–

अथ सहस्रनाम

अत्र सहस्रनाम्नां संग्रहे सूर्य-आदित्यादिशब्दानामर्थान्तरे प्रसिद्धानामपि सतां सूर्य-रवि-आदित्यादयः शब्दाः सवितुः सनातनस्य देवस्य विभूतित्वेन सन्तस्तद्भेदत्वात्तस्यैव भगवतः स्तुतिरिति प्रसिद्धाग्रहणेऽपि तत्स्तुतित्वं न विघ्नन्ति। सर्वमेतज्जगत्तस्य तेजसा तेजोमत् सत् स्वं रूपं बिभर्ति।

भवति चात्रास्माकम्—

ज्योतींषि लोकाश्च वनानि नद्यो
दिशः समुद्रा गिरयः प्रजाश्च।
यद्भासया भान्ति निजं स्वरूपं
गृणन्ति [1]चैते भुवनेशमेकम्।।१।।

अत्र संग्रहे पुंस्त्रीनपुंसकलिंगवन्ति नामानि संगृहीतानि सन्ति, तानि यथालिंगेन विशेष्येण योजनीयानि। तद्यथा—भूतभव्यभवत्प्रभुः। शिवो देवो विष्णुर्वेति। शरणं ब्रह्म दैवतं वा। सिद्धः-ऋद्धिर्देवता वेति।

अत्र केचिच्छब्दाः समानरूपाः सन्तोऽपि स्वकार्थभेदात् पुनरुक्तिदोषं न लभन्ते। कानिचिच्च नामानि समानार्थकानि सन्त्यपि वर्णभेदात् पुनरुक्तिदोषभाञ्जि न भवन्त्येवं सर्वत्र योजनीयं भवति।

तद्यथा अजः, अजः रूपैकत्वेऽप्यर्थभेदः। श्रीशः श्रीपतिः समानार्थेऽपि व्यञ्जनभेदाद्भेदः। ईश-पति-शब्दयोर्भिन्नधातोर्निष्पन्नत्वात्। भूधरः, महीधरः, पर्यायवाचित्वान्न पुनरुक्तदोषः, स्वयं जातः स्वयंभूरिति च।

ओ३म् इत्येतत् प्राधान्येनेश्वरवाचकम्। ओ३मुच्चारणपुरःसरं वेदमन्त्रा आरभ्यन्त इति कृत्वा वेदा वेदोक्ता सत्यविद्या वा 'ओ३म्' नाम दधति, वेदानां तस्मादेव सर्वहुतो जातत्वात्। मंत्रलिङ्गञ्च—

तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दा ँ सि जज्ञिरे तस्माद्यजुस्तस्मादजायत।। (यजुः अ० ३१।७।।)

१. गृणन्ति=स्तुवन्ति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वमपि वैदिकं याज्ञिकं कर्म यत् कर्मसम्पत्त्यर्थं वेदमन्त्रैः क्रियते, **'पुरुषविद्याऽनित्यत्वात् कर्मसम्पत्तिर्मन्त्रो वेदे'** (निरुक्ते १।२)। तत्र प्रयुक्तानां मन्त्राणां टेः प्रणवादेशः **'प्रणवष्टेः'**, (अ० ८।२।८६) इत्यनेन प्राप्नोति। टि संज्ञा च पाणिनीयानुशासने **'अचोऽन्त्यादि टि'** (अ० १।१।६४)। तद्यथा—**'अपा ँ रेता ँ सि** जिन्वतो३म्', यज्ञकर्म विना—'**अपा ँ रेता ँ सि जिन्वति'** इत्येव । ओ३मेव प्रणवः, **ओंकारप्रणवौ समौ** (अमरकोशे कां १ शब्दादिवर्गे श्लो० ४) **श्रेष्ठतमाय कर्मणे** (यजुः १।१)। **यज्ञो हि श्रेष्ठतमं कर्म** (शत० १,७,१,५,) **यजुर्भिर्यजन्ति** (नि० १३।७)। ओ३म्-**'अवतेष्टिलोपः'** (उणा० १।१४२), अनेन अवधातोर्मन् प्रत्ययः, टेर्लोपश्च।

मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं यज्ञ ँ समिमं दधातु। विश्वे देवास इह मादयन्तामो३म् प्रतिष्ठ।।

यजुः २।१३।।

हे ओंकारवाच्यबृहस्पते! त्वमिह संसारे, हृदये, यज्ञे, विद्यायां वा प्रतिष्ठो भवेति। ईश्वरस्यानुकूल्यमन्तरा न कस्यापि कर्मणः सिद्धिर्भवतीति निश्चितम्। पठिष्यति चात्र संग्रहे **'अनुकूल'** ओ३म्नामसु। **'तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च'** इत्यनेन (अ० ६।१।१५७) सूत्रस्य महाभाष्यवार्त्तिकेन 'बृहस्पति'शब्दो निपात्यते, तस्कर इति च। ओ३म् व्याख्यानं च यजुषि ४०,१७। **'ओ३म् खं ब्रह्म'** इति । तत्रो३म् खं, खं वो३म्। ओ३म् ब्रह्म, ब्रह्म वो३म्।

एवंविधव्याख्याने **'सूर्यो ज्योतिर्ज्योतिः सूर्य'** इत्येवमादीनि व्याख्यालिङ्गानि दृश्यन्ते। अथवा-यावतीं सत्तां खमधितिष्ठति सा ओ३म्—पद—वाच्येनेश्वरेणावास्यास्ति। यद्वा—बृहद्रूपत्वात् सर्वं दृश्यादृश्यं चराचरं जगत् तत् सर्वं ब्रह्म सततम्-ओ३म् पदवाच्येनेश्वरेणावासितमस्ति। मन्त्रलिङ्गञ्च—

ईशावास्यमिद ँ सर्वं यत्किंचिज्जगत्यां जगत् (यजुः ४०।१) इति।

वक्ष्यति सहस्रनामसंग्रहे-ईश्वरः २२ श्लोके, तथा च ब्रह्म इति ८४ श्लोके।

अत्र यानि सहस्रनामान्यनुष्टुप्छन्दोभिः स्मर्यन्ते, तत्र 'ओ३म् संगृहीतं नास्ति तेनैतज्ज्ञायते यदेतेषां व्यष्टिसहस्रनाम्नामोमिति समष्टि नाम तच्च ब्रह्मैव, 'नामी नामतोऽभिन्नो भवति' इति न्यायात्। अतः एतदुक्तं भवति—ओ३म्=विश्वं, विश्वं वा ओ३म्। ओ३म् विष्णुः, विष्णुर्वा-ओ३म्, सर्वत्रैषा कल्पना कल्पनीया भवति।

अत्र यानि नामानि जनिमतां प्रसिद्धानि सन्ति, तानि वेदादुद्धृत्य प्रयुक्तानि सन्ति। तद्यथा-शिवः, रामः, कृष्णः, जयः, देवः, चन्द्रः, प्रकाशः, पृथक् पृथक् समस्तानि वा यथा—रामचन्द्रः, कृष्णचन्द्रः, शिवरामः, अनन्तरामः इत्येवमादीनि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दशरथात्मजो रामः सर्वथा भिन्नोऽस्ति, रामपदवाच्यादनाद्यनन्तादीश्वरादिति। स्वयं राम-कृष्णादयस्तमच्युतं ध्यायन्ति स्म। वेदान् वेदविद्याश्च पठन्ति स्म। रामो हनुमन्तं श्लाघमानो लक्ष्मणं ब्रूते—

नानृग्वेदविनीतस्य नायजुर्वेदधारिणः ।
नासामवेदविदुषः शक्यमेवं प्रभाषितुम् ।।

रामा० किष्किन्धा-काण्डे, सर्गः ३, श्लोकः २८।।

सर्वेषामेव नामानि, कर्माणि च पृथक् पृथक्।
वेदशब्देभ्य एवादौ, पृथक् संस्थाश्च निर्ममे ।।

मनुः० १।२१।।

अनादिनिधना नित्या, वागुत्सृष्टा स्वयंभुवा ।
आदौ वेदमयी दिव्या, यतः सर्वाः प्रवृत्तयः ।।

महाभा० शान्तिपर्व, अ० २३२।२४।।

तथा च ऋग्वेदः—

देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति। ऋ० ८।१००।११।।

देवा विद्वांसो देवीं वाचं संस्कृतवाचमजनयन्त प्रकाशमानीतवन्तस्तां देवीं वाचं विश्वरूपाः पशवः पश्यतिमात्रज्ञानाः, वदन्ति व्यवहारकृते प्रयुञ्जन्तीति भावः।

अध्येतॄणां सुखज्ञानायार्षवाक् संगृह्यते—

तद्यथा शंकुना सर्वाणि पर्णानि संतृण्णान्येवमोंकारेण सर्वा वाक् संतृण्णा। ओंकार एवेदं सर्वम्। (छां उ० २।२३।३)।

ओमित्येदक्षरं सर्वम्। मा० उ० १।

तस्मै स होवाच। एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेति। प्र० ५।२।।

यः पुनरेतत्त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये सम्पन्नः। प्र० उ० ५।५।।

ओमिति ब्रह्म ओमितीदं सर्वम्। तै० उ० १।८।।

प्रणवाद्यास्त्रयो वेदाः, प्रणवे पर्यवस्थिताः ।
वाङ्मयं प्रणवं सर्वं, तस्मात् प्रणवमभ्यसेत् ।। अत्रि० १।८।।

ओं तत् सदिति निर्देशो, ब्रह्मणस्त्रिविधः स्मृतः।
ब्राह्मणास्तेन वेदाश्च, यज्ञाश्च विहिताः पुरा।। गीता १७।२३।।

इति दिङ्मात्रमुक्तम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवतश्चात्रास्माकम्—

त्रिमात्र ओंकार ऋचि प्रसिद्धः
स एव चोक्तः प्रणवेन वापि ।
यज्ञक्रियायां प्रणवत्वमेति
टिर्वेदमन्त्रस्य मतं प्रसिद्धम् ।।२।।

आनुष्टुपेनात्र सहस्रनाम्नां
यः संग्रहोऽस्त्योउ्म् लभते न तत्र ।
व्याख्यायते नामभिरेक एव
खं ब्रह्म विष्णुरुत विश्वमुक्त्या ।।३।।

अनुष्टुपां समूहः, यद्वा अनुष्टुप इदमानुष्टुपं सहस्रनामस्तोत्रम्।

❖ ❖ ❖

विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः।
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः।।१४।।

१ विश्वम्, २ विष्णुः, ३ वषट्कारः, ४ भूतभव्यभवत्प्रभुः।
५ भूतकृत्, ६ भूतभृत्, ७ भावः, ८ भूतात्मा, ९ भूतभावनः।।१४।।

विश्वम्—१

विश प्रवेशने तौदादिकात् *'अशुप्रुषिटिकणिखटिविशिभ्यः क्वन्'* (उणा० पाद१, सूत्र १५१), इत्यनेन क्वन्प्रत्यये 'विश्वः' शब्दः सिद्ध्यति। सर्वादिगणोपदिष्टत्वाद् विश्व'शब्दः सर्वनाम-संज्ञां लभते त्रिलिंगं च। यदा क्वन् प्रत्ययोऽधिकरणे कारके तदा—विशति तस्मिन् सर्वं 'विश्वं' जगत्, कृत्स्नम्। यदा करणे प्रत्ययस्तदा विष्टमनेन सर्वमिति 'विश्वम्' अधोक्षजः, विष्णुः।

मन्त्रलिङ्गञ्च—

यस्मान्न जातः परो अन्यो अस्ति य आविवेश भुवनानि विश्वा।
प्रजापतिः प्रजया स ँ रराणस्त्रीणि ज्योतींषि सचते स षोडशी।।
यजुः ८।३६।।

ब्रह्म वेदं विश्वं वरिष्ठम्। मु० उ० २।२।११,
पुरुष एवेदं विश्वम् । मु० उ० २।१।१०।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विशतीति विश्वं ब्रह्म—

तत् सृष्ट्वा तदेवानुप्राविशत्, तदनुप्रविश्य, सच्च त्यच्चाभवत्।

तै० उ० २।६।।

अथवा प्रलयकाले सर्वाणि भूतान्यस्मिन् विशन्तीति विश्वं ब्रह्म यत् प्रयन्त्यभिसंविशन्ति। तै० उ० ३।१।।

वक्तव्यम्—

राजा प्रशासनकर्त्री सभा वा प्रजासु विशति शासनसूत्रेण दण्डदानेन वा। प्रजा च शास्तरि विशति श्रद्धया विश्वासेन वा। यदा राजा प्रजापालनधर्मं परित्यज्यात्मन उदयाय दण्डविधानैः प्रजाः पीडयति, तदा प्रजा विद्रोहमाचरति। कुतः? राजा प्रजा च परस्परं भगवतो विश्वनामात्मकं गुणं परित्यजतः।

गुरुः शिष्ये विद्योपदेशेन विशति शिष्यश्च तस्मिन् गुरौ श्रद्धया विशति। एतद् दृष्ट्वा ज्ञातव्यम्—सर्वव्यापकस्य विश्वनामात्मको गुण उभयोर्गुरुशिष्ययोर्वर्त्तते। यदा द्वावेव छलमादधानौ परस्परं व्यवहरतः, तदा क्लेशोऽविश्वासो वोत्पद्यते। कुतः? अनन्तवीर्यस्य विश्वरूपगुणस्य तत्राऽसद्भावात्।

अमुथैव यदि कश्चित् कर्त्ता किंचित् कार्यमारभते, यदि तत् कार्यं कर्त्तरि विशति, अर्थात् तद्वशे तिष्ठति, तेन कर्त्रा न कस्याप्यृणं तत्कार्यमधिकृत्य कस्मैचिद् दातव्यं भवति, तदा विश्वनामगुणवद् ब्रह्म तस्मिन् कार्ये आनुकूल्यं भजते। यदा कार्यारम्भकर्त्तुर्बुद्धिः स्वयमेव नूतनानि मार्गाणि मृग्यमाणा तत् कार्यमग्रेऽग्रे नयति, तदा विशतीति विश्वं नामात्मकगुणधृत् ब्रह्म तस्मिन् कर्त्तरि स्वयमुपस्थितमस्तीति निर्विकल्पं ज्ञातव्यम्। अतिबहुत्वाल्लोकसम्बन्धानां सर्वत्रैवंविधाः कल्पनाः कल्पनीया भवन्तीति दिक्।

विश्वमशेषं कृत्स्नं समस्तं निखिलाखिलानि निःशेषम्।
समग्रं सकलं पूर्णमखण्डं स्यादनूनके।।

अमरकोशे—कां० ३, विशेष्यनिघ्नवर्गः—१, श्लोकः-६५

इति द्वादशपर्यायो विश्वशब्दः।

भवति चात्रास्माकम्—

यथा जगद् ब्रह्मणि विष्टमस्ति
स्त्रष्ट्राऽथवा विष्टमिदं जगत् स्यात्।
कृत्स्नं जगत् ब्रह्म च विश्वमुक्तं
प्रकाशते यत्र स विश्वभक्तः ।।४।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विष्णुः—२

'विष्लृ व्याप्तौ' जुहोत्यादि;, तस्मात् ***'विषेः किच्च'*** (३।३९) इत्यनेनौणादिकेन णु-प्रत्ययः, किच्च स भवति तेन गुणाभावात् 'विष्णु' इति। वेवेष्टि व्याप्नोति कृत्स्नं चराचरं जगदिति 'विष्णुः' स्वयम्भूरिति। तथा च मन्त्रः।

तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य गर्भं जनुषा पिपर्त्तन ।
आस्य जानन्तो नाम चिद् विवक्तन महस्ते विष्णो सुमतिं भजामहे।।

ऋग्वेद १।१५६।३।।

अस्मिन् मन्त्रे—

हे यथाविदः स्तोतारः! पूर्व्यं ऋतस्य यथार्थस्य गर्भं ग्रहणकर्त्तारं निर्विकल्पज्ञानमयं जनुषा जन्मना पिपर्तन सेवध्वम्। आ अस्य जानन्तो नाम, चित् पादपूर्णे आविवक्तन आवदत। हे महः! महनीय! विष्णो! सर्वत्रव्यापनशील! वयं ते तव सुमतिं भजामहे, इति श्रुतेराशयः। अन्यच्च—

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे।
इन्द्रस्य युज्यः सखां।। यजुः ६।४।।

विष्णोः सर्वव्यापकस्येति। अन्यच्च—

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः।
दिवीव चक्षुराततम्।। यजुः ६।५।।

विष्णोः व्यापकस्येत्यर्थः। वेदे बहुत्र विष्णुः शब्दो ब्रह्मपर्याये प्रयुक्तोऽस्ति।

कैश्चित् प्रवेशनार्थाद् विश-धातोर्नुक्प्रत्ययं कृत्वा 'विष्णुः' शब्दः साध्यते। तद्यथा विष्णुपुराणे प्रयोगः—

यस्माद्विष्टमिदं सर्वं, तस्य शक्त्या महात्मनः।
तस्मादेवोच्यते विष्णुर्विशेर्धातोः प्रवेशनात् ।।

विष्णु पु० ३।१।४५।।

'विश्वं' इति नाम्नो व्याख्यायां यदस्माकं वक्तव्यमस्ति, तद् 'विष्णुः' इति नाम्नो व्याख्यानेऽपि पठनीयम्।

भवति चात्रास्माकम्—

विष्ट्वा यथा ब्रह्म जगद्दधाति
विष्टं जगद्वा सुखमेति यस्मिन्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तथा स्वके[1] यः सुखमेति वर्गे[2]
वर्गश्च यस्मिन् स नरोऽस्ति विष्णुः।।५।।

वषट्कारः—३

'वषट्' इत्यव्ययं वाक्यार्थे। गुरोर्वषट् तिष्ठतु शिष्यः, गुरोः कथने तिष्ठतु शिष्य इत्यर्थः। कारो हि स्वार्थे प्रत्ययः, वषडेव वषट्कार इति। वषडेव वौषडव्यय इति च। दर्शपौर्णमासयागे, अन्यस्मिन् वा यागे यमुद्देशीकृत्य वषट् वौषड् वोच्चार्यते, स रुद्रो वसुवनिर्विष्णुरो३म् वा भवति।

मन्त्रलिङ्गञ्च—

स रुद्रो वसुवनिर्वसुदेये नमोवाके वषट्कारोऽनु संहितः।
अथर्व० १३।४।२६।।

यज्ञो वै विष्णुः (तै० सं० १।७।४)।

येन वषट्कारादिमन्त्रात्मना देवान् प्रीणाति स 'वषट्कारः'। दर्शपौर्णमासे होताऽध्वर्युं प्रेषयति—तत्र आ श्रावय, अस्तु श्रौषट्। यज, ये यजामहे। वषट् वौषड् वा, अध्वर्युः श्रौषडाद्यन्तं मन्त्रं पठति, तत्र दीयमानानामाहुतीनां सुबोधार्थं पद्यम्—

चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च ।
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु।।

भवति चात्रास्माकम्—

लोके वषट् वाक्यविधौ प्रयुक्तः
स एव कारेण युतोऽस्ति वेदे ।
रुद्रो वषट्कार ऋचास्ति वाच्यः
प्रैषोऽस्ति दर्शादिषु वौषडन्तः।।६।।

यदुक्तं होताध्वर्युं प्रेषयति इत्यादि, तत्र मन्त्रलिङ्गम्' यथा—

प्रैषेभिः प्रैषानाप्नोत्याप्रीभिराप्रीर्यज्ञस्य ।
प्रयाजेभिरनुयाजान् वषट्कारेभिराहुतीः ।।१९।।
पशुभिः पशूनाप्नोति पुरोडाशैर्हवी ँ ष्या।
छन्दोभिः सामिधेनीर्याज्याभिर्वषट्कारान्।।२०।।

---

१. स्वके वर्गे=स्वपरिवारे । पण्डितवर्गे ब्राह्मणवर्गे इति च यथा लोके। २. वर्गः=परिवारः, तद्विधसमुदायो वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आ श्रावयेति स्तोत्रियाः प्रत्याश्रावो अनुरूपः।
यजेति धाय्यारूपं प्रगाथा ये यजामहाः ।।२४।।

(यजुर्वेदे अ० १६)

भूतभव्यभवत्प्रभुः—४

भूतं च भव्यं च भवच्च भूतभव्यभवन्ति, तेषां प्रभुः भूतभव्यभवत्प्रभुः, ओ३म् विष्णुः, ब्रह्मेत्यादिनामधृत् स एकरस एव।

मन्त्रलिङ्गम् च—

यो भूतं च भव्यं च सर्वं यश्चाधितिष्ठति ।
स्वर्यस्य च केवलं तस्मै ज्येष्ठाय ब्रह्मणे नमः।। अथर्व १०।८।१।।

अथवा वक्ति च वेदः—

पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ।।
एतावानस्य महिमाऽतो ज्यायांश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।। यजु० ३१।२-३।

एतेन ज्ञायते यत् सूर्यभगणैः परिगणनतामुपगतं यज्जगत् तस्य प्रभुः प्रकर्षेण भावयिता। यच्च जगत् सूर्यभगणैः परिभावयितव्यमस्ति तत् भविष्यत् जगत् तस्यापि प्रभुः स्वामी प्रभावयिता स एव। एतेन भूतभव्यभवत्प्रभुनाम्ना ज्ञायते यत् स्वयमेकरसः सन् त्रिविधभूतभव्यभविष्यन्नामप्राप्तुमर्हो जगतः स्वामी। न तस्मिन् नियन्तरि भूतकृतो वर्तमानकृतो भविष्यत्कृतश्च व्यवहारः संगच्छते।

अत एव मन्त्रद्रष्टृभिर्ऋषिभिः सिद्धान्तितं, यत् छन्दसि लुङ्लङ्लिटां सामान्येन प्रयोगो भवति। तद्यथा—**स दाधार पृथिवीम्** (यजुः २५।१०); **सूर्या-चन्द्रमसौ धाता यथापूर्वमकल्पयत्।**ऋ० १०।१९०।३। अर्थश्चैवं—स पृथिवीं दाधार, स पृथिवीं धर्त्ति, स पृथिवीं धरिष्यति। अर्थश्चैवम्—सूर्यस्य व्यतीतान् भगणान् परिलक्ष्य भूतकालकृतो व्यवहारः। सूर्यस्य भवन्तं परिगणनात्मकं भगणं दृष्ट्वा वर्त्तमानकालकृतो व्यवहारो भवति। भविष्यतश्च सूर्यस्य भगणान् लक्षीकृत्य भविष्यत्कालकृतो व्यवहारो भवति।

परन्तु नैतद् ब्रह्मण्येकरसे भवति। तस्मादिदं वक्तुमर्ह्यते यत् वर्त्तमानकालेनाभिहिता क्रिया कालत्रयस्यार्थमभिधास्यतीति। तद्यथा—**'तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम्'** (यजुः २५।१८)। अत्र 'हूमहे'

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति वर्त्तमानस्था क्रियां त्रिकालाभिधायिनीनां क्रियाणामर्थमभिधास्यति।

वक्तव्यम्—

मनुष्यस्य मरणधर्मणः कालेनेयत्ता भवति। तस्मात् भगवति विश्वासवता मनुष्येण नूनमध्यवसेयं यत् मनुष्यस्य सर्वं जीवनं नियतमस्ति, अदृष्टहेतुकेन कर्मणा गतिमत्त्वाच्च सर्वजगतः। भगवद्भक्तं किं वा भगवद्द्वेष्टारं भोगास्तु तयोः पृथक् पृथक् अदृष्टहेतुनिमित्तककृतकर्मनियतवशादुपस्थास्यन्त्येव, तत्र न मुह्यति तत्त्ववित्। तस्मात् पुण्याय प्रयतितव्यम्। प्रज्ञावता मनुष्येणाहंभावमुत्पाद्य नैकोऽप्यपरो केनापि निमित्तेन शत्रुभावमानेतव्यः। एतदेव 'भूतभव्यभवत्प्रभुः' नामवतोऽनन्तस्य ध्यानस्य जपस्य तस्मिन्नास्थायाश्च फलमिति।

यथा लोके कार्यं कारयितुः स्वामिनः कालोऽह्ना मासेन वर्षेण न परिगण्यते, परन्तु भृतकस्य कालस्य संख्यानं दिनैर्मासैर्वर्षैश्च क्रियते तस्मै भृतिं प्रदातुम् अमुथैवेश्वरः सर्वप्राणिभ्यो भोगान् दातुं दापयितुं वा भूतेन भवता भविष्यता च कालेन कलयति, न च स्वयं परिगणितो भवति। समानं च लोकेन स्वल्पसत्तामतः स्वामिन इव, अत एतदुक्तं भवति—प्रकर्षेण भवति 'प्रभुः', सर्वस्मिन् काले सत्तावत् सत् तद् ब्रह्म 'भूतभव्यभवत्प्रभु' रुक्तो भवति, एकरस इति वा।

भवति चात्रास्माकम्—

यो देशदिक्कालविभागमुक्तः
स्वयं प्रभुः सन् सृजतीह विश्वम्।
तमच्युतं सर्वतिङा[1] समूहो
व्यनक्ति[2] कालेन भिनत्ति नैव ।।७।।

भूतकृत्—५

भूतानि करोतीति 'भूतकृत्'। मन्त्रलिङ्गञ्च—

तम आसीत् तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वमा इदम्।
तुच्छ्येनाभ्वपिहितं यदासीत् तपसस्तन्महिनाजायतैकम्।।

ऋ० १० ।१२६ ।३ ।।

---

१. तिङः—लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ्, इत्येवमादयो दश लकाराः कालभेद-विज्ञापनाय धातोः प्रत्ययरूपेणायान्ति। २. व्यनक्तिमात्रम्—यदुक्तं तत्र हेतुः कूटस्थत्वं ब्रह्मण इति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति हेतोर्भूतकृद् ब्रह्मोक्तं भवति।

भूतानि कृन्तति हिनस्ति प्रलयमापादयतीत्याशयमधिकृत्य—'भूतकृत्' प्रलयकर्त्तेत्युक्तं भवति—'भूतकृदिति'।

भूतभृत्—६

यदेश्वरो भूतानि बिभर्त्ति पालयति धारयति पोषयतीत्यात्मकं गुणं दधद् जगत् व्यवस्थापयति तदा 'भूतभृन्नाम्नोच्यते स एक एव।

आनन्दस्वरूपे भगवति रजस्तमसोर्गुणयोः समावेशो न भवति—**'तमसः परिस्वः'** (यजुः० अ० ३५ ।मं० १४) इति मन्त्रलिङ्गात्। स सर्वदैव प्रकाशस्वरूपः। स स्वकीयया सत्यया व्यवस्थया जगत् नियमयति। परन्तु अघटितघटनापटीयस्याः प्रकृतेर्विकारभूतमिदं त्रिगुणात्मकं जगत् तद्व्यवस्थयैव विकारषट्कमापद्यते। षड्भावविकाराश्च यथा—**जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, विनश्यतीति।**

मन्त्रलिङ्गञ्च—

प्राणो ह सर्वस्येश्वरो यच्च प्राणति यच्च न। अथर्व० ११ ।४ ।११।।

मया सो अन्नमति यो विपश्यति यः प्राणिति। ऋ० १० ।१२५ ।४।।

एको दाधार भुवनानि विश्वा। ऋ० १ ।१५४ ।४।।

स देवान् विश्वान् बिभर्ति। ऋ० १ ।५६ ।८।।

भवति चात्रास्माकम्—

अजो नियन्ता सकलं सृजन् जगत्
गुणैः पृथक् सन् यतते निमित्ततः।
जगत् स्वयं तत्कृतया व्यवस्थया
विकारषट्कानयते न स स्वयम् ।।८।।

वंशस्थबिलं छन्दः। लक्षणम्—'वदन्ति वंशस्थबिलं जतौ जरौ'।

भावः—७

भावः—सत्तार्थकाद् भूधातोः ***'ज्वलितिकसन्तेभ्यो णः'*** (पा० ३ ।१ ।१४०) इति णप्रकरणे ***'विभाषा ग्रहः'*** (पा० ३ ।१ ।१४३) इति सूत्रे ***'भवतेश्च'*** इति वार्तिकम्। काशिकाकारमते तेन 'णः' प्रत्ययः='भावः' इति। भाष्यमते तु—भू प्राप्ताविति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चौरादिकाण्णिजन्तधातो पचाद्यचि णेर्लोपे 'भावः' इति। सत्स्वरूपो महासत्तालक्षणो 'भावो' भगवान् विष्णुः।

भावयतीति भावः। स्वकृतव्यवस्थया चतुर्विधां सृष्टिमुत्पादयति। यद्यथा—

अण्डजाः पक्षिसर्पाद्याः स्वेदजा मशकादयः ।
उद्भिज्जा वृक्षगुल्माद्या मानुषाद्या जरायुजाः।।

न हि चतुर्विधसृष्टेरुत्पत्तिः कालमनादृत्य संभवतीति कृत्वा कालोऽपि भावः स्यात्। भवन्त्यस्मिन्नित्यधिकरणे घञ् प्रत्ययं कृत्वा—भवन्त्यस्मिन्निति 'भावः' कालः, भवन्त्यस्मिन्निति वा 'भावो' ब्रह्माण्डमतिवृत्य किञ्चिदुत्पद्यते। ब्रह्माण्डपरिधिश्च द्वादशधा विभागमन्वेति। तद्यथा वेदः—

द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत ।
तस्मिन्त्साकं त्रिशता न शंकवोऽर्पिताः षष्टिर्न चलाचलासः।।

ऋग्० १।१६४।४८।।

एष मन्त्रोऽथर्ववेदे किंचिद्भेदेन दृश्यते। तद्यथा—

द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत ।
तत्राहतास्त्रीणि शतानि शंकवः षष्टि च खीला अविचाचला ये।।

अथर्व० १०।८।४।।

यदेतद् द्वादशप्रध्यात्मकमेकं चक्रं तस्यैकस्य प्रधेः 'राशि' रिति नाम। तत्र नक्षत्राणां समूहत्वेन सद्भावः। ते च राशयो द्वादश। तद्यथा—

मेषो वृषोऽथ मिथुनं कर्कटः सिंहकन्यके ।
तुला च वृश्चिको धन्वी मकरः कुम्भमीनकौ।।

एत एव च पुना राशयः कालमभिदधाना 'मास' संज्ञां लभन्ते। ते च यथावैशाखः, ज्येष्ठः आषाढः, श्रावणः, भाद्रपदः, आश्विनः, कार्त्तिकः, मार्गशीर्षः, पौषः, माघः, फाल्गुनः, चैत्रः, इति द्वादश। ***'नक्षत्रेण युक्तः कालः'*** (पा० ४।२।३) इत्यनेन 'अण्' प्रत्ययस्य सद्भावात् सर्वत्र नक्षत्रस्याद्यचि वृद्धिः। तद्यथा—विशाखा इति नक्षत्रस्य नाम, तत्र विशाखादिसमीपस्थे चन्द्रमसि वर्त्तमाना विशाखादिशब्दाः प्रत्ययमुत्पादयन्ति।

एत एव च द्वादश मासा उत्पादनेऽधिकरणभूता 'भावः' संज्ञां लभन्ते, ते च द्वादश। तद्यथा—तनुः, धनम्, भ्रातृ, सुखम्, पुत्रः, शत्रुः, कलत्रम्, मरणम्, धर्मः, कर्म, आयः, व्ययः, इति द्वादश भावाः। ये ग्रहा राशीनामधिपतयस्त एव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भावानामिति। तद्यथा—मेषवृश्चिकयोर्भौमः, वृषतुलयोः शुक्रः, मिथुन-कन्ययोर्बुधः, कर्कस्य चन्द्रमा, सिंहस्य सूर्यः, धनुर्मीनयोश्च बृहस्पतिः, मकरकुम्भयोः शनिः, इति।

कालात्मकस्य भावस्य ये ईशा ग्रहास्त एव जन्मकाले यथास्थानपतिता भिन्नं भिन्नं फलं ददति। जगतस्तस्थुषश्च पतित्वात्तस्य ब्रह्मणो ग्रहा अपि तत्स्वरूपा एव। तथा च मन्त्रलिङ्गम्—

तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम्।

(यजुः २५।१८)।।

ज्योतिर्विदां समयो यथा—'बृहत्पाराशरहोराशास्त्रे' भावविवेकाध्याये—

यो यः शुभैर्युतो दृष्टो, भावो वा पतिदृष्टयुक् ।
युवा प्रवृद्धो राज्यस्थः, कुमारो वापि यत्पतिः ।।१४।।
तदीक्षणवशात् तत्तद्, भावसौख्यं वदेद् बुधः ।
यद्यद्भावपतिर्नष्टस्त्रिकेशाद्यैश्च[1] संयुतः ।।१५।।
भावं न वीक्षते सम्यक्, सुप्तो वृद्धो मृतोऽथ वा।
पीडितो वास्य भावस्य, फलं नष्टं वदेद्ध्रुवम् ।।१६।।

भवति चात्रास्माकम्—

भावः शोध्यः पराद्यत्नात्, भावे सर्वं प्रतिष्ठितम्।
भावाशुद्धौ भशुद्धेऽपि, फलं नास्तीति चिन्त्यताम् ।।६।।

वेदे ग्रहेभ्यः कृता शं-कामना विज्ञापयति यत्ते ग्रहाः कस्यांचिदवस्थायामशंकराः कल्याणविरोधिनोऽपि भवन्ति। तद्यथाऽथर्ववेदे—

शं नो ग्रहाश्चान्द्रमसाः शमादित्याश्च राहुणा।
शं नो मृत्युर्धूमकेतुः शं रुद्रास्तिग्मतेजसः ।।

अथर्व० ११।६।१०।।

ग्रहानधिकृत्य प्रवृत्तं शास्त्रं 'ज्यौतिषं' नाम। तच्च पुनस्त्रिस्कन्धं-होरा, गणितम्, संहितेति च। ग्रहाश्चराचरं शुभाशुभे नयन्ति। मनुष्योपकारार्थं सर्वविद्या-प्रतिपादकानां शास्त्राणां सद्भावात्। विशेषरुचिमद्भिस्तच्छास्त्रमभ्यसनीयम्।

त एव द्वादशभावास्तदधिपतयश्च ग्रहाश्चराचरमात्मना व्यापयन्ति, शुभमशुभं वा त्रिकालस्थितं विज्ञापयन्ति। कुतः? भावात्मके ब्रह्मणि चराचरस्य प्रतिष्ठितत्वात्, गतिमत्त्वाच्च ग्रहाणाम्।

१. षष्ठाष्टमान्त्यास्त्रिका दुष्टाश्च।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवतश्चात्रास्माकम्—

यो भावरूपं महनीयमीशं
सर्वत्र बुध्वारभतेऽनवद्यम् ।
भावाः शुभाः साधिकृताश्च तस्य
भावात्मके ब्रह्मणि नास्ति पापम् ।।१०।।

यदा नरो भावमयं विशुद्धं
जगत्कृतं वामधियाऽनुपश्यन् ।
करोत्यभद्राणि तदा स शम्भु-
स्त्यजन् नरं तं नरके निधत्ते ।।११।।

कथनान्तरेण पुनः—

यस्मिन् भावे भवति, भावशुद्धौ हि तच्छुचिः ।
तस्मिन् सत्तात्मकं ब्रह्म, तत्रास्तीत्यवधार्यताम् ।।१२।।

भूतात्मा—८

भूतानामात्मा भूतात्मा। 'आत्मा' **सातिभ्यां मनिन्मनिणौ** (उणा० ४।१५३) इत्यनेन अततेः सातत्यगमनार्थान्मनिणि प्रत्यये 'आत्मा' शब्दो निष्पद्यते। अतत्यजस्रं गतिं करोतीति 'आत्मा'। आतयत्यजस्रं हृदयं गमयतीति 'आत्मा'। सततं गमनशीलत्वादात्मनो हृदयमपि सततं गतिमत्।

तथा च मन्त्रलिङ्गं देहाभिमानिनमात्मानमधिकृत्य—

पुण्डरीकं नवद्वारं त्रिभिर्गुणेभिरावृतम् ।
तस्मिन् यद् यक्षमात्मन्वत् तद्वै ब्रह्मविदो विदुः।।

अथर्व० १०।८।४३।।

पुण्डरीकं हृदयं, तत्र सत्त्वरजस्तमसामावृतेः सद्भावान्मनोऽपि त्रिगुणात्मकमुक्तं भवति, यक्षमत्र मनः।

मन्त्रलिङ्गञ्च—

यदपूर्वं यक्षमन्तः प्रजानां तन्मे मनः शिवसंकल्पमस्तु। यजु० ३४।२।।

आत्मनश्चेतनधर्मत्वात् सततं गतिमत्त्वाच्च हृदयमपि सततं गतिमत् सत् संज्ञानात्मकस्य मनसो धर्मस्य नियन्तृ भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दृश्यते च लोके हृदयमनसोर्वैषम्यात् कार्यस्य हानिरसौष्ठवं वा। एवमन्यत्रापि देहिपर्यायवाचिन 'आत्मा' इति शब्दस्य बहुत्र प्रयोगोऽस्ति। यथा—

आत्मन्वत्युर्वरा नारीयमागन् (अथर्व १४।२।१४)।

यदुक्तं—ब्रह्मविदो विदुरिति, तत्रैवं संगन्तव्यम्—**'आत्मा वै पुत्रनामासि त्वं जीव शरदः शतम्'** इत्यत्र पुत्रात्मनोः परस्परं सुतरां नैकट्यमेकीभाववत्त्वं ज्ञापयितुमुक्तमस्ति। एतेन सर्व एव परिजनो परस्परं सुखं दुःखं स्वार्थं वाधिकृत्य 'अतति आतयति वा' तत् भूतात्मेवावस्थितं भवति। एतज्ज्ञानमेव ब्रह्मणो व्यवस्थापरिज्ञानाद् ब्रह्मज्ञानं भवति। महैश्वर्यत्वं च तस्य भूतात्मनो ब्रह्मनामवतो भगवत इति।

सर्वं स्थिरं चरं वा जगत् महाशक्तिमतो ब्रह्मणः सामर्थ्यात्—अतति सततं गमनशीलं भवति। उक्तं च वेदे—**'सूर्य आत्मा जगतस्तस्थुषश्चे'**ति। सूर्यश्चराचरं गमयति, स्वयं च गतिमादधाति। वक्ष्यति चाग्रे श्लोके १०७ सप्तोत्तर एकशततमे 'सूर्य' इति भगवतो नाम। अत एतदुक्तं भवति यत् ग्रहाधिपतेः सूर्यस्याप्ययमेवो३म्पदवाच्य ईश्वर एवातयिता भ्रामयिता वास्ति। सर्वस्य चराचरस्य भूतविकारसंभवस्य भ्रामयिता सन् 'भूतात्मा' उच्यते।

मन्त्रलिङ्गञ्च—

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विचिकित्सति ।।
यस्मिन्त्सर्वाणि भूतान्यात्मेवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः।। यजु० ४०।६-७।।

को वै ब्रह्म, ब्रह्मण इदं ब्राह्मणं वा ज्ञातुं शक्नोति केन वा विधिना ? तदाह—

यो विद्यात् सूत्रं विततं यस्मिन्नोताः प्रजा इमाः ।
सूत्रं सूत्रस्य यो विद्यात् स विद्याद् ब्राह्मणं महत्।।

अथर्व० १०।८।३७।।

सर्वं चराचरं 'ब्राह्मण' मत्राभिमतम्। एतां सृष्टिं दृष्ट्वा विशेषमन्विष्य वा यज्ज्ञानमुत्पद्यते तदपि 'ब्राह्मणं' भवति, तद्विदोऽपि 'ब्राह्मणा' उच्यन्ते।

उक्तं चास्माभिरात्मकृते सत्याग्रहनीतिकाव्ये पंचमाध्याये ऋतुचर्याभिधे तृतीयपादे—

अनन्तकर्तुः कर्मापि, नालमन्ताय कर्हिचित्।
जगद्वेदस्य व्याख्यानं, वेदो विश्वप्रकाशकः।।६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लोकज्ञश्चेन्न वेदज्ञो, वेदज्ञश्चेन्न लोकवित्।
एकपक्षखगस्येव, वाक्यं तस्यावसीदति ।।१०।।

सूत्र-शब्दः 'सिवु तन्तुसंताने' इत्यस्मात् ***'सिविमुच्योष्टेरू च'*** (उणा० ४।१६) इत्यनेन ष्ट्रनि निष्पद्यते। सीव्यति तन्तुरिव जगदिति 'सूत्रं विश्वकर्तुर्विधानमिति। यस्मिन्सूत्रे सर्वा इमाः प्रजा ओताः प्रोताश्च सन्ति, तस्य सूत्रस्य सूत्रं सीवनसाधनं तत् स्वयं ब्रह्मेति ज्ञाता महत् जगदपरपर्यायं ब्राह्मणं वेदेति भावः। अत एवास्माभिः प्रसंगतो लोकोऽपि व्याख्यायते, तद्वेदित्वात्।

भवन्ति चात्रास्माकम्—

आहस्ति कीटान्तमिदं निबद्धं
जगच्चरं हृद्गुहया सचित्तम् ।
आत्मा हृदिस्थो गमयत्यजस्रं
हृदं गुणैरावृतमस्वतन्त्रम् ।।१३।।

आत्मनोऽपाये शरीरे हृदयस्य साद्भाव्येऽपि न चलति हृदयमिति कृत्वोक्तं भवत्यस्वतन्त्रमिति।

यथा तथा विश्वमिदं विधाता
समिद्धतेजा भ्रमयत्यजस्रम् ।
भूतात्मनास्त्येव विभुर्विशेष्य-
स्तं व्यापकं श्रौतवचांसि चाहुः ।।१४।।

जगत्कृता या विहिता व्यवस्था
सैवास्ति सूत्रं जगदस्ति सूत्रे ।
यो वेद लोकं स हि वेद सूत्रं
यो वेद सूत्रं स हि वेद विष्णुम्।।१५।।

भूतभावनः—६

भूतानि भावयति जनयति, सत्तया वास्थापयति, विकासयति, विविधं पुष्पयति वर्धयति वा 'भूतभावन' ईश्वर इति। अमुथैव मनुष्योऽपि किंचिद् वपति जलादिदानेन च तद्रोहत्विति बुद्धिं कुर्वाणस्तद्रक्षति चिरं पोषयति सत्तावत् स्यादिति विविधं पुष्पयितुं फलयितुं च प्रयतते। एषानुकृतिरल्पज्ञानिनो जीवस्य। जीवो हि तन्निर्मितायां सृष्ट्यां तथानुकरोति, यथा सूर्यापरनामग्राह्यो महादेव इति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

मा नो हिंसीज् जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान।
यश्चापश्चन्द्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम ।।

ऋ० १० ।१२१ ।९ ।।

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।।

ऋ० १० ।१२१ ।१ ।।

भवति चात्रास्माकम्—

भूतभावन उत्कृष्टो, यथा विज्ञोऽनुसेवितः ।
तथा जीवोऽपि ताद्भाव्याद्, भूतभावनसंज्ञकः।।१६।।

❖ ❖ ❖

पूतात्मा परमात्मा च, मुक्तानां परमा गतिः।
अव्ययः पुरुषः साक्षी, क्षेत्रज्ञोऽक्षर एव च ।।१५।।

१० पूतात्मा, ११ परमात्मा, च, १२ मुक्तानां परमा गतिः।
१३ अव्ययः, १४ पुरुषः, १५ साक्षी, १६ क्षेत्रज्ञः, १७ अक्षर, एव, च ।।१५।।

पूतात्मा—१०

पूतश्चासावात्मा 'पूतात्मा' कर्मधारयः। पूत आत्मा यस्यासौ पूतात्मा, बहुव्रीहिसमासो भगवति न संगच्छते। कुतः? पवित्रताया उत तदात्मनश्च सत्ता न पृथक् पृथक्रूपेण दृश्यते, सर्वदा शुद्धत्वादपापविद्धत्वाच्च। बहुव्रीहिसमासस्तद्भक्ते संगच्छते। कुतः? मनसस्त्रिगुणात्मकत्वात्। अतो जीवात्मा प्रार्थयते—

मा मा प्रापत् पाप्मा मोत मृत्युः (अथर्व० १७ ।१ ।२९)। इति।

तथा च—

असन्तापं मे हृदयम् (अथर्व० १६ ।३ ।६)। कुरु इति शेषः।

अन्यच्च—

न नः पश्चादघं नशत् (अथर्व० २० ।२० ।६)। इति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जगतस्तस्थुषस्पतिर्भगवांस्तु सदैव शुचिरस्ति।

मन्त्रलिङ्गञ्च—

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः।।
यजुः ४०।८।।

वायोः पूतः पवित्रेण प्रत्यङ् सामो अतिद्रुतः। अथर्व० ६।५१।१।।

अग्नौ यः पवित्रकरणात्मको धर्मोऽस्ति, सोऽपि ब्रह्मण एव।

मन्त्रलिङ्गञ्च—

यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा।
ब्रह्म तेन पुनातु मा। यजुः० १९।४१।।

अग्नेरर्चिष्यन्तरा ब्रह्म पूतात्मपर्यायो विष्णुर्व्यापकोऽस्ति। तेन हेतुना अग्निः पुनाति पाव्यम्। अतः पूतात्मेति प्रभोः सुतरां सार्थकं गौणं नाम।

एतं गुणं ध्यायन् किं वा कार्यविधौ परिणमयन् त्यक्तसर्वविधप्रज्ञापराधो ध्याता नूनं पूतात्मभावाय कल्पते। तादृभाव्यप्राप्तिरेव जपस्य ध्यानस्य च फलमिति। मनसा वाचा कर्मणा बुद्ध्या च यः स्वभावमधिष्ठाय पावित्र्यमाचरति तस्मिन्नभ्यसितरि स्वयं पूतात्मरूपो गुणो ब्रह्म स्थितोऽस्तीत्यवगन्तव्यम्।

भवतश्चात्रास्माकम्—

पूतात्म-शब्देन शुचिः स उक्तो
न तत्र पापस्य लवोऽप्यनक्ति ।
अग्निः पवित्रं स पुनाति विश्वं
पवित्रता ब्रह्मवशाद्धि तस्य ।।१७।।

पूतात्मसंज्ञां गुणतः प्रवृत्तां
विष्णोः स्मरन् कार्यविधौ नयंश्च।
ध्यातापराधात् परिमुच्य शेते
पूतात्मचिन्ता हरतेऽपराधम् ।।१८।।

परमात्मा—११

परमश्चासावात्मा 'परमात्मा' इति कर्मधारयः समासः। परश्चासावात्मेति क्वचिद् व्याख्यायते। न स समासविग्रहोऽपितदर्थनिर्देशकं वाक्यम्। परमात्म-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पर्यायनाम्नि नित्यशुद्धबुद्धमुक्तस्वभावे ब्रह्मणि परम आत्मा यस्येति स परमात्मेति बहुव्रीहिसमासो न युज्यते। कुतः? न हि तस्मादात्मनः परः सूक्ष्ममपरं किंचिद्विद्यते।

आत्मशब्दो व्याख्यातचरः, 'पूतात्मा' इति नामव्याख्यानावसरे। विष्णोः पर्यायवाचि परमात्मेति नाम, स चराचरस्य जगत आतयिता सन्नपि देहाभिमानिन आत्मनोऽपि नियन्तातयिता वास्ति। परमात्मा जीवात्मा च शाश्वतीभ्यः समाभ्यः पृथक् पृथक् सत्तामधितिष्ठतः। कुतः? स्वयंभूर्भगवान् शाश्वतीभ्यः समाभ्योऽर्थान् याथातथ्यतो विदधाति, तत्र परमात्मनो भिन्नेन भोक्त्रा नूनं पृथक्त्वेन भवितव्यमिति कृत्वा स जीवात्मैव भवितुमर्हति। प्रकृतेरुत तद्विकाराणां च चेतनाराहित्यान्न तत्र याथार्थ्यस्य शुभाशुभात्मकस्य विभागस्य सार्थकता भवति।

मन्त्रलिङ्गञ्च—

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः।।

यजुः० ४० ।८।।

अयं हि परमात्म-शब्दवाच्य ईश्वरो वेदे **परमव्योम**—शब्देन सप्तम्यन्तेनाक्षर-विशेषणत्वेनोक्तोऽस्ति तत्रैवर्चां सद्भावात् विश्वेदेवानां च तस्मिन् परमव्योम्नि निषदनात्।

मन्त्रलिङ्गञ्च—

ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधिविश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत् तद् विदुस्त इमे समासते।।

ऋग्वेद १।१६४।३६; अथर्व० ६।१०।१८; तै० ब्रा० ३।१०।६।१४; तै. आ० ७।११।१; नि० १३।१०।

वेदे ***'सुपां सु-लुक्-पूर्वसवर्ण-आच्छे-डा-ड्या-याच्-आलः'*** (पा० ७।१।३६) इत्यनेनात्र सप्तम्याः स्थाने लुगादेशात् 'व्योम्नि'सत् व्योमन्निति पठ्यते। यथा च मन्त्रे—परमे व्योमन्, अर्थात् अक्षरे परमे व्योम्नि परमात्मनि ऋचो विश्वेदेवाश्चाधिनिषेदुः। यस्तं न वेद जानाति स ऋचा वेदमन्त्रसमुदायेन किं करिष्यति? व्यर्था एव ऋचः, ये जनास्तद् ब्रह्म विदुः, तेषु विद्वत्स्विमे ऋग्वेदादयो वेदाः समासते।

यदुक्तं—ऋचां सद्भावस्तस्मिन्नेवाक्षरे परमात्मनि संभवति, तद्भावव्यंजकोऽयं मन्त्रः—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दा ँ सि जज्ञिरे तस्माद् यजुस्तस्मादजायत।। यजुः३१।७।।

न ह्यत्र विष्णोः सहस्रनामसु 'व्योम' इति नाम संगृहीतमस्ति। सोऽयं व्योमशब्द आकाशपर्यायवाची सन्नपि स्वात्मन्यक्षरधर्मं दधद् विशेषेण रक्षत्यात्मकं धर्मं च दधद् 'व्योम'शब्देन परमात्मोक्तो भवति।

अस्मिन् सहस्रनामसंग्रहे 'शून्य' इति पदं नभःपर्यायवाचि सदपि विष्णोर्नामसु संगृहीतमस्ति।

'ओ३म् खं ब्रह्म' (यजुः४०।१७)इति याजुषान्मन्त्रलिङ्गात्। ओ३म्=खम्, ओ३म्=ब्रह्म ब्रह्म=ओ३म् इति। अत्र 'द्विनवतितमे' श्लोके 'त्रिचत्वारिंशदुत्तरं सप्तशततमं, नामास्ति। यथा 'शून्ये' न हि किंचिद्विशिष्टमस्त्यमुथैव ब्रह्म शून्यवत् सर्वमात्मनि बिभर्त्यतः शून्यो विष्णुरित्युक्तं भवति।

'व्योम' इत्यन्तरिक्षनामसु निघण्टौ पठितमास्ते। 'निरुक्ते परिशिष्टे' 'ऋचो अक्षरे' इति मन्त्रस्य व्याख्यानं यथा—

ऋचो अक्षरे परमे व्यवने यस्मिन् देवा अधिनिषण्णाः सर्वे।
यस्तन्न वेद किं स ऋचा करिष्यति य इत् तद्विदुस्त इमे समासते।।

इति विदुष उपदिशति। कतमत्तदेतदक्षरम्? ओमित्येषा वागिति शाकपूणिः। ऋचश्च ह्यक्षरे परमे व्यवने धीयन्ते नानादेवतेषु च मन्त्रेषु। **एतद्ध वा एतदक्षरं यत् सर्वां त्रयीं विद्यां प्रति प्रति** इति च ब्राह्मणम्। १३।१०।।

अणोरणीयानुपनिषत्सूक्तमस्ति। तथा चोक्तम्—

इन्द्रियेभ्यः परा ह्यर्था, अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः।।

गीतायाम्—

उपद्रष्टानुमन्ता च, भर्ता भोक्ता महेश्वरः।
परमात्मेति चाप्युक्तो, देहेऽस्मिन् पुरुषः परः।। १३।२२।।

अन्यच्च—

'अशब्दमस्पर्शमरूपमव्ययं
तथारसं नित्यमगन्धवच्च यत्।
अनाद्यनन्तं महतः परं ध्रुवं
निचाय्य तन्मृत्युमुखात् प्रमुच्यते।।' कठ० १३।१५।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वक्तव्यम् यद्धि लोके महत्, तदेव शरीरान्तः—इच्छा-रूपेण परिणमति। अतश्चेदं वक्तुमर्ह्यते परमव्योम्नोऽक्षरस्य व्यवस्थाविदा सर्वस्य जगतः साधुभावाय स्वेच्छाः प्रचारणीया इति। स महेच्छुर्महति परे ब्रह्मणि लीयते। परमात्मतत्त्वस्य धारणाचरणयोगात्। स जपिता ध्याता वा आत्मनः परिवारात् स्वेच्छामुद्भाव्य सर्वलोकमात्मनः परिवारं मन्वानः सर्वकल्याणाय यतते।

भवति चात्रास्माकम्—

परमात्मा परं व्योम व्योम वा व्यवनं हि तत् ।
अक्षरेऽस्मिन्नृचः सर्वा देवाश्चास्मिन् समासते।।१६।।

विपूर्वादवतेरुणादिना मन्प्रत्ययो टेर्लोपश्च, ***'अवतेष्टिलोपश्च'*** (उणा० १।१४२) इति सूत्रेणोम्शब्दो निष्पद्यते। विपूर्वादवतेर्ल्युटि व्यवनं भवति, विशेषेणावतीति व्योम व्यवनं वा समानं भवतः।

मुक्तानां परमा गतिः—१२

मुक्तानां जन्मजन्मान्तरानुस्यूतभवबन्धनरहितानां कृतनिर्मलान्तः करणानां या परमा प्रकृष्टा गतिः प्राप्तुं गन्तुं वार्हा देवतास्ति, सा 'ओ३म्' इत्येव।

मन्त्रलिङ्गञ्च—

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।
यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त ।।

यजु० ३२।१०।।

वक्तव्यम्—यथा लोके कृतकर्त्तव्यो मनुष्यो न हि केनापि तर्क्योऽतर्क्यो वा भवति स यथेष्टं तथैवायं जीवोऽपि स्खलितसर्वबन्धनग्रन्थिर्यत्र रमते, स विष्णुरिति भावार्थः। ब्रह्मभूयाय यतमानेन नूनं जीवता मुक्तेन भवितव्यमिति।

भवति चात्रास्माकम्—

नरोऽथ जानन्नथ वाप्यजानन्
यदा निहन्त्यात्मकृतांश्च बन्धान्।
तदा स मुक्तो रमते तृतीये
धाम्न्यत्र वा मद्गुरिवात्मतन्त्रः ।।२०।।

मद्गुः पक्षी, यो भूमौ पद्भ्यां चलति, वियति चोड्डयते, जले चान्तर्निमज्जति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

समुद्रतटे प्रायेणासौ भवति, महानदे ह्रदे वा बहुधा दृष्टिरमणीयोऽयमस्माकमभूत्।।१२।।

अव्ययः—१३

नास्ति व्ययो सो 'ऽव्ययः'। विरुद्धमयो यस्य स व्ययः, स व्ययो यस्य नास्ति सोऽ'व्ययः'। एतेन भगवतः पुरुषशरीरवद्विग्रहधारणं निवारितं भवति। कुतः? विग्रहधारणान्नूनं जन्म-जरा-मरणादयो भविष्यन्ति। जन्मादीनि च तत्र प्रतिषिद्ध्यन्ते **'अकायमव्रणमि'** ति (यजुः ४०।८) मन्त्रलिङ्गात्। विशिष्टोऽयो यस्य स व्ययः, स नास्ति यस्य यस्मिन् वा 'सोऽव्ययः'।

यथाविधमिदं जगत् भगवता पूर्वकल्पे रचितमासीत्तथैवास्मिन् कल्पेऽपि रचितमित्येतस्यां प्रतिज्ञायां वैशिष्ट्यं न करोति।

मन्त्रलिङ्गञ्च—

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।
दिवं च पृथिवीं चान्तरिक्षमथो स्वः ।।

ऋ० १०।१६०।३।।, तै० आ० १०।१।१४।।

अतः वक्तुमर्ह्यते—विरुद्धो विशिष्टो वा अयो जवो नास्तीत्यव्ययः, स कविः परमेश्वरः। मन्त्रलिङ्गञ्च—

देवस्य पश्य काव्यं न ममार न जीर्यति। अथर्व० १०।८।३२।।

वक्तव्यम्—भगवतोऽव्ययात्मकं गुणं परिनिष्ठिताभ्यस्त्रा स्वमनो हीनातियोगाभ्यां क्षणे क्षणे न व्ययनीयम्।

भवति चात्रास्माकम्—

हीनातियोगान्न विभोर्व्ययोऽस्ति
व्ययो विधानेऽस्य न दृष्टपूर्वः।
न जायतेऽसौ न जरामुपैति
न मृत्युमेत्युक्तमतोऽव्ययः सः।।२१।।

वैयाकरणास्तु—

सदृशं त्रिषु लिंगेषु, सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु, यन्न व्येति तदव्ययम् ।।

महा० १।१।४१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति गोपथब्राह्मणस्थमोम्पदस्याव्ययत्वनिदर्शकं वचनमुद्धरन्ति 'अजरोऽमरोऽव्ययः' इत्युपनिषत्सु।

पुरुषः—१४

'पृ पालनपूरणयोः' कैयादिकस्तस्मात् 'पुरः कुषन्' (उणा० ४।७५) इत्यनेनोणादिसूत्रेण 'कुषन्' प्रत्ययः, तेन **'पुरुषः'**। ***'अन्येषामपि दृश्यते'*** (६।३।१३७) इत्यनेन सूत्रेण दीर्घे' पूरुष' इत्यपि भवति। यदत्र सूत्रे पुर इति निर्दिष्टं तत् ***'उदोष्ठ्यपूर्वस्य'*** (अ० ७।१।१०२) इत्यनेन कृतोत्वस्यैव ऋकारान्तस्य ग्रहणम्। पुरुषः पुमान् वा कर्तरि कारके प्रत्ययः। पुरि शरीरे शेते तस्मात् 'पुरुषो'जीवात्मा। अथवा पुरं शरीरं स्वसत्तया पृणाति पालयति पूरयति वा 'पूरुष' आत्मा।

उक्तं च यथा महाभारते—

नवद्वारं पुरं पुण्यमेतैर्भावैः समन्वितम् ।
व्याप्य शेते महात्मा यस्तस्मात् पुरुष उच्यते।।

परमात्मपक्षे—सकलं जगद् यस्यावास्यमस्ति, तस्यां पुरि शयनात् 'पुरुषः' परमात्मा पुरमुषतीति वा 'पुरुषः'। पुरा सदैकरूपेणास्त इति वा 'पुरुषः'। यद्वाअस्तेर्व्यत्यस्ताक्षरयोगात् आसीत् पुरा पूर्वमेवेति विग्रहं कृत्वा व्युत्पादितः—'पुरुषः'। पूर्वमेवाहमिहासमिति तत् पुरुषस्य पुरुषत्वम्'इति।

अथवा पुरुषु भूरिषु उत्कर्षशालिषु सत्त्वेषु सीदति पुरूणि फलानि सनोति ददाति वा, पुरूणि भुवनानि संहारसमये स्यति अन्तं नयतीति वा,पूर्णत्वात् पूरणाद्वा सदनाद्वा 'पुरुषः'।

उक्तं च—**'पूरणात् सदनाच्चैव ततोऽसौ पुरुषोत्तमः।'**

महाभारत उद्योगपर्व ७०।११।।

वेदे च—

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलम्।। ऋ० १०।९०।१।।

अथर्ववेदे **'सहस्रबाहुः पुरुषः'** (१९।६।१) शेषं समानं पूर्वेण। यजुषि **'स भूमिं स्पृत्वा'** (३१।१)इति भेदः, शेषं समानं पूर्वेण। साम्नि-**सर्वतो वृत्वेति** (पूर्वार्चिके प्र० ६, अर्ध प्र० ३ दशति १३ मं० ३) भेदेन,शेषं समानं पूर्वेण।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम्।
उतामृतत्वस्येशानो यदन्नेनातिरोहति।।
एतवानस्य महिमाऽतो ज्यायांश्च पूरुषः।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि।।
त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः।
ततो विष्वङ् व्यक्रामत्साशनानशने अभि।।
ततो विराळजायत विराजो अधि पूरुषः।
स जातो अत्यरिच्यत पश्चाद् भूमिमथो पुरः।।

यजुः ३३।५।।

पूर्वमन्त्रनिर्दिष्टसंकेतेन यथास्थानं चतुर्ष्वेव वेदेष्वेते मन्त्राः सन्ति। ईशस्यावास्यं जगच्चापि पुरुषः। मन्त्रलिङ्गञ्च—

ये पुरुषे ब्रह्म विदुस्ते विदुः परमेष्ठिनम् ।
यो वेद परमेष्ठिनं यश्च वेद प्रजापतिम् ।
ज्येष्ठं ये ब्राह्मणं विदुस्ते स्कम्भमनुसंविदुः।। अथर्व० १०।७।१७।।

भवति चात्रास्मकम्—

स्थानं न तद्यत्र न पूरुषोऽस्ति
सहस्रबाहुः स सहस्रपाद् वा।
ध्याता धिया सर्वमिदं विदित्वा
भवेदनंहो गतभीः प्रसन्नः ।।२२।।

साक्षी—१५

अश्नुते प्राप्नोति वा 'अक्षम्' इन्द्रियम्। तथा च वेदः—**'अक्षैर्मा दीव्यः'** (ऋ० १०।३४।१३)। द्यूतक्रीडनसाधनैर्मा क्रीडत, अपरथा-इन्द्रियैर्मा दीव्यः कृषिमित्कृषस्व, अर्थात् तपस्तप्यध्वम्। अक्षेण यह साक्षम्, तस्मात् साक्षात् द्रष्टा 'साक्षी' भवति। ***साक्षाद्द्रष्टरि संज्ञायाम्*** (पा० ४।२।५१), इत्यनेन साक्षशब्दादिनिप्रत्ययः प्रत्ययान्तेन चेत् संज्ञा गम्येत। यथा लोके केवले बाह्यचक्षुषाव्यवधाने पश्यन् साक्षीत्युच्यते, तथैवान्तर्बहिश्च वर्त्तमानः परमपुरुषः सर्व सर्वस्य जगतः कर्म पश्यन् 'साक्षी' ति नाम स्वयं बिभर्ति।

लोकेऽपि च पश्यामः साक्षात् प्रत्यक्षत उपतिष्ठन्तं साक्षिणं दृष्ट्वापि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न्यायकर्त्ता तं साक्षिणं सम्बोध्य पृच्छति—'भगवन्तं साक्षीकृत्य ब्रूषे?' एतेन ज्ञायते यत् साक्षिणोऽपि परमः 'साक्षी' स महादेव एव।

मन्त्रलिङ्गञ्च—

तदेजति तन्नैजति तद् दूरे तदु अन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।।

यजुः० ४० ।५।।

अपरं च—

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।
सं बाहुभ्यां धमति सं पतत्त्रैर्द्यावाभूमी जनयन् देव एकः ।।

ऋग्वेदे १० ।८१।८ यजुषि ३२ ।१०।।

तथा च—'**धामानि वेद भुवनानि विश्वा**' स इति शेषः।

भवति चात्रास्माकम्—

नरो यथा पश्यतिमात्रमात्रः
साक्षीति संज्ञां लभते नृलोके।
स विश्वतश्चक्षुरुतात्मसंस्थ-
स्तथैव साक्षी भुवनानि पश्यन्।।२३।।

क्षेत्रज्ञः—१६

'क्षि' क्षयार्थाद् धातोः ***हुयामाश्रुभयसिभ्यस्त्रन्*** (उणा० ४ ।१६८।।) सूत्रेण बाहुलकात् क्षेत्रमित्यपि सिध्यति। क्षयति नश्यतीति क्षेत्रं शरीरं तं जानातीति 'क्षेत्रज्ञः' ***आतोऽनुपसर्गे कः*** (पा० ३ ।२ ।३) इत्यनेन जानातेः कः प्रत्ययः जीवात्मा वा तत्पर्यायः।

परमात्मपक्षे—ब्रह्मणो ज्येष्ठस्य क्षेत्रं शरीरमेतत् सकलं जगत्।

मन्त्रलिङ्गञ्च—

यस्य भूमिः प्रमान्तरिक्षमथोदरम् ।
दिवं यश्चक्रे मूर्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य सूर्यश्चक्षुश्चन्द्रमाश्च पुनर्णवः ।
अग्निं यश्चक्र आस्यं तस्मै ज्येष्ठाय ब्रह्मणे नमः।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यस्य वातः प्राणापानौ चक्षुरंगिरसोऽभवन् ।
दिशो यश्चक्रे प्रज्ञानीस्तस्मै ज्येष्ठाय ब्रह्मणे नमः।।

अथर्व० १० ।७ ।३२-३४ ।।

इत्येवमादिः।

ब्रह्मणो बृहत्त्वात् तच्छरीरकल्पनमपि तस्य ब्रह्मत्वपरिज्ञापनार्थमेव। अतश्चेदं वक्तुमर्ह्यते—यथा जीवात्मा स्वकं लोकानुसम्मितं शरीरं जानानः 'क्षेत्रज्ञ' उच्यते, अमुथैवायं परमपुरुषोऽपि स्वं सकलजगद्रूपं क्षेत्रं प्रलयव्यवस्थया नश्वरं जानातीति 'क्षेत्रज्ञः' न हि तद्व्यवस्थां विना किंचिदपि कथञ्चिदपि स्थातुमीष्टे।

महाभारते च—

क्षेत्राणि हि शरीराणि, बीजं चापि शुभाशुभम्।
तानि वेत्ति स योगात्मा, ततः क्षेत्रज्ञ उच्यते ।।

शान्तिपर्व ३५१ ।६ ।।

भवति चात्रास्माकम्—

क्षेत्रं शरीरं क्षयमेत्यवार्यं
क्षेत्रज्ञमाहुः समनोहृदिस्थम् ।
क्षेत्रं जगत् तस्य महेश्वरस्य
सोऽप्यस्ति तज्ज्ञस्तदधिष्ठितत्वात्।।२४।।

अक्षरः—१७

'अशूङ् व्याप्तौ' सौवादिकः, 'अश भोजने' क्रैयादिकः। अशेर्धातो' **अशेः सरन्'** (उणा० ३ ।७०) इत्यनेन सरन्प्रत्यये 'अक्षरः' इति सिध्यति। अश्नुते अश्नाति वा 'अक्षरम्' ब्रह्म, वर्णः, मोक्षः, उदकं वा। अक्षरं ब्रह्म।

मन्त्रलिङ्गञ्च—

ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधिविश्वे निषेदुः।
यस्तन्न वेद किमृचा करिष्यति य इत् तद्विदुस्त इमे समासते।।

ऋ० १ ।१६४ ।३९ ।।

द्रष्टव्यम्—'परमात्मा' इति शब्दव्याख्यायाम्।

'अक्षरं न क्षरं विद्यात् न क्षीयते न क्षरतीति वाक्षरम्' लण्सूत्रे महाभाष्ये।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'अक्षरं न क्षरति न क्षीयते वा' इति यास्कः। निरु० १३।१२।
अश्नुते स्थानात् स्थानं व्याप्नोति प्राप्नोतीति वा 'क्षर' मुदकम्।
भवति चात्रास्माकम्—

स्थानं न तद्यत्र न सोऽस्ति सृप्तः
क्लेशक्षरो नास्ति पदे तृतीये।
तं ध्यानयोगेन हृदिस्थमित्वा
क्लेशक्षरो ध्यातरि नैति नूनम्।।२५।।

तृतीये पदे=मोक्ष इति। क्लेशक्षरः क्लेशोदय इति।

❖ ❖ ❖

योगो योगविदां नेता, प्रधानपुरुषेश्वरः।
नारसिंहवपुः श्रीमान्, केशवः पुरुषोत्तमः।।१६।।

१८ योगः, १६ योगविदां नेता, २० प्रधानपुरुषेश्वरः।
२१ नारसिंहवपुः, २२ श्रीमान्, २३ केशवः, २४ पुरुषोत्तमः।।१६।।

योगः—१८

'युजिर् योगे' रौधादिकः' तस्मात् घञ् प्रत्ययं कृत्वा 'योग' शब्दो निष्पाद्यते। 'योगो' हि पृथक्-पृथक् सत्तया स्थितयोरथवा बहूनां पृथक्-पृथक् सत्तया स्थितानामेकीभाव इति। स चिरं तिष्ठतु, यथेष्टकालं वा। मनसो धियश्च य एकीभावः स 'योगः'। धियो ज्ञानेन्द्रियाणि, स योगी यदधिकरणमधिकृत्य क्रियते गौणीवृत्त्याऽसावपि 'योगः' एव।

विप्रा विप्रस्य बृहतो विपश्चितो महादेवस्य सवितुः परितः सर्वतोभावेन स्तुत्यर्थं मनो धियश्च युंजते।

मन्त्रलिङ्गञ्च—

युंजते मन उत युंजते धियो विप्रा विप्रस्य बृहतो विपश्चितः।
वि होत्रा दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः।।

ऋग्वेदः ५।८१।१; यजु० ५।१४; ११।४; ३७।२; तै० सं० १।२।१३।१; ४।१।१।१; तै० आ० ४।२।१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

योगार्थाभिधायिनोऽन्येऽपि मन्त्राः सन्ति। विप्राणां विदुषां धियो यत्र परिष्कारं प्राप्नुवन्ति। तदभिधायिनीयमृक्—

उपह्वरे गिरीणां संगमे च नदीनाम्।
धिया विप्रो अजायत ।

ऋग्० ८।६।२८।। यजु० २६।१५ साम-पूर्वार्चिक २।१।।

अत इदमुच्यते यद्-'योगः' परमात्मनो नाम संगच्छत एव।

भवति चात्रास्माकम्

पृथक् स्थितौ स्वार्थमपास्य संगतौ
परस्परं सख्यमुपागतौ यौ ।
योगेति संज्ञामयतः पुनश्च तौ
न तं विना योग इयर्त्ति तात्स्थ्यम्।।२६।।

तथा च कस्यचित् पद्यम्—

ज्ञानेन्द्रियाणि सर्वाणि, निरुध्य मनसा सह।
एकत्वभावना योगः, क्षेत्रज्ञपरमात्मनोः ।।

योगविदां नेता—१६

ये जना योगं परस्परं द्वयोर्बहूनां वा संयोजनात्मकं कर्म कुर्वन्ति, पदार्थविद्याविदो वा सन्ति, नूतनतमाविष्काराय वा प्रयतन्ते, तेषां नेता मार्गप्रदर्शकः स स्वयं भगवानेव। तेन हि भगवता विविधं योगवियोगं कृत्वा विविधा सृष्टिर्निर्मितास्ति। तत्रानेकविधा नभश्चरा प्राणिनः प्रत्यहं नवतामुपगच्छन्तः समक्षमुपस्थापिताः सन्ति। अनेनैव प्रकारेण जलचरा भूचराश्च प्रक्लृप्ताः सन्ति। दृश्याणि दर्शयितुं स्थावरसृष्टिः प्रक्लृप्तास्ति।

तत्र यो मनुष्यो यमभिलाषं पुरस्कृत्य क्रमते स 'योगविदां नेता' तथैव तस्य मनुजस्य नेतृत्वं करोतीति कृत्वा स 'योगविदां नेता' इत्युच्यते निर्विकल्पम्। मनसो ज्ञानेन्द्रियाणां चैकीभावं कृत्वा योगविधौ प्रयतमानानां कृतेऽपि तस्य नेतृत्वं प्रसिद्धमेव। यतस्तस्य कृतौ दोषः क्लेशो वा नास्ति। तस्माद्यत् कर्म सदोषं सक्लेशं च तन्न भगवते रोचते, इति मन्तव्यम्। तत्र मनुष्येण स्वास्त्रुटयो हठकर्म वा सूक्ष्मेक्षिकया चिन्त्यं तदासौ दुर्गाणि तरति।

मन्त्रलिङ्गञ्च—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

योगे योगे तवस्तरं वाजे वाजे हवामहे। सखाय इन्द्रमूतये।।

ऋ १।३०।७।।

स घा नो योग आ भुवत् स राये स पुरन्ध्याम्। गमद्वाजेभिरा स नः।।

ऋ० १।५।३।।

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः।

ऋ० ५।८१।२।।

भवति चात्रास्माकम्—

प्रकल्प्य सृष्टिं हि चतुर्विधां स
विधित्सुकानां कुरुते ह नेत्रम्।
ख्यातोऽस्त्यतो 'योगविदां' स नेता
न तं विना योगविदां गतिः स्यात्।।२७।।

प्रधानपुरुषेश्वरः—२०

प्रकर्षेण धीयतेऽस्मिन्नस्यां वा 'प्रधानं' प्रधाना वा। तद्यथा प्रकर्षेण सभा धीयतेऽस्मिन्निति प्रधानः, सभाया इति शेषः। प्रकर्षेण विविधरूपताभावाय शक्तिर्धीयतेऽस्यां सा प्रधाना प्रकृतिः लोहितशुक्लकृष्णरूपेति। 'पुरुषो' जीवात्मा तयोरीश्वरो नियन्ता व्यवस्थातेति कृत्वोच्यते—'प्रधानपुरुषेश्वरः' इति।

वक्तव्यम्—अभ्यस्त्रोत्तमानि कर्माणि कुर्वताहंकारं परित्यज्य तस्यैव महिमेति यशोगानं कुर्वता सर्वो जनः प्रियया सत्यया वाचा तर्पणीय इति।

मन्त्रलिङ्गञ्च—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्ननन्योभि चाकशीति।।'

ऋक्० १।६४।२०।।

'बालादेकमणी यस्कमुतैकं नेव दृश्यते।
ततः परिष्वजीयसी देवता सा मम प्रिया।।'

अथर्व० १०।८।२५।।

भवति चात्रास्माकम्—

यदस्ति दृश्यं प्रकृतेर्मनोहरं
न यत्र शक्तिः पुरुषस्य गच्छति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुणातिशीत्या क्रमते पुमान् यदा
[1]प्रधानजीवेश्वरकर्म तन्मतम्।।२८।।

वंशस्थबिलं छन्दः।

नारसिंहवपुः—२१

नरस्य विचारपूर्विकाकार्यकरणशक्तिः, सिंहस्य च पराक्रमशक्तिर्लक्ष्यते यस्मिन् वपुषि, तद्वपुर्यस्य स 'नारसिंहवपुः' योगमायावी वा। यदा भगवान् स्वयं पुरुषस्य दक्षिणे भवति, तदा मनुष्ये विचारशक्तिः कर्मशक्तिश्च समानरूपेण क्रियामधितिष्ठतः।

दृश्यते हि लोके ज्ञानं विना कर्मकर्त्तारोऽवसीदन्ति, ज्ञानिनश्च शक्तिं विनाऽवसीदन्ति। तस्मादेतद्वक्तुमर्ह्यते—नारसिंहवपुस्तस्यैव नरस्य भवति येन ब्रह्मशक्तेरुत क्षात्रशक्तेरुपासनाऽध्यासना वा कृता भवति।

मन्त्रलिङ्गञ्च—

इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम्। यजु० ३२।१६।।
यत्र ब्रह्म च क्षत्रं च सम्यञ्चौ चरतः सह ।
तं लोकं पुण्यं प्रज्ञेषं यत्र देवाः सहाग्निना ।। यजु० २०।२५।।

अभ्यस्त्रा यथा यथा ज्ञानं संचीयेत, तथा तथा शरीरशक्तेरपि संचयो नूनं कर्तव्य इति विज्ञापयितुं, 'नारसिंहवपुः' इति नाम विष्णोर्नामसु परिगणितम्।

यदि मन्येत भगवान् स्वयं सर्वशक्तिमान् सन् नरसिंहावयवात्मकं शरीरं धारयितुं शक्नोति। तन्नैवं, कुतः? तथा सति अकायम्-अजरम्-अमरम्-अव्रणमित्यादीनि विशेषणानि मिथ्यात्वमापत्स्यन्ते।

तथा च नरस्य सिंहशरीरस्य च निर्माण-भेदात् स्वभाव-भेदाद् द्वयोर्योन्योर्मिथुनी-भावोऽपि न प्रकृतिनियममनुसरतीति कृत्वा नरस्य सिंहस्य चावयवा यस्मिन् लक्ष्यन्ते तद्वपुर्यस्य स नारसिंहवपुरिति कल्पना भगवतो यशो नानुनयतीति कृत्वा नादृता।

भवति चात्रास्माकम्—

सुखेच्छुना न्रा सततं विधेयं
तत् कर्म यत् कर्म विचारयुक् स्यात्।

---

१. प्रधानजीवेश्वर-शब्दश्छन्दोऽनुरोधात् प्रधानपुरुषेश्वरस्य स्थाने प्रयुक्तः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विचारितं कर्म भवेच्च यद् यत्
तत् तद् विधातुं च नरो यतेत।।२६।।

श्रीमान्—२२

श्रीः—'श्रिञ् सेवायाम्' भौवादिकः, तस्मात् ***'क्विब् वचिप्रच्छिश्रिद्रुस्रु कटप्रुज्वां दीर्घोऽसंप्रसारणं च'*** (उणा० २।५७) इत्यनेन क्विप्प्रत्ययो दीर्घोऽसंप्रसारणात्—श्रीः। श्रीयतेऽसौ पुण्यकृद्भिरिति श्रीः=लक्ष्मीः, कर्मणि प्रत्ययः। साऽस्यास्तीति 'श्रीमान्' स श्रीमान् भगवानेव भवितुमर्हति। तस्य हि श्रीर्न रिष्यति, न क्षीयते, शेषाणां श्रीपतीनां मनुष्याणां धनानि राज्यानि च नश्यन्ति। तस्मात् ते न वास्तविकरूपेण 'श्रीमान्' इति पदभागिनः सन्ति। तस्य श्रीमत एव कृपांशतः श्रीमन्त उच्यन्ते। स एव धनाधिप इति व्यंजिकेयमृक्—

अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि सं जयामि शश्वतः ।
मां हवन्ते पितरं न जन्तवोऽहं दाशुषे वि भजामि भोजनम्।।

ऋग्० १०।४८।१।।

वक्तव्यम्—श्रीमतो भगवत एषा प्रतिज्ञास्ति यद् दाशुषे भोजनं भोगसाधनं विभजामि पृथक् पृथक् कृत्वा ददामि। तस्मात् मनुजेन नूनं दानपरायणेन भवितव्यम्।

भवति चात्रास्माकम्—

श्रीमान् स एवास्ति न तत्परोऽन्यः
पतिर्धनानां स हि शाश्वतोऽस्ति।
[1]तातं यथा जन्तव आरुवन्ति
स दाशुषे यच्छति भोजनीयम्।।३०।।

केशवः—२३

कम्=जलं तमीष्ट ऐश्वर्यभावाय नयतीति 'केशः'। तच्च कं पुनर्द्विविधम्, भौममान्तरिक्षं च। भौमम्—कुम्भवापीकूपनदह्रदसमुद्रादीनाम्। आन्तरिक्षम्—वर्षासम्भवम्, अवश्यायसम्भवम्, उष्मायोगाद्वाष्पीकृत्य शीततामानीय व्यक्ततामानीतमित्यादि। कस्य ईशित्वमस्यास्तीति ***'केशाद्वोऽन्यतरस्याम्'*** (पा०

१. तातः=पिता पूज्यो वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

५।२।१०६) सूत्रेणान्यतरस्यां 'व' प्रत्ययः, तस्मात् 'केशी केशवो' वा।

मन्त्रलिङ्गञ्च—

समुद्रं वः प्रहिणोमि स्वां योनिम्।। अथर्व० १०।५।२३।।

अन्यच्च—

शन्न आपो धन्वन्याः शमु सन्त्वनूप्याः।
शन्नः खनित्रिमा आपः शमु याः कुम्भ आभृताः।
शिवा नः सन्तु वार्षिकी।। अथर्व० १।६।४।।

अपरा योजना—

कम्=सुखम् तमीष्टे, ऐश्वर्यभावायानयति, कस्य ईशः केशः, पूर्ववत् मतुबर्थीयं व-प्रत्ययं कृत्वा 'केशवः' इति। सुखं च द्विविधमैहिकं तृतीयधामोद्भवं च।

ऐहिकं सुखमधिकृत्य जीवः प्रार्थयते—

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव ।
यत् कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्।।

ऋग् १०।१२१।१०

स्वर्ग्यमथवैकान्तिकं सुखमधिकृत्य, यथा—

नाकस्य पृष्ठे अधि तिष्ठति श्रितो यः पृणाति स ह देवेषु गच्छति ।
तस्मा आपो घृतमर्षन्ति सिन्धवस्तस्मा इयं दक्षिणा पिन्वते सदा ।।

ऋग् १।१२५।५।।

इत्यादयोऽनेके मन्त्राः सन्ति। निदर्शनमात्रमेतत्।

वक्तव्यम्—दुःखमात्रं दृष्ट्वाऽनुमातव्यं यदत्र नूनं भगवदाज्ञाया उत वा प्रकृतेर्नियमस्योल्लंघनं कृतमस्ति, क्रियमाणं वास्ति। अमुथैव यदा वर्षर्तुर्विपर्यस्यति समयं वाऽतिक्रमते, अधिकं विषमं वा वर्षति, तदा मन्तव्यमदृष्टकृतोऽत्र कश्चन दोषो नूनं वर्तते, यस्य मार्जनं शोधनं च नूनं क्रियमाणं सुखाय केशवप्रीतये च भवति।

यद्वा—कश्च अश्च ईशश्च ते केशाः, ते च यथाक्रमम्—ब्रह्मा-विष्णु-महादेवा इति, यद्वशे वर्त्तन्ते स 'केशवः' केशवस्त्रिशक्तिस्त्रिमूर्त्तिरिति वा समानं भवति।

भवन्ति चात्रास्माकम्। कं जलमधिकृत्य—

जलं कमुक्तं द्विविधं च तन्मतं
तदन्तरिक्षस्थमुतापि भूस्थितम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ईष्टे विभुर्यो ह्यधिपश्च यो मतः
स केशवोऽस्त्याप्तजनैरुपास्यः ।।३१।।

कमिति सुखनामसु पठितम्। तदधिकृत्य—

सुखं कमुक्तं द्विविधं च तन्मतं
धनेन लभ्यं किमु वात्मतोषात्।
[1]यद्दक्षिणं केशव एति पार्श्वं
सुखी नरः सोऽस्त्यपरो विरौति।।३२।।

'केशी' इति नाम्नो राक्षसस्य वधकर्तृत्वाद् भवतु अर्जुनसारथिनः कृष्णचन्द्रस्यापि केशव इति नाम। तत्साधुत्वं च भवतु पृषोदरादिगणस्याकृतिगणत्वात्तदन्तर्भावितं कृत्वा। न हि तेन कृष्णचन्द्रस्य प्रभुत्वाय कल्पनं भगवते यशसे युज्यते। कुतः? केशीनाम्नो राक्षसस्य वधकर्म मानुषं कर्म। न हि स्वयं भगवानव्ययत्वाज्जन्म गृह्णाति।

केशीवधात् केशव एव नाम
श्रीकृष्णचन्द्रस्य जगत्प्रसिद्धम् ।
जगन्नियन्ता न दधाति कायं
श्रुतावकायोऽस्त्यजरः स उक्तः।।३३।।

पृषोदरप्रकाराणि—येषु लोपागमवर्णविकाराः श्रूयन्ते न चोच्यन्ते तानि पृषोदरप्रकाराणि। तद्यथा—श्मशानम्, जीमूत इत्यादि।

केशीवधात् 'केशवः' इति नारदस्य शिष्टस्य कल्पना। नारदस्य श्रीकृष्णं प्रति वचनम्, यथा—

यस्मात् त्वयैष दुष्टात्मा, हतः केशी जनार्दन ।
तस्मात् केशवनाम्ना त्वं, लोके ख्यातो भविष्यसि।।

विष्णुपुराणे ५।१६।।

पुरुषोत्तमः—२४

अत्रत्ये १५ पंचदशे श्लोके चतुर्दश १४ संख्यात्मके 'पुरुषः' इति व्याख्यानावसरे पुरुष-शब्दो विशदतया व्याख्यात आस्ते, तदत्रापि ध्यातव्यम्।

---

१. यस्य दक्षिणमिति यद्दक्षिणम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रकृतमनुसरामः—पुरि शयनात् सर्वाणि सूक्ष्मस्थूलानि सात्मवन्ति भूतानि क्षराणि सन्ति। कुतः? दृश्यते च शरीरात्मनोर्वियोगो मृत्युरिति। ततश्च कालान्तरे नामशेषाणि तिष्ठन्ति। नाम चापि महतः कालस्य व्यवधानेन नश्यतीव भवति। अतो भूतानि पुरि शयनधर्मतः 'पुरुष' नाम बिभ्रत्यपि क्षराण्युच्यन्ते। आत्मा स्वरूपेण 'अक्षर' एव भवति।

प्रकृतिः स्वात्मानं महदादिषु विकारेषु परिणमयन्त्यपि विघटनं प्राप्य पुनः स्वरूपे विलयं गत्वा कूटस्थतां न जहाति। तस्मादियं कूटस्था सत्यक्षरा च भवति पुरि शयनमिव तस्या सद्भावात् सापि 'पुरुष' इति संज्ञां कोविदैर्लभते।

आभ्यां द्वाभ्यां भिन्नो विराण्नाम्नि पुरि शयनात् स महापुरुषः 'पुरुषोत्तम' इति गीयते वेदे। तस्य विराजो विराट्शरीरबोधनपरा बहवो मन्त्रा ***'यस्य भूमिः प्रमा अन्तरिक्षमथोदरम्'*** इत्यादयः। 'क्षेत्रज्ञः' इति षोडश १६ संख्यात्मके नामव्याख्यानावसरे संगृहीताः सन्ति पाठकैस्तत्र द्रष्टव्याः। अतोऽयं सर्वनियन्ता भगवान् भूतभावनः 'पुरुषोत्तमः' उच्यते।

'लोकसम्मितः पुरुषः' इति शरीरशास्त्रविदां समयः। यथात्र महानदाः सन्ति तथैव शरीरेषु रक्तवाहिन्यः सन्ति। यथात्र समुद्रस्तथैव वस्तिरिति। यथा समुद्राभिमुखा नद्यो द्रवन्ति, तथैव गवीन्यौ मूत्रसंज्ञात्मकं जलं वस्तिमुखमभिसमुद्रावयतः। यथा जले समुद्रे वा पर्वतोच्छ्रयो पाषाणा वा भवन्ति, तथैव वस्तौ अश्मरी पित्ताशये चाश्मरी भवति [१]हृदये च। यथा समुद्रे वडवानलस्तिष्ठिति, तथैव पित्तात्मके जले पाचकाग्निस्तिष्ठति। **'पित्तमेवाग्निः शरीरे'** इति शरीरविदां प्रतिज्ञा।

यथा पृथिवी द्रढयति लोकं, तथैवास्थीनि द्रढयन्ति शरीरम्। यथा समुद्रनिकटवर्तिनि क्षेत्रे नातिशीतता भवति, तथैव पित्तकर्मप्रदेशे नातिशीतता भवति। यथा द्यवि ज्योतींषि सन्ति, तथैव शिरसि ज्ञानेन्द्रियाणि सन्ति। यथा वायुः सकलकर्माधिपतिरन्तरिक्षे स्वाश्रयं कुरुते, तथैव सर्वसंयोगवियोगसाधनीभूतौ हस्तौ मध्यमं कायमवलम्ब्यान्तरिक्षे लम्बमानौ दृश्येते।

यथा पृथिवी नीचैःस्थानीया तथैव पादौ पृथिवीस्थानीयौ तौ पृथिव्या अभिमुखं चलतो, न कदापि निर्वेदमापद्येते, इति दिङ्मात्रमुक्तम्।

मन्त्रलिङ्गञ्च—

---

१. दृष्टं स्वयमस्माभिः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अन्तस्ते द्यावापृथिवी दधाम्यन्तर्दधाम्युर्वन्तरिक्षम्।
सजूर्देवेभिरवरैः परैश्चान्तर्यामे मघवन् मादयस्व।।

यजुः ७।५।।

पुरुषाणामुत्तमः 'पुरुषोत्तमः'। अत्र ***'न निर्धारणे'*** (अ० २।२।१०) इत्यनेन षष्ठीसमासप्रतिषेधो न भवति, जात्याद्यनपेक्ष्यासमर्थत्वात्।

संगच्छते चैवं भगवद्वचनम्—

यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः।। गीता १५।१८।।

अथवा ***'सप्तमी शौण्डैः'*** (पा० २।१।४०) सप्तमीति योगविभागात् समस्यते पुरुषेषु उत्तमः पुरुषोत्तम इति।

मन्त्रलिङ्गञ्च—

ऋचो नामास्मि यजूँषि नामास्मि सामानि नामास्मि।
ते अग्नयः पञ्चजन्या अस्यां पृथिव्यामधि।
तेषामसित्वमुत्तमः प्र नो जीवातवे सुव ।। यजु० १८।६७।।

भवति चात्रास्माकम्—

पुरं जगत् तत् सकलोऽधिशेते
वेदे स उक्तः पुरुषोऽक्षरश्च ।
तत्सम्मितान्येव वपूंषि धात्रा
कृतान्यतोऽसौ पुरुषोत्तमोऽस्ति।।३४।।

❖ ❖ ❖

सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः।
सम्भवो भावनो भर्त्ता प्रभवः प्रभुरीश्वरः।।१७।।

२५ सर्वः, २६ शर्वः, २७ शिवः, २८ स्थाणुः, २६ भूतादिः, ३० निधिरव्ययः। ३१ सम्भवः, ३२ भावनः, ३३ भर्त्ता, ३४ प्रभवः, ३५ प्रभुः, ३६ ईश्वरः।।१७।।

सर्वः—२५

उणादौ ***'सर्वनिघृष्वरिष्वलष्वशिवपट्वप्रह्वेष्वा अतन्त्रे'*** (उणा० १।१५३) इति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सूत्रे 'सर्वः' शब्दो वन्प्रत्ययान्तो निपात्यते। सरतीति 'सर्वः'। संपूर्णवाची, सर्वनामसंज्ञो विशेषणम्। सर्वज्ञत्वात् 'सर्वः', संपूर्णत्वाद्वा 'सर्वः' सर्वं तेन वृतमिति वा 'सर्वः' ईश्वरः।

असतश्च सतश्चैव सर्वस्य प्रभवाप्ययात्।
सर्वस्य सर्वदा ज्ञानात् सर्वमेनं प्रचक्षते ।।

महाभारत उद्योग० ७०।११।।

मन्त्रलिङ्गञ्च—

'तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।' यजु० ४०।५।।

भवति चात्रास्माकम्—

वृतं जगत् तेन स वेत्ति वेद्यं
सर्वः स उक्तः परिपूर्णहेतोः ।
सर्वेण सर्वं परितोऽस्ति सृप्तं
[1]सर्वं विना सर्वमिदं न भाति।।३५।।

शर्वः—२६

'शृ हिंसायाम् क्रैयादिकः' तस्मात् ***'कृगृशृदृभ्यो वः'*** (उणा० १।१५५) इत्यनेनौणादिकेन 'वः' प्रत्ययः। शृणाति पापं दुःखं यथाकालं जगद् वेति 'शर्वः' परमेश्वरः सुखं वा।

मन्त्रलिङ्गञ्च—

'नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च।।'

यजु० १६।२८।।

वक्तव्यम्—भागवतं जगद्व्यवस्थात्मकं कर्म दृष्ट्वा ध्याता जपिता वा मनोवेगैराक्रान्तः सन् पापं परस्य मनो-हृदय-काय-पीडात्मकं कर्म न संचिनोति, अर्थात् दुःखोदयं कर्म न विदधाति। एवमाचरन्नसौ परमेश्वरस्यानन्दात्मकं सुखमक्षयं सर्वकालमनुभवति।

प्राणान् जिहीर्षुरपि 'शर्वो' भवति। प्राणहर्तृवर्गे संग्रहात्।

---

१. सर्वेति विष्णोर्नाम, तस्मात् 'सर्वं विना' ब्रह्म विनेत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च यथा—

'यमो मृत्युरघमारो निर्ऋथो बभ्रुः शर्वोऽस्ता नीलशिखण्डः।
देवजनाः सेनयोत्तस्थिवांसस्ते अस्माकं [1]परि वृञ्जन्तु वीरान्।।'

अथर्व० ६।६३।१।।

शर्वः, शर्वम्, शर्वाय—इत्यादिनामविभक्तिभिरपि प्रयोगो वेदे दृश्यते। अथर्ववेदीयपञ्चदश १५ काण्डस्य पञ्चमं ५ सूक्तं मननीयम्। तत्र भव-शर्व-ईशान-पशुपति-उग्र-महादेवादीनां प्रधानगौणावर्थौ व्यक्ततरौ भवतः। इति दिङ् मात्रमुक्तम्।

भवति चात्रास्माकम्—

शृणाति पापान्युत दुःखमात्रं
शर्वो महादेव [2]उ रुद्रनामा ।
शर्वो जिघांसुश्च यमोऽघमार-
श्छिनत्ति पापानिह शर्वभक्तः।।३६।।

शिवः—२७

'सर्वनिघृष्वरिष्वलष्वशिवपट्वप्रह्वेष्वा अतन्त्रे' (उणा० १।१५३) सूत्रे 'शिवः' इति निपात्यते। शीङ् स्वप्ने-शेते इति 'शिवः,' अस्य ह्रस्वत्वमगुणत्वं च निपात्यते। शेत इति शिवम्—भद्रम्। अन्तोदात्तत्वमपि निपात्यते, वेदेषु तथैव दर्शनात्। 'शिष्यतेरिति' यास्कः (नि० १०।१७)। अथवा-'शो तनूकरणे' दैवादिकोऽस्य इत्वं निपात्यते। 'श्यैङ् गतौ' अस्य सम्प्रसारणम् श्यति, श्यायतेर्वा 'शवः' शम्भुः। कर्तरि कर्मणि वा प्रत्ययः। 'शमु उपशमे' दैवादिकः, अस्योपधाया इत्त्वं निपात्यते मकारलोपश्च। शम्यतेऽनेन कश्मलमिति शिवं भद्रं 'शिवो' भद्रो वा । करणे प्रत्ययः। शिवं कल्याणम्।

मन्त्रलिङ्गञ्च—

शिवेन वचसा त्वा गिरिशाच्छावदामसि। यजुः० १६।४।।

भगवति दुःखलवो नास्ति—

---

१. 'वृजि वर्जने' इत्यस्य—परि वृञ्जन्तु। २. 'उ' इति सम्बन्धेऽव्ययः, स इत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

नमः शम्भवाय च मयोभवाय च नमः शंकराय च मयस्कराय च।
नमः शिवाय च शिवतराय च।। यजुः० १६।४१।।

भवति चात्रास्माकम्—

तस्मिञ्छिवे शान्ततमे मनस्विनि
स्थितः स्वयं भक्तवरः शिवायते।
दीनान् समुद्धर्त्तुमसौ प्रवृत्तो
न दुःखलेशं मनसापि याति ।।३७।।

वक्तव्यम्—परस्मै सुखं दातुमीहमानस्यैषा निम्नांकिता दशा भवति-सर्वसम्पदः परोपकारे विनियोजनात् 'श्मशानमात्रशयनः' स भवति। यथा हि सर्पो गले वलयं करोति, तथैव सामान्यो जनस्तं यथाज्ञानमपवदति। जनापवादं श्रावं श्रावं स क्रोधात्मकं विषं गले धियन् (धि धारणे तौदादिकः) शुभस्पृष्टं प्रियं हृद्यं च वचो ब्रूते। स न्यस्तसर्वपरिच्छदो मृगाजिनमात्रो भस्मावृतगात्रमात्रश्च भवति।

सामान्यजनता स्वसुखानां लब्धये तं शिवैकदृष्टिं मनसा वाचा कर्मणा शूलयतीवातः स त्रिशूलं धियन् स्वयं सुखपूर्णमुद्रः सन् लोकेभ्यो वराणि प्रयच्छन् शिवात्मिकां दृष्टिं न जहत् क्रमते।

भवति चात्रास्माकम्—

शिवः स्वयं दुःखमशेषमूढ्वा
मृगाजिनः सर्पगलः सभस्म ।
धियंस्त्रिशूलं सुखपूर्णमुद्रः
शिवात्मिकां स्वां न जहाति दृष्टिम्।।३८।।

स्थाणुः—२८

'स्थाणुः' (उणा० ३।३७) इत्यनेन तिष्ठतेर्गतिनिवृत्त्यर्थात् 'णुः' प्रत्ययः स्थाणुः, इति व्युत्पद्यते। तिष्ठतीति 'स्थाणुः' ईश्वरः अचलं द्रव्यं वा।

मन्त्रलिङ्गञ्च—

स वृक्ष इव स्तब्धो दिवि तिष्ठत्येकः,
तेनेदं पूर्णं पुरुषेण सर्वम् ।। तै० आ० १०।१०।३।। नि० २।३।।

सारार्थः—यथा अन्तरिक्षे वृक्षस्य शाखाः प्रशाखा महाशाखाश्च प्रचलन्ति, होलन्ति, कम्पन्ते वा, परन्तु तेषां नियन्ता स्कम्भः स्कन्धो वा न विचलति,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तथैवेदं भ्रमणशीलं जगत् गच्छति गतिं दधातीति भावः। गतिर्हि स्थानात् स्थानान्तरप्रापिका भवति। यो हि सर्वत्रान्तर्बहिश्च लब्धसत्तात्मको भवति, तत्कृते गमनमप्रयोजनकं भवति। इयमेवावस्था भगवतो जगन्नियन्तुरस्ति। सर्वत्रान्तर्बहिश्च वर्त्तमान आस्ते।

मन्त्रलिङ्गञ्च—

तदेजति तन्नैजति तद्दूरे तदु अन्तिके।

तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।। यजुः ४०।५।।

तदेजति—अत्र णिजर्थोऽभिप्रेयते। तत् 'खं ब्रह्म' एजति लोकान्, स्वयं तत् न एजति। तस्मात् तिष्ठतीति मात्रः सन् स शिवः परमेश्वरः 'स्थाणुः' इति नाम्ना स्तूयते।

वक्तव्यम्—स्थाण्वात्मकस्य विष्णोरुपासकेन सर्वथा स्थिरसंकल्पवता भवितव्यम्। क्षणे क्षणे स्वकीया प्रकृतिर्न विचालनीयेति। इत्थंभूतां वृत्तिमधितिष्ठन्नसौ भक्त एतान् षडसीन् अतिवर्त्तते। षडसयश्च विदुरोक्ताः। यथा—

अतिमानोऽतिवादश्च, तथाऽत्यागो नराधिप ।

क्रोधश्चात्मविधित्सा च, मित्रद्रोहश्च तानि षट्।।

विदुरनीतौ अ० ५।१०।।

एत एवासयस्तीक्ष्णाः, कृन्तन्त्यायूंषि देहिनाम्।

एतानि मानवान् घ्नन्ति, न मृत्युर्भद्रमस्तु ते ।।

विदुरनीति अ० ५।११।।

भवति चात्रास्माकम्—

जगच्छिवः सर्वमिदं प्रचालयन्

स्वयं स्थितः स्थाणुरिवाप्रकम्पनः।

तमाचलं यो जपिताऽनुसेवते

स्वयं स्थिरः सोऽभ्युदयाय कल्पते।।३६।।

भूतादिः—२६

भूतानामादिः 'भूतादिः' भूतानामादिकारणत्वाद्वा 'भूतादिः' तथा च मन्त्रलिङ्गम्—

सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि।

नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत्।। यजुः ३२।२।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वक्तव्यम्—यथा दृश्यमानकार्यात् प्राक् कर्त्तुः सत्ता भवति, तथैव सर्वलोकनियन्तुः सत्ता लोकनिर्माणारम्भक्षणात्पूर्वं स्यादेवेति कृत्वा 'भूतादिः' इति नामकल्पनं संगच्छत एव।

भवति चात्रास्माकम्—

यो विश्वकर्मा स मनुर्मनीषी
स एव भूतादिरिहास्ति सिद्धः।
न तं विना विश्वमिदं प्रक्लृप्तं
न तस्य कर्त्ता न च तत्पुरोऽस्ति।।४०।।

निधिरव्ययः—३०

निश्चयार्थे न्यव्ययः। निश्चयेन सर्वं सर्वदाऽस्मिन्निधीयत इति 'निधिः'। ईश्वरः, स एवाव्ययः। यथा लोके ब्रूमो रत्नानां निधी* रत्नाकर इति। लोके यो निधिरस्ति स स्वस्मिन् क्षयत्येव, परन्तु निधिनामायं परमेश्वरोऽव्ययः सन् सर्वं स्वस्मिन् निदधात्येवेति 'निधिः'। कीदृशोऽयं निधिरिति? व्ययेन रहित इति। अव्यय-शब्द-व्याख्यानं त्रयोदशतमं प्रधाननामाधिकृत्य व्याख्यातमास्ते पंचदशे श्लोके, तत्र द्रष्टव्यम्।

भवति चात्रास्माकम्—

[1]निधिर्जगत्यां न तथाविधोऽस्ति
व्ययो न यस्यास्ति, तथाविधः सः।
ध्याताऽव्ययं[2] तं निधिमप्रमेयं
ज्ञात्वा स्वयं स्यान्निधिरप्रमेयः ।।४१।।

लौकिकानां निधीनामपि चिरक्षमत्वमपि तस्य महेश्वरस्याव्ययधर्ममवलम्ब्यैव।

सम्भवः—३१

समेकीभावेऽव्ययम्। भवनं भवः सत्ता। एकीभावेनास्तित्वमस्ति यस्य स 'सम्भवः'।

---

१. निपूर्वाद्दधातेः **'कर्मण्यधिकरणे च'**(पा० २।३।६३) इत्यनेन 'कि'-प्रत्ययः। २. अव्ययोऽविनश्वरः।
* – **'रो रि'** (अ० ८।३।१४) इति पूर्वरेफलोपे, **'ढ्रलोपे पूर्वस्य दीर्घोऽणः'** (अ० ६।३।१११) इति दीर्घत्वम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वक्तव्यम्—यथा स्वयं भगवान् परमेश्वरः स्वकमेकीभावं न जहाति, तथैव तस्य कृतावपि निम्बो निम्बतां न जहाति। अमुथैव गौर्गोत्वं न जहाति, सर्पादयः स्वं स्वभावं न जहति। तात्पर्यार्थोऽयं यच्चतुर्विधा सृष्टिः स्वकमेकीभावं सर्गारम्भतः कल्पान्तं न त्यजति तस्य सम्भवनामवतो विष्णोरनुस्यूतं धर्ममनुकुर्वती तमनुगच्छन्ती सती।

भवति चात्रास्माकम्—

चिन्त्यैकध्यं जगत् सर्वं, सम्भवेन कृतं यथा।
तथैवाद्यापि निर्भ्रान्तं, जगद् बद्धं प्रधावति।।४२।।

यदुक्तं 'समेकीभावेऽव्ययम्' तत्र प्रमाणम्—

संगच्छध्वं सं वदध्वं सं वो मनांसि जानताम् (ऋग्० १०।१९१।२) इत्येवमादिः। यत्तु—***'सम्भवाम्यात्ममायया' 'धर्मसंस्थापनार्थाय सम्भवामि युगे युगे'*** इत्यादि गीतायामुक्तमास्ते, तत्रापि तात्स्थ्योपाधिना संगन्तव्यम्। अर्थात् तस्य शूरस्य हृदये स्वकं शर्वात्मकं रूपं प्रकटयामि। कुत एवम्? नहि तस्य महेश्वरस्य शरीरेण योगो भवति। उक्तं च वेदे—

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳशुद्धमपापविद्धम् यजुः० ४०।८।।

ईश्वरस्य शरीरधृतौ दोषं पश्यता तद्दोषपरिजिहीर्षया चेदं वचनं प्रक्लृप्तम्, तद्यथा—

अथ दुष्टविनाशाय, साधूनां रक्षणाय च।
स्वेच्छया सम्भवाम्येवं गर्भदुःखविवर्जितः।।

नहि शरीरादयो जरायुजानां गर्भदुःखमन्तरा सम्भवन्ति, केवलमाद्यामुत्पत्तिं परित्यज्य। अतश्चेदं वक्तुं पार्यते यद् विष्णोर्नामसु स्थितस्य 'सम्भव' नाम्नो व्याख्यानं 'समित्येकीभावेऽव्ययम्,' एकीभावेन सत्तारूपेण भवो यस्यास्तीति स 'सम्भवः' परमेश्वर इत्येव।

सम्भवामि=उत्पन्नो भवामि, भवत्वेषोऽप्यर्थो संस्कृतवाङ्मये। यथा च भवति ***'सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते'*** (गीता २।३४)। सम्भावितस्य लब्धप्रतिष्ठस्येति। भागवतं व्याख्यानमधिकृत्यास्माकमेव व्याख्यानं युक्तियुक्तमुपपद्यत इति दिक्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भावनः—३२

भाव्यते सत्तारूपेण प्रतिष्ठाप्यते जगदनेनेति 'भावनः' परमेश्वरः। भगवन्निष्ठानां नाम तस्य भावनस्य परमेश्वरस्याश्रयादाकल्पं सत्तारूपेण तिष्ठतीति कृत्वा सेवकैः स एव भगवान् नूनं मनसा वाचा कर्मणा च ध्येयो गेय उपचर्यश्च।

भवति चात्रास्माकम्—

नरस्य यस्येह भवेन्मनीषा
चिराय सम्भावयितुं स्व-नाम ।
स भावनं नाम जपेन्महेशं
तदाश्रयं काव्यमुदीरयेच्च ।।४३।।

भर्त्ता—३३

'डुभृञ् धारणपोषणयोः' जौहोत्यादिकः, तस्मात् तृचि बिभर्तीति 'भर्त्ता' परमेश्वरः। स 'भर्त्ता' भगवान् सर्वान् प्राणिनो बिभर्ति, तेषां कृते यथार्हं भोज्यं ददाति। यावज्जीवानामायुष उदयोऽस्ति, तावन्नियततया तान् सर्वात्मना बिभर्त्तीति कृत्वा 'भर्त्ता' परमेश्वरः।

भवति चात्रास्माकम्—

बिभर्ति लोकानुत प्राणिमात्रं
न तं विना भर्तृतमोऽस्ति कश्चित्।
रुजान्वितं सुप्तमथार्थहीनं
जरायुजं न्वेष बिभर्ति 'भर्त्ता' ।।४४।।

वक्तव्यम्—भर्तृगुणवतो महात्मनो देवस्योपासनं कुर्वता जनेन प्राणिमात्रं स्वशक्तिं यावत् पालनीयः पोषणीय इति। एवमसौ भर्तेति संज्ञां लभते। गौणवृत्त्या स्त्रीणां पालको हस्तग्राभोऽपि भर्तोच्यते। सेवकानां पोषकस्तेषां स्वाम्यपि भर्तोच्यते।

भवति चात्रास्माकम्—

स एव 'भर्ता' न हि तत्परोऽन्यो
विश्वम्भरो नाम बिभर्त्ति कश्चित् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तद्भर्तृयोगाद् यदि [1]नापि कश्चित्
भर्त्ता भवेत् स्तुत्यतमोऽस्ति सोऽपि।।४५।।

प्रभवः—३४

प्रकृष्टो भवोऽस्यास्तीति 'प्रभवः'। भवनं भवः सत्तेति यावत्। तस्येश्वरस्य प्रभवगुणं विज्ञापयन्तः स्रोतसां प्रभवा नित्यं तमेवाक्षयं धर्ममद्यावधि पालयन्ति। अमुथैव प्राणिनां प्रभवोऽपि प्रतिक्षणं बोभूयमानस्तस्यैव प्रभवस्य परमेश्वरस्य गुणमनुसरन् प्रभवति। अमुनैव विधिनोद्भिदां प्रभवोऽपि।

भवति चात्रास्माकम्—

कालेन सर्वं विकृतिं प्रयाति
स्रोतांसि शुष्यन्ति महान्ति चापि।
पृथक् पृथक् यः प्रभवोऽस्ति लोके
व्यनक्ति शोभां प्रभवस्य तस्य।।४६।।

प्रभुः—३५

'प्र'-पूर्वात् भवतेर्डुप्रत्ययान्तोऽयं 'प्रभुः' शब्दः, यदि प्रत्ययान्तेन संज्ञा न गम्यते। प्रत्ययविधायकं सूत्रं—***'विप्रसंभ्यो ड्वसंज्ञायाम्'*** (पा० ३।२।१८०)। प्रकर्षेण भवतीति 'प्रभुः' स्वामी। सर्वासु क्रियासु सामर्थ्यातिशयात् वा **'प्रभुः'।**

मनुष्ये योऽयं 'प्रभुः'—शब्दप्रयोगो दृश्यते, सोऽयं तस्यैव महाप्रभोः कृपादृष्टेः फलमात्रमेव। व्यपगतायां तस्य कृपादृष्ट्यां राजानो रंकायन्ते। सत्यां चार्द्रदृष्ट्यां रंकाश्च राजायन्ते। तस्य महेश्वरस्यैषा व्यवस्थैवास्ति। यदा मनुष्यस्तस्य नियमानुल्लंघते तदाऽसौ पतति। तद्व्यवस्थैव तस्य न्यायः कृपा दया वा कृपादृष्टिर्दयादृष्टिर्वा। तस्मात् प्रभु-*भूयमिच्छता सर्वकालं तस्यैव महेश्वरस्य प्रभुकर्म द्रष्टव्यम्।

---

१. ना=मनुष्यः

* प्रभुभूयमित्यत्र **'भुवो भावे'** (अ० ३।१।१०७) इति 'क्यप्' प्रत्ययः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

न कोपि लोके प्रभुरस्ति तत्समः
प्रभुः स्वयं सन् प्रभुतां प्रयच्छति।
न यान्ति शोभां प्रभवोऽपि तं विना
स दक्षिणे यस्य स एव नः प्रभुः।।४७।।

ईश्वरः—३६

'ईश ऐश्वर्ये' अदादिः, तस्मात् ***'स्थेशभासपिसकसो वरच्'*** (पा० ३।२।१७५) इत्यनेन तच्छील-तद्धर्म-तत्साधुकारिष्वर्थेषु 'वरच्' प्रत्ययो भवति, तेन 'ईश्वरः' सिद्ध्यति। ईष्टे ऐश्वर्यभावाय जगत् सहजशीलतया नयति, सहजेन धर्मेण सहजेन कर्मणा वा 'ईश्वरः'।

मन्त्रलिङ्गञ्च—

ईशा वास्यमिदं सर्वं यत्किं च जगत्यां जगत्।
तेन त्यक्तेन भुंजीथा मा गृधः कस्यस्विद्धनम्।।' यजु० ४०।१।।

अन्यच्च—

'तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम्'।
यजुः० २५।१८।।

स एव जगन्नियन्तेश्वरः। यथोक्तं गीतायाम्—

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन! तिष्ठति।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ।। अ० १८।६१।।

भवति चात्रास्माकम्—

ईष्टे जगत् तेन स ईश्वरोऽस्ति
विश्वं तदावास्यमिदं स्वभावात्।
हृदन्तराले स स्थितो महात्मा
समीक्षते विश्वमिदं तपत् सः।।४८।।

वक्तव्यम्—ये जना ईश्वरपदभाजः सन्ति, तेऽपि तस्येश्वरस्य शुभदृष्टिवशादेव। यदा मनुष्यो राज्यमदान्वितो भूत्वा पुण्यकर्माणि त्यक्त्वा प्रजापीडनान्यारभते, तदा स महेश्वरस्तं परित्यजति, स रंकायते। ईश्वर नामवतो विष्णोरुपासको रंकोऽपि शनैः शनैः पुण्यानि सञ्चिन्वन् संवर्धमानो राजायते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

तस्यार्द्रदृष्ट्या भवतीश्वरो ना
स एव रंको न यदेक्षते सः ।
तस्मान्नरः पुण्यतमानि कुर्वन्
ध्यायेत् सदा तं सकलेशमाद्यम् ।।४६ ।।

उक्तं च—*'एष सर्वेश्वरः'०* (मा० ६) इति।

❖ ❖ ❖

स्वयंभूः शम्भुरादित्यः, पुष्कराक्षो महास्वनः।
अनादिनिधनो धाता, विधाता धातुरुत्तमः।।१८।।

३७ स्वयम्भूः, ३८ शम्भुः, ३९ आदित्यः, ४० पुष्कराक्षः, ४१ महास्वनः। ४२ अनादिनिधनः, ४३ धाता, ४४ विधाता, ४५ धातुरुत्तमः।।१८।।

स्वयंभूः—३७

स्वयं भवतीति 'स्वयंभूः' परमेश्वरः।

मन्त्रलिङ्गञ्च—

स पर्यगाच्छुक्रमकायमव्रणमस्नाविर ँ शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः।

यजुः ४० ।८ ।।

वक्तव्यम्—योऽयं भगवति परमेश्वरे स्वयंभूत्वरूपो गुणोऽस्ति, तेनैव गुणेन गुणितोऽयं संसारः स्वयंभूत्वं क्षणमनुक्षणं विज्ञापयन् तस्य महेश्वरस्य स्वयभूत्वं प्रकटयति। तद्यथा-स्वयमुष्ट्र उत्तिष्ठति भारेण युक्तोऽपि। स्वयं स्रोतांसि प्रस्रवन्ति। स्वयं सूर्यादयो ग्रहा उद्यन्ति, द्यवि भ्रमन्ति च। स्वयमेव समुद्रः उत्तुंगवेलामाप्नोति। वनस्पतयः स्वयमुद्भिद्यन्ते। स्वयमेव स्त्री पुरुषं प्रत्याकृष्टा भवति, पुरुषश्च स्वयमेव स्त्रियं प्रत्याकृष्टो भवति। स्वयमेव हस्त उत्क्रमते क्रियाविधौ।

महेश्वरस्य स्वयंभूत्वगुणं पश्यता नरेण स्वयंनियन्त्रितानां यन्त्राणामाविष्कारा कृताः सन्ति। मनुष्योऽपि परेशानुकृतिमत् स्वकं शिल्पकर्म विदधाति। एवमस्मिन् जगति सर्वत्रैव 'स्वयंभू' नामवान् भगवान्-प्रत्यक्षमिव दृष्टिपथमारोहति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

क्रमेलको ह्युत्क्रमते सभारः
पाणी स्वयं प्रोच्चलतः क्रियायाम्।
स्वयं नरं स्त्री हरते नरस्तां
स्वयम्भुवो ह्याश्रवमुद्गृणन्तः ।।५०।।

शम्भुः—३८

शं भवतीति 'शम्भुः,। शं सुखं प्राणिनां भावयतीति 'शम्भुः'। शम्पूर्वाद्भवतेर्डुप्रत्ययः। ***डु—प्रकरणे 'मितद्र्वादिभ्य उपसंख्यानम्'*** (पा० ३।२।१८०।। सूत्रे वार्त्तिकम्)।

मन्त्रलिङ्गञ्च—

'शन्नः क्षेत्रस्य पतिरस्तु शम्भुः।' अथर्व० १६।१०११०।। ऋ० ७।३५।१०।।

वक्तव्यम्—शम्भुना यदत्र जगति निर्मितमास्ते तत् सर्वं निर्विकल्पं परस्परं सर्वस्य जगतः शंभवाय अर्थात् सुखभावायैव कृतमास्ते। कुतः ? तस्मिन् कर्त्तरि स्वयं शंभावयितृत्वगुणस्य विद्यमानत्वात्।

भवति चात्रास्माकम्—

शम्भोः कृतिर्नैव तथाविधाऽस्ति
परस्परं या सुखयेन्न कामम्।
न तत्कृतौ दोषलवोऽप्यनक्ति
यतः स शम्भुस्तमसोऽस्ति पारे।।५१।।

आदित्यः—३६

'आदित्यः' कस्मात् ? आदत्ते रसान् भुवो रश्मिभिः। आदत्ते भासं ज्योतिषाम्। तथा च ब्राह्मणम्—***'उद्यन्तं वा आदित्यमग्निरनुसमारोहति तस्माद्धूम एवाग्नेर्दिवा ददृशे'*** आदीप्तो भासेति वा। अदितेः पुत्र इति वा। ***'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः'*** (पा० ४।१।८५) इत्यनेनादिति-शब्दादपत्यार्थे ण्यः प्रत्ययः। तथा च ब्राह्मणम्—***'अदितिः पुत्रकामा साध्येभ्यो देवेभ्यो ब्रह्मौदनमपचत्' 'तस्यै चत्वार आदित्या अजायन्त'*** **इत्युपक्रम्य *'ततो विवस्वानादित्योऽजायत'*** इति। (तै० सं ६।५।६)।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अदितिशब्दादल्पशो ढगपि दृश्यते। तद्यथा-ऋग्वेदे—

यदेदेनमदधुर्यज्ञियासो दिवि देवाः सूर्यमादितेयम् ।
यदा चरिष्णू मिथुनावभूतामादित प्रापश्यन् भुवनानि विश्वा।।

ऋग्० १० ।८८ ।११।।

सर्वे विधयश्छन्दसि विकल्प्यन्ते, ***'वा छन्दसि सर्वे विधयो भवन्ति'*** इति पातंजलमहाभाष्ये (१।४।६); ***'बहुलं छन्दसि सर्वे विधयो भवन्ति'*** इति पातंजलमहाभाष्ये (३।१।८५)।

एवमन्यासामपि देवतानामादित्यप्रवादाः स्तुतयो भवन्ति। तद्यथैतन्मित्रस्य वरुणस्य अर्यम्णो दक्षस्य भगस्य अंशस्येति' (नि० २।१३)।

तत्रादित्या द्वादश, मासानां द्वादशत्वात्। तत्रापि च ते द्वादशमासा षड्तून् जनयन्ति, द्वाभ्यां द्वाभ्यां मासाभ्याम्।

मन्त्रलिङ्गञ्च—

ग्रीष्मस्ते भूमे वर्षाणि शरद्धेमन्तः शिशिरो वसन्तः ।
ऋतवस्ते विहिता हायनीरहोरात्रे पृथिवी नो दुहाताम्।।

अथर्व० १२।१।३६।।

ते च षडर्त्तवश्चक्रं वृत्तं संवत्सरं वा जनयन्ति। तत्र षष्ट्युत्तराणि त्रीणि शतानि (३६०) दिनानि अंशा वा भवन्ति।

मन्त्रलिङ्गञ्च—

चतुर्भिः साकं नवतिं च नामभिश्चक्रं न वृत्तं व्यतींरवीविपत्।
बृहच्छरीरो विमिमान ऋक्वभिर्युवाकुमारः प्रत्येत्याहवम् ।।

ऋग् १।१५५।६।।

चतुर्गुणिता नवतिः (९०×४=३६०) समाना भवति षष्ट्युत्तरेण शतत्रयेण। तत्र त्रिंशदंशको राशिर्भवति मार्ग-गणनया। कालगणनया त एवांशा दिनेन दिनपर्यायवचनैर्वा व्यवहारं प्राप्नुवन्ति।

यथेष्टमृतुमधिकृत्य संवत्सरस्य नाम-कल्पनं कर्त्तुं शक्यते। तद्यथा-वर्षर्तुमधिकृत्य—***'वर्षमेकमभूद्'*** इत्युक्तं भवति। तद्यथा—***'वर्षेण भूमिः पृथिवी वृतावृता'*** इत्येवमादिः (अथर्व० १२।१।५२)। शरदमधिकृत्य —***'जीवेम शरदः शतं भूयश्च शरदः शतात्'*** (यजुर्वेद ३६।२४)। हेमन्तमधिकृत्य—***'इन्धानस्त्वा शतꣳ हिमा ऋधेम'*** (अथर्व० १९।६।४)। हेमन्तशिशिरौ तुल्यप्रभावत्वात् समासेनैकः।

इतरे-चत्वारस्त अरभूता यस्य तत्पञ्चारः, तस्मिन् चक्रे संवत्सराख्ये।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च–

पंचारे चक्रे परिवर्त्तमाने तस्मिन्नातस्थुर्भुवनानि विश्वा ।
तस्य नाक्षस्तप्यते भूरिभारः सनादेव न शीर्यते सनाभिः।।

ऋग्० १।१६४।१३।।

नाक्षः, आदित्यः सनाभिः=नाभिस्त्रय ऋतवो-ग्रीष्मो-वर्षा-हेमन्त इत्येते। **'पंचर्तवः संवत्सरस्य'** (ऐत. ब्रा० १।१)। संवसन्तेऽस्मिन् भूतानीति 'संवत्सरः, संवासो मैथुनं तद् भूतानि संवत्सरे कुर्वन्ति नान्यत्र, संवत्सरादन्यस्य कालस्याभावात्। सनादेव स सूर्यस्तपति न शीर्यते। हेमन्तशिशिरयोः समासेन पंचर्तुः संवत्सर उक्तो भवति ।

यत्तु पूर्वमुक्तम्–'आदित्या द्वादश मासानां द्वादशत्वात्' तदभिधायिनीयमृक्–

पंचपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम्।
अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षडर आहुरर्पितम् ।।

ऋग्वेदे १।१६४।१२।।

पंचर्तवः पादा यस्य स 'पंचपादः' तं पितरं पातारं वा सर्वस्य, द्वादशाकृतिं द्वादशमासा आकृतिराकारो यस्य स द्वादशाकृतिस्तं, दिवो द्युलोकस्य परे अर्धे परस्मिन्नर्धे यः स्थित आदित्यस्तत्र पुरीषिणं पुरीषमित्युदकनाम तद्वन्तमर्थात् वृष्ट्युदकवन्तं संवत्सरमाहुरर्पितमादित्यं वा। अथेमे अन्ये 'उपरे' उपरि स्थितं विचक्षणं विविधदर्शनकरमादित्यं सप्तचक्रे चक्रं चकनात् चरणात् क्रमणाद्वा, चक्रा रश्मयः ते च सप्त, आदित्येन सम्बद्धत्वात् सप्तचक्रः सूर्यस्तस्मिन् सप्तचक्र आदित्ये। षडरे षड्भिररभूतैर्ऋतुभिर्युक्ते संवत्सरे चक्रे आहुरर्पितम्।

संवत्सर-आदित्यौ परस्परमायतौ स्तः। तद्यथा- संवत्सरस्तावदहोरात्राभ्यां निर्वर्त्यते। तेन संवत्सर आदित्यायत्तः। संवत्सरावयवभूतैः षडर्तुभिस्तावदस्यादित्यस्य तीव्रत्वमन्दत्वे क्रियेते, तस्मात् संवत्सरायत्त आदित्यः। गतेश्च कालवैषम्यं दक्षिणोत्तरादि-दिग्गमनभेदश्चेति। अत एतदुक्तं भवति- संवत्सरायत्त आदित्य इति।

द्वादशमासा आदित्या वा षड्ऋतवश्च तुलनापुरस्सरं प्रदर्श्यन्ते। तद्यथा–

राशयः-मेषः, वृषः, मिथुनः, कर्कः, सिंहः, कन्या, तुला, वृश्चिकः, धनुः, मकरः, कुम्भः, मीनः, इति द्वादश। **मासाः**–चैत्रः, वैशाखः, ज्येष्ठः, आषाढः, श्रावणः, भाद्रपदः, आश्विनः, कार्तिकः, मार्गशीर्षः, पौषः, माघः, फाल्गुनः, इति द्वादश।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आदित्यानां वैदिकनामानि—

धाता, अर्यमा, मित्रः, वरुणः, इन्द्रः, विवस्वान्, दक्षो वा।
पूषा, पर्जन्यः अंशः, भगः, त्वष्टा, विष्णुः इति द्वादश ।।

याजुषा ऋतवः—'**मधुश्च माधवश्च वासन्तिकावृतू**' (यजुः १३।२५); '**शुक्रश्च शुचिश्च ग्रैष्मावृतू**' (यजुः १४।६); '**नभश्च नभस्यश्च वार्षिकावृतू**' (यजुः १४।१५); '**इषश्चोर्जश्च शारदावृतू**' (यजुः १४।१६); '**सहश्च सहस्यश्च हैमन्तिकावृतू**' (यजुः० १४।२७); **तपश्च तपस्यश्च शैशिरावृतू**' (यजुः० १५।५७) इति षड्तवः, यथाक्रमं मासानां वैदिकनामानि चानुस्मर्तव्यानि।

तिसृषु प्रधानदेवतासु द्युस्थानीया देवता सूर्य-नाम्ना प्रार्थ्यते। तद्यथा—

'सूर्यो नो दिवस्पातु वातो अन्तरिक्षात्।
अग्निर्नः पार्थिवेभ्यः।। ऋग्० १०।१५८।१।।

स्पष्टार्थोऽयं मन्त्रः।

आदित्य एषां भूतानामधिपतिः (ऐत० ब्रा० ७।२०)।

एतेन द्वादश आदित्याः सामान्येन प्रार्थिता भवन्ति। पृथक् पृथक् नामतोऽपि प्रार्थ्यन्ते च तद्यथा—

शन्नो मित्रः शं वरुणः शन्नो भवत्वर्यमा।
शन्न इन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः।।' ऋग्० १।६०।६।।

तदेतद् भेदेन चाथर्वणि—

शन्नो मित्रः शं वरुणः शं विष्णुः शं प्रजापतिः।
शन्न इन्द्रो बृहस्पतिः शन्नो भवत्वर्यमा ।। अथर्व० १६।६।६।।
शं नो मित्रः शं वरुणः शं विवस्वान् शमन्तकः।
उत्पाताः पार्थिवान्तरिक्षाः शं नो दिविचराग्रहाः ।। अथर्व० १६।६।७।।

'दिविचरा ग्रहाः केन विधिनाऽस्मत्कृते शंकरा भवन्तु'—इति विज्ञापकं शास्त्रं ज्यौतिषं नाम। कथं कृत्वा ग्रहा जातकाय शुभाशुभस्य दातारो भवन्तीति विज्ञापकं शास्त्रं गणितमनुसृत्य प्रवृत्तं 'होराशास्त्र'मिति नाम्ना व्यवह्रियते। तस्मात् तत्सर्वकेन नूनं पठनीयम्।

शन्नो भगः (ऋग्० ७।३५।२)। **शन्नो धाता** (ऋग्० ७।३५।३)।

मित्रस्यैकस्यादित्यप्रवादा स्तुतिः—

प्र स मित्र मर्तो अस्तु प्रयस्वान् यस्त आदित्य शिक्षति व्रतेन।
न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात् ।।
ऋग्० ३।५६।२।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथादि वरुणस्यैकस्य आदित्यप्रवादा स्तुतिः—

'उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमं श्रथाय।

अथा वयमादित्य व्रते तवानागसो अदितये स्याम ।। ऋ०१।२४।१५।।

आदित्यमधिकृत्यैषा स्तुतिः—

एभिर्नो अर्कैर्भवा नो अर्वाङ् स्वर्णज्योतिः ।

अग्ने विश्वेभिः सुमना अनीकैः ।। ऋग्० ४।१०।३।।

भावार्थः—हे अग्ने! स्वर्णज्योतिः! आदित्यभास्वर इत्यर्थः। विश्वेभिः सर्वैरनीकैर्ज्वलनैरुपेतस्त्वमस्माकमर्वाङ् सुमना भव, अस्मत्कृते प्रसादपरो भवेति।

सूर्यो हि सर्वेषामग्नीनामधिपतिरिति कृत्वाग्नेरर्चिरूर्ध्वमेति। नियमश्चायं—यो हि यस्य विकारो भवति स तमन्वेति, यथा वत्सो मातरमन्वेति पितरं च।

अस्यां भूमौ न हि सर्वत्र पंच षड्वा ऋतवो भवन्ति, कथं तत्रैषा द्वादशादित्यानां योजना भविष्यतीत्येतस्य प्रश्नस्य समाधानमनेन विधिना कर्तव्यं भवति। यद् आदित्यानां द्वादशाकृतयो यत्र दृश्यन्ते तत्स्थानमुत्सर्गभूतम्, शेषं स्थानमात्रमपवादमिव यथा—***'कर्मण्यण्'*** (पा० ३।२।१) इत्यत्र 'अण्' उत्सर्गप्रत्ययः, शेषा अपवादभूताः। यथा—***'आतोऽनुपसर्गे कः'*** (पा० ३।२।२) इत्येवमादयः। दृश्यते च देशभेदात् तत्रत्यानां शरीर वर्ण-बल-बुद्धयादीनां भेद इति।

यत्तु पूर्वमुक्तं सप्तचक्रः सूर्यः, सप्तरश्मयः सूर्य इति, तदभिधायिनीयमृग् भवति—

'सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा।

त्रिनाभिचक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः।।ऋग् १।१६४।२।।

सारार्थतः—नहि सूर्यमन्तरा संवत्सरमन्तरा वा विश्वेषां भूतानां स्थितिरिति कृत्वा 'आदित्यः' स भगवानेव। नहि तं विना सूर्यस्यापि स्थितिरिति। उक्तं—**'तमीशानं जगतस्तस्थुषस्पतिम्'** (यजुः (२५।१८)। 'ईशानः' इति विष्णु-नामसु पठितमास्ते। इति दिङ्मात्रमुक्तम्।

वक्तव्यम्—यो यद्भाव्यमिच्छति तेन भावकेन तथाविधः स आदित्यगुणो विष्णुर्मनसि स्मरणीय आचरणेनाचरितव्यस्तदा स भक्तस्तैर्गुणैर्गुणितः सन् आदित्यभूयाय कल्पते।

आत्ययिके कार्येऽभ्यासे वा कृत्रिमा ऋतवोऽपि कल्प्यन्ते। यस्मिन् मासे दिने घट्यां पले वा यो जातक उत्पद्यते स तस्मिन् मासे दिने घट्यां पले वा प्राप्ते स्वकमेकं वर्षं चक्रं संवत्सरं वा पूरयति। एतेषां द्वादशादित्यानां

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परस्परमुत्पाद्योत्पादकभावं विज्ञानवतः प्राणिमात्रस्य शुभाशुभं सुज्ञानं भवति। एतज्ज्ञानप्रकारं पृथक् प्रबन्धे वक्ष्यामः, अतितरां विस्तृतत्वात् तस्य।

भवन्ति चात्रास्माकम्—

एको हि सूर्यः सवितेति नामा
नामानि चाप्नोति पृथक् पृथक् सः।
धाताऽर्यमा मित्र इतीरणानि
चैत्रादिमासेषु यथोदितानि ।।५२।।

उत्सर्गवन्मासयुगेन चर्तुः
शीतोष्णवर्षेषु च ते [1]ह्रसन्ति ।
यथाभ्रमं गौर्ऋतवोऽपि भिन्ना
भिन्नास्तथाऽऽयुर्बलवर्णदेहाः ।।५३।।

एको हि सूर्यः सवितेति नामा
निजांशुभी राशिगुणान् भिनत्ति ।
तत्राऽस्थिताः शेषखगाः समस्ता
व्यस्ताश्च वा भेदमुदीरयन्ति ।।५४।।

संवत्सरो द्वादशमासचक्रो
मासोदयः सूर्यवशेन तस्मिन् ।
संवत्सरार्कौ परियात इत्थं
परस्परं वेदवचः प्रमाणम् ।।५५।।

स एव तिग्मांशुरनन्तवीर्यो
यः स्थापयत्यात्मनि भूतमात्रम् ।
न यद्विना भाति स भास्वरोऽपि
सोऽस्त्यत्र चाऽऽदित्यपदेन विष्णुः।।५६।।

आदित्यानामहं विष्णुः गीता १०।२१।।

आरोग्यं भास्करादिच्छेत्, मुक्तिमिच्छेद्धुताशनात्।।इति च प्रवादः।

अथर्वणि द्वादशादित्यनाम्नां व्यवहारो यथा—

१. ह्रसन्ति लाघवं प्राप्नुवन्ति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अग्निं ब्रूमो वनस्पतीनौषधीरुत वीरुधः।
इन्द्रं बृहस्पतिं सूर्यं ते नो मुंचन्त्वंहसः।।१।।
ब्रूमो राजानं वरुणं मित्रं विष्णुमथो भगम्।
अंशं विवस्वन्तं ब्रूमस्ते नो मुंचन्त्वंहसः।।२।।
ब्रूमो देवं सवितारं धातारमुत पूषणम्।
त्वष्टारमग्रियं ब्रूमस्ते नो मुंचन्त्वंहसः।।३।।
गन्धर्वाप्सरसो ब्रूमो अश्विना ब्रह्मणस्पतिम्।
अर्यमा नाम यो देवस्ते नो मुंचन्त्वंहसः।।४।।
अहोरात्रे इदं ब्रूमः सूर्याचन्द्रमसावुभा।
विश्वानादित्यान् ब्रूमस्ते नो मुंचन्त्वंहसः।।५।।

अथर्व० ११।६।१-५।।

पुष्कराक्षः—४०

पुष्करमिति ***'पुषः कित्'*** (उ० ४।४) इत्यनेनौणादिसूत्रेण 'करन्' प्रत्ययः किच्च स भवति। पोषति पुष्णाति वा 'पुष्करम्' अन्तरिक्षम्, कमलम्, उदकम् वा।

'पुष्करम्' इत्यन्तरिक्षनामसु निघण्टौ। अन्तरिक्षं हि सर्वं पुष्णाति धारणं वा करोतीति कृत्वान्तरिक्षं 'पुष्करम्'। पुष्करेऽन्तरिक्षेऽक्षीणि यस्य स 'पुष्कराक्षो' विष्णुः।

मन्त्रलिङ्गञ्च—

अस्य सूर्यश्चक्षुश्चन्द्रमाश्च पुनर्णवः।
अग्निं यश्चक्र आस्यं तस्मै ज्येष्ठाय ब्रह्मणे नमः।।

अथर्व १०।७।३३।।

बृहत्त्वाद् ब्रह्मणस्तस्याक्ष्णोरपि कल्पना तस्य सर्वत्र दृष्टेः सादृभाव्यं विज्ञापयितुमेव। एवं स विष्णुः सूर्यचन्द्रमसोर्योगात् सर्वदृगपि भवति। वक्ष्यति च पंचत्रिंशत्तमे श्लोके, नवनवत्युत्तरमेकशततमं नाम १९९ 'सर्वदृक्' इति। एतेन सर्वदृगपि व्याख्यातं भवति।

भवति चात्रास्माकम्—

व्योम्नोऽपरं पुष्करमत्र नाम
तस्मिन् स्थितौ रात्रिदिवाधिनाथौ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तावक्षिणी यस्य स पुष्कराक्षः
स सर्वदृक् सर्वगतोऽस्ति विष्णुः।।५७।।

अनेकार्थपर्यायः 'पुष्कर' शब्दः। तद्यथा वचनम्—

कराग्रं करिणां व्योमकुशेशयमसेः फलम्।
आननं चानकादीनां ब्रुवते पुष्करं बुधाः ।।

इति नारायणश्वेतवनवासिभ्यामुद्धृतः श्लोकः।

भेरीपटहमानकौ। अमरे नानार्थवर्गे श्लोकः।।३।।

महास्वनः—४१

महानूर्जितः परेषां पराभवकर्त्ता स्वनो नादो यस्य स 'महास्वनः' इत्यनेनोत्तरोत्तरं यथाबलं नादवति ब्रह्म एवेति विज्ञापितं भवति। महाँश्चासौ स्वनः ***'सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः'*** (पा० २।१।६१) इत्यनेन समासे कृते, ***'आन्महतः समानाधिकरणजातीययोः'*** (पा० ६।३।६१) इत्यनेन महतस्तकारस्यात्वम्।

लोकलोकान्तराणां महता वेगेन भ्रमणेन यः स्वन उत्पद्यते, स महान् स्वनः ब्रह्मण्येव लीयते ततोऽपि परं तस्य महतः स्थानमिति। तं लोकभ्रमणोद्भवं स्वनं सर्वत्र सर्वदा बोभूयमानं दृष्ट्वा स स्वनस्तस्मिन् इति कृत्वा स महास्वनो विष्णुरित्येव, स्वनस्य सर्वत्र व्यापकत्वात्।

लोकेऽपि च पश्यामः—यन्त्रागारे भूयमाने स्वन उपांशुवचांसि न श्रूयन्ते। कुतः, तस्मिन् कक्षे स्वनस्य विद्यमानत्वात्। अमुथैव स्वनो ब्रह्म तत्र महत्त्वं पुनस्तस्यैवेति कृत्वा 'महास्वनो' विष्णुरुक्तो भवति।

वर्षास्विन्द्रस्य वज्ररूपे विद्युतः पतनकाले यो हृदयविवारको विदारको वा स्वनो भवति, स महानूर्जितः स्वनोऽपि तस्य भगवत एव।

तथा च वेदः—**शन्नः कनिक्रदद्देवः'** (यजु० ३६।१०)।

भवति चात्रास्माकम्—

यो लोकलोकान्तरवृत्तजन्यः
स्वनो महान् तेन महास्वनेन।
धृतोऽस्ति यस्मात् स महास्वनोऽस्ति
यथोत्तरं नादबलं स एव ।।५८।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनादिनिधनः—४२

आदिः-आङ्पूर्वाद् 'ददातेः' ***'उपसर्गे घोः किः'*** (पा० ३।३।९२) इत्यनेन कि प्रत्ययात् 'आदि' शब्दः सिद्ध्यति। न विद्यते आदिर्यस्य स 'अनादिः'।

मन्त्रलिङ्गञ्च—

नाम नाम्ना जोहवीति पुरा सूर्यात् पुरोषसः। यदजः प्रथमं संबभूव स ह तत् स्वराज्यमियाय यस्मान्नान्यत् परमस्ति भूतम्।।

अथर्व०१०।७।३१

सनातनो हि सः। मन्त्रलिंगं च—

सनातनमेनमाहुरुताद्य स्यात् पुनर्णवः।
अहोरात्रे प्रजायेते अन्योऽन्यस्य रूपयोः।। अथर्व० १०।८।२३।।

आदिर्जन्म तन्न विद्यते यस्य स अनादिः=अजन्मा।

मन्त्रलिङ्गञ्च—

न तस्य प्रतिमा अस्ति यस्य नाम महद् यशः। यजुः ३२।३।।

पुत्रेण पिता प्रतिमीयते, पितुः सत्तायाः पुत्रात् पूर्वं सद्भावात्। महन्नामवतो यशोनामवतो वा न कोऽपि प्रमाताऽस्ति तस्मादप्रतिमः सन् सोऽनादिः।

निधनम्—निपूर्वात् 'डुधाञ् धारणपोषणयो' जौहोत्यादिकस्तस्मात् ***'कृपृवृजिमन्दिनिधाञ्भ्यः क्युः'*** (उ० २।८१) इत्यनेनौणादिकेन सूत्रेण 'क्युः' प्रत्ययः। निदधातीति निधनम् विनाशः। उणादिषु बहुलवचनात् केवलादपि डुधाञः क्युप्रत्ययात्-धनम् इत्यपि सिद्ध्यति। धन-शब्दः प्रत्ययस्वरेणाद्युदात्तः 'रत्नधातमम्' ***'रमणीयानां धनानां दातृतमम्'*** इति निरुक्तम् (७।१५)। निपूर्वो धाञ् विनाशवृत्तिः, ***'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते'*** इति न्यायात् छन्दोविषयं विना युच्प्रत्ययस्य सद्भावात् निधानमित्येव।

तथा च कोषः—

स्यात् पंचता कालधर्मो दिष्टान्तः प्रलयोऽत्ययः।
अन्तो नाशो द्वयोर्मृत्युर्मरणं निधनोऽस्त्रियाम् ।।

अमर० कां २, क्षत्रियवर्गः, श्लोक ११६।

तथा च —

'निधनं कुलनाशयोः' (अमरे कां ३, नानार्थवर्गे १२३)। एवमन्येष्वपि कोषेषु। इति पृथक्श आदिः, निधनं च व्याख्याते—आदिः, आदत्तं परेण

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवतीति लोकं दृष्ट्वाऽस्मन्निरुक्तिः। नहि परेणादानमन्तरा 'आदिः' भवतीति कृत्वा। आदिनिधने न विद्येते यस्य स 'अनादिनिधनः' जन्ममृत्युरहित ईश्वरो विष्णुपर्यायः।

अत्र व्याख्याप्रसंगेन चतुर्दशोत्तरैकशततमे श्लोके संगृहीतं 'अनादिः'न विद्यत आदिकारणं यस्य सः 'अनादिः'इत्यपि व्याख्यातं भवति। यस्य संख्या-एकचत्वारिंशदुत्तरा नवशततम्यस्ति स्वयम्भूत्वात् तस्य।

मन्त्रलिङ्गञ्च—

'कविर्मनीषी परिभूः स्वयंभू' रिति। यजुः ४०।८।।

'कवि' रिति तस्य विष्णोर्व्यापकस्य नाम। अत उक्तं—

अन्ति सन्तं न जहात्यन्ति सन्तं न पश्यति।
देवस्य पश्य काव्यं न ममार न जीर्यति ।। अथर्व० १०।८।३२।।

यथा कवेर्देवस्य श्रव्यं काव्यं वेदो न म्रियते न जरां वा गच्छति तथैतत्कर्ता सर्वव्यापकोऽपि निधनं न प्राप्नोति। अतः स एव 'अनादिनिधनः'।

भवति चात्रास्माकम्—

आदिर्न शम्भोर्निधनं न चापि
न तत्समः पूर्वभवो न कश्चित्।
स एव बन्धुर्जनिता सखा सः
सनातनो वेदमयः स एव ।।५६।।

धाता—४३

योऽनन्तादिरूपेण सर्वाणि भुवनानि दधाति बिभर्ति वा स 'धाता' विश्वम्भरः।

मन्त्रलिङ्गञ्च—

विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत संदृक्।
ऋक् १०।८२।२।।

अनृक्षरा ऋजवः सन्तु पन्थानो येभिः सखायो यन्ति नो वरेयम्।
सं भगेन समर्यम्णा सं धाता सृजतु वर्चसा।। 'अथर्व १४।१।३४।।

अन्यच्च—

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।
दिवञ्च पृथिवीं चान्तरिक्षमथो स्वः।। ऋ० १०।१६०।३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

दधाति यो विश्वमिमं तपन्तं
दधाति यश्चाम्भसि वर्त्तमानम् ।
दधाति यश्चात्मनि सत्यसन्धं
दधाति धातेति स विष्णु-संज्ञाम्।।६०।।

विधाता—४४

वेदे मनुष्यस्य कृते कर्त्तव्याणां विधानकर्तृत्वेन विधाता तज्जानां फलानां विधाता स एवास्तीति विज्ञापयितुं 'विधाता' इति विष्णोर्नाम। कर्त्तव्यकर्मणां विधातृत्वे मन्त्रलिङ्गं यथा—

कुर्वन्नेवेह कर्माणि जिजीविषेच्छत ँ समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ।। यजुः० ४० ।२।।

अन्यच्च—

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।
यत्र देवा अमृतमानशानस्तृतीये धामन्नध्यैरयन्त ।।
यजुः० ३२ ।१०।।

विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत संदृक्।
(ऋक्० १० ।८२ ।२)।

विधाता=विधानस्य कर्तेति। कर्मणां फलानां यथार्थत्वेन विधातृत्वाच्च 'विधाता' स विष्णुरस्तीति यदुक्तं तदभिधायी मन्त्रोऽयम्—

स पर्यगाच्छुक्रमकायमव्रणमस्नाविर ँ शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः।।
यजुः० ४० ।१०।।

अत्र विपूर्वस्य धाञः प्रयोगः। व्यदधात्-इति, विदधातीत्यर्थः।

भवति चात्रास्माकम्—

कर्माणि कुर्वन् शतमायुरिच्छ-
न्नरो महेच्छो व्यसनैर्विमुक्तः ।
विधानमेतद् व्यदधात् सनात् सः
श्रुतौ विधाता स हि विष्णुरुक्तः।।६१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धातुरुत्तमः—४५

सविशेषणं नाम, 'धातुः उत्तम' इति। धातुः-डुधाञ् धारणपोषणयोः जौहोत्यादिकः तस्मात् ***'सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्'*** (उणा० १।६६) इत्यनेन तुन्प्रत्ययः। दधात्यर्थं धीयते वाऽस्मिन्नर्थ इति 'धातुः' शब्दप्रकृतिः। पर्वतनिःस्रावो लौह-ताम्र-सुवर्ण-रजतादिर्वा। शिलाजतुगैरिक-पाषाणादिर्वा, मणयो विविधा वा। शरीरस्थसप्तधातवो— रस-रक्त-मांस-मेदः-अस्थि-मज्जाशुक्राणि, दोषाश्चापि धातव उच्यन्ते वात-पित्त-कफाः, देहमलाश्चापि धातव उच्यन्ते-स्वेद-मूत्र-पुरीषाणि। विस्तरस्त्वायुराम्नाये द्रष्टव्यः।

दधाति धरति पुष्णातीति 'धातुः' अर्थाश्रयेण परस्परमाकर्षणं ग्रहाणामपि धातुः। तदाकर्षणं स्थूलसूक्ष्मभेदेन चराचरं जगद् दधातीति 'धातुः' उक्तो भवति। ज्ञानबलक्रियाश्च धारयन्तीति कृत्वा ता अपि 'धातवः, क्रियायाः सिद्ध्यर्थं यानि करणानि तान्यपि धातुपदवाच्यानि भवन्ति। न हि तैर्विना कार्यं धृतं भवति। एवमल्पशो धात्वर्थो निरूपितो बुद्धेर्वैशद्याय। 'धातुरुत्तमः' स एव विष्णुर्भवितुमर्हति। कुतः ? न हि तेनैकेन विना सर्वं धृतं भवति।

मन्त्रलिङ्गञ्च—

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।।

य० १३।४।।

इति सविशेषणं 'धातुरुत्तमः' इति नामैकं व्याख्यातम्। नामद्वयं वा मत्वा-यद्धि यस्य कारणं तत्, तस्य धातुः।

मन्त्रलिङ्गञ्च—

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।
दिवं च पृथिवीं चान्तरिक्षमथो स्वः।। ऋग्० १०।१६०।३।।

सर्वेषामुद्गतानामतिशयेनोद्गतत्वात् 'उत्तमः'।

मन्त्रलिङ्गञ्च—

न त्वदन्यः कवितरो न मेधया धीरतरो वरुण स्वधावन्।

अथर्व० ५।११।४।।

गाम्भीर्येणापि स एव 'उत्तमः'

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

न त्वा गभीरः पुरुहूत सिन्धुर्नाद्रयः परिषन्तो वरन्त ।
इत्था सखिभ्य इषितो यदिन्द्राऽऽदृढं चिदरुजो गव्यमूर्वम्।।

ऋग्० ३।३२।१६।।

यद्वा—दधाति सर्वान् विकारानिति 'धातुः' प्रधानं प्रकृतिस्तस्या उत्तमो धातुरुत्तमः।

भवति चात्रास्माकम्—

कार्यं न तद्यस्य न धातुरस्ति
वेदश्च तं कारणमाह धातुम्।
नास्त्युत्तमो कोऽपि भवेऽत्र दृष्टो
यो लघंयेदुत्तमतामजस्य ।।६२।।

❖ ❖ ❖

अप्रमेयो हृषीकेशः, पद्मनाभोऽमरप्रभुः ।
विश्वकर्मा, मनुस्त्वष्टा, स्थविष्ठः स्थविरो ध्रुवः।।१६।।

४६ अप्रमेयः, ४७ हृषीकेशः, ४८ पद्नामः, ४६ अमरप्रभुः।
५० विश्वकर्मा, ५१ मनुः, ५२ त्वष्टा, ५३ स्थविष्ठः, ५४ स्थविरो ध्रुवः।१६।

अप्रमेयः—४६

प्रमाणैः प्रमातुमशक्यत्वाद् 'अप्रमेयः'। उक्तं च—

अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगन्धवच्च यत्।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात् प्रमुच्यते।।

कठोपनि० ३।१५।।

इन्द्रियाणि तस्मादेव प्रकाशयन्ति सन्ति स्वं स्वं विषयं ग्रहीतुं क्षमाणि भवन्ति तानि पुनः कथंकृत्वा तमव्ययमनन्तवीर्यं स्वाभिः शक्तिभिः प्रकाशमानयेयुरिति हेतोरप्रमेयः स पुरुषः परमात्मा। न कश्चित् तस्मादधिको ज्ञाननिपुणो यस्तं ज्ञानेन प्रमिमीत। एवमेव न कश्चित् बलेन तस्मादधिको, यस्तं बलेन प्रमिमीत, तस्माद् 'अप्रमेय': सः। सर्वत्रैवंविधा कल्पना कल्पनीया सुधीभिरिति दिक्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रमाणानि तं प्रमातुं न शक्नुवन्तीति कृत्वासाव'प्रमेयः'। शब्दादिरहितत्वान्न शब्दगम्यः। तच्छक्त्यैव वाग् वक्तुं प्रवर्तते, इति कृत्वा न स वाग्विषयः। एवमेवान्येष्वपि चतुर्ष्विन्द्रियेषु योजनीयमिति कृत्वा-अक्षमिन्द्रियं तत्प्रति प्रत्यक्षप्रमाणं संघटते।

व्याप्यव्यापकमन्तरा न ह्यनुमानप्रमाणस्य प्रवृत्तिः। यत्र यत्र धूमस्तत्र तत्र वह्निरितिवन्नात्र ब्रह्मणि द्विस्वरूपत्वम्। उपमानोपमेययोः पृथक् पृथक् सत्तामतोरेवोपमानप्रमाणस्य विषयो भवति। परन्तु ब्रह्मणि विभागाभावान्नोपमान-प्रमाणं घटते, सादृश्याभावात्। न तस्मिन्नर्थापत्तिप्रमाणं संगच्छते। कुतः? ब्रह्मणोऽव्ययत्वादेकरसत्वाच्चार्थादाप्तुं न किंचित्। ब्रह्मणः सत्तायाः सद्भावात् न हि तत्राभावप्रमाणप्रवृत्तिः। सम्बन्धश्च द्वयोर्बहूनां वा भवति। न हि तस्मिन्—नैकस्मिन् द्वित्वं बहुत्वं वास्ति, तस्मान्न सम्बन्धेनापि प्रमातुं शक्यं तद् ब्रह्म। तस्मिन् ब्रह्मण्यतिशयता नास्ति, तस्मान्न शास्त्रप्रमाणगम्यम्।

मन्त्रलिङ्गञ्च—

न तस्य प्रतिमाऽअस्ति यस्य नाम महद्यशः। यजुः ३२।३।।

यतः सूर्य उदेत्यस्तं यत्र च गच्छति।
तदेव मन्येऽहं ज्येष्ठं तदु नात्येति किंचन ।। अथर्व १०।८।१६।।

ब्रह्मणो जगत् पृथङ् मत्वोच्यते। तद्यथा मन्त्रः—

एको विश्वस्य भुवनस्य राजा ऋग्० ६।३६।४।।

तथा च—**दिव्यो गन्धर्वो भुवनस्य यस्पतिरेक एव नमस्यो विक्ष्वीड्यः'** अथर्व० २।२।१। अन्यच्च—**'एको दाधार भुवनानि विश्वा'** ऋग्० १।१५४।४।।

अतः शास्त्रप्रमाणकत्वं न विहतं भवति।

भवति चात्रास्माकम्—

न तद्विधः कोऽपि न तत्समो वा
मिमीत तं ज्ञानबलक्रियाभिः।
प्रमाणवृन्दोऽपि न तत्र शेते
तं त्यच्च भित्त्वा श्रुतिराह तत्त्वम्।।६३।।

मिमीत=प्रमिमीत। तं=पुरुषम्। त्यत्=जगत्। भित्त्वा=पृथक्-पृथक् मत्वा। श्रुतिः=वेदः। आह तत्त्वम्=याथार्थ्येन। स्व-स्वामित्वम्, धाता ध्रियमाणं चेत्येवमादि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हृषीकेशः—४७

हृषीकाणीन्द्रियाणि तथा चामरः—**'*हृषीकं विषयीन्द्रियम्*'**। (कां० १, वर्ग ५।१८)। तेषामीशः क्षेत्रज्ञरूपभाक्। अथवा-इन्द्रियाणि यस्य वशे वर्तन्ते, स परमात्मा 'हृषीकेशः'। अथवा—वक्ष्यति चास्मिन्नेव नामसंग्रहे सूर्यः, शर्वरीकरः, चन्द्रांशुः, भास्करद्युतिश्च। तस्मादेवं व्याख्यातुं शक्यते—सूर्यरूपस्य च चन्द्ररूपस्य जगत्प्रसादकरा हृष्टाः किरणैरिव व्याप्ताः केशा रश्मयो यस्य स 'हृषीकेशः'।

मन्त्रलिङ्गञ्च—

सूर्यरश्मिर्हरिकेशः पुरस्तात् यजु० १७।५८।।

अत्र पृषोदरादेराकृतिगणत्वात् तत्र चास्य निपातं मत्वा शिष्टप्रयोगस्य साधुत्वं कल्पयित्वा हृष्टकेश इति शब्दस्थाने 'हृषीकेश' इत्युक्तं साधुत्वाय कल्पते। यथोक्तं च महाभारते

सूर्याचन्द्रमसौ शश्वदंशुभिः केशसंज्ञितैः ।
बोधयन् स्वापयंश्चैव जगदुत्तिष्ठते पृथक् ।।
बोधनात् स्वापनाच्चैव जगतो हर्षणं भवेत्।
अग्नीषोमकृतैरेवं कर्मभिः पाण्डुनन्दन ।।
हृषीकेशो महेशानो वरदो लोकभावनः ।।

शान्तिपर्वणि ३४२।६६-६७।।

भवति चात्रास्माकम्—

हृषीकेशो हि सर्वात्मा, यस्य सव्यांगमंचति।
हृषीकेशो भवेन्मर्त्यो, जपदानव्रतेज्यया।।६४।।

सव्यांगमंचति=विघ्नान् परास्यन् मर्त्यस्यानुकूलः सन् दक्षिणे पार्श्वे भूत्वा तं दुरिताद् रक्षतीति भावार्थः। सूर्यः—सप्तोत्तरशततमे (१०७) श्लोके, संख्या—त्र्यशीत्युत्तरमष्टशततमं (८८३) नाम। शर्वरीकरः—दशोत्तरैकशततमे (११०) श्लोके, संख्यया चतुर्दशोत्तरं नवशततमं (६१४) नाम। चन्द्रांशुः, भास्करद्युतिः, त्रिचत्वारिंशत्तमे (४३) श्लोके। संख्यया—यथाक्रमं एकाशीत्युत्तरं द्विशततमम् (२८१) द्व्यशीत्युत्तरं द्विशततमं (२८२) नाम।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पद्मनाभः—४८

पद्म—पद गतौ, अस्मादौणादिकेन मन्-प्रत्ययेन पद्म-शब्दः सिद्ध्यति। सूत्रं यथा—***'अर्त्तिस्तुसुहुसृघृक्षिक्षुभायावापदियक्षिनीभ्यो मन्'*** (उणा० १।१४०) पद्यत इति पद्मम् कमलम्, निधिः, शंखो वा। कमल-पर्यायं पद्मपुष्पं जलयोनिः। इयं पृथिवी चापि जलयोनिः सर्गारम्भे जलस्यैव सर्वत्र सद्भावात्।

मन्त्रलिङ्गञ्च—

तम आसीत् तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वमा इदम्।
तुच्छ्येनाभ्वपिहितं यदासीत् तपसस्तन्महिना जायतैकम्।।

ऋग्० १०।१२६।३।।

अतः पद्मेयं पृथिवी नाभौ यस्य स 'पद्मनाभिः' सन् *'पृषोदरादीनि यथोपदिष्टम्'* इत्यनेन पाणिनीयाकृतिगणेन 'पद्मनाभः' साधुत्वाय नीयते। 'पद्मनाभः' स सर्वलोकाध्यक्षः।

मन्त्रलिङ्गञ्च—

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न ।
योऽस्याध्यक्षः परमे व्योमन्त्सो अंग वेद यदि वा न वेद।।

ऋग्० १०।१२६।७।।

तमिद् गर्भं प्रथमं दध्र आपो यत्र देवा समगच्छन्त विश्वे ।
अजस्य नाभावध्येकमर्पितं यस्मिन् विश्वानि भुवनानि तस्थुः।।

ऋग्० १०।८२।६।

यथा सरसि कमलानि भान्ति मनो वाह्लादयन्त्यमुथैवान्तरिक्षात्मके सरसि लोक-लोकान्तराणि वा प्रकाशन्ते भासन्ते चेतश्चाह्लादयन्तीति कृत्वा स 'पद्मनाभः' समानं भवति मन्त्रांशेन—**'अजस्य नाभावध्येकमर्पित'** मिति।

प्रसंगतः—'पद्मगर्भः' पद्मं गर्भे यस्य स पद्मगर्भः'। यद्वा-पद्ममयो गर्भो यस्येति स 'पद्मगर्भः'। आसर्गात् सर्गान्तं यावदुत्पद्यमाना सृष्टिर्नूनं जलमपेक्षते जलयोनित्वात्तस्याः। प्रत्यक्षं च लोके पश्यामः,जरायुणावृतं जलं भवति। तस्मिन् जनिष्यमाणो परिपुष्टतामुपयाति।

गर्भः—गृ निगरणे, तुदादेर्धातोरुणादिसूत्रेण ***'अर्तिगृभ्यां भन्'*** (उ० ३।१५२) इति भन्-प्रत्यये सिद्ध्यति। ***'यदा हि स्त्री गुणान् गृह्णाति गुणाश्चास्या गृह्यन्तेऽथ गर्भो भवति'।*** निरुक्ते १०।३३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।।

ऋग् १० ।१२१ ।१।।

अत इदमुच्यते पद्मगर्भस्तद् ब्रह्म विष्णुपर्यायः।

वक्ष्यति चाग्रेऽष्टाचत्वारिंशदुत्तरं त्रिशततमं (३४८) नामैकपंचाशत्तमे श्लोके।

भवति चात्रास्माकम्—

यथा जले पद्म जनिं दधाति
तथैव भूर्यात्युदयं जलेऽत्र ।
तत् पद्म नाभौ निहितं हि यस्य
स 'पद्मनाभो'ऽस्त्यमरोऽत्र विष्णुः।।६५।।

अर्थान्तरेण 'पद्मगर्भः'।

भवति चात्रास्माकम्—

यथा जले पद्म जनिं बिभर्त्ति
तथैव भूर्वारिणि याति पुष्टिम् ।
हिरण्यगर्भः स यथैक एव
स पद्मगर्भोऽपि तथैव विष्णुः।।६६।।

अमरप्रभुः—४६

न म्रियत इत्यमरः। तेषाममराणां प्रभुः प्रकर्षेण भावयिता बलस्य प्रदाता वा स 'अमरप्रभुः'।

मन्त्रलिङ्गञ्च—

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः।
यस्य छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम।।

ऋग् १० ।१२१ ।२; अथर्व० ४ ।२ ।१, १३ ।३ ।२४; यजुः० २५ ।१३; तै० सं० ४ ।१ ।८ ।४; ७ ।५ ।१७ ।१।

अमरपर्याया यथा—

अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः।
सुपर्वाणः सुमनसस्त्रिदिवेशाः दिवौकसः ।। (अमर० १ ।७)।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

न जन्म गृह्णाति न मृत्युमेति
यः सोऽमराणां कुरुते प्रभुत्वम् ।
प्रभुत्वभावञ्च व्रजन्ति ते य
उपासते विष्णुमथामरेशम् ।।६७।।

विश्वकर्मा—५०

कर्म=कृ—धातोः मनिन् प्रत्ययः। ***सर्वधातुभ्यो मनिन्*** (इत्युणादि ४।१४५ सूत्रम्)। क्रियते तत् 'कर्म' क्रिया वा। ***अर्द्धर्चादित्वाद्*** (पा० २।४।३१) उभयलिंगः 'कर्मन्' शब्दः। कर्मन्-शब्दस्याऽर्द्धर्चादिगणे पठितत्वादुभयलिङ्गः। कर्म कुर्वन्तं न पश्यामि, कर्माणं कुर्वन्तं न पश्यामीत्युभयं साधु। विश्वं कर्म क्रिया यस्य स 'विश्वकर्मा' महादेवो नियन्ताऽजरोऽमरश्च।

मन्त्रलिङ्गञ्च—

विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत संदृक् ।
तेषामिष्टानि समिषा मदन्ति यत्रा सप्त ऋषीन् पर एकमाहुः।।

ऋग्० १०।८२।२।।

भवति चात्रास्माकम्—

स विश्वकर्मा कुरुते ह विश्वं
विचित्रवीर्यं विविधप्रकारम् ।
न तत्कृतौ दोषलवोऽपि भाति
स विश्वकर्मा कथितोऽत्र विष्णुः।।६८।।

मनुः—५१

'मन ज्ञाने' दैवादिको, 'मनु अवबोधने' तौदादिकः', आभ्याम्-उः, निच्च सः।

सूत्रम्—***शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च'*** (उणादिः १।१०) मन्यते सर्वाणि विश्वानि भुवनानि जानातीति 'मनुः'। मनुतेऽवबुध्यते इति वा 'मनुः' मननाद्वा 'मनुः'—**'नान्योऽतोऽस्ति मन्ता'** (बृ० उ० ३।७।२३) इति । मन्त्रो वा प्रजापतिर्वा मनुः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

लोकानिमाँल्लोकपतिर्मनीषी
दर्धर्त्यशेषान् मनुते तथा सः ।
न तत्कृतौ दोषलवप्रसक्ति-
र्मन्ता मनुर्यो मननीय एकः ।।६६।।

त्वष्टा—५२

त्वक्षतेस्तनूकरणार्थात् 'तृच्' प्रत्ययः। यथा हि निर्माता किंचित् हसति किंचिच्चापाकरोति किंचिच्चोपदेग्धि, अमुथैव धातापि तनूकरोति लोकान्, निर्माणोपसंहारं कुरुतेऽत'स्त्वष्टा' इत्युच्यते।

मन्त्रलिङ्गञ्च—

विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु।
आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते।।

अथर्व० ५।२५।४।।

त्वष्टा रूपाणि हि प्रभुः ऋग्० १।१८८।६।। एवं बहुत्र।

भवतश्चात्रास्माकम्—

त्वष्टा यथा तक्षति काष्ठमात्रं
रूपस्य संभारविधौ प्रवृत्तः ।
तथैव त्वष्टा स्वविधानबद्धो
गर्भे स्थितं त्वक्षति देहमात्रम् ।।७०।।

ऊर्वोर्यथा दीर्घमुतापि बल्यं
तन्वस्थि चाक्ष्णोरुत नासिकायाम्।
स्फिङ्मांसमात्रस्तनुमांसनासा
त्वष्टा स्वयं त्वक्षति सर्वलोकान्।।७१।।

वक्तव्यम्—भगवान् हि स्वयं स्वकीयेन विधानेन बद्धः सन् तक्षक इव त्वक्षति गर्भे प्राणिनो देहमात्रं पुष्णन्। तद्यथा—ऊर्वस्थि दीर्घं बल्यं दृढं च परन्तु नेत्रास्थीनि लघूनि तथैव च नासास्थीनि। एवं स्फिचौ मांसलौ परन्तु नासा त्वङ्मात्रमांसा, अमुथैवांगुल्यश्च। यो हि मनुष्यो यन्त्राणामाविष्कारं कर्त्तुमना स्यात्, तेन विदुषा सर्वकालं सूक्ष्मेक्षिकया जीवानां रचना किंवा वृक्षाणां रचना,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पर्वतानां रचना, स्रोतसां च रचना, सूर्यस्य च कालभेदकरणभेदाः, ऋतूनां च सुकृत-विकृत-भावो नूनं परिज्ञेयः, एतदेव हि त्वष्टुर्विष्णो रूपम्।

स्थविष्ठः—५३

अतिशयेन स्थूलः=स्थविष्ठः। स्थूल-शब्दस्य इष्ठन्, इमनिच्, ईयसुन्, इत्येतेषु प्रत्ययेषु परतः यणादिपरं लुप्यते पूर्वस्य च गुणो भवति, तेन 'स्थविष्ठः' इति रूपं संपद्यते। सूत्रं च— ***'स्थूल-दूर-युव-ह्रस्व-क्षिप्र-क्षुद्राणां यणादिपरं पूर्वस्य च गुणः'*** (पा० ६।४।१५६)। यथाप्रत्ययं रूपाणि—स्थविष्ठः, स्थवीयान्।

भवति चात्रास्माकम्—

यद् दृश्यशक्तेरपरं परं वा
ज्ञानेन यज्ज्ञातुमिहास्ति शक्यम्।
सोऽयं स्थविष्ठो ह्रसतेऽत्र सर्वं
न तत्परः स्थूलतमोऽस्ति कश्चित्।।७२।।

मन्त्रलिङ्गञ्च—

ईशावास्यमिदं सर्वं यत् किञ्चिज्जगत्यां जगत्। यजु० ४०।१।।

स्थविरो ध्रुवः—५४

सविशेषणमिदं विष्णोर्नाम। पृथक् चापि वा, ध्रुवस्य प्रयोगदर्शनात्। पुराणः 'स्थविरः'। स्थविर-शब्दो निपात्यते किरच्प्रत्ययान्तः— ***'अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराः'*** (उणा० १।५३)। तिष्ठतेर्वुगागमो ह्रस्वत्वं च निपात्यते। स्थविरः— गमनेऽसमर्थत्वात् तिष्ठतीति 'स्थविरः'।

'ध्रु स्थैर्ये' तस्मात् बाहुलकाद् 'व' प्रत्ययः किच्च सः, ***'स्रु वः कः'*** (उणा० २।६१) इत्यत्र सूत्रे निःक्षिपन्ति। अथवा—***'ध्रुवमपायेऽपादानम्'*** इति (पा० १।४।२४) निपातनाद्वा साधुः। स्थविरश्चासौ ध्रुवश्चेति 'स्थविरो ध्रुवः' स सर्वव्यापको विष्णुरिति। गत्यर्थरहिताभ्यां ष्ठाध्रु-धातुभ्यां निष्पन्नं विशेष्यविशेषणेन युक्तमेतन्नाम भगवति सर्वथा गतिं निवारयति, सर्वत्र च तस्य सत्तां हठाद् द्योतयति।

मन्त्रलिङ्गञ्च—

उग्रा त इन्द्र स्थविरस्य बाहू। अथर्व १६।१५।४।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ।। यजु० ४० ।५ ।।

ध्रुवमधिकृत्य मन्त्रलिङ्गञ्च–

ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासो पर्वता इमे ।
ध्रुवं विश्वमिदं जगद् ध्रुवो राजा विशामयम् ।। ऋग्० १० ।१७३ ।४ ।।

एवं बहुत्र वेदे।

भवति चात्रास्माकम्–

न तद्विधं दृष्टमिहास्ति लोके
ध्रुवं च तत् स्यात् स्थविरं तथैव।
स एव विष्णुः स्थविरो ध्रुवश्च
सोऽन्तर्बहिश्चास्ति च वर्त्तमानः ।।७३ ।।

त्वैकं ह्यस्य स्थविरस्य नाम बह्वृचाः।

❖ ❖ ❖

अग्राह्यः शाश्वतः कृष्णो, लोहिताक्षः प्रतर्दनः।
प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम् ।।२० ।।

५५ अग्राह्यः, ५६ शाश्वतः, ५७ कृष्णः, ५८ लोहिताक्षः, ५९ प्रतर्दनः। ६० प्रभूतः, ६१ त्रिककुब्धाम, ६२ पवित्रम्, ६३ मङ्गलं परम् ।।२० ।।

अग्राह्यः–५५

कर्मेन्द्रियैर्न गृह्यते इति-'अग्राह्यः'। अथवा-इन्द्रियैर्ग्रहीतुमशक्य इति-'अग्राह्यः'। **'यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह'** (तै० उ० २ ।६) **'यत्तददृश्यमग्राह्यमगोत्रमवर्णमचक्षुः श्रोत०'** (मुण्डक १ ।१ ।५-६)

भवति चात्रास्माकम्–

अशब्दमस्पर्शमरूपमव्ययं
तथारसं नित्यमगंधवच्च यत् ।
कथं भवेत् तद्विषयोऽत्र खानां
सर्वत्र सोऽग्राह्यपदोऽस्ति विष्णुः ।।७४ ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शाश्वतः—५६

'शश्वत्' सदार्थेऽव्ययम्। यथा—**शश्वद् धर्मोऽनुष्ठेयः सत्यं चाभ्यवहार्यम्।'** पुनरर्थे चापि 'शश्वत्'—'**शश्वद् वेदमधीयीत।'**

मन्त्रलिङ्गञ्च—

याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः (यजुः ४०।८)।

स्वार्थेऽण् शाश्वतः, ङीपा च शाश्वती।

भवति चात्रास्माकम्—

शश्वत् सदार्थे, स हि शाश्वतोऽणा
कालो भिनत्त्येव न तं कदाचित्।
तं शाश्वतं सर्वजनैकवन्द्यं
विपश्चितं विष्णुमुपैति विज्ञः ।।७५।।

कृष्णः—५७

'कृषेर्वर्णे' (उणा० ३।४) इत्यनेन विलेखनार्थात् कृषेर्वर्णेऽर्थे नक्प्रत्यये 'कृष्णः' इति निष्पद्यते। विष्णुपरा निरुक्तिर्महाभारते—

कृषिर्भूवाचकः शब्दो णश्च निर्वृत्तिवाचकः।
विष्णुस्तद्भावयोगाच्च कृष्णो भवतीति शाश्वतः।।

महा० उद्यो० ७०।५।।

इत्यनेन व्यासवचनेन सच्चिदानन्दात्मकः शाश्वतो विष्णुः कृष्णनामा। नात्रार्जुनसारथिर्महाभारतप्रसिद्धः कृष्णोऽभिमतः। कृष्णवर्णात्मकत्वाद्वा 'कृष्णः' निरुक्तिर्यथा महाभारते—

कृष्णामि पृथिवीं पार्थ! भूत्वा कार्ष्णायसो हलः।
कृष्णो वर्णश्च मे यस्मात् तस्मात् कृष्णोऽहमर्जुन ।।

शान्तिपर्वणि ३४२।७६।।

इत्यनेन विज्ञाप्यते यत् हले फालरूपो स एव विष्णुः पृथिवीं बीजधारणक्षमां कुरुते, स च तस्य सनातनः क्रमः। लोहस्य कृष्णरूपत्वाच्च तत्र कृष्णतापि संयुज्यत एव।

मन्त्रलिङ्गञ्च—

ब्रह्मा कृष्णश्च नोऽवतु नामेऽग्नये यजु० २३।१३।।

कृष्णोऽस्याखरेष्ठः यजु० २।१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बाहुलकाद् वर्णेऽपि कृषेर्नक्प्रत्यये 'कृष्णः' इति विष्णुनामनि संगन्तव्यम्। कृष्णवर्णे हलफाले चापि संगन्तव्यम्। कृष्णो यज्ञः, यज्ञ इति च विष्णोर्नामसु सप्तदशोत्तरैकशततमे ११७ श्लोके एकसप्तत्युत्तरं नवशततमं ९७१ नाम। तस्मात् कृष्णो विष्णुरित्युक्तं भवति। न हि विष्णुं विना यज्ञस्य सार्थकता भवति। यज्ञप्रक्रियायां सर्वे मन्त्रा विनियोगमाप्नुवन्ति ब्रह्मणि च। तस्मात् कृष्णो यज्ञः सन्नपि विष्णुरित्युक्तं भवतीति दिक्।

भवति चात्रास्माकम्—

कृष्णो हि यज्ञः स च विष्णुनामा
वेदाश्च विष्णोर्गरिमाणमाहुः ।
हलस्य फालेऽपि च कृष्णशब्दो
विश्वम्भरस्तेन स उक्त आस्ते।।७६।।

लोहिताक्षः—५८

लोहिते आक्षिणी यस्येति स 'लोहिताक्षः'। 'असौ वृषभो लोहिताक्षः' इति। मन्युना च यथा लोके लोहितेऽक्षिणी भवतो विषेण वा। उक्तं च—**'मन्युरसि मन्युं मयि धेहि'** (यजु० १९।९) इति। यद्वा—उद्यन्तौ सूर्याचन्द्रमसौ लोहितावेव भवतः, तावक्षिणी यस्य स 'लोहिताक्षः'।

मन्त्रलिङ्गञ्च—

यस्य सूर्यश्चक्षुश्चन्द्रमाश्च पुनर्णवः ।
अग्निं यश्चक्र आस्यं तस्मै ज्येष्ठाय ब्रह्मणे नमः। अथर्व० १०।७।३३।।

भवति चात्रास्माकम्—

यद्वर्चसो रूपमिहास्ति सूर्ये
चन्द्रेऽथवा तेन स लोहिताक्षः।
चन्द्रार्कतो मूलमुपेत्य मर्त्यो
पित्तेन रक्तेन च लोहिताक्षः।।७७।।

पित्तप्रकोपजन्यरक्तदोषे मर्त्यो लोहितनेत्रो भवति। श्लेष्मा च प्रकुप्य रक्तं सन्दूष्य श्लेष्मावृतं रक्तं वा लोहितनेत्रतां जनयतीत्यायुराम्नायविदां समयः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रतर्दनः—५९

प्र पूर्वात् 'तृदि हिंसायाम्' धातोर्ल्युटि 'प्रतर्दनः' संपद्यते। प्रलये भूतानि प्रतर्दयति हिनस्तीति 'प्रतर्दनः' स विष्णुः।

भवति चात्रास्माकम्—

वधे प्रवृत्तो वधको यथात्र
नृशंसभावं न जहाति कामम् ।
प्रतर्दनो विष्णुरिहापि तद्वत्
मृतौ स्थितं मुंचति नैव मन्त्रैः ।।७८।।

उक्तं च प्रकारान्तरेणास्मत्कृते सत्याग्रहनीतिकाव्ये चतुर्थाध्याये नानावर्षगणीये प्रथमे पादे चतुष्षष्टितमे श्लोके—

मृत्योर्मनो यत्र नरे निविष्टं, स तं विना नास्तमभिप्रयाति।
न मन्त्रपाठान् न च दानयज्ञान्, शृणोति गृहणाति यियासुरस्तम्[१] ।।

प्रभूतः—६०

प्रभूत-शब्दो बहुपर्यायः। स विष्णुः स्वस्मिन् ज्ञानबलक्रियाभिः सम्पन्नः सन् 'प्रभूतः' उच्यते। कुतः? न तत्परः कोऽपि कविर्न मेधया धीरतरोऽन्यः कश्चिदस्ति।

मन्त्रलिङ्गञ्च—

न त्वदन्यः कवितरो न मेधया धीरतरो वरुण स्वधावन् ।
त्वं ता विश्वा भुवनानि वेत्थ स चिन्नु त्वज्जनो मायी बिभाय।।

अथर्व० ५।११।४।।

सत्यमहं गभीरः काव्येन सत्यं जातेनास्मि जातवेदाः ।
न मे दासो नार्यो महित्वा व्रतं मीमाय यदहं धरिष्ये ।।

अथर्व० ५।११।३।।

सबलेनापि प्रभूतः पूर्ण इति। मन्त्रलिङ्गञ्च—

त्वमिन्द्र बलादधि सहसो जाता ओजसः।
त्वं वृषन् वृषेदसि।। ऋग्० १०।१५३।२।।

१. अस्तम्=गृहम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न स क्रियायामन्यमपेक्षते प्रभूतत्वात्।

मन्त्रलिङ्गञ्च—

न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत् प्रकेतः।
आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किंचनास ॥

ऋग्० १० ।१२६ ।२॥

स पूर्णत्वात् प्रभूतः। मन्त्रलिङ्गञ्च—

पूर्णात् पूर्णमुदचति पूर्णं पूर्णेन सिच्यते ।
उतो तदद्य विद्याम यतस्तत् परिषिच्यते॥ अथर्व० १० ।८ ।२६॥

भवति चात्रास्माकम्—

प्रभूतमात्रः स विभुः पुराण-
स्तस्मान्न तत्कर्मणि चाल्पतास्ति।
बहुः स्वयं सन् न सहायमीर्ते
जगच्च संख्यामतिविर्ततेऽतः ॥७६॥

त्रिककुब्धाम—६१

ककुबिति दिङ्नाम, ऊर्ध्वाधोतिर्यग्भेदेन तिसृणां ककुभां धामेति त्रिककुब्धाम, एतेन नाम्ना दिशामपि तदन्तर्भावो विज्ञापितो भवति। दिशां दशत्वं लोकप्रसिद्धं सदपि तिसृणां निर्देशेन त्रिपर्वता विज्ञापिता भवति। यथा मनुष्य ऊर्ध्वमधस्तिर्यक् च पश्यति। स्वाभिमुखा दिक् स्वयमप्रयत्नसिद्धैव। धाम=स्थानमाश्रयो वा।

मन्त्रलिङ्गञ्च—

दिशो यश्चक्रे प्रज्ञानीस्तस्मै ज्येष्ठाय ब्रह्मणे नमः। अथर्व० १० ।७ ।३४॥

भवति चात्रास्माकम्—

स एव त्रिककुब्धाम, दिशस्तिस्रः समश्नुते ।
दिशश्चापि विलीयन्ते, नान्तं यान्ति च ता विभोः॥८०॥

पवित्रम्—६२

पवित्रम्—'पूङ् पवने' भौवादिकः, 'पूञ् पवने' क्रैयादिकः, आभ्यां ***'कर्तरि चर्षिदेवतयोः'*** (पा० ३ ।२ ।१८६) इत्यनेन करणे कर्त्तरि च इत्रप्रत्ययो भवति, ऋषौ देवतायां च यथासंख्यम्, करणे ऋषौ, देवतायां च कर्त्तरि। पूयतेऽनेनेति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'पवित्रो' ऽयमृषिः। देवतायाम्—पवते पुनाति या सा देवता 'पवित्रम्'। देवतानां च दैवतमित्युक्तत्वात्। तलन्तत्वाच्च देवताशब्दो नारीलिंगे वर्तमानः सन्नपि देव एव स्वार्थिकतद्धितप्रत्ययस्य सद्भावाद् दैवतमिति। **'अग्निः पवित्रं स मा पुनातु,' 'वायुः सोमः सूर्य इन्द्रः पवित्रं ते मा पुनन्तु'** इत्यादि।

मन्त्रलिङ्गञ्च—

पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः ।
अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहन्तस्तत् समाशत।।

ऋग्० ६।८३।१।।

भवतश्चात्रास्माकम्—

अग्निस्तथा वायुरुतापि दर्भः
सूर्योऽथ चन्द्रश्च पवित्रवर्गः ।
पुनाति सर्वं स पवित्रनामा
पवित्रता विष्णुवशाद्धि लोके ।।८१।।

खिदन्ति कार्यं परितश्च रोगा
दोषाश्च देहं परिदूषयन्ति ।
तं दोषदूष्यं पवते पवित्रं
विष्णुः स्वयं नामसहस्रजापात्।।८२।।

उक्तं च चरके—

विष्णुं सहस्रमूर्द्धानं, चराचरपतिं विभुम्।
स्तुवन्नामसहस्रेण, ज्वरान् सर्वानपोहति।।

चरके चिकित्सास्थाने अ० ३।३११ तथा च ३१२।।

सहस्रमूर्द्धानम्=**'सहस्रशीर्षा पुरुषः'** इत्यादि पुरुषसूक्तोक्तम्। सर्वान् ज्वरान् शमयति। स्तुवन्नामसहस्रेणेति यदुक्तं तत् प्रत्यक्षतो व्याख्यायमानमवगन्तव्यम्। ऋषिर्वेदः, पूयतेऽनेनेति पवित्रं वेदः, मन्त्रो वा।

उक्तं च—

जपहोमप्रदानेन वेदानां श्रवणेन च।
ज्वराद्विमुच्यते शीघ्रं साधूनां दर्शनेन च।।

च० चि० स्था० ३।३१४।।

एतन्महाभारतोक्तं विष्णुसहस्रनामात्मकं स्तोत्रं वेदोक्तनाम्नामेवाधिक्येन

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संग्रहाद् वेदवदेवेति कृत्वा सर्वविधज्वरविमोचने क्षमं भवति। दैवव्यपाश्रयचिकित्सायामेतदन्तर्भवति। उक्तं च माहात्म्यवर्णने—

रोगार्त्तो मुच्यते रोगाद्, बद्धो मुच्येत बन्धनात्।
भयान् मुच्येत भीतस्तु, मुच्येतापन्न आपदः ॥

वि० स० श्लोक १२८॥

मङ्गलं परम्—६३

मङ्गलम्—मगिधातुर्गतावर्थे, तस्मात् ***'मंगेरलच्'*** (उणा० ५।७०) इत्यनेनालच् प्रत्ययात् 'मङ्गल' शब्दो निष्पद्यते। मङ्गयति प्रापयति सुखं भद्रं कल्याणं यशो वा तन्मङ्गलम् प्रशस्तम्, मङ्गलग्रहाधिष्ठितो वारो वा। मङ्गलस्य भावो वा माङ्गल्यम्।

मन्त्रलिङ्गञ्च—

नमः शंकराय च मयस्कराय नमः शिवाय च शिवतराय च॥

यजु० १६।४१॥

परम्—उत्कृष्टम्। मङ्गलवर्गो निदर्शनमात्रमुक्तो **'मङ्गलानां च मङ्गलम्'** (वि० स० श्लो० १०) व्याख्यानावसरे तत्र द्रष्टव्यम्। एतेन विज्ञाप्यते मङ्गलशकुनान्येकतः स्युर्ब्रह्मनिष्ठश्चैकतः स्यात् समाने काल एव च मङ्गलविहन्तृशकुनानि हततेजसानि भवन्ति यदि ब्रह्मनिष्ठो दृश्यते, प्रत्यक्षं वा समुपतिष्ठेदिति।

भवन्ति चात्रास्माकम्—

लुब्धस्य रुष्टस्य बुभुक्षितस्य
मनोजवेगेन परिप्लुतस्य ।
मानादिदोषैर्विहतस्य चापि
प्रज्ञापराधो विकरोति चित्तम् ॥८३॥

खिन्नोऽथ दीनोऽथ भयं गतो वा
श्रिया विहीनो किमु कान्तया वा ।
मर्त्यो ह्यभद्राणि सदा चिनोति
दोषा मतिं तस्य विकुर्वतेऽतः ॥८४॥

एवंविधोऽप्यस्तमतिर्मनुष्यो
जपन् स्तुवन् मङ्गलमेकचित्तः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तन्मङ्गलं ब्रह्म तमुच्चिनोति
साध्व्या, धिया चोत्क्रमते सदा सः।।८५।।

मङ्गलं परमित्येकं नाम सविशेषणम्।

❖ ❖ ❖

ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ।।२१।।

६४ ईशानः, ६५ प्राणदः, ६६ प्राणः, ६७ ज्येष्ठः, ६८ श्रेष्ठः, ६६ प्रजापतिः।
७० हिरण्यगर्भः, ७१ भूगर्भः, ७२ माधवः, ७३ मधुसूदनः।।२१।।

ईशानः—६४

सर्वं जगदीष्ट ऐश्वर्यभावायानयतीति 'ईशानः'। मन्त्रलिङ्गञ्च—

तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम्।

यजु० २५।१८।।

भवति चात्रास्माकम्—

ईशानमेनं कवयः पुराणा-
श्चराचरस्याधिपतिं ब्रुवन्ति ।
तमाह्वयन्ते स हि सर्वशास्ता
स एव रक्षां कुरुते विपत्सु।।८६।।

प्राणदः—६५

प्रपूर्वात् 'अन प्राणने' धातोः करणे ***'हलश्च'*** (पा० ३।३।१२१) सूत्रेण 'घञ्—प्रत्यये 'प्राणः' शब्दः सिध्यति। प्राण्यतेऽनेनेति 'प्राणः'। शरीरकर्मसाधनीभूतेषु पंच वायुष्वेको वायुः प्राणसंज्ञकः। तत्र—

प्राणः संज्ञावाहिनीनां, मूले मूर्द्धन्यवस्थितः ।
सूक्ष्मरूपो बुद्धिचित्तेन्द्रियाणां स हि साधकः।।
हृदादीनामिन्द्रियाणामभिप्रेतार्थ-साधने ।
प्रमुखः प्रेरकश्चायं, ततः प्राण इति स्मृतः ।। शरीरतत्त्वदर्शनात्।।

प्राणान् धारयितुं शक्तिर्यद्व्यवस्थया व्यवतिष्ठते, स प्राणान् ददातीति सन्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'प्राणदः' उच्यते। मन्त्रलिङ्गञ्च—

प्राणदा अपानदा व्यानदा वर्चोदा वरिवोदाः ।
अन्यांस्त अस्मत्तपन्तु हेतयः अस्मभ्य॑ँ शिवो भव।। यजुः १७।१५।।
यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम।।
ऋग्० १०।१२१।३; अथर्व० ४।२।२; यजु० २३।३, २५।११।।

को ह्येवान्यात् कः प्राण्यात्। तै० उ० २।७।।

यद्वा—दो अवखण्डने दैवादिकाद् धातोः प्राणान् द्यति कालात्मनावखण्डयतीति 'प्राणदः'। शनैः शनैः कालेन क्षीयमाणाः प्राणाः प्राणिनं मृत्युमुख उपढौकयन्ति। मन्त्रलिङ्गञ्च—

प्राणो मृत्युः प्राणस्तक्मा। अथर्व ११।४।११।।

तक्मा ज्वरो रोगो वा।

यद्वा—प्राणान् दापयति शोधयतीति 'प्राणदः', 'दैप्' शोधने भौवादिकः प्राणविद्याविदस्य* चिरमभ्यस्यतो योगिनः प्राणाः शुद्ध्यन्ति। उक्तं च—**'प्राणो ह सर्वस्येश्वरः'।** अथर्व० ११।४।१०।।

दाप् लवने अदादिः। प्रणान् दाति लुनातीति वा 'प्राणदः' कालो हि क्रमशः प्रणान् क्षिणुवन् मृत्युमुखमानयतीति 'प्राणदः' कालः सः। ***'कालः सर्वस्येश्वरः'*** अथर्व० (१६।५३।८)।

सारांशतः—तद्व्यवस्थयैव गर्भे प्राणिनं प्राणा निबध्नन्ति तद्व्यवस्थैव च याथार्थ्येन भोगान् भोजयित्वा प्राणिनं प्राणा विमुञ्चन्तीति कृत्वा सर्वदैव श्वासानुश्वासं 'प्राणद' एव ध्येयः स्मरणीयश्चेति।

भवति चात्रास्मकम्—

प्राणान् ददाति, किमु वा द्यति, दाति किं वा
प्राणान् विशोधयति, दापयतीति किं वा।
सर्वत्र सर्वविधिना स हि विष्णुरेको
यः प्राणदोऽस्ति कथितः श्रुतिभिः पुराणः ।।८७।।

प्राणः—६६

प्राण—शब्दो व्याख्यातचरः 'प्राणदः' दति नामव्याख्यानावसरे। मन्त्रलिंग च—

* इगुपधज्ञाप्रीकिरः कः (आ० ३।१।१३५) इति विद्धातोः कः प्रत्ययः=विदः, ततः षष्ठी।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्राणाय नमो यस्य सर्वमिदं वशे।
यो भूतः सर्वस्येश्वरो यस्मिन्त्सर्वं प्रतिष्ठितम्।। अथर्व० ११।४।१।।

प्राणस्य विशिष्टां व्यापकतां परिज्ञातुमथर्ववेदस्यैकादशे काण्डे चतुर्थं सूक्तं पठनीयम्। तत् सर्वमेव चराचरे प्राणस्य विविधरूपतां दर्शयति। प्राणस्य माहात्म्यं पाठं तस्यैव प्राणरूपस्य सर्वेश्वरस्य 'प्राण' इति नाम हठादाविर्भवति।

स एक एव 'अन प्राणने' धातुरुपसर्गभेदेन प्राणं पंचधा विशिनष्टि। तद्यथा– प्राणः, उदानः, समानः अपानः, व्यान इति। पंच च पुनः पृथक् क्रियाज्ञानसौलभ्यमधिकृत्य तद्यथा– नागः, कूर्मः, कृकलः, देवदत्तः, धनञ्जय इति। एतेनैतज्ज्ञातव्यं यत् सत्यमाचरतो मनुष्यस्यैते पञ्च प्राणा यथान्यायं साधुकर्माणि कुर्वन्तो जीवयन्ति, सा सद्बुद्धिस्तस्यैव जप-दान होमादिभिरुदीर्यते। प्राणो हि चराचरमधितिष्ठति।

मन्त्रलिङ्गञ्च–

प्राणापानौ व्रीहियवावनड्वान् प्राण उच्यते।
यवे ह प्राण आहितोऽपानो व्रीहिरुच्यते ।।
अपानति प्राणति पुरुषो गर्भे अन्तरा ।
यदा त्वं प्राण जिन्वस्यथ स जायते पुनः ।। अथर्व ११।४।१३, १४।।

भवति चात्रास्माकम्–

प्राणं जगत् प्राणिति तत्प्रणुन्नः
प्राणः स उक्तः स शिवः स विष्णुः।
प्राणेन विश्वं परितोऽस्ति गुप्तं
प्राणं विना नात्र विभाति किंचित् ।।८८।।

ज्येष्ठः–६७

'शंसु स्तुतौ' भौवादिकः। प्रशंसितुमर्हः प्रशस्यः। तस्य प्रशस्य-शब्दस्याजाद्योः प्रत्यययोः परतो 'ज्य' इत्ययमादेशो भवति। सर्व इमे प्रशस्या अयमतिशयेन प्रशस्यः='ज्येष्ठः'। सूत्रं यथा–***'ज्य च'*** (पा० ५।३।६१) तथा च ***'वृद्धस्य च'*** (पा० ५।३।६२) इत्यनेन वृद्ध-शब्दस्य 'ज्य' आदेशः क्रियते, अजाद्योः प्रत्यययोः परतः। सर्व इमे वृद्धा अयमतिशयेन वृद्धः='ज्येष्ठः'। अत्र 'इष्ठन्' प्रत्ययोऽजादिः।

न हि तस्मात् सकलेश्वरादधिकः कश्चित् प्रशंसितुमर्हः, तस्मात् स 'ज्येष्ठः'। न च तस्मात् वृद्धतमो कश्चिदिति कृत्वा वा स 'ज्येष्ठः' उक्तो भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

यो भूतं च भव्यं च सर्वं यश्चाधितिष्ठति ।
स्वर्यस्य च केवलं तस्मै ज्येष्ठाय ब्रह्मणे नमः।। अथर्व १० ।८ ।१।।
यतः सूर्य उदेत्यस्तं यत्र च गच्छति ।
तदेव मन्येऽहं ज्येष्ठं तदु नात्येति किंचन।। अथर्व १० ।८ ।१६।।

भवति चात्रास्माकम्—

सूर्यं प्रशंसन्ति नमन्ति लोकाः
सूर्योऽपि लोकं भ्रमयत्यशेषम् ।
न सोऽपि तत्पारमवैत्यनल्पो
ज्येष्ठात् परं ज्येष्ठमिहास्ति नान्यत् ।।८९।।

श्रेष्ठः—६८

प्रशस्य-शब्दस्य ***'प्रशस्यस्य श्रः'*** (पा० ५ ।३ ।६०) इत्यनेनाजाद्योः प्रत्यययोः परतः 'श्र' इत्ययमादेशो भवति। इष्ठनीयसुनौ चाजादी प्रत्ययौ, तत्रायमिष्ठनि प्रत्यये 'श्रेष्ठः' इति रूपम्। सर्व इमे प्रशस्या अयमेषामतिशयेन प्रशस्यः='श्रेष्ठः'।

मन्त्रलिङ्गञ्च—

श्रेष्ठं यविष्ठमतिथिं स्वाहुतं जुष्टं जनाय दाशुषे।
देव अच्छा यातवे जातवेदसमग्निमीळे व्युष्टिषु ।।
ऋग्० १ ।४४ ।४।।

ब्रह्मणि सर्वे मन्त्रा विनियोगमापद्यन्ते, इति कृत्वा श्रेष्ठमत्र विशेषणं बहुविधविशेषणयुक्तस्याग्नेः।

भवति चात्रास्माकम्—

तस्मात् परः श्रेष्ठतमो न कश्चित्
तमो न तस्मिन् न रजोऽस्ति तस्मिन्।
वेदे स उक्तस्तमसः परस्तात्
श्रेष्ठः स विष्णुर्भुवि कीर्त्तनीयः ।।९०।।

अत्र—श्रेष्ठतम इति, अतिशयद्योतकः। यथा यजुर्वेदेऽपि—***'श्रेष्ठतमाय कर्मणे'*** १।१।। इत्यादि।

उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम्।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ।।यजु० २७ ।१०।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रजापतिः—६६

पा रक्षणे अदादिः, तस्मात् ***'पातेर्डतिः'*** (उ० ४।५७।।) इत्यनेन सूत्रेण डतिप्रत्यये 'पतिः' शब्दो निष्पद्यते। पाति रक्षतीति पतिः। प्रजानां पतिः='प्रजापतिः'। वक्ष्यति चाग्रे विश्वरेता इति नाम, श्लोके त्रयोविंशतितमे।

अत्राखिले ब्रह्माण्डे यत् किंचिज्ज्ञानतोऽवगन्तुमर्हमस्ति, यद्वा मनुष्यज्ञानेन पर्यवेष्टुमपि न शक्यमस्ति, तस्य सर्वस्य रेतो बीजरूपं सत् प्रजाः पाति रक्षति। यथा पिता पुत्रं रक्षति, यन्त्रस्याविष्कर्त्ता तमाविष्कारं रक्षति, योऽयं रक्ष्य-रक्षकधर्मो लोके दृश्यते स तस्य एव प्रजापतेर्गुणानुसरणमात्रमेवास्ति।

स एव सर्वबीजगोप्ता तस्मात् प्रजाः प्रजायन्ते, स एव च रक्षति, तस्मात् स विष्णुरेव प्रजापतिरुच्यते।

मन्त्रलिङ्गञ्च—

यस्माज्जातं न पुरा किंचनैव य आबभूव भुवनानि विश्वा ।
प्रजापतिः प्रजया सꣳरराणस्त्रीणि ज्योतींषि सचते स षोडशी।।

यजु० ३२।५।।

अन्यच्च—

तस्माद्यज्ञात् सर्वहुतः संभृतं पृषदाज्यम् ।
पशूंस्तांश्चक्रे वायव्यानारण्या ग्राम्याश्च ये।। यजु० ३१।६।।

पश्यतिमात्रधर्मत्वात् मनुष्यशिशुरपि पशुरेव भवति। मन्त्रलिंगं च—

वितिष्ठन्तां मातुरस्या उपस्थान्नानारूपाः पशवो जायमानाः।

अथर्व० १४।२।२५।।

प्रजापतिः स सर्वव्यापको विष्णुः। मन्त्रलिङ्गञ्च—

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्।।

अथर्व० ७।७६।४; यजु० १०।२०; ऋग् १०।१२१।१०।।

भवति चात्रास्माकम्—

स विश्वरेताः सकलं प्रसूते
स्वाभाविकज्ञानबलक्रियाभिः ।
स्वभावतः पाति जगत् समग्रं
प्रजापतिः सोऽभिहितोऽस्ति विष्णुः।।६१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हिरण्यगर्भः—७०

हिरण्यम्—'हर्य' गतिकान्त्योः भौवादिकः। तस्मात् ***'हर्यतेः कन्यन् हिर् च'*** (उ० ५।४४) इत्यनेन हर्यतेः कन्यन्प्रत्ययः, प्रत्ययेन साकं 'हिर्' च धातोः स्थान आदेशो भवति। हर्यति द्रवतां प्राप्य गच्छतीति 'हिरण्यम्' सुवर्णं वा। हर्यते काम्यते जनैरिति 'हिरण्यम्' ह्रियते जनाज्जनं क्रियासिद्ध्यर्थं प्राप्यत इति 'हिरण्यम्'। हिरण्यं गर्भे यस्य स 'हिरण्यगर्भः'=सर्वव्यापको ब्रह्म विष्णुरिति विविधनामगम्यः।

मन्त्रलिङ्गञ्च—

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।।
अथर्व० ४।२।७; ऋग्० १०।१२।१; यजुः० १३।४; २३।१; २५।१०; निरुक्ते १०।२३।।

वक्तव्यम्—तेजोरूपाणां सूर्यादीनामप्यसावेव ग्रहीतास्तीति कृत्वा हिरण्यार्थिनापि नानाविधमग्नेर्भेदप्रभेदपरिज्ञानं कुर्वता स एव 'हिरण्यगर्भः' स्तूयते, इति मत्वा नानाविधा अग्निसम्बधिन्यो विद्या आविष्करणीयाः।

हिरण्यगर्भेण भगवतात्मस्वरूपं परिज्ञापयिता सकलस्य प्राणिवर्गस्यान्तः पित्तरूपेणाग्निः स्थापितोऽस्ति। व्यपगतेऽग्नौ प्राणी म्रियते। अर्थात् हिरण्यगर्भेण स परित्यज्यते; तस्मात् शरीरवह्ने रक्षणमपि हिरण्यगर्भस्य पूजैवेति मन्तव्यम्। तेजोवत्सु यत् तेजस्तदपि तस्यैवेति न्यायमनुसरताग्नौ यत् तेजस्तदेव पक्तृ। एतमेवार्थं रूपान्तरेण गीतायामाह योगिराजः कृष्णोऽपि। तद्यथा—

यदादित्यगतं तेजो, जगद् भासयतेऽखिलम्।
यच्चन्द्रमसि यच्चाग्नौ, तत् तेजो विद्धि मामकम्।।
गामाविश्य च भूतानि, धारयाम्यहमोजसा।
पुष्णामि चौषधीः सर्वा; सोमो भूत्वा रसात्मकः।।
अहं वैश्वानरो भूत्वा, प्राणिनां देहमाश्रितः।
प्राणापानसमायुक्तः, पचाम्यन्नं चतुर्विधम्।।
अ० १५ श्लोक १२, १३, १४।।

भवति चात्रास्माकम्—

हिरण्यगर्भः स विभुः स विष्णु-
स्तेनैव देहो विहितोऽग्निगर्भः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वत्र रूपं निजकं विभाव्य
सोऽन्तर्दधे विश्वमिदं यथाण्डे।।६२।।

भूगर्भः—७१

'भू सत्तायाम्' भौवादिकः, तस्मात् क्विपि प्रत्यये-'भूः' शब्दो निष्पद्यते। भवन्त्यस्यामिति 'भूः' पृथिवी प्रथतेर्विस्तारकर्मणः। मन्त्रलिंगं च—

मा नो हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा जजान।
यश्चापचन्द्रा बृहतीर्जजान कस्मै देवाय हविषा विधेम ।।

ऋग् १० ।१२१ ।६ ।।

एतेन भूगर्भेण नाम्ना ज्ञाप्यते यद् यद्यस्यां भवति सा जायमानस्य भूरपि तेन परात् परेण ब्रह्मणा धृतास्ति। तद्यथा जायमानं तन्माता गर्भेऽन्तर्दधाति, परन्तु सा भूरूपा मातापि तस्य विष्णोर्गर्भ एवास्ते। तां जननीं पृथिवीं स्वाश्रयात्मके गर्भ आदधाति। सा भुवोऽपरपर्याया पृथिवी च तस्य गर्भेऽस्तीति कृत्वा स 'भूगर्भ' उक्तो भवति। उक्तं च—

प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते ।
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा।।

यजु० ३१ ।१६ ।।

अन्यच्च—

अपानति प्राणति पुरुषो गर्भे अन्तरा ।
यदा त्वं प्राण जिन्वस्यथ स जायते पुनः।।

अथर्व० ११ ।४ ।१४ ।।

'प्राणः' स विष्णु': पूर्वं व्याख्यातः।

सारांशः—यद् यदाश्रित्य भवति तस्याधारस्यापि स एवाधारभूतः सन् 'भूगर्भः' इति पदेन व्याख्यातो भवति।

भवति चात्रास्माकम्—

चतुर्विधा सृष्टिरियं विचित्रा
यामाश्रयीकृत्य जनिं दधाति ।
सा भूः समग्रस्य चराचरस्य
भूगर्भसंज्ञस्य च गर्भ आस्ते।।६३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

माधवः—७२

'मा'—शब्दो लक्ष्मीपर्यायः। धवः स्वामी पतिर्वा। मायाः=लक्ष्म्या धवः माधवः। मन्त्रलिङ्गञ्च—

अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि संजयामि शश्वतः ।
मां हवन्ते पितरं न जन्तवोऽहं दाशुषे विभजामि भोजनम्।।

ऋग् १० ।४८ ।१।।

यद्वा—'मन ज्ञाने' दैवादिकः' तस्मादौणादिक 'उः' प्रत्ययो धकारश्चान्तादेशः'। सूत्रं यथा—***'फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च'*** (उणा० १।१८) मन्यते तदतिशयेनेति 'मधुः' पण्डितो मधुर्वा।

यद्वा—***'मनेर्धश्छन्दसि'*** (उणा० २।११६) इत्यनेन मन ज्ञाने दैवादिकः, मनु अवबोधने तौदादिकः, मनधातोश्छन्दसि 'उसि' प्रत्ययो धकारश्चान्तादेशः। मन्यते मनुते वा 'मधुः' पवित्रम् सर्वविधमनन्तकर्त्ता प्राज्ञः। मन्यन्ते विशेषेण ज्ञायन्ते यस्मिन् स 'मधु'श्चैत्रो मासः। ***'मधुश्च माधवश्च वासन्तिकावृतू'*** (यजु० १३।२५)। मधुः=जीवनीयरसो वा। मन्त्रलिंगं च—

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः।
माध्वीर्नः सन्त्वौषधीः।। यजु० १३।२७।।
माध्वीर्गावो भवन्तु नः। यजु० १३।२६।।

इत्यादि स्वयमुन्नेयं ज्ञानविज्ञानजिज्ञासुना।

शिशिरर्तौ वातशीताभ्यां संघातभावमापन्नाः पार्थिवा आप्या रसाश्चैत्रे मासि सूर्यस्य प्रखरकिरणैर्द्रवतामापन्ना नानाविधा वनस्पतयः पुष्प्यन्ति। कुसुमानां च विविधता दृग्गोचरमापन्ना तस्यैव विविधविज्ञानवतो विष्णोः कर्म विज्ञानं वा दर्शयति, विविधरूपवर्णाऽऽकारेषु सत्स्वपि पुष्पेषु यो मनोहरो गुणः स तस्यैव सर्वप्रियस्य विष्णोः।

एतेन माधवनाम्ना विज्ञाप्यते यत् सर्वत्र सरसप्रकृतिमत्स्वपि तस्यैव व्यापकतास्तीति कृत्वा मर्त्येन नूनं सरसेन सर्वविधगम्येन च भवितव्यम्। कुसुमानां विद्या 'मधुविद्या'। एतेन सर्वर्तुषु सर्वभूमौ च समुद्भवितुमर्हाणां पुष्पाणां ग्रहणं भवति। भिन्नो भिन्नो हि ऋतुसंचारो भवति देशभेदेन कालभेदेन च। परन्तु तस्मिन् व्यापके विष्णौ कालेन देशेन दिशा च भेदो न भवतीति कृत्वा 'माधवः' स सर्ववित् सर्वज्ञानी सर्वस्य विधाता विष्णुरिति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

स एव पूर्व्यो भुवि माधवोऽस्ति
तमेव नाथन्ति[1] जना जनेशम् ।
स सर्ववित् पुष्पविधानविज्ञो
नानाविधां ज्ञापयते तनूं स्वाम् ।।६४।।

स्वाभाविकज्ञानबलक्रियाभिः
पुष्णाति पुष्पाणि पृथग् रसैः सः ।
स एव दुग्धे रसमादधाति
स माधवो वर्षति वारिवाहैः ।।६५।।

स माधवो रूपमनिन्द्यमित्वा
कवौ स्वयं तिष्ठति काव्यरूपः ।
तं माधवं स्तौति जगत् समग्रं
स दाशुषे यच्छति भोजनानि ।।६६।।

मौनेन, ध्यानेन योगेन च यो ज्ञातुमर्हः स 'माधवः'। व्यासवचनं यथा—

मौनाद् ध्यानाच्च योगाच्च विद्धि भारत माधवम् ।

महा० उद्योगपर्व ७० ।४ ।।

अत्र या व्यासेन निरुक्तिः प्रदर्शिता सा नित्ये ब्रह्मण्येव संगच्छते। तस्य ब्रह्मणो विविधाः कृतयो याभिर्विचित्रं जगद् भाति। ताः काश्चन मौनमालम्ब्य ज्ञातुमर्हाः सन्ति, काश्चन च ध्यानेन, काश्चन च मौनध्यानयोर्योगेन।

अक्षरवर्णमधिकृत्य कृतं निर्वचनं नित्यस्य भवति न तु विनाशवतः। मधौ चैत्रे मासि मधुमक्षिकाभिर्हृतः पुष्परसोऽपि 'मधु'—संज्ञां लभते। तच्च पुनः पुष्पमात्रादाकृष्टं सर्वर्तुषु भवं चापि 'मधु'—संज्ञां लभत एव। पुष्पेभ्यो बाहुल्यादासुतो रसोऽपि मधुसंज्ञां लभते मद्यगुणः। पुष्पाण्यपि च मदयन्ति मूर्च्छयन्ति च। तद्विद्याविदोऽपि, 'माधवः'। एवं माधवेन भगवता सर्वत्र रसमधिकृत्यात्मविभूतयो वितानिताः सन्तीति सर्वैर्ज्ञेयम्।

---

१. नाथन्ति याचन्त इत्यर्थः। अत्र नाथधातोराशिष्येवात्मनेपदत्वं व्यवस्थितम्। **'अशिषि नाथः'** वार्त्तिकम् (सूत्रे १।३।२१)।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मधुसूदनः—७३

'मधु'=कर्णमलम्। तत्कर्णमलमधिकृत्य जातोऽपि मधुः। श्रुतिरिति नाम कर्णस्य वेदस्य च समानम्। तस्मात् श्रुतेरपचित्या निन्दया, वेदाज्ञापरित्यागेन स्वेछाचार-व्यवहारेण शरीरपोषणमात्रपरोऽसुरः। स हि सर्वदा-असुषु प्राणेषु रमत इति कृत्वासुरः। सारार्थतो यो ही श्रुतिपर्यायं ब्रह्मान्यथा चरति स 'मधुः'। तस्य सूदनकर्त्ता मधुसूदनः रक्षःसूदनात्मकं कर्म कर्त्तुमुपदिशति वेद ईश्वरः।

मन्त्रलिङ्गञ्च—

प्रत्युष्ट ᳪ रक्षः[1] प्रत्युष्टा अरातयो[2] निष्टप्त ᳪ रक्षो निष्टप्ता अरातयः। उर्वन्तरिक्षमन्वेमि।। यजु० १।७।।

यद्वा—मधुनामानमसुरं सूदितवानिति मधुसूदनः। मधुसूदनमधिकृत्य महाभारते—

कर्णमिश्रोद्भवं चापि मधुनाममहासुरम्।
ब्रह्मणोऽपचितिं कुर्वन् जघान पुरुषोत्तमः।।
तस्य तात वधादेव देवदानवमानवाः।
मधुसूदन इत्याहुर्ऋषयश्च जनार्दनम् ।। भीष्म पर्व ६७।४४,१६।।

कर्णमिश्रोद्भवम्=कर्णमलोद्भवम्।

भवन्ति चात्रास्माकम्—

दुष्टस्वभावो वपुषोऽर्थदर्शी[3]
स्वैरो[4] जनो वेदविरुद्धवादी।
रक्षः स उक्तो मधुसंज्ञको वा
तं हन्ति विष्णुर्मधुसूदनोऽतः ।।६७।।

न हस्तपादैरुत वा शरेण
स हन्ति विष्णुर्वत मेधया तम्।
पृथक् करोत्येव स निम्नदर्शी
स्वकैर्विकारैर्वधमेति भूयः ।।६८।।

---

१. रक्षः=दुष्टस्वभावो मनुष्यः। असुषु रमणाद् रक्षः स्वार्थी। २. अरातयो दानधर्मरहिताः। उष दाहे भौवादिकः प्रत्युष्ट-शब्दे। तप सन्तापे भौवादिकस्तस्य प्रयोगो 'निष्टप्ते' शब्दे। एवं बहुत्र वेदे। ३. वपुषोऽर्थदर्शी=इन्द्रियार्थसक्तः ४. स्वैरः स्वेच्छाचारी।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सदैव रूपं मधुसूदनस्य
प्रजा-विनाशाय रुषानुविद्धम्।
निरीक्ष्यते चातिजलप्रपाते
रोगानिले वा [1]हतभिक्षमात्रे ।।६६।।

❖ ❖ ❖

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः।
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ।।२२।।

७४. ईश्वरः, ७५. विक्रमी, ७६. धन्वी, ७७. मेधावी, ७८. विक्रमः, ७६. क्रमः।
८०. अनुत्तमः, ८१. दुराधर्षः, ८२. कृतज्ञः, ८३. कृतिः, ८४. आत्मवान्।।२२।।

ईश्वरः—७४

'ईश ऐश्वर्ये' आदादिकः, तस्मात् ***'स्थेशभासपिसकसो वरच्'*** (पा० ३।२।१७५) इत्यनेन तच्छीलादिषु कर्तृषु 'वरच्' प्रत्यये 'ईश्वरः' शब्दो निष्पद्यते। स्वभावेन विश्वानि भुवनानि ईष्टे तस्मादीश्वरः।

मन्त्रलिङ्गञ्च—

य ईशे अस्य द्विपदश्चतुष्पदः । ऋग्० १०।१२१।३।।
प्राणाय नमो यस्य सर्वमिदं वशे।
यो भूतः सर्वस्येश्वरो यस्मिन्त्सर्वं प्रतिष्ठितम्।
अथर्व० ११।४।१।।

भवति चात्रास्माकम्—

ऐश्वर्यभावेन जगत् समग्र-
मीष्टे स्वभावादत ईश्वरः सः।
सर्वं समावास्य[2] स विष्णुरास्ते
तस्मिन्[3] ह तस्थुर्भुवनानि विश्वा।।१००।।

---

१. हतभिक्षो दुर्भिक्षः। २. समावास्य=एकीभावेन समन्तात् सर्वं जगदुषित्वा। ३. तस्मिन्नित्यादि मन्त्रलिंगम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विक्रमी—७५

विक्रमणं 'विक्रमः'। क्रमणं क्रमः, विशिष्टं क्रमणमस्यास्तीति 'विक्रमी'। मन्त्रलिङ्गञ्च—

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्।
समूढमस्य पांसुरे ।। ऋग् १।२२।१७।।

यद्वा—विक्रमः शौर्यम्, तद्योगाद् 'विक्रमी'। वक्तव्यम्—यस्मिन् यावान् विक्रम उत्तरोत्तरं प्रकाशते, तस्मिन् तावानेव विक्रमरूपः प्रभुः स्वेन ज्योतिषा विक्रमयति तम्। मन्त्रलिङ्गञ्च—

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे।
पृथिव्याः सप्त धामभिः।। ऋग्० १।१२।२६।।

यतः सामर्थ्यात् स विष्णुः सर्वत्र व्यापकः सप्तविधलोकान् धामानि वा, सप्तविधगायत्र्यादिच्छन्दोभिर्वेदान्, षड्जादिभेदेन सप्त स्वरांश्च विचक्रमे विशेषेण विक्रमेण रचितवान् रचयति वा, तेन विक्रमेण हे देवा विद्वांसः! यूयमस्मान् अवत रक्षत।

भवति चात्रास्माकम्—

स विक्रमी विष्णुरनन्तवीर्य-
श्छन्दांसि वेदानुत वा स्वरांश्च ।
लोकान् समग्रान् कुरुते यतो ह
पृथक् पृथक् सोऽर्हतमोऽस्ति नान्यः।।१०१।।

धन्वी—७६

धनुरस्यास्तीति 'धन्वी'। धनुष्-शब्दस्य व्रीह्यादिगणे सद्भावाद् ***'व्रीह्यादिभ्यश्च'*** (पा० ५।२।११६) सूत्रेण 'इनि' प्रत्ययः। धन धान्ये जौहोत्यादिकः' तस्माद् 'उसिः' प्रत्ययो निच्च सः, तेन 'धनुः'। सूत्रम्— ***'अर्तिपृवपियजिधनितनितापिभ्यो नित्'*** (उ० २।११७) उसिरित्यनुवर्तते। दधति धनादिकं प्राप्नुवन्ति येन तद् 'धनुः' शरासनम्। ***'भृमृशीङ्तृचरित्सरितनिधनिमिमस्जिभ्य उः'*** (उ० १।७) इत्यनेन 'उ' प्रत्ययान्तो वा 'धनुः'। धन्यते धनं प्राप्यतेऽनेनेति 'धनुः' शास्त्रं धनुर्वेद इति प्रसिद्धम्, शस्त्रं वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

नमस्त आयुधायानातताय धृष्णवे ।
उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने।। यजुः १६।१४।।

भवति चात्रास्माकम्—

स एव धन्वी, स बलिष्ठबाहु-
र्निहन्ति दुष्टान् धनुषा रुषाक्तः ।
तस्मै नमः स्यादुत तस्य दोर्भ्यां
प्रीतः स विष्णुः परिपातु चास्मान्।।१०२।।

मेधावी—७७

मतौ धीयत इति 'मेधा', सास्यास्तीति 'मेधावी'। यद्वा=अस्य विष्णोर्मतौ ज्ञाने सकलं चराचरं धृतमस्ति, किं भुक्तं भूतकालान्तर्गतं किं वा भोग्यं भविष्यत्यागन्तुमर्हं जगत्, तस्मात् स 'मेधावी'। मेधा-शब्दात् मतुबर्थे ***'अस्मायामेधास्रजो विनिः'*** (पा० ५।२।१२१) सूत्रेण 'विनिः' प्रत्ययः।

मन्त्रलिङ्गञ्च—

न त्वदन्यः कवितरो न मेधया धीरतो वरुण[1] स्वधावन्।
अथर्व० ५।३।११।।

भवति चात्रास्माकम्—

आसूक्ष्मकीटादुत हस्तिगात्रं
जलेऽन्तरिक्षेऽपि सृतं च यद् यत्।
मतौ धृतं तस्य जगत् समस्तं
मेधाव्यतोऽसौ कथितोऽत्र विष्णुः।।१०३।।

विक्रमः—७८

विचक्रमे जगत् तेन स 'विक्रमः'।

मन्त्रलिङ्गञ्च—

---

१. यस्माद् वरितुमर्हस्तस्मात् स वरुणः। वार्यन्ते दुर्मनांसि तदुपासनया तस्माद् 'वरुणो' विष्णुरिति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः।
ततो विश्वं व्यक्रामत् साशनानशने अभि ।। यजु० ३१।४।।

भवति चात्रास्माकम्—

भूराद्यमेकं पदमस्य भूम्नो
भुवर्द्वितीयं स्वरथो तृतीयम् ।
तुरीयपादेन च विक्रमोऽयं
कृताकृतं पश्यति लोकवृत्तम्[1] ।।१०४।।

क्रमः—७६

क्रमणं 'क्रमः'। 'क्रमु पादविक्षेपे' भौवादिकः' तस्मात् ***'हलश्च'*** (पा० ३।३।१२१) सूत्रेण 'घञ्' प्रत्ययः। क्रम्यतेऽनेनेति 'क्रमः'। क्रमन्त्यस्मिन्निति वा 'क्रमः'। ***'नोदात्तोपदेशस्य मान्तस्यानाचमेः'*** (पा० ७।३।३४) इति सूत्रेण वृद्धेर्निषेधः।

यात्र लोके पादे चरणापरपर्याये गमनशक्तिः सा तस्मादेव ब्रह्मण आयातेति। यस्मिन् वा क्रमन्ति गतिं कुर्वन्ति, तदाधारभूतमपि तदेव ब्रह्म। सर्वत्र व्यापकत्वात् विष्णुः स 'क्रमः'। स 'क्रमो' नाम भगवान् क्रमयति जगत्, स्वयं न क्रमति सर्वत्र विद्यमानत्वात्।

मन्त्रलिङ्गञ्च—

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।।

यजुः ४०।५।।

तस्य विष्णोरन्तर्बहिश्च सद्भावात् तस्मिन् विष्णौ गतेः स्थानात् स्थानान्तरप्राप्तेरप्रयोजनकत्वात् तद् ब्रह्म जगदेजयति। णिजर्थगर्भोऽत्र ज्ञेयः। तद् ब्रह्म स विष्णुर्वा स्वयं न एजतीति निर्देशात्, शेषं निगद एव सुस्पष्टम्।

सारांशोऽयम्—यस्मिन् यावान् मनोहरः पादविक्षेपोऽस्ति, तस्मिन् तावानेव तस्य विष्णोः स्वरूपता प्रत्यक्षतो दृष्टिपथमागच्छति। यावान् विकलांगवर्गः स तस्य 'क्रम' नामवतो विष्णोः कोपभाजनः। अर्थात् स 'क्रम' नामाभिधशक्तिधारी

---

१. लोकवृत्तम्=लोके यद् भवति तत्। एतेन 'विक्रम' नाम्ना विज्ञाप्यते यत् सर्वं चराचरं तेनैव विक्रान्तमस्ति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भगवान् प्रत्यक्षं व्यञ्जयन्तस्वात्मानं जनं जनं विज्ञापयति-यद् यो हि पद्भ्यामभद्रमाचरति तं तमहं परित्यजामि। तत् क्रियाकरणक्षममङ्गममुथा दण्डयामि, व्यवस्थापनाय सत्याचारे जगतः। सर्वत्रैवमूहनीयम्।

यावद्विधः क्रमो गमो वा जगति प्राणिषु वातयोगेन स्थावरेषु वा दृश्यते तावद्विधः तस्यैव शक्तिरूपेण गतौ स्थितस्य तत्स्वरूपम्। यन्त्रादीनामाविष्कर्त्रा नूनं सूक्ष्मेक्षिकया प्राणिनां गतयः परिशीलनीयाः। कुतः? न हि तस्य विष्णोः कृतिषु न्यूनतास्तीति कृत्वा।

भवति चात्रास्माकम्

क्रमः स विष्णुः क्रमते स्वयं नो
विक्रम्यते तेन चराचरञ्च ।
निजं स्वरूपं प्रथते जगत्यां
सोऽन्तर्बहिश्चास्ति न याति तस्मात्।।१०५।।

'क्रान्ते विष्णुम्' (मनु० १२।१।१)। पादशक्तौ विष्णो रूपं चिन्तयेत्

तमीडत प्रथमं यज्ञसाधं विश आरीराहुतमृञ्जसानम् ।
ऊर्जः पुत्रं भरतं सृप्रदानुं देवा अग्निं धारयन् द्रविणोदाम्।।

ऋग् १।९६।३

अत्र मन्त्रे 'सृप्रदानुम्' इति पदेन सर्वस्य जगतो गतेः प्रदातृत्वमुक्तं, तच्चाग्नेर्विशेषणम्। अग्निरिति च विष्णोर्नाम, तस्मात् 'क्रमः'। एवं बहुत्रोहनीयम्।

अनुत्तमः—८०

अविद्यमान उत्तमो यस्मात् स 'अनुत्तमः'।

मन्त्रलिङ्गञ्च—

यस्मान्न जातः परो अन्यो अस्ति य आविवेश भुवनानि विश्वा।
प्रजापतिः प्रजया संरराणस्त्रीणि ज्योतींषि सचते स षोडशी ।।

यजुः ८।३६।।

यस्मात् परः उत्तम उत्कृष्टो न जातः, नैव चास्ति। स कोऽस्तीति विशिनष्टि—यः सर्वाणि भुवनानि व्याप्तवानस्ति। स च पुनः कः? प्रजापतिः स विष्णुः, तस्य सर्वत्र व्याप्तत्वात्।

तथा च —सर्वोत्तमत्वात् तस्य, स 'ऊर्ध्वः' इत्यनेन संबोधनेन च संकीर्त्तितोऽस्ति। यथा—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ऊर्ध्वो नः पाह्यंहसो नि केतुना विश्वं समत्रिणं[1] दह।
कृधी न ऊर्ध्वाञ्चरथाय जीवसे विदा देवेषु नो दुवः।।

ऋग्० १।३६।१४।।

'उत्तमः'=उद्गततम इति वा, उच्चैर्गततम इति वा। दृश्यते च लोक उत्तमाय उच्चैरुत्कृष्टं पदं स्थानमत एव दीयते तस्मिन् उच्चैर्गततमार्थस्यान्तर्निहितत्वात्।

भवति चात्रास्माकम्—

न तेन कश्चित्सम उत्तमो वा
मर्त्यस्ततो ज्ञानबलक्रियाभिः।
सोऽनुत्तमो वेदवचोभिरुक्तो
सर्वातिशायी जगदन्तरात्मा।।१०६।।

लोकालोकप्रमिते विश्वमात्रे प्रभुणा यद्यथाविधं निर्मितम्, न तस्य कस्यचिन्मर्त्यस्य कर्तुः कृतिः समापि नाम, उत्तमता त्वशक्यसम्भावना। एवं सोऽ'नुत्तम' नामा विष्णुः सर्वत्र जागतवस्तुषु स्वोत्तमत्वगुणं विज्ञापयन् सुखयति सर्वेषां मनांसि। तथा च वेदे—

न त्वदन्यः कवितरो न मेधया धीरतरो वरुण स्वधावन्।

अथर्व० ५।११।५।।

दुराधर्षः—८१

दुष्टान् आ समन्ताद् धर्षयतीति 'दुराधर्षः' धृष प्रसहने चौरादिकः। यद्वा—दैत्यादिभिर्धर्षयितुं न शक्य इति 'दुराधर्षः'।

मन्त्रलिङ्गञ्च—

त्वमस्य पारे रजसो व्योमनः स्वभूत्योजा अवसे धृषन्मनः।
चकृषे भूमिं प्रतिमानमोजसोऽपः[2] स्वः परिभूरेष्या दिवम् ।।

ऋग्० १।५२।१२।।

दुष्टानां मनो धर्षयन् अवसे रक्षसि, त्वमित्यनेन स परिभूः विष्णुरभिप्रेतोऽस्ति। सर्वत्र व्यापकोऽस्तीति सारांशः।

---

१. अत्त्रिणम्=अत्ति भक्षयत्यन्यायेन परपदार्थमिति-अत्त्रिः शत्रुः, तम्। निपाहि, संदह, इत्युपसर्गयोजना। २. अपः=अन्तरिक्षम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दुष्टानां निग्रहाय स एव साधुजनानां हृदये स्वौजसा बलमादधाति।

भवति चात्रास्माकम्—

दुराधर्षः स विष्णुर्नः, पाति रक्षांसि धर्षयन्।
कुरुते चाखिलं विश्वं, भूत्वा सर्वत्रभूः स्वयम्।।१०७।।

कृतज्ञः—८२

कृतं जानातीति कृतज्ञः। ***'इगुपधज्ञाप्रीकिरः कः'*** (पा० ३।१।१३५) इत्यनेन 'कः' प्रत्ययः। तेन विष्णुना भगवता यद् यद् रचितं, यत्र यत्र च यद् यद् येन गुणधर्मेण व्यवस्थापितं तत् तत् सर्वं जानातीति 'कृतज्ञः'। न हि भगवान् स्वात्मकृतं परकृतं च विस्मरतीति कृत्वा स 'कृतज्ञः' उच्यते।

यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा।
यो देवानां नामधा एक एव त ँ संप्रश्नं भुवना यन्त्यन्या ।।

यजुः १७।२७।।

भवति चात्रास्माकम्—

स्मृतौ हि कर्त्ता निदधाति तद्व्रतम्[1]
कृतज्ञ उक्तः स हि सर्व-धामवित्।
स एव संज्ञां कुरुते पृथक् पृथक्
क्रियाकलापस्य च सिद्धिसाधनः ।।१०८।।

कृतिः—८३

'डुकृञ् करणे' तनादिकः' तस्माद् भावे ***'स्त्रियां क्तिन्'*** (पा० ३।३।९४) इत्यनेन सूत्रेण 'क्तिन्' प्रत्यये 'कृतिः'—शब्दः सिद्ध्यति। करणं 'कृति'रिति।

यावत् करणात्मकं कर्म कृतिः क्रिया वा जगति बोभूयमाना दृश्यते, सा सर्वा तस्मादेव 'कृतिः'-नामवतो विष्णोः सकाशादेव। यो हि मनुष्यो भगवतो विष्णोः कृतिं चतुर्विधसृष्टेः निर्माणात्मिकामर्थात् गर्भाधानस्यादिमात् क्षणादारभ्य प्रसवान्तं

१. तद्व्रतम्—यस्य विष्णोः सर्वविधलोकरचनात्मकं कर्म चतुर्विधसृष्टेः पोषणात्मकं च कर्म।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सम्यग् जानाति। स एव सत्यरूपेण शास्त्रनिर्माणमुत यन्त्राणामाविष्कारं च कर्तुं क्षमो भवति।—

मन्त्रलिङ्गञ्च—

प्रजापतिश्चरति गर्भे[1] अन्तरजायमानो बहुधा विजायते ।
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा।।

यजुः ३१।१६।।

भवति चात्रास्माकम्—

सर्वाः क्रिया लोकभवा हि या या-
स्तासां स एवास्ति कृतिर्महौजाः।
कर्त्ता क्रिया कापि न तं विनास्ति
विष्णोः कृतिं गर्भविदो विदन्ति ।।१०६।।

आत्मवान्—८४

परस्य सहायमनपेक्ष्यैव स्वसत्तया प्रतिष्ठित इति कृत्वा स 'आत्मवान्' विष्णुरुच्यते।

मन्त्रलिङ्गञ्च—

महस्ते सतो[2] महिमा पनस्यते। अथर्व० २०।५८।३।।

असि सत्य! ईशानकृत्। अथर्व० २०।१०४।४।।

हे ईशानकृत्! त्वं सत्यः सत्यरूपेणासि।

सर्वा दिशः पुरुष आबभूव। अथर्व १०।२।१८।।

सर्वासु दिक्षु स पुरुषः स्वसत्तया व्याप्तोऽस्ति।

भवति चात्रास्माकम्—

स 'आत्मवान्' राजति सत्त्वसंस्थो
नापेक्षतेऽन्यं स्वविधौ स्वकस्थः ।
तेनैव हेतोः सकलास्य सृष्टिः
स्वयं स्थिता राजति चात्मसंस्था।।११०।।

---

१. गर्भे चरति=तन्निर्माणाय क्रियामाचरति। तस्य गर्भस्य जातौ तस्य विष्णोर्योनिमर्थात् कारणरूपं ब्रह्मैवेति, धीराः=ध्यानवन्तः पश्यन्ति जानन्ति, नान्ये स्थूलदृश इति भावः।
२. सतः=स्वसत्तया वर्त्तमानस्येति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इयं चतुर्विधा सृष्टिस्तस्यात्मवतोर्विष्णोरात्मवन्तं गुणं दधती पृथक् पृथक् स्वसत्तया विलसति। तद्यथा=न हि गच्छन् पुरुषोऽन्यमपेक्षते, न तरुः स्वस्थितौ रज्जोर्बन्धमपेक्षते, न च पक्षी स्वोड्डयनक्रियायामन्यमपेक्षते, न च स्वेदजाः स्वसद्भावायान्यमपेक्षन्त इति कृत्वा स 'आत्मवान्' विष्णुः स्वेन ज्योतिषा सर्वत्रात्मानं प्रकाशयन् सर्वं जगदात्मनि पूर्णतया स्थापितवानित्येष तस्य महामहिमवतो महिमास्ति, यं धीरा पश्यन्तः सुखयन्त्यात्मानं ते चात्मवन्तो ब्रह्मभूयायाहर्निशं प्रयतन्ते।

❖ ❖ ❖

सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः।
अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः ।।२३।।

८५ सुरेशः, ८६ शरणम्, ८७ शर्म, ८८ विश्वरेताः, ८९ प्रजाभवः।
९० अहः, ९१ संवत्सरः, ९२ व्यालः, ९३ प्रत्ययः, ९४ सर्वदर्शनः ।।२३।।

सुरेशः—८५

सुराणां देवानामीशः 'सुरेशः' देवानां देवो वा।
मन्त्रलिङ्गञ्च—

[१]देवो देवानामसि मित्रो अद्भुतो वसुर्वसूनामसि चारुरध्वरे।
शर्मन्त्स्याम तव सप्रथस्तमेऽग्ने सख्ये मा रिषामा वयं तव।।

ऋग्० १।९४।१३।।

यद्वा—सु-उपसर्गपूर्वात् रातेर्दानार्थाद्धातोः क्विपि 'सुरः'— शोभनदानमित्यर्थः, तद्येषु ते 'सुराः' तेषां सुराणां—सुदातॄणामीशः 'सुरेशः'।

यस्मिन् यावान् विष्णोः सुरेशगुणात्मकोंऽशो भवति, तावानेव तस्मिन् मनुष्ये देवगुणोदयाद् देवत्वमुत्पद्यते दानवीरत्वं च।

---

१. **'देवो देवानामसि'** इत्यनेन ऋगंशेन तस्य महेशस्य सुरेशत्वं देवदेवत्वं वा ज्ञापितं भवति। अत्राग्निनाम्ना स संबोधितो भगवान् 'देवो देवानामसि' इत्युक्तम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

नूनं सुरेशः कुरुते मनुष्यं
देवं वयस्येषु च सुश्रुवांसम्[1]*।*
दातृत्वशक्तिं निदधाति तस्मिन्
स एव दाताक्षयमाप्रदाता[2] *।।१११।।*

शरणम्—८६

'शृ हिंसायाम्' क्रैय्यादिकः, तस्मात् **'ल्युट् च'** (पा० ३।३।११५) सूत्रेण 'ल्युट्' प्रत्ययः नपुंसकलिंगे भावे। 'शरणं'=हिंसनम्। यस्माद् ब्रह्म स्वयं शुद्धमस्ति, तस्मात् 'शरणं' तत्, दुरितस्य हिंसनमिति कृत्वा।

यद्वा—**'करणाधिकरणयोश्च'** (पा० ३।३।११७) इति सूत्रेण करणेऽधिकरणे च 'ल्युट्' प्रत्ययः। शीर्यते हिंस्यतेऽनेनेति='शरणम्' ब्रह्म शृणन्त्यस्मिन्निति 'शरणम्'=ब्रह्म। ब्रह्मोपासकस्य जन्मजन्मान्तराध्युषितानि च दुर्मनांसि तेन विष्णुना शरणनामवता शीर्यन्ते तेन स शरणोपासको भक्तः स्वयं शुद्धः सन् ब्रह्मभूयाय कल्पते।

यद्वा—शृणन्ति तदुपासकाः स्वानि दुर्मनांसि तस्मिन् ब्रह्मणि ध्यानेन निमग्नाः तस्मात् 'शरणम्' ब्रह्म विष्णुरित्युक्तं भवति।

मन्त्रलिङ्गञ्च—

य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः।
यस्य छायामृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम ।।

ऋग्० १०।१२१।२; अथर्व० ४।२।१,१३-३-२४; यजु० २५।१३।।

यस्य छाया शरणममृतम्, तद्विमुखता च मृत्युरिति भावार्थः। स कीदृश इति ? य आत्मदा बलदेत्यादिना तस्य विशेषशक्तिमत्त्वमुक्तं भवति।

भवतश्चात्रास्माकम्—

नूनं जनस्तच्छरणं[3] *प्रपन्नो*
हिनस्ति जन्मान्तरदुर्विपाकान् ।
शनैः शनैस्तज्जपदानयोगा-
च्छायामृतं तस्य, सुखं तदुक्तम्।।११२।।

१. सुश्रुवांसम्=सत्कीर्तियुक्तम्। २. अक्षयमाप्रदाता=अक्षयाया माया लक्ष्म्याः प्रकृष्टो दाता स एव विष्णुः। ३. तस्य शरणं तच्छरणम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यथा धनेशं कृपणः प्रपद्य
शनैः शनैरात्मनि याति तृप्तिम्।
तथा जनस्तच्छरणं[1] प्रपद्य
हिनस्ति दुर्भावचयाननन्तान् ।।११३।।

शर्म—८७

'शृ हिंसायाम्' क्रैयादिकः, तस्मात् ***'सर्वधातुभ्यो मनिन्'*** (उ० ४।१४५) सूत्रेण 'मनिन्' प्रत्ययं कृत्वा 'शर्म' साध्यते। शृणाति दुःखमिति 'शर्म' सुखम् ब्रह्म, विष्णुः गृहं वा। यदवाञ्छ्यं हिनस्ति शृणाति तद् ब्रह्म। जन्म-मृत्यु-जराव्याधयो मर्त्यं क्लिश्नन्ति, तस्य शर्मणः सख्यमुपगतस्य जन्ममृत्युजराव्याधयो नश्यन्ति। स्वयं च तस्य शुद्धबुद्धमुक्तस्वभावत्वात् क्लेशकर्मविपाकाशयैरपरामृष्टत्वात् सुखस्वरूपत्वाच्च।

मन्त्रलिङ्गञ्च—

देवो देवानामसि मित्रो अद्भुतो वसुर्वसूनामसि चारुरध्वरे।
शर्मन्त्स्याम तव सप्रथस्तमेऽग्ने सख्ये मा रिषामा वयं तव।।

ऋग्० १।६४।१३।।

अत्र शर्मन्-इति पदेन स एव सुखस्वरूपः संबोधितोऽस्तीति ज्ञातव्यम्। 'सुरेशः' ८५ पंचाशीतितमे नामव्याख्याने च व्याख्यातचरोऽयं मन्त्रः।

भवति चात्रास्माकम्—

स शर्म विष्णुर्न जरामुपैति
न चान्यदुःखोदयकर्तृबन्धान् ।
तच्छर्म तस्मात् कुरुते स्वभक्तं
दुःखैर्विमुक्तं निजसख्ययुक्तम्।।११४।।

विश्वरेताः—८८

विश्वस्य सकलस्य रेतः='विश्वरेताः'। रेतो बीजम्-'रीङ्' प्रस्रवणे, स्रवणेऽपि दैवादिकः, तस्मात् ***'स्रुरीभ्यां तुट् च'*** (उ० ४।१०२) सूत्रेण 'असुन्' प्रत्ययस्तुट् चागमः। रीयत इति रेतः=शुक्रम्। 'विश्वरेताः' विश्वस्य सकलस्य

१. तस्य शरणं तच्छरणम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चतुर्विधसृष्टेर्बीजभूतः, सकलब्रह्माण्डस्य च स एव कारणभूत इति वा। पुरुषस्य रेतसि बीजस्य सद्भावो भवति। परस्परं मैथुनीयन्त्यौ स्त्रियौ मांसपिण्डमात्रजनने समर्थे भवतः, न तु जीवेन युक्तं जातकमिति ।

स्त्रीपुरुषयोर्या प्रजननात्मिका शक्तिस्तत्रोभयत्र रेतःशब्दः प्रयुक्तो वेदे—

सं पितरावृत्वियें सृजेथां माता च रेतसो भवाथः ।
मर्य इव योषामधि रोहयैनां प्रजां कृण्वाथामिह पुष्यतं रयिम्।।

अथर्व० १४।२।३७।।

तथा च —**'सह रेतो दधावहै।'** भगवति सर्वव्यापके विष्णौ मातुः शक्तेरुत च पितुः शक्तेः सद्भावात् **'त्वं हि नः पिता वसो त्वं माता शतक्रतो'।** ऋग्० ५।६८।११, अथर्व० २०।१०८।२।। इत्यादिमन्त्रोक्तं संगच्छते।

लोकेऽपि च पश्यामः—सर्वकेण समानश्चतुर्विध आहार उपयुज्यमानः सन्नपि पृथक्-पृथक् स्त्रीपुरुषयो रजोरेतसी च जनयति, एवं हि सर्वत्र स्त्रीपुरुषरूपत्वमितरास्वपि योनिष्ववगन्तव्यम्।

तेनैव विश्वकर्त्रा चतुर्विधसृष्ट्यां क्षेत्ररूपात्मिका पोषणशक्तिमती स्त्री प्रक्लृप्ता, बीजरूपश्च पुमान् प्रक्लृप्तः, द्वावेव च स्त्रीपुरुषौ निजकार्यविधौ पूर्णौ सुखिनौ स्वस्थौ च दृश्येते। एतेन तस्य विश्वरेतो-नामवतो विष्णोः सर्वज्ञत्वं सर्वकर्तृत्वं च व्यक्तं भवति—

'मनसो रेतः प्रथमं यदासीत्' 'रेतोधा आसन् महिमानं'।

(ऋग्० १०।१२९।४) इति।

वक्तव्यम्—वक्ष्यति माहात्म्ये 'पुत्रार्थी पुत्रमाप्नुयात्' तत् संगच्छते, विश्वरेतस्त्वात् तस्य।

भवति चात्रास्माकम्—

स विश्वरेताः सकलं प्रसूते
पृथक् पृथक् क्षेत्रमथापि बीजम्।
तस्मात् स माता स पिता च तस्माद्
रेतः स्वरूपेण जगद् दधाति ।।११५।।

प्रजाभवः—८६

प्रजाः भवन्ति सत्तां लभन्ते यस्मात् स 'प्रजाभवः'। यद्वा—सर्वाः-प्रजाः यत्सकाशादुद्भवन्ति स 'प्रजाभवः'।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

न तं विदाथ य इमा जजानान्यद् युष्माकमन्तरं बभूव।
नीहारेण प्रावृता जलप्या चासुतृप उक्थशासश्चरन्ति ।।

यजु० १७।३१।।

'अन्यद्युष्माकमन्तरं बभूव' इत्यनेन ज्ञाप्यते यत् सर्वप्राणिमात्रस्यान्तः सर्वदैव सत्तातः सत्त्वात् सर्वाः प्रजाः उद्भवन्तीति। एतेन जीवेश्वरयोः पार्थक्यं ज्ञापितं भवति।

इयं [1]विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न ।
योऽस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद।।

ऋग्० १०।१२६।७।।

भवति चात्रास्माकम्—

चतुर्विधा सृष्टिरियं विचित्रा
प्रजाभवोपात्तभवा विभिन्ना ।
यावानृजुर्यः स सुखप्रसूत-
स्तावान् परीदृश्यत एव लोके।।११६।।

पुल्लिंङ्गप्रयोगो ज्ञानवत्त्वान्मनुष्यस्येति।

अहः—६०

अहः—नञुपपदाद् 'जहातेः' कनिन् प्रत्ययो भवति। 'ओहाक् त्यागे' जौहोत्यादिको नञ्पूर्वः। न जहातीति 'अहः'=दिवसः।

मन्त्रलिङ्गञ्च—

स वा अह्नोऽजायत तस्मादहरजायत। अथर्व० १३।४।२६।।

भवति चात्रास्माकम्—

अहः स विष्णुर्न जहाति कर्म
वेदे च यत्नेन बहुत्र गीतम् ।
अहःस्वभावस्य वशं गतो यः
स भासते सूर्य इवाप्रतर्क्यः।।११७।।

---

१. विसृष्टिः=विविधा विचित्रा वा सृष्टिः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संवत्सरः—९१

'संवत्सरः'—सम्पूर्वो 'वस निवासे भौवादिकः। ***'वसेश्च'*** (उ० ३।७१) सूत्रेण वसतेः 'सरन्' प्रत्ययो भवति। संवसन्त्यस्मिन् ग्रह-नक्षत्रर्तु-देवता इति 'संवत्सरः' द्वादशमासपरिभ्रमणकालो यावत् सूर्यस्य, अब्दो वर्षो वा।

न हि तं विष्णुं विना कस्यापि सम्यक्तया समानरूपेण वासो निवासोऽस्तीति कृत्वा स एव कालः सन् कलयति सर्वम्। स एव वासः सन् वासयति सर्वं स्वस्मिन्। न हि तस्य कोऽपि वासयिता। तस्मात् परो ज्येष्ठो नास्तीति कृत्वा स 'संवत्सरः' उक्तः।

मन्त्रलिङ्गञ्च—

समुद्रादर्णवादधि संवत्सरो अजायत। ऋग्० १०।१९०।२।।

सारांशः—योऽयं कालकृतो व्यवहारोऽस्ति, न हि तं विना कस्यचिदपि सत्तास्तीति कृत्वा स 'संवत्सर' नामा विष्णुः स्वात्मनि कालरूपेण सर्वं जगद्वासयतीति कृत्वा 'संवत्सर' उक्तो भवति। एतेनैतत् सिद्ध्यति यत् क्षणे क्षणे स एव सर्वकरुणाकरः स्मर्तव्यो ध्यातव्यश्चेति।

भवति चात्रास्माकम्—

न कोऽपि कालाद् व्यतिरिच्य शेते
संवत्सरोऽयं किमु भार्कचक्रम्[1]।
क्षणे क्षणेऽसौ स्मरणीय एव
सोऽधीक्षते कालमिषेण सर्वम्।।११८।।

व्यालः—९२

'व्यालः'—अत्र विपूर्वो'ऽल'धातुर्भूषण-पर्याप्ति-वारणार्थेषु, तस्मात् 'घञि' 'व्यालः'। विशेषेणालति भूषते पर्याप्नोति वृणोति वारयतीति वा। अथवा-विशेषेण पराक्रमेण अल्यते=भूष्यते, पर्याप्यते, वार्यते, अन्येभ्यः पराक्रमशक्तिभ्यः पृथक्-क्रियत इति 'व्यालः' स विष्णुः। सर्पोऽपि व्याल एतस्मादेव, यतः स जन्तुं विशेषेणालति वलयनैर्वृणोतीति।

यस्माद् विष्णोर्भूषणगुणयुक्तस्य विविधविकसनैर्विकासितमिदं जगद् भूषितं

१. भार्कचक्रम्=द्वादशराशिषु सूर्यादिकस्य परिभ्रमणात्मकं चक्रम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति, तस्मात् स एवास्य जगतो विशेषेण भूषयितास्तीति कृत्वा 'व्याल', उक्तो भवति। यद्वा—विगतः पृथक् स्थितः कर्ण-नासा-गल-भूषणेभ्य इति 'व्यालः'। एतेन व्याल-नाम्ना ज्ञायते यत्तस्य विष्णोः शरीरकृतो योगो न भवति।

यद्वा=विशेषेण सर्वजगत् परितोऽभित आप्यतेऽनेनेति 'व्यालः' विष्णुः। नास्त्यस्मादन्योऽस्य वा परित आप्ता तस्माद् 'व्यालः' स विष्णुरुक्तो भवति।

यद्वा—स एव विशेषेण वारयिता दुष्टानां रक्षको वा जगतः, तस्मात्स विष्णु-र्व्यालः' उच्यते। विगत आलो रक्षाकर्त्ता यस्य स 'व्यालः' दुष्टानां सूदन इति।

एतेनैव व्यालत्वगुणेन लोकेऽपि च सस्यक्षेत्ररक्षार्थं व्यालो वारः परिकरो वा क्रियते। तेन विष्णुगुणेन गुणितोऽयं संसारः सरति गच्छतीति गमनरूपं कर्म दधाति। गच्छतीति क्रियाधर्मेण च जगदुक्तं भवति।

संक्षेपत एवं ज्ञेयम्—योऽयं परिधिः क्रमः सर्वत्र दृश्यते, तत्र तस्य विष्णोः सूक्ष्मरूपेण व्यालत्वमेव व्याप्तमस्तीति। तेन हेतुना भक्तेन रक्षादीपः प्रज्वाल्यो रक्षामन्त्राश्च नूनं पठनीयाः।

सर्वत्र व्यापकत्वात्-आपो 'व्यालो' वा।

मन्त्रलिङ्गञ्च—

शन्नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभिस्त्रवन्तु नः।

ऋग्० १०।९।४; अथर्व० १।६।१; यजुः० ३६।१२।।

भवति चात्रास्माकम्—

व्यालः स विष्णुः परितोऽभ्युपैति
स एव विश्वं परितो वृणोति।
स भूषयत्येव जगत् समस्तं
यतः स्वयं भूषणभूषणः[1] सः।।११६।।

प्रत्ययः—६३

प्रतिपूर्वः 'इण्गतौ' आदादिकः,' तस्मात् ***'एरच्'*** (पा० ३।३।५६) इति सूत्रेणाच् प्रत्ययः, प्रतीयतेऽनेनेति 'प्रत्ययः', प्रत्येति वा 'प्रत्ययः' 'प्रत्ययो' ज्ञानं

१. भूषणभूषणः=भूषणान्यपि तमेव भूषयन्ति यत्र तस्य भूषणेश्वरस्य स्वयं सत्ता भवति। तद्यथालंकृतापि काचिद्वनिता मृता सती न शोभायै कल्पते। कुतः? तस्य भूषणेश्वरस्य भगवतो हिरण्यगर्भस्याग्नेस्तस्यामभावात्, **'नष्टेऽग्नौ प्राणी म्रियते'** इति न्यायात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रतीतिर्वा, प्रज्ञा वा, विश्वासो वा। प्रतीतो भवति विष्णुरनेन तस्मात् स 'प्रत्ययः'। प्रतीयते वा जगद् दृष्ट्वा नूनमस्य कश्चित् कर्त्तास्तीति, तस्मात्स 'प्रत्यय': प्रत्याय्यते वानेनान्तर्बहिश्च वर्त्तमानेन स्वयं स्वरूपम्।

मन्त्रलिङ्गञ्च—

रूपं रूपं मघवा बोभवीति मायाः कृण्वानः तन्वं परिस्वाम्।
त्रिर्याद्दिवः परिमुहूर्त्तमागात् स्वैर्मन्त्रैरनृतुपा ऋतावा।। ऋ० ३।५३।८।।
रूपं रूपं प्रतिरूपो बभूव ऋग्० ६।४७।१८।। इत्यपि।

भवति चात्रास्माकम्—

इयं विचित्रा कृतिरस्य कर्त्तुः
प्रत्यायिकास्तीति मतं ध्रुवं मे।
स प्रत्ययः प्रत्ययमात्रलभ्यो[1]
विष्णुः स्वयं रूपमवैत्यनन्तम्।।१२०।।

सर्वदर्शनः—६४

सर्वदर्शनः-'दृशिर् प्रेक्षणे' भौवादिकः, तस्मात् ***'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः'*** (अष्टा० ३।१।१३४) इत्यनेन नन्द्यादेराकृतिगणत्वात् कर्तरि ल्यु[1] (अन) प्रत्ययः। पश्यतीति 'दर्शनः'। सर्वं पश्यतीति 'सर्वदर्शनः' स सर्वव्यापको विष्णुः। ***'करणाधिकरणयोश्च'*** (पा० ३।३।११७) इति भावकरणादौ ल्युटि प्रत्यये पश्यन्ति येन स 'दर्शनः' सूर्यश्चन्द्रो वा, नेत्रं वा। सर्वं पश्यन्ति येन स 'सर्वदर्शनः'।

यथा यथा मनुष्यो भगवतो विष्णोर्ज्ञान-बल-क्रिया बुध्यते तथा तथा स विश्वमिदं सर्वदर्शनेन पश्यति। अतः स विष्णुः 'सर्वदर्शनः' उक्तो भवति।

मन्त्रलिङ्गञ्च—

आ कृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्।।

यजुः ३३।४३।।

वक्ष्यति सप्तोत्तरैकशततमे श्लोके चतुरशीत्युत्तरमष्टशततमं 'सविता' इति नाम। स सवितृरूपः सूर्योऽपि तं विना न विद्योतत इति कृत्वा प्रत्यक्षरूपेण

---

१. प्रत्ययमात्रलभ्यः=ज्ञानमात्रगम्यः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दृश्यमाने सूर्येऽपि स एव सर्वं पश्यन्नायाति। योऽयं सूर्ये यात्यायाति च व्यवहारः, स प्रत्यक्षतो दर्शनक्रियायां प्रधानीकृत्योक्तो भवति।

तद्यथा वेदे–

यतः सूर्य उदेत्यस्तं यत्र च गच्छति ।
तदेव मन्येऽहं ज्येष्ठं तदु नात्येति किंचन।। अथर्व० १०।८।१६।।

तत्रैव सप्तोत्तर एकशततमे श्लोके सूर्यपर्यायाश्च भगवतो नामानि स्वीकृतानि। तद्यथा–रविः, विरोचनः, सूर्यः, सविता, रविलोचनः। अत एतदुक्तं भवति-यत् सवितरि स एव विष्णुः सर्वलोकाध्यक्षः सर्वाणि भुवनानि पश्यन्नायाति हिरण्ययेन रथेन। 'देवः' इति सवितुर्विशेषणम्।

तस्य भगवतः सर्वदर्शनत्वज्ञापनाय 'विश्वतश्चक्षुः' इत्यपि तस्य नामास्ति। मन्त्रलिङ्गञ्च तस्मिन् नाम्नि–

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।
सं बाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन् देव एकः।।

ऋग्० १०।८१३।।

भवति चात्रास्माकम्–

स एव विष्णुः किमु सर्वदर्शनः
स विश्वतश्चक्षुरुतार्कलोचनः ।
स्वयं [१]चरैर्वा भुवनानि पश्यति
प्रमादलेशोऽस्ति न तद्व्यवस्थितौ।।१२१।।

❖ ❖ ❖

अजः सर्वेश्वरः सिद्धः, सिद्धिः सर्वादिरच्युतः।
वृषाकपिरमेयात्मा, सर्वयोगविनिःसृतः ।।२४।।

९५. अजः, ९६. सर्वेश्वरः, ९७. सिद्धः, ९८ सिद्धिः, ९९. सर्वादिः। १००. अच्युतः, १०१. वृषाकपिः, १०२. अमेयात्मा, १०३. सर्वयोगविनिःसृतः ।।२४।।

---

१. चरैः=चरणशीलैः,सूर्य-चन्द्र-मंगल-बुध-बृहस्पति-शुक्र-शनिभिर्दीप्तिमद्भिः खेचरै राहुकेतुभ्याञ्च। वात्र समुच्चये।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अजः—६५

न जायत इति 'अजः'। 'जनी प्रादुर्भवे' दैवादिकः, तस्मात् नञ्युपपदे 'ड' प्रत्ययः **'अन्येष्वपि दृश्यते'** (पा० ३।२।१०१) सूत्रेण। डित्यभस्यापि टेर्लोपः='अजः'। स भगवान् 'अज'-नाम्ना षड्भावविकाररहितत्वाद् 'अज' उच्यते।

मन्त्रलिंगं च—

शं नो अज एकपाद्देवः। ऋग्० ७।३५।१३।।

त्रिःकृत्वोऽत्र विष्णुसहस्र-नामसु 'अजः' इति नामाऽस्ति। भिन्नो भिन्नस्तत्रार्थः।

भवतश्चात्रास्माकम्—

'अजः' स विष्णुर्न जनिं दधाति
सोऽन्तर्बहिश्चास्ति विराजमानः।
किं मातृगर्भे किमु हृद्गुहायां
न राजते तस्य महात्मनो भूः[1] ।।१२२।।

तस्मादजोऽसौ न जनिं दधाति
सोऽधीक्षते विश्वमिदं समस्तम्।
स्वयं जरा-जन्म-विपाकहीनो
नित्यं जराजन्मवतः स पाति ।।१२३।।

अन्यच्चाप्यत्रास्माकम्—

अजं देवमुपासीनो, मुच्यते मर्त्यनिष्ठया[2]।
[3]सत्त्वे [4]सत्त्व [5]मुपातिष्ठन्नजभूयाय कल्पते।।१२४।।

"अज" शब्दस्य निरुक्तिर्महाभारते यथा—

न हि जातो न जायेऽहं, न जनिष्ये कदाचन।
क्षेत्रज्ञः सर्वभूतानां, तस्मादहमजः स्मृतः ।।

शान्तिपर्व ३४२।७४।।

---

१. भूः=सत्ता। २. मर्त्ये परमात्मायमिति या निष्ठा तया=मर्त्यनिष्ठया। ३. सत्त्वे=मनसि। ४. सत्त्वम्=सत्यस्वरूपं शुद्धिमिति। ५. उपातिष्ठन्= उपासनां कुर्वन्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वेश्वरः—६६

सर्वस्य ईश्वरः='सर्वेश्वरः'। 'ईश्वर' शब्दो व्याख्यातचरः, चतुःसप्ततितमे ईश्वर-नाम्नो व्याख्यावसरे। अत्र भुवि यावन्त ईश्वराः सन्ति, तेऽपि सर्वेश्वरस्यांशमादायैव भवन्ति। वक्ष्यति चाग्रे पंचपंचाशत्तमे श्लोके 'स्थानदः' इति विष्णोर्नामसु। एतेनैतज्ज्ञाप्यते यद् यत् स्थानं यस्मै प्राप्तमस्ति, तत् स्थानं तेनैव सर्वेश्वरेण तस्मै प्रत्तमस्ति। कुतः ? विरुद्धमाचरतो जनस्य तत्स्थानं पदं वा स्खलति। नास्ति विरुद्धो व्ययोऽस्येत्यव्ययत्वात्तस्य। तस्मात् सर्वेषामीश्वराणामप्यसावेव विष्णुरीश्वर इति कृत्वा सर्वेश्वर उच्यते।

मन्त्रलिङ्गञ्च—

चित्र इद्राजा राजका इदन्यके यके सरस्वतिमनु।
पर्जन्य इव ततनद्धि वृष्ट्या सहस्रमयुता ददत् ।।

ऋग् ८।२१।१८।।

अन्यच्च—

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव ।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम।।

यजुः २३।३।।

भवतश्चात्रास्माकम्—

सर्वेश्वरः सर्वमिदं समीष्टे
[1]लोकेश्वराश्चापि तदंशयोगात्।
स स्थानदः सर्वमिदं यथावद्
व्यवस्थया स्थापयते समग्रम् ।।१२५।।

सर्वेश्वरोऽसौ सकलेश्वरोऽसौ
महेश्वरोऽसौ भुवनेश्वरोऽसौ ।
इत्थं महेशं हृदि चिन्तयन् ना
विमुक्तपापो भुवि राजते सः।।१२६।।

१. लोके ईश्वराः=लोकेश्वराः। लोकेषु मनुष्येष्वीश्वराः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सिद्धः—६७

'षिधु संराद्धौ' दिवादिः, तस्मात् 'क्त' प्रत्यये 'सिद्धः' शब्दो निष्पद्यते। सर्वदैव निष्पन्नत्वात् 'सिद्धः' न केनापि साधनविशेषेण स साध्यते, अपि तु स्वयंसत्तावत्त्वात् सिद्ध उच्यते।

मन्त्रलिङ्गञ्च—

अन्ति सन्तं[1] न जहात्यन्ति सन्तं न पश्यति।
देवस्य पश्य काव्यं न ममार न जीर्यति।।

अथर्व० १० ।८ ।३२ ।।

भवतश्चात्रास्माकम्—

विष्णुः स्वसिद्धौ न परं प्रमाणं
कर्तारमेवं समपेक्षतेऽतः ।
'सिद्धः' स उक्तोऽखिलसिद्धिमूलः
स्वयं श्रुतिश्चाथ जगत्प्रमाणम् ।।१२७।।

नानाविधा याः कृतयो महत्यो
विचित्रवर्णाकृतिगन्धपूर्णाः ।
सिद्धं सदा तं विनिवेदयन्ति
सिद्धादृते नास्ति कृतित्वसिद्धिः।।१२८।।

सिद्धिः—६८

'षिधु संराद्धौ' दिवादिः, तस्मात् ***'स्त्रियां क्तिन्'*** (पा० ३ ।३ ।९४) सूत्रेण स्त्रियां भावे 'क्तिन्' प्रत्ययः। साधनं 'सिद्धिरिति। सर्वेषु साधनीयेषु प्रापणीयेषु निष्पाद्येषु स एव 'सिद्धिः' नामा भगवान् विष्णुः साधनीयः। साधकं तत्प्राप्त्यै प्रयतमानं नानाविधा लौकिक्यः सिद्धयः प्राप्नुवन्ति, परन्तु ताः सर्वा विनाशवत्यः। परन्तु भगवति सिद्धौ रममाणस्तद्भूयाय कल्पते।

प्रधाना अष्टौ सिद्धयो यथा—

---

१. सन्तं=सिद्धं=वर्त्तमानमित्यनर्थान्तरम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अणिमा महिमा मूर्त्तलघिमा प्राप्तिरिन्द्रियैः।
प्राकाश्यं श्रुतदृष्टेषु शक्तिप्रेरणमीशिता।
गुणेष्वसंगो वशिता यत्कामस्तदवस्यति।।

भागवतस्कन्ध ११।१५।३-५।।

एता औत्पातिका अष्टौ सिद्धयो विघ्नन्ति साधकम्, तस्मात् सर्वा इमा मनसो निरस्य साधकेन सा भगवतोऽपरनामा सिद्धिः साध्या।

भवति चात्रास्माकम्—

प्राप्तव्यवर्गे परमं प्रधानं
'सिद्धि' र्हि तन्नामपरं वदन्ति।
एतं विनाष्टाविह सिद्धयो या
विघ्नन्ति भक्तं स हि साध्य एकः।।१२६।।

सर्वादिः—६६

आङ्पूर्वाद्ददातेः ***'उपसर्गे घोः किः'*** (पा० ३।३।९२) इत्यनेन 'किः' प्रत्ययः, तेन 'आदिः' शब्दो निष्पद्यते। 'डुदाञ् दाने' जौहोत्यादिकः, तस्य च ***'दाधा ध्वदाप्'*** (पा० १।१।२०) इति सूत्रेण 'घु' संज्ञा। आङ्पूर्वो ददातिर्ग्रहणे स्तम्भने वा, 'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते' इति न्यायात्।

आदत्ते=गृह्णाति=स्तभ्नातीति 'आदिः'। सर्वमादत्त इति 'सर्वादिः'। सर्वस्यादिग्रहणकर्त्तेति 'सर्वादिः'।

मन्त्रलिङ्गञ्च—

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।। यजुः १३।४।।

अन्यच्च—

येन द्यौरुग्रा पृथिवी च दृढा येन स्वः स्तभितं येन नाकः।
योऽन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम।।

ऋग् १०।१२१।५; अथर्व० ४।२।४; यजुः ३२।६।।

भवतश्चात्रास्माकम्—

दिवं भुवं स्वर्दिनरात्रिनाथौ
मरुज्जले वह्निमनल्पशक्तिम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

[1]सर्वादिरोमाददते समग्रं
यथाक्ष[2] आयच्छति बाह्यचक्रम् ।।१३०।।
सर्वादिरद्यापि तथैव सर्वं
स्तभ्नाति तस्मात् स हि विष्णुरुक्तः ।
जगन्नियत्या[3] लभते विकारान्
नासौ जहात्येकरसस्वभावम्[4] ।।१३१।।

अच्युतः—१००

'च्युङ्गतौ' भौवादिकः, तस्मात् क्तः, तेन 'च्युतः' शब्दो निष्पद्यते। तत्र नञा योगेन 'अच्युतः' इति। न च्यवते=न स्खलितो भवतीति 'अच्युतो' विष्णुः। अच्युतगुणवता विष्णुना व्यवस्थितमिदं लोकलोकान्तरानुस्यूतं जगत्, तथैवाद्यापि स्वकक्षायां भ्रमति यथैवाद्यसर्गारम्भक्षणे व्यवस्थितमासीत्। तत्र याऽच्युतिः सा तस्याच्युतस्य विष्णोः। तेनाच्युत-धर्मेण वेवेष्टि चराचरं जगत्।

भवति चात्रास्माकम्—

तमच्युतं शम्भुमनन्तवीर्यं
जगद् व्यनक्त्येव हिरण्यगर्भम् ।
च्युतो न सूर्यः किमु चन्द्रमा वाऽ-
च्युतेन कर्त्रास्ति जगन्निबद्धम् ।।१३२।।

संगच्छते चेदं भगवद्वचनम्—

'यस्मान्न च्युतपूर्वोऽहमच्युतस्तेन कर्मणा' इति।

वक्तव्यम्—अच्युतधर्मवन्तं विष्णुं भजता स्मरता भक्तेन विषमास्वपि परिस्थितिषु स्वके स्वभावे वाचि चाच्युतता नूनं धार्या।

---

१. सर्वादिः=ओम्, ओमव्ययस्तस्मान्न लिंगवचनेषु व्ययत इति कृत्वा तच्छक्तीनां बहुत्वमाश्रयीकृत्याददत इति बहुवचने प्रयोगः कृतः। दिवमित्यादयो द्वितीयान्ताः। २. अक्षः=रथचक्रयोः स्तम्भनसाधनीभूतः काष्ठमयो धातुमयो वा दण्डः। अयमक्षः पुंसि। ३. नियतिः=प्रकृतिः, नित्या व्यवस्था वा, तया। ४. एकरसस्वभावम्=यथा सर्गारम्भादिक्षणे तेन भगवता सर्वमिदमात्तं स्तब्धमागृहीतं चासीत्, तथैवाद्यापि धृतं स्तब्धं वेदं सर्वविधं विश्वमास्ते, इति कृत्वा सोऽद्यापि 'सर्वादि'र्विष्णुरुक्तो भवति स्तम्भनशक्तेः सर्वत्र विद्यमानत्वात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

नूनं मनुष्येण समस्तकृत्येऽ-
च्युतस्वभावेन सदैव भाव्यम् ।
च्युतस्वभावश्च्यवते व्रताच्च
विडम्बयन्त्येव जना मुहुस्तम् ।।१३३।।

इति श्री १०८ पण्डितसत्यदेववासिष्ठकृते
महाभारतानुशासनपर्वान्तर्गतस्य (अ० १४६)
विष्णुसहस्रनामस्तोत्रस्य
वेदप्रमाणोपबृंहितसत्यभाष्ये
प्रथमं नामशतकं
सम्पूर्णम्।

❖ ❖ ❖

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वृषाकपिः—१०१

वृषः—'वृषु सेचने' भौवादिकः, तस्माद् ***'इगुपधज्ञाप्रीकिरः कः'*** (पा० ३।१।१३५) इत्यनेन 'कः' प्रत्ययः। वर्षतीति 'वृषः'। कपिः—'कपि चलने' भौवादिकः, तस्मात् ***'सर्वधातुभ्य इन्'*** (उ० ४।११८) सूत्रेणेन्प्रत्ययः। ***'कुण्ठिकम्प्योर्नलोपश्च'*** (उ० ४।१४४) इतीन्प्रत्यये नलोपः। कम्पते चलतीति 'कपिः' न कम्पते न चलतीति—'अकपिः' 'वृषो' धर्मः, सर्वान् कामान् वर्षतीति कृत्वा, तस्याकपिः- अकम्पिता= 'वृषाकपिः' विष्णुः' रुद्रो वा।

सोऽयं भगवान् विष्णु'र्वृषाकपि'धर्मोऽद्यापि तथैव स्वान् धर्मान् नियमान् रक्षति व्यवहरति वा, यथैवाद्यारम्भक्षणे रक्षति स्म व्यवहरति स्म च। तद्यथा लोके पश्यामः-येयं विजातिभ्यां=भिन्नाभ्यां जातिभ्यामन्या जातिरुत्पाद्यते, सा न भगवतोऽभिमता। असौ तस्या विकृतजातेर्बीजं न क्षमते न सहते, तस्मात् कारणात् सा न पुनस्तद्विधां योनिमुत्पादयितुं क्षमा भवति। अमुनैव विधिना सर्वत्रैव भगवान् व्यापनधर्मा 'वृषाकपिः' सन् धर्मरक्षाकर्तृत्वेन निजव्यापकधर्मेण सर्वं जगद् व्यवस्थापयति। यदि कश्चित् उल्लंघते तद्धर्मं तदा स म्रियते। यथा वडवायां खरेणोत्पादिताः प्रजा यौवनं प्राप्य यदि मैथुनमेति तदाऽग्रे सन्ततिर्न चलति।

अमुथैवेतरयोनिषु पशुपक्ष्यादिषु ज्ञातव्यम्। तथा चान्यदपि लोके पश्यामः—यद्रसापेक्षी यो वृक्षः स तस्मिन्नृतौ पुष्यति फलति च। न हि मासानपेक्षते, अर्थात् सूर्यकृतमासजनितर्तून् नापेक्षते। लोके यत्र सूर्यकृत उपतापः पूर्वं तथाविधतां प्राप्नोति, यथाविधस्य रसस्य तद्वृक्षफलनकृतेऽभीष्टमस्ति, तत्र तस्य पुष्पणं फलनं च प्रादुर्भवति, यथाम्रफलवृक्षः। एवमन्यत्रापि योजनीयं भवति। तद्यथा—

यत्रौष्ण्याधिक्यं तत्र मनुष्या अपि शीघ्रं प्रजानां जननाय समर्था भवन्ति वयसा चाल्पवर्षीया अपीति सर्वत्र जीवयोनिषु संगन्तव्यम्।

वृषाकपिधर्मं ध्यायता ध्यात्रा न कदापि प्रभोर्व्यवस्थोल्लंघनीयेति। यतः स

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ध्याता सर्वान् कामानवाप्नोति। वक्ष्यति च माहात्म्ये **'कामानवाप्नुयात् कामी'** (वि० स० १२४ श्लोके)।

उक्तं चास्माभिः स्वकृते सत्याग्रहनीतिकाव्ये सत्याग्रहस्यादिमं स्रोतो विज्ञापयद्भिः। तद्यथा–

लोकान् सर्वविधान् विचार्य पुरतः को[1] व्याकरोत् पूर्ववत्
मर्त्यं चाथ पशुं वियच्चरमथाब्जं स्वेदजं भूरुहम् ।
नैवाद्याप्यजहत् स्वसत्यनिभृतां सन्धां[2] कविः[3] सद्ग्रही
जातो नो क्षमते परं प्रसवितुं योनी[4] पृथक् चेत् पृथक्।।

मन्त्रलिङ्गञ्च–

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।
दिवं च पृथिवीं चान्तरिक्षमथो स्वः ।।

ऋग्० १० ।१९० ।३ ।।

यद्वामहाभारते–

कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते।
तस्माद् वृषाकपिः प्राह काश्यपो मां प्रजापतिः।।

शान्तिपर्व ३४२ ।८६ ।।

भवति चात्रास्माकम्–

वृषाकपिर्विष्णुरकम्पिताभवत्
वृषस्य धर्मस्य स कल्पकृत् क्षणात्।
[5]यो याथवा यत् कुरुते विकर्म[6]
यमाप्तिविग्नः[7] [8]क्षयमेत्यवार्यम् ।।१३४।।

अमेयात्मा–१०२

अमेयात्मा=अमेयस्वरूपः। शब्दादिभिर्मातुमियत्तया परिच्छेत्तुमशक्यो'ऽमेयः' अमेय आत्मा स्वरूपं यस्य सो'ऽमेयात्मा'। विशिष्टं विवेचनं 'अग्राह्य' इति नामव्याख्यावसरे द्रष्टव्यम्।

---

१. कः=ब्रह्मा। २. सन्धाम्=प्रतिज्ञाम्। ३. कविः=स्वयम्भूरीश्वरः ४. प्रथमा-द्विवचनम्। ५. यः पुमान् या स्त्री, यत् नपुंसकमिति त्रयः कर्त्तारः कर्मणामभिमताः। ६. विकर्म=विरुद्धं कर्म। ७. यमाप्तिविग्नः=यमो दण्डो नियमयति प्रजा इति कृत्वा दण्डप्राप्त्योद्विग्नः पश्चात्तापमतिरिति। ८. क्षयम्=नाशम्। सः, सा, तदिति नित्यसम्बन्धत्वात् तदोऽध्याहारः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सोऽमेयात्मा सर्वत्रैव स्वरूपेण तं प्रमातारमपि प्रकाशयतीति कृत्वा न किञ्चिदपि तं विष्णुं विनास्तीति कस्तद्भिन्नो यस्तं विष्णुं प्रमिमीत।

मन्त्रलिङ्गञ्च—

न यस्य द्यावापृथिवी अनुव्यचो न सिन्धवो रजसो अन्तमानशुः ।
नोत स्ववृष्टिं मदे अस्य युध्यत एको अन्यच्चकृषे विश्वमाननुषक्।।

ऋग्० १।५२।१४।।

नास्य शत्रुर्न प्रतिमानमस्ति। ऋग्० ६।१८।१२।।

यस्य विष्णोरन्तं न सूर्यादयो लोका भूलोको वा अन्तरिक्षस्था आपश्चान्तमापुः। न च मेघो वृत्रस्तस्यान्तं स्ववृष्टिभिः प्राप्तवान्। कुतः? स एक एव सर्वत्र 'अनुव्यचः' अनुस्यूतोऽस्ति। स्वयं स्वसत्तया शक्त्या विश्वं 'चकृषे' कृतवान्, स्वयं चानुषक् सर्वस्मिन् विश्वे व्याप्तोऽस्ति। एतेन तस्य विष्णोरमेयत्वं विज्ञापितं भवति। 'अनयत्' इत्येतेन मन्त्रोक्तपदेन तस्य जगद्रूपता वारिता भवति। प्रकृतिः पृथक्, कर्त्ता चानन्तशक्तिमान् पृथक् जीवश्च पृथक्, इति । तस्य सत्तां परित्यज्य न किंचिदित्यमेयत्वमुक्तं भवति।

भवतश्चात्रास्माकम्—

विचित्र-रूपाकृति-वर्ण-देहव-
ज्जगत् स्वयं तत्प्रभया[1] प्रकाशते ।
पृथक् प्रमेयः[2] प्रमितिः[3] पृथक् ततः
प्रमाणकृच्चास्ति न तं विना पृथक् ।।१३५।।

अमेय आत्मा श्रुतिभिः प्रकाशितः
'न मेय आत्मे' ति च वाऽसमासतः।
स एव सूर्यः स उ वा निशाकरः
गायन्त्यमेयात्मपदेन तं वा ।।१३६।।

---

१. तस्य विष्णोः प्रभयेति। २. प्रमेयः- माङ् माने शब्दे च जौहोत्यादिकः। **'अचो यत्'** (पा० ३।१।९७) इत्यनेन 'यत्' प्रत्ययः, **'ईद्यति'** (पा ६।४।६५) सूत्रेण ईत्वे कृते गुणः। तेन 'प्रमेयः' 'अमेयः' इत्यादिसिद्धिः। ३. प्रमितिः-बाहुलकात् 'क्तिन्' **'द्यतिस्यतिमास्थामित् ति किति'** (पा० ७।४।४०) इत्यनेन इदादेशान् 'मितिः'।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

छन्दोभेदेन पुनरस्माकम्—

'अमेयात्मा' न शक्योऽस्ति मातुं मानेन केनचित्।
यथा मानं स्वकात्मानं मातुं नार्हति कर्हिचित्।।१३७।।

सर्वयोगविनिःसृतः—१०३

योग-शब्दो व्याख्यातचरः 'योगः' इति नामव्याख्यावसरे। विनिःसृतः पृथग् भूतो निर्लेपो वा। सर्वेभ्यो योगेभ्यो विनिःसृतः इति 'सर्वयोगविनिःसृतः'= सर्वबन्धनरहितः, **'असङ्गो ह्ययं पुरुषः'** (बृ० उ० ४।३।१५)।

यदिदं जगद् विविधरूपेषु बद्धं दृश्यते, तथा चाकर्षणविकर्षणाभ्यां बद्धं दृश्यते, ताभ्यां द्विविधबन्धनाभ्यां स विष्णुः सर्वथा सर्वदा च पृथक् निर्लेप एवास्तीति दृढं ज्ञापयितुं 'सर्वयोगविनिःसृतः' इति तन्नाम प्रकाशतामानीतमिति।

मन्त्रलिङ्गञ्च—

न तस्य प्रतिमाऽस्ति यस्य नाम महद् यशः। यजु० ३२।३।।
कविर्मनीषी परिभूः स्वयम्भूः' यजुः० ४०।८।।

स्वयं भवति स्वसत्तया तिष्ठतीति 'स्वयंभूः' स विष्णुरिति।

'सर्वयोगविनिःसृतः' इति गुणात्मकं विष्णोर्नाम स्मरता स्मर्त्रा नूनं निःसङ्गेन भवितव्यम्। नानाशास्त्रैर्योऽयं विविधप्रकारकः क्रियाकलापो विहितोऽस्ति, तत्र विनिःसृतः सारभूतः स एव।

भवति चात्रास्माकम्—

सर्वं विरच्यापि बहुप्रकारं
जगत् पुनर्योगशतैश्च बद्ध्वा।
असङ्ग एवेति पुनस्तमीष्टे
नानाविधानस्य स सारभूतः।।१३८।।

छन्दोभेदेन पुनरस्माकम्—

निरपेक्षो निराधारः, 'सर्वयोगविनिःसृतः'।
स विष्णू रचयन् सर्वं, स्वयं सर्वं समीक्षते।।१३९।।

❖ ❖ ❖

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वसुर्वसुमनाः सत्यः समात्मा सम्मितः समः।
अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः ॥२५॥

१०४. वसुः, १०५. वसुमनाः, १०६. सत्यः, १०७. समात्मा, १०८. सम्मितः, १०९. समः, ११०. अमोघः, १११. पुण्डरीकाक्षः, ११२. वृषकर्मा, ११३. वृषाकृतिः॥२५॥

वसुः—१०४

'वस निवासे' भौवादिकः, 'वस आच्छादने' आदादिकः, अस्मात् ***'शृस्वृस्निहित्रप्यसिहवसिनिक्लिदिबन्धिमनिभ्यश्च'*** (उणा० १।१०) सूत्रेण 'उः' प्रत्ययो भवति नित्संज्ञश्च। वस्त आच्छादयति दुःखं येन तद् 'वसु' धनम्। यद्वा-वस्त आच्छादयति यद्भक्तः स्वानि जन्मजन्मान्तराध्युषितानि पुण्यकर्मसु बाधकानि निन्द्यसंस्कारमात्राणि भक्त्या तद् 'वसु' ब्रह्म। यद्वावसन्ति निवसन्ति प्राणिनो येषु ते 'वसवो' ऽष्टौ। वसन्ति निवसन्ति कृतध्यानैकनिष्ठा यस्मिन् तद् 'वसु' ब्रह्म।

मन्त्रलिङ्गञ्च—

वसुर्वसुपतिर्हि कमस्यग्ने विभावसुः।
स्याम ते सुमतावपि॥ ऋग्० ८।४४।२४॥

अग्ने हे परमात्मन्! त्वं वसुरसि, इत्यादि। अपरं च—

अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः।
देवो देवेभिरागतम्। ऋग्०१।१।५॥

सत्योऽविनाशी देवो विष्णुरिति। वसुर्धनपर्यायोऽपि। तद्यथा—

द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु।
हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि ॥

अमरे कां० २, वैश्यवर्गे, श्लोक ९०॥

स हि वसुर्भगवान् विष्णुः सनातनात् कालात् स्वस्मिन् जगद् वासयति स्वयं च तस्मिन् वसति न चासौ व्यभिचरति स्वकं वसुधर्ममिति कृत्वा स 'वसु' रुक्तो भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

य आत्मनेदं सकलं सुखात्मा[1]
वस्तेऽथवा वासयते[2] 'वसुः' सः।
न तद्विनाष्टौ वसवोऽपि कामं
नरं क्षणं वासयितुं क्षमन्ते ॥१४०॥

वसुमनाः—१०५

वसु-शब्दो 'वसुः' इति विष्णोर्नाम-व्याख्यावसरे (१०४) व्याख्यातः। 'मन ज्ञाने' दैवादिको 'मनु अवबोधने' तानादिकः, आभ्यां ***'सर्वधातुभ्योऽसुन्'*** (उणा० ४।१८६) इत्यनेन 'असुन्' प्रत्ययं कृत्वा 'मनः' शब्दः साधुर्भवति।

मन्यते मनुते वा 'मनुः'। यद्वा—मन्यते अवबुध्यते 'मनो' ज्ञानम्। जीवानां त्रिगुणात्मकान्तश्चारि वा 'मनः'। वसुं मन्यते मनुते वा 'वसुमनाः'।

इयं चतुर्विधा सृष्टिः येन प्रकारेण निवसितुमर्हति, पृथक् पृथक् शरीरकृते कथंविधस्यौष्ण्यस्य, किं वा शीतस्य, किं वा जलस्य, किं वा वायोरावश्यकतास्तीति सर्वं विष्णुः जानाति=अवगच्छति तस्मात् स 'वसुमनाः' उक्तो भवति।

वसुमनसा भगवता सर्वं प्राणिमात्रं किं वा स्थावरमात्रं वासयितुं ज्ञानवता सता उषितं वासितं वास्ति। सारार्थत इदम्—यस्मै प्राणिने यत् स्थानं यथाविधं च शरीरं दत्तमस्ति, तत् तेन वसुमनसा विष्णुना सर्वं निजज्ञानेन परिज्ञापितमस्ति।

भवति चात्रास्माकम्—

नूनं 'वसुमना' विष्णुर्जीवं जीवं व्यवस्थया ।
आवास्यैव यथास्थानं, तन्मनाः[3] प्रतिबुद्ध्यते॥१४१॥

छन्दोभेदेन पुनः—

स्थानं न तद्यत्र न जीववासो
जीवोऽपि सर्वो न समानदेहः।

---

१. सुखात्मा सः **'कमस्यग्ने !'** इति निदर्शितमन्त्रलिंगात्। २. यदुक्तं स एव वासयितेति—नित्यं पश्यामः तद्व्यवस्थया लब्धायुष्कः सकलं जीवनं तस्मिन् वासयितरि वसन्नतिवाहयति, क्षीणायुश्च म्रियते, यथा गृहपतिर्गृहान्निष्कासयति करप्रदानेन निवसन्तम्। ३. तन्मनाः-वसुमनाः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शरीरभेदादुपकर्तृभेद-
स्त[1] तं यथास्थानमनक्ति[2] विष्णुः।।१४२।।

सत्यः—१०६

सत्यो हि नाम, सत्सु साधुः, ***'तत्र साधुः'*** (पा० ५।४।९८) सूत्रेण यति सिद्धम्। सन्तं विद्यमानमर्थं गमयतीति संगतार्थकम्। यद्वा-**'सदिति प्राणः अस्तीत्यन्नं यदित्यसावादित्यः'** (ऐ० आ० २।१।५।६) वचनानुसारं प्राणान्नादित्यानां सद्रूपाणां प्रवर्तकस्तद्रूपो वा 'सत्य' नामा विष्णुः।

सत्ये सर्वं प्रतिष्ठितमिति महार्थवदेतत् सत्यं नाम।

मन्त्रलिङ्गञ्च—

सत्येनोत्तभिता भूमिः सूर्येणोत्तभिता च द्यौः ।
ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधिश्रितः।।

अथर्व १४।१।१।।

भवति चात्रास्माकम्—

सत्यः स विष्णुः सृजतीह यद्यत्
तत्तच्च सत्यं स्वगुणानुरूपम् ।
कार्यं स्वकर्त्तारमनक्ति[3] तद्वत्
कुम्भो यथा कुम्भकृतं व्यनक्ति।।१४३।।

सत्यस्वरूपं कार्यं स्वकर्तारं सत्यस्वरूपं भगवन्तं विष्णुं प्रकटयति, कारणानुरूपं कार्यमिति न्यायात्। न हि प्रकृत्या सत्यया किञ्चिदसत्यं विज्ञाप्यते, सत्यनिष्ठ एतद्वेति। इदञ्च प्रकृतेर्विज्ञापनं, शाकुनं शास्त्रं, शकुनिविद्येति व्याख्यातम्।

समात्मा—१०७

समानरूपेण सर्वप्राणिहृदयेषु वर्त्तमान आत्मा सर्वस्य हृदयं हृद्=अयते= प्राप्नोतीति। अन्तर्गर्भितण्यर्थो वा गमयति—अदृष्टवशेन गतिमत् करोतीति वा 'समात्मा' विष्णोर्नाम संगच्छते।

१. उपकर्तृभेदः=उपकरणभेद इति। २. अनक्ति=व्यनक्ति। ३. अनक्ति=व्यनक्ति=प्रकाशयतीत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्गाद्यारम्भक्षणादारभ्याकल्पं समात्मा समानरूपेण सर्वस्य हृदयाकाशे विराजते।

मन्त्रलिङ्गञ्च—

पुण्डरीकं नवद्वारं त्रिभिर्गुणेभिरावृतम् ।
तस्मिन् यद् यक्षमात्मन्वत् तद्वै ब्रह्मविदो विदुः।।

अथर्व० १० ।८ ।४३ ।।

पुण्डरीकं=हृदयम्। अस्मिन् हृदये मनः, देहाभिमान्यात्मा, परमात्मा च समानरूपेण तिष्ठतीति कृत्वा 'समात्मा' विष्णुरुक्तो भवति। आत्मनः सद्भावादेव हृदयं गतिमत्। विकृते हृदये तत्स्थास्त्रयो दोषा गुणा वा गतिं विषमयन्ति। आत्मा परमात्मा च समान एव सर्वजीवनवत्स्विति विज्ञापयितुं तस्य विष्णोः 'समात्मा' इति नाम तादभाव्यतामगमत्।

अष्टसंख्यात्मके 'भूतात्मा' इति नामव्याख्यानावसरे **'पुण्डरीकं नवद्वार'** मित्यादिमन्त्रे कृतो विचारो द्रष्टव्यः। आत्म-शब्देन 'आत्मा' सर्वलोकाधीश्वरोऽपि सर्वप्राणिहृदये समानरूपेण तिष्ठत्येवेति संक्षेपतोऽर्थो ग्राह्यः।

भवति चात्रास्माकम्—

आकीटगात्रात् स गजादिगात्रे
समानरूपेण विराजतेऽन्तः ।
अतो विशिष्टः स समात्मनाम्ना
नाऽऽकल्पमेतं प्रजहाति धर्मम्।।१४४।।

सम्मितः—१०८

'समात्मासम्मितः' इति स्थितौ विग्रहो द्विविधो भवति। तेन 'सम्मितः' "असम्मितः" इति नामद्वयं सम्पद्यते। तत्र सम्मितः—

समित्येकीभावेऽव्ययम्। 'माङ् माने शब्दे च' जौहोत्यादिकः' तस्मात् तकारादौ किति 'क्त' प्रत्यये परे ***'द्यतिस्यतिमास्थामित् ति किति'*** (पा० ७ ।४ ।४०) इत्यनेन 'मा' धातोराकारस्येदादेशान् 'मितः' समुपसर्गः=सम्मितः। नञा युक्ते सति 'असम्मितः'। एकीभाव एव मानं यस्य स 'सम्मितो' विष्णुरिति। स सम्मितो विष्णुरेक एव, न द्वितीयः, न तृतीय इत्यादिः।

मन्त्रलिङ्गञ्च—

स एष एक एकवृदेक एव। (अथर्व० १३ ।४ ।२०)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

न द्वितीयो न तृतीयश्चतुर्थो नाप्युच्यते। (अथर्व० १३।४।१६)
न पञ्चमो न षष्ठः सप्तमो नाप्युच्यते। (अथर्व० १३।४।१७)
नाष्टमो न नवमो दशमो नाप्युच्यते। (अथर्व० १३।४।१८)
सर्वे अस्मिन् देवा एकवृतो भवन्ति। (अथर्व० १३।४।२१)
द्यावाभूमी जनयन् देव एकः। (अथर्व० १३।२।२६)

स परमेश्वर एक एव, एक एव, स एकवृत् एक एव।

यदुक्तम्—'असम्मितः' इति—न हि केनाप्येकीभावमाप्तेन मातुं शक्य इति कृत्वा 'असम्मितः' इत्युक्तं भवति।

भवति चात्रास्माकम्—

एकात्मता मानमिहास्ति यस्य
स सम्मितो विष्णुरनन्तकर्मा।
सर्वं क्षयं याति विनाशयुक्तं
नैकोऽप्यलं मातुमिहास्ति कश्चित्॥१४५॥

समः—१०६

समानं मानं यस्य स 'समः'। समानोपपदेऽपि 'कः' बाहुलकाद्वा। यद्वा—मा लक्ष्मीः, लक्ष्यते यया सा लक्ष्मीः, भगवांश्च जगता मारूपेण लक्ष्यते ज्ञायत इति 'मा' जगता सहान्तर्बहिश्च वर्तत इति कृत्वा 'समः'।

मन्त्रलिङ्गञ्च—

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न।
योऽस्याध्यक्षः परमे व्योमन्त्सो अंग वेद यदि वा न वेद॥
ऋग्० १०।१२६।७॥

स पर्यगात्। यजु० ४०।८॥

भवति चात्रास्माकम्—

समान-मानः स समोऽव्ययो वा
लक्ष्म्या च यो वा 'सहितः' 'समो' वा।
लक्ष्मीर्हि लाभादुत लक्षणाद्वा
जगच्च 'मा' तत्सहितः 'समो' वा॥१४६॥

सर्गारम्भाद्यक्षणादाकल्पं विष्णुर्जगता लक्ष्यते विज्ञाप्यत इति 'समः'=विष्णुः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अमोघः—११०

न मुह्यतीति—अमोहः सन् 'अमोघः' उच्यते=अव्यर्थः, अवितथसंकल्पः, सत्यसंकल्पो वा। 'मुह वैचित्ये' दैवादिकः, तस्मात् पचाद्यच्='मोहः', नञ्पूर्वोऽमोहः पृषोदरादित्वात् न्यङ्क्वादित्वाद्वा हस्य घत्वम्-'अमोघः' इति।

विष्णुर्हि स्वयं सत्यसंकल्पः सन् भक्तं सत्येन संकल्पेन युनक्ति। अर्थादमोघगुणवन्तं भगवन्तं ध्यायता ध्यात्रा स एव संकल्पः क्रियते यः प्रकृतेर्नियमं नोल्लंघते।

मन्त्रलिङ्गञ्च—

सा मा सत्योक्तिः परिपातु विश्वतो द्यावा च यत्र ततनन्नहानि च।
विश्वमन्यन्निविशते यदेजति विश्वाहापो विश्वाहोदेति सूर्यः।।

ऋग्० १० ।३७ ।२।।

सत्योक्तिः सत्याज्ञा। अतः स सत्यसन्धः 'अमोधः' उक्तो भवति।

भवति चात्रास्माकम्—

अमोघविष्णोर्न हि कर्म मुग्धं
न तद्व्यवस्था शिथिलत्वमेति।
भक्तेन काम्यं तदु यद् भवितृ
[1]मोघांशमत्राशु जहात्यमोघः।।१४७।।

पुण्डरीकाक्षः—१११

'पुण कर्मणि शुभे' तौदादिकः, तस्मात् ***'फर्फरीकादयश्च'*** (उणादि० ४।२०) सूत्रेण ईकन् प्रत्यये धातोर्डकारे सुडागमे गुणाभावे पुण्डरीकः।

पुण्डरीकं=हृदयम्, तमश्नुते व्याप्नोतीति च 'पुण्डरीकाक्षः'।

मन्त्रलिङ्गञ्च—

पुण्डरीकं नवद्वारं त्रिभिर्गुणेभिरावृतम् ।
तस्मिन् यद् यक्षमात्मन्वत् तद्वै ब्रह्मविदो विदुः।।

अथर्व० १०।८।४३।।

कीदृशः स इत्यग्रिमेण मन्त्रेण व्यनक्ति वेदः—

१. मोघांशं=प्रकृतेर्विरुद्धांशम्, व्यर्थांशम्, असंभवांशम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अकामो धीरो अमृतः स्वयंभू रसेन तृप्तो न कुतश्चनोनः।
तमेव विद्वान् न बिभाय मृत्योरात्मानं धीरमजरं युवानम् ।।

अथर्व० १० ।८ ।४४ ।।

भवति चात्रास्माकम्—

यश्चेतनः खैः कुरुते स्वकर्म
तस्यास्ति हृत्, तत्र निगूढ उक्तः ।
स पुण्डरीकाक्षपदेन विष्णु-
र्ज्ञेयो नृभिर्यो 'न कुतश्चनोनः' ।।१४८।।

वृषकर्मा—११२

वृषो धर्मः, धारणलक्षणः, कर्म क्रिया। धारणलक्षणमेव कर्म=क्रिया यस्य स 'वृषकर्मा'। एतेन वृषकर्मणा नाम्ना विज्ञाप्यते, यत् सर्वत्र व्यापकेन विष्णुना यद्यथाविधं रचितं कृतं वा, तथाविधं सदैव तद् धर्तुं जीवयितुं रूपेण वा संयोजयितुमर्ह्यते। तद्यथा—उच्चैस्त्वात् सूर्यस्य, नेत्रे अपि सर्वशरीर उत्तमांगे व्यवस्थापिते, नान्यत्र। नीचैस्त्वात् पृथिव्याः, पादौ च पृथिवीस्थानीयौ, तौ पृथिवीमन्यं वाधारं प्राप्य क्रियां कुरुतः, तत्र यदि कश्चित् प्रभोर्व्यवस्थाक्रम-मनादृत्यान्यथा चरति स दुःखमेवाप्नोति।

एतेन वृषकर्मणा नाम्ना विज्ञाप्यते यत् स एव विष्णुर्जगद्दधाति। सर्गारम्भादद्यावधि यावत् न तस्य कर्म्मणि विकारः संगच्छते। यस्तु कश्चिद् दृश्यते विकारः सोऽपि कञ्चिद्दोषमपेक्ष्य, अधिकरणरूपस्य मातुः पितृरूपस्य च बीजस्य तद्दोषयुक्तत्वात्।

भवति चात्रास्माकम्—

वृषो हि धर्मो धृति-लक्षणोऽसौ
करोति तद्येन धृतं जगत् स्यात्।
तत् कर्म विष्णोर्वृषकर्म-नाम्नो
व्यस्तं क्षयायार्हति विश्वमेतत् ।।१४६।।

सर्वव्यापको विष्णुः स्वनियमविरुद्धं कर्म न करोतीति ज्ञापयितुं तस्य 'वृषकर्मा' इति नाम व्यवहारायोपक्लृप्तम्। व्यस्तं विरुद्धं कर्म चेत् तस्य स्यात्, तदा विश्वमिदं नाशमाशूपेयात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वृषाकृतिः—११३

'वृषो' धर्मः, सकलान् कामान् वर्षतीति कृत्वा। 'वृषः' इत्यत्र इगुपधलक्षणः कः प्रत्ययः। आङ्पूर्वात् 'करोतेः' क्तिनि स्त्रियां भावे 'आकृतिः' शब्दो निष्पद्यते। आकारो वा तत्पर्यायः, रूपं वा। लोकलोकान्तराणां धारणेन य उत्पद्यत आकारः, सा आकृतिरस्येति 'वृषाकृतिः'।

मन्त्रलिङ्गञ्च—

येन द्यौरुग्रा पृथिवी च दृढा येन स्वः स्तभितं येन नाकः।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ।।

ऋग्० १० ।१२१ ।५ ।।

सारार्थतो—यदिदं यथास्थानस्थितं दृष्टिगम्यं दृष्टेर्वा परं चास्ति, तत् सर्वव्यापकस्य विष्णोरेव रूपम्। न हि तस्मात् परं किंचिद्, यत् स्तभ्नाति लोकलोकान्तराणि। यथेदं लोकसम्मितं शरीरमिन्द्रियाणि, आशयान्, मनसो विकारांश्च धरति स्तभ्नाति वा, परन्तु तस्य शरीरस्यापि चेतयिता हृदयस्थ आत्मा पृथक् सन्नपि शरीरेणाहूयते लिंग्यते व्यज्यते, अमुथैवायं पुष्कराक्षो महान् सर्वमात्मनि धरन् 'वृषाकृतिः' इति शब्देनर्षिभिर्व्यवहाराय शब्दितो ज्ञानसौलभ्याय।

भवति चात्रास्माकम्—

यल्लोकलोकान्तरधारणोत्थं[1]
रूपं विभोस्तन्न जरामुपैति ।
वृषाकृतिः शम्भुरनामयोऽयं
सनातनं रूपमिदं बिभर्त्ति ।।१५०।।

❖ ❖ ❖

रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः।
अमृतः शाश्वतस्थाणुर्वरारोहो महातपाः ।।२६।।

११४ रुद्रः, ११५ बहुशिराः, ११६ बभ्रुः, ११७ विश्वयोनिः, ११८ शुचिश्रवाः। ११९ अमृतः, १२० शाश्वतस्थाणुः, १२१ वरारोहः, १२२ महातपाः।।२६।।

१. धारणोत्थम्-धारणा=धर्मस्तज्जम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रुद्रः—११४

रोदयतीति 'रुद्रः'। यो हि रुद्रस्य विष्णोर्नियमानुल्लंघते स तं रोदयति। तद्यथा— यदि कश्चित् प्रज्ञापराधाद् यानस्याग्रे पतति, तं तद्यानमाघातप्रदानेन रोदयति।

मन्त्रलिङ्गञ्च—

मृडा नो रुद्रोत[1], नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते।
यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु।।

ऋग् १।११४।२।

भवन्ति चात्रास्माकम्—

यःसर्वलोकानुगतस्य विष्णो-
र्विधानमाद्यं जगतो भनक्ति[2] ।
तं रोदयत्येव स रुद्रकर्मा
विधानभंगोद्भवदुःखजालैः ।।१५१।।

दुःखस्य रुद्रस्य च सारमित्वा
प्रज्ञापराधाच्च भयं विमृष्य ।
नूनं नरः सत्त्वगुणप्रसूतान्
क्रियाकलापान् विदधीत भूयः ।।१५२।।

प्रबुद्धसत्त्वस्य महाशयस्य
दुःखानशेषानपहन्ति रुद्रः ।
भूपो यथा तुष्टमना विधिज्ञं
दुःखैरशेषै रहितं विधत्ते ।।१५३।।

शिवपुराणे चेत्थं व्याख्यातम्—

रुर्दुःखं दुःखहेतुर्वा, तद् द्रावयति यः प्रभुः।
रुद्र इत्युच्यते तस्माच्छिवः परमकारणम् ।।

संहिता ६, अ०, ६,१४।।

प्राणा वा उत्क्रामन्तो रोदयन्ति तस्मात् तेऽपि 'रुद्राः', सेन्द्रिय आत्मा एकादश इति।

---

१. हे रुद्र! विष्णो! २. वैदिकान्नियमानुच्चरते स्वैरमाचरतीत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बहुशिराः—११५

बहुशब्दोऽनेकपर्यायः सहस्रपर्यायो वा, **'सहस्रशीर्षाः पुरुषः'** (यजु० ३०।१) इति मन्त्रलिङ्गात्।

यथा लोके ज्ञात्रा स्वकं विविधं विज्ञानं ज्ञापयितुं नानाविधं कर्म क्रियते, शिल्पिना च शिल्पं क्रियते, कविना च विविधं काव्यं क्रियते, तथैव सर्वविज्ञानवता भगवता स्वकमनन्तं विज्ञानं विज्ञापयितुं पृथक् पृथक् योनीनां पृथक् पृथक् शिरसामाकृतयो निर्मीयन्ते।

तासां च योनीनां प्रतिवस्तु भिन्ना भिन्ना हानोपादानदृष्टिः। तद्यथा—मनुष्यास्तृणमखाद्यं मत्वा त्यजन्ति, पशवश्च तत् प्राणेभ्यो हितं मत्वाश्नन्ति। मृतं क्षिपन्ति हेयं मत्वा, गृध्राश्च तमश्नन्ति। प्रियं हृद्यं च मत्वा। मलं=पुरीषं मनुष्या उत्सृजन्ति, सूकराश्च तदश्नन्ति। ष्ठीवनं ष्ठीव्यते, जले चेत् थूत्क्रियेत तदा मत्स्यास्तदश्नन्ति। कपोतो पाषाणकणानश्नाति। सर्पान्नरा बिभ्यति, नकुला मयूराश्चिल्लकाश्च तं सर्पं मारयन्ति।

पृथक् पृथक् चेन्द्रियगोलकानां निर्माणं पृथक् पृथक् योनीनाम् एकं चापीन्द्रियगोलकं द्वयोरिन्द्रिययोः कर्म करोति। तद्यथा—सर्पश्चक्षुःश्रवेति नाम्ना प्रसिद्धः। भिन्नो भिन्नश्च मैथुनक्रमो भिन्न-भिन्नयोनीनामिति। सर्प-कच्छप-मत्स्यादीनामेकधैव शतशोऽण्डानां प्रसवनं, स्वेदजानां च भिन्नो भिन्नः प्रसवक्रमो ज्ञानं च पृथक् पृथक् तेषामिति।

इत्थमानन्त्यं ज्ञानस्य विज्ञापयितुमेक एव सर्वव्यापको विष्णुर्बहुशिरोरूपं बिभ्रत् स्वकं व्यापकत्वं विज्ञापयति। एष हि सनातनः क्रमस्तस्य विष्णोरिति।

भवति चात्रास्माकम्—

अनन्तवेदः स महान् मनस्वी
विधाय योनीर्विविधा विचित्राः।
शिरःसु सर्वेष्वधिवास्य वेदं[1]
स्वकं बहुत्वं शिरसां करोति।।१५४।।

शब्दमात्रस्य पर्यायत्वात् **'सहस्रमूर्द्धा'** इत्यप्येतेन व्याख्यानेन व्याख्यातोऽवगन्तव्यः।

१. वेदो ज्ञानम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

सहस्त्रशीर्षाः पुरुषः (यजु० ३१।१)

आर्षप्रयोगो यथा—

विष्णुं सहस्त्रमूर्द्धानं चराचरपतिं विभुम्।

स्तुवन्नामसहस्त्रेण ज्वरान् सर्वानपोहति ।। (चरके ज्वरचिकित्सिते)

सप्तत्रिंशत्तमे श्लोके द्विशतोत्तरं चतुर्विंशतितमं नाम—'सहस्त्रमूर्द्धे'ति।

बभ्रुः—११६

'भृञ् भरणे' भौवादिको, 'डुभृञ् धारणपोषणयोः' जौहोत्यादिकः, आभ्यां ***'कुर्भ्रश्च'*** (उणा० १।२२) सूत्रेण प्रकृतेर्द्वित्वं कुश्च प्रत्ययः। अत्र 'द्वे' इति पदं पूर्वसूत्रादनुवर्तते। भरति बिभर्ति वा 'बभ्रुः' कपिलो वर्णः, नकुलो वा। अत्र सूत्रे बाहुलकात्—चक्रुः, पपुः। जघ्नुः प्रभृतयोऽपि सिद्धा भवन्ति।

भरणं नाम सर्वविधजीवनार्होपकारणैः सनाथीकरणम्। को नाम तं व्यापकं विष्णुं विना सूक्ष्मकीटादारभ्यामहच्छरीरं यावत् जीवान् सर्वविधेन्द्रियाणामर्थैस्तान् भरितुं समर्थ इति कृत्वा 'बभ्रुः' इति विष्णोर्नाम व्यवहाराय प्रक्लृप्तं तत्त्वदर्शिभिः।

भवति चात्रास्माकम्—

अनन्तयोनीर्विविधेच्छबद्धा
वयश्च तासां विषमं पृथक्शः।
पृथक् पृथक् भोग्यशतैश्च तास्ता
बिभर्ति 'बभ्रु' भगवान् स विष्णुः।।१५५।।

विश्वयोनिः—११७

विश्वस्य सकलस्य योनिः **'विश्वयोनिः'**। 'यु मिश्रणामिश्रणयोः' धातुरादादिको, यु जुगुप्सायां चौरादिकस्ताभ्यां, ***'वहिश्रिश्रुयुग्लाहात्वरिभ्यो नित्'*** (उणा० ४।६१) अनेन सूत्रेण नि-प्रत्ययो निच्च स भवति, तेन 'योनिः' शब्दो निष्पद्यते। यौति संयोजयति मिश्रणं करोति—पृथक्=अमिश्रणं करोतीति वा 'योनिः'। युवन्ति मिश्रामिश्रितानि वा गर्भ-वीजानि भवन्त्यस्यामिति 'योनिः', गर्भाशयो वा, कारणं वा स्त्रीणामुपस्थेन्द्रियं वा। यौति जुगुप्सितः स्त्रावो वा स्त्रवत्यस्याः सा 'योनिः'।

विश्वस्य सकलस्य बहुविधसृष्टेश्चतुर्विधायाः स याथार्थ्येन मिश्रणकर्त्ता

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विष्णुरेवेति कृत्वा 'विश्वयोनिः' उच्यते। कैर्हानोपादानभूतैस्तत्त्वैः पुरुषः प्रक्लृप्तः, कैश्च स्त्री, कैश्च गौः, कैश्च श्वा, कैश्च सिंह-सूकर-मृगादयो प्रक्लृप्ताः, कैश्च तेषां स्त्रिय इति, कैश्च पक्षिणः, कैश्च तेषां स्त्रिय इति, कैश्च मत्स्यकच्छपपादयो निर्मिता': कैश्च तत्त्वविशेषैस्तेषां स्त्रियः प्रक्लृप्ता इति स एव विष्णुर्वेत्तीति कृत्वा स 'विश्वयोनिः' उच्यते।

अमुथैव स्थावरसृष्टेर्बहुविधविकल्पनाया प्रक्लृप्तायाः स एव मिश्रणामिश्रणकर्त्ता, येनाम्र-वट-श्लेष्मान्तकादीनां पार्थक्यं घासादीनां च विविधता भवति। नानाविधानां पाषाणानां सुवर्णादीनां च धातूनां पृथक्ता विद्योतिता भवति। तेषां तत्त्वानां स एव संयोजयिता वियोजयिता चातः स 'विश्वयोनिः' उक्तो भवति। श्रुतिश्च तस्मात् विष्णोर्विराजोत्पत्तिमाचष्टे। द्रष्टव्यं—ऋग्० १० ।९० ।१-१६ ऋचः यजुष्यप्येवम्-अ० ३१ उद्धृताश्चात्रैव मन्त्राः 'यतः सर्वाणि' एकादशे श्लोके ३२ तमे पृष्ठे।

विकृतोत्पत्तिः क्षेत्रबीजयोर्विकृतत्वात्। मिश्रितोत्पत्तिः क्षेत्रबीजयोः पृथक्-पृथग् योनिस्थयोः सद्भावात्। तेन विश्वयोनिना भगवता सकलं विश्वं सनातनात् कालाद् आरभ्याकल्पं यथामर्यादं प्रसवाय नियन्त्रितमस्तीति कृत्वा स 'विश्वयोनिः' भगवान् विष्णुरुक्तो भवति।

भवति चात्रास्माकम्—

कैः कैरुपादानविभक्ततत्त्वै-
मर्त्यो मृगेन्द्रा झष-काक-यूकाः ।
आम्रो लता प्रस्तर-हेम-वज्रं
युवन्ति यो वेत्ति स 'विश्वयोनिः।।१५६।।

शुचिश्रवाः—११८

शुचीनि श्रवांसि दिशोऽस्येति 'शुचिश्रवाः'। भगवतः श्रोत्राद् दिशामुत्पत्तिरिति ***'दिशः श्रोत्रात्'*** (अ० ३१) इति याजुषो मन्त्रलिङ्गात्। शुच्यो दिशोऽस्येति समानं भवति 'शुचिश्रवा' इति नाम्ना विज्ञापितार्थेन।

सारार्थोऽयम्—न हि कापि दिक् तथाभूता विद्यते, यत्र भगवतो विष्णोर्नामसंकीर्त्तनं सनातनात् कालान्न स्यात्। अत एव विष्णोः पर्यायनामानि पवित्राणि विज्ञायन्ते। गौणवृत्त्यास्मदादीनां कर्णवतां श्रोत्राणि विष्णोर्नामश्रवणेन पवित्राणि भवन्ति। श्रवणयोः कुण्डलानां धारणेन च तयोः शुचित्वमभिलक्ष्यते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

न कापि दिक् यत्र न तं स्तुवन्ति
ध्वनिर्न सा या दिशमन्तरा स्यात् ।
भूतात्मसंकीर्त्तन-नाम-यज्ञा-
च्छुचिश्रवाः स प्रणवादिवाच्यः ॥१५७॥

अमृतः—११६

न विद्यते मृतं मरणमस्येति 'अमृतः'।

मन्त्रलिङ्गञ्च—

अकामो धीरो अमृतः स्वयंभूः, रसेन तृप्तो न कुतश्चनोनः।
तमेव विद्वान् न बिभाय मृत्योरात्मानं धीरमजरं युवानम् ॥

अथर्व १०।८।४४।

भवतश्चात्रास्माकम्—

यः शोकमोहादिमनोविकारै-
र्जन्मादिबाल्यादिशरीरधर्मैः[1] ।
मुक्तोऽव्ययः शाश्वतधर्मगोप्ता
सनातनो विष्णुरिहामृतः सः ॥१५८॥

प्राणाः सदार्हन्ति निवासहेतो-
र्मर्माणि शारीरविकारजानि ।
न तानि शम्भोरमृतः स विष्णु-
र्जगच्छरीरेण विराजते सः ॥१५९॥

शाश्वतस्थाणुः—१२०

शाश्वतश्चासौ स्थाणुश्चेति 'शाश्वतस्थाणुः'। स्थाणोर्व्याख्याप्रसंगे स्थाणुशब्दो निष्पादित आस्ते, तत्र द्रष्टव्यम्।

---

१. 'जन्मादि' इत्यत्रादिशब्देन षड्भावविकारा गृह्यन्ते, तथा 'बाल्यादि' इत्यादिशब्देन तिस्रः शरीरावस्था बाल्ययौवनजरा गृह्यन्ते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

शश्वत् सदार्थेऽव्यय आत्मसिद्धः
सदाभवः शाश्वत एव विष्णुः ।
नगोऽचलः स्थाणुरनेकलिंगो
यः शाश्वतस्थाणुरसौ हि विष्णुः ।।१६०।।

वरारोहः—१२१

वरः श्रेष्ठ आरोह उत्पत्तिर्बीजानां फलेऽस्मादिति 'वरारोहो' भगवान् सर्वव्यापको विष्णुरिति। तस्यैव महामहिमवतो विष्णोरेषा पद्धतिर्यत् प्रतिफलं तत्र फले तस्य बीजस्योदयो भवति, न ह्येवंविधिना कोऽपि बीजं निर्मातुं क्षम इति कृत्वा स विष्णुर्'वरारोह'पदेनोच्यते। आकल्पात् कल्पान्तं यावत् सरणिरेषा विष्णोर्वरारोहत्वं ज्ञापयति। यद्वा-वरः श्रेष्ठ आरोह उदयो यस्य स वरारोहः सूर्यः।

श्रुतिलिङ्गञ्च—

ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत। १० ।१९० ।१।।

भवति चात्रास्माकम्—

ऋतं च सत्यं समुदीयतस्ततो
जगत्प्रसूतौ भवतश्च बीजे ।
न यद्विनारोहति बीजयुग्मं
फले 'वरारोह'[1] इहास्ति विष्णुः ।।१६१।।

महातपाः—१२२

'तप सन्तापे' धातुः, महदेकीभावेन तपोऽस्येति 'महातपाः'। स हि विष्णुः सनातनात् कालाल्लोकान् सृजन् धरन् याथार्थ्येन कर्मफलानि विभजन् महत्तप आतिष्ठन्निव विज्ञापयत्यात्मानमिति 'महातपा' विष्णुरुक्तो भवति।

---

१. वरः श्रेष्ठ आरोहोंऽकुरो वास्य स 'वरारोहः' सनातनो विष्णुः।
मन्त्रलिङ्गञ्च—
यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त।
इयं विसृष्टिर्यत आबभूवेति मन्त्रलिंगाद् 'वरारोहः' स विष्णुः।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

महत्तपो ज्ञानमजस्य यस्मात्
महातपा विष्णुरजोऽमृतः सः ।
भवाद्यकालात् क्षणमद्य यावत्
बिभर्ति तेजांसि स खेचराणि[1] ।।१६२।।

❖ ❖ ❖

सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः।
वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित्कविः ।।२७।।

१२३. सर्वगः, १२४. सर्वविद्भानुः, १२५. विष्वक्सेनः, १२६ जनार्दनः। १२७. वेदः, १२८. वेदवित्, १२६. अव्यङ्गः, १३०. वेदाङ्गः, १३१. वेदवित्, १३२. कविः ।।२७।।

सर्वगः—१२३

सर्वत्र गच्छतीति 'सर्वगः'। सर्वशब्दोपपदे गम् धातोः *'अन्तात्यन्त'* (पा०३।२।४५) इति 'ड' प्रत्ययः। सर्वत्र व्याप्तत्वादेनदुक्तं भवति। सर्वं जगत् गमयति गतिं प्रापयतीति वा 'सर्वगः' णिजर्थो वात्राभिमतः।

मन्त्रलिङ्गञ्च—

तदेजति[2] तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।।

यजुः ४०।५।।

भवति चात्रास्माकम्—

स्थानं न तद् यत्र न तस्य सत्ता
सोऽन्तर्बहिश्चास्ति सुवर्तमानः।
स सर्वगो विष्णुरनन्तवीर्यो
जवेन सर्वं गमयत्यजस्रम् ।।१६३।।

१. खेचराणि तेजांसि=दिविचरा ग्रहाः। २. तदेजति णिजर्थोऽत्र तदेजयतीति यावत्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वविद्भानुः—१२४

सर्वं वेत्तीति 'सर्ववित्'। सर्वं विन्त इति 'सर्ववित्'। सर्व विन्दतीति 'सर्ववित्'। सर्वं विद्यत इति 'सर्ववित्'।

भवति चात्रास्माकम्—

स सर्वविद् विश्वमुखो मखोऽजः
सर्वं जगत् वेत्ति स विष्णुरुक्तः।
गुप्तं न शम्भोर्भुवि किंचिदास्ते
जगत् समस्तं किल तत्र शेते ।।१६४।।

भानुः—'भा दीप्तौ' आदादिको, ***'दाभाभ्यां नुः'*** (उणा० ३।३५) सूत्रेण 'नु' प्रत्ययः। भाति दीप्यतेऽसौ 'भानुः' सूर्यः, प्रकाशः किरणो वा। प्रसंगप्राप्तं किञ्चिदुच्यते—स्वर्भानू राहुः। चित्रभानुः सूर्यः, अग्निर्वा। बृहद्भानुरग्निः परमेश्वरो वा, बृहद्भानो इति मन्त्रे सम्बुद्धौ दर्शनात्। भाययति दीपयतीति वा 'भानुः'।

भवति चात्रास्माकम्—

न यद्विना भाति तडित् कदाचि-
न्न यद्विना भान्ति खगाः समस्ताः ।
सोऽनन्तकर्मा स सखा स विष्णुः
स एव भाता सकलस्य भानुः ।।१६५।।

सर्वविच्चासौ भानुश्च 'सर्वविद्भानुः'।

भवति चात्रास्माकम्—

स सर्वविद्भानुरसौ विभाता
हृदन्तरा ज्ञानलवेन भाति ।
ज्ञानप्रभः सन्निखिलं विचष्टे
स [1]वाडवस्तापयते समुद्रम् ।।१६६।।

विष्वक्सेनः—१२५

इनः—'इण् गतौ' आदादिकः, तस्मात् ***'इण्सिञ्जि०'*** (उणा० ३।२) सूत्रेण

१. वडवानलः समुद्राग्निर्यो हि भूस्थानि वारीणि तापयति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'नक्' प्रत्ययः। इनो राजा स्वामी वा इनेन सह सेनः, ***'तेन सहेति तुल्ययोगे'*** (पा० २।२।२८) सूत्रेण समासः। ***'वोपसर्जनस्य'*** (पा० ६।३।८२) इत्यनेन सहस्य सो वा।

'विषु'-अव्ययपूर्वोऽञ्चति भौवादिकः तस्मात् ***ऋत्विक्दधृक०*** (पा० ३।२।५८) इत्येन क्विनन्तो 'विष्वक्' विश्वगिति सर्वतोभावेऽव्ययमपि। 'इनो' राजा, तेन सह वर्त्तत इति 'विष्वक्सेनः'। **'एको विश्वस्य भुवनस्य राजा'** (ऋग्० ६।३६।४), **'इन्द्रो राजा जगतश्चर्षणीनाम्'** (ऋग् ७।२७।३) तेन भुवनस्य राज्ञा सह वर्त्तत इति 'सेना'। विष्वक् सर्वदिग्गामिनी सेना अस्येति 'विष्वक्सेनो' विष्णुः।

विष्वक्सेना=यथा-टिड्डीदलानि, मक्षिकादलानि, मधुमक्षिकादलानि, वरटिकादलानि, मशकदलानि, गृध्र-सूकर-सर्पदलानि, पालकवर्गे-गो-महिषी-अजादलानि। जलप्रदानाय, वायुदलानि; प्रक्षालनकर्तृवर्गे-मत्स्य-कच्छप-मकरादीनां दलानि, दिग्दर्शनमात्रमुक्तं बाहुल्येन विज्ञैः स्वयमुन्नेयम्।

एषा हि विष्वक्सेनस्य सेना न हि तदाज्ञां विना कमपि व्यथते दुःखयति वा। सनातनात् कालादाकल्पं यावद् रक्षन्नायाति रक्षयिष्यति च। 'विष्वक्सेनो' निजसृष्टिरक्षार्थं पुरुषकल्पितसेनां वृथाकरोति।

भवतश्चात्रास्माकम्—

नभोऽथ वायुं पृथिवीं समुद्रं
प्रकल्प्य तद्दोषविनाशनानि ।
यथार्हशारीरविकारवन्ति
सृष्ट्वा स भूतानि विराजते तैः ।।१६७।।

अतो मुनीन्द्रैः कथितो हि 'विष्वक्-
सेनः' स विष्णुर्न विना तदाज्ञाम्।
तदंगतोऽपीह हिनस्ति किंचिद्
वृथाकरोत्येव चमूः स विष्णुः।।१६८।।

जनार्दनः—१२६

जायत इति 'जनः' जन्मी जन्तुर्वा। जनानर्दयति क्षोभयतीति 'जनार्दनो' विष्णुः। जनार्दनो भगवान् विष्णुः शीतोष्ण-दिवारात्र-सुखदुःख-क्षुत्तृड्-सुभिक्षदुर्भिक्ष-सुदशादुर्दशा-वृद्धिक्षय-जन्म-मृत्यु-यौवनजरा-रोगशोक-सकलांगविकलांग-सम्पद्-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विपदादिभिर्युग्मैः सर्वजन्तूनर्दयति, तस्मात् स विष्णुर्जनार्दनसंज्ञां प्रापितो ज्ञान-सौलभ्याय। पद्धतिरेषा च तस्य शश्वदायाति कल्पान्तं च तथैव यास्यति।

भवति चात्रास्माकम्—

जनार्दनो विष्णुरयोनिजन्मा
युग्मोदयेनार्दयते स जन्तून् ।
न सज्जनं शंसति, दुर्जनं नो
हिनस्ति, तद्विक्रमणं[1] हिनस्ति ।।१६६।।

वेदः—१२७

'विद ज्ञाने' आदादिको, 'विद सत्तायाम्' दैवादिको, 'विद्लृ लाभे' तौदादिको, 'विद विचारणे' रौधादिको, 'विद चेतनाख्याननिवासपरिवादेषु' चौरादिकः। विद-धातोः सामान्येन ***'हलश्च'*** (पा० ३।३।१२१) इति सूत्रेण 'घञ्' प्रत्ययः, तेन 'वेद' इति निष्पद्यते। यः सर्वत्र विद्यते, सर्वं वेत्ति वा स 'वेदः'। एवं धात्वर्थो वेदो भगवान् विष्णुः।

मन्त्रलिङ्गञ्च—

वेदोऽसि। यजुः २।२१।।
यो अस्याध्यक्षः परमे व्योमन् सो अङ्ग वेद यदि वा न वेद।
ऋग् १।१२६।७।।

भवतश्चात्रास्माकम्—

विष्णुर्हि नूनं तमसः परस्ता-
दतः स वेदः, स हि विद्यते वा।
स लभ्यते वेदविदा च वेदः
स चेतनो वेदयतेऽथ वेदः ।।१७०।।

विचारपूर्वा कृतिरत्र शम्भो-
रतः स वेदो न हि तत्र दोषः ।
व्याख्याति विश्वे प्रतिवस्तु वेदं[2]
विश्वस्य सूत्रं स्थितमस्ति वेदे ।।१७१।।

१. विक्रमणम्—विरुद्धक्रान्तारं विरुद्धकर्त्तारमिति वा। २. वेदम्-विष्णुम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वज्ञानमयत्वाद् वेदरूपत्वाच्च विष्णोः श्रुतयोऽपि सर्वज्ञाननिबद्धसूत्ररूपाः। यथा च मनुः—

स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः। मनुः २।७।।

अपरं च—

चातुर्वर्ण्यं त्रयो लोकाश्चत्वार आश्रमाः पृथक् ।
भूतं भव्यं भविष्यच्च, सर्वं वेदात् प्रसिद्ध्यति ।। मनुः १२।६७।।

वेदप्रकाशकाः—

अग्निवायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् ।
दुदोह यज्ञसिद्ध्यर्थम्, ऋग्-यजुः-सामलक्षणम् ।। मनुः १।१३।।

परब्रह्मणो वेदानां प्रकाशितत्वाद् वेदज्ञानमपि सनातनम्—

यज्ञेन वाचः पदवीयमायन् तामन्वविन्दन्नृषिषु प्रविष्टाम्।

ऋग् १०।७१।३।।

महाभारतेऽपि—

युगान्तेऽन्तर्हितान् वेदान्, सेतिहासान् महर्षयः ।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवा ।।

वेदरूपः स्वयं भगवान् तस्माद् वेदानां जातत्वात्। यथा च वेदः—

तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत ।।

यजुः ३१।७।।

वेदानां चतुष्ट्वज्ञापिका श्रुतिः—

यस्मादृचो अपातक्षन् यजुर्यस्मादपाकषन् ।
सामानि यस्य लोमान्यथर्वांगिरसो मुखम्
स्कम्भं तं ब्रूहि कतमः स्विदेव सः ।।

अथर्व० १०।७।२०।।

अत्र ब्रह्मणो मुखरूपमथर्ववेदोऽभिहितः। नित्यत्वाद् ब्रह्मणो वेदा अपि नित्याः। यथाह श्रुतिः—

तस्मै नूनमभिद्यवे वाचा विरूपनित्यया[1] ।
वृष्णे चोदस्व सुष्टुतिम् ।। ऋग् १०।७५।६।।

१. 'वाचा विरूपनित्यया' वेदवाण्या नित्यतेति भावः। इति दिङ्मात्रमुक्तं 'वेद'रूपः स भगवान् 'भगवद्रूपो' वा 'वेदः' इति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

इदं जगन्नैव नरेण शक्यं
यथार्थतो ज्ञातुमदोषयुक्तम् ।
को नाम शक्नोति यथार्थशब्दै-
र्वक्तुं हि तज्ज्ञस्तु विना तदीशम्[1] ।।१७२।।

उक्तं च—

जगद् वेदस्य व्याख्यानं वेदो विश्वप्रकाशकः ।

सत्याग्रहनीतिकाव्ये ५।३।६।।

वेदवित्—१२८

विद्यते=ज्ञायते ज्ञानविषयीक्रियत इति 'वेदः'। विद् ज्ञाने आदादिकाद् **धातोर्हलश्च** (पा० ३।३।१२१) इति सूत्रेण कर्मणि घञि सिध्यति। तद्रूपे कर्मण्युपपदे 'विद्' धातोः **'सत्सूद्विष'** (पा० ३।२।६१) सूत्रेण कर्तरि क्विप्। एवञ्च ज्ञानविषयीक्रियमाणं प्रभवलयानुबन्धि पुनः पुनर्भवदिदं वेदरूपं जगद् यो याथार्थ्यतो वेत्ति स 'वेदविद्' विष्णुः।

सङ्गच्छते चैतद् यथा लोके कश्चिदपि कार्यस्य कर्ता यथा स्वकृतं कार्यं तत्त्वतो वेत्ति न तथान्यः। भगवता च विहितमेतद् जगद्रूपं कर्म न कस्यचित्तिरोहितमपितु सर्वस्य प्रत्यक्षम्। तथाहि ब्रह्मापि सृष्टेरादिभूतमङ्गं नैव तत्त्वतो वेत्ति, किम् साधारणो जनो बाह्यदृष्टिः। अत एवैतदसंविदानं वेदोऽन्ध इत्याचष्टे। तथाहि "**पश्यदक्षण्वान्न विचेतदन्ध**" ऋक्० १।१६४।१६।।

भवति चात्रास्माकम्—

यथार्थतो वेदविदं तमाहु-
र्यो वेत्ति वेदं जगदात्मसृष्टम् ।
पश्यन्न पश्यत्यपि बाह्यदृष्टिः
पुरःस्थितं वस्तु नरो यथान्धः[2] ।।१७३।।

१. तदीशम् तस्य जगत ईशं विनेत्यर्थः। २. अन्धः=विमूढः=विवेकरहितः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अव्यङ्गः—१२६

'अगि गत्यर्थो' भौवादिकः। अंगति गच्छति क्रियायां साधनं भवतीति 'अंगम्' न विद्यते दृश्यादृश्ययोनिवदंगमस्येति 'अव्यंगः'। हस्तपादादियुक्तवद् व्यक्तिर्न यस्य सो'ऽव्यंगो' निराकारोऽजरोऽमरः।

भवति चात्रास्माकम्—

आसर्गतोऽद्यावधि योऽविरामं
स्वाभाविकज्ञानबलक्रियाभिः ।
अव्यङ्गनामा कुरुते हि विश्वं
[1]नाप्नोति साङ्गो न निजेन्द्रियैस्तम्।।१७४।।

वेदांगः—१३०

वेदाः अगन्ति गच्छन्ति प्राप्नुवन्ति यमसौ 'वेदांगो' विष्णुः। वेदा अंगयन्ति गमयन्ति प्रापयन्ति यमसौ 'वेदांगो' विष्णुरिति।

मत्रलिङ्गञ्च—

अपूर्वेणेषिता वाचस्ता वदन्ति यथायथम्।
वदन्तीर्यत्र गच्छन्ति तदाहुर्ब्राह्मणं महत्।।

अथर्व० १० ।८ ।३३ ।।

'अपूर्वेण' नास्ति पूर्वो यस्मात् तथाविधेन परमेश्वरेण 'इषिताः' प्रेरिता 'वाचो' वाण्यः श्रुतयः 'ता' 'वदन्ति' कथयन्ति वर्णयन्ति प्रकाशयन्ति 'यथायथम्' यथार्थम्। ता 'वदन्ती'र्वाचो 'यत्र' यस्मिन् 'गच्छन्ति' 'तद्' 'ब्राह्मणं महत्' 'विष्णु'माहुः। महदिति विष्णोर्नामसु पठितमास्ते।

भवति चात्रास्माकम्—

वेदा यमंगन्त्यथवांगयन्ति
वेदांगसंज्ञः स हि विष्णुरत्र ।
महान् स उक्तः परमेष्ठिसंज्ञो
व्यक्तोऽपि विश्वेऽस्ति निगूढ एषः।।१७५।।

---

१. ना=मनुजः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वेदवित्—१३१

विद्यते ज्ञायते ज्ञानविषयीक्रियते इति 'वेदः'। वेदान् विन्ते विचारयतीति 'वेदवित्'। विचारपूर्वा कृतिरत्रास्येति स विष्णुर्वेदविदुच्यते।

मन्त्रलिङ्गञ्च—

याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः (यजु० ४०।८)।

भवति चात्रास्माकम्—

विन्ते स वेदानिति वेदवित् स
सृष्टिञ्च तर्कानुगतां विधत्ते।
चतुर्षु वेदेषु च बुद्धिपूर्वं
न्यधात् स्वकं ज्ञानमनन्तवेदः।।१७६।।

'विचारपूर्वा कृतिर्वेद' इति सर्वतन्त्रसिद्धान्तः।

कविः—१३२

'कु शब्दे' आदादिकः तस्मात् ***अच इः*** (उणा० ४।१३६) इति सूत्रेण 'इः' प्रत्ययः। कौति शब्दं करोतीति 'कविः' क्रान्तदर्शी, विद्वान् वा। यद्वा—'कुङ् अव्यक्ते शब्दे' भौवादिकः कवतेऽव्यक्तं शब्दं करोतीति 'कविः'।

अत्र विश्वे सनातनात् कालात् नद्यादीनां निर्झराणां चाव्यक्तशब्द आयाति। अव्यक्तत्वात्तस्य, स हि सर्वव्यापकोऽनन्तकर्मेति प्रवाहतोऽनादिमदिदं सर्वं विज्ञापयति। तस्याव्यक्तध्वनिं कवयो विद्वांसो भिन्नेन विज्ञापनेन विज्ञापयन्ति। वायुरप्यव्यक्तं शब्दं कुर्वन् तमेवाव्यक्तं तस्मिन् वर्त्तमानं व्यनक्ति। मनुष्यमन्तरेणान्ये जीवा अपि—

आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।
मारुतस्तूरसि चरन् मन्दं जनयति स्वरम्।। (पाणिनीयशिक्षा)

इति विज्ञैराविष्कृतं सिद्धान्तमनुसरन्तो विविधां वाचं वदन्ति। परन्तु मनुष्याणां वागिव तेषां स्पष्टा वाङ् न भवतीति कृत्वा तेऽप्यव्यक्तं भाषन्त इति मन्यते। परन्तु तेऽप्यव्यक्तवचसा तमेव प्रातः स्तुवन्ति गायन्तीति विज्ञानां पशुपक्षिविद्याविशारदानामयं समयः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत इदं निर्विकल्पं वक्तुं शक्यते यत्तेनाव्यक्तध्वनिमता भगवता स्वकमव्यक्तं काव्यं स्रोतःसु पक्षिषु च व्यक्तीकृतमास्ते। मनुष्याणां वाक् व्यक्ता ताल्वादिप्रयत्नविशेषैरुच्चार्यमाणत्वात्। ते मनुष्याः प्रतिपदं विष्णुं तत्कर्माणि पश्यन्तस्तमनुपदं कथयन्ति काव्यानि च विदधते।

कवेः कर्म च काव्यम्। कविशब्दस्य ब्राह्मणादिषु सद्भावात्। **'गुणवचन-ब्राह्मणादिभ्यः कर्मणि च'** (पा० ५।१।१२४) सूत्रेण 'ष्यञ्' प्रत्ययः। तेन काव्यशब्दो निष्पद्यते। काव्यं चापि द्विविधं— शब्दरूपं वेद इति यथा, दृश्यं—लोक इति यथा।

सर्वव्यापकस्य विष्णोः कवित्वबोधकं मन्त्रलिंगं च—**'कविर्मनीषी परिभूः स्वयंभूः'** इत्यादि (यजु० ४०।८)। काव्यविज्ञापकं मन्त्रलिंगं यथा— **'देवस्य पश्य काव्यं न ममार न जीर्यति'** (अथर्व० १०।८।३२) जगद्वेदौ चानादी प्रवाहतः।

वाचां चतुष्ट्वविज्ञापिका ऋक्—

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता, नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति।।

ऋग्० १।१६४।४५; अथर्व० ६।१०।२७; निरुक्त० १३।६।।

तासां नामानि—परा, पश्यन्ती, मध्यमा, वैखरी इति।

वाचामेकोंऽशः— स्रोतःसु, द्वितीयोंऽशः पक्षिषु, तृतीयोंऽशः पशुषु, तुरीयोंऽशो मनुष्येषु। ब्रह्म इदं ब्राह्मणं तद्विदो ब्राह्मणाः, तत्रापि च मनीषिणो ब्राह्मणा वाचां चतुष्ट्वं विदन्ति।

त्रीणि परिमितानि नियतानि पदानि पदनार्हाणि वचांसि गुहायां निहितानि तानि नेङ्गयन्ति, न चेष्टन्ते-इच्छानुसारं स्वार्थान् नाभिदधति, अर्थात् स्रोतसां वाक् नियता, पक्षिणां च वाक् नियता, पशूनां च वाक् नियता मनुष्याणां वाक् न नियता। ते मनुष्या यथाभिलाषं सर्वविधां सप्तस्वरोपेतां वाचं वदन्ति। कवेरस्य विष्णोर्वेदनामात्मकं काव्यं मनुष्यैर्ज्ञातुं वक्तुं चार्हमस्ति।

नाम-आख्यात-उपसर्ग-निपाताख्या च वाक् पतंजलिना व्याकरणमहाभाष्ये पस्पशाह्निके व्याख्याता, निरुक्ते च, तत्र द्रष्टव्यम्। अस्माभिस्तु निजं प्रसंगमधिकृत्य व्याख्यातम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

कविर्मनीषी भगवान् स विष्णु-
श्चकार काव्यं श्रुति-विश्वरूपम्[1] ।
स्रोतःसु[2] गां[3] वीषु चतुष्पदेषु
न्यधात् स वेधा नृषु गां च तुर्याम्।।१७७।।

❖ ❖ ❖

लोकाध्यक्षः सुराध्यक्षो, धर्माध्यक्षः कृताकृतः।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ।।२८।।

१३३ लोकाध्यक्षः, १३४ सुराध्यक्षः, १३५ धर्माध्यक्षः, १३६ कृताकृतः।
१३७ चतुरात्मा, १३८ चतुर्व्यूहः, १३६ चतुर्दंष्ट्रः, १४० चतुर्भुजः,।।२८।।

लोकाध्यक्षः—१३३

अक्ष-शब्दो व्याख्यातचरः। लोकानध्यश्नुते व्याप्नोतीति 'लोकाध्यक्षः' स भगवान् विष्णुः।

मन्त्रलिङ्गञ्च—

यत्रादित्याश्च रुद्राश्च वसवश्च समाहिताः ।
भूतं च यत्र भव्यं च सर्वे लोकाः प्रतिष्ठिताः।
स्कम्भं तं ब्रूहि कतमः स्विदेव सः ।।

अथर्व० १० ।७ ।२२ ।।

लोकानध्यक्षतीति 'लोकाध्यक्षः'। 'अक्षू व्याप्तौ' भौवादिकः, **'अनादि निधनं विष्णुम्'** (वि० स० ६) इत्यादि श्लोकेऽपि लोकाध्यक्ष इति पदं व्याख्यातमास्ते। अध्यक्षशब्दः स्वामिपर्यायोऽपि। तेन लोकानां स्वामीति 'लोकाध्यक्षो' भगवान् विष्णुः।

---

१. श्रुति-विश्वरूपम्=श्रुतिरूपम्, विश्वरूपमिति पृथक्शः। २. स्रोतःसु=नदीषु निर्झरेषु च। ३. गाम्=वाणीम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

सप्तोर्ध्वलोकानुत सप्त निम्ना-
नध्यश्नुते विष्णुरयोनिजन्मा ।
तथा यथा ज्ञानबलेन देहं
जीवोऽश्नुतेऽध्यक्षति चात्र विष्णुः ।।१७८।।

सुराध्यक्षः—१३४

सूपसर्गपूर्वात् 'रा दाने' आदादिकः, तस्मात् ***'आतश्चोपसर्गे'*** (पा० ३।१।१३६)) इति कः प्रत्ययः। सुष्ठु राति ददातीति 'सुरः' तानध्यश्नुते अध्यक्षतीति वा 'सुराध्यक्षो' विष्णुः। श्रद्धया सूक्त्या वा दानिनां स्वामी। यदा स विष्णुर्दक्षिणं पार्श्वमलंकरोति, तदा दाता दातृगुणेनालंकृतो भवति। सर्वमेवैतद् जगद् दानादानाभ्यां स्थितिमातिष्ठति विष्णोः सत्तया सद्भावितं सत्।

दानविषये सूक्तयः—

त्वं नो देव! दातवे रयिं दानाय चोदय। (अथर्व० ३।२०।५)।।

दातवे=दानकर्मणि प्रवृत्ताय, रयिं=सर्वभोगसाधनं धनम्, चोदय=च उत् अय=वर्धस्व। चोदय=प्रेरय वा।

मुक्तहस्तेन दानं देयम्—

शतहस्त समाहर सहस्रहस्त संकिर। (अथर्व० ३।२४।५)।

संकिर=सम्यक्तया बीजवप्तुरिव विकिर। वस्त्राणां भूमेः, भवनानां, हिरण्यस्य च दातुः पुण्यलोकावाप्तिर्भवति—

वासो हिरण्यं दत्त्वा ते यन्ति दिवमुत्तमाम्। (अथर्व० ६।६।२६)।

दातुरपकीर्तिर्न भवति—

न दुष्टुतिर्द्रविणोदेषु शस्यते। (अथर्व० २०।२१।१)।

कार्पण्यं पापाय दुःखायेति—

वेद त्वामहं निमीवन्तीं नितुदन्तीमराते! (अथर्व० ५।७।७)।

हे अराते ! कृपणते ! इति दिङ्मात्रं संगृहीतम्।

भवति चात्रास्माकम्—

यः श्रद्धया राति सुरः स देवः
सूक्त्याथवाताननुयाति विष्णुः ।
अध्यश्नुते विश्वसदः स दातॄ-
नतः सुराध्यक्ष इहास्ति विष्णुः ।।१७९।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धर्माध्यक्षः—१३५

धर्मः— धारणलक्षणा सत्ता, तं सत्तात्मकं धर्ममध्यश्नुत इति 'धर्माध्यक्षः'। यत् परस्परं लोकधारकं कर्म तस्याध्यष्टा स्वामी वा। मन्त्रलिंगं च—

स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।

यजु० १३।४।।

भवति चात्रास्माकम्—

न कोऽपि धाता भुवने विना तं
योऽध्यश्नुवीताऽखिलधर्मपालान्।
तथाश्नुते धर्मपदानि विष्णु-
र्यथांगमंगं दृढसन्धिबद्धम्[1] ।।१८०।।

मन्त्रलिङ्गञ्च—

तस्मिन् ह तस्थुर्भुवनानि विश्वा। यजु० ३१।१६।।

कृताकृतः—१३६

कृतं चाकृतं च यस्य स कृताकृतः। कृतमिति भूतकालेन सम्बध्यतेऽकृतमिति च भविष्यत्कालेन सम्बध्यते। भूतभविष्यतोस्तस्मिन् ब्रह्मणि प्रतिष्ठितत्वात् 'कृताकृत' मिति विष्णोर्नाम संगच्छते। यद्यप्येकरसात्मके ब्रह्मणि भूतभविष्यतोर्योगो न संगच्छते, तर्ह्यपि मनुष्यबुद्धिमभिलक्षीकृत्यैषः प्रयोगः।

मन्त्रलिङ्गञ्च—

यत्रादित्याश्च रुद्राश्च वसवश्च समाहिताः।
भूतं च यत्र भव्यं च सर्वे लोकाः प्रतिष्ठिताः
स्कम्भं तं ब्रूहि कतमः स्विदेव सः।। अथर्व० १०।७।२२।।

यथा सूर्यस्योदयास्तौ न भवतः, तथापि व्यवहारो भवति मनुष्यबुद्धिमधिकृत्य भूगोलमधिकृत्य वा।

---

१. देहे यथाङ्गानि सन्धिना दृढबद्धानि स्व-स्व धर्मेण सत्तया वा पराण्यंगानि सत्तावन्ति विदधति। तत्र या सत्ता सा तस्यैव धर्माध्यक्षस्येति कृत्वा सर्वाङ्गपूर्णं वपुर्वदिदं सकलं जगदधृतमस्त्यतः स 'धर्माध्यक्षः उच्यते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च यथा—

यतः सूर्य उदेत्यस्तं यत्र च गच्छति ।
तदेव मन्येऽहं ज्येष्ठं तदु नात्येति किंचन ।।

अथर्व० १० ।८ ।१६ ।।

चतुर्दश मन्वन्तराणि जगत आयुरिति वेदविदो भाषन्ते। अत इदं विज्ञायते सम्भाव्यमाना सूर्योदया अपि तद्ब्रह्मणि नियताः सन्ति, परन्तु मनुष्यबुद्धिमधिकृत्य ते सम्भाव्यमाना अकृतमिव मन्यन्ते। पूर्णत्वात् तस्य ब्रह्मणः। एष हि तस्य सनातनो धर्मः कल्पान्तं यास्यतीति 'कृताकृतः' इति ब्रह्मणो नाम सुतरां संगच्छते।

भवतश्चात्रास्माकम्—

कृतं नियन्त्रा सकलं स्वबुद्धौ[1]
व्यवस्थितत्वादकृतं तथा स्यात् ।
यथा नियन्ता[2] विनियम्य यन्त्रं
सम्भाव्यमानानि निरीक्षतेऽत्र ।।१८१।।

कृताकृताह्वोऽमरमाननीयो
विष्णुः सनात् पश्यति यन्त्रबद्धम् ।
प्रवाहतो नित्यमिदं समस्तं
तथा यथा ज्ञानदृशा नियन्ता ।।१८२।।

चतुरात्मा—१३७

'चते याचने' धातुर्भौवादिकः, तस्मात् **'चतेरुरन्'** (उ० ५ ।५८) इत्युरन्, तेन 'चतुरः'। अततीति 'आत्मा'। चतुर्षु, अर्थात् उद्भिज्ज-स्वेदज- अण्डज-जरायुजेषु भूतेष्वततीति 'चतुरात्मा' स विष्णुः सर्वकलाभिरामः।

मन्त्रलिङ्गञ्च—

परीत्य भूतानि परीत्य लोकान् परीत्य सर्वाः प्रदिशो दिशश्च।
उपस्थाय प्रथमजामृतस्यात्मनात्मानमभि सं विवेश।।

यजु० ३२ ।११ ।।

---

१. स्वबुद्धौ-तस्य स्वज्ञाने। २. नियन्ता=सामान्यो यन्त्रनिर्माता शिल्पी, सामान्यो वा जनः स्वं संभाव्यमानं ज्ञाने कृतमिव पश्यतीति भावः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रसंगतः यद्यदिह चतुर्विधविकल्पं तस्यात्मेति 'चतुरात्मा' स विष्णुः। एष हि क्रमः सनातनस्तस्य विष्णोराकल्पं यातो यास्यति च।

भवति चात्रास्माकम्—

चतुर्विधां सृष्टिमुतापि लोकान्
विकल्प्य विष्णुश्चतुरात्मसंज्ञः ।
विराजते तत्र [१]विचित्रशक्ति-
रात्मानमञ्जन् स्वयमात्मना सः ।।१८३।।

मन्त्रलिङ्गञ्च—

वेनस्तद् पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम् ।
तस्मिन्निद ँ सं च वि चैति सर्व ँ स ओतः प्रोतश्च विभुः प्रजासु।।

यजु० ३२।८।।

चतुर्व्यूहः—१३८

'ऊह वितर्के' भौवादिकः। ऊह्यते वितर्क्यत इत्यूहा, ***'गुरोश्च हलः'*** (पा० ३।३।१०३) इति स्त्रियाम् अप्रत्ययः। विशिष्टा ऊहा 'व्यूहा', चतुर्षु चतुर्विधभूतवर्गेषु व्यूहा यस्य स 'चतुर्व्यूहः'।

एतेन नाम्ना विज्ञाप्यते यद् भगवतो विष्णोर्विषयिकामूहां कर्त्तुं चतुर्विधप्राणिनां बीजमिश्रणकालादारभ्य मृत्युपर्यन्तं सर्वं सम्यग्दृष्ट्वा तस्यानन्तकर्मत्वमूहितं भवति। एषा हि तस्य सनातनी पद्धतिः। अत एव गूढ इति संज्ञां स प्रापितोऽस्ति विज्ञैः।

भवति चात्रास्माकम्—

चतुर्व्यूहः स सर्वज्ञस्तक्यों भूतचतुष्टये।
विश्वयोनिर्दधन्नाम सर्वं पश्यन् विराजते।।१८४।।

अथवा—

व्यूह्यात्मानं चतुर्धा वै, वासुदेवादिमूर्त्तिभिः ।
सृष्ट्यादीन् प्रकरोत्येष, विश्रुतात्मा जनार्दनः।।

इति व्यासवचनम्।

प्रकारान्तरेण व्याख्यानं पुनरस्मत्—

१. विचित्रा शक्तिर्यस्य स विचित्रशक्तिः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्वादशमासात्मकोऽयं संवत्सरः। संवत्सरश्च कालात्मकः। सृष्टिं प्रवर्त्तयता भगवता त्रिविधविकल्पा राशयश्चतुर्धा व्यूढाः। तद्यथा—

मेषः,	**मकरः,**	**तुला,**	**कर्कः,**
वृषः,	**कुम्भः,**	**वृश्चिकः,**	**सिंहः,**
मिथुनम्,	**मीनः,**	**धनुः,**	**कन्या,**

नवांकयोगेनापरो राशिरुत्पद्यते। द्वादशतोऽधिको राशिर्द्वादशतस्तष्ट्यः। तद्यथा—मेषः समानं भवत्येकांकेन, तत्र नवांकानां योगे कृते दश भवन्ति। दशांकाश्च भवन्ति समाना मकरेण। मकरे युक्ता नवांका एकोनविंशति जायन्ते, द्वादशतोऽधिकाः सन्तीति कृत्वा द्वादशभिस्तष्ट्याः। तत्र शिष्यन्ते सप्त, ते च सप्त भवन्ति समानं तुला-राशिना। ते च सप्त नवांकेन युक्ता भवन्ति षोडश, ते षोडश द्वादशभिस्तष्ट्याः शेषाश्चत्वारः, चत्वारो भवन्ति समानाः कर्क-राशिना।

एष हि क्रमः परयोर्द्वयोर्वर्गयोः, एतस्य विज्ञानस्य विशेषं व्याख्यानं पृथक् प्रबन्धे विशदीकर्त्तुं प्रयत्यते। उक्तं च किंचित् प्रसंगप्राप्तं 'भाव' इति सप्तमे नामव्याख्याने, आदित्य-नामव्याख्याने च, तत्संख्या-३९ एकोनचत्वारिंशत्तमी। एवं वक्तुमर्ह्यते यत् चतस्रो व्यूहा अस्येति 'चतुर्व्यूहः' स भगवान् विष्णुः सनात् कालात् स्वात्मानं चतुर्विधव्यूहे व्याप्तीकृत्यास्ते।

भवति चात्रास्माकम्—

मेषादयो द्वादश नामभिन्ना
नवांकयोगेन सुवन्ति चान्यम्।
जगच्चतुर्व्यूहमयं समस्तं
व्याप्तश्चतुर्व्यूहपदः स तस्मिन्।।१८५।।

चतुर्दंष्ट्रः—१३६

'दंष्ट्र-दशि दशने' चौरादिकः, तस्मात्, 'दंश दशने' भौवादिकाद् वा ***'सर्वधातुभ्यः ष्ट्रन्'*** (उ० ४।१६६) इत्युणादिष्ट्रनोऽपवादेन ***'दाम्नीशसयुयुज०*** (पा० ३।२।१८२) इति करणे ष्ट्रन् प्रत्ययः। दश्यते यया सा 'दंष्ट्रा' चतस्रो दंष्ट्रा यस्य स 'चतुर्दंष्ट्रः'।

अत्र भगवत्कृतायां सृष्ट्यां नखिनां हिंस्रस्वभाववतां द्वे द्वे दंष्ट्रे नीचैरुच्चैश्च मुखे भवतः, ताश्च संकलिताश्चतस्रो भवन्ति। याभिर्हिंस्रः स्वकमाखेटं दंशयति। एतेन 'चतुर्दंष्ट्र' नाम्नेदं विज्ञाप्यते यद् भगवान् सर्वव्यापको विष्णुः सर्वकमेतं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विश्वं मुखे, निगृह्येवास्ते, न हि किंचित् तं विष्णुमुपेक्षीकृत्य विचरितुं तिरोहितीकर्तुं वात्मानं शक्नोति।

एतमेवार्थं गीतायामर्जुनो व्याचष्टे

दंष्ट्राकरालानि च ते मुखानि, दृष्ट्वैव कालानलसन्निभानि।
दिशो न जाने न लभे च शर्म, प्रसीद देवेश ! जगन्निवास ! ।।११।२५।।

एतेनेदमपि विज्ञायते यदेकशफानामनेकशफानामुत च नखिनामान्त्र-स्थापनप्रकारोऽप्युदरे भिन्नो भिन्न एव। एतेन दंतनिवेशनेन दन्तवतां गुण-धर्म-स्वभावा अपि सौकर्येणावगन्तुं शक्या भवन्ति।

भवतश्चात्रास्माकम्—

नखी[1] यथाऽऽखेटमुपात्तवीर्यो
निगृह्य दंष्ट्राभिरमुं निहन्ति ।
विष्णुश्चतुर्दंष्ट्रपदेन वाच्य-
स्तथैव नूनं भुवनं प्रशास्ति ।।१८६।।

भुक्तं यथा पाकमुपैति जन्तोः
कृतं तथा कर्म च याति पाकम् ।
विष्णुश्चतुर्दंष्ट्रपदेन वाच्यो
ददाति जीवाय यथार्हयोनीः ।।१८७।।

चतुर्भुजः—१४०

चतुरो भुनक्तीति 'चतुर्भुजः'। चतुरो भुंक्त इति 'चतुर्भुजः'। चतुरो भुजति कौटिल्यं=यथान्यायं ऊर्ध्वं चाधो तिर्यक् च गमयन् भावाभावौ च प्रापयन् जगद् विष्णुः स्वेन चतुर्भुजधर्मेण विश्वं व्याप्य तिष्ठितीति 'चतुर्भुजः'।

'चतेरुरन्' (उणा० ५।५८) 'चते' भौवादिको याचनार्थकः, चतते याचतेऽसौ 'चतुः', संख्यावाची वा। ***'चतुरनडुहोरामुदात्तः'*** (पा० ७।१।६८) इत्यनेनाम् चत्वारः, स्त्रियां चतस्रः।

द्वितीयान्तचतुरुपपदाद् भुजतेः कः प्रत्ययः। 'क-प्रकरणे' ***'मूलविभुजादिभ्य उपसंख्यानम्'*** (पा० ३।२।५) सूत्रवार्त्तिकम्। ब्राह्मण-क्षत्रिय-वैश्य-शूद्रात्मकेन

---

१. नखिनः—श्वविडालसिंहप्रभृतयः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विक्लृप्तमिदं जगत् 'पुरुष'संज्ञां लभते। **'पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम्'** (३१।२) इति यजुषो मन्त्रलिंगात्। प्रश्नः—

यत् पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्यासीत् किं बाहू किमूरू पादावुच्येते।।

यजु० ३१।१०।।

अत्र मन्त्रे पुरुष-शब्दो जगत्पर्यायः, यदित्यनेन सम्बोधितत्वात्। उत्तरम्—

ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद् वैश्यः पदभ्या ँ शूद्रोऽजायत।।

यजु० ११।११।।

तत्र कालात्मा संवत्सरोऽपि चतुर्विधः। तत्र द्वादशराश्यात्मकः संवत्सरोऽपि चतुर्विधः। तत्तद्राशिस्था ग्रहा अपि चतुर्विधाः। यथाविधे काले जन्म तथाविधो जन्मी ब्रह्मणादिवर्णेषु भवन् तथाविधां संज्ञां लभते। तद्यथोदाहरणम्—

मत्कं जन्म एकोनसप्तत्युत्तरैकोनविंशतितमे वैक्रमाब्देऽभूत्। इष्टा संख्या चतुःसंख्यया विभक्ता—एकेन ब्राह्मणसंज्ञां लभते। अमुथैव द्वित्रिचतुर्भिः क्षत्रिय-वैश्य-शूद्रसंज्ञां लभते। शतात्मिका संख्या चतुर्भिर्विभक्ता निःशेषतां प्राप्नोति, शतोत्तरां संख्यां चतुर्भिर्विभज्य ब्राह्मणादिसंज्ञां प्रापय्य तद्भवस्तत्संज्ञया व्यवहर्त्तव्यः। तत्र ब्राह्मणसंवत्सरे जन्मलग्नम्



Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्र त्रिवर्गात्मके राशिवर्गे चतुर्वर्णता यथा—

१, ५, ९ ब्रह्मणाः। २, ६, १०, क्षत्रियाः।

३, ७, ११, वैश्याः। ४, ८, १२, शूद्रा इति।।

यथा संज्ञां राशिस्थिता ग्रहा अपि तत्संज्ञाभाजो भवन्ति। एवमेव पुंस्त्रीनपुंसकसंज्ञाभाजोऽपि भवन्ति। विशेषं त्रिस्कन्धज्योतिर्वेदेनावगन्तव्यं निदर्शनमात्रमेवात्रास्माकमभिमतम्।

तत्र ब्राह्मणो वैश्यं पश्यति प्रीणाति वा, ब्राह्मणेन निर्दिष्टकर्मसु धनस्यावश्कत्वात्। क्षत्रियः शूद्रं पश्यति निगृह्णाति वा, यथा चौरं निगृह्णाति राजपुरुषः ग्रहाणां भुक्तभोग्यांशमधिकृत्य गणितद्वारेण दृष्टिः स्फुटनं पाराशरहोराशास्त्रादिषु स्फुटं विन्यस्तमस्ति, तत्र द्रष्टव्यं जिज्ञासुभिः।

तद्यथा—ब्राह्मणात्मके संवत्सरे वृश्चिकस्थो बृहस्पतिः, कर्कस्थो बुधः, मीनस्थो राहुस्तिर्यक्त्वं गत इति ज्ञातव्यम्। शूद्रसंवत्सरे ब्राह्मणराशिसु स्थिता जातकस्य ग्रहास्तस्योर्ध्वगतित्वं ज्ञापयन्ति। वैश्यक्षत्रिययोस्तिर्यक्त्वम्। समे समानगुणा इति। भिन्नराशिस्थग्रहवतोः समानग्रहयोरपि द्वेष उदासीनत्वं च भवति।

पश्यामश्च लोके एक एकं दृष्ट्वा प्रसीदति, स एव च परं दृष्ट्वा प्रीतिं व्यनक्ति, स एव च पुनरन्यं दृष्टवा क्रुध्यति, हन्तुं वा यतते। इत्यादिका व्यवस्था स्वयमेव चतुर्भुजनामगुणविशिष्टेन विष्णुना सृष्टेरारम्भक्षणादद्य क्षणं यावत् क्रियते। सूक्ष्मज्ञानाय नवांशकुण्डलिः कल्पनीया भवति।

एवमेते ग्रहा यथास्थूलम्, यथासूक्ष्मम् जगद् भुंजते नाशयन्ति, भुञ्जन्ति रक्षन्ति, भजन्ति कौटिल्याय दुःखाय वा गमयन्ति, स्वके दशान्तर्दशाप्रत्यन्त-र्दशाप्राणदशापरिपाककाले। कालपुरुषमधिकृत्य यस्मिन् यस्मिन्नंगे यो यो ग्रहस्तस्मिंस्तस्मिन् काले तं तमेवांगं शुभाशुभाभ्यां योजयति।

प्रसंगप्राप्तमिदमुच्यते—न ह्यद्यावधि कस्यापि चत्वारो भुजाः केनापि दृष्टाः, न च भविष्यत्यपि विष्णुः स्वकं सर्वव्यापकत्वरूपं गुणं विहनिष्यति इति दिङ्मात्रमुक्तम्। एतेन भगवतो मिषतो वशित्वमपि व्याख्यातं भवति।

भवति चात्रास्माकम्—

चतुर्विधं विश्वमिदं विक्लृप्तं,
भुनक्ति भुंक्ते भुजतीह विष्णुः।
चतुर्भुजः स्वेन गुणेन विश्वं,
यथाव्यवस्थं गमयत्यजस्रम् ।।१८८।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कवेर्जन्म—

नन्दतर्काङ्कचन्द्रेऽब्दे भाद्रे भौमेऽग्निभूदिने ।
धनिष्ठाभाग्निपादेऽथ, वस्विष्टे चाङ्गनोदये।।

(अभूदिति शेषः)

विक्रमसम्वत् (१९६९), भाद्रपदमासि। प्रवेशाहः-१३, मंगलवासरे, सूर्योदयादिष्टघटयः-अष्टौ, धनिष्टाभस्य तृतीयचरणे, कन्यालग्ने जन्म।

यथास्थूलं विघ्नविज्ञापनम्—

उत्पादकोत्पाद्यमानयो राश्योरन्तरे यद् ग्रहं तदुत्पद्यमानस्याभिप्रेतं विहन्ति। विघ्नो हि नाम कार्यसिद्धौ बाधकः। तद्यथा निर्दिष्टकुण्डल्याम्—

भ्रातृस्थानस्थो वृश्चिकराशिस्थो बृहस्पतिरुत्पादयति व्ययभावस्थं सिंहस्थं सूर्यं शुक्रं च, तयोर्मध्ये कन्यास्थौ मंगल-केतू पित्तव्याधिं शरीरकार्श्यं च कृत्वा विघ्नकर्त्तारावभूताम्। व्ययभावस्थौ सिंहराशिमुपयातौ शुक्रसूर्यौ वृषराशिस्थं शनिमुत्पादयतः। तयोर्मध्ये कर्कस्थो बुधः=तर्कवितर्कौ विहन्ति, ज्ञानम्, धर्मम्, धनम्, यशश्च। वृषराशीशो शुक्रो भुक्तिमात्रसाधनं तं जीवयितुं विवशयति। इत्यादिकं स्वतः सिद्धमिव स्वके दशापरिपाककाले भवति।

यच्च नक्षत्रचरणं ग्रहोऽधितिष्ठति तथाविधेनैव स्वभावेन तं कर्मसु प्रापयति। ज्योतिषी विद्या कृतं करिष्यमाणं च विज्ञापयन्ती भगवतोऽपरं 'परमस्पष्टः' इति च नाम सार्थकं कुरुते। समानवर्गराशिस्थो ग्रहः प्रत्येकं स्वकेन बलेन पुष्णाति। तद्यथा लोकेऽपि च पश्यामः—समानगन्तव्यपथिकाः परस्परं प्रत्येकं पोषयन्ति। एकस्थं धनं सर्वानावश्यकतानुसारं तर्पयति, एकस्य विद्याबलं सार्थान् स्वकेन ज्ञानगुणेन तर्पयति। एकस्थं विशेषबलं सर्वान् रक्षति, परन्तु भिन्नगन्तव्य-वर्गः पथिको न पुष्णाति तद्भिन्न गन्तव्य-पथिक-वर्गस्थान्।

एवं ज्ञानबलक्रियाभिर्विशिष्टो विष्णुश्चतुर्भुजरूपेण व्याप्नोत्यात्मानं सनात् कालात्। एवं ज्ञान-विज्ञानकुशलेनोहितव्यमिति दिङ्मात्रमुक्तं ज्ञानवैशद्याय व्याख्याक्रमविज्ञापनाय च।

पुनश्चात्रास्माकम्—

व्याख्याक्रमस्तस्य चतुर्भुजस्य
न्यस्तो यथाबुद्धिबलोदयाय ।
इयत्त्वमस्त्येव न तस्य विष्णो-
र्भुजाश्चतस्त्रश्च न तस्य दृष्टाः।।१८६।।

❖ ❖ ❖

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः ।।२६।।

१४१ भ्राजिष्णुः, १४२ भोजनम्, १४३ भोक्ता, १४४ सहिष्णुः, १४५ जगदादिजः।
१४६ अनघः, १४७ विजयः, १४८ जेता, १४९ विश्वयोनिः, १५० पुनर्वसुः।।२६।।

भ्राजिष्णुः—१४१

'भाजृ दीप्तौ' भौवादिकः, तस्मात् तच्छील-तद्धर्म-तत्साधुकार्यादिषु 'इष्णुच्' प्रत्ययः, ***'भुवश्च'*** (पा० ३।२।१३८) इति सूत्रस्थ- 'चकार'-निर्देशात्। भ्राजत इति तच्छीलो 'भ्राजिष्णुः'। सूर्यादिषु दीप्तिमत्सु यत्तेजः, तत्तस्यैव ब्रह्मण इति।

असौ 'भ्राजिष्णु' नामा विष्णुः स्वकेन दीप्तिमच्छीलेन सर्वं जगद् भ्राजते, भ्राजयति वा सूर्यादिभ्यस्तेजोमदभ्य इति, सूर्य इति च विष्णोर्नामसु पठितमास्त इति कृत्वा।

मन्त्रलिङ्गञ्च—

ब्रह्म सूर्यसमं ज्योतिः। यजु० २३।४८।।

सूर्यो ज्योतिर्ज्योतिः सूर्यः। (यजु० ३।९) इति च।

भवति चात्रास्माकम्—

भ्राजिष्णुना विश्वमिदं समस्तं
देदीप्यतेऽतः स महः स विष्णुः ।
अनन्तता चापि च तस्य विष्णोः
पृथक् पृथक् भाति च वस्तुमात्रे।।१६०।।

यदा भ्राजिष्णुता नश्यति वस्तुनः, नाशोन्मुखता वा भ्राजिष्णुताया भवति, तदा ब्रह्मपराङ्मुखं सत् तन्नश्यतीति भावः।

भोजनम्—१४२

भुज्यत इति 'भोजनम्'। प्रतिवस्तु पृथक्-पृथक्स्वभाववतः पृथक् पृथक् भोजनम्। तद्यथा विषं तदुद्भवं कीटं जीवयति, अपरं च मारयति, अर्थात् मृत्यवे भोजनमुपकल्पयति। भुज्यते रक्ष्यतेऽनेन विषेण रोगाज्जन्तुरिति 'भोजनम्'। विषम् अमृतं वा अपेक्षाकृतं भवति। भुज्यते सर्वं जगद् भ्रमयितुं कौटिल्यभावं प्राप्यत इति 'भोजनम्'। यद्वस्तु यदाश्रित्य स्थितिमातिष्ठति, तदेव तस्य भोजनमिति कृत्वा सर्वाधारकत्वात्तस्य तद् ब्रह्म स विष्णुर्भोजननाम्नोक्तो भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

अहं दाशुषे विभजामि भोजनम्। ऋ० १० ।४८ ।१।।

भवति चात्रास्माकम्—

परस्पराकर्षणसूत्रसंधृतं
जगत् समस्तं प्रतिवस्तु भोजनम्।
स एव धाता सकलस्य यस्मात्
तस्मादनक्त्येव व भोजनाख्याम्।।१६१।।

भोक्ता—१४३

'भुज पालनाभ्यवहारयोः' रौधादिको, 'भुज कौटिल्ये' तौदादिकः, आभ्यां धातुभ्यां तृचि प्रत्यये 'भोक्ता' इति निष्पद्यते। सर्वाधारत्वाद् भोजनरूपी विष्णुरिति व्याख्यातचरम्। कर्तारं पाक उपयातीति नियमाद् 'भोक्ता' विष्णुरित्युक्तो भवति।

मन्त्रलिङ्गञ्च—

'पक्तारं पक्वः पुनराविशति'। अथर्व० १२ ।३ ।४८ ।।

एतत् सर्वं चराचरं निखिलमपि जगत् तस्मिन्नेव लयं याति, यद्वा तद्व्यवस्थया प्रलयं गच्छति। कस्तत्तस्मिन् काले व्यवस्थापयति ? स एवेति कृत्वा 'भोक्ता' इत्युक्तं तस्य विष्णोः सार्वकालिकं गुणं प्रकाशयति।

लोकोदाहरणं यथा—सर्वा नद्यः समुद्रमेवाभिद्रवन्ति, तस्मिन्नेव चाभिविशन्ति। सर्वासामपां योनिरान्तरिक्ष्य आपः, तस्मात् सूर्याग्निवातसाहाय्यात् जलं वियति गच्छत्यमुथैव सर्वमेतत् तस्मिन् भोक्तरि विष्णौ स्थितिमातिष्ठतीति 'भोक्ता' विष्णुरुक्तो भवति। प्राञ्चश्चाहुः-**भोक्तारं यज्ञतपसां सर्वलोकमहेश्वर**मिति।

भवति चात्रास्माकम्—

भुनक्ति भुंक्ते भुजतीति 'भोक्ता'
पाको ह पक्तारमुपैत्यवश्यम् ।
सृष्ट्वा स 'भोक्ता' सकलं स्वजम्भै-
गृह्णन् जगत् स्वात्मनि वेत्ति वेद्यम्।।१६२।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सहिष्णुः—१४४

'षह मर्षणे' भौवादिकः, तस्मात् ***'अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मद-रुच्यपत्रपवृतुवृधुसहचर इष्णुच्'*** (पा० ३।२।१३६) इत्यनेन तच्छील-तद्धर्म-तत्साधु-कारिष्वर्थेषु 'इष्णुच्' प्रत्ययः। 'सहिष्णुः=सहनशील इत्यर्थः।

मन्त्रलिङ्गञ्च—

सहोऽसि सहो मयि धेहि। यजु० १६।६।।

विष्णुर्हि सनात् कालात् सर्वं सहते। अस्मिन् चराचरे जगति प्रतिवस्तु या सहिष्णुता सहनशीलता वा दृश्यते सा सहिष्णुनामवतो विष्णोरेव गुणः। सर्वमेतज्जगत् तेनाक्षेणाधारभूतेन धृतमस्ति। न कदाचिदप्यसौ तप्यते।

मन्त्रलिङ्गञ्च—

नाक्षस्तप्यते भूरिभारः। ऋग्० १।१६४।१३।।

भवति चात्रास्माकम्—

नृभिः सदुक्तं किमु वा दुरुक्तं
सर्वं विमृष्यन् सहते च विश्वम् ।
न यात्यधैर्यं भुवनानि मृष्यन्
लोके सहिष्णुः स हि विष्णुरेकः।।१६३।।

फलितार्थतः—यस्मिन् मनुष्ये यावती सहिष्णुता विद्यते, तावानेव विष्णोरंशस्तस्मिन् वर्तत इति।

जगदादिजः—१४५

गच्छतीति 'जगत्'। आदौ जायत इत्यादिजः। जगद् आदिज इति 'जगदादिजः'।

मन्त्रलिङ्गञ्च—

अपूर्वेणेषिता वाचः। (अथर्व० १०।८।३३)। व्याख्यातचरोऽयं मन्त्रः, वेदांग इति १३० तमे नामव्याख्याप्रसंगे।

ब्रह्म जज्ञानं प्रथमं पुरस्तात्० इत्यादिः। (यजु० १३।३)

कार्यरूपाज्जगतः प्राक् तस्य कर्त्रा नूनं भवितव्यमिति कृत्वा 'जगदादिजः' स विष्णुरुक्तो भवतीति न्यायरमणीयमेतत्। लोकेऽपि च पश्यामः—घट-निर्माणात्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पूर्व कुम्भकारेण नूनं पूर्वं तज्ज्ञानवता भवितव्यं एवं च कृत्वा जगन्निर्माणात् पूर्वं विष्णुना नूनं भवितव्यम्।

भवति चात्रास्माकम्—

जगत् समग्रं कुरुते स्वयंभू-
र्विराजते चापि स तत् पुरस्तात् ।
स एव विष्णुर्जगदादिजोऽव्ययो
घटात् पुरस्तात् घटकृद् यथास्ते।।१६४।।

अनघः—१४६

अघः पापं न विद्यतेऽस्मिन्निति 'अनघः', अपापविद्ध इत्यर्थः। अनघत्वाद् ब्रह्मणस्तस्य सर्वाः कृतयोऽपि निर्दोषा एव। यो हि यावान् निर्दोषः, प्रभुसत्ता तावती तस्मिन् विराजत इति ज्ञातव्यम्।

मन्त्रलिङ्गञ्च—

शुद्धमपापविद्धम्। (यजु० ४०।८) इत्यादि
नैनमंहोऽश्नोत्यन्तितो न दूरात्। अथर्व ।।३।६।२।।

भवति चात्रास्माकम्—

अघो न विष्णावनघः स उक्तः
सोऽपापविद्धः स विशुद्ध उक्तः।
न कापि शम्भोः कृतिरस्ति दुष्टा
कर्ताऽनघो [1]विश्वकृतेर्यतोऽतः ।।१६५।।

विजयः—१४७

'जि जये' भौवादिकः, । वि-उपसर्गः। तस्माद्विपूर्वात् ***'अज्विधिः सर्वधातुभ्यः'*** इति अच् प्रत्ययः। विविधं विशेषेण वा जयतीति 'विजयः'। सत्-चित-आनन्दमयत्वात् सर्वं विजयते—अतिशेते वा सर्वमिति 'विजयः'।

मन्त्रलिङ्गञ्च—

इतो जयेतो विजय संजय जय। अथर्व० ८।८।२४।।

१. विश्वकृतेः=सकलकृतिमात्रस्येति भावः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

जयः स विष्णुर्विजयः स विष्णु-
व्याप्नोति विश्वं स विजेतृधर्मा ।
सत्ये जयो वा विजयोऽस्ति गुप्तो
यत्रास्ति धर्मो विजयोऽस्ति तत्र।।१६६।।

जेता—१४८

'जि जये' भौवादिकः, तस्मात् तृच् ***'ण्वुल्तृचौ'*** (पा० ३।१।१३३) इति सूत्रेण—'जेता'। सर्वं जगत् स जयति। एतेनैतद्विज्ञायते यत् यद् यद् विश्वे भवति, तत् तत् सर्वं तस्य जेतुर्व्यवस्थयैव जितमिवास्ते। भगवान् भगवत्कृतां व्यवस्थामुच्छिद्यमानां न सहते, तस्मात् 'जेता' उक्तो भवति।

मन्त्रलिङ्गञ्च—

ईशे हि शक्रस्तमूतये हवामहे जेतारमपराजितम्।
स नः स्वर्षदति द्विषः क्रतुश्छन्द ऋतं बृहत् ।।६।।
इन्द्रं धनस्य सातये हवामहे जेतारमपराजितम्।
स नः स्वर्षदति द्विषः स नः स्वर्षदति द्विषः।।७।। साम्नो महानाम्न्यार्चिके।।

भवति चात्रास्माकम्—

स एव जेता सकलस्य लोके
न कोऽपि तं जेतुमिहास्ति शक्तः।
यो हन्ति विष्णोरचलां व्यवस्थां
सहस्रधा शातयते ह तं सः।।१६७।।

यो हि सत्यं स्थिरं पक्षमवलम्ब्य युद्ध्यते स विजयते। जेतृधर्मेण स विष्णुः सर्वं विश्वं व्यश्नुवान आस्त इति कृत्वा।

विश्वयोनिः—१४६

विश्वस्य सकलस्य योनिः कारणं प्रसविता वा 'विश्वयोनिः' उक्तो भवति। विश्वं वा तस्मिन् कारणात्मके ब्रह्मणि लीनमिति तद् 'विश्वयोनिः' उक्तं भवति।

मन्त्रलिङ्गञ्च—

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न ।
यो अस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद।।

ऋग्० १०।८।१७।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रजापतिश्चरति गर्भे अन्तरदृश्यमानो बहुधा विजायते।
अर्धेन विश्वं भुवनं जजान यदस्यार्धः कतमः स केतुः।।

अथर्व० १० ।८ ।१३ ।।

भवति चात्रास्माकम्—

स विश्वयोनिर्भगवान् वरेण्यो
वियौति संयौति च विश्वमात्रम् ।
सोऽदृश्यमानो विविधं प्रसूते
व्यनक्ति [1]जातस्तमु विश्वयोनिम्।।१६८।।

पुनर्वसुः—१५०

पुनः आवृत्तावव्ययम्। "वसुः" १०४ संख्याके नामव्याख्याने विशदतः प्रकृतिप्रत्ययावुक्तौ।

पुनर्वासयति धर्मेण विश्वं व्यश्नुवानो भगवान् 'पुनर्वसुः' उक्तो भवति। मन्त्रलिङ्गञ्च—

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।
दिवं च पृथिवीं चान्तरिक्षमथो स्वः।। ऋग्० १० ।१९० ।३ ।।

लोकेऽपि च पश्यामो यदेकदा प्रसूतं तत् पुनः पुनः प्रादुर्भावमुपैति।

भवति चात्रास्माकम्—

जातं पुनर्वासयते स विष्णुः
पुनर्वसुं चांकति जातमात्रम्[2] ।
यथैकधा यत् कृतमस्ति तत् तथा
पुनः पुनर्म्नाति[3] सनात् पुनर्वसुः।।१६९।।

❖ ❖ ❖

१. जातः=उत्पतिं प्राप्तस्तं विश्वयोनिं व्यनक्ति। कुतः ? न हि तेन विश्वयोनिना प्रसूतमिवापरो जनः प्रसवितुं क्षमत इति कृत्वा। २. जातमात्रम्=यत्किंचिदपि तेन पुनर्वसुना भगवता सृष्ट्यामुत्पादितम्, तथाविधं न केनाप्युत्पादयितुं शक्यं सत् तज्जातमात्रं तमेव पुनर्वसुम् अंकति=व्यनक्ति, प्रकाशत इत्यर्थः। ३. म्ना अभ्यासे धातुः, म्नाति अभ्यस्यति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ।
अतीन्द्रः सङ्ग्रहः सर्गो, धृतात्मा नियमो यमः ।।३०।।

१५१ उपेन्द्रः, १५२ वामनः, १५३ प्रांशुः, १५४ अमोघः, १५५ शुचिः, १५६ ऊर्जितः, १५७ अतीन्द्रः, १५८ सङ्ग्रहः, १५९ सर्गः, १६० धृतात्मा, १६१ नियमः, १६२ यमः।।३०।।

उपेन्द्रः—१५१

उप+इन्द्रः=उपेन्द्रः। उपेन्द्रः सूर्यः, सूर्य-नाम्नां संग्रहेऽपि पठ्यते। अत्र विष्णु-सहस्रनाम-संग्रहे सूर्य इति नाम विष्णोर्नामसु संगृहीतमस्ति। यथा सूर्यो जगतस्तस्थुषश्चात्मा तथैव विष्णुरपि सर्वस्य चराचरस्यात्मा सूर्यस्य उपेन्द्रता-ज्ञापकं मन्त्रलिङ्गं यथा—

स वरुणः सायमग्निर्भवति स मित्रो भवति प्रातरुद्यन्।
स सविता भूत्वान्तरिक्षेण याति, स इन्द्रो भूत्वा तपति मध्यतो दिवम्।।
तस्य देवस्य क्रुद्धस्यैतदागो यं एवं विद्वांसं ब्राह्मणं जिनाति।
उद्वेपय रोहित प्रक्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान्।।

अथर्व १३।३।१३।।

उपोपसर्गो हीनेऽधिके च वर्त्तते। अतिक्रान्तमध्यान्तरिक्षश्च सूर्य 'उपेन्द्र' उक्तो भवति। एतमेवार्थं ज्योतिर्विदो दशम-लग्न-साधने नत-साधनेन व्यवहरन्ति। तद्यथा स्पष्टार्थगर्भं पद्यम्—

पूर्वं नतं स्यात् दिन-नात्रिखण्डं दिवानिशोरिष्टघटीविहीनम्।
दिवानिशोरिष्टघटीषु शुद्धं द्युरात्रिखण्डं त्वपरं नतं स्यात्।।

ताजिकनीलकण्ठी अ० १ श्लोक २०

दिनार्धं रात्र्यर्धं च क्रमात् दिवानिशोरिष्टघटीविहीनं चेत् तदा पूर्वं नतं स्यात्। अथ चेत् दिवानिशोरिष्टघटीषु क्रमेण, द्युरात्रिशुद्धं स्यात् तदा परं नतं स्यात्। प्रकृतमनुस्रियते—यथा वैशाखे सूर्योदयो मेषाख्ये लग्ने भवति, कर्के लग्ने मध्यं भवति दिनस्य, कर्कात् पूर्वपश्चिमौ यथाक्रमं मिथुन-सिंह-राशिस्थौ सूर्यो उपेन्द्रौ स्तः। तत्र हीनाधिकार्थम् उपोपसर्गो व्यनक्ति, तस्मात् 'उपेन्द्रः' सूर्यः, वृत्ताकारमिदं ब्रह्माण्डं व्याप्नोति, अभीष्टात् स्थानात्।

तथैव तेन भगवता विष्णुना प्रतिक्षणं, प्रतिलोकलोकान्तरं च स्वके गर्भेऽन्ता रक्षितं चास्ति। न हि विष्णुना विना किञ्चिदप्यास्ते। उक्तं च संगच्छते—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।।

यजु० ४० ।५।।

लोकेऽपि च पश्यामः—शरीरस्य मध्यमेन सम्पृक्तौ, बाहूः शिरः, पूर्वनतार्थीय उपेन्द्र इव। ये इमे जंघे ते परनतार्थीय उपेन्द्र इव। प्रतिवस्तु आत्मन पूर्वपरांशयोजनेन युक्तं सत् सर्वत्र तस्यैव विष्णोर्वैष्णवं गानं गायति, तमेव प्रकाशयति।

शरीरस्थं पित्तं सूर्यदैवतकम्, उक्तं च काश्यपसंहितायाम्— **अग्निमादित्यं च पित्तं श्रितम्'।** सर्वत्रैव प्राणिनः मध्याह्नपूर्वं परं वा समुदीर्णपित्तका भवन्ति। तच्च पित्तं भोजनेन शाम्यते। मध्यरात्रेऽपि पित्तं समुदीर्यते, सप्तमदृष्ट्या दर्शनात् भूभागस्य।

मन्त्रलिङ्गञ्च—

अथोपादान भगवो जंगिडामितवीर्य।
पुरा त उग्रा ग्रसत उपेन्द्रो वीर्यं ददौ।। अथर्व १६ ।३४ ।८ ।।

स इन्द्रो भूत्वा तपति मध्यतो दिवमित्यर्थे मन्त्रलिंगं च यथा—

उग्र इत् ते वनस्पत इन्द्र ओज्मानमादधौ।
अमीवाः सर्वाश्चातयं जहि रक्षांस्योषधे।। अथर्व १६ ।३४ ।६ ।।

जंगिड इत्योषधेर्नाममन्त्रलिङ्गञ्च—

न त्वा पूर्वा ओषधयो न त्वा तरन्ति या नवाः।
विबाध उग्रो जंगिड परिपाणः सुमंगलः ।। अथर्व १६ ।३४ ।७ ।।

भवति चात्रास्माकम्—

उपेन्द्रनामा भगवान् स विष्णुः
विश्वं निबध्नाति परावराभ्याम् ।
ददाति वीर्यं निखिलौषधिभ्यः
[1]तन्मूलमूलाश्च भवन्ति जीवाः ।।२००।।

उक्तं चाथर्ववेदे—

अभिवृष्टा ओषधयः प्राणेन समवादिरन् ।
आयुर्वै नः प्रातीतरः सर्वा नः सुरभीरकः।। अथर्व० ११ ।४ ।६ ।।

१. तन्मूलमूलाः=औषधय एव कारणं निमित्तं भवन्ति जीवानां परिवृद्धय इति भावः। अथवा—प्राणिनां मूलं प्राणाः, ते प्राणा औषधाधीनाः। अत उक्तं भवति औषधिमूलमूलकं प्राणिजगत् समस्तम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

या ते प्राण प्रिया तनूर्या ते प्राण प्रेयसी ।
अथो यद् भेषजं तव तस्य नो धेहि जीवसे।। अथर्व० ११।४।६।।
यदा प्राणोऽभ्यवर्षीद् वर्षेण पृथिवीं महीम् ।
पशवस्तत् प्रमोदन्ते महो वै नो भविष्यति ।। अथर्व० ११।४।५।।
आथर्वणीरांगिरसीर्दैवीर्मनुष्यजा उत ।
ओषधयः प्रजायन्ते यदा त्वं प्राण जिन्वसि ।। अथर्व० ११।४।१६।।
यत् प्राण ऋतावागतेऽभिक्रन्दत्योषधीः ।
सर्वं तदा प्रमोदते यत् किं च भूम्यामधि।। अथर्व० ११।४।४।।
अथर्व ११।४।।

एतद्व्याख्या प्रसंगेन 'इन्द्रकर्मा' श्लोके ६७, नामसंख्या—७८६, इत्यपि व्याख्यातं भवति

इन्द्रं सूर्यं यो विष्णुः कर्मणे गमयति, यतो वा नियमयति, एवंविधं इन्द्रस्य व्यवस्थापनं वा कर्म यस्य स 'इन्द्रकर्मा' विष्णुरित्युक्तं भवति। मन्त्रलिंगं च—

सर्वं तदिन्द्र ते वशे। ऋग् ८।६३।४।।

वामनः—१५२

'टुवम उद्गिरणे' भ्वादिः। उद्गिरणं-छर्दनम्। वम्यतेऽनेनेति 'वमनम्'। वमन्त्यस्मिन्निति वा 'वमनम्'। करणेऽधिकरणे वा ल्युट् प्रत्ययः। वमन एव 'वामनः' स्वार्थेऽण्प्रत्ययः। अथवा वमतेर्णिजन्ताल्ल्युट् वम्यतेऽनेनेति 'वामनः'। वामयन्त्यस्मिन्निति वा 'वामनः'। एवंविधार्थयोजनया ज्ञायते यत् यत्किंचिदत्र चराचरे जगति दृश्यते, तत् सर्वं तस्य यज्ञात्मकस्य ब्रह्मणः स्वात्मज्ञानकृतम्। न हि तेन ब्रह्मणा कुतश्चित् पूर्वं ज्ञानमाप्तं, ततो नु जगत् कृतम्=निर्मितमिति, ज्ञानमयत्वात्तस्य।

यथा हि लोके स्थूलोदाहरणं पश्यामः—स्रोतस्विन्यः स्वयं सततं जलं प्रस्रवन्त्यो वहन्ति। यत् स्रोतसां स्वयं जलस्य प्रवाहणं कर्म तत् वमनमिव। उद्गिरणमिव-प्रच्छर्दनमिव, सनादद्य यावत् स्रोतांसि स्रवन्ति। अनेनैव प्रकारेण सर्वव्यापको विष्णुः सनातनात् कालाद् विविधज्ञानानुस्यूतं युक्तियुक्तं कर्म कृतवान्। तस्य ब्रह्मणः प्रतिपदं कर्म तस्यैवात्मन उपज्ञातमिति कृत्वा 'वामनः' इति नाम्ना विष्णुर्व्यज्यते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

यदत्र किंचिद् भुवि दृश्यमानं
ज्ञानेक्षणेनापि च चिन्त्यमानम् ।
तद् वामनेनात्र विक्लृप्तमेत-
ज्ज्ञानस्वरूपेण[1] निजात्मयोगात्।।२०१।।

उक्तार्थं मन्त्रलिङ्गञ्च **'तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे'** इत्यादि।

अपरथा च व्याख्यानम्—

'मन स्तम्भे चुरादिः। 'मन ज्ञाने' दिवादिः। 'मनु अवबोधने' तनादिः। 'वा' उपमार्थे विकल्पार्थे चाव्ययम्। मानयति स्तभ्नाति, मन्यते जानाति, मनुते बुध्यते इति मनः। ***'सर्वधातुभ्य असुन्'*** (उणादिः ४।१८६) इति असुन् प्रत्ययान्तो 'मनः' शब्दः। वा तत्र पूर्वमुपात्तः। भगवतः कर्मसु विकल्पनात्मिका सृष्टिः।

तत्रापि च न हि सर्वाः प्राणिजातय, एकस्मिन् काले ऋतौ वा, प्रसवं प्राप्नुवन्ति। न हि एकेन सूर्यमात्रेण विश्वमिदं धृतमस्ति। तत्रापि च सप्तसूर्यादीनां ग्रहाणां विकल्पनास्मद्भूमिमुपकरोति, तथा चाप्रकाशग्रहाश्च-असंख्याता दिवि दृश्यमानास्ताराश्च।

अमुथैवास्मच्छरीरे एक एव पित्तात्मको वह्निः शरीरोपकाराय पंचधात्वं प्राप्त आस्ते। एकमेव जलं भूमिसाहाय्येन-कफतां प्राप्तः शरीरोपकाराय पंचधात्वं प्राप्त आस्ते। एक एव वायुः पंचधात्वं दशधात्वं वा प्राप्तः शरीरोपकाराय प्रक्रमते।

सर्वस्मिन् ब्रह्मकर्मणि अनेकविधविकल्पना दृश्यते। तद्यथा प्रतिशरीरांगे सन्धयो दृश्यन्ते। प्रतिवृक्षमनेकशाखाः सन्धिमन्त्यो दृश्यन्ते। एकस्मिन् पक्षि-पक्षे बहूनामुपपक्षाणां विकल्पना दृश्यते। संक्षेपादिदं ज्ञातव्यं यत् भगवता सर्वत्र विकल्पना कृतास्ति। सा विकल्पना सनातनात् कालादद्य क्षणं यावत् तथैवाक्षुण्णरूपेणायाति-यावत् कल्पोदयस्तावद् यास्यति च।

वा मनः=विकल्पमनः-स्तम्भनमनः। वामनः=विकल्पज्ञानो विष्णुः 'वामनः' उक्तो भवति। एक एव जातवेदस्त्रेधा विहितः।

मन्त्रलिङ्गञ्च—

शमग्ने पश्चात् तप शं पुरस्ताच्छमुत्तराच्छमधरात् तपैनम्।
एकस्त्रेधा विहितो जातवेदः सम्यगेनं धेहि सुकृतामु लोके।।

अथर्व १८।४।११।।

---

१. निजात्मयोगात्-निजज्ञानयोगात्। ज्ञानमयो हि सः। ज्ञानं हि प्रकाशः। उक्तं-**'तमसः परस्तात्'** (यजुः ३१।१८)।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अंगिरसामयनं पूर्वोऽग्निरादित्यानामयनं गार्हपत्यो दक्षिणानामयनं दक्षिणाग्निः।
महिमानमग्नेर्विहितस्य ब्रह्मणा समंगः सर्व उप याहि शग्मः।।

अथर्व १८।४।८।।

इति निदर्शनमात्रमुपन्यस्तम्। बहवो मन्त्रास्त्रिविध-विज्ञानस्य सन्ति। ते ज्ञानेप्सुना तत एवोन्नेयाः।

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्।
समूढमस्य पांसुले ।। ऋग्० १।२२।१७।।
त्रिभिः पद्भिर्द्यामरोहत् पादस्येहाभवत् पुनः ।
तथा व्यक्रामाद् विष्वङशनानशने अनु ।।
तावन्तो अस्य महिमानस्ततो ज्यायांश्च पूरुषः।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।।

अथर्व १९।६।२-३।।

विविधविकल्पनमनस्त्वं दिविधविकल्पज्ञानवत्त्वं तस्य वामनस्य विष्णोः सर्वत्र व्यापकं दृश्यते। मनुष्योऽपि स्वानि कर्माणि कुर्वन् बहुविधसाधनान्यपेक्षते। तत्र एक एव मूलतो धातुर्भवति। तद्यथा एकस्यैव लोहस्य विविधोपकरणानि कुरुते। तद्यदस्य मनुष्यस्य विविधोपकरणकर्तृत्वं, तत्तस्यैव वामनस्य विष्णोर्ज्ञानानुस्यूतस्येव शरीराभिमानिनोऽल्पज्ञानवतो जीवस्य कर्म।

भवति चात्रास्माकम्—

जगत् [1]सिसृक्षुर्भगवान् स विष्णु-
विकल्पनैर्वामन आ विभाति।[2]
जीवोऽपि तज्ज्ञानपथानुगः सन्
विकल्पनैस्तोषमुपैति भूयः।।२०२।।

मन्त्रलिङ्गञ्च—

नमो ह्रस्वाय च वामनाय च। यजु० १६।३०।।

प्रांशुः—१५३

प्रांशुरुन्नतपर्यायः। तथा चामरः—**'उच्चप्रांशून्नतोदग्रोच्छ्रितास्तुंगे'** (का० ३ विशेष्यनिघ्नवर्गः १, श्लोक ७०)।

१. स्रष्टुमिच्छुः सिसृक्षुः। २. आसमन्तात् विविधं भातीति आविभाति। वामनः ह्रस्वोऽपि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भगवतो विष्णोरुन्नतस्वरूपवर्णनं वेदे। यथा—

यस्य भूमिः प्रमान्तरिक्षमथोदरम् ।
दिवं यश्चक्रे मूर्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य सूर्यश्चक्षुश्चन्द्रमाश्च पुनर्णवः ।
अग्निं यश्चक्र आस्यं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य वातः प्राणापानौ चक्षुरङ्गिरसोऽभवन्।
दिशो यश्चक्रे प्रज्ञानीस्तस्मै ज्येष्ठाय ब्रह्मणे नमः।।
स्कम्भो दाधार द्यावापृथिवी उभे इमे स्कम्भो दाधारोर्वन्तरिक्षम्।
स्कम्भो दाधार प्रदिशः षडुर्वीः स्कम्भ इदं विश्वं भुवनमाविवेश।।

अथर्व १६।७।३२-३५।।

'लोकसम्मितोऽयं पुरुषः' इत्यस्य सिद्धान्तस्य चरकेणानुमोदितस्य मूलं यथा—

अन्तस्ते द्यावापृथिवी दधाम्यन्तर्दधाम्युर्वन्तरिक्षम्।
सजूर्देवेभिरवरैः परैश्चान्तर्यामे मघवन्मादयस्व ।। यजुः ७।५।।

तथा च—

ये पुरुषे ब्रह्म विदुस्ते विदुः परमेष्ठिनम् ।
यो वेद परमेष्ठिनं यश्च वेद प्रजापतिम् ।
ज्येष्ठं ये ब्राह्मणं विदुस्ते स्कम्भमनुसंविदुः।। अथर्व १०।७।१७।।

ह्रस्वपर्यायवामनशब्दार्थाद् विपरीतमर्थं ब्रुवाणो विष्णोः 'प्रांशु' नामार्थत एव निगदव्याख्यातं भवति। इति दिङ्मात्रमुक्तम्।

भवति चात्रास्माकम्—

प्रांशुर्ह वेवेष्टि जगत् समस्तं
नोच्चैर्हि तस्मात् न परं च किंचित्।
तस्यैव गर्भे स्थितिमेति विश्वं
ह्रस्वायते तारकितं नभश्च ।।२०३।।

'अंशु'-शब्दः प्रकृतिप्रत्ययाभ्यां 'चन्द्रांशु' नामनि द्रष्टव्यः।

अमोघः—१५४

'मुह वैचित्त्ये', चित्तं हि नाम, संज्ञानार्थकाच्चेतयतेः। समेकीभावे, संज्ञानं नाम एकात्मकं संशयरहितं ज्ञानं संज्ञानम्। विगतं सम्+ज्ञानं विचित्तं, विचित्तस्य भावः कर्म वा वैचित्त्यम्। निश्चयात्मकस्य सम्यग्ज्ञानस्य वाऽभावो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मोह इति। मोहो यस्मिन् नास्ति स 'अमोहः' सन् 'अमोघः' इत्युच्यते। सर्वज्ञानमयत्वात्तस्य ब्रह्मणो विष्णोर्वा स 'अमोघः' इत्युक्तो भवति। नैमित्तिकज्ञानवति मुग्धतोत्पद्यते, कारणानां शैथिल्याद् दोषदुष्टत्वाद्वा। तद्धि ब्रह्मणि विष्णौ न युज्यते स्वयं ज्ञानस्वरूपत्त्वात्तस्य, तस्मात् स अमोघः-अ+वि+अर्थः=अव्यर्थः।

लोकेऽपि पश्यामः-लतासु कूष्माण्डानां कालिन्दानां कोषातक्यादीनां फलनम्, वृक्षकाण्डे पनसादीनाम् भारवतां नियोजनं तस्य अमोघस्य निर्भ्रान्तस्य ब्रह्मणो ज्ञानमयत्वं प्रकाशयति। यदि मोहवशाद्विपरीतं क्रियेत, तदा नूनं हानिः स्यादेव। तद्यथा दुर्बलसूत्रे गुरुतमपदार्थनिबन्धनं तत्सूत्रं छिनत्ति भारातिशयात्।

अपरमुदाहरणम्-अंगुलयस्त्रिपुटकाः परन्त्वंगुष्ठो द्विपुटकः। तत्र यदि त्रिपुटात्मकोऽगुष्ठोऽभविष्यत्, तर्हि आदानसौकर्यमनंक्ष्यत्। धावनगुणवतोऽश्वस्य पादाः शफरूपेण स्वावयवेन तमश्वं शीतात् तापाद् घर्षणोत्थदुःखाच्च त्रायन्ते रक्षां कुर्वन्ति इति भावः समुद्रे महाकायानां मत्स्यानां निवासः। अश्वः सिकताततभूमौ न धावितुं तथा क्षमो भवति यथा स कठिनभूमौ। तत्र मनुष्योपकारायामोघेन विष्णुना मृदुलवितानगुणसन्निविष्टपादवतां महाकायानामुष्ट्राणां विकल्पनं कृतम्। सैकतभूमौ जलस्य दुर्लभत्वात् उष्ट्रोदरे जलस्य कोषार्थं पृथगाशयस्य कल्पनं दृश्यते। महोच्चेषु दृढतमशिलोच्चयवत्सु पर्वतेषु निर्झराणामजस्रं प्रस्रवणता दृश्यते स्थालिपुलाकवन्निर्दिश्यमानं कर्म सनात् कालाद् यथावस्थितमायाति कल्पान्तं यावत् यथायथं चामुग्धं यास्यतीति कृत्वा 'अमोघः' सर्वव्यापको विष्णुरुक्तो भवति।

मन्त्रलिङ्गञ्च—

यावती द्यावापृथिवी यावच्च सप्त सिन्धवो वितस्थिरे ।
तावन्तमिन्द्र ते ग्रहमूर्जा गृह्णाम्यक्षितं[१] मयि गृह्णाम्यक्षितम्।।
यजुः ३८।२६।।

यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः।। यजु ४०।७।।

अमोघो विशोक एकः सः, तद्विज्ञातर्यपि मोह-शोकयोर्हानिर्भवति। एकत्वात् अमुग्धत्वात्-विशोकत्वाच्च खस्य ब्रह्मणो विष्णोरिति वा। मनुष्यो हि यथा, यथा अमोघं ब्रह्म ध्यायति तथा तथा तस्य कर्मणि पूर्णता, युक्तियुक्तता चायाति।

मनुष्यकर्मसु परिष्कारिता मनुष्यस्य संशयात्मकं मोहात्मकं दोषपूर्णं वा

---
१. अक्षितं, अच्युतं, अविकृतमिति, अमुग्धमिति वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परिष्कारतः पूर्वकं कर्म व्यनक्ति। परन्तु नैतद्विष्णोर्युज्यते, तस्मात् स अमोघ उक्तो भवति। जीवो हि अल्पज्ञानः, विष्णुरनल्पज्ञानः। अल्पज्ञाने कथमेतत् कुर्याम्, कथं वा नैतत् कुर्यामित्यादयो विसंशया मोहा वा भवन्ति। अमोघत्वपदलिप्सुना प्रतिपदं जगत् पठनीयं, किं कदा कथं वा भवति।

भवति चात्रास्माकम्—

[1]अनल्पविद्ये न हि मोहसत्ता
सनातनो विष्णुरमोघ उक्तः ।
जगत् समस्तं महिमानमस्य
व्यनक्त्यमोघस्य बुधं सुनेत्रम्[2] ।।२०४।।

शुचिः—१५५

'ईशुचिर पूतीभावे' दिवादिः। शुच्यत इति 'शुचिः'। ***'इगुपधात् कित्'*** (उणादि ४।१२०) इत्यनेन इन् प्रत्ययः किच्च सः। भगवति विष्णावपवित्रता नास्तीति कृत्वा स 'शुचि' रुक्तो भवति।

मन्त्रलिङ्गञ्च—

शुचिष्ट्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम।।
ऋक् १।९१।३।।

स पर्य्यगाच्छुक्रमकायव्रमणमस्नाविरं शुद्धमपापविद्धम्।
कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः।।
यजु० ४०।८।।

अस्मिन् मन्त्रे स एक एव विष्णुः शुद्धमपापविद्धम् चोक्तः। यद्धि शुद्धम्, तदेव च शुचिः।

तथा चापरम्—

यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा।
ब्रह्म तेन पुनातु मा।। यजु० १९।४१।।

अग्नेरर्चिषि यत् पवित्रं शुचिः शुद्धं वा अन्तरा मध्ये विततं ब्रह्म, तेन पवित्रस्वरूपेण पुनातु माम्। 'अग्निः पवित्रं स मा पुनातु' (आप० श्रौत

१. अनल्पा विद्या यस्य सः, अनल्पविद्यो विष्णुः। २. नीयतेऽनेनेति नेत्रम्=शास्त्रं गुरुः चक्षुषी वा। तन्नेत्रं सुष्ठु शोभनं निर्दोषं यस्य स सुनेत्रस्तम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

१२।१६।६) इत्यपि सूक्तम्। शुचिर्विष्णुः। उक्तं चात्रैव पूर्वं-'***पवित्राणां पवित्रं यो मंगलानां च मगंलमिति*** सं० १० श्लोके।

भगवत्कर्मसु सर्वत्रैव शुचिता शुद्धिर्वा दृश्यते। सनात् कालादद्य यावत् तस्य जगति दृश्यमानं सर्वं निजेनाविकृतरूपेण प्रचलति, प्रचलिष्यति च। यत् शुद्धं कर्म तत् विष्णोरेवेति कृत्वा विष्णुभक्तेनापि मनसा वचसा कायेन पूतीभावाय प्रयतनीयम्।

भवति चात्रास्माकम्—

यदत्र विश्वे शुचिमत् स्वरूपं
स्वभावतो वा शुचिमत् प्रसिद्धम्।
शुचिः स विष्णुः स्वयमास्थितः सन्
सर्गादितः शुच्यत एव सर्वम् ।।२०५।।

शुचिस्वरूपस्य विष्णोः सर्वं कर्म शुचिमद् भवति। तद्यथा लोके निर्झरेभ्यः प्रस्रवज्जलं निर्दोषं भवति। वृक्षशुंगाश्च निर्दोषाः प्रिया मनोहराश्च दृश्यन्ते। पुष्पेषु शुचिमत्त्वं तस्यैव शुचिमतो विष्णोः स्वकं रूपम्।

अनेन विधिना शुचिः सर्वत्र व्यापको दृश्यते, सर्वत्र सर्वदा व्यापकत्वमेव विष्णोः स्वरूपम्। लोकतो नानाविधा उदाहरणोहा ऊहितव्या भवन्ति। काश्चन सूक्तयः संगृह्यन्ते—

पुनन्तु मा देवजनाः पुनन्तु मनवो धिया।
पुनन्तु विश्वा भूतानि पवमानः[1] **पुनातु मा** अथर्व० ६।१६।१।।
अस्मान् पुनीहि चक्षसे।। अथर्व. ६।१६।३।।

चक्षसे द्रष्टुम्। प्रभोर्महिमा येन हेतुना दृश्यते।

ऊर्जितः—१५६

'ऊर्ज बलप्राणनयोः' चुरादिः। ऊर्जयतीति 'ऊर्क्'। '***भ्राजभास०***' (पा० ३।२।१७७) इत्यादिना 'क्विप्' प्रत्ययः। ***'चो कुः'*** (पा० ८।२।३०) इति कुत्वम्। णिलोपस्य पूर्वत्रासिद्धे न स्थानिवत् इति स्थानिवत्त्वस्य निषेधात् पदान्तता। संयोगान्तलोपस्तु ***'रात्सस्य'*** (पा० ८।२।२४) इति नियमान्न भवति।

अत्र विश्वे सर्वं वस्तुजातं प्राणेन बलेन च युक्तमस्ति। यदा वस्तु कृमयोऽश्नन्ति, ते कृमयस्तदौषधबलेन प्राणेन च बलवन्तः प्राणवन्तश्च सन्तस्तमौषधं

१. पवमानो जातवेदाः पावको वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निष्प्राणं निर्बलं च कुर्वन्ति, दूषितसंयोगश्च बलं प्राणं च विहन्ति। प्रतिवस्तु तस्य निजं बलाधानात्मकं प्राणाधानात्मकं च शक्तिमत् कर्म भवति। तस्य ऊर्जो निधापयिता कः ? इति प्रश्नोत्तर उक्तं भवति—स एक एव विष्णु'रूर्जित' नामा। तस्य विष्णोः सर्वत्र व्यापकस्य यदूर्ङ्मयं कर्म प्रतिवस्तुनिष्ठं सनात् कालादद्य यावदास्ते, तदेवोर्ग्रूपेण तस्य व्यापनं परिलक्ष्यते, धीरास्तत् पश्यन्ति।

मन्त्रलिङ्गञ्च—

ऊर्जा देवां अवस्योजसा त्वां पिबा सोममदाय कं शतक्रतो।।

ऋग् ८।३६।३।।

ऊर्जा पिन्वस्व समिषोदिदीहि न।। ऋग् ३।३।७।।

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः।

दिवीव चक्षुराततम्।। यजु० १६।५।।

परमं पदं सूक्ष्मातिसूक्ष्मं ज्ञातुमर्हं कर्म।

ऊर्गस्यांगिरस्यूर्णम्म्रदा ऊर्ज्जं मयि धेहि।। यजु० ४।१५।।

पाषाणकणा अपि कपोतं कपिंजलकं जीवनेन योजयन्ति वपुषा च बलयन्ति पुष्यन्तीति वा। तृणानि पशुं बलेन प्राणेन च योजयन्ति। तद् यत् तत्र 'ऊर्क्' नियोजनं कर्म तत् तस्यैव कलाधरस्य कलात्मकं कर्म। सर्वेभ्य ऊर्क्तमः सन् स विष्णु'रूर्जितः' उक्तो भवति। ऊर्जितो बलस्वरूपः प्राणस्वरूपश्च।

बलमसि बलं मयि धेहि। यजु० १६।६।।

ऊर्जो[1] बलं स ओजो म आगन्। अथर्व० १८।४।५३।।

सूर्योऽपि 'ऊर्जितः' एतस्मादेव।

भवति चात्रास्माकम्—

यदत्र किंचिद् बलवत् प्रसिद्धं
विराजते प्राणयुतं च यद् यत् ।
तदूर्जितेनैव ततं समस्तं
सनाद्ध वै विष्णुरिहोर्जितः[2] सः।।२०६।।

मन्त्रलिङ्गञ्च—

अहमिन्द्रो न पराजिग्ये। ऋग्० १०।४८।५।।

---

१. ऊर्जः=प्राणाः। २. ऊर्जा संजाता अस्येति-'ऊर्जितः'।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अतीन्द्रः—१५७

इन्द्रमतिक्रमते, इन्द्रमतिवर्त्तते वाऽ'तीन्द्रः'। दिव्यं सुपर्णं गरुत्मन्तं सूर्यं बहुविधनामभिर्विप्रा आहुः। तेषु विविधनामसु इन्द्रोऽपि तस्य नाम।

तज्ज्ञापकं मन्त्रलिङ्गञ्च—

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ।।

ऋग्० १।१६४।४६।।

अत्र इन्द्रपदोक्तः सूर्यः, एतेन ज्ञायते यद्यत् कर्म-वर्णनं इन्द्र-मित्र- वरुण-अग्नि-सुपर्ण-गरुत्मद्यममातरिश्वादिभिर्नामभिर्वेदेषु वर्णितमस्ति, तत्तत् सर्वं कर्म इन्द्रनामा भगवान् सर्वव्यापको विष्णुरतिवर्त्तते, तस्माद् विष्णुरतीन्द्र उक्तो भवति।

सूर्यतो भिन्नार्थे इन्द्रप्रयोगः—स चेन्द्रः सूर्यमरोचयत्, विश्वानि भुवनानि च यमयति।

मन्त्रलिङ्गञ्च—

इन्द्रो मह्ना रोदसी पप्रथच्छिव इन्द्रः सूर्यमरोचयत् ।
इन्द्रे ह विश्वा भुवनानि येमिर इन्द्रे सुवानास इन्दवः।।

ऋग्० ८।३।६।।

यः शिवो, ब्रह्म, इन्द्रः, स सूर्यमप्यतिवर्त्तते। तस्मात् स सर्वव्यापको विष्णु 'रतीन्द्रः' उक्तो भवति। यस्मात् स इन्द्रः सर्वाणि भुवनानि यमयति, नियमयति वा अतः स यमो नियमो वोक्तो भवति। सर्वनियामकः सन् स सर्वनियन्ता नियन्ता वोक्तो भवति। या हि तस्मिन्निन्द्रे सर्वातिवर्त्तनशक्तिस्तया स जगद् व्यश्नुवानो विष्णुः सन् 'अतीन्द्रः' उच्यते।

भवतश्चात्रास्माकम्—

यदिन्द्रनाम्ना वरुणेन नाम्ना
यमेन नाम्नाऽथ सुपर्णनाम्ना ।
सूर्येण नाम्ना किमु वाग्निनाम्ना
कर्मास्ति वेदेषु बहुत्र गीतम् ।।२०७।।

तत् कर्मजातं ह्यतिवर्त्तते यः
स पावनो विष्णुरतीन्द्र उक्तः ।
स मातरिश्वा स यमः स उग्र-
स्तस्मिन् ह तस्थुर्भुवनानि विश्वा।।२०८।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अतीन्द्रव्याख्याप्रसंगेन विष्णोर्नाम्नी 'यम-नियमा'वपि व्याख्याते भवतः। पृथक्शश्च व्याख्याते द्रष्टव्ये संख्या-१६१, १६२,। नियन्ता सर्वनियन्ता चापि।

सङ्ग्रहः—१५८

'समु'पसर्गः, 'ग्रह उपादाने' क्रैयादिको धातुः ***'विभाषा ग्रहः'*** (पा० ३।१।१४३) इति सूत्रेण 'णः' प्रत्ययो विकल्प्यते, अचोऽपवादः। इयं व्यवस्थितविभाषा, तेन नित्यं जलचरे ग्राह एव, ज्योतिषि च ग्रह एव। समेकीभावेन गृह्यते 'संग्रहः'। ***'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते'*** इति। अनेकस्यैकीभवनमेकीभावः।

संक्षेपत इदं वक्तुमर्ह्यते, यत्-अनेकविधविकल्पनविभूषितमिदं जगत् तेन 'संग्रह' नामवता गुणवता वा विष्णुनैकमिव गृह्यते धार्यते पोष्यते व्यवस्थाप्यते च। स्थूलोदाहरणम्-यथा शरीराभिमान्यात्मा सर्वाङ्गसमुदितं शरीरमेकीभावेन धारयति स्तभ्नाति, आहारस्य च रसः सर्वाङ्गमेकीभावेन पुष्णाति, तथैव भगवान् विष्णुः सर्वं जगदेकमिव धारयति पोषयति स्तभ्नाति व्यवस्थापयति वा, तस्मात् 'संग्रहः' स उक्तो भवति। सनात् कालादेषा व्यवस्थायात्यायास्यति च।

सूर्यादयो ग्रहा अपि सर्वं विश्वमेकीभावेन गृह्णन्तो विश्वेनैकीभावेन गृह्यमाणा वा ग्रहाः सन्तः संग्रहा एव। अत एव चोक्तं भवति—भगवान् सूर्यनारायणः, अपां पतिर्भगवांश्चन्द्रः, भगवान् मंगलः, भगवान् बुधः, भगवान् बृहस्पतिः, भगवाञ्छुक्रः, भगवाञ्छनिः, भगवान् राहुः, भगवान् केतुरिति। तेषां ग्रहाणामपि संग्रहीता स भगवान् सर्वशक्तिमान् 'संग्रह' नामा विष्णुरेव।

मन्त्रलिङ्गञ्च—

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः।
दिवीव चक्षुराततम्।। ऋग्० १।२२।२०।।

तथा च —

यत्र विश्वं भवत्येकनीडम्[1]। यजु० ३२।८।।

अपरं च—

यस्मिन् विश्वानि भुवनानि तस्थुस्तिस्रो द्यावस्त्रेधा सस्रुरापः।
त्रयः कोशास उपसेचनासो मध्वश्चोतन्त्यशितो विरप्शम् ।।
ऋग्० ७।१०१।४।।

---

१. एकनीडम्=मुष्टिरिवैकमिव गृहीतं=संगृहीतमिति भावः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

स 'संग्रहः' सर्वगतः स विष्णु-
गृहीतकेशो व[1] जगत् समस्तम्।
संगृह्य, संग्राह उ संग्रहो वा
विश्वं विधत्ते स उ चैकनीडम्।।२०६।।

सर्गः—१५६

'सृज' विसर्गेदिवादिः, तुदादिश्च। सृजतेः 'घञ्' प्रत्ययः। सर्जनं 'सर्गः' सोऽस्यास्ति सर्वत्र मत्वर्थीयोऽच्। व्यापको विष्णुः।

मन्त्रलिङ्ग यथा—

प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते ।
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा।।
यजु० ३१।१६।।

तम आसीत् तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वमा इदम्।
तुच्छ्येनाभ्वपिहितं यदासीत् तपसस्तन्महिनाजायतैकम् ।।
ऋग्० १०।१२६।३।।

इयं [2]विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न ।
यो अस्याध्यक्षः परमे व्योमन्त्सो अंग वेद यदि वा न वेद।।
ऋग्० १०।१२६।७।।

कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत् ।
सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा।।
ऋग्० १०।१२६।४।।

भवति चात्रास्माकम्—

सर्गः स शम्भुः समुदीर्णवीर्यो
रेतो विधायैव मनोमयं सः।
ससर्ज विश्वं विविधस्वरूपं
कामः स विष्णुः स हि सर्ग उक्तः।।२१०।।

---

१. व=इवार्थकः, गृहीतकेश इवेत्यर्थः। २. विसृष्टिः-विविधा 'सृष्टिः, सर्जनम्=सृष्टिः। सनातनः सर्गः सर्गाद्यक्षणादद्य यावद् यथाव्यवस्थं सृजतीति कृत्वा स 'सर्गो' विष्णुरुक्तो भवति। तस्य सर्गस्यैषा व्यवस्था आकल्पं यावत्तथैव यास्यतीति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धृतात्मा—१६०

धृतं सर्वमात्मना येन स 'धृतात्मा'। निजधारणात्मिकया शक्त्या सर्वत्र व्यश्नुवानो विष्णु'र्धृतात्मो'च्यते।

मन्त्रलिङ्गञ्च—

स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।।

(यजुः १३।४।।)

लोकेऽपि च तच्छायानुस्यूतं कर्म जीवात्मनोऽपि दृश्यते। तद्यथा सनातनोऽमृतोऽल्पज्ञानी देहाभिमानी जीवोऽपि स्वकया सत्तया शक्त्या वा पार्थिवमिदं भंगुरं शरीरं धारयति गमयति पुष्पगन्धवल्लघुतममिव मन्वानश्चपलयति। इयं या व्यवस्था सनात् कालादद्यक्षणं यावद् दृश्यते, सा तस्यैव धृतात्मनो भगवतोंऽशतोऽनुस्यूतं कर्म जीवस्य दृश्यते। तस्मात् स सनातनो विष्णुर्धृतात्मोक्तो भवति।

भवति चात्रास्माकम्—

धृतात्मना विश्वमिदं समस्तं
धृतं विराजं स उ संविवेश।
तथैव जीवोऽपि निजात्मयोगाद्
ध्रियन् वपुर्विष्णु[1] मनक्त्यनन्तम्।।२११।।

यदुक्तं 'स उ प्राविशत् विराजं शरीरम्' तत्र

मन्त्रलिङ्गञ्च—

या आपो याश्च देवता या विराड् ब्रह्मणा सह।
शरीरं ब्रह्म प्राविशच्छरीरेऽधि प्रजापतिः।।

अथर्व० ११।८।३०।।

तस्माद्वै विद्वान् पुरुषमिदं ब्रह्मेति मन्यते।
सर्वा ह्यस्मिन् देवता गावो गोष्ठ इवासते[2]।। अथर्व० ११।८।३२।।

नियमः—१६१ यमः—१६२

'यम उपरमे' भौवादिकः, 'यम परिवेषणे' चौरादिकः। यच्छति ***'इषुगमियमां***

---

१. अनक्ति व्यनक्ति प्रकाशयतीत्यर्थः। २. सर्वमेवैतत् सूक्तं विशेषज्ञानार्थिभिरध्येयम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

छः' (पा० ७।३।७७) इति सूत्रेण शिति प्रत्यये मस्य छत्वविधानम्। 'यम परिवेष्टने' चौरादिकः, केचित् यमोऽपरिवेष्टन इति पठन्ति, तदनार्षम् इह परिवेष्टनं, न तु भोजना, नापि वेष्टना। तद्यथा-यमयति चन्द्रम्, चन्द्रम् परिवेष्टत इत्यर्थः। यच्छति, यमयति वा 'यमः'। 'नि'-उपसर्गपूर्वो 'नियमः' पचाद्यच्। भगवान्विष्णुर्नियमन-शक्त्या सकलं विश्वं व्याप्नोति तस्मात् स 'नियमः' उच्यते। यो हि यं निर्मिमीते स तं नियच्छतीति कृत्वा स सकलसृष्टिकर्त्ता 'नियमः' उच्यते।

यमः सर्वं भूतमात्रमुपरमयति तस्मात् विष्णु'र्यम' उक्तो भवति।

मन्त्रलिङ्गञ्च—

यमः परोऽवरो विवस्वान् ततः परं नातिपश्यामि किंचन ।
यमो अध्वरो अधि मे निविष्टो भुवो विवस्वानन्वाततान।।

अथर्व १८।२।३२।।

परेयिवांसं प्रवतो महीरिति बहुभ्यः पन्थानमनुपस्पशानम् ।
वैवस्वतं संगमनं जनानां यमं राजानं हविषा सपर्यत।।

अथर्व १८।१।४६।।

यो ममार प्रथमो मर्त्यानां प्रेयाय प्रथमो लोकमेतम् ।
वैवस्वतं संगमनं जनानां यमं राजानं हविषा सपर्यत।।

अथर्व० १८।३।१३।।

मृत्युर्हि यमस्य दूतः।

मन्त्रलिङ्गञ्च—

अथेमं जीवा अरुधन् गृहेभ्यस्तं निर्वहत परि ग्रामादितः ।
मृत्युर्यमस्यासीद् दूतः प्रचेता असून् पितृभ्यो गमयांचकार ।।

अथर्व० १८।२।२७।।

यमस्य दूतो मृत्युर्यन्नोपैति सोऽमृत्युर्भगवान् विष्णुः, तस्मात् स अमृत्युरुक्तो भवति। विशिष्टममृत्युरिति नाम्नो व्याख्याप्रसंगे द्रष्टव्यम्।

विवस्मान् यमः, यमो वा विवस्वान्। विवसनधर्मस्य विवासनधर्मस्य वा भगवति निहितत्वात्, सर्वस्यास्य क्षयोन्मुखत्वात्। मृत्योर्विवासनधर्मोऽस्ति। जीवं तद्वासरूपाच्छरीरात् पृथक्करोतीति कृत्वा विवस्वान् यमो मृत्युर्वा। एवं प्रसंगतो विवस्वानिति च व्याख्यातम्। विवस्वत इदं वैवस्वतम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

यमो विवस्वान् नियमो यमो वा
नियामके विश्वमिदं नियम्य।
स मृत्युदूतः नियमेन सर्वं
जगद् व्यवस्थापयते ह विष्णुः।।२१२।।

प्रसंगतः—नि-उपसर्गपूर्वाद् यच्छतेस्तृचि प्रत्यये नियन्ता, नियच्छतीति नियन्ता, प्रत्ययभेदाच्छब्दभेदो न त्वर्थभेदः। नियन्ता ८६४ चतुःषष्ट्युत्तरमष्टशततमं चापि नाम व्याख्यातं भवति। अनियमः ८६५ पंचषष्ट्युत्तरमष्टशततमं नाम चापि नञा युक्तत्वात् सन्धिविच्छेदेनैवं गम्यते। तदा न हि तस्य विष्णोः कश्चिदपि नियमयिताऽस्ति तस्मात् सोऽनियम उक्तो भवति। सन्धिमन्तरा स नियमः, नियमाश्च संख्यया पंच। तद्यथा शौच-संतोष-तपःस्वाध्याय-ईश्वरप्रणिधानानि नियमाः। पातंजलयोगशास्त्रे कृतैषा संज्ञा मनोर्वा[1]। नियमान्निश्छलानभ्यस्यन्ना विष्णुमेवार्चतीति मन्तव्यम्। नियमस्य विष्णोर्नामस्वन्तर्भावात्।

यमान् सेवेत सततं न नियमान् केवलान् बुधः।
यमान् पतत्यकुर्वाणो नियमान् केवलान् भजन् ।।

अ० ४ श्लोक २०४।।

विस्तरस्तत्रैव द्रष्टव्यः। कैश्चिद् दश-दश यम-नियमा व्याख्याताः।

एवमेव सन्धिच्छेदे-अयमः, यमो वा। न हि कश्चित्तस्य यमयिता तस्मादयमः, स विष्णुः। यमान्निश्छलानभ्यस्यमानो ना विष्णुमेवार्चतीति मन्तव्यम्। विष्णोर्नामसु यमस्यान्तर्भूतत्वात्। यमाश्च पंच। तद्यथा अहिंसा-सत्यास्तेय-ब्रह्मचर्यापरिग्रहा इति। पातंजलयोगशास्त्रस्य कृतैषा संज्ञा, मनोर्वा। षट्षष्ट्युत्तरमष्टशततमं नाम ८६६ अयमः, यमो वा। एवं प्रसंगतः—नियन्ता नियमो यमः, अथवा—नियन्ताऽनियमोऽयमः इत्यपि व्याख्याता भवन्ति।

भवति चात्रास्माकम्—

विष्णुर्नियन्ता नियमो यमोऽसौ
विष्णुर्नियन्ताऽनियमोऽयमः सः।
प्रकाशते विश्वमिदं समस्तं
यमैर्नियामैश्च[2] कृतव्यवस्थम्।।२१३।।

---

१. मनुस्मृतौ इत्यर्थः— २. नियामैः=नियमैरित्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'यमः समुपनिविषु च' (पा० ३।३।६३) इति पक्षे घञ् नियमः, नियामः।

❖ ❖ ❖

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः।
अतीन्द्रियो महामायो महोत्साहो महाबलः।।३१।।

१६३ वेद्यः, १६४ वैद्यः, १६५ सदायोगी, १६६ वीरहा, १६७ माधवः, १६८ मधुः।
१६६ अतीन्द्रियः, १७० महामायः, १७१ महोत्साहः, १७२ महाबलः।।३१।।

वेद्यः—१६३

'विद ज्ञाने' आदादिकः। वेदमर्हति, वेदितुं योग्य इति वा 'वेद्यः'। ***'तदर्हति'*** (पा० ५।१।६३) इत्यनेन 'यत्' प्रत्ययः। भगवद्व्यवस्थाव्यवस्थिते विश्वे किं वेद्यमस्तीति जिज्ञासायामुक्तं भवति—भगवतो व्यवस्थापनं कर्म। तेन व्यवस्थापनकर्मणा स सर्वं विश्वं व्याप्नुवन् 'वेद्यः' इति नाम्ना वक्तुमर्हो भवति। अथवा—स एव सर्वत्र सर्वकलासु वेद्यत्वेन व्यश्नुवानः सन् 'वेद्यः' इति नाम्ना विष्णुरुक्तो भवति। मृत्युमतिचिक्रमिषवो मुमुक्षवस्तमेव तावद् वेद्यं मन्यन्ते, इति कृत्वा स 'वेद्यः' इति नाम्नोक्तो भवति।

मन्त्रलिङ्गञ्च—

तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।

यजु० ३१।१८।।

तथा च—

प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते ।
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा।।

यजु० ३१।१६।।

मन्त्रलिङ्गञ्च—

श्रुत्कर्णाय कवये वेद्याय वचोभिर्वाकैरुपयामि रातिम् ।
यतो भयमभयं तन्नो अस्त्वव देवानां यज हेडो अग्ने।।

अथर्व० १६।३।४।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

स एव वेद्यः सकलैः पुराणो
वेद्यं कविं तं कथयन्ति वेदाः।
वेद्ये स्थितं विश्वमिदं समस्तं
तस्माज्जगच्चापि च वेद्यमाहुः।।२१४।।

वैद्यः—१६४

'विद ज्ञाने' आदादिकः। ***'संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः'*** (पा० ३।३।९९) इत्यनेन सूत्रेण विद धातोः स्त्रियां 'क्यप्' प्रत्ययः स चोदात्तो भवति। ततः ***'अजाद्यतष्टाप्'*** (पा० ४।१।४) इति सूत्रेण टाप् स्त्रियाम्। वेद्यते ज्ञायते यया सा 'विद्या'। क्यब्विधायके सूत्रे 'भावे' इति न स्वर्यते।

यया दोषरहितया पद्धत्या यज्ज्ञेयं ज्ञायते सा तद्विषयिकी विद्या। तद्यथा—शब्दानुशासनं व्याकरणं शब्दविद्या, न्यायशास्त्रं तर्क-विद्या, गानं विदन्ति यया सा गानविद्या। तत्रापि च प्रधानतया द्वे विद्ये—परा-अपरा च। त्रिगुणात्मलोकस्य ज्ञानदातृत्वात् किमु वा मनुष्योपदेशकर्तृत्वाद् वेदा अपि त्रिगुणा एव, तस्मात् परायां विद्यायां परिगण्यन्ते। ***'त्रैगुण्यविषया वेदाः'*** (२।४५) इति गीतायामुक्तं संगच्छते।

यया तदक्षरमधिगम्यते सा विद्याऽपरा विद्या। सर्वविद्या विष्णोर्गर्भानुस्यूतत्वात् स सर्वज्ञानो विष्णुर्ज्ञानमात्रेण सर्वत्र सनाद् विश्वं व्याप्नोतीति कृत्वा 'वैद्यः' इति नाम्नोच्यते। विद्यां वेत्तीत्यर्थे ***'तदधीते तद्वेद'*** (पा० ४।२।५९) इति सूत्रेण यथाविहितमण्प्रत्ययो भवति, ***'यस्येति च'*** (पा० ६।४।१४८) इत्यनेन आकारलोपः।

भगवता विष्णुना यद् यद्विहितमस्ति तत् तत् सर्वं विद्यामयम्। तद्यथा—मनुष्यनिर्माणं पशूनां पक्षिणां विविधानां चोद्भिज्जातीनां निर्माणं कया विद्यया भगवता वैद्येन कृतमिति स एव वेत्ति, नान्यः कश्चित्। न हि कोऽपि चेतनानिष्ठं पुरुषमपरं वा चेतनानिष्ठं प्राणिनं निर्मातुं क्षम इति कृत्वा स एव विष्णुस्तां पद्धतिं तं मार्गं वा वेदेति कृत्वा स विष्णु 'वैद्यः' इत्युक्तो भवति।

मन्त्रलिङ्गञ्च—

विश्वानि देव वयुनानि विद्वान्। यजु० ७।४३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

विश्वस्य निर्माणकलामशेषां
विष्णुर्ह वेदेति स 'वैद्य' उक्तः।
तं सर्वविद्यं य उ वेत्ति वैद्यं
विद्यामयः सोऽप्युपयाति वैद्यम्।।२१५।।

इतरोऽपि 'वैद्यः' एतस्मादेव। यतः स रोगोदयोपशमनं वेद। आयुषो विद्यामधीते वेद वा 'वैद्यः'।

सदायोगी—१६५

सदायोगी शब्दस्त्रिधा विभज्यते—सतः आयोगी='सदायोगी', सदा योगी=सदायोगी; सदा+आयोगी=सदायोगीति। धातवश्चापि बहवः प्रयोगं लभन्ते—'युगि वर्जने' युंगति वर्जनं करोति भ्वादिः। तस्मात् 'सदा' पूर्वात् ***'सुप्यजातौ णिनिस्ताच्छील्ये'*** (पा० ३।२।७८) इति **'णिनिः'**=सदायोगी।

'युज समाधौ' दिवादिः' 'युजिर् योगे' रुधादिः, आभ्यां ***'सम्पृचानु०'*** (पा० २।३।१४२) इति सूत्रेण घिनुण्-प्रत्ययः। युज संयमने, चुरादिः। तस्मादेवं वक्तुमर्ह्यते सदा युंगति वर्जन-स्वभावमातिष्ठतीति सदायोगी। तद्यथा—

अक्षैर्मा दीव्यः। ऋ० १०।३४।१३।।
मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा। अथर्व ३।३०।३।।
मा गृधः कस्य स्विद्धनम्। यजु० ४०।१।।

इत्यादि वर्जनं सनादेव तस्य भगवतो दृश्यते। विपरीताचरणे दुःखोदयस्य दृष्टत्वात् स परमकारुणिकः सदैव वर्जनं कुर्वाणः—सदायोगी स भगवान् विष्णुरुक्तो भवति।

सदैव योजयति संयमयति, विश्वान् लोकांस्तस्मात् स 'सदायोगी[१]' संयमनशक्त्या स्वात्मानं व्याप्नुवानः 'सदायोगी' भगवान् विष्णुरुक्तो भवति। सदा युनक्ति कर्मणि क्रियायां विश्वमिति सदायोगी।

मन्त्रलिङ्गञ्च—

युञ्जते मन उत युञ्जते धियो। यजु० ५।१४।।

सदा युञ्जते समादधाति निजं ज्ञानं विश्वरचनासु तेन हेतुना स भगवान् विष्णुः 'सदायोगी' नाम्नोक्तो भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सम=एकीभावने, आ=समन्ताद् धारणम्=समाधिः समादधाति एक-रूपतया समन्तात् सर्वभावेन धारयति पोषयति विश्वमिति तस्मात् स 'समायोग' अप्युक्तो भवति।

मन्त्रलिङ्गञ्च—

स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम। यजु० १३।४।।

तस्मिन् ह तस्थुर्भुवनानि विश्वा। यजु० ३१।१९।।

संयमनार्थे मन्त्रलिङ्गम् —

इन्द्रो ह विश्वा भुवनानि येमिरे। ऋग् ८।३।६।।

भवतश्चात्रास्माकम्—

स वर्जनं निन्द्यकृते विधत्ते
युङ्क्ते स्वयं विश्वकृतौ विधाता।
स विश्वमेतं परितो दधाति
स युज्यते सर्वकलासु दक्षः ।।२१६।।

एवं सदायोगमुपेयिवांसं
बुधाः सदायोगिनमाहुरग्र्यम्।
विष्णुं पुराणं सुलभं शुचिं तं
पश्यन्त आयुक्ततत[1] सदैव ।।२१७।।

'विश्वा अग्ने अभियुजो विहत्य'। (ऋग् ५।४।५)

प्रसंगतः—समायोग्यपि व्याख्यातं भवति।

वीरहा—१६६

'वि' उपसर्गः, 'ईर गतौ कम्पने च' आदादिकः। 'ईर क्षेपे' चौरादिकः। वि पृथग्विशेषार्थयोः। विगतो कम्पनगत्या वीरः। विशिष्टो वा गतो वीरः। 'वि' उपसर्गसहित 'ईर' कण्ड्वादिषु चापि पठ्यते 'शूर वीर विक्रान्तौ' इति, तस्मात् पचाद्यच्।

ततः वीरोपपदात् आदादिकात् हनधातोः ***'ब्रह्मभ्रूणवृत्रेषु क्विप्'*** (पा० ३।२।८७) इति क्विपि 'वीरहा'। अथवा सोपपदात् निरुपपदाद्वा 'हन' धातो

---

१. आयुक्ततततम्=आयुक्तेन ततं व्याप्तं सदैव सनात् कालादिति। सदायोगोऽस्यास्तीति तं सदायोगिनम्, सदायोगशीलं स्वभावधर्माणं वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'क्विप् च' (पा० ३।३।७६) इति सूत्रेण 'क्विपि' ***'सौ च'*** (पा० ६।४।१३) सूत्रेण दीर्घे 'वीरहा' इति साधुः।

यदा हि मनुष्यः सबलः स्वकान् असून् प्रीणाति तदा स दुर्बलान् तंकति कृच्छ्रेण प्राणिनः योजयति, तदा सोऽपराधी दोषी शत्रुर्वोक्तो भवति। तदर्थे अभिपूर्वो युज् क्विबन्तः प्रयुक्तो भवति। तन्नाशाय च प्रार्थयते—

मन्त्रलिङ्गञ्च—

विश्वा अग्ने अभियुजो विहत्य। ऋग्० ५।४।५।।

संक्षेपत इदं वक्तुमर्हर्यं यत् विरुद्धगतिकर्तॄनसुषु रममाणान् भगवान् हन्ति। प्रज्ञापराधमाप्नुवन् स विरुद्धगतिः कर्त्ता प्रजानां कोपभाजनः सन् नाशोन्मुखं पन्थानमधितिष्ठति। यः प्रजासु कोपोदयः स स्वयं भगवानेव। 'क्रोधकृद्' विष्णोर्नामसु पठितत्वात्। *क्रोधकृदर्थे मन्त्रलिङ्गञ्च—

मन्युरसि मन्युं मयि धेहि। यजु० १९।९।।

विरुद्धगतीन् भगवान् विष्णुर्हन्तीति कृत्वा 'वीरहा' विष्णुरुक्तो भवति। अथवा-प्रकृतेर्नियमविरुद्धमाचरन्तं हन्तीति कृत्वा 'वीरहा' भगवान् विष्णुरुक्तो भवति।

अत्र स्मरणीयं विदुरस्य पद्यद्वयम्—

न देवा दण्डमादाय रक्षन्ति पशुपालवत्।
यं तु रक्षितुमिच्छन्ति बुद्ध्या संविभजन्ति तम् ।। विदुरनीति ३।४१।।
बुद्धौ कलुषीभूतायां विनाशे प्रत्युपस्थिते।
अनयो नयसंकाशो हृदयान्नापसर्पति ।। विदुरनीति २।८२।।

यत्तूक्तं क्रोधकृत् विष्णुरिति, तत्र मन्त्रलिंगं च—

नमस्ते रुद्र मन्यवे । यजु० १६।१।।

सत्कर्तॄन् वीरान् मा नाशयेत्यर्थे च प्रार्थना श्रूयते। तद्यथा मन्त्रलिंगं च—

मा नो वीरान् रुद्र भामिनो वधीः। यजु० १६।१६।।

अत्र व्याख्याप्रसंगे 'क्रोधकृद्' इति च व्याख्यातं भवति।

भवति चात्रास्माकम्—

विरुद्धकर्तॄन् स हिनस्ति वीरान्
प्रज्ञापराधी विनिपातमेति ।
स मन्युमान् विष्णुरमेयकर्मा
स वीरहा लोक-हिताय युक्तः।।२१८।।

*** मन्युर्ज्ञानपूर्वकं भवति।**

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

माधवः—१६७

अग्रिमे 'मधु' १६८ तमे नामनि प्रकृतिप्रत्ययौ द्रष्टव्यौ। मधुः=ज्ञानमस्यास्तीति 'माधवः'। मधुः=ज्ञानमस्मिन्नस्तीति वा 'माधवः'। ***'अण् च'*** (पा० ५।२।१०३) सूत्रस्य गणवार्त्तिकम् अण् प्रकरणे ***'ज्योत्स्नादिभ्य उपसंख्यानम्'*** इत्यत्र निःक्षेपात् तत्स्थोदाहरणसंग्रहो नैतावत्त्वं गणस्य ज्ञापयति।

मन्त्रलिङ्गञ्च—

विष्णोः पदे परमे मध्व [1] उत्सः। ऋग्० १।१५४।४।।

अथवा—मातीति माः। ***'क्विप् च'*** (पा० ३।२।७६) सूत्रेण धातुमात्रात् क्विप् प्रत्ययस्य सद्भावात्। 'धूञ् कंपने' सौवादिको, 'धू विधूनने' तौदादिको, 'धूञ् कम्पने' चौरादिको-धुवति-धुनयति ***'धूञ्प्रीञोर्नुग् वक्तव्यः'***, धवयति वा। ***'ऋदोरप्'*** (पा० ३।३।५७) इति सूत्रेण 'अप्' प्रत्ययः' तेन 'धवः' इति। मा-धव इति एतावत्त्वं विश्वस्य चराचरस्य जानन् स तस्मिन् कम्पनं गतिं करोतीति 'माधवो' विष्णुः।

मन्त्रलिङ्गञ्च—

तदेजति [2] तन्नैजति तद् दूरे तदु अन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।। यजु० ४०।५।।

माया लक्ष्म्या धव इति 'माधवः'। केचित्—मा हरस्य विद्या ज्ञानं वा, तस्या माया धवः='माधव' इत्यपि च व्याचक्षते। उदाहरन्ति च—

मा विद्या च हरेः प्रोक्ता तस्य ईशो यतो भवान्।
तस्मान् माधवनामासि धवः स्वामीति शब्दितः।। हरिवंशे ३।८८।४६।।

भवति चात्रास्माकम्—

स ज्ञानवान् ज्ञानमयोऽथ विष्णु-
र्मात्वा जगद् धूनयतीह शश्वत् ।
लक्ष्मीस्तु मा, मा च हरस्य विद्या
तस्याः स ईष्टे स उ माधवोऽतः।।२१६।।

यत्तूपरिष्टादुक्तम्—माया लक्ष्म्या धवो 'माधवः' इति। उक्तं च—

विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम्।
लक्ष्मीं प्रियसखीं भूमिं नमाम्यच्युतवल्लभाम्।। श्रीसूक्ते २५।।

---

१. उत्सः=स्रोतः। २. एजति—एजयतीत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

माधवी विष्णुपत्नी, सा च **'श्रीश्च ते लक्ष्मीश्च पत्न्यौ'**। यजुः ३१।२२।। इति मन्त्रसिद्धा ताम्, माधवस्य स्त्री पत्नी वा माधवी ताम् ***'पुंयोगादाख्यायाम्'*** (पा० ४।१।४८) इति 'ङीष्'। इतरो 'धवः' स्वामिपर्य्यायोऽप्येतस्मादेव। स हि स्वं धूनयति, यथाभिमतेनादेशेन गतावास्थापयति। स्त्रीणां धवोऽप्येतस्मादेव, स हि योनिं बीजवपनकर्मणि धूनयति कम्पयति क्षुभ्नाति वा।

मन्त्रलिङ्गञ्च—

तां पूषञ्छिवतमामेरयस्व यस्यां बीजं मनुष्या वपन्ति ।
या न ऊरू उशती विश्रयाति यस्यामुशन्तः प्रहरेम शेपः।।

अथर्व० १४।२।३८।।

मधुः—१६८

'मनेर्धश्छन्दसि' (उणा० २।११६) इति सूत्रेण, मनु अवबोधने तनादिः, मन ज्ञाने वा दिवादिः, 'उसिः' प्रत्ययः, धकारश्चान्तादेशः='मधुः'। मन्यते मनुते वा 'मधुः'। अथवा—मन्यते बुध्यते यत् येन वा 'मधुः' पवित्रम्।

सनातनो विष्णुर्ज्ञानधर्मेण व्याप्नुवन् सर्वं विश्वं मन्यते जानाति, तस्मात् स 'मधुः'।

मन्त्रलिङ्गञ्च—

तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः। यजु० ४०।५।।

सर्वत्र तस्य सद्भावात् स सर्वं मनुत इति कृत्वा स 'मधु'रुक्तो भवति। 'ज्ञानमयो हि सः' इति यतः।

भवति चात्रास्माकम्—

न तत् स्थलं यत्र न सोऽस्ति सृप्तो
न कर्म तद् यत्र स वेत्ति वैद्यः[1]।
स एव मन्वान इदं समस्तं
व्याप्नोति विष्णुर्मधुराप्तकामः[2]।।२२०।।

अतीन्द्रियः—१६६

इन्द्रियं नाम शब्दादिग्राहकं जीवात्मनो भोगसाधनं=करणं= अनुमापकमित्यर्थः।

१. वैद्यः=विष्णोर्नाम। २. आप्तकामः=विष्णुरीश्वरः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इन्द्र आत्मा स चक्षुरादिना करणेनानुमीयते। कुतः? न ह्यकर्तृकं करणमस्ति। 'इन्द्र' शब्दात् षष्ठीसमर्थाल्लिंगमित्येतस्मिन्नर्थे 'घ' प्रत्ययो भवति, ***'इन्द्रियमिन्द्र-लिंगमिन्द्रदृष्टमिन्द्र०'*** (पा० ५।२।९३) इत्यादिसूत्रेण।

अस्मिन्निन्द्रियमिन्द्रादिसूत्रे इति करणः प्रकारार्थः। सति सम्भवे व्युत्पत्तिरन्येनापि प्रकारेण कर्तुमर्हा भवति, रूढेरनियमात्। वा शब्दश्च तत्र विकल्पनायाः स्वातन्त्र्यं दर्शयति। तद्यथा इन्द्रियस्य लिंगं चक्षुः, नासा, कर्णौ जिह्वेत्यादि। चक्षुः इन्द्रियम्, इन्द्रियं वा चक्षुः अनेनैव विधिना प्रतीन्द्रियं योजनीयं भवति। तद्यथा-नासा इन्द्रियं, इन्द्रियं वा नासा इन्द्रस्य जीवस्य लिंगं ज्ञापन-साधनं वा नासा त्वक्-इत्यादि। एवं समनस्कमेकादशेन्द्रियग्रामोऽत्राभिप्रेतः।

सोऽयं सर्वत्र विविधशक्त्या व्यश्नुवानो भगवान् विष्णुरिन्द्रियैर्मातुं लिंगितुं वा सर्वात्मना न शक्यतेऽतः सोऽतीन्द्रिय उक्तो भवति।

मन्त्रलिङ्गञ्च—

यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम।।

ऋग्० १०।१२१।४।।

सर्वमेवैतत् सूक्तं प्रजापतेः कस्य महत्त्वज्ञापकम्। तमेवंविधम्-उरुचक्षसं को नु इन्द्रियैर्लिंगितुं सर्वात्मना शक्नोति? न कोऽपीति कृत्वा स विष्णुः 'अतीन्द्रियः' उक्तो भवति।

प्रतिप्राणिजातीन्द्रियगोलकानां पृथक् पृथक् विन्यसनात् सर्वको हि प्राणी सर्वत्र भेदं पश्यति। तद्यथा—कुणिताद् वयमुद्व्रजामः, अपक्रमामः=अपसराम इत्यर्थः, श्वा च तस्मिन् प्रसीदति। एवमेव नेत्रेन्द्रियनिर्माणं प्रतिप्राणिजाति भिन्नं भिन्नं दृश्यते। मनुष्यो हि इन्द्रियगोलकानामेव भगवत्कृतानां याथार्थ्यतो ज्ञानं कर्तुं न शक्नोति, पुनः कथमसौ तं व्यापकं विष्णुं शब्द-स्पर्श-रूप-रस-गन्धग्रहसाधनैर्ज्ञानेन्द्रियैः समनस्कैर्व्यंजयितुं शक्नोति? अतः सोऽतीन्द्रियः।

अत एव च विष्णुः शब्देन सर्वात्मना वक्तुमनर्हः सन् 'अशब्दः' उक्तः। चक्षुषा सर्वात्मना द्रष्टुमनर्हः सन् 'अरूपः' उक्तः। कल्पनैषा सर्वत्र योजनीया भवति। चिन्तनेन न हि सर्वात्मना विष्णुश्चिन्त्यो भवति, तस्मात् सोऽचिन्त्यः उक्तो भवति। एवंविधव्याख्यानेनोपपन्नं भवति निम्नतो न्यस्तं पद्यम्—

अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात् प्रमुच्यते।।

कठोपनिषद् १।३।१५।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

अतीन्द्रियो विष्णुरनल्पशक्ति-
र्न शक्यते त्राऽविकलेन वक्तुम्।
गायन्ति वेदास्तमुदात्तवीर्यं
ध्रुवं महीयांसमशब्दरूपम् ।।२२१।।

महामायः—१७०

महती माया यस्य सोऽयं 'महामायः'। 'माया' शब्दो हि 'माङ् माने' आदादिकाद्धातोर्निष्पद्यते मानं हि नाम अन्तर्भावः, मातीति 'माया'। 'माङ् माने शब्दे च' जुहोत्यादिः—मिमीते इति माया। सामान्येन अकारान्तत्वात् ***'श्याद्व्यधा०'*** (पा० ३।१।१४१) इत्यादिना सूत्रेण 'णः' प्रत्ययः। ***'आतो युक् चिण्कृतोः'*** (पा० ७।३।३२) सूत्रेण युगागमः। स्त्रियाम् ***'अजाद्यतष्टाप्'*** (पा० ४।१।४) इति 'टाप्'।

एतस्मिन् विश्वे यावती मनुष्यस्य गम्यता विद्यते, तां तां गम्यतां प्राप्नुवन् स मनुष्य एतस्य सकलस्य चराचरस्य कर्त्तारमनुभवति। विविधाः कृतयः शुद्धसत्त्वरूपं बलादेव तं विश्वकर्त्तारं सद्भावयन्ति। मिमते मायन्त इति वा 'मायाः', ताश्च विविधरचनाः। ता विविधरचना यस्मिन् ता महत्यो विविधा रचना वा यस्य स महामायो विष्णुः। स सर्वव्यापकः स्वकाभिर्महत्का-भिर्विज्ञापकविद्याभी रचनाभिर्वा निजकं सद्भावं विज्ञापयन् व्याप्नोति स्वकमिति 'महामायः' स विष्णुरुक्तो भवति।

प्रसंगतो नास्ति एका माया यस्य स **'नैकमायः'**। नैकमायो 'महामायः'। महामायो नैकमायो वा समानार्थविज्ञापकावेव। पुरूणि रूपाण्यस्येति वा पुरुरूपेऽपि समानार्थक एव महामायः नैकरूप इति।

मन्त्रलिङ्गञ्च—

इन्द्रो मायाभिः पुरुरूप ईयते। ऋग्० ६।४७।१८।।

पुरुरूपो बहुरूपः, विविधरचनासु व्याप्नुवन् स स्वं महिमानं प्रतिमनुष्यं प्रति प्राणि वा विज्ञापयन् महामायः, नैकरूपः, नैकमायः, पुरुरूपो वा भवति।

अत्र 'महामाय' इति नाम्नो व्याख्याप्रसंगेन महामायः, नैकमायः, पुरुरूपः नैकरूपः—इति नामान्यपि व्याख्यातानि भवन्ति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवतश्चात्रास्माकम्—

स सर्वविद्यो [1]निजकाभिरग्र्यो
मायाभिराप्नोति बहुत्वमत्र ।
तं नैकरूपं[2] पुरुरूपकं वा
विज्ञा महामायमुतामनन्ति ।।२२२।।

स व्याप्नुवन् विश्वमिदं समस्तं
न यत्र मर्त्यस्य मनोऽपि याति।
व्यनक्ति रूपैर्विविधैः स्वरूपं
विष्णुर्महामाय[3] उ नैकमायः।।२२३।।

तदर्थे मन्त्रलिङ्गञ्च—

न यस्येन्द्रो वरुणो न मित्रो व्रतमर्यमा न मिनन्ति रुद्रः।
नारातयस्तमिदं स्वस्ति हुवे देवं सवितारं नमोभिः ।।

ऋग्० २।३८।६।।

महोत्साहः—१७१

महच्छब्दे **'सान्तमहतः संयोगस्य'** (पा० ६।४।१०) इत्यनेन सूत्रेण महत उपाधाया दीर्घत्वं भवति सर्वनामस्थाने परतोऽसम्बुद्धौ। महान् उत्=उच्चैः साहः मर्षः। 'षह मर्षणे' भौवादिकः चौरादिकश्च धातुः। **'ज्वलितिकसन्तेभ्यो णः'** (पा० ३।१।१४०) इत्येन 'णः' प्रत्ययः, पक्षेऽच्। तेन सहः साहो वा समानार्थः। महानुच्चैः साहो मर्षो यस्य, यस्मिन् वा स 'महोत्साहः'।

अथवा—महान्तं उच्चैस्तमं साहः सहते, साहयति, **'आधृषाद्वा'** नियमेन णिचो विकल्पः, सहति वा स 'महोत्साहः' वर्त्तमानप्रधानः।

मन्त्रलिङ्गञ्च—

नाक्षस्तप्यते भूरिभारः। ऋग्० १।१६४।१३।।

अश्नुते व्याप्नोती'त्यक्षः' परमेश्वरः, सूर्यो वा सग्रहोपग्रहनक्षत्रः। अथवा-न क्षीयते इत्यक्षः परमेश्वरः। अक्षरोऽपि स एव।

---

१. निजकाभिर्निजाभिः, कः प्रत्ययोऽत्र स्वार्थे २. पुरुरूपकं पुरुरूपं स्वार्थेऽत्र कः प्रत्ययः। ३. महामायः सूर्योऽपि तस्यैव महामायस्य शक्त्या पुरुरूपं विश्वं बिभर्त्तीति कृत्वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधिविश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत् तद् विदुस्त इमे समासते।।

ऋग्० १।१६४।३६।।

महोत्साहमधिकृत्य मन्त्रलिङ्गञ्च—

सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि ।
ते धीतिभिर्मनसा विपश्चितः परिभुवः परि भवन्ति विश्वतः।।

ऋग्० १।१४४।३६।।

लोकेऽपि च पश्यामः—प्रतिशरीरमात्मा सनादेव स्वं शरीरं वहन्नोद्विजते। न हि सूर्यादयो ग्रहा सनक्षत्रा विश्वमिदं ध्रियन्तोऽवसीदन्ति। सर्वेषामुत्साहवतां योऽधिष्ठाता स 'महोत्साहो' भगवान् वरेण्यो देवः। सहत इति सहः।

मन्त्रलिङ्गञ्च—

सहोऽसि सहो मयि धेहि । यजु० १६।६।।

खादीनि पंचमहाभूतानि तेन महोत्साहेन सहेन वा धृतानि स्वं स्वं धर्मं प्रमादं विना सहन्ते। तद्विकाराश्च स्वं स्वं कार्यं कुर्वाणा अजरास्तिष्ठन्तीति कृत्वा तं सर्वस्य धर्त्तारं महोत्साहं विष्णुं व्यञ्जन्ति।

अत्र महोत्साहव्याख्याप्रसंगे 'सहः' ५३ तमे श्लोके ३६८ संख्याकं नाम व्याख्यातं भवति।

भवति चात्रास्माकम्—

विष्णुर्महोत्साह उ वा सहोऽसौ
सोढं महोत्साहवता समस्तम्।
बिभ्रत् सनादेव स भूरिभारः
कदाचिदप्याश्रयते न तापम्[१]।।२२४।।

महाबलः—१७२

महान् बलोऽस्यास्मिन्निति वा स 'महाबलः' बल प्राणने, धान्यावरोधे च' भौवादिकः। *'ज्वलितिकसन्तेभ्यो णः'* (पा० ३।१।१४०) इत्यनेन 'णः' प्रत्ययो वा भवति पक्षेऽच्। तेन बलः बालो वा समानार्थः। प्राणनं जीवनम्, बल्यते प्राण्यते जीव्यतेऽनेनेति बलम्। करणस्य कर्त्रर्थे 'अच्' प्रत्ययः।

१. तापम्-उद्वेजनम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बलति प्राणिति विश्वं बलम्। सर्वेषां बलानां स एव महाबलोऽधिष्ठातेति कृत्वा स 'महाबलो' विष्णुरुक्तो भवति। यत् यद्यस्य प्राणनं तत् तत् तस्य बलमिति। तद्यथा—विद्याबलम् विद्या बलति प्राणितीति कृत्वा। अनेनैव विधिना क्षात्रबलम्, धनबलम्, सेनाबलम्, अन्नबलम् योगबलम् पशुबलम्, भूमिबलमित्यादि।

मन्त्रलिङ्गञ्च—

इन्द्रो ब्रह्मेन्द्र ऋषिरिन्द्रः पुरुः पुरुहूतः।
महान् महीभिः शचीभिः,[1]।। ऋग्० ८।१६।७।।
इन्द्रो विश्वैर्वीर्यैः पत्यमान उभे आ पप्रौ रोदसी महित्वा।
पुरंदरो वृत्रहा धृष्णुषेणः संगृभ्या न आ भरा भूरि पश्वः।।
ऋग्० ३।५४।१५।।
अयोद्धेव दुर्गद आ हि जुह्वे महावीरं तुविबाधमृजीषम् ।
नातारीदस्य समृतिं वधानां संरुजानाः पिपिषः इन्द्रशत्रुः।
ऋग्० १।३२।६।।

भवति चात्रास्माकम्—

यद् यद् बलं यस्य जगत् प्रसिद्धं
तत् तद् बलं तस्य महाबलस्य।
स धृष्णुषेणः स महान् शचीभि-
र्व्याप्नोति विश्वं स बलः स विष्णुः।।२२५।।

अत्र व्याख्याप्रसंगे 'सुषेणः' इत्यपि च व्याख्यातं भवति। सुष्ठु शोभना धृष्णुगुणवती सेना यस्य स धृष्णुषेणः सन् 'सुषेणः' इत्युक्तो भवति। सुषेणः ५४०तमं नाम।

सर्वाः प्राणिजातयः पञ्चभूतविकारा वा तदाज्ञया उपद्रुता महान्तमपि हन्तुं क्षमा भवन्ति। तदाज्ञया सर्वा प्राणिजातयः परस्परमुपकाराय वा समर्था भवन्ति। लोके दृष्टाया सेनाया अप्युभयविधं कर्म दृश्यते, शत्रुनाशनं स्वपक्षरक्षणं च। अत एव च स 'पृतनाषाट्' उक्तो भवति।

मन्त्रलिङ्गञ्च—

अग्ने पृतनाषाट् पृतनाः सहस्व। अथर्व ५।१४।८।।

---

१. शची=सेना।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

स धृष्णुषेणः स सुषेण उक्तो
विश्वं समस्तं स हि पाति हन्ति।
इन्द्रो ह राजा स चराचरस्य
तमेव विष्णुं प्रणमन्ति सेनाः।।२२६।।

❖ ❖ ❖

महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ।
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृक्।।३२।।

१७३ महाबुद्धिः, १७४ महावीर्यः, १७५ महाशक्तिः, १७६ महाद्युतिः।
१७७ अनिर्देश्यवपुः, १७८ श्रीमान्, १७९ अमेयात्मा, १८० महाद्रिधृक्।।३२।।

महाबुद्धिः—१७३

'बुध ज्ञाने' दैवादिकः, तस्मात् ***'स्त्रियां क्तिन्'*** (पा० ३।३।९४) इति सूत्रेण भावे क्तिन् प्रत्ययः। बोधनमेव 'बुद्धिः' महद् बोधनं ज्ञानं यस्य स महाबोधनो विष्णु 'महाबुद्धिः' इत्युक्तो भवति।

मन्त्रलिङ्गञ्च—

तस्माद् यज्ञात्[1] सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दा ँ सि जज्ञिरे तस्माद् यजुस्तस्मादजायत।।

यजु० ३१।७।।

न त्वदन्यः कवितरो न मेधया धीरतरो वरुण स्वधावन्।

अथर्व ५।३।१।।

ऋचो अक्षरे परमे व्योमन्। अथर्व० १।१६४।३९।।

यदक्षरं परं व्योम तद् ब्रह्म, स विष्णुः स महाबुद्धिरिति।

धामानि वेद भुवनानि विश्वा । यजु० ३२।१०।

विश्वानि देव वयुनानि विद्वान्। यजु० ४०।१६।

इत्यादि मन्त्रलिङ्गं बहुत्रास्ति।

१. यज्ञो वै विष्णुः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यदेतत् प्रतिप्राणि बुद्धितत्त्वं व्यवस्थितं दृश्यते, तत्तस्य महाबुद्धेर्विष्णोरेव ज्ञानरूपेण व्यापनं दर्शयति। नक्षत्रादीनां यथास्थानावस्थानं, सूर्यादिग्रहोपग्रहाणां यथाव्यवस्थं निवेष्टनं च तमेव महाबुद्धिं विष्णुं व्यनक्ति। तस्य महाबुद्धेरनुकरणमात्रमेव कुशलशिल्पिनो निजके यन्त्रे यन्त्रोपयन्त्रविन्यासनेन स्वकं ज्ञानमाविष्कुर्वन्ति।

भवति चात्रास्माकम्—

विष्णुर्महाबुद्धिरनन्तविद्यो
बुद्धेर्वितानं तत एव लोके ।
ज्ञानातियोगाद् ध्रियते स विश्वं
जीवेन कर्माणि च बुद्धियोगात् ।।२२७।।

ध्रियन्त इति शेषः। ज्ञानरहितस्य कर्मणां विकृतत्वेन दृष्टत्वात्।

महावीर्यः—१७४

'वीर्यं' बलम् महद् वीर्यं यस्य यस्मिन् वा स 'महावीर्यः'। वीर्य-शब्दो हि-'वीर विक्रान्तौ' चुरादिरदन्तः। तस्माण्णिच् ***'अतो लोपः'*** (पा० ६।४।४८) सूत्रेण अल्लोपः, ***'अचो यत्'*** (पा० ३।१।६७) सूत्रेण यत् णेर्लोपश्च। तेन 'वीर्यम्' शब्दः बलपर्याये साधुर्भवति।

मन्त्रलिङ्गञ्च—

वीर्यमसि वीर्यं मयि धेहि। यजु० १६।६।।

यद्यदत्र विश्वे वीर्यवद् दृश्यते, तत्तेनैव वीर्यधर्मेण व्याप्नुवता विष्णुना विश्वमिदं यथावश्यकं वीर्यवत् क्रियते, तस्मात् स 'महावीर्य' उक्तो भवति। वीर्यवतामधिपतिरिति वा। न हि कश्चित् महावीर्यवन्तं सूर्यं विष्णुं वा विना जगतो निर्माणं धारणं वा कर्त्तुं क्षमः स्यात्।

मन्त्रलिङ्गञ्च—

यस्मिन् भूमिरन्तरिक्षं द्यौर्यस्मिन्नध्याहिता।
यत्राग्निश्चन्द्रमाः सूर्यो वातस्तिष्ठन्त्यार्पिताः
स्कम्भं तं ब्रूहि कतमः स्विदेव सः।। अथर्व० १०।७।१२।।

भवति चात्रास्माकम्—

स वीर्यवान् विष्णुरनन्तवीर्यः
लोकान् समस्तान् स्ववशे विधत्ते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यत् वीर्यमात्रं खलु तस्य वीर्यं
विष्णो महावीर्यपदेन विष्णुः ॥२२८॥

महाशक्तिः—१७५

शक्तिः—'शक मर्षणे' दिवादिः, स विभाषा श्यनं प्राप्नोति। 'शक्लृ शक्तौ' सौवादिकः। शक्तिर्मर्षणं सहनमिति। तत्र शक-धातोः भावे स्त्रियां क्तिन्, तेन शक्तिः बलं वा। महती शक्तिर्यस्य स 'महाशक्तिः' विष्णुः। महोत्साहो महाशक्तिर्वा समानार्थौ धातुभेदाच्छब्दभेदः। **यन्महोत्साहव्याख्याने, महावीर्यपद-व्याख्याने** वोक्तं तत् सर्वं महाशक्तिव्याख्यानेऽपि संगच्छते।

भवति चात्रास्माकम्—

स मर्षणः शक्तिरसौ सहः सः
विष्णुर्महाशक्तिरिहास्ति गीतः ।
न शक्तिमद् दृष्टिपथेऽस्ति किंचित्
तस्मात्परं शक्तिमयं च यत् स्यात् ॥२२९॥

स महाशक्तिर्विष्णुः स्वकेन शक्तिरूपेण धर्मेण विश्वमिदं व्याप्नोति।

महाद्युतिः—१७६

'द्युत दीप्तौ' भौवादिको धातुः। तस्मात् *'इगुपधात् कित्'* (उणा० ४।१२०) इत्यनेन सूत्रेण 'इ' प्रत्ययः किच्च सः। द्योतते इति 'द्युतिः'। महांश्चासौ द्युतिर्महतां द्युतिमतां सूर्यादीनां द्योतयिता वा स 'महाद्युतिः' विष्णुः। सर्वत्र या द्युतिर्दृश्यते सा द्युतिस्तस्यैव भगवतः, स द्युति-रूपेण सर्वत्र विराजमान आस्ते।

मन्त्रलिङ्गञ्च—

इन्द्रः सूर्यमरोचयत्। ऋग्० ८।३।६॥

रुच दीप्तौ, द्युत दीप्तौ द्वयोरर्थस्तु समानः। अरोचयत् समानो भवति अद्योतयत् इत्यनेन।

भवति चात्रास्माकम्—

यद् दीप्तिमज्ज्ञानदृशास्ति लभ्यं
प्रत्यक्षतो वा नयनेन दृश्यम् ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

महाद्युतिर्द्योतयते समस्तं
व्याप्नोति दीप्त्या भुवनानि विष्णुः।।२३०।।

मन्त्रलिङ्गञ्च—

यस्ते दिवि सूर्ये महिमा सम्बभूव ।
तस्मै ते महिम्ने प्रजापतये देवेभ्यः स्वाहा।। यजु० २३।२।।
यस्ते नक्षत्रेषु चन्द्रमसि महिमा सम्भूव ।
तस्मै ते महिम्ने प्रजापतये देवेभ्यः स्वाहा।। यजु० २३।४।।
युञ्जन्ति ब्रध्नमरुषं चरन्तं परितस्थुषः ।
रोचन्ते रोचना दिवि।। यजु० २३।५।।
नव भूमिः समुद्रा उच्छिष्टेऽधिश्रिता दिवः ।
आसूर्यो भात्युच्छिष्टे अहोरात्रेऽपि च तन्मयि।। अथर्व ११।७।१४।।

अनिर्देश्यवपुः—१७७

'निर्देशो' हि नाम इदं तद् इत्यादिरूपेण विज्ञापनं, इदं तत् तदिदमित्यादिरूपेण वा ज्ञाप्यस्य प्रकाशनम्। न निर्देष्टुमर्हमनिर्देश्यम्। वपुः—***अर्तिह्ववपियजितनिधनितपिभ्यो नित्'*** (उणा० २।११७) इति सूत्रेण 'उसिः' प्रत्ययः। वपति बीजादिकमनेनेति 'वपुः'। 'वाप' इति बीजविकिरणे साधनीभूतं कृषकानाम्। वपुः शरीरम्, वपति बीजं स्त्रीक्षेत्रे मनुष्यः शरीरसाधनेन, साधनं करणम्, तच्च लिंगं, शुक्रप्रसेकनालिका शिश्नपदवाच्यं वा। तत्र मन्त्रलिङ्गञ्च—

पूषञ्छिवतमामेरयस्व यस्यां बीजं मनुष्या वपन्ति ।
या न ऊरू उशती विश्रयाति यस्यामुशन्तः प्रहरेम शेपः।।
अथर्व० १४।२।३८।।

जनक एव वापः। बीजप्रसेक्ता वपुर्वा। वपुर्वक्तुमर्हं सत् प्राकृतैरसंस्कृतवाग्विषयैरुच्चारणसौकर्यात् 'वपुः' अस्य स्थाने बापू तथा च 'वापः' अस्य स्थाने बाप इत्युच्यते। अनिर्देश्यो वपुर्बीजवापकोऽस्य चराचरस्येति कृत्वा 'अनिर्देश्यवपुः' विष्णुरुक्तो भवति।

अपरथा च व्याख्यानम्—न हि निर्देष्टुं शक्यं वपुरस्येति कृत्वा 'अनिर्देश्यवपुः' विष्णुरुक्तो भवति। सर्वत्र व्यापकत्वात्तस्य। इदं विराट् शरीरं ब्रह्मणो वपुः। तथा चाथर्वणि—

या आपो याश्च देवता या विराट् ब्रह्मणा सह।
शरीरं ब्रह्म प्राविशच्छरीरेऽधि प्रजापतिः ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सूर्यश्चक्षुर्वातः प्राणं पुरुषस्य विभेजिरे।
अथास्येतरमात्मानं देवाः प्रायच्छन्नग्नये।।
तस्माद् वै विद्वान् पुरुषमिदं ब्रह्मेति मन्यते।
सर्वा ह्यस्मिन् देवता गावो गोष्ठ इवासते।।
प्रथमेन प्रमारेण त्रेधा विष्वङ् वि गच्छति।
अद एकेन गच्छत्यद एकेन गच्छतीहैकेन निषेवते।।
अप्सु स्तीमासु वृद्धासु शरीरमन्तराहितम्।
तस्मिञ्छवोऽध्यन्तरा तस्माच्छवोऽध्युच्यते ।।

अथर्व० ११।८।३०-३४।।

को नाम मनुष्यो भगवतो विराजं शरीरं वपुर्वा सर्वात्मना वक्तुमर्हति ? न कोऽपीति कृत्वा 'अनिर्देश्यवपुः' स विष्णुरुक्तो भवति, सर्वत्र चराचरे विद्यमानत्वात् तस्य। सर्वकमेतत् सूक्तं मनुष्यशरीरवर्णनात्मकमलंकारपुरःसरमस्ति। जिज्ञासुभिर्ज्ञानाप्तये नूनं तदवलोक्यम्।

अन्यत्र च—

उच्छिष्टे नाम रूपं चोच्छिष्टे लोक आहितः ।
उच्छिष्ट इन्द्रश्चाग्निश्च विश्वमन्तः समाहितम्। अथर्व० ११।७।१।।
बिभर्ति भर्त्ता विश्वस्योच्छिष्टो जनितुः पिता ।।

अथर्व ११।७।१५।।

एतत् सर्वकं सूक्तमुच्छिष्टं व्याख्याति।

भवति चात्रास्माकम्—

वपुर्विराट् तस्य महेश्वरस्य
तत् कोऽत्र शक्नोति गिरा प्रवक्तुम्।
विराजते सर्वक एव विश्वे
[1]रामोऽस्त्यनिर्देश्यवपुः स विष्णुः ।।२३१।।

एतद् व्याख्याप्रसंगे 'जन्ममृत्युजरातिगः' ११६ श्लोके नाम संख्या ६६६ इत्यपि नाम व्याख्यातं भवति। अतिगच्छतीत्यतिगः, जन्म-उत्पत्तिः प्रादुर्भावो वा, मृत्युर्मरणं स्वकारणे परिणमनं वा; जरा वयसो हानिः जीर्णता वा। जन्म-मृत्यु-जरा अतिगच्छतीति-जन्ममृत्युजरातिगः'। अत्युपपदे ***'डप्रकरणे अन्येष्वपि दृश्यते'***

१. 'रामो' विष्णोर्नामसु ३६४ तमं पठितोऽत्र संग्रहे।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(पा० ३।२।४८वा) इति वार्त्तिकेन गमेर्डः प्रत्ययः। *'अन्तात्यन्ताध्व०'* (पा० ३।२।४८) इत्यादिसूत्रे वार्त्तिकम्।

भवति चात्रास्माकम्—

विष्णुं जनुर्नापि जरा न मृत्युः
स्पृशन्ति [१]वैराजवपुर्यतः सः।
स सर्वगः विश्वमदः ससर्ज
युवा स विष्णुर्न कुतश्चनोनः।।२३२।।

श्रीमान्—१७८

श्रीः शोभा लक्ष्मीर्विभूतिर्यस्य, यस्मिन् वास्ति स 'श्रीमान्'। भगवान् शोभया विभूत्या वा सकलं विश्वं व्याप्नोति तस्मात् स विष्णुः।

मन्त्रलिङ्गञ्च—श्रियमधिकृत्य—

सन्नुच्छिष्टे असंश्चोभौ मृत्युर्वाजः प्रजापतिः ।
लौक्या उच्छिष्ट आयत्ता व्रश्च द्रश्चापि श्रीर्मयि।।

अथर्व० ११।७।३।।

लक्ष्मीमधिकृत्य—

ऋतं सत्यं तपो राष्ट्रं श्रमो धर्मश्च कर्म च।
भूतं भविष्यदुच्छिष्टे वीर्यं लक्ष्मीबलं बले।।

अथर्व० ११।७।१७।।

उच्छिष्टः सकलस्य विश्वस्य कर्त्ता धर्त्ता हर्त्तेति। श्रीमान् व्याख्यातमन्यत्रापि। ३७तमे श्लोके नाम सं० २२०।

भवति चात्रास्माकम्—

शोभा हि सर्वत्र महेश्वरस्य
श्रीमानतो विष्णुरुदात्तशोभः।
उच्छिष्टनाम्ना च स शम्भुरुक्तो
लक्ष्मीरुत श्रीश्च तदंकमंक्तः[२]।।२३३।।

---

१. वैराजवपुः=चराचरात्मकवपुरित्यर्थः। २. तस्योच्छिष्टस्यांकं=अक्तो व्यक्तः प्रकाशयत इत्यर्थः। **"बिभर्ति भर्त्ता विश्वस्योच्छिष्टो जनितुः पिता"।**

अथर्व० ११।७।१५।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अमेयात्मा—१७९

मातुमर्हो 'मेयः' 'मा' धातोः आकारान्तस्यांगस्य 'यत्' परे सतीत्वं भवति। तत् सूत्रं *'ईद्यति'* (पा० ६।४।६४)। न मातुमर्होऽमेयः'। आत्मा=स्वरूपः, तद्यथा तदात्मतामुपगतः, तत्स्वरूपतामुपगत इत्यर्थः। अमेयस्वरूप एव 'अमेयात्मा' इति पदेनोच्यते।

उच्छिष्ट इन्द्रश्चाग्निश्च विश्वमन्तः समाहितम्। अथर्व० ११।७।१।।

अन्तःस्थो मातुमनर्हो भवति। यथा समुद्रस्थो समुद्रं मातुं न क्षमो भवति, आकाशस्थ आकाशममुथैवेदं विश्वं तं मातुं इयत्तयाऽवच्छेत्तुं नार्हतीति कृत्वाऽमेयस्वरूपः सन्नमेयात्मोक्तो भवति।

अत्र विषये अथर्ववेदीयमुच्छिष्ट-सूक्तं पठनीयम्। तच्चैकादशस्य काण्डस्य सप्तमं सूक्तम्।

तद्यथा प्रथमो मन्त्रः—

उच्छिष्टे नाम रूपं चोच्छिष्टे लोक आहितः ।
उच्छिष्ट इन्द्रश्चाग्निश्च विश्वमन्तः समाहितम्।।

भवति चात्रास्माकम्—

[1]इयत्परिच्छिंन्नवपुर्न कश्चित्
[2]सर्वोदरस्थं प्रभवेत् प्रमातुम्।
उक्तो ह्यमेयात्मपदेन विष्णु-
र्व्याप्नोत्यमेयः स समस्तमेतत्।।२३४।।

महाद्रिधृक्—१८०

'द्रा कुत्सायां गतौ, आदादिकः। द्रातीति द्रिः, *'अच इः'* (उणा० ४।१३६)। बाहुलकात् कित्त्वादाल्लोपः। न द्रिः=अद्रिः पर्वतो वा। कृच्छ्रेण गन्तुमर्हाः सन्तोऽपि महोपकारकर्तॄणां पदार्थानां वनस्पतीनामौषधीनां च प्रदातारः सन्तस्ते—अद्रय उच्यन्ते। पर्ववत्त्वात् पर्वता इति। महांश्चासावद्रिर्महाद्रिः। 'धृष प्रसहने' चौरादिकः' धर्षयति धृष्णोतीति धृक् क्विबन्तोऽयं षान्तः। महतो ऽद्रीन्

१. इयता परिच्छिन्नं वपुर्यस्य सः— इयत्परिच्छिन्नवपुः। २. सर्वमुदरे स्थितं यस्य स सर्वोदरस्थस्तम्। सर्वत्र तस्यामेयत्वं व्याप्तम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धर्षयति धृष्णोति वा 'महाद्रिधृक्' स विष्णुः।

मन्त्रलिङ्गञ्च—

यः पर्वतान् प्रकुपितां अरम्णात्। ऋग्० २।१२।२।।

बृहद्ग्रावा वानस्पत्यः। यजु० ११।१५।।

भवति चात्रास्माकम्—

महाद्रिधृक् विष्णुरधर्षणोऽसौ
धृष्णोति सर्वं भुवि चाद्रिमात्रम्।
गुहा न तेषां भुवि कापि दृष्टा
महाद्रिधृक् यत्र न सत्तयास्ति।।२३५।।

धृषतेः क्विप् द्विर्वचनं च निपात्यते—***'ऋत्विग्दधृक्०'*** (पा० ३।२।५६) धृगेव 'दधृगि'ति। तेषां=अद्रीणामिति शेषः।

❖ ❖ ❖

महेष्वासो महीभर्त्ता श्रीनिवासः सतांगतिः।
अरुिद्धः सुरानन्दो गोविन्दो गोविदांपतिः।।३३।।

१८१ महेष्वासः, १८२ महीभर्त्ता, १८३ श्रीनिवासः, १८४ सतांगतिः।
१८५ अनिरुद्धः, १८६ सुरानन्दः, १८७ गोविन्दः, १८८ गोविदांपतिः।।३३।।

महेष्वासः—१८१

महतः सौ-महान् ***'सान्तमहतः संयोगस्य'*** (पा० ६।४।१०) इत्युपधादीर्घत्वम्। इषुः-'ईष उञ्छे' भौवादिकः' ईष्यत इति 'इषुः' ***'ईषेः किच्च'*** (उणा० १।१३) इत्यनेन उ प्रत्ययः किच्च। आदेरिकारादेशो ह्रस्वत्वं वा। ईषति गच्छति हिनस्ति वा शत्रूनिति 'इषुः' वाणः शरो वा, तत्पर्य्यायो वीरो वा। कित्वाद् गुणाभावः।

'ईष आभीक्ष्ण्ये' क्रैयादिकः' तस्माद्वा हननार्थप्रवृत्तात्। तथा च श्रूयते—**'पुर इष्णासि पुरुहूत पूर्वाः'** (ऋक्० १।६३।२) अत्र आसुरीणां हननादिरर्थो गम्यते।

आसः—'असु क्षेपणे' दैवादिकः, तस्मात् ***'हलश्च'*** (पा० ३।३।१२१) इत्यनेन करणे 'घञ्' प्रत्ययः। अस्यते प्रक्षिप्यतेऽनेनेति 'आसः' धनुः। महान् इष्वासोऽस्यास्तीति 'महेष्वासः'।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ।
तयास्मान्विश्वतस्त्वमयक्ष्मया परि भुज ।। यजु० १६।११।।
परि ते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः ।
अथो य इषुधिस्तवारे अस्मिन्निधेहि तम् ।। यजु० १६।१२।।
अवतत्य धनुष्ट्व ँ सहस्राक्ष शतेषुधे ।
निशीर्य शल्यानाम्मुखा शिवो नः सुमना भव।। यजु० १६।१३।।
नमो धृष्णवे च प्रमृशाय च नमो निषङ्गिणे चेषुधिमते च नमस्तीक्ष्णेषवे चायुधिने च नमः स्वायुधाय च सुधन्वने च। यजु० १६।३६।।

इति दिङ्मात्रम्।

वीरबाहुर्वा 'महेष्वासः' महेष्वासो वा वीरबाहुः। प्रसङ्गतः 'वीरबाहुः' ६२तमे शलोके ४६३ तमं नाम चापि व्याख्यातं भवति।

मन्त्रलिङ्गञ्च—

सहस्राणि सहस्रशो बाह्वोस्तव हेतयः ।
तासामीशानो भगवः पराचीना मुखा कृधि ।। यजु० १६।५३।।
असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम् ।
तेषां ँ सहस्रयोजनेऽव धन्वानि तन्मसि ।। यजु० १६।५४।।

भवति चात्रास्माकम्—

विष्णुर्महेष्वासपदेन वाच्यः
स विश्वमात्रं परिपाति हन्ति।
यच्छक्तिमत्तद्धनुरस्य शम्भोः
युनक्ति तं कर्षणबृंहणाभ्याम्।।२३६।।

महीभर्त्ता—१८२

महीः—'मह पूजायाम्' भौवादिकः महतीति महः अच् प्रत्ययः— ***'अज्विधिः सर्वधातुभ्यः'*** इति वचनात्। "मह' शब्दस्य गौरादिषु पाठात्, स्त्रियां 'मही' ***'षिद्गौरादिभ्यश्च'*** (पा० ४।१।४१) इति ङीष्। भर्त्ता—बिभर्तीति भर्त्ता ***'ण्वुल्तृचौ'*** (पा० ३।१।१३३)इति 'तृच्' प्रत्ययः। मह्या भर्त्ता=महीभर्त्ता, मही=पृथिवी। महीभर्त्ता सूर्योऽपि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

एषा सनत्नी सनमेव जातैषा पुराणी परि सर्वं बभूव।
मही देव्युषसो विभाती सैकेनैकेन मिषता वि चष्टे।। अथर्व १० ।८ ।३० ।।

महीभर्त्ता सः—

स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम। यजु० १३ ।४ ।।
स सलिलान्महीमुद्बभार।
तम आसीद् तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वमा इदम्।
तुच्छ्येनाभ्वपिहितं यदासीत् तपसस्तन्महिना जायतैकम्।।
ऋग्० १० ।१२६ ।३ ।।

विष्णुर्यथापूर्वं पृथिवीमकल्पयत्—

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।
दिवं च पृथिवीं चान्तरिक्षमथो स्वः ।। ऋग्० १० ।१९० ।३ ।।

भवति चात्रास्माकम्—

महीं बिभर्त्येव सनात् स विष्णुः
सूर्यः स्वभूत्या च बिभर्त्ति तां वा।
धाता यथापूर्वमकल्पयच्च
महीं स दाधार बभार चाद्भ्यः।।२३७।।

इति दिङ्मात्रमुक्तम्।

श्रीनिवासः—१८३

'श्रीः'—शोभा, लक्ष्मीः, विभूतिः, धनं, वसु वा। श्रियो निवासः 'श्रीनिवासः'। निवास आश्रयो गृहमधिष्ठानं वा। श्रीर्निवसत्यस्मिन्निति 'श्रीनिवासो' विष्णुः वृषोऽग्निरस्मभ्यं वसून्याभरेदिति प्रार्थ्यते।

मन्त्रलिङ्गञ्च—

सं समिद्युवसे वृषन्नग्ने विश्वान्यर्य आ।
इडस्पदे समिध्यसे स नो वसून्याभर[१] ।।
ऋग्० १० ।१९१ ।१ ।।

---

१. आभर=आहरेत्यर्थः। **हृग्रहोर्भश्छन्दसि।** अग्निर्हि विष्णोर्नामसु पठितः। जातवेदोऽप्यग्निर्विष्णुर्जातानि जातानि वेदेति कृत्वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्। ऋग्वेदीयश्रीसूक्ते १५।।

अग्निर्नो वनते रयिम्। यजु० १७।१६।।

'वन षण संभक्तौ' भौवादिको वनते संविभजतीत्यर्थः। इत्यादि दिङ्मात्रमुक्तम्।

भवति चात्रास्माकम्—

स श्रीनिवासः श्रियमादधाति
जगच्च तं विष्णुमनक्ति भूयः ।
तं श्रीनिवासं मनुजाः स्तुवन्ति
'स नो वसून्याभर' शब्दयन्तः ।।२३८।।

अनपगामिनी लक्ष्मीर्हि सा भवति, यस्यां कस्यचिदन्यस्यांशो न स्यात्।

सतांगतिः—१८४

'सत्' श्रेष्ठः सत्पुरुष इति यथा। सत् सत्ये सज्जन इति यथा। गमनं 'गतिः' सत्यानां गमनं श्रेष्ठानां गमनं तद् ब्रह्मैव। नाम्नां संग्रहे पाठात् षष्ठ्या अलुक् मन्तव्यो, विनाप्याक्रोशम्। कुतः ? न हि ब्रह्मणि आक्रोशस्य सद्भावः।

मन्त्रलिङ्गञ्च—

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।
यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त।। यजु० ३२।१०।।

भवति चात्रास्माकम्—

स सच्चिदानन्दगुणो ह विष्णुः
सतांगतिश्चापि स एव विष्णुः ।
सतां गतिर्ब्रह्मणि सत्स्वरूपे
भर्गः[1] स विष्णुः स शुचिः स बन्धुः ।।२३६।।

अनिरुद्धः—१८५

अनिरुद्धोऽव्यवहतः। सर्वत्र व्याप्तोऽनावृतः, ओतः प्रोतः प्रकाशात्मेति वा। नास्ति निरोध आवरणं यस्य सो'ऽनिरुद्धः'।

१. भर्गः=शुद्धः। सारांशस्त्वयं यद् भगवतः प्रत्येकं कर्म तं भगवन्तमेव गमयति=प्रापयति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम् ।
तस्मिन्निद ँ सं च वि चैति सर्वं स ओतः प्रोतश्च विभूः प्रजासु।।
यजु० ३२।८।।

अथर्वणि च—

यो विद्यात् सूत्रं विततं यस्मिन्नोताः प्रजा इमाः ।
सूत्रं सूत्रस्य यो विद्यात् स विद्याद् ब्राह्मणं महत्।।
वेदाहं सूत्रं विततं यस्मिन्नोताः प्रजा इमाः ।
सूत्रं सूत्रस्याहं वेदाथो यद् ब्राह्मणं महत् ।।
अथर्व १०।८।३७,३८।।

भवति चात्रास्माकम्—

न केनचित् कर्हिचिदेव विष्णुः
शक्योऽत्र रोद्धुं प्रबलेन यस्मात्।
तस्मात् सदा सोऽस्त्यनिरुद्ध उक्तो
विष्णुर्वरेण्यः स रुणद्धि[1] लोकान्।।२४०।।

सुरानन्दः—१८६

सुराः—अव्याहतदातृशक्तिमन्तः। सूपसर्गः, 'रा दाने' आदादिकः, तस्मात् ***'आतश्चोपसर्गे'*** (पा० ३।१।१३६) इत्यनेन 'कः' प्रत्ययः। ***'आतो लोप इटि च'*** (पा० ६।४।६४) इत्यनेनाकारलोपः तेन 'सुरः', बहुवचने सुराः। तान् सुरान् आनन्दयतीति 'सुरानन्दः'। आनन्दयति सर्वत्र समृद्ध्या योजयतीत्यर्थः।

तद्यथा लोकेऽपि च पश्यामः—एकं बीजं कृषको वपति, भूमिश्च तं सहस्रशः प्रत्यावृत्य समर्धयति। सा समर्धनव्यवस्था सर्वत्रैव सुरानन्दस्य सुरानन्दत्वं विज्ञापयति। तस्मात् सुरानन्दरूपेण विश्वं व्याप्नुवन् स विष्णुरेव। दानविषये प्रमाण-संग्रहः 'सुराध्यक्षः' इति १३४ तमे नाम्नि द्रष्टव्यः।

१. यदुक्तं स रुणद्धि लोकानिति, तत्र मन्त्रलिंगं च—
'तस्मिन् ह तस्थुर्भुवनानि विश्वा।' यजु० ३१।१८।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

विष्णुः सुरानन्द उ नन्दनः स
सुरान् सदा नन्दयते हृदिस्थः।
[1]तद्व्याप्तिधर्मं च विकासयन्ती
धरा ददात्येव सहस्रशस्तम्।।२४१।।

गोविन्दः—१८७

गां विन्दतीति 'गोविन्दः' ***'अनुपसर्गाल्लिम्पविन्द०'*** (पा० ३।१।१३८) इति सूत्रे ***'गवादिषु विन्देः संज्ञायाम्'*** इति वार्तिकेन 'श'-प्रत्यये गोविन्दः। गौर्वाणी, धरा, धेनुर्वा।

मन्त्रलिङ्गञ्च—

गावो ह जज्ञिरे तस्मात्। ऋग्० १०।९०।१०।।

गावो घृतस्य मातरः। अथर्व० ६।६।३।।

गावो वेदवाण्यो यं विन्दन्ति लभन्ते, यत्र वावतिष्ठन्ते, स 'गोविन्दो' भगवान् विष्णुः।

मन्त्रलिङ्गञ्च—

अभिवीरो अभिषत्वा सहोजिज्जैत्रमिन्द्र रथमातिष्ठ गोविदन्।
अथर्व० १६।१३।५।।

यो विश्वस्य जगतः प्राणतस्पतिर्यो ब्रह्मणे प्रथमो गा अविन्दत्।
ऋक्० १।१०१।५।।

अपूर्वेणेषिता वाचस्ता वदन्ति यथायथम्।
वदन्तीर्यत्र गच्छन्ति तदाहुर्ब्राह्मणं महत् ।। अथर्व० १०।८।३३।।

धरामधिकृत्य—

नष्टां वै धरणीं पूर्वमविन्दद्यद् गुहागताम्।
गोविन्द इति तेनाहं देवैर्वाग्भिरभिष्टुतः ।।
महाभारत शन्तिपर्व ३४२।७०।।

इति मोक्षधर्मे निर्वचनाद् 'गोविन्दः'।

---

१. तस्य विष्णोर्व्याप्तिधर्मम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

विष्णुः स गोविन्दपदेन वाच्यो
यं विन्दयन्तीह वचांसि भूयः ।
तेनोद्धृतेयं पृथिवी समुद्रात्
स्रवन्ति गावो ह पयांसि तस्मै[1] ।।२४२।।

गोविदांपतिः—१८८

गां वाणीं वेत्तीति 'गोवित्' तेषां गोविदां पतिः स्वामी। सर्वा विद्या भगवदायत्ता इति भावः। याभिर्यथाभूताभिर्मनुष्यो वाग्भिर्वदति गोविदांपतिस्ताभिस्तथाभूताभिर्मनुष्यस्य वाच्यं वेत्ति जानातीत्यर्थः।

न केवलं मनुष्यवाचमेवासौ भगवान् वेद, परन्तु सर्वप्रकाराणां पशु-पक्षि-सरीसृपाणां चापि वाणीं वेद। कुतः, सर्वाः प्रति-प्राणिनिहिता वाचस्तेनैव व्यवस्थापिताः सन्ति। यस्मात् स गोविद्रूपेण विश्वं व्याप्नोति, तस्मात् स 'गोविदांपति'र्विष्णुरुक्तो भवति।

मन्त्रलिङ्गञ्च—

वाचस्पते सौमनसं मनश्च गोष्ठे नो गा जनय योनिषु प्रजाः।
अथर्व० १३।१।१६।।

पुनरेहि वाचस्पते देवेन मनसा सह। अथर्व १।१।२।।

वाचस्पतिर्वाचं नः स्वदतु। यजु० ६।१।।

गोविदांपतिः, अत्र नाम्न्याक्रोशमन्तरापि षष्ठ्या अलुक्, न हि विष्णावाक्रोशस्य सम्भवः। एवं हि धरणीविदांपतिरप्यसावेव विष्णुः।

गौः=धेनुः तद्विद्वां पतिरप्यसावेव **''यजमानस्य पशून् पाहि''** (यजु० १।१) इति च तं गोविदांपतिमेव जीवः प्रार्थयत इति दिक्।

भवति चात्रास्माकम्—

न कापि वाक् प्राणिनि लब्धभेदा
न 'गोविदां वेत्ति' पतिस्तु यां स्यात्।

---

१. तस्मै विश्वस्मै यतस्ता धेनवो विश्वस्य मातरः सन्ति। मन्त्रलिङ्गञ्च—
'अदुग्धा इव धेनव ईशानमस्य जगतः'। (साम०)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स सर्वविद्यः स हि सर्वलभ्यः
सर्वे यथावाक् तमु यान्ति विष्णुम्।।२४३।।

❖ ❖ ❖

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः।
हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः।।३४।।

१८६ मरीचिः, १६० दमनः, १६१ हंस, १६२ सुपर्णः, १६३ भुजगोत्तमः।
१६४ हिरण्यनाभः, १६५ सुतपाः, १६६ पद्मनाभः, १६७ प्रजापतिः।।३४।।

मरीचिः—१८६

'मृङ् प्राणत्यागे' तौदादिकः, तस्मात् ***'मृकणिभ्यामीचिः'*** (उणादि० ४।७२) सूत्रेण 'ईचिः' प्रत्ययः। म्रियत इति 'मरीचिः'। न हि भगवति जन्म-मरण-जराः सन्तीति कृत्वा ण्यन्तेनार्थोऽवगन्तव्यः। यमो मृत्युदूतेन प्राणिनो मारयति। उक्तं च—

मृत्युर्यमस्यासीद् दूतः प्रचेता। अथर्व० १८।२।२७।।
मृत्युः प्रजानामधिपतिः। अथर्व ५।२४।१३।।
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च। गीता २।२७।।

इत्येतेनापरिहार्येण नियमेन 'मरीचि'नामा भगवान् सर्वं विश्वं व्यश्नुवानः सन् मरीचिर्विष्णुरुक्तो भवति। मरीचिः=मृत्युः।

मन्त्रलिङ्गञ्च—

आदित्य चक्षुरादत्स्व मरीचयोऽनु धावत।
पत्संगीनीरा सजन्तु विगते बाहुवीर्ये।।
सोमो राजा वरुणो राजा महादेव उत मृत्युरिन्द्रः।

अथर्व० ५।२१।१०-११।।

भवति चात्रास्माकम्—

मरीचिरात्मानमनक्ति विष्णु-
र्यमस्वरूपेण स मृत्युदूतः।
न तस्य मत्युर्न जरा न जन्म
स वै मरीचिः सकलं विहन्ति।।२४४।।

मरीचिः=रश्मिः, दीप्तिर्वा महर्षिर्वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दमनः—१६०

'दम उपशमे' दैवादिकः, दमयतीति 'दमनः'। ***'नन्दिग्रहि०'*** (पा० ३।१।१३४) इति सूत्रे ***'सहितपिदमेः संज्ञायाम्'*** इति वार्तिकेन संज्ञायां 'ल्युः' प्रत्ययः। तेन दमयतेर्णिजन्तात् ***'मितां ह्रस्वः'*** (६।४।९२) दमयतीति 'दमनो' भगवान् विष्णुः। दमयति उपशमयति यथास्थानं प्रापयति, दमनधर्मेण विश्वं सचराचरं व्याप्नोति, इति कृत्वा 'दमनो' विष्णुरेव।

मन्त्रलिङ्गञ्च—

मृत्यवेऽमून् प्र यच्छामि मृत्युपाशैरमी सिताः ।
मृत्योर्ये अघला दूतास्तेभ्य एनान् प्रति नयामि बद्ध्वा।।

अथर्व० ८।८।१०।।

नयतामून् मृत्युदूता यमदूता अपोम्भत ।
परःसहस्रा हन्यतां तृणेढ्वेनान् मत्यं भवस्य।। अथर्व० ८।८।११।।
इम उप्ता मृत्युपाशा यानाक्रम्य न मुच्यसे ।
अमुष्या हन्तु सेनाया इदं कूटं सहस्रशः।। अथर्व० ८।८।१६।।
इन्द्रो मन्थतु मन्थिता शक्रः शूरः पुरन्दरः ।
यथा हनाम सेना अमित्राणां सहस्रशः ।। अथर्व० ८।८।१।।

अत्र इन्द्र एव शक्रादिनामभिर्विशिष्टो मन्थिता कर्तृत्वेनोपन्यस्तः। तथा च—'**तमीशानं वस्वो अग्निं गृणीषेऽनानतं दमयन्तं पृतन्यून्।।**'

ऋक् ७।६।४।।

इति दिङ्मात्रमुक्तम्।

भवति चात्रास्माकम्—

विश्वं समस्तं दमनेन दान्तं
सर्वत्र सर्वस्य च मृत्युरुप्तः ।
दण्डं स दम्यं च सहैव जज्ञे
विष्णुर्दमोऽसौ दमनः स दण्डः।।२४५।।

अत्र व्याख्याप्रसंगे-पंचोत्तरशततमे १०५ श्लोके दण्डः ६५६, दमयिता ८६०, दमः ८६१, संख्याकाः शब्दा अपि व्याख्याता भवन्ति।

'दण्डः' दमेः ***'जमन्ताड्डः'*** (उणा० १।११४) इति 'ड' प्रत्ययः। दमयन्त्युपशमयन्त्यनेनेति दण्डः। दमयतेर्णिजन्तात् तृचि 'दमयिता'। दमयतीति 'दमः' सामान्येनाच् प्रत्ययः। शमयतीति शमनः। बाहुलकात् कर्त्तरि ल्युट्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हंसः—१६१

'हंस' शब्दः 'अहं सः' इति द्वाभ्यां पृथक् पृथक् पदाभ्यां संगृह्य व्युत्पाद्यते अकारलोपं कृत्वा। शब्दस्य साधुत्वाय पृषोदरादिगणमाश्रयन्ति। ***'पृषोदरादीनि यथोपदिष्टम्'*** (पा० ६।३।११०) पृषोदरादीनि शब्दरूपाणि येषु लोपागमवर्णविकाराः शास्त्रेण न विहिता, दृश्यन्ते च तानि यथोपदिष्टानि शिष्टैरुच्चारितानि। के पुनः शिष्टाः? वैयाकरणा इति। अत्र स्मर्तुमर्हं पद्यं तत्रैव सूत्रे—

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्।।

निरुक्तं=निर्वचनमिति। 'अहं सः' इति वक्तव्ये 'हंसः' इत्युच्यते।

मन्त्रलिङ्गञ्च—

यदग्ने स्यामहं त्वं त्वं वा स्यामहम्।
स्युष्टे सत्या इहाशिषः।। ऋग्० ८।४४।२३।।
योऽसावादित्ये पुरुषः सोऽसावहम्।
ओम् खं ब्रह्म।। यजु० ४०।१७।।

अथवा—हन्तेर्गत्यर्थाद् ***'वृतृवदिवचिवसिहनिकमिकम्पिभ्यः सः'*** (उणा० ३।६२) इत्यनेन 'सः' प्रत्ययः। ***'नश्च'*** (पा० ८।३।२४) इत्यनेनानुस्वारः, हन्तीति 'हंसः'=सूर्यः पक्षिभेदो वा।

अथवा 'हसे हसने' अस्मात् पचाद्यच्, पृषोदरादित्वाद् वर्णागमेन नुमि अनुस्वारः। हम्मतेर्वा 'हंसः'। हम्मतेर्हंसः, कः पुनराह हम्मतेर्हंस इति। किं तर्हि, हन्त्यध्वानमिति। इति महाभाष्यम्, (अध्याय ६।१।१३ सूत्रे) हंसः=सूर्यः।

मन्त्रलिङ्गञ्च—

ये अर्वाङ् मध्य उत वा पुराणं वेदं विद्वांसमभितो वदन्ति ।
आदित्यमेव ते परि वदन्ति सर्वे अग्निं द्वितीयं त्रिवृतं च हंसम्।।
अथर्व० १०।८।१७।।

सहस्राह्ण्यं वियतावस्य पक्षौ हरेर्हंसस्य पततः स्वर्गम् ।
स देवान्त्सर्वानुरस्युपदद्य संपश्यन् याति भुवनानि विश्वा।।
अथर्व० १०।८।१८।।

हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम्।
ऋग्० ४।४०।५।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्रह्म ततोऽपि ज्येष्ठम् मन्त्रलिंगं च–

यतः सूर्य उदेत्यस्तं यत्र च गच्छति।

तदेव मन्येऽहं ज्येष्ठं तदु नात्येति किंचन।। अथर्व० १० ।८ ।१६ ।।

भवतश्चात्रास्माकम्–

जीवो हि तादात्म्यमितो महेच्छुः
सोऽसावहं हंस उ वास्म्यहं सः।
विष्णुर्हि हंसः स उ हंसनेत्रो
व्याप्नोति विश्वं भुवनानि पश्यन्।।२४६।।

तमेव वेदं पुरुषं पुराणं
विद्वान्समग्निं त्रिवृतं च हंसम्।
नानागुणैर्व्याप्तमनेकमेकं
ज्येष्ठं वदन्त्येव बुधास्तु विष्णुम्।।२४७।।

अत्र प्रसंगतः–* 'पुरातन' इत्यादि व्याख्यातं भवति 'पुराणः' इति नाम्ना तं ज्येष्ठं (ब्रह्म) पुराणं वेदं विद्वान्समभितो वदन्तीत्यत्रोपन्यस्य मन्त्रलिंगात्।

षट्षष्टितमे श्लोके ४६८ तमं नाम।

हंसः पक्षीति यदुक्तं तत्र मन्त्रलिंगं च–

यां द्विपदः पक्षिणः संपतन्ति हंसाः सुपर्णा शकुना वयांसि।

अथर्व० १२ ।१ ।५१ ।।

हंसाः सुपर्णाः शकुना वयांसि। अथर्व० ११ ।२ ।२४ ।।

सुपर्णः–१६२

शोभनः पर्णः शोभनः पतनः 'सुपर्णः'। 'पर्ण हरितभावे' चौरादिकस्तस्मादच्।' वृक्ष-लता-गुल्मादीनां हरितभावमापन्नं पत्रं पर्णमुच्यते। उड्डयनसाधनीभूतौ पक्षावपि पर्णशब्देनोच्येते, पतनात् पतत्रिः पक्षो वा।

सुपर्णो जीवः, परमात्मा च। मन्त्रलिङ्गञ्च–

---

*पुरा-अव्ययात्-**'सायंचिरंप्राह्णेप्रगेऽव्येभ्यष्ट्यु ट्युलौ तुट् च'** (पा० ४ ।३ ।२३) इत्यनेन ट्यु-ट्युलौ प्रत्ययौ, तुट् चागमः। पुरा भवः पुरातनः। यत्र 'तुट' आगमो नेष्यते तत्र पुराणः। पुराण-पुरातनौ समानार्थकौ। 'तुटः' आगमविधानमेव ज्ञापयति क्वचिन्नापि भवति, तेन 'पुराण' इत्येव।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभि चाकशीति ।।

ऋक् १।१६४।२०।।

तयोरन्यो निर्लिप्तो विष्णुरिति 'सुपर्णो' ग्राह्यः। अन्यच्च—

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः।।

ऋग्० १।१६४।४६।।

सुपर्णः=सूर्योऽपि भवति। तथा च मन्त्रलिङ्गं—

चन्द्रमा अप्स्वन्तरा सुपर्णो धावते दिवि। ऋक् १।१०५।१।।

भवतश्चात्रास्माकम्—

सृष्ट्वा जगत् सर्वविधं स तष्टा
विविक्तमात्रः स सुपर्ण एकः।
स एव दिव्यं गमयत्यजस्रं
सुपर्णमग्निं दिवि सूर्यसंघम्।।२४८।।

एकः स विष्णुर्विविधात्मशक्त्या
व्याप्नोति विश्वं विविधस्वरूपैः।
तमेव सूर्यं तमु वा सुपर्णं
तमेव विद्वांसमलं ब्रुवन्ति ।।२४६।।

वेदं विद्वान्समभितो वदन्ति। अथर्व० १०।८।१७।।

यदुक्तं सूर्यसंघम्, सूर्यादिनवग्रहसंघमिति बोध्यम्। गतिमत्त्वात्। तेषामपि सद्भावात्। यथा हि हंसः सूर्यः संपश्यन् विश्वानि भुवनानि याति, तथैवैते ग्रहा अपि विश्वानि भुवनानि पश्यन्तो यान्ति। भुवनानि-द्वादशराशिभिः सम्पृक्ता द्वादश भावाः। व्याख्यातं भूत-भव्य-भवत्पति-नामव्याख्याने।

भुजगोत्तमः—१६३

'भुज कौटिल्ये' धातुः, भुजेन कौटिल्येन गच्छतीति भुजगः। कौटिल्यं हि नाम विषमगमनम्। विषमगतिर्हि वायौ, वायुर्हि गतेरधिष्ठानम्। तेषु भुजगेषु उद्गततमः। 'उत्तम' शब्दे उत्-उपसर्गस्तमप् च प्रत्ययः। तौ कंचन कृदन्तं धातुरूपमपेक्षत इति कृत्वा, उद्गततमः, उद्धततमः, उद्यातातम इत्याद्यूहनीयं भवति। तत्र च कृदन्तस्य स्वभावतः स्वार्थो निहितो भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथवा—पक्षावेव भुजौ येषां ते पक्षिणो 'भुजगाः' तेषां मध्ये उत्प्लुततमो 'भुजगोत्तमः'। एतेन विज्ञायते वायुर्जगति यद्यद् गतिमत् ततोऽप्यतिशयेन गतिमानिति 'भुजगोत्तमो' विष्णुरुक्तो भवति।

अत्र विश्वे सूक्ष्मात् पक्षवतः प्राणिन आरभ्य उष्ट्राकारपक्षिपर्यन्तानामुड्डयनवतां मध्ये यो यो यस्माद् यस्मात् शीघ्रगतितमस्तत्र तत्र अल्पगतिमतोऽपेक्षया विष्णोर्व्यापनशक्तिरधिकेति कृत्वा विष्णुत्वं तस्मिन् विद्योतते। एतेन भुजगोत्तमनाम्ना विज्ञायते, यद् यत् स्थानं भुजगेन त्वरया लभ्यते, तत् स्थानं तेन भुजगोत्तमेन विष्णुना पूर्वमेवाप्तं भवति।

मन्त्रलिङ्गञ्च—

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।। यजु० ४०।५।।
येन द्यौरुग्रा पृथिवी च दृढा, येन स्वः स्तभितं येन नाकः।
योऽन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ।।
यजु० ३२।६।।

यदत्र यान्त्रिकमुड्डयनं वैमानिकं नाम तत्रापि च वयांस्येव प्रमाणं भवन्ति। अत्र विषये वेदे युक्तिः—

वेदा यो वीनां पदमन्तरिक्षेण पतताम्।
वेद नावः समुद्रियः।। ऋग्० १।२५।७।।

समुद्रशब्दोऽत्राकाशवाचकः। आकाशीयं नौर्विमानमेव। तत्रापि च विविधगतिमतां विकल्पना भगवता कृतास्ति। तत्र भुजगोत्तमो विष्णुरुड्डयनवतोऽपि प्राग्लब्धस्थानत्वाद् 'भुजगोत्तम' उक्तो भवति।

विमानं त्रिवर्गं साधयति। विमानं हि तत्—१. यत् स्थानात् स्थानान्तरं नयति। २. द्वीपादद्वीपान्तरं नयति। ३. लोकाल्लोकान्तरं च नयति। भुजगोत्तमो विष्णुः सर्वत्र प्राप्तत्वाद्, व्यापनशीलत्वं तस्य विष्णोर्विज्ञापनाय 'भुजगोत्तमः' इत्युक्तो भवति।

भवति चात्रास्माकम्—

गतेरधिष्ठानमिहास्ति वायुः
पतत्रिणो यान्ति यथेष्टवेगाः।
वैमानिकाश्चापि पतत्रिमूला
जयन्ति नैते भुजगोत्तमं तम्।।२५०।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भुजगमधिकृत्य—

सर्पा भुजंगा भुजगास्त एव
तत्रापि नानाकृतिवर्णभेदाः ।
कौटिल्ययोगाद् भुजगास्त उक्ता
अत्येति विष्णुर्भुजगोत्तमस्तान्।।२५१।।

हिरण्यनाभः—१६४

'हिरण्य' शब्दो व्युत्पादितचरो हिरण्यगर्भ इति नाम-व्याख्याने। हिरण्यं नाभौ यस्य स 'हिरण्यनाभः'। ***'अच् प्रत्यन्वव'*** (पा० ५।४।७४) सूत्रे 'अच्' इति योगविभागात् समासान्ताच् प्रत्ययेन 'हिरण्यनाभः' सिद्धो भवति।

'नाभिः' शब्दो हि-'णह बन्धने' दैवादिकः, तस्मात् ***'नहो भश्च'*** (उणा० ४।१२६) सूत्रेण 'इञ्' प्रत्ययो भकारश्चान्तादेशः। नह्यतीति **'नाभिः'** हिरण्यं तेजसं नह्यति बध्नातीति 'हिरण्यनाभः'। नाभिश्चक्रमध्यं लोके प्रसिद्धम्। प्राण्यवयवश्च नाभिः। पक्वामाशययोर्मध्ये सिराप्रभवं नाभिर्नाम मर्म।

यावत्यस्तु सिराः काये सम्भवन्ति शरीरिणाम्।
नाभ्यां सर्वा निबद्धास्ताः' प्रतन्वन्ति समन्ततः।।

सुश्रुत शा० ६।२६।।

नाभिस्था प्राणिनां प्राणाः प्राणान्नाभिर्व्यपाश्रिता।
सिराभिरावृता नाभिश्चक्रनाभिरिवारकैः ।।

सुश्रुत शारीर० ७।४५।।

यथा सर्वसिराणां निबन्धनस्थानं नाभिस्तथा सूर्यादिलोकानां ग्रहोपग्रहयुक्तानां भगवान् विष्णुरेव बन्धनकर्तृत्वान्नाभिः। यथा नाभावरा ओता न विशीर्यन्ते, परन्तु चक्रयन्ति चक्रं तथैव 'हिरण्यनाभः' इति नामवता विष्णुना यथास्थानं कीलिता नद्धा वा सन्तो ग्रहा स्वकेन व्यवस्थितमार्गेण भ्रमन्ति भ्रामयन्ति च चतुर्विधप्राणिजगत्।

तद्यथा-उद्भिदः—औषधि-वृक्ष-लता-गुल्मादयो यथा नियतकालं पत्र-पुष्प-फलादिभिर्युक्ता भवन्ति। स्वेदजाः—लिक्षा-यूका-वृश्चिक-पतङ्गादयो नियत-स्वेदोष्मगन्धकाल एव उत्पद्यन्ते न तु यथेष्टम्। तथैवाण्डजाः—पृथक् पृथग् ऋतावुत्पद्यन्ते। तथा च जरायुणा सह प्रसवतां प्राणिनां निबन्धनं नाभिमर्म। तथैव भगवान् विष्णुः सर्वं नाक्षत्रं जगद् ग्रहोपग्रहसहितं विष्णुना निबद्धं नेतस्ततः स्वैरं विकलात्मकमपि भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

हिरण्यनाभो भगवान् स विष्णु-
श्चराचरं नह्यति विश्वमात्रम्।
यथा स लोकान् भ्रियते तथात्मा
हिरण्यनाभो ध्रियतेऽथ गात्रम्[1]।।२५२।।

उक्तं च—

अष्टचक्रा नवद्वारा देवानां पूरयोध्या ।
तस्मिन् हिरण्ययः कोशः स्वर्गो ज्योतिषावृतः।
तस्मिन् यद्यक्षमात्मन्वत् तद्वै ब्रह्मविदो विदुः।। अथर्व० १० ।२ ।३१ ।३२ ।।

हिरण्यं नह्यति वा 'हिरण्यनाभ' उक्तो भवति।

सुतपाः—१६५

'सु'—शोभनार्थेऽव्ययम्। 'तपो' हि नाम मनस इन्द्रियाणाञ्चैकीभावः। क्लेशसहिष्णुता वा 'तपः'।

धातूनां द्रावो महता तापेन क्रियते, ते धातवो जलवद् द्रवन्तोऽपि खं-वियत् शून्यपर्य्यायं न दहन्ति, परन्तु खे=आकाशे धातूनां द्रवता क्रियते। तथैवायं भगवान् अभीद्धेन तपसा सूर्यादिग्रहोपग्रहयुक्तं विश्वं रचितवानिति कृत्वा स विष्णुः 'सुतपाः' इति शब्देनोक्तो भवति।

मन्त्रलिङ्गञ्च—

इन्द्र इत्सोमपा एक इन्द्रः सुतपा विश्वायुः। अन्तर्देवान् मर्त्यांश्च।।
ऋग्० ८ ।२ ।४ ।।

ऋतं च सत्यं चाभीद्धात्तपसो[2]ऽध्यजायत।
ततो रात्र्यजायत ततः समुद्रोऽर्णवः।। ऋग्० १० ।१९० ।१ ।।

अत्र सृष्टौ तपो मूलमस्त्यत एव सर्वाणि कर्माणि तपोऽपेक्षन्ते। तस्मात् तपोरूपो भगवान् सर्वत्र तपोनियमेन व्यनक्त्यात्मानम्। तद्यथा गर्भो नवमासान् मातुर्गर्भे तपो विषहमाणः सर्वाङ्गसम्पूर्णो जायते, तत् तस्यैव विष्णोः स्वकं रूपं विज्ञापनं वा।

१. गात्रम्=शरीरम्। २. तपसो ब्रह्मण इति शेषः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

यथा स विष्णुः सुतपाः स्वयं सन्
सूर्यादिकानां सहतेऽथ तापम् ।
तथा स्वयं तापसुतप्तगात्रा
गर्भस्य तापं सहते च माता ।।२५३।।

जन्तूनां प्रसवे कालभेदो तपसो नैयून्यमतिशयत्वं वा ज्ञापयति। शश-श्वा-अज-मूषक-पुरुष-गो-महिषी-वडवा-उष्ट्रीणां गर्भपरिपाककालो भिन्नो भिन्न इति। एतेन ज्ञापयति भगवान् विष्णुर्यद् यथावस्तु तपसोऽप्यावश्यकता भिन्ना भिन्नैव।

किंचिद्भेदेन पुनरस्माकम्—

स एव विष्णुः सुतपाः स्वयं सन्
गर्भे दधात्येव दिवाकरादीन् ।
मातापि तद्वत् 'सुतपा' यशोधृक्
गर्भान् दधात्येव यथार्हकालम् ।।२५४।।

पद्मनाभः—१६६

'पद गतौ' दिवादिः ***अर्त्ति-स्तु-सु-हु-सृ-घृ-क्षि-क्षु-भा-या-वा-पदि-यक्षि-नीभ्यो मन्*** (उणादि० १।१४०)। पद्यते प्राप्नोति पद्मं कमलं निधिः शंखो वा। पद्यते ज्ञायतेऽनेन इति 'पद्मं' ज्ञानम्। पद्मं नाभौ यस्य स 'पद्मनाभः'। ***'अच् प्रत्यन्ववपूर्वात् सामलोम्नः'*** (५।४।७५) अनेन 'अच्' इति योगविभागात् सामान्येन समासान्तो बहुब्रीहिः,अच् प्रत्ययः। तेन पद्मनाभ-शब्दार्थो भवति ज्ञाननाभः।

यदेतद् विश्वे ज्ञानगोचरतामुपैति तत् सर्वं ज्ञानस्वरूपेण विष्णुना नद्धं बद्धं कीलितमास्ते। तद्यथा—कदलीवृक्ष एकधैव फलं ददाति दधाति वा, स यदि द्विःफलति तदा कदलीत्वं तस्य विहतं भवति। एतस्य विश्वस्य ज्ञानं क्व निहितमस्तीति ज्ञानाय वैदिकं ज्योतिर्विज्ञानं पठनीयम्।

प्रतिवृक्षजाति पद्मनाभेन ज्ञानबन्धने सर्वत्र व्यापकेन विष्णुना पृथक् पृथक् गन्धः पत्रं फलं स्वादमयं कृतमस्ति। एवमेव प्रतिप्राणिजाति ज्ञानपूर्वकं भेदः कृतोऽस्ति।

सारांशतो यो हि प्रभुकृतस्य विश्वस्य यत् किंचित् तत्त्वतो ज्ञानाय यतते स पद्मनाभस्य तावज्ज्ञानाय यतत इत्यवधार्यम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

स पद्मनाभो भगवान् विरामो[1]
ज्ञानेन संनह्यति वेद[2]-सृष्टिम्।
यो यस्य यावल्लभते ह वेदं
स पद्मनाभं लभते ह तावत् ।।२५५।।

नाभिः स्तभ्नाति मर्त्यम्—

नाभिर्यथा नह्यति मर्ममात्रं
ज्ञानं तथा नह्यति भूतमात्रम् ।
पद्मप्रभं विश्वमिदं समस्तं
बध्नाति विष्णुः प्रतिकल्पमेतत्।।२५६।।

प्रजापतिः—१६७

प्रजानां पतिः 'प्रजापतिः' स एव भगवान् विष्णुः।

मन्त्रलिङ्गञ्च—

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव।
यजु० १० ।२० ।।

त्वष्टारमग्रजां गोपां पुरोयावानमाहुवे ।
इन्दुरिन्द्रो वृषा हरिः पवमानः प्रजापतिः।। ऋक् ६ ।५ ।६ ।।

यस्मान्न जातः परो अन्यो अस्ति य आविवेश भुवनानि विश्वा।
प्रजापतिः प्रजया संरराणस्त्रीणि ज्योतींषि सचते स षोडशी।।
यजु० ८ ।३६ ।।

स ओतः प्रोतश्च विभुः प्रजासु। यजु० ३२ ।८ ।।

इतरोऽपि प्रजापतिः कुम्भकारो नामैतस्मादेव। यतः स कुम्भकारोऽपि प्रजापतिरिव प्रजानां विविधावश्यकतानां पतिरिव पूरको भवति, विविधमृत्पात्रनिर्माण-कर्मणा।

---

१. 'विरामो' विष्णुः सहस्रनामसु पठितत्वात्। २. वेदाश्चत्वारः= चतुर्भेदभिन्नां सृष्टिमित्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्

प्रजापतिः सर्वप्रजा जनित्वा
भोज्येन धामेन च पाति सर्वाः।
स एव चायुर्निदधाति तासु
स ओत एवास्ति समग्रविश्वे।।२५७।।

❖ ❖ ❖

अमृत्युः सर्वदृक् सिंहः सन्धाता सन्धिमान् स्थिरः।
अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा ।।३५।।

१९८ अमृत्युः, १९९ सर्वदृक्, २०० सिंहः, २०१ सन्धाता, २०२ सन्धिमान्, २०३ स्थिरः।
२०४ अजः, २०५ दुर्मर्षणः, २०६ शास्ता, २०७ विश्रुतात्मा, २०८ सुरारिहा।।३५।।

अमृत्युः—१९८

'मृङ् प्राणत्यागे' तौदादिकः, अस्माद् धातो ***'भुजिमृङ्भ्यां युक्त्युकौ'*** (उणादि ३।२१) सूत्रेण 'त्युक्' प्रत्ययः। मरणं 'मृत्युः', प्राणैर्वियोगो 'मृत्युः'। म्रियन्ते जना अनेनेति वा 'मृत्युः'। निषेधार्थकेन 'नञा' समासे सति 'अमृत्युः' इति शब्दो निष्पद्यते।

यथा यद् भगवतामृत्युना विष्णुना निर्मितं, ततो विपरीतीभावो मृत्युर्विनाशो वा। तद्यथा—शरीरात्मसंयोगमापकः काल आयुरुच्यते जीवनं वा। जंङ्घे पृथक्-पृथक् कार्यं कुरुत इति, तयोर्द्वयोरेकीभावो मृत्युः। अंगुल्यः पृथक्-पृथक् सन्त्यः कार्यक्षमा भवन्ति, तेषां एकीभावो मृत्युः। शिरःकपालास्थीनामचलसन्धिना बद्धानां पृथग्भावो मृत्युः। एतत् सर्वं संयोग-वियोगात्मकं नाश-सूचकं भगवतो न विद्यत इत्य'मृत्युः'।

यथा भगवानमृत्युस्तथैव भगवता यन्निर्मितं तस्योच्छेदः सर्वथा न भवति। तद्यथा तुर्यविध-सृष्टेः सत्ता विनाशोदयावाकल्पं स्थास्यत इति सिद्धान्ततो मृत्युः सर्वत्र व्यापको दृश्यते। सारांशतो यथा भगवानमृत्यु स्तथैव तत् कर्माप्यमृत्युरविनाशवानिति, वीचितरंगन्यायवदमर इति। तत्कर्माप्यमृत्यु-अविनाशवदिति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

अकामो धीरो अमृतः स्वयंभू रसेन तृप्तो न कुतश्चनोनः।
तमेव विद्वान् न बिभाय मृत्योरात्मानं धीरमजरं युवानम् ।।

अथर्व० १० ।८ ।४४ ।।

पपृक्षेण्यमिन्द्र त्वे ह्योजो नृम्णा नि चनृतमानो अमर्तः।

ऋक्० ५ ।३३ ।६ ।।

भवति चात्रास्माकम्—

अमृत्युरस्त्यत्र स विष्णुरुक्तः
प्रवाहतोऽमृत्युरिदं समस्तम् ।
यथाकृतं यद् विभुना तथा तत्
क्रियाक्षमं मृत्युरतोऽयथात्वम्।।२५८।।

मृत्यु शब्दः पुल्लिंगः स्त्रीलिंगश्च।

सर्वदृक्—१६६

सर्वं चराचरं पश्यतीति 'सर्वदृक्'। 'दृशिर् प्रेक्षणे' भ्वादिः, तस्मात् कर्मण्युपपदे ***'दृशेश्चेति वक्तव्यम्'*** वार्त्तिकेन क्विन् प्रत्ययः ***'क्विन्प्रत्ययस्य कुः'*** (पा० ८ ।२ ।६२) तेन 'सर्वदृक्' शब्दः साधुर्भवति।

मन्त्रलिङ्गञ्च—

विश्वतश्चक्षुरुत विश्वतो मुखः। ऋग्० १० ।८१ ।३ ।।
सहस्राह्णयं वियतावस्य पक्षौ हरेर्हंसस्य पततः स्वर्गम् ।
स देवान्त्सर्वानुरस्युपदद्य संपश्यन् याति भुवनानि विश्वा।।

अथर्व० १० ।८ ।१८ ।।

सूर्याचन्द्रमसौ विष्णोश्चक्षुषी। भगवतो विराट्स्वरूपव्याख्याने मन्त्रा उदाहृतचराः सन्ति।

भवति चात्रास्माकम्—

स सर्वदृक् विष्णुरमीलिताक्ष-
श्चन्द्रार्कनेत्रः सकलं विचष्टे[1]।
यस्तं विभुं सर्वदृशं हृदिस्थं
जानाति नातिक्रमते स वर्त्म।।२५६।।

---

१. 'चक्षिङ् व्यक्तायां वाचि' अयं दर्शनेऽपि। विचष्टे=विशेषेण पश्यतीत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सिंहः—२००

'हिसि हिंसायाम्' रौधादिकः, हिनस्तीति 'सिंहः' पृषोदरादित्वादाद्यन्तविपर्ययः। 'सिहि हिंसायाम्' स्वतन्त्रं धातुं मन्यन्ते क्षीरस्वामिप्रभृतयो वैयाकरणाः।

प्रतिवस्तु विपरीते वैरम्, अनुकूले प्रीतिं प्रकटयति। तद्यथा—बाह्ये जगति वायोः प्रकोपः शरीरवायुं प्रकोपयति। बाह्ये जगति जलप्रकोपः शरीरे जलधातुं प्रकोपयति। अम्भः पृथिवीभ्यां श्लेष्मा। आकाशमारुताभ्यामग्निर्बलमुपैति। जलपृथिवीभ्यामग्निर्नाशमुपैति। एवमेव पृथिवी सावकाशं पूरयति, उत्खातश्च पृथिवीं निरस्याकाशमारुताभ्यां पूरितो भवति। इति दिङ्मात्रमुक्तम्।

सर्वमेवैतत् षड्रसमयम्। तद्यथा—उक्तं च शार्ङ्गधरसंहितायाम्—

धराम्बु-क्ष्मानल-जलज्वलनाकाशमारुतैः ।
वाय्वग्नि-क्ष्मानिलैर्भूतद्वयै रससम्भवः क्रमात्।।

'पञ्चमकाल' अ० २ श्लोक १४।।

उक्तं च चरके—

तत्र दोषमेकै त्रयो रसा जनयन्ति, त्रयश्चोपशमयन्ति। तद्यथा— कटुतिक्त-कषाया वातं जनयन्ति, मधुराम्ललवणास्त्वेनं शमयन्ति। कट्वम्ललवणाः पित्तं जनयन्ति मधुरतिक्तकषायास्त्वेनं शमयन्ति। मधुराम्ललवणाः श्लेष्माणं जनयन्ति कटुतिक्तकषायास्त्वेनं शमयन्ति।।

च० वि० स्थान० १।६।।

एवं प्रतिवस्तु हिनस्ति धर्मं प्राप्नोति। तस्मात् स भगवान् स्वयं सर्वस्य व्यवस्थाता सन् व्याप्नोति-धर्मेण 'सिंहः' उक्तो भवति। मन्त्रलिङ्गञ्च—

अंहोयुवस्तन्वस्तन्वते वि वयो महद् दुष्टरंपूर्व्याय ।
स संवतो नवजातस्तु तुर्यात् सिंहं न क्रुद्धमभितः परिष्टुः।।

ऋग्० ५।१५।३।।

भवतश्चात्रास्माकम्

हिनस्ति यस्मात् प्रतिवस्तु वस्तु
व्याप्नोति विश्वं स हि सिंहशक्त्या।
न तद्विना कोऽपि क्षमोऽस्ति लोके
विरुद्धभूतानि नियोजयेद् यः ।।२६०।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्मात् स सिंहः प्रतिवस्तुनिष्ठो
विरुद्धभावैर्जगदातनोति ।
तं व्यापकं सर्वकलाभिरामं
विष्णुं वदन्त्येव च सिंहनाम्ना।।२६१।।

'चकारोऽत्र पादपूरणार्थः।

इति श्री १०८ पण्डितसत्यदेववासिष्ठकृते
महाभारतानुशासनपर्वान्तर्गतस्य (अ० १४६)
विष्णुसहस्रनामस्तोत्रस्य
वेदप्रमाणोपवृंहितसत्यभाष्ये
द्वितीयं नामशतकं
सम्पूर्णम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संधाता—२०१

समेकीभावेऽव्ययम्। दधातीति 'धाता'। 'दधातेः' कर्त्तरि 'तृच्' प्रत्ययः। भगवान् संधाता विष्णुः सर्वविश्वमेकीभावेन दधाति।

लोकेऽपि पश्यामः—पादाङ्गुलीत आरभ्य शिखान्तं यावत् सर्वशरीरं जीवो मनसा प्रेरितो स्थानान्तरं जिगमिषुः सन् संधातृभगवतो गुणं बिभ्रत् समग्रं शरीरमेकात्मरूपेण दधद् याति। वृक्षोऽपि सपञ्चाङ्गमेकीभावेन वर्धत इति।

उद्यन् सविता सर्वपरिच्छदं समानरूपेण दधातीत्येवमादिकं स्वयमूहनीयम्। सर्वत्र च भगवतः संधातृरूपो गुणो दृश्यते तेन संधात्रा व्यवस्थापिते विश्वे।

मन्त्रलिङ्गञ्च—

शं नो धाता शमु धर्ता नो अस्तु। ऋग्० ७।३५।३।।

तवाहमद्य मघवन्नुपस्तुतौ धातर्विधातः कलशां अभक्षणम्।

ऋग्० १०।१६७।३।।

भवति चात्रास्माकम्—

संधातृधर्मा भगवान् वरेण्यो
भेदं विना विश्वमिदं बिभर्त्ति।
तथा यथा स्थानमभीप्सुरात्मा
सर्वांगरूढं नयते ह कायम्।।२६२।।

सन्धिमान्—२०२

'सम्' एकीभावेऽव्ययम्। सम् उपसर्गपूर्वाद् 'दधाते' ***'उपसर्गे घोः किः'*** (पा० ३।३।९१) सूत्रेण किः प्रत्ययो भवति भावे अकर्तरि च कारके। सम्-एकीभावेन धीयते इति 'सन्धिः'। सन्धिर्हि नाम द्वयोः पृथक्-पृथक् स्थितयोरेकार्थसाधनप्रवृत्तयोः पदार्थयोरेकार्थे यत् संयोजनं स 'सन्धिः'। सन्धिरस्यास्तीति 'सन्धिमान्'। सन्धिः संधारणं समानरूपेण धारणं सर्वकस्य लोकस्य करणमस्य भगवतोऽस्तीति 'सन्धिमान्' भगवान् विष्णुः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शरीरमिदमनेकैः सन्धिभिः प्रक्लृप्तं दृश्यते। यथात्र शरीरे भोजनानन्तरं रसधातुना समग्रं शरीरं परिवृद्धिं प्राप्नोति, न नैयून्येन नापि चाधिक्येन, तथा च पादाङ्गुलित आरभ्य शिवरन्ध्रमिति यावद् यावन्तः सन्धयः शरीरे सन्ति, तेऽपि सर्वे सन्धयोऽविकृताः सकलं शरीरं समानरूपेण कार्य्याय समर्थयन्ति। यथैवैतत् सन्धिमच्छरीरं भगवता कृतमास्ते, प्रति प्राणि च सन्धयः पृथक्-पृथक् सन्ति तथैवैतत् समग्रं विश्वं सन्धिमता भगवता संधीयते। समानधारणात् सन्धिरिति कृत्वा।

यथा हस्ताङ्गुलिपुटकादारभ्य शिरसः कपालास्थीनि यावत् समुदितं शरीरं समग्रायुषी भोगेन कल्पते, अमुथैव नक्षत्रोपनक्षत्रैर्ग्रहैर्जगत् समानरूपेण धृतमस्तीति कृत्वा स भगवान् सन्धिधर्मणा विश्वं व्याप्नुवन् प्रत्यक्षमिव विराजते। वृक्षः पञ्चाङ्गसमुदितो वर्धते, कुतः समानकाले सर्वकस्य धारणं पोषणं कर्म अस्यास्तीति 'सन्धिमान्' विष्णुरुक्तो भवति।

पर्वताः पर्ववन्तः। शरीरसन्धिः शरीरपर्वनाम्नाप्युक्तो भवति। वायोरग्नेर्यः सन्धिः सा विद्युत्। यो हि सन्धीनां स्वरूपं वेत्ति, स हि यन्त्राणां सकुशलं निर्माता भवितुं शक्नोति। सारांशत इदं ज्ञातव्यं—यत् सन्धिमता भगवता कृते जगति सन्धिशैथिल्यं न भवति। विना मनुष्यप्रमादं शरीरसन्धयोऽपि समानरूपेण शरीरधारणं कर्म न जहति। एवं खगोलं भूगोलं च तेनैव सन्धिमता धृतमास्ते।

भवति चात्रास्माकम्—

स सन्धिमान् विष्णुरनन्तकर्मा
जगद्विधत्ते बहुसन्धियुक्तम् ।
तं सन्धिमन्तं भुवनं स धाता
व्याप्नोति संधानगुणेन[1] नित्यम्।।२६३।।

स्थिरः—२०३

तिष्ठतीति 'स्थिरः' 'किरच्' प्रत्ययान्तोऽयमुणादिना ***'अजिर-शिशिर-शिथिल-स्थिर-स्फिर-स्थविर-खदिराः'*** (१-५३) सूत्रेण निपात्यते, आकारलोपः।

गमननिवृत्त्या तिष्ठतीति 'स्थिरः'।

यो अश्वानां यो गवां गोपतिर्वशी य आरितः कर्मणि कर्मणि स्थिरः।
ऋक्० १।१०१।४।।

स वृक्ष इव स्तब्धो दिवि तिष्ठत्येकः। निरुक्त २।३।।

१. संधानगुणेन=समानधारणगुणेन।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'तदेजति तन्नैजति तद्दूरे तद्वन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः'।। यजु० ४०।५।।

भवति चात्रास्माकम्—

स्थिरः स विष्णुर्गतिमद् विधाय
जगत् स्थिरत्वं न निजं जहाति ।
यथात्र यन्त्राणि विधाय कर्ता
मतेः स्थिरत्वं न जहाति मोहात् ।।२६४।।

अथवा—

यन्त्रं भ्रमन्तं सगतिं विधाय
स्वामी स्वयं तिष्ठति चाप्रकम्पः ।
यथा तथा विश्वमिदं विधाय
स्थिरो[1] नियच्छन् भुवनानि शास्ति।।२६५।।

अजः—२०४

'अज गतिक्षेपणयोः' भौवादिकः। अजति-गच्छति सर्वत्र व्याप्तो भवति, क्षिपति सर्वत्र क्षिप्तो वा भवतीत्यजो विष्णुः सूर्यो वा।

मन्त्रलिङ्गञ्च—

शं नो अज एकपाद् देवो अस्तु। अथर्व० १६।११।३।।

अजतेः सामान्येन सर्वधातुभ्योऽच् प्रत्ययः। ***'अजाद्यतष्टाप्'*** (पा० ४।१।४) अत्र निपातनाद् वीभावस्याऽभावः। 'अजः' इति।

'अजो' नामा विष्णुः सूर्यक्षेपणपूर्वकं जगत् क्षिपति प्रेरयति चेष्टयत्यतः स विष्णुरुक्तो भवति।

अमुथैवान्यत्रापि मन्त्रलिङ्गं दृश्यते—

तदेजति तन्नैजति। यजु० ४०।५।।

भक्तश्च सोमात्मकं विष्णुं पुनः पुनर्हृदि रमणाय प्रार्थयति। मन्त्रलिंगं च—

सोम रारन्धि नो हृदि गावो न यवसेष्वा।
मर्य इव स्व ओक्ये।। ऋग्० १।६१।१३।।

---

१. 'स्थिरो' विष्णुः। यथा शरीरं गतिमत् सत् यावदायुः सर्वांगसमुदितं स्थिरं सत् कार्यकरं भवति, आत्मना च शासितो भवति। तथैव लोकाध्यक्षो लोकान् शास्ति अधीक्षते वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रमते क्रीडार्थस्य यङ्लुकि लोटि मध्यमपुरुषैकवचने रूपं रारन्धि इति।
भवति चात्रास्माकम्—

अजः स सर्वत्र गतोऽस्ति विष्णु-
र्न तं विना स्थानमिहास्ति किंचित्।
तं सोम-सम्मुग्धगुणो ह भक्तो
रारन्धि सोमेति च जोहवीति ॥२६६॥

भगवन्नियमनिबद्धसृष्टिनियममनुपालयतो भक्तस्य हृदये स सत्यां बुद्धिं वयति। अजतेर्णिचि वयति।

भवति चात्रास्माकम्—

यः सत्यरूपस्य गुहागतस्य
जगद्विधातुर्न विहन्ति मार्गम्।
स एव भक्तो, न तु गान-रक्त-
स्तं सत्यबुद्ध्याजति, पाति, शम्भुः ॥२६७॥

दुर्मर्षणः—२०५

'दुरुपसर्गपूर्वान्मृष्यतेस्तितिक्षार्थाद्' ***'भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज्वक्तव्यः'*** इति (पा० ३।३।१३०) सूत्रस्थितवार्तिकेन 'युच्' प्रत्ययो, योरनश्चेति 'दुर्मर्षणः'। तितिक्षा चात्र सहनम्। दुःखेन मर्षितुं सोढुं शक्यो 'दुर्मर्षणः' इति। भगवतो दुर्मर्षणेति नाम तस्य सर्वत्र व्याप्तिं सूचयति। तथा हि सर्वत्र सूर्यादिषु व्याप्तो भगवान् तेजसा दुःसहो भवत्यतो 'दुर्मर्षणः' स भवति।

लोके च परस्परासहनरूपं दुर्मर्षणत्वं तं सर्वव्यापकं भगवन्तं व्यञ्जयति। तथा हि प्रत्यक्षमेतत् सूर्यश्चन्द्रकान्तिं क्षिणोति, क्षिणोति च चन्द्रो नक्षत्राणाम्। अग्निर्जलन्न मृष्यति=सहते, जलञ्चाग्निम्, इति निदर्शनम्।

यद्वा धातूनामनेकार्थत्वान् 'मृषिरिह ज्ञानार्थक' एवञ्च दुःखेन मर्षितुं=ज्ञातुं शक्यो 'दुर्मर्षणः'। अर्थात् सर्वथा मनुष्यबुद्ध्यगोचरैरक्षिगोचरैः कर्मभिः प्रत्यक्षवज्ज्ञायमानोऽप्यज्ञेय इति। अर्थात् तस्यैतज्जगद्रूपं कर्म प्रत्यक्षमशेषैर्दृश्यते, न चैतस्य वास्तविकं स्वरूप केनापि ज्ञायते, दूरमपास्तां निर्माणम्।

तथा चात्र मन्त्रलिङ्गं—

सूत्रं सूत्रस्य यो विद्यात् स विद्यात् ब्राह्मणं महत्। अथर्व० १०।८।३७॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यद्वेह सहनशब्दपर्यायेण तितिक्षा-शब्देन निरोधरूपोऽर्थो लक्ष्यते। तथा च दुःखेन मर्षितुं=निरोद्धुं शक्यो 'दुर्मर्षणः'। दृश्यते च जगति सर्वत्र व्याप्तस्य तस्य निरोधरूपो धर्मः। तथा हि, नहि यथर्तु बोभूयमानः पुष्पाणां विकाशो मुद्रा वा केनापि निरोद्धुं शक्या। प्राणिनो जन्ममृत्युग्रहाणाञ्च वक्रमार्गगमनादिकर्म न केनापि निरोद्धुं शक्यम्, यतो हि स्वेन दुर्मर्षणाख्यधर्मेण भगवान् सर्वत्र व्याप्तः।

भवति चात्रास्माकम्—

दुर्मर्षणो विष्णुरयं विविक्तो
जगद्विधत्ते सुगमादबोधम् ।
तन्नाल्पविद्या अतपाः क्षमन्ते
दुर्मर्षणं तेन कृतं समस्तम् ।।२६८।।

शास्ता—२०६

शास्ति विश्वमिति 'शास्ता'। 'शासु अनुशिष्टौ' धातोरादादिकात् कर्तरि 'तृच्' प्रत्यये 'शास्ते' ति। यो विश्वं शास्ति तस्य 'शास्ते' ति नाम। अर्थात् स्वनित्यज्ञानरूपेण वेदेन विश्वं शिक्षित्वा प्रचालयति, शासनमिदमेव तस्य। अत एव स शास्तेति निगद्यते।

मन्त्रलिङ्गञ्च—

आध्रस्यचित्प्रमतिरुच्यसे पित्ता प्र पाकं शास्सि प्र दिशो विदुष्टरः।।
ऋग्० १।३१।१४।।

आदित्यः शिक्षति व्रतेन। ऋग्० ३।५६।२।।

विजानीह्यार्यान् ये च दस्यवो बर्हिष्मते रन्धया शासदव्रतान्।
ऋग्० १।५१।८।।

भवति चात्रास्माकम्—

शास्ता स विष्णुर्ह्यसकृत् प्रकल्प्य
जगन्नितान्तं नियतं प्रशास्ति ।
ग्रहाः स्वमार्गं न परित्यजन्ति
मृत्युश्च शिष्टः क्रमतेऽनुभक्ष्यम्।।२६६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रकारान्तरेण पुनरस्माकम्—

शास्ता गुरुर्विष्णुरपापविद्धः
शिष्यं जगद् वेदपथेन शास्ति ।
य एव लोकं बहुधा विचष्टे
स वेद तत्त्वं बहुधात्र वेत्ति ।।२७०।।

विश्रुतात्मा—२०७

'वि' उपसर्गो विविधार्थः। 'श्रु श्रवणे' तानादिकः, क्त-प्रत्यये 'श्रुतः' इति। आत्मा-शब्दोऽत्र स्वरूपपर्यायः। विविधश्रुतस्वरूप इत्यर्थः। वेदस्य तत्त्वं गूढार्थम्, वेदस्य प्रवाहतोऽनादित्वाद् वर्णपद्धतिश्चाप्यादित एवायाति। तथा—

आत्मा देवानामुत मानुषाणाम्। अथर्व० ७।११६।१।।

अन्यदेवाहुः सम्भवादन्यदाहुरसंभवात्।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे।। यजु० ४०।१०।।

बहुविधविकल्पनैर्विक्लृप्तमिदं जगत् गुण-कर्म-धर्म-स्वभावतो विविधं सत् तमेव प्रजापतिं गर्भेऽन्तश्चरन्तं स्वयं चाजायमानं बहुधा च जनयन्तं व्यनक्ति, प्रकाशयति। स सर्वत्र योनिः सन् 'विश्रुतात्मा' उक्तो भवति। सर्वं जगत् तमेव विश्रुतस्वरूपं वैविध्येन विश्रावयति, कुत.? **'तस्मिन् ह तस्थुर्भुवनानि विश्वा'।** यजु० ३१।१६।। इति यतः।

मन्त्रलिङ्गञ्च—

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः ।
तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः।। यजु० ३२।१।।

एतैर्नामभिर्यद् वेदे गीयते तत् सर्वं तस्यैव व्यष्टस्य विष्णोर्विश्रुतात्म-स्वरूपवर्णनमेव।

भवति चात्रास्माकम्—

स विश्रुतात्मा बहुधाभिधानै-
र्गीतोऽस्ति वेदे स उ विष्णुरुक्तः।
स एव शुक्रः स उ चन्द्रमा च
स एव वायुः स उ चाग्निरुक्तः।।२७१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विश्रुतात्मा बहुविधस्तवनीयकीर्तिस्वरूपः। तद्यथा—

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत।। यजु० ३१।१२।।

चन्द्रमसो विज्ञानेन प्राणिमात्रस्य मनसो ज्ञानं भवति। अनेनैव विधिना परेषां ग्रहाणामपि योजना ज्ञातव्या। अत एव सर्वे पृथक्-पृथग् रूपेण तमात्मस्थं विश्रुतात्मानं गायन्ति। उक्तं च वेदे—

गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः। ऋग्० १।१०।१।।

गानमर्चनं च पृथक्-पृथक् कर्म। सामवेदो गान्धर्ववेदश्च तस्यैव विश्रुतात्मकस्य स्तवनमात्रमेवेति दिक्।

सुरारिहा—२०८

'ऋ गतिप्रापणयो' भौवादिकः' ऋ सृ गतौ जौहोत्यादिको वा। द्वाभ्यां ***'अच इः'*** (उणा० ४।१३६) 'इः' प्रत्ययः। ऋच्छति इयर्त्ति वा 'अरिः'। सुष्ठु रातिर्दानं यस्य स 'सुरः' तान् सुरान् ऋच्छति इयर्ति वा विघ्नरूपेण स 'सुरारिः', तस्य हन्ता 'सुरारिहा' भगवान् विष्णुः सुरारीणां हन्तृत्वेन सर्वत्र ख्यातः।

मन्त्रलिङ्गञ्च—

बृहस्पते परिदीया रथेन रक्षोहामित्राँ अपबाधमानः।
प्रभञ्जञ्छत्रून् प्रमृणन्नमित्रानस्माकमध्यवितातनूनाम्।।
अथर्व० १६।१३।८।।

पाहि नो अग्ने रक्षसः पाहि धूर्तेरराव्णः।
पाहि रीषत उत वा जिघांसतो बृहद्भानो यविष्ठ्य[1]।।
ऋग्० १।३६।१५।।

ममायं परीक्षितः प्रयोगः—चिरमभ्यस्यमानोऽयं मन्त्रः स्वप्रभावात् मन्त्रोक्तभावेभ्यो नूनं रक्षति, विहन्तॄन् नूनं परास्यति।

अनुवादे विशेषं व्याख्यातम्।

---

१. बृहद्भानो यविष्ठ्य! पूज्य अग्ने विष्णो!

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

सुरारिहा सर्वजगत्प्रसिद्धो
विष्णुर्हि नूनं परितो रुणद्धि ।
सुरान् जिघांसुर्मनुजोऽत्र यस्तान्
सदीपकं ध्यायति[1] 'पाहि नोग्ने'।।२७२।।

❖ ❖ ❖

गुरुर्गुरुतमो धाम, सत्यः सत्यपराक्रमः।
निमिषोऽनिमिषः स्रग्वी, वाचस्पतिरुदारधीः।।३६।।

२०६ गुरुः, २१० गुरुतमः, २११ धाम, २१२ सत्यः, २१३ सत्यपराक्रमः।
२१४ निमिषः, २१५ अनिमिषः, २१६ स्रग्वी, २१७ वाचस्पतिरुदारधीः।।३६।।

गुरुः—२०६

'गॄ निगरणे' तौदादिको, 'गॄ शब्दे' क्रैयादिकश्च। गिरति गृणाति वा 'गुरुः'। लोकेऽपि च यो विद्यामुपदिशति स उपदेष्टा प्रवक्ता वा गुरुरुक्तो भवति, आचार्यो वा। ***'कृग्रोरुच्च'*** (उणादि १।२४) सूत्रेण कृगृभ्यां, धातुभ्यां 'कु' प्रत्ययः, उकारश्चान्तादेशः, तेन 'गुरुः' शब्दः संस्कृतो भवति।

भगवान् विष्णुर्वेदज्ञानोपदेशेन विश्वस्य विधानं विज्ञापयति। विश्वं च प्रतिपदं गुरुधर्ममनुपालयन् प्रतिपदमात्मनो विज्ञापनीयं विज्ञापयति।

तद्यथा मनुष्यशरीरे मरणात् पूर्वमेव मृत्युसूचकानामरिष्टानामुदय आरभते। प्रसवनात् पूर्वञ्च मातुः प्रसवसम्बधिन्यो वेदनाः प्रादुर्भवन्ति। कार्यसिद्धेः प्रागेव तत्कार्यभावाभावविज्ञापकानां शकुनानां प्रतिपदं प्रादुर्भावो गुरुनामवतोर्विष्णोर्व्यापकत्वं सूचयति। अत एव च शकुनशास्त्राणि लक्षणशास्त्राणि च वेदवत् सत्यानि। यथा चाथर्वणि—

यानि नक्षत्राणि दिव्यन्तरिक्षे अप्सु भूमौ यानि नगेषु दिक्षु।
प्रकल्पयंश्चन्द्रमा यान्येति सर्वाणि ममैतानि शिवानि सन्तु।।

---

१. 'पाहि नो अग्ने' इत्यादि मन्त्रमिति भावः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अष्टाविंशानि शिवानि शग्मानि सह योगं भजन्तु मे ।
योगं प्रपद्ये क्षेमं च, क्षेमं प्रपद्ये योगं च, नमोऽहोरात्राभ्यामस्तु ।।
स्वस्ति तं मे सुप्रातः सुसायं सुदिवं सुमृगं सुशकुनम् मे अस्तु।
सुहवमग्ने स्वस्त्यमर्त्यं गत्वा पुनरायाभिनदन् ।।
अनुहवं परिहवं परिवादं परिक्षवम् ।
सर्वैर्मे रिक्तकुम्भान् परा तान् सवितः सुव ।।
अपपापं परिक्षवं पुण्यं भक्षीमहि क्षवम् ।
शिवा ते पाप नासिका पुण्यगश्चाभि मेहताम्।।
इमा या ब्रह्मणस्पते विषूचीर्वात ईरते ।
सध्रीचीन्द्र ताः कृत्वा मह्यं शिवतमास्कृधि ।।
स्वस्ति नो अस्त्वभयं नो अस्तु नमोऽहोरात्राभ्यामस्तु।।

अथर्व० १९।८।१-७।।

शुभाशुभसूचकत्वेन द्वेधाः शकुनाः परीक्षकैः परीक्षिताः सन्ति। तद्यथा शुभसूचकाञ्छकुनानाह—

विप्राश्वेभफलान्नदुग्धदधिगोसिद्धार्थपद्माम्बरं
वेश्या वाद्यमयूरचाषनकुला बद्धैकपश्वामिषम् ।
सद्वाक्यं कुसुमेक्षुपूर्णकलशच्छत्राणि मृत्कन्यका,
रत्नोष्णीषसितोक्षमद्यससुतस्त्रीदीप्तवैश्वानराः ।।
आदर्शांजनधौतवस्त्ररजका मीनाज्यसिंहासनं,
शावं रोदनवर्जितं ध्वजमधुच्छागास्त्रगोरोचनम् ।
भारद्वाजनृयानवेदनिनदा मांगल्यगीतांकुशा,
दृष्टाः सत्फलदाः प्रयाणसमये रिक्तो घटःस्वानुगः।।

अशुभसूचाकाञ्छकुनानाह—

वंध्याचर्मतुषास्थिसर्पलवणांगारेन्धनक्लीवविट्
तैलोन्मत्तवसौषधारिजटिलप्रव्राट्तृणव्याधिताः ।।
नग्नाभ्यक्तविमुक्तकेशपतितव्यंगक्षुधार्ता असृक्
स्त्रीपुष्पं सरठः स्वगेहदहनं मार्जारयुद्धं क्षुतम् ।।
काषायी गुडतक्रपंकविधवाकुब्जाः कुटुम्बे कलि-
र्वस्त्रादेःस्खलनं लुलायसमरं कृष्णानि धान्यानि च।
कार्पासं वमनं च गर्दभरवो वक्षेऽतिरुट् गर्भिणी
मुंडार्द्राम्बरदुर्वचोऽन्धवधिरोदक्या न दृष्टाः शुभाः ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथान्यच्छकुनमाह—

गोधाजाहकसूकराहिशशकानां कीर्तनं शोभनं
नौशब्दो न विलोकनं च कपित्रृक्षाणामतो व्यत्ययः।
नद्युत्तारभयप्रवेशसमरे नष्टार्थसंवीक्षणे
व्यत्यस्ताः शकुना नृपेक्षणविधौ यात्रोदिताः शोभनाः।।

कोकिलादीनां वामांगभागेन शकुनमाह—

वामांगे कोकिला पल्ली पौतकी सूकरी रला।
पिंगला छुच्छुकाः श्रेष्ठाः शिवाः पुरुषसंज्ञिताः।।

दक्षिण्गभागावस्थितं शकुनमाह—

छिक्करः पिक्कको भासः श्रीकंठो वानरो रुरुः।
स्त्रीसंज्ञकाः काकऋक्षश्वानः स्युर्दक्षिणाः शुभाः।।

उक्तव्यतिरिक्तानां मृगपक्षिणां सामान्यतः प्रादक्षिण्येन शकुनमाह—

प्रदक्षिणगताः श्रेष्ठा यात्रायां मृगपक्षिणः।
ओजा मृगा व्रजंतोऽतिधन्या वामे खरस्वनाः।।

अनुपदिकं तृतीयमपशकुनं नोल्लंघयेत्। तद्यथा—

आद्येऽपशकुने स्थित्वा प्राणानेकादश व्रजेत्।
द्वितीये षोडश प्राणांस्तृतीये न क्वचिद् व्रजेत्।।

शकुनवाणीविदो लोके शुभाशुभं विचिन्वन्ति। वृक्षाणां कुसुमक्षय ऋतोर्दोषोदयं प्रकटयति। सारांशस्त्वेष यत् गुरुणा विष्णुना कृतं जगत् सर्वाः विद्याः प्रत्यक्षवदुपदिशति, तस्माद् गुरुर्विष्णुरित्युक्तो भवति। वक्ति चरके पुनर्वसुरात्रयः—सर्वो हि लोको बुद्धिमतामाचार्यः शत्रुश्चाबुद्धिमताम्।

मन्त्रलिङ्गञ्च—

मन्त्रो गुरुः पुनरस्तु सो अस्मान् अनुमृक्षीष्ट तत्त्वं दुरुक्तैः।
ऋग्० १।१४७।४।।

यथेमां वाचं कल्याणीमावदानि जनेभ्यः। यजु० २६।२।।

स्वयम्भूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः। यजु० ४०।८।।

ऋचो अक्षरे परमे व्योमन् यस्मिन्०। ऋग्० १।१६४।३९।।

भवति चात्रास्माकम्—

गुरुर्हि विष्णुः स जगत् समस्तं
यथायथं न्यासितपादपद्मम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वेदोपदेशेन[१] गृणाति नित्यं
जगत् स्वयं वक्ति गुरोः कृतिं च।।२७३।।

'सहस्रशीर्षा पुरुष': इत्यादि मूलविज्ञापकम्। सर्वो वा वेदो लोकविद्याज्ञापकः। वेदवाण्यो वदन्ति यं गमयन्ति तद् ब्रह्म।

मन्त्रलिङ्गञ्च—

वदन्तीर्यत्र गच्छन्ति। अथर्व० १० ।८ ।३३।।

गुरुतमः—२१०

गुरुः शब्दो व्याख्यातः। गुरुरिति २०६ नामव्याख्याने। ***'अतिशायने तमबिष्ठनौ'*** (पा० ५।३।५५) सूत्रेणातिशयत्वे द्योतयितव्ये 'तमप्' इष्ठंश्च प्रत्ययौ विधीयेते। गुरुषु श्रेष्ठो 'गुरुतमः' इति। गुरुः प्रवक्ता वाचो निगरणकर्ता वा। सृष्ट्यादौ ज्ञानप्रवक्तॄणां हृदयेषु स एव सर्वं व्यश्नुवानो भगवान् विष्णुर्ज्ञानं प्रकाशयांचकार तस्मात् स ब्रह्मादीनामपि गुरूणां गुरुरित्युक्त्या 'गुरुतमः' उक्तो भवति।

उक्तं च—

अपूर्वेणेषिता वाचस्ता वदन्ति यथायथम् ।
वदन्तीर्यत्र गच्छन्ति तदाहुर्ब्राह्मणं महत्।। अथर्व० १० ।८ ।३३।।

पुरुषवाचि दोषस्य सद्भावो भवितुमर्हति। कुतः? समयप्रभावप्रभावित्वान्मनुष्योपदेशस्य। तस्मात् सा वाक् दैवी वाग्वत् त्रिकालैकरसा न भवितुमर्हतीति कृत्वा दैवी वागेवोपादातव्या भवति ।

उक्तं च—

अपक्रामन् पौरुषेयाद् वृणानो दैव्यं वचः ।
प्रणीतीरभ्यावर्तस्व विश्वेभिः सखिभिः सह।। अथर्व० ७ ।१०५ ।१।।

अत एतदुक्तं भवति **'स एष पूर्वेषामपि गुरुः कालेनानवच्छेदात्'** (योग० १।२६) तस्मात् स ज्ञानमात्रेण सर्वस्मिन् विश्वे व्यश्नुवानः सन् 'गुरुतमः' उक्तो भवति।

दृश्यते च लोके शकुनविदः कथनं सत्यं स्थिरं भवति। तच्च कथनं तावदुपस्थितवस्तुविषयं यावद् भवति। तस्माच्छकुनानि प्रतिपदं पठनीयानि भवन्ति। गुरुतमस्य ब्रह्मणो ज्ञानविदो ज्ञानं न मृषायते। इतरोऽपि गुरुरेतस्मादेव, अन्तर्निगरति निगलति

---

१. यदुक्तं वेदोपदेशेनेति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वा परम्। यथोक्तं भवति—सर्वे पदा हस्तिपदे निमग्नाः, हस्तिपादस्य गुरुतमत्वात्। एषैवावस्था भारे, आयामे उच्चत्त्वेऽपि च योजनीया भवति।

सर्वग्रहापेक्षया गुरुत्वाद् बृहस्पतिर्ग्रहो गुरुरुक्तो भवति। स विष्णुस्तमप्यन्त-र्लीनयति, तस्माद् गुरुतम उक्तो भवति।

भवति चात्रास्माकम्—

न कोऽपि तस्मादधिकोऽस्ति वक्ता
ज्ञानस्य [1]तज्ज्ञानमिहास्ति सृप्तम्[2]।
गुरुः स विष्णुस्तमपा [3]तिशेते
गुरुं ग्रहं चापि च विश्वमात्रम् ।।२७४।।

धाम—२११

'डुधाञ् धारणपोषणयोः' जौहोत्यादिकः। ***'नामन्सीमन् व्योमन् रोमन् लोमन्०'*** (उणादि० ४।१५१) इत्यादि सूत्रेण बाहुलकात् मनिनन्तोऽयं साध्यते। दधातीति 'धाम'=ब्रह्म।

मन्त्रलिङ्गञ्च—

प्र तद्वोचेदमृतस्य विद्वान् गन्धर्वो धाम परमे गुहा यत्। अथर्व २।१।२।।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।
ऋग्० १०।१२१।१।।

सूर्यो वा। मन्त्रलिंगं च—

सूर्य आत्मा जगतस्तस्थुषश्च। ऋग्० १०।११५।१।।

दधाति यत्रेति धाम=स्थानम्।

मन्त्रलिङ्गञ्च—

तस्मिन् ह तस्थुभुर्वनानि विश्वा। यजुः ३१।१६।।
तृतीये धामन्नध्यैरयन्त। यजुः ३२।१०।।

तस्मिन् धामात्मके ब्रह्मणीत्यवगन्तव्यम्। सामान्यतः स्थानपर्याये यद्धामशब्द-प्रयोगस्तदप्यसौ वेदेति कृत्वा धाम ब्रह्मोक्तं भवति।

मन्त्रलिङ्गञ्च—

धामानि वेद भुवनानि विश्वा। यजुः ३२।१०।।

---

१. तस्य गुरुतमस्य ज्ञानं तज्ज्ञानम्। २. इह=विश्वे। सृप्तं=व्याप्तम्। ३. तमप्—प्रत्ययेन।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

धामात्मकं ब्रह्म दधाति सर्वं
धामात्मके ब्रह्मणि विश्वमेतत् ।
ज्योतिर्हि सूर्यः स उ धाम उक्तः
विष्णुर्हि धामाश्नुत[1] एव सर्वम्।।२७५।।

सत्यः—२१२

सदव्ययम्। सदित्येतत् सद्भावे च प्रयुज्यते, प्रशस्ते कर्मणि च एव सच्छब्दः प्रयुज्यते। दम दाने, यज्ञे तपसि दाने च या स्थितिः स्थिरता सापि सच्छब्देनोक्ता भवति। यज्ञार्थीयं कर्म, तपसः साधनीभूतं च यत् कर्म दानार्थीयं च तत्रापि सच्छब्दः प्रयुक्तो दृश्यते।

यथा च गीतायाम्—

सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते ।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ।।२६।।
यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ।।२७।। अध्याय १७।।

अतो विपरीतमसत्। उक्तं च तत्रैव—

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत् प्रेत्य नो इह।।२८।।

सत्सु साधुः 'सत्यः' **तत्र साधुः** (पा० ४।४।९८) इत्यनेन 'यत्'। 'षद्लृ विशरणगत्यवसादनेषु' भौवादिकः, तस्मात् ***'सत्सुद्विष०'*** (पा० ३।२।६१) इत्यादिना विनाप्युपसर्गं 'क्विप्' प्रत्ययः, तेन 'सत्'। सत्सु साधुः 'सत्यः'। सर्वत्र विश्वे भगवान् स्थितिरूपेण सकलं चराचरं व्याप्य तिष्ठतीति कृत्वा 'सत्यः' स विष्णुरुक्तो भवति। स हि अभीद्धतपःस्वरूपः। तथा च वेदे—

ऋतं च सत्यं चाभीद्धात् तपसोऽध्यजायत। ऋग्० १०।१९०।१।।

प्रवाहतः सत्तावत्सु स एव साधुस्तस्मात् 'सत्यः' स उक्तो भवति।

---

१. अश्नुते व्याप्नोतीत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

जगत् समस्तं गतिमत् स्वरूपं
यज्ञात्मकं विश्वमिदं च तस्य ।
स तत्र यज्ञेऽविचलस्वरूपः
सत्यो ह्यतो विष्णुरिहास्ति गीतः ।।२७६।।

मन्त्रलिङ्गञ्च—

यः सुन्वते पचते दुध्र आचिद्वाजं दर्दर्षि स कितासि सत्यः।
अथर्व० २०।३४।१८।।

सत्यः सत्वा पुरुमायः सहस्वान्। अथर्व० २०।३६।१।।

श्रद्धया सत्यमाप्यते। यजु० १६।३०।

सत्येनोत्तभिता भूमिः। अथर्व० १४।१।१।।

अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः। ऋग् १।१।५।।

अचलं सत्यम्, इतो विपरीतमसत्यमनृतपर्यायकमुच्यते चलम्। राजा वरुणो जनानां सत्यानृतेऽवपश्यन् मध्ये याति।

मन्त्रलिङ्गञ्च—

राजा वरुणो याति मध्ये सत्यानृतेऽवपश्यन् जनानाम्।
अथर्व० १।३३।२।।

वरुणो विष्णुः, अत्र संग्रहे '**वरुणः**' इति नाम ५५३ श्लोके ७२ च संगृहीतम्।

सत्यपराक्रमः—२१३

सत्यः स्थिरः पराक्रमो यस्य स 'सत्यपराक्रमः'। भगवान् स्वकेनाविचलेन पराक्रमेण व्यवस्थया वा निखिलं जगद् व्यश्नुवानो विराजते, तस्मात् स 'सत्यपराक्रमः' उक्तो भवति। यद् यद् यथा यथा व्यवस्थितं तत् तत् तथैव सनादद्ययावत् तं सत्यपराक्रमं व्यनक्ति, तस्मात् स 'सत्यपराक्रम' उक्तो भवति।

मन्त्रलिङ्गञ्च—

'प्र मंहिष्ठाय बृहते बृहद्रथे सत्यशुष्माय[१] तवसे मतिं भरे।'
अथर्व० २०।१५।१।।

---

१. सत्यशुष्माय=सत्यपराक्रमाय।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

स सर्वजित् सत्यपराक्रमः स;
स्थिरं पराक्रान्तमिदं हि तेन।
नश्यत्सु सर्वेषु न नाशमेति
कृतं हि यत् सत्यपराक्रमेण ।।२७७।।

तद्यथा वटबीजेऽपरे वा बीजेऽविकृतेऽपरस्योत्पादनार्हा या व्यवस्था विहिता, सा सत्यरूपेण पराक्रान्ता यात्येवेति पराक्रमः सः। एवमन्यत्राप्यूहनीयं भवति।

निमिषः—२१४

'नि' विनिग्रहार्थे। 'मिष स्पर्धायाम्' तौदादिकः, तस्मात् ***'इगुपधज्ञाप्रीकिरः कः'*** (पा० ३।१।१३५) इत्यनेन 'कः' प्रत्ययः। निमिषतीति 'निमिषः' नियम्य मिषतीत्यर्थः। स्पर्द्धा=गुणोत्कर्षाय प्रयत्नः। भगवान् स्वकृते चराचरे विश्वे प्रतिपदार्थं गुण-धर्म-स्वभावान् नियम्य गुणोत्कर्षाधानाय पुनस्तेषां बहुविधतां कुरुते। एतेन निमिषत्वधर्मेण स सर्वं व्यश्नुवानः सन् 'निमिषः' इत्युक्तो भवति। यथा च मन्त्रे 'नि' विनिग्रहार्थे दृश्यते—**'न्यौषतादुदग्ने तिष्ठ'** (ऋग्० ४।४।४) न्यौषतात् नियम्य दहेत्यर्थः। उष दाहे धातुः।

भवति चात्रास्माकम्—

नियम्य विश्वं सकलं विधाता
गुणोच्चिकीर्षु[1]र्जगदातनोति ।
एकं ह्यनेकं विदधन्निमेषं[2]
निमेषमात्रः[3] स बिभर्त्ति विष्णुः।।२७८।।

मन्त्रलिङ्गञ्च—

सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि।
नैनमूर्ध्वं न तिर्यंचं न मध्ये परजिग्रभत्।। यजु० ३२।२२।।

किंचित् प्रसंगप्राप्तमुंच्यते। चक्षुर्निमीलनमात्रः कालोऽपि निमेष उच्यते। तद्यथा—

''अष्टादश निमेषास्तु काष्ठा'' काष्ठामानस्याष्टादशांशो निमेष इति।

---

१. उच्चिकीर्षुः=गुणोत्कर्षमादिधापयिषुरित्यर्थः। २. निमेषम्=नियतस्पर्द्धम्। ३. निमेषमात्रः=नियन्त्रितस्पर्द्धामात्रः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

संख्याता अस्य निमिषो जनानाम्। अथर्व० ४।१६।५।।

यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव।।

अथर्व० ४।२।२।।

अनिमिषः—२१५

नास्ति निमिषा स्पर्द्धा अस्येति 'अनिमिषः' स विष्णुः। एतेन विज्ञाप्यते सर्वव्यापको विष्णुरेक एव नानारूपतां गतो, न तस्य कश्चिदस्ति प्रतिस्पर्द्धी द्वितीयः।

मन्त्रलिङ्गञ्च—

संक्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत् साकमिन्द्रः।

अथर्व० १६।१३।२।।

मित्रः कृष्टीरनिमिषाभि चेष्टे।। ऋग्० ३।५६।१।।

न तस्य प्रतिमा अस्ति यस्य नाम महद् यशः। यजु० ३२।३।।

महद् यशश्च विष्णोर्नामनी स्तः परिगणिते चात्रैव सहस्रनाम-संग्रहे। प्रतिमा=प्रतिमानं प्रतिस्पर्द्धात्मकम्।

भवति चात्रास्माकम्—

विश्वं विधत्ते स जगद्यथार्थं[1]
न कोऽपि तं स्पर्द्धयितुं क्षमोऽस्ति।
स एव विश्वेऽनिमिषः पुराण-
स्तमेव विष्णुं कवयन्ति वेदाः।।२७६।।

स्रग्वी—२१६

'सृज विसर्गे' तौदादिकः, तस्मात् कर्मणि 'क्विन्' अमागमश्च निपातनात्। ***'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च'*** (पा० ३।२।५६)। सृज्यत इति स्रक् जडचेतनात्मकं जगत्, तदस्यास्तीति स्रग्वी। मतुबर्थे ***'अस्मायामेधास्रजो विनिः'*** (पा० ५।२।१२१) इत्यनेन 'विनिः' प्रत्ययः क्रियते। तदेतत्तारकितं नभो विविधविन्या-सन्यस्तं यं व्यनक्ति शोभयति, विशिनष्टि वा तं कवयः 'स्रग्विणं' विष्णुमाहुः।

१. यथार्थम्=यथापूर्वं क्लृप्तं तथैव प्रतिकल्पं कुरुते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'सूत्रं सूत्रस्य यो विद्यात् ब्राह्मणं महत्' (अथर्व० १०।८।३), तथा च—**'स ओतः प्रोतश्च विभूः प्रजासु'** (यजु० ३२।८)।

यथा सूत्रे प्रोतानि पुष्पाणि मालेति संज्ञां लभन्ते, एकतां च भजन्ते, स्वानि नामानि परित्यज्य स्त्रजिति नाम बिभ्रति, तथैव विविधमिदं दृश्यमानं जगत् तस्मिन् विभ्वात्मके सूत्रे ग्रथितं सदेकनीडतां प्राप्नोति। तदेतत् सर्वं तद् ब्रह्म शोभयति। तस्मात् 'स्त्रग्वी' विष्णुरुक्तो भवति।

मन्त्रलिङ्गञ्च

इयं विसृष्टिर्यत आबभूव यदि वा दधे वा न। ऋक् १०।१२६।७।।
वेनस्तत् पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम्[1] ।
तस्मिन्निदं सं च विचैति सर्वं स ओतः प्रोतश्च विभुः प्रजासु।।
यजु० ३२।८।।

यथा विविधकर्मप्रसक्ता नराः कश्चिन्न्यायाधीशः, कश्चित् प्रधानमन्त्री कश्चिद् रक्षापुरुषः कश्चित् प्रहरिक इति बहिः सविशेषा अपि रात्रौ गृहं प्राप्यैकतामाप्नुवन्ति विशेषतां विहाय, तथैवेदं विश्वं तस्मिन्नेकतां प्राप्नोति पुष्पाणि मालामिव।

भवति चात्रास्माकम्—

अनन्तपारं विविधस्वरूपं
सूत्रे शिवे[2] संग्रथितं समस्तम्।
तं स्त्रग्विणं विष्णुमुदात्तभासं
शोभायमानं कुरुते प्रकामम् ।।२८०।।

इतरोऽपि स्त्रग्व्येतस्मादेव मालाधारणेन सामान्यजनेभ्योऽतिरिच्यते। सम्मानयितुं परिधापिता मालाः परिधातारं पुष्पहासेन प्रसादेनौजसा च योजयन्ति। पुष्पहासो हि भगवतो नाम, भगवतो गुणानाधापयितुमेव मालकाभिरुद्वर्ध्य विशेषयन्ति।।

वाचस्पतिरुदारधीः—२१७

चतुर्विधसृष्ट्यां व्यक्ताव्यक्तरूपाया वाचः पति'र्वाचस्पतिः'। सर्वेषां हृदयस्थानि सुखान्वितानि दुःखान्वितानि वा व्यक्ताव्यक्तवचांस्यधिगत्य तेषां पालनं रक्षणं कुरुत इति कृत्वा 'वाचस्पति' रुक्तो भवति। सर्वेषां हृदिस्थः सन् रक्षणधर्मेण सर्वं व्यश्नुवानः संश्च वाचस्पतिर्विष्णुरुक्तो भवति।

१. एकनीडम्=एकात्मकम्। २. शिवेति विष्णोर्नामसु संगृहीतमत्रैव।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

वाचस्पतिर्बला तेषां तन्वोऽद्य दधातु मे। अथर्व० १।१।१।।

उपहूतो वाचस्पतिरुपास्मान् वाचस्पतिर्ह्वयताम्। अथर्व० १।१।४।।

भवति चात्रास्माकम्—

स भूतमात्रस्य हृदन्तरस्थो
निशम्य वाचः परिपाति सर्वान् ।
बलान्वितान् हीनबलान् विधत्ते
हीनानलक्ष्येण च पाति नाम्ना ।।२८१।।

वाचो विद्यायाः पति'र्वाचस्पति'रित्यपि भवति। मन्त्रलिंगं च—

वाचस्पतिर्वाचं नः स्वदतु। यजु० ६।१।।

भवति चात्रास्माकम्—

वाचस्पतिर्वाचि विराजमानो
वाचा[1] जगच्छास्ति च निर्विकल्पः ।
वाचं स सर्वेषु निधाय विश्वं
व्याप्नोति तस्मात् स हि विष्णुरुक्तः।।२८२।।

मन्त्रलिङ्गञ्च—

अपूर्वेणेषिता वाचस्ता वदन्ति यथायथम्।

वदन्तीर्यत्र गच्छन्ति तदाहुर्ब्राह्मणं महत् ।। अथर्व० १०।८।३३।।

यदुक्तमलक्ष्येण नाम्ना, तत्र सन्ति बह्व्य इतिहासप्रसिद्धाः कथाः, या वैष्णवीं परिपालन-धर्मान्वितां शक्तिं व्यञ्जन्ति। प्रत्यहं च तादृश्यः घटना दृश्यन्ते श्रूयन्ते च, याभिः स एव पातेति निश्चीयते।

ऐषमस्तने काले घटितमुच्यते—कूपं खनत्सु कूपकुड्यनिपतनाद् बहूनां मरणमभूत्, परन्तु तत्रैकः कयाचिच्छक्त्याकृष्य परिरक्षितस्तं जीवयितुं गोरूपेण मृत्तिकाधो दुग्धं पाययति स्म। मृत्तिकापनयने लब्धावकाशेन तेन सर्वमात्मवृत्तं त्रयाणां चतुर्णां वा दिनानामाभाषितं, प्रमाणरूपेण च सद्यस्को गोमयश्च दर्शितः।

उदारः—'उद् आङ् चोपसर्गौ' 'ऋ गतिप्रापणयोः' भौवादिकः, 'ऋ गतौ' जौहोत्यादिकः, तस्मात् "अप्" प्रत्ययः **'ऋदोरप्'** (पा० ३।३।५७)। ऋच्छति, इयर्तीति 'अरः', उत्कृष्टमासमन्तादर्यते प्राप्यत अस्मिन्नि'त्युदारः'। 'ध्यै चिन्तायाम्'

१. वाचा=वेदवाचा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भौवादिकः, तस्मात् क्विप् सम्प्रसारणं च कृत्वा ***'हलः'*** (पा० ६।४।२) इति दीर्घः। ध्यायते चिन्त्यतेऽनयेति 'धी' बुद्धिर्बोधनं वा। उत्कृष्टतमा सर्वार्थविषया बुद्धिर्यस्य स—'उदारधीः'। मन्त्रलिङ्गञ्च—

कविर्मनीषी परिभूः स्वयम्भूः। यजु० ४०।८।।

न त्वदन्यः कवितरो न मेधया धीरतरो वरुण स्वधावन्।।

अथर्व० ५।११।४।।

देवस्य पश्य काव्यं न ममार न जीर्यति। अथर्व० १०।८।३२।।

भवति चात्रास्माकम्—

उदारधीर्विष्णुरुदारबोधो
विश्वं प्रियं ज्ञानमयं विधत्ते।
पश्यन्ति तं काव्यधियं पुराणं
न तत् परोऽन्यः कविरस्ति लोके।।२८३।।

इति पृथक्-पृथक् नाम्नी व्याख्याते, वाचस्पतिरुदारधीरित्येकं सविशेषणं नाम मत्वापि व्याख्यायते गणनायाः सहस्रत्वेऽस्य परिपालनाय। वाचस्पतिश्चासावुदारधीश्चेति। तत्र बाहुलकात् प्रथमाया अलुङ् मन्तव्यः, गुणसंज्ञापनस्य प्राधान्यात्। पार्थक्येन कृता व्याख्या न विहन्यते समस्तं नाम मत्वापि।

❖ ❖ ❖

अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः।
सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात्।।३७।।

२१८ अग्रणीः, २१९ ग्रामणीः, २२० श्रीमान्, २२१ न्यायः, २२२ नेता, २२३ समीरणः। २२४ सहस्रमूर्धा, २२५ विश्वात्मा, २२६ सहस्राक्षः, २२७ सहस्रपात्।।३७।।

अग्रणीः—२१८

अग्रे नयती'त्यग्रणीः'। 'णीञ् प्रापणे' भौवादिकः, इह प्रापणं गमनांगं भवति। अग्रे नयति प्रापयति गमयतीत्'यग्रणीः'।

'सत्सूद्विष०' (पा० ३।२।६१) इत्यादिना 'क्विप्' प्रत्ययः। ***'अग्रग्रामाभ्यां नयतेरुपसंख्यानम्'*** इत्यनेन वार्तिकेन 'णत्वम्'। सर्वं चराचरमग्रेनयति तस्मात् स विष्णुः सर्वत्रा'ग्रणी' रूपेणात्मसत्तां प्रकाशयन्नग्रणीरुक्तो भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्यैवाग्रणीनामधरस्य विष्णोः शक्त्या विधानेन वा सूर्यादयो ग्रहा यथाराश्यग्रे गमनाय प्रापिता भवन्ति। एवं मनुष्याः इतरप्राणिनश्च नित्यमभीष्टाप्तयेऽग्रेऽग्रे प्राप्यन्ते, चेष्टां नीयन्ते इति वा'ग्रणीः'।

ग्रहाणामष्टधा गतिस्तज्ज्ञैरुक्ता। तद्यथा—

वक्रानुवक्रा कुटिला मंदा मंदतरा समा ।
तथा शीघ्रतरा शीघ्रा ग्रहाणामष्टधा गतिः।। सूर्यसिद्धान्ते।।

अष्टधागतेः कारणं होरानुभवदर्पणे—

अर्कयुक्तश्चोदयः स्याद् द्वितीये शीघ्रगो भवेत्।
रवेस्तृतीये समता गतिर्मन्दा चतुर्थके ।।
पंचमेऽप्यथवा षष्ठे किंचिद् वक्रा च वक्रगा ।
सप्तमाष्टमयोरर्कादतिवक्रा गतिर्भवेत् ।।
नवमे दशमे भानोः खेटानां कुटिला गतिः ।
एकादशे द्वादशे च शीघ्रा शीघ्रतरा क्रमात् ।।
रविसंयुक्तखेटस्य गतिरस्ताह्वया भवेत्।

ग्रहानुकूलगतेरिव लोकेऽपि विविधगतिमत्ता दृश्यते, परन्त्वग्रेगतित्वं न विहन्यते।

मन्त्रलिङ्गञ्च—

तद्धावतोऽन्यानत्येति । यजु० ४० ।४।।
[१]**अग्रेणीरसि स्वावेशः।** यजु० ६ ।२।।
तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः। ऋग्० १० ।९० ।७।।
स त्वं नो देव मनसा वायो मन्दानो अग्रियः। ऋग्० ८ ।२६ ।२५।।

संक्षेपत इदं ज्ञातव्यं यन्न कश्चित् किंचिद् वा यातं क्षणं पुनः प्राप्तुं शक्नोति अग्रणीगुणवान् विष्णुरग्रणीरूपधर्मेण सकलं विश्वं व्याप्नुवन् सनात् कालादद्य क्षणं यावदग्र एव नयतीति सन् स विष्णु 'रग्रणी'रुक्तो भवति।

अग्निरप्यग्रणीरुच्यते, अग्रं यज्ञेषु नीयत इति यतः।

तदर्थे मन्त्रलिङ्गञ्च—

अग्निमीडे पुरोहितं यज्ञस्य। ऋग्० १।१।१।।

---

१. अग्रेणीः=अग्रणीरिति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

यदत्र किंचिद्विभुनास्ति सृष्टं
तदग्र एवानयतेऽग्रणीः सः ।
ग्रहैः समां [1]यातिमुपैति विश्वं
यथागमं[2] विष्णुरनक्ति[3] चाग्रे।।२८४।।

ग्रामणीः—२१६

ग्रामं नयतीति 'ग्रामणीः'। क्विप् णत्वेऽग्रणीवत्। ग्रामः=समूहः। यथा च लोके गृहाणां समूहो ग्राम उच्यते, तथैवेन्द्रियाणां समूह इन्द्रियग्राम उच्यते। वाद्येष्वपि स्वरसमूहमधिकृत्य मन्द्र-मध्य-तारभेदेन त्रयः स्वरग्रामा उच्यन्ते।

यथा च नारदीयशिक्षायाम्—

सप्त स्वरास्त्रयो ग्रामा मूर्च्छनास्त्वेकविंशतिः।
ताना एकोनपंचाशदित्येतत् स्वरमण्डलम् ।।

चराचरग्रामं, लोकलोकान्तरग्रामं, भूतग्रामं वा नयतीति कृत्वा 'ग्रामणीः' विष्णुरुच्यते।

यथा भगवान् सर्वं समुदितं नयति, तथैवायं जीवोऽपि स्थानान्तरं गच्छन् सर्वांगसमुदितं शरीरं नयति। एषैव व्यवस्था सर्वत्र व्याप्ता दृश्यते। 'ग्रामणीः' नामवतो विष्णोरेषा व्यवस्था सनात् कालादद्य यावदक्षुण्णायाति, कल्पान्तं चामुथैव यास्यति।

मन्त्रलिङ्गञ्च—

ग्रामणीरसि ग्रामणीरुत्थायाभिषिक्तोऽसि०। अथर्व० १६।३१।१२।।

भवति चात्रास्माकम्—

स ग्रामणीर्विश्वमिदं समस्तं
समूहरूपेण नयन् बिभर्ति ।
[4]विश्वं वपुस्तस्य यतोऽस्ति विष्णोः
सर्वांगमात्रं नयते स एकः।।२८५।।

---

१. यातिं=गतिम्। २. यथागमं=यथामार्गम्। ३. अनक्ति=नयति। ४. यदुक्तं विश्वं वपुस्तस्येति, तत्र मन्त्रलिंगं च—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीमान्—२२०

'श्रिञ् सेवायां' भौवादिकः, ***'क्विब्वचिप्रच्छिश्रिस्त्रुद्रुप्रुज्वां दीर्घोऽसंप्रासरणं च'*** (उणा० २।५७)। श्रयति श्रयते वा श्रीः, ईश्वररचना शोभा वा। श्रीयतेऽसौ यथेष्टार्थाभिलिप्सुभिरिति श्रीः, सा श्रीरस्यास्तीति 'श्रीमान्' विष्णुः। प्रतिप्राणि या श्रीः=शोभा कान्तिर्वा सा तमेव कान्तिमन्तं विष्णुं व्यनक्ति। अनेनैव विधिना प्रतिवृक्षं, प्रतिपुष्पं, प्रतिपर्वतं, प्रतिनदं, प्रतिस्रवं, प्रतिजलाशयं, प्रतिनक्षत्रं, प्रतिसूर्यादिग्रहं, प्रतिमनः, प्रतिज्ञानं, प्रतिस्वरं या श्रीः शोभा दृश्यते, सा श्रीस्तदव्यवस्थातारं परमेश्वरमेव व्यनक्ति। अतः स भगवान् शोभारूपेण सर्वत्र विराजमानः सन् 'श्रीमान्' उक्तो भवति।

मन्त्रलिङ्गञ्च—

श्रीश्च ते लक्ष्मीश्च पत्न्यौ। यजुः ३१।३२।।

त्वमग्ने सुभृत उत्तमं वयस्तव स्पार्हे वर्ण आ सदृशि श्रियः।

ऋग्० २।१।१२।।

यथा च लोके पत्नी पतिं व्यनक्ति, पतिश्च पत्नीं व्यनक्ति, दम्पती परस्परं श्रीमान् श्रीमती वोच्येते, अमुथैवैषा शोभा कर्तारं व्यनक्ति, शोभया व्यक्तीकृतः सन् स विष्णुः शोभावान् श्रीमान् वोक्तो भवति।

'श्रीश्च ते लक्ष्मीश्च पत्न्यौ' इति मन्त्रे समानरूपेण निर्दिष्टे श्रीः लक्ष्मीश्च पदे पत्नीविशेषणविशिष्टे समानार्थके मत्वा लक्ष्मीर्विष्णोः पत्नीति प्रतिमुखं प्रसिद्धं सत् लक्ष्मीवान् विष्णुरित्युक्तं भवति। तत्रापि च ***'लक्षेर्मुट् च'*** (उणा० ३।१६०) लक्षेर्धातोरीः प्रत्ययो भवति मुडागमश्च। 'लक्ष दर्शनांकनयोः' चौरादिकः, लक्ष्यं क्षयति दर्शयत्यंकयति सा लक्ष्मीः=श्रीः।

यस्य भूमिः प्रमान्तरिक्षमथोदरम् ।
दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य सूर्यश्चक्षुश्चन्द्रमाश्च पुनर्णवः ।
अग्निं यश्चक्र आस्यं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य वाताः प्राणापानौ चक्षुरंगिरसोऽभवन्।
दिशो यश्चक्रे प्रज्ञानीस्तस्मै ज्येष्ठाय ब्रह्मणे नमः।।

अथर्व० १०।७।३२-३४।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथवा-लक्ष्यते दृश्यते नीयते वा तत्त्वविद्भिः सा लक्ष्मीः, भगवतो विभूतिर्वा। श्रीर्लक्ष्मीश्च, लक्ष्मीः श्रीश्च तमेव शोभावन्तं विभूतिमन्तं विष्णुं व्यक्त इति कृत्वा लक्ष्मीवान्, लक्ष्मीपतिर्वा विष्णुरुक्तो भवति। अनेनैव विधिना श्रीपतिः, श्रीशः, श्रीमान् वा विष्णुरुक्तो भवति।

श्री-लक्ष्मी-शब्दौ धनपर्यायावपि दृश्येते। तद्यथा श्रीसूक्ते—

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम्।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ।।२।।
अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ।।३।।

तत्रैव श्रीसूक्ते पत्नीमधिकृत्य लक्ष्मीप्रयोगः—

विष्णुपत्नीं क्षमां देवीं माधवीं माधवप्रियाम् ।
लक्ष्मीं प्रियसखीं भूमिं नमाम्यच्युतवल्लभाम्।।१५।।

प्रियसखीं=श्रियमिति। प्रियः समानः ख्यानो यस्याः, तां प्रियसखीम्, सपत्नीत्वात्। **'श्रीश्च ते लक्ष्मीश्च पत्न्यौ'** यजुष्युक्तत्वात्। श्रीसूक्तं लक्ष्मीसूक्तं वा समानार्थं उक्तं भवति।

इति दिङ्मात्रमुक्तम्। विशेषजिज्ञासुभिः ऋग्वेदीयं श्रीसूक्तं पौनःपुन्येन पठनीयम्।

अत्र श्रीमानिति नामव्याख्याप्रसंगेन—लक्ष्मीवान्, श्रीशः, श्रीपतिः, श्रीनिवास एतेऽपि व्याख्याता भवन्ति। श्रियो निवासो यस्मिन्नस्मिन् वा श्रीनिवासो भगवान् विष्णुः।

मन्त्रलिङ्गञ्च—

पर्जन्य इव ततनद्धि वृष्ट्या सहस्रमयुताददत्। ऋग्० ८।२१।१८।।
तस्मिन् ह तस्थुर्भुवनानि विश्वा। यजुः ३१।१६।।
यस्मिन् विश्वानि भुवनानि तस्थुः। ऋग्० ७।१०१।४।।

भवतश्चात्रास्माकम्—

श्रीमान् स उक्तो भगवान् वरेण्यः
श्रिया जगद्व्याप्तमिदं समस्तम्।
सा श्रीरजस्त्रं विभुमद्वितीयं
वृणोति लक्ष्मीश्च तथैव तद्वान्।।२८६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स श्रीपतिः श्रीश उ श्रीनिवासः
शोभापतिर्भूतिपतिस्तथैव ।
स जातवेदा विधिवद् वृतः सन्
युनक्ति लक्ष्म्या पुरुषं स्तुवन्तम्।।२८७।।

न्यायः—२२१

'णीञ् प्रापणे' भौवादिको, नीयतेऽनेनेति 'न्यायः'। ***अध्यायन्यायोद्याव०*** (पा० ३।३।१२२) इत्यादिना 'घञ्' प्रत्ययो निपात्यते। ***'पुंसि संज्ञायां घः प्रायेण'*** (पा० ३।३।११८) इति प्राप्तस्य घस्यापवादः। नीयते प्राप्यते यथाकृतव्यवस्थं सकलं जगदिति स 'न्यायो' भगवान् विष्णुरित्युक्तो भवति।

भगवतो न्यायस्य योऽयं क्रमः स लोकेऽपि दृश्यते। तद्यथा—यन्त्रारूढो यन्त्राधिपतिर्यन्त्रचालकेन नियन्त्रितमपि यन्त्रं स्वकेन निर्देशनेन यथाभिमतं स्थानं प्रापयति तद् यन्त्रम्। यन्त्रारूढः स यन्त्रपतिर्न स्वयं यानचालनादिकं कर्म विदधाति, परन्तु गन्तुमर्हेण संकल्पेन संक्लृप्तः सन् स यानं प्रापयति, यत्रासौ नेता यातुमिच्छति। तेन वा संकल्पक्लृप्तेन संकल्प्त्रा तत् संचालकं यन्त्रं नीयते यथाभिमतं स्थानं प्राप्यते इति कृत्वा स यन्त्राधिपति 'न्यायः' उक्तो भवति।

अनेनैव प्रकारेण विश्वयन्त्रमिदं सूर्यादिभिर्नक्षत्रात्मकराशिमार्गेण यथाभिमतं न्यायेन विष्णुना सनात् कालादद्य यावन्नीयते कल्पान्तं च नेष्यते। एषा हि तस्य न्यायस्य व्यवस्थानुपदं दृश्यते।

तद्यथा—समनस्केन्द्रियग्रामसमूढं शरीरं शरीराभिमान्यात्मा स्वयमदृश्योऽपि संकल्पक्लृप्तं स्थानं यावच्छरीरं गमयति, प्रापयतीत्यर्थः। तत्र या याः स्थूलांगशरीरनिष्ठाः पृथक्-पृथक् क्रिया दृश्यन्ते, यथा—पादौ गतिं धत्तश्चक्षुषी पश्यतः, नासे जिघ्रतः, कर्णौ शृणुतः, वाक् व्यक्तं शब्दं वक्ति, त्वक् स्पर्शं गृह्णाति, हस्तौ दानादाने कुरुतः, श्वासप्रश्वासा जीवयन्ति, मनः शुभाशुभं मनुते, पायुस्त्याज्यं त्यजति, शिश्नं मूत्रशुक्रयोः प्रसेकं कुरुते, शरीरांगप्रत्यंगानि परस्परं प्रत्यंगमुपकुर्वन्ति, तास्ताः सर्वाः क्रिया यथाव्यवस्थं जीवेन कार्यन्ते, परन्तु नासौ जीवो मृल्लोष्ठवददृश्यते। अतः स जीवोऽपि 'न्याय' इव शरीरस्यास्य न्यायः। स्वाभीष्टार्थस्य सिद्धये शरीरस्य नायकः प्रापको वेत्युक्तं भवति।

यथास्य शरीराभिमानिनो न्यायस्येन्द्रियाणि साधकानि भवन्ति, तथैवास्यानन्त-शक्तिमतो न्यायस्य विष्णोः कृत्तिकादीनि नक्षत्राणि सूर्यादयो नव प्रधानग्रहाश्च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जगद्यन्त्रं भगवन्तमभीष्टं प्रापयितुं पृथक्-पृथक् गत्या गुणेन वा विनियुक्ताः सन्तो नयन्ति। ते च सनक्षत्रग्रहास्तेन विष्णुना नीयन्ते प्राप्यन्तेऽतो 'न्यायो' नाम विष्णुः स्वकं न्यायं गुणं जगति व्याप्नुवन् न्याय इति नाम्नोक्तो भवति।

पुरुषोऽयं लोकसम्मितः (चरके शारीर स्थाने अध्याय-५, गद्य-३) इति चर्षिभिः सिद्धान्तितम्। तथा पुरुषशरीरे सूर्यः चक्षुषी, चन्द्रमा मनः, अश्विनौ श्वासोच्छ्वासौ प्राणापानौ वा, इत्यादिरुन्नेयं ग्रन्थान्तरात्। अथर्ववेदस्यैकादशकाण्डस्य सप्तमं सूक्तं पुनः पुनः पर्यालोचनीयं शारीरसौक्ष्म्यं जिज्ञासुभिरिति।

योऽयं तर्कपर्यायो 'न्यायः' इति लोकप्रसिद्धः, सोऽप्यत एव। न्याये तर्केण यथातथा नीयते प्राप्यतेऽतः स 'न्यायः' एक एव सन्नपि निजावान्तर्भेदैः प्रत्यक्षानुमानोपमानादिभिर्विभिद्यते। तस्य बोधकं शास्त्रमपि न्यायशास्त्रमिति प्रसिद्धम्।

मन्त्रलिङ्गञ्च—

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।
दिवं च पृथिवीं चान्तरिक्षमथो स्वः ।। ऋग् १० ।१६० ।३ ।।
याथातथ्यतोऽर्थान् व्यदधात् शाश्वतीभ्यः समाभ्यः। यजुः ४० ।८ ।।
य उदानट् परायणं य उदानण् न्यायनम्।
आवर्तनं निवर्तनं यो गोपा अपि तं हुवे ।। अथर्व० ६ ।७७ ।।१ ।।

भवति चात्रास्माकम्—

न्यायेन विश्वं परितोऽस्ति नीतं
न्यायः स्वयं नो क्रमते कुतश्चित्।
स सर्वव्याप्तो न कुतश्चनोनः
सनातनो न्याय इहास्ति विष्णुः ।।२८८।।

नेता—२२२

'णीञ् प्रापणे' भौवादिकः, तस्मात् सामान्येन ***'ण्वुल्तृचौ'*** (पा० ३ ।१ ।१३३) सूत्रेण 'तृच्' प्रत्ययः। नयतीति 'नेता' पथप्रदर्शकः, अभीष्टस्य प्रापयिता वा। सर्वस्मिन् जगति स विष्णुः सर्वं नयति यथाव्यवस्थं गमयति प्रापयतीति कृत्वा स 'नेता' इति नाम्नोक्तो भवति। यो हि मनुष्यो नेतारं देवं नेतृगुणेन सर्वत्र वर्तमानं स्मरति, जगति च तद्व्यवस्थां पश्यति, स नूनं नेतृगुणेन युक्तः सन्नन्यान् अतिशेते तिरस्करोति वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् ।

विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा।। यजु० ४।८।।

सारांशः—सर्वं जगत् विविधविकल्पनानुस्यूतं नयति यथायथम् व्यवस्थां प्रापयतीति कृत्वा नेता स विष्णुर्देवः। 'देवस्य नेतुः' मन्त्रनिर्देशात्।

यः सूर्य य उषसं जजान यो अपां नेता स जनास इन्द्रः।।

अथर्व० २०।३४।७।।

इन्द्र एषां नेता।। अथर्व० १६।१३।६।।

स नो नेता वाजमा दर्षि भूरिम्।। अथर्व० २०।७७।८।।

नेतृत्वाय प्रार्थनाश्चापि श्रूयन्ते—

अग्ने[१] नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्।

युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम ।।

यजु० ५।३६।।

भवति चात्रास्माकम्—

यदत्र किंचिद्भुवि दृश्यमानं
नेत्रास्ति सर्वं पथि नीयमानम्।
स एव नेता सकलस्य लोके
यतः स विष्णुर्वयुनानि वेद।।२८६।।

समीरणः—२२३

'सम्' इति सम्यगर्थे, एकीभावेऽर्थे वाव्ययम्। 'ईर गतौ कम्पने चे' ति दैवादिको धातुः, ततस्तच्छीलाद्यर्थे ***'चलनशब्दार्थादकर्मकाद्युच्'*** (पा० ३।२।१४८) इति सूत्रेण 'युच्' प्रत्ययः, योरनः णत्वं='समीरणः' इति सिध्यति। यद्वा-ण्यन्तादीरि धातोः ***'ण्यासश्रन्थो युच्'*** (पा० ३।३।१०७) इति सूत्रेण स्त्रीविशिष्टे भावे युचि, योरनि, णत्वे, टापि च 'ईरणा' इति सिध्यति। समीचीना ईरणा यस्य स 'समीरणः' इति।

---

१. अग्निरिति विष्णोः सहस्रनामसंग्रहे नाम संगृहीतमस्ति। अग्ने! देव! विद्वान्-इति पदनिचयो व्यापकं विष्णुमेव द्योतयति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एवञ्च सम्यक् चेष्टते हिताय सर्वस्य जगतः, सम्यगीरयति=कम्पयति इति 'समीरणः' उक्तो भवति भगवान् विष्णुः। समीचीना जगद्धितचेष्टा च भगवतः कथं केन वा पथा गच्छतो जीवस्य ससुखं सकलमायुर्व्यतीयादिति स्वसत्यज्ञानरूप-वेदोपदेशस्य प्राणिभ्यः प्रदानं, तथा तज्जीवनाय यथाकालोपयुक्तसाधनाना-ञ्चोत्पादनम्। प्रतिप्राणि तच्छरीरसंघटना तादृशी विहिता भगवता, यथासौ प्राणी स्वजीवने जीवनार्हभोगोपभोगे काञ्चिन्न्यूनतान्नानुभवेत्।

तथा च भगवता समीरणेन सर्गारम्भे यद्वस्तु यद्रूपेण प्रवर्तितं, तद्वस्तु तद्रूपेणैवेदानीं पर्यन्तं प्रवर्त्यते, कल्पान्तं तदेकरूपेणैव च प्रवर्तयिष्यते। यथा सर्वेषां प्राणिनां द्विरदोत्पत्तिः रदाः=दन्ताः। प्रतिमनुष्यं समानसंख्याका द्वात्रिंशद् रदा भवन्ति। अनेकशफवतां पशूनां दन्तपंक्तिः समानरूपेणैकविधैव भगवता समीर्यते=प्राप्यत इति। यथाकालमाम्रवृक्षेषु सर्वत्र सर्वदा स समाना एव मञ्जरीरुत्पादयति। लतागुल्मक्षुपेषु सर्गादिदमेव रूपमविकृतमायाति, कल्पान्तञ्च तदेव स्थास्यति।

भयरागहर्षद्वेषादीनामुद्भवस्थानं हृदयं, तस्मिन्नेव सकलप्राणिनां भयहर्षराग-द्वेषादीनां समुद्भवः समानरूपेण दृश्यते। येयमविचला भागवती व्यवस्था सनादायाति, तस्या व्यवस्थापको भगवान् विष्णुरेव तद्व्यवस्थायाः स्पष्टप्रकाशाय 'समीरणः'इति नाम्नोच्यते।

अमुथैव सूर्यादयो ग्रहा अपि यथाव्यवस्थमेकीभावेनेरिताः सन्तो जगद्धारयन्ति। नह्येकोऽपि ग्रहः स्वां गतिं जहाति। एवं समुद्रोऽपि यथानियतमुत्तुङ्गा वीचीराप्नोति। इति दिङ्मात्रमुक्तं, सुधीभिर्विविधमुन्नेयं जगति बोभूयमानं कर्मावलोक्य।

मन्त्रलिङ्गञ्च—

यानावह उशतो देव देवांस्तान् प्रेरय स्वे अग्ने सधस्थे।

अथर्व० ७।१०२।३।।

प्राणेनाग्ने चक्षुषा संसृजेमं समीरयतन्वा संबलेन। अथर्व० ५।३०।१४।।

भवति चात्रास्माकम्—

समीरणो विष्णुरनन्तकर्मा
समीरयन्नेति जगत् समस्तम्।
सनात् स्वकां पालयति व्यवस्थां
समीरणो विष्णुरिहास्त्यतः सः।।२६०।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सहस्रमूर्धा—२२४

'सहस्र' शब्दो बहुपर्यायः, मूर्धा=शिरः। भगवतः ***'शीर्ष्णो द्यौ समवर्तत'*** (अथर्व० १९।६।८) इति। द्यवि सूर्यादीनां प्रकाशवतां स्थानम्। अत एव च प्रतिप्राणि मूर्धन्येव ज्ञानेन्द्रियाणां निचयः कृत आस्ते। तेन भगवता स्वात्मनोऽनन्तज्ञानवत्त्वं ज्ञापयितुं नभश्चराणां, जलचराणां, भूचराणां च प्राणिनामसंख्यातभेदवतां पृथक् पृथगाकृतिमतां शिरसां विकल्पनं कृतम्। तेषां यथावश्यकमाकारवतामिन्द्रियगोलकानां च निर्माणं कृतमास्ते। एतेन ज्ञायते यत् ते प्राणिनः प्रतिपदं भिन्नं-भिन्नं ज्ञानं स्वात्मन्यधिष्ठापयन्ति। विविधविकल्पवत्त्वं शिरसां रूपं विविधानन्तज्ञानवन्तं भगवन्तं प्रतिपदं विज्ञापयन्ति। सैषा व्यवस्था सनात् कालादद्य यावद् विकारमन्तरा याति कल्पान्तं चाविकृता यास्यति। तस्मात् स सनातनो विष्णुः 'सहस्रमूर्धा' 'सहस्रशीर्षा' वोच्यते।

लोकेऽपि च पश्यामः—अनेकविधज्ञानविज्ञानवान् कुशलधीः पुरुषः स्वकं ज्ञानं विज्ञापयितुं प्रकाशयितुं वा विविधयन्त्राणां कर्मणां वा प्रकाशं करोति। न ह्येकस्मिन्नेव कर्मणि यन्त्रे वा सर्वा विद्याः प्रकाशयितुं शक्यन्ते। अत एतदुपपन्नं भवति यत् यदत्र जगति ज्ञानवतां ज्ञानं दृश्यते, तत् तस्यैव सहस्रमूर्ध्नो भगवतो विष्णोरिति। मनुष्यो ह्यल्पज्ञानः, नासौ सहस्रमूर्धा। तस्मात् सहस्रमूर्धवत्त्वस्य कृत्रिमा कल्पना तत्त्वविद्भिः समादृता। तद्यथा चरके-"वैद्यसमूहः संशयध्नानां श्रेष्ठतमः" इत्थं समानज्ञानवतां समूहो बहुशिरोवत्त्वं, सहस्रशीर्षण्वत्त्वं, सहस्रमूर्धवत्त्वं वा प्राप्नुवन् संशयानामुच्छेदाय प्रभवति। उक्तं च भवति लोके—'पञ्च परमेश्वरः' इति। बहुशिरस्काः पञ्च सहस्रमूर्ध्नः प्रतिरूपां परमेश्वरतां स्वस्मिन्नादधति। एवं विविधविकल्पनाः सूरिभिः स्वयमुन्नेयाः।

प्रसंगप्राप्तं किंचिद्विशेषमुच्यते-यथा प्रतिप्राणिजाति पंचज्ञानेन्द्रियाधिष्ठानस्य शिरसो गोलकस्य निर्माणं भिन्नं भिन्नं, तथैव तेषामान्त्राणां च निर्माणं निवेशनं जठरे भिन्नं भिन्नम्। यथोदरं आन्त्राणां निवेशनं भिन्नं भिन्नं तथैव शिरसि कर्णिकाः सीताश्च भिन्ना भिन्नाः। आन्त्राणि जग्धमाहारं पचन्ति, कर्णिकास्तथैव ज्ञानं पचन्ति स्मरन्ति। विकृतोदरो विकृतज्ञानो भवतीति प्रत्यक्षं दृश्यते। समानांशपरिवृद्धशरीरे पुरुषे यावच्छिरसो गोलकं सूत्रेण मितं भवति, तावत् प्रमाणं कण्ठकूपादारभ्य शिश्नान्तस्य तावदेव प्रमाणञ्च मध्यकायस्य। ***'इन्द्रो मायाभिः पुरुरूप ईयते'*** (ऋग्० ६।४७।१८) इति मायावत्त्वं तस्य विष्णोः सुधीभिरुन्नेयम्। विविधं चैवं सूत्रेण मितं सद् भगवन्तं लाघवेन बहुविधज्ञानवन्तं प्रकाशयति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। यजु० ३१।१।।

भवति चात्रास्माकम्—

सहस्रमूर्धा भगवान् स विष्णुः
सहस्रमूर्धानमकल्पयत् सः ।
लोकं समग्रं पुरुषस्तथा तं
सहस्रमूर्धानमनक्ति विष्णुम्।।२६१।।

विश्वात्मा—२२५

अतति सततं गच्छति, सततं वा प्राप्तो भवती'त्यात्मा'। विश्वस्य सकलस्य चराचरस्यात्मातयिता सन् स विष्णु'र्विश्वात्मे'ति नाम्नोक्तो भवति।

मन्त्रलिङ्गञ्च—

सर्वगुः सर्वपूरुषः सर्वात्मा सर्वतनूः सह यन्मेऽस्ति तेन।'
अथर्व० ५।६।१२।।

स ओतः प्रोतश्च विभूः प्रजासु। यजु० ३२।८।।

सूर्य आत्मा जगतस्तस्थुषश्च । यजु० १३।४६।।

'सूर्यः' इति चात्रैव संग्रहे १०७ सप्तोत्तरैकशततमे श्लोके नाम संगृहीतमस्ति। प्रकारान्तरेण व्याख्यानम्-विश्वमात्मनि यस्य स 'विश्वात्मा' भगवान् विष्णुः सर्वत्र व्यापकः। मन्त्रलिङ्गञ्च—

या आपो याश्च देवता या विराट् ब्रह्मणा सह।
शरीरं ब्रह्म प्राविशच्छरीरेऽधि प्रजापतिः ।। अथर्व० ११।८।३०।।
तस्माद् वै विद्वान् पुरुषमिदं ब्रह्मेति मन्यते ।
सर्वा ह्यस्मिन् देवता गावो गोष्ठ इवासते ।। अथर्व० ११।८।३२।।

सर्वकमेवैतदथर्ववेदस्यैकादशकाण्डस्याष्टमं सूक्तं नितरां रमणीयं शरीर-विज्ञानाय। लोकेऽपि च पश्यामः-यो हि यस्मिन् कर्मणि प्रधानो भवति, स हि तस्यात्मोच्यते। तद्यथा-अग्निर्यन्त्रात्मा, आपो वा यन्त्रात्मा चालको वा यन्त्रात्मा स्वामी वैतस्यात्मेत्युक्तं भवति।

इतरोऽयमात्मा जीवाभिधोऽपि विश्वं सम्पूर्णं शरीरं प्रविश्य तमातयति हृदयं गत्या योजयति। 'पंचमे मासि चित् प्रवेशः' इति शारीरविदां समयः पुरुषशरीरमधिकृत्य। एवं विविधविचारणया विचारणेन स भगवानेव सर्वत्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्यापको दृश्यते। भगवत्कर्मणश्छायानुरूपं कर्म सर्वत्र मनुष्यकर्मस्वपि दृश्यते यथोदाहृतमत्रैव तस्मात् स सर्वत्र व्यापको भगवान् विष्णुर्विश्वात्मोक्तो भवति।

मन्त्रलिङ्गञ्च—

विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात्।
सं बाहुभ्यां धमति सं पतत्त्रैर्द्यावाभूमी जनयन् देव एकः ।।

यजुः १७।१६।।

भवति चात्रास्माकम्—

यदत्र किंचिद् भुवि दृश्यमानं
तद् ब्रह्मणा व्याप्तमिहास्ति सर्वम्।
विश्वं शरीरं गमयत्यजस्रं
विश्वात्मनामास्त्यत एव विष्णुः।।२६२।।

सहस्राक्षः—२२६

'सहस्र' शब्दो बहुपर्यायः। ***'अशेर्देवने'*** (उणा० ३।६५) इत्यनेनोणादिसूत्रेण 'अश भोजने' क्रैयादिकः, 'अशू व्याप्तौ' सौवादिक आभ्यां धातुभ्यां 'सः' प्रत्ययः। अश्नुते व्याप्नोतीत्यक्षः। अश्नाति भुंक्ते गृह्णात्यनेनार्थानिति वा 'अक्षः'=इन्द्रियाणि, रथचक्राणि वा।

स एक एव विष्णुर्विविधकर्माणि कल्पयन् पुरुरूपः सन्—**'इन्द्रो मायाभिः पुरुरूप ईयते'** (ऋग् ६।४७।१८) इति स 'सहस्राक्षः' उक्तो भवति। अथवा-पृथक् पृथक् जातिभेदेन विभक्तानां शरीराणां पृथक् पृथग् रूपेण रूपेन्द्रियस्याक्ष्णो गोलकानां विन्यसनात् स महाप्राज्ञो विष्णुः सर्वव्यापकः सन् स्वमहिम्ना 'सहस्राक्षः' उक्तो भवति।

सहस्रधा वा पश्यतीति कृत्वाः 'सहस्राक्षः'। तद्यथा-सूर्यादयो ग्रहा द्वादशभावविभक्तस्य जगतः कर्माणि पृथक् पृथग्भावनिविष्टदृष्ट्या पृथक् पृथग् भावान् पश्यन्ति। तेषां ग्रहाणां सूर्यो राजा।

मन्त्रलिङ्गञ्च—

इन्द्रो राजा जगतश्चर्षणीनामधिक्षवि विषु रूपं यदस्ति।
ददाति दाशुषे चोदद् राध उप स्तुतश्चिदर्वाक्।। अथर्व० १६।५।१।।

तस्मात् स 'सहस्राक्षः' उक्तो भवति। इहैव संग्रहे 'सूर्यः' इति च नाम विष्णोर्नामसु पठितमस्ति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। यजु० ३१।१।।

सहस्राक्ष शतेषुधे। यजु० १६।१३।।

नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे। यजु० १६।८।।

सहस्राक्षो विचर्षणिरग्नी रक्षांसि सेधति । ऋग्० १।७६।१२।।

पाशकानां विज्ञापकोऽक्षशब्दः, स एव चेन्द्रियाणां विज्ञापको वेदे प्रयुक्तः। यथा—

अक्षैर्मा दीव्यः, कृषिमित् कृषस्व। ऋग्० १०।३४।१३।।

अक्षैः पाशैर्मा दीव्यः, द्यूतनिषेधः। अक्षैरिन्द्रियैर्भोगान् मा भुंग्ध्वम् कृषिं क्षेत्रकर्म तपो वा तत् कुरुत कुरुध्वं वा। तपसा क्षेत्रे बीजारोपणेन च धनं प्राप्नुत द्यूतेन नेति। एवं विविधकल्पनया स 'सहस्राक्षः' एक एव विष्णुर्जगद् व्याप्नोति। अतः स व्यापकधर्मा विष्णुः 'सहस्राक्षः' उक्तो भवतीति दिङ्मात्रमुक्तम्। लोकतो विविधा ऊहा ऊहनीया मनीषिभिः।

भवति चात्रास्माकम्—

विष्णुः सहस्राक्षपदेन वाच्यो
विकल्पयन् गोचरगोलकानि ।
स एव विज्ञानवितानिष्ठः
सनातनः पश्यति भूतमात्रम्।।२६३।।

सहस्रपात्—२२७

'सहस्र' शब्दः संख्यावाचकः सन्नपि बहुत्वविद्योतनो बहुपर्यायो वात्र मन्तव्यः। लोकेऽपि च सहस्र-शब्दो बहुत्वपर्यायः प्राकृतजनैरप्युच्यते। तद्यथा-'किं सहस्रधोक्तमपि न शृणोषि' अत्र वाक्ये बहुधोक्तमिति विज्ञापनीयोऽर्थः। 'पाद-शब्दः' 'पद गतौ' दैवादिकः, पद्यतेऽसौ पादः। ***'पदरुजविशस्पृशो 'घञ्'*** (पा० ३।३।१६) इति 'घञ्' प्रत्ययः। सहस्राणि पादा अस्येति 'सहस्रपात्'। ***'संख्यासुपूर्वस्य'*** (पा० ५।१।१४०) इत्यनेन सूत्रेण संख्यापूर्वस्य पादान्तस्यान्त्यलोपः समासान्तः।

गमनसाधनौ पादौ पादा वा प्रतिप्राणि दृश्यन्ते। शतपद्यादिषु पादानां बहुत्वं दृश्यते तत्र यदि शतपद्याः पदं भिद्यते छिद्यते वा, तर्ह्यपि शतपद्या गतौ विकारो नायाति, भ्रमरादौ षट्पात्त्वमित्यादि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तदेतद् बहुविधविकल्पानुस्यूतं जगत् केन क्लृप्तमिति जिज्ञासायामुक्तं भवति सर्वत्र व्यापकेनानन्तगतिसाधक–पादनिर्माणतत्त्वविदा विविधपादानुस्यूतमिदं जगत् सहस्रपाद् तद्व्यवस्थातोपि सहस्रपाद् नाम्नोक्तो भवति। कृतं कर्म दृष्ट्वा कर्तुर्ज्ञानातिशयत्वं, तत्कर्मविज्ञाननिष्ठत्वं च प्रकाशितं भवति।

भगवता विष्णुना विविधभेदैर्विभक्ताः सर्पाः प्रत्यक्षतोऽदृश्यपादवन्तः सन्तोऽपि तीव्रतमगत्या धावने समर्थाः क्लृप्ताः। तदेतद् गतिविज्ञानं महाज्ञानिनं गतिविज्ञानकुशलं जगतो भिन्नं, जगद्व्यवस्थातारं विज्ञापयति। इति कृत्वा स भगवान् सर्वं जगत् यथार्हगतिसाधनयुक्तये प्रत्यक्षपादयुक्तमप्रत्यक्षपादयुक्तं वा।

जतुकस्य पक्षिणः शाखान्तरप्राप्त्यर्थं तस्य पक्षपोषकेष्वेवास्थिमयं कौटिल्यं कृतं, पादौ च न तस्मै दत्तौ। विविधविज्ञानवत्त्वं तस्य विज्ञापयितुं मनुष्यो वा स्वोपकाराय तथाविधयन्त्राणां निर्माणं कुर्यादिति विज्ञापयितुं वा विविधपादविन्यास-न्यस्तमिदं जगत् प्रक्लृप्तम्। स्वयं तत्रानन्तज्ञानो विराजमानः सन् 'सहस्रपा'दुक्तो भवति।

मन्त्रलिङ्गञ्च–

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्। यजु० ३१।१।।

सहस्रबाहुः पुरुषः सहस्राक्षः सहस्रपात्। अथर्व० १९।६।१।।

श्येनो नृचक्षा दिव्यः सुपर्णः सहस्रपाच्छतयोनिर्वयोधाः।

अथर्व० ७।४१।२।।

भवति चात्रास्माकम्–

सहस्रधा पादवितानविज्ञः
सहस्रपात् पादशतैर्विभक्तम् ।
अथाप्यपादो विविधस्वरूपं
जगत् प्रक्लृप्यास्ति स तत्र विष्णुः।।२६४।।

प्रक्लृप्य=क्लृपू सामर्थ्ये धातुः, गमनक्रियायां समर्थवत् कृत्वेत्यर्थः।

❖ ❖ ❖

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आवर्तनो निवृत्तात्मा, संवृतः सम्प्रमर्दनः।
अहःसंवर्तको वह्निरनिलो धरणीधरः ।।३८।।

२२८ आवर्त्तनः, २२६ निवृत्तात्मा, २३० संवृतः, २३१ सम्प्रमर्दनः।
२३२ अहःसंवर्तकः २३३ वह्निः, २३४ अनिलः, २३५ धरणीधरः।।३८।।

आवर्त्तनः—२२८

'आङ्'पसर्गः, 'वृतु वर्तने' भौवादिकः, 'वृतु वरणे' दैवादिकः, आभ्यां ***'अनुदात्तेतश्च हलादेः'*** (पा० ३।२।१४६) इत्यनेन तच्छील-तद्धर्मतत्साधुकारिष्वर्थेषु 'युच्' प्रत्ययः। विविधलोकान् लोके वा दृश्यमानं स्वभावेन आवर्तनगुणं विधत्ते तस्मात् स आवर्तनगुणेन सर्वत्र व्यश्नुवानः सन् 'आवर्तन' उक्तो भवति।

मन्त्रलिङ्गञ्च—

आवर्तनं निवर्तनं यो गोपा अपि तं हुवे। ऋग्० १०।१८।४।।
सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ।
दिवं च पृथिवीं चान्तरिक्षमथो स्वः।। ऋग्० १०।१६०।३।।

जीवः प्रार्थयते—

पुनः प्राणः पुनरात्मा न ऐतु पुनश्चक्षुः पुनरसुर्न ऐतु ।
वैश्वानरो नो अदब्धस्तनूपा अन्तस्तिष्ठाति दुरितानि विश्वा।।
अथर्व० ६।५३।२।।

लोकेऽपि च पश्यामः-बीजाच्चैव फलं पुनः। वट-बीजाद् वटः, निम्बबीजान्निम्बः, काकात् काकः, पशोः पशुः मनुष्यान्मनुष्यः, स्वेदात् स्वेदजाः इति निदर्शनमात्रमुक्तम्। एवं भगवानावर्तनधर्मेण व्याप्नुवन्नाकल्पात् कल्पान्तं सृष्टिं निजशक्त्या नयति तस्मात् 'आवर्त्तनः' स विष्णुरुक्तो भवति।

तथा च—

प्रजापतिश्चरति गर्भे अन्तरदृश्यमानो बहुधा विजायते।
अर्धेन विश्वं जजान यदस्यार्धं कतमः स केतुः।। अथर्व० १०।८।१३।।

अदृश्यरूपेण सर्वं व्यश्नुवान इति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

आवर्त्तनो विष्णुरदृश्यमानः
शक्त्या स्वया वर्त्तयते समस्तम्।
जातो विकारान् समुपैति विद्वान्
नान्तायतेऽनन्तधिकस्य[1] कर्म ।।२६५।।

निवृत्तात्मा—२२६

'नि' उपसर्गः। वृतु वर्त्तने भौवादिकः, 'वृतु वरणे' दैवादिकः, क्तश्च प्रत्ययो 'निवृत्तः'। निवृत्तः पृथग्भूत आत्मा स्वरूपपर्यायोऽस्य=निवृत्तस्वरूपः, निवृत्तमात्रो वा। प्रजापतिः सर्वां विसृष्टिं जज्ञे।

मन्त्रलिङ्गञ्च—

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न ।
योऽस्याध्यक्षः परमे व्योमन्त्सो अंग वेद यदि वा न वेद।।

ऋग्० १० ।१२६ ।७ ।।

स सर्वव्यापी भगवान् सर्वं सृष्ट्वापि तस्मिन्नलिप्त एव तिष्ठति।

मन्त्रलिङ्गञ्च—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ।।

ऋग्० १ ।१६४ ।७ ।।

'अनश्नन्नन्यो अभिचाकशीति' इति चतुर्थं चरणं निवृत्तात्मशब्दबोध्यमेवार्थं व्यनक्ति।

भवति चात्रास्माकम्—

जज्ञे स विश्वं स बिभर्ति विश्वं
सखा स जीवस्य समानशाखः ।
नाश्नन् जगज्जातरसानशेषान्
निवृत्तमात्रोऽश्नुत एव सर्वम् ।।२६६।।

लोकेऽपि च पश्यामः—कर्त्ता कार्यं कृत्वा ततोऽलिप्त एवात्मानं वा भवति। यथा कुम्भकारो कुम्भान् कुर्वन् तेभ्य आत्मानं पृथगेवास्थापयति, तथैवायं निवृत्तात्म-संज्ञो विष्णुर्निवृत्तात्मोक्तो भवति।

---

१. कप् समासान्तः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संवृतः—२३०

समुपसर्गः। 'वृञ् वरणे' सौवादिकः, 'वृञ् आवरणे' चौरादिकः, 'आधृषीयत्वाद्वा णिच्'। समेकीभावे, समानरूपेण सकलं विश्वं स्वके व्यापकधर्मे वव्रेऽन्तर्दधौ वा। तस्मात् स भगवान् विष्णुः 'संवृतः' उक्तो भवति।

मन्त्रलिङ्गञ्च—

तस्मिन् ह तस्थुर्भुवनानि विश्वा। यजु० ३२।१६।।

अयमु त्वा विचर्षणे जनीरिवाभि संवृतः। प्र सोम इन्द्र सर्पतु।।

अथर्व० २०।५।१।।

भवति चात्रास्माकम्—

स संवृतो विष्णुरनन्तलोकान्
समानभावेन ववार जातान्।
तस्मिन्निदं सं च वि चैति सर्वं
विश्वं भवत्येकगृहं च तस्मिन्।।२६७।।

श्लोकोत्तरार्धे मन्त्रलिङ्गञ्च—

वेनस्तत्, पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम्।

तस्मिन्निदं सं च वि चैति सर्वं स ओतः प्रोतश्च विभूः प्रजासु।।

यजु० ३२।८।।

कालेनावच्छिन्नत्वात् 'क्त' न भूतमात्रं व्यनक्ति, परन्तु संवृणोतीति 'संवृत' इत्यपि।

सम्प्रमर्दनः—२३१

'सम्' एकीभावे प्र प्रकर्षार्थे उपसर्गौ। 'मृद क्षोदे' रौधादिकः। एकीभावेन प्रकर्षेण प्रकृष्टेन बलेन तपसा वा मृद्नाति क्षुभ्नाति संपिनष्टि वा 'संप्रमर्दनो' भगवान् सर्वव्यापको विष्णुः। मृद्नातेः ***'ल्युट् च'*** (पा० ३।३।११५) इत्यनेन 'ल्युट्' प्रत्ययः। सोऽत्र ***'कृत्यल्युटो बहुलम्'*** (पा० ३।३।११३) सूत्रेण कर्त्तरि कारके ज्ञातव्यः। बहुलं नाम निर्दिष्टार्थादन्यत्रापि भावयितुम्। विश्वं सिसृक्षुर्भगवान् परमेण तपसा विसृष्टिं जनयामास।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

तपसस्तन्महिना जायतैकम्। ऋग्० १० ।१२६ ।६ ।।

को अद्धा वेद क इह प्रवोचत् कुत आजाता कुत इयं विसृष्टिः।
यो अस्याध्यक्षः परमे व्योमन्त्सो अंग वेद यदि वा न वेद ।।
ऋग्० १० ।१२६ ।७ ।।

सर्वकमेतत् सूक्तं पठनार्हम्। अपरं च—

ऋतं च सत्यं चाभीद्धात्तपसो अध्यजायत।
ततो रात्र्यजायत ततः समुद्रो अर्णवः ।। ऋग्० १० ।१६० ।१ ।।

भगवतः सम्प्रमर्दनरूपो गुणः प्रतिपदं लोके व्याप्तो दृश्यते। तद्यथा—प्रजां प्रजिजनिषुः प्रथमं प्रकृतिरूपायाः क्षेत्ररूपाया वा स्त्रियो योनिं मैथुनकर्मणा मृद्नाति क्षुभ्नाति संपिनष्टि वा, तदनन्तरं शुक्ररजसी कललीभावं प्राप्नुतः। ततोऽनु यथाक्रमं नवमासं यावद् गर्भः संप्रमर्दितः सन् सर्वांगसमुदितः प्रादुर्भावमुपैति। अश्वोष्ट्रमहिष्यादिषु गर्भपाककालो भिन्नो भिन्नः। एता हि योनयः कस्यचिद् गोलोकस्य निदर्शनमात्रज्ञापना वा।

अपरं च—घटं चिकीर्षुः कुम्भकारः प्रथमं तावन्मृदं सर्वभावेन संप्रमृद्नाति, तदनन्तरं स घटान् कर्तुं प्रवर्तते। अमुथैव कृषीवलो बीजं विवप्सुः प्रथमं क्षेत्रं यथालाभसाधनसंवलितः सन् बहुकृत्वः सम्प्रमृद्नाति, ततोऽनु वपति बीजम्। 'लोकसम्मितोऽयं पुरुषः' इति च कृत्वा याः क्रिया जगति प्रादुर्भाव्यस्य प्रादुर्भावाय दृश्यन्ते तासां मूलं सृष्टेरुत्पत्तिक्रम एव।

भवति चात्रास्माकम्—

स विश्वकृद् विश्वमिदं चिकीर्षु-
मृद्नाति सम्यक् सबलं ह्यजां ताम्।
तथा यथा कुम्भकृतो प्रवृत्तौ
मृदं प्रमृद्नाति समस्तशक्त्या ।।२६८।।

भगवतः सम्प्रमर्दनगुणः सनादद्य यावदायाति कल्पान्तं च यास्यतीति सम्प्रमर्दनगुणो भगवान् विष्णुरुक्तो भवति। अजां प्रकृतिम्। अजा शब्दप्रयोगो यथा—***'अजामेकां लोहितशुक्लकृष्णाम्'*** (श्वेता० ४ ।५)।

विश्वकृद् विष्णोर्नामसंग्रहे पठितत्वात् मृद्नातेर्ण्यन्तात् ***'नन्दिग्रही'*** त्यादिना सूत्रेण ल्युप्रत्यये कृते, सम्प्रमर्दयतीति 'सम्प्रमर्दनः' अपि सिद्धो भवति। तत्र भगवान् सम्प्रमर्दनो विष्णू रुद्र-यम-काल-मृत्यु-दण्डादिभिर्गुणैर्विभूतिभिर्वा सकलं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जगत् सम्प्रमर्दयति, व्यवस्थितौ वा स्थापयतीति कृत्वा 'सम्प्रमर्दनः' उक्तो भवति। रुद्र-यम-काल-मृत्युप्रभृतीनि नामानि यथास्थानं द्रष्टव्यानि।

भवति चात्रास्माकम्—

विष्णुः स्वयं सर्वकलासु निष्ठो
क्षुभ्नाति विश्वञ्च करैरसंख्यैः ।
स रुद्र उक्तो भयकृत् स उक्तो
यमोऽयमः सःस उ काल उक्तः।।२९९।।

तं कालनेमिं प्रणमन्ति सर्वे
तं चाप्रमत्तं द्युचरा द्रवन्ति ।
मृत्युर्भयादत्ति जगच्च तस्य
वह्निर्भयाद् यात्यवनेरथोर्ध्वम् ।।३००।।

अहःसंवर्त्तकः—२३२

'ओहाक् त्यागे' जौहोत्यादिकः, तस्मान्नञुपपदात् ***'नञि जहातेः'*** (उणादिः १।१५८) सूत्रेण 'कनिन्' प्रत्ययो विधीयते। तस्मिन् प्रत्यये ***'आतो लोप इटि च'*** (पा० ६।४।६४) इत्यनेनाकारलोपे कृते अहन्निति सिद्ध्यति। ***'अहन्'*** (८।२।६८) इत्यधिकारप्रवृत्तेन ***'रोऽसुपि'*** (पा० ८।२।६९) सूत्रेण रेफोऽन्तादेशः प्राप्नोति, तेन 'अहः' सिध्यति।

संवर्त्तकः—समेकीभावे, सम्यग्भावे चोपसर्गः। 'वृतु वर्त्तने' भौवादिकः, 'वृतु वरणे' दैवादिकः, आभ्यां कर्त्तरि 'ण्वुल्' प्रत्ययः ऐकध्यं सम्यक्तया वर्त्तत इति 'संवर्तकः। अह्नः संवर्त्तक इति 'अहःसंवर्त्तकः'। न जहाति प्रकाशमित्यहः प्रकाशस्वरूपः सूर्यो दिवसो वा, तस्य सूर्यस्य संवर्त्तकः सन् स महोत्साहो महाबलो विष्णुः 'अहः संवर्त्तकः' उक्तो भवति।

विशदार्थमधिकृत्य पुनरेवं व्याख्यानमर्हति—न जहातीत्यहः, तस्य संवर्त्तकः। के च पुनस्ते ये न जहत्यात्मगुणधर्मान्? पंचमहाभूतानि सूर्यादयो ग्रहास्तारकितं नभश्च। सृष्ट्यारम्भकाले यो गुण आकाश आसीत्, सोऽद्यापि तथैवास्ति कल्पान्तं च यास्यति। अनेनैव प्रकारेण वायुरग्निर्जलं पृथिवी च स्वं स्वं गुणं धर्मं वा न त्यजति, तस्मात् तेऽपि अहान्युच्यन्ते।

एवमेव सूर्यादयो ग्रहास्तारकाश्च यथाविधगुणधर्मनिर्देशनिर्दिष्टाः सर्गाद्यकाले

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भगवता अहःसंवर्त्तकेन संप्रवर्त्तिता व्यवहाराय नियोजितास्ते कल्पकल्पान्तं तथैवाजहत्स्वार्थवृत्तिमन्तः सन्तः लोकलोकान्तरानुपकरिष्यन्ति। कुतः एवं भवति। यतो हि सृष्टेरस्याः कर्त्ता भगवान् स्वयमात्मगुणानां त्यागं न करोतीति कृत्वा। अत एव वक्तुमर्ह्यते यत्-अग्निः प्रकाशदहने न त्यजति। कुतः? अहःसंवर्त्तकेन व्यवस्थितः सन्। एवं शेषेष्वपि योजनीयं भवति। एवमेव ग्रहोपग्रहेषु तारकेषु च, लोकलोकान्तरेषु चापि विविधमूहनीयं भवति।

तेनैवाहःसंवर्त्तकेन व्यवस्थितः समुद्रोऽपि स्वां मर्यादां न जहाति। पंचभूतानां कार्याण्यपि स्वं स्वं धर्मं न जहति तद्यथा—निम्बो न जहाति स्वं कटुत्वमाकल्पकल्पं यावत्। यदि जहाति स्वं धर्मं तदा निम्बसंज्ञा तस्य न भवितुमर्हति। एवं भगवान् प्रतिपदं लोकेऽहःसंवर्त्तकत्वेन लोकं व्यश्नुवानो दृश्यते। एवं गौर्गोत्वं न जहाति। कोकिलः पंचमं स्वरं न जहातीति सर्वत्रैवंविधमूहनीयं भवति।

अह्नो दिवसार्थे मन्त्रलिङ्गञ्च—

अहोरात्रे पार्श्वे।। यजु० ३१।३२।।

अत्यक्तधर्मवतां व्याख्याने मन्त्रलिङ्गञ्च—

स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।

ऋक् १०।१८१।२।।

एवमन्वयनीयो मन्त्रार्थः—स पृथिवीं=पृथिवीनिर्माणनिमित्तसाधनीभूतं स्वगुणं दाधार, अमुथैव स द्यां स्वगुणविशिष्टद्युलोकं दाधार। एवं वेदे सर्वत्रैवोहनीयं भवति।

भवन्ति चात्रास्माकम्-वेदार्थविषये—

लोकज्ञो न च वेदज्ञो वेदज्ञो न च लोकवित्।
एकपक्षखगस्येव, वाक्य तस्यावसीदति ।।३०१।।
जगद् वेदस्य व्याख्यानं, वेदो विश्वप्रकाशकः।
तस्माद्वेदं विजानीयाल्लोकाच्छास्त्राच्च यत्नतः।।३०२।।

कथनान्तरेण पुनः स एवार्थो गीयते—

स्वतः प्रमाणानि भवन्ति वेदाः
स्वतः प्रमाणं च जगत् समस्तम्।
न वेदगाथामनुयाति विश्वं
विश्वे भवं वेदवचः प्रमाणम् ।।३०३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रकृतार्थे चास्माकम्—

स प्रत्यहं विश्वमिदं विधाता
संवर्तयन्नात्मगुणैः सदास्थैः ।
विष्णुः स्वयं स्वं न जहाति धर्मं
जगच्च नो धर्मगुणौ जहाति ।।३०४।।

अह इत्यस्य सिद्धौ नञोऽर्थस्योपेक्षा परित्यागो वा कर्तुं न शक्यते। तद्यथा यत्र यत्र सूर्यो गच्छति तत्र तत्रासौ स्वप्रकाशन्न जहाति इति दिवसपर्यायवाचिना अहश्शब्देन गम्यते।

एतस्य नाम्नो व्याख्याप्रसंगेन—'सत्यधर्मपरायणः', श्लोके-१०६, नाम ८७०, इत्यपि व्याख्यातं भवति। सत्यं=स्थिरम् धर्मः=धारयतीति धर्मः, परमं अयनं ज्ञानं यस्य स परायणः। सत्य इति नामव्याख्याने श्लोके २५, नाम १०६, विशदं द्रष्टव्यम्। स 'सत्यधर्मपरायणो' भगवान् अजहत्स्वार्थवृत्तिकं जगदपि रचितवानिति कृत्वा प्रतिपदं जगत् तं सत्यधर्मपरायणं विष्णुं सर्वं व्यश्नुवानं व्याचष्टे एव।

परायणशब्दः व्याख्यातचरः श्लोके २ 'किमेकं दैवतं लोके' इत्यादिके।

भवति चात्रास्माकम्—

विष्णुः स्वयं सत्यपरायणः सन्
सत्येन धर्मेण जगद् युनक्ति ।
सर्गाद्यकाले गुणवद्यथैतत्
तथैव चाद्यापि जगद् विभाति।।३०५।।

वह्निः—२३३

'वह प्रापणे' भौवादिकः, तस्मात् ***'वहिश्रियुद्रुग्लाहात्वरिभ्यो नित्',*** (उणादिः ४-५२) इत्यनेन 'निः' प्रत्ययो विधीयते, नित् सोऽतिदिश्यते। येन ***'ञ्नित्यादिर्नित्यम्'*** (पा० ६।१।१६७) इत्याद्युदात्तस्वरः स्यात्।

यज्ञेषु देवतानिमित्तं दीयमानं हविर्वहति, तस्मात् 'वह्निः' अग्निपर्यायः। जाठरोऽपि वह्निरेतस्मादेव जीवनं प्रापयतीत्येव, वह्नेः प्रणाशान्ना प्रणश्यति।

यत् कर्म जगति भवति, तत्फलं "वह्निः" कर्तारं प्रापयति। तद्यथा कृषीवलः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्षेत्रे वज्रान्नं वपति, वह्निस्तं वज्रान्नरूपेण कृषीवलं प्रापयतीति कृत्वा वह्निर्भागवतं नियमं व्यंजयन् स्वयं भगवान् **'वह्नि'** नाम्ना सर्वं विश्वं व्यश्नुवान आस्ते।

सूर्योऽपि वह्निरुच्यते। यज्ञोऽपि वह्निरुच्यते।

देवानामसि वह्नितमं सस्नितमं पप्रितमं जुष्टतमं देवहूतमम्।

यजु० १।८।।

मन्त्रलिङ्गञ्च—

अच्छायमेतिशवसा घृताचिदीडानो वह्निर्नमसा।। अथर्व० ५।२७।४।।

अग्निर्भुवत् रयिपती रयीणाम्। ऋग् १।६०।४।।

रयीणाम्=सर्वविधैश्वर्याणामिति।

अत एव च विष्णोर्नाम 'श्रीशः' इत्यपि युक्तियुक्तं भवति। यस्माद् वह्निरर्थान् प्रापयति वर्त्तते, तस्मात् सत्कर्माण्यनुष्ठितानि कर्त्तारं स भगवान् सत्फलरूपेण प्रापयति।

मन्त्रोक्तं च संगच्छते—

याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः। यजु० ४०।८।।

उपरि निर्दिष्टोदाहरणवत् प्रतिपदं जगद् दृष्ट्वा निदर्शनानामूहा ऊहितव्या भवन्ति।

भवति चात्रास्माकम्—

वह्नीः स विष्णुर्जगदाप्य सर्वं
फलेन कर्त्तारमलङ्करोति ।
उप्तं यथा वापमुपैति बीजं
जगच्च तं विष्णुमुपैति तद्वत्।।३०६।।

अनिलः—२३४

'इल स्वप्नक्षेपणयोः' तौदादिकः' 'इल प्रेरणे' चौरादिकः, इलति स्वपिति क्षिपतीति 'इलः' एलयति प्रेरयतीति वा 'इलः'। ***'इगुपधज्ञाप्रीकिरः कः'*** (पा० ३।१।१३५) इत्यनेन 'कः' प्रत्ययः, तेन गुणाभावः'। न इलती 'त्यनिलः'। अस्वप्नः अतन्द्रितो वा।

मन्त्रलिङ्गञ्च—

वायुरनिलममृतमथेदं भस्मान्त ँ शरीरम्। यजु० ४०।१५।।

अतन्द्रो दूतो अभवो हविर्वाट्। ऋग्० १।७२।७।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ऋषी बोधप्रतीबोधावस्वप्नो यश्च जागृविः। अथर्व० ५।३।१०।।

जागृविं विभुम्। ऋग्० ६।१५।८।।

जागृविं=सदा जागरणशीलम्। भगवान् सर्वव्यापको विष्णुः स्वयं न स्वपिति, न च तन्द्रितो वा भवति। अत एव च सूर्यादयो ग्रहा अतन्द्रिताः सन्तश्चराचरं गमयन्ति गतावास्थापयन्ति। अपां निधिः समुद्रोऽपि न स्वपिति, न तन्द्रामेति। भगवतोऽतन्द्रितं स्वापतो रहितं स्वभावं विज्ञापयन्त उद्भिदो यथानियतकालं स्वकानि पर्णानि मुंचन्ति, यथाकालं च फलोदयमाप्नुवन्ति। एवं भगवान् विष्णुरनिलत्वेन प्रतिपदं जगद् व्यश्नुवानो दृश्यते।

अनिलो वायुरप्येतस्मादेव, यन्न हि तस्य कश्चित् प्रेरयिता विद्यते। स वायुरपि स्वयं प्रसविता सन् प्रभुरुच्यते।

अक्षरवर्णसामान्याद् वा निर्वचनमधिकृत्य-'लीङ् श्लेषणे' दैवादिकः, तस्मात् ***'एरच्'*** (पा० ३।२।५६) इत्यनेना'च्' प्रत्ययः। न्युपसर्गपूर्वात् निलयः स्थानम्, नास्ति निलयो यस्य सोऽनिलः। वायोः किंचिद् विशिष्टं स्थानं नास्तीति कृत्वानिलो वायुरुक्तो भवति। भगवतोऽपि किंचिद्विशिष्टं स्थानं नास्तीति कृत्वा भगवान् 'अनिलः' उक्तो भवति।

अनिति प्राणिति एलयति प्रेरयति गतिं वा स्थापयति तस्मा'दनिलो' भगवानुक्तो भवति।

भवति चात्रास्माकम्—

अतन्द्रितो विष्णुरतन्द्रितं जगत्
गतिं व्यवस्थापयतेऽनिलोऽतः ।
स प्राणयन् विश्वमिदं समस्तं
स एव वायुं च युनक्ति गत्या।।३०७।।

धरणीधरः—२३५

धरणी पृथिवी तां धारयतीति 'धरणीधरो' विष्णुरुक्तो भवति। 'धृञ् धारणे' भौवादिकः, तस्मात् ***'करणाधिकरणयोश्च'*** (पा० ३।३।११७) इत्यनेन 'ल्युट्', टित्त्वात् 'ङीप्' ***'टिड्ढा०'*** (पा० ४।१।१५) इत्यादिना=धरणी=पृथिवीपर्यायः। 'धरः' पचाद्यच् प्रत्ययं कृत्वा 'धरः' इति, धरण्या धरो 'धरणीधरः'।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यथा हि धरणी सर्वं तज्जं धारयति, तथैव सर्वकं स्व विकारं धारयति। तद्यथा—माता पुत्रं पुत्रीं वा सूते, आबीजाधानात् तं गर्भं धरति, तस्माद् गर्भस्य धरणी, सूत्वा च तं पुष्णाति दुग्धं पाययित्वा शिशुमिति, अतः सापि 'धरणी'।

अनेनैव प्रकारेण सर्वं कारणमात्रं स्वकस्य स्वकस्य कार्यजातस्य धारकत्वाद् 'धरणी'त्युक्तं भवति। अत एव च वैय्याकरणा ***'आधारोऽधिकरणम्'*** (पा० १।४।४५) इत्याचक्षते।

पृथिवीपर्यायमधिकृत्य मन्त्रलिङ्गञ्च—

स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम। यजु० १३।४।।

येन द्यौरुग्रा पृथिवी च दृढा येन स्वः स्तभितं येन नाकः।
योऽन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ।।
यजु० ३२।६।।

धरणीधरधर्ममधिकृत्य मन्त्रलिङ्गञ्च—

धाता धातॄणां भुवनस्य यस्पतिर्देवं त्रातारमभिमातिषाहम् ।
इमं यज्ञामश्विनोभा बृहस्पतिर्देवाः पान्तु यजमानं न्यर्थात्।।
ऋग्० १२८।७।।

स एव परमेश्वरोऽस्य जगतः स्रष्टा सन् मातेव धरणी, स एवैतस्य धारकत्वेन सर्वं व्यश्नुवानो धरणीधर उक्तो भवति।

भवति चात्रास्माकम्—

विष्णुर्हि लोके धरणीधरोऽस्ति
स एव दाधार स पाति धातॄन् ।
पतिर्यथा पाति धरित्रिरूपां
पत्नीं तथा विश्वमिदं च पुत्रम्।।३०८।।

पत्नी धरित्री, मन्त्रलिङ्गञ्च—

यस्यां मनुष्या बीजं वपन्ति। अथर्व० १४।२।३८।।

यस्यां पत्न्यामित्यर्थः। पत्नीमधिकृत्य मन्त्रोऽयम्। उक्तं चोपरिष्टात्—

देवा अग्रे न्यपयन्त पत्नीः समस्पृशन्त तन्वस्तनूभिः (अथर्व० १४।२।३२) इति। अतः पतिरपि 'धरणीधरः' उक्तो भवति। एवं सर्वत्र विश्वे विविधा ऊहा स्वयमूहनीया भवन्ति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धरित्री जायमानमन्तर्गर्भे निर्मिमीते, तस्मान्मातृशब्देनोक्ता भवति। पृथिवी मातेति यथा। सर्वाधाराणामाधारकत्वात् स भगवान् 'सर्वाधारः' इत्युक्तो भवति।

सर्वाधारार्थे मन्त्रलिङ्गञ्च—

धाता धातॄणां भुवनस्य यस्पतिः। ऋग्० १० ।१२८ ।७ ।।

धरणीधराः पर्वता अप्युच्यन्ते। तद्यथा—

भूलोके भूगोले वा पर्वता ऋतूनां व्यवस्थापने साधनीभूता महानदीनां महाजलाशयानां च धारका भवन्ति। अत्यावश्यकीयवस्तूनां रत्नानां च धारकाः सन्तो मनुष्यान् जीवयितुं समर्थयन्ति, महौषधानां धारकत्वाच्च 'धरणीधराः' उच्यन्ते।

❖ ❖ ❖

सुप्रसादः प्रसन्नात्मा विश्वधृग् विश्वभुग् विभुः।
सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः ।।३६।।

२३६ सुप्रसादः, २३७ प्रसन्नात्मा, २३८ विश्वधृक्, २३९ विश्वभुक्, २४० विभुः।
२४१ सत्कर्ता, २४२ सत्कृतः, २४३ साधुः, २४४ जह्नुः, २४५ नारायणः, २४६ नरः।।३६।।

सुप्रसादः—२३६

'प्र' उपसर्गपूर्वः 'षद्लृ विशरणगत्यवसादनेषु' भौवादिकः। 'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते' इति नियममधिकृत्य भावे 'घञ्' कृत्वा प्रसदनं प्रसादः। प्रसन्नता, सुप्रसादस्तु सुप्रसन्नता।

प्रसादलक्षणं चास्मत्—

यदन्तस्तद्बहिश्चापि यत् कृत्वा वर्धते तनुः।
स्वीयवर्गे च यद्वन्द्यं प्रसादः सा प्रसन्नता ।।३०६।।

प्रसादो हि नाम सत्त्वगुणाढ्ये मनसि भवति। भगवांश्चोक्तः—**'तमसः परस्तात्'** (यजु० ३१।१८)। सत्त्वगुणः प्रकाशसंज्ञो भवति, रजस्तमसी च मानसौ दोषौ, तौ च भगवति न युज्येते। उक्तं चरके—**'मानसौ पुनरुद्दिष्टौ रजश्च तम एव च'** दोषौ इति शेषः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लोकेऽपि च पश्यामः—भगवान् स्वकीयं सुप्रसादात्मकं कर्म प्रतिपदं लोके व्यनक्ति। तद्यथा—जायमाना वृक्षतुंगाः प्राणिमात्रस्य मनः प्रसादयन्ति। विविधानि च पुष्पाणि स्वकेन सुप्रसादेन विकासेन भगवत एव प्रसादं व्यंजयन्ति मनांसि रमयन्ति जायमानश्च शिशुः सर्वांगसमुदितः प्रियो भवति।

एवंविधाभिरुदाहरणकल्पनाभिर्भगवान् सर्वत्र सुप्रसादेन गुणेन जगति व्याप्त एव दृश्यते। प्रसन्नतार्थे प्रसादप्रयोगो यथा—

शृतं त्वा हव्यमुपसीदन्तु दैवा निः सृप्याग्नेः पुनरेनान् प्रसीद ।
सोमेन पूतो जठरे सीद ब्रह्मणामार्षेयास्ते मा रिषन् प्राशितारः।।

अथर्व० ११।१।२५।।

मन्त्रलिङ्गञ्च—

येन द्यौरुग्रा पृथिवी च दृढा येन स्वः स्तभितं येन नाकः।

यजु० ३२।६।।

आनन्दा मोदाः प्रमदोऽभीमोदमुदश्च ये।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः।। अथर्व० ११।७।२६।।

भवति चात्रास्माकम्—

यः सुप्रसादस्तमसः परस्ता-
च्छब्देन वेदेऽस्ति बहुत्र गीतः।
दिग्देशकालैः स न याति बन्धं
प्रसादेयच्चापि जगन्निबध्नन्[1] *।।३१०।।*

प्रसन्नात्मा—२३७

'प्र' पूर्वात् 'सीदतेः' 'क्त' प्रत्ययं कृत्वा, ***'रदाभ्यां निष्ठातो नः पूर्वस्य च दः'*** (पा० ८।२।४२) इत्यनेन निष्ठातकारस्य सीदतेश्च दकारस्य नकारादेशस्तेन 'प्रसन्नः' इति। ***'तस्य भावस्त्वतलौ'***, (पा० ५।१।११९), इत्यनेन 'तल्' प्रत्ययः, प्रसन्नस्य भावः 'प्रसन्नता', ***'तलन्तः स्त्रियाम्'*** लिंगानुशासने। आत्म-शब्दोऽत्र स्वरूपवचनः, प्रसन्न एव आत्मा स्वरूपं यस्य स 'प्रसन्नात्मा' भगवान्। आनन्दः, आनन्दस्वरूपो वा।

लोकेऽपि च पश्यामः-प्रत्येकं मृत्योर्बिभेति, यस्यां योनौ स जीव आस्ते तस्यामेव

---

१. दिग्देशकालैर्जगन्निबध्नन्नित्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स प्रसन्नात्मनो विष्णोर्जगद् व्यश्नुवानस्य गुणस्यानुभवं कुर्वन् प्रसन्न एवास्तीति। उद्भिदश्च यथाकालमुद्भवमाप्नुवन्त ऋतूत्थं विकारमन्तरा यथालाभपोषणपुष्टाः प्रसन्नतामेव प्रकटयन्तस्तमेव प्रसन्नात्मपदवाच्यं विष्णुं व्यंजयन्ति। एवं लोके विविधा ऊहा ऊहितव्या भवन्ति।

प्रसन्नता हि सत्त्वगुणोदये भवति। महान् पुरुषो भगवान् पुरुषोत्तमो वा तमसः परस्ताद् भवति।

मन्त्रलिङ्गञ्च—

आनन्दा मोदाः प्रमुदोऽभीमोदमुदश्च ये।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः।। अथर्व ११।७।२६।।
वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।
तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।।

यजु० ३१।१८।।

सत्त्वाख्यो गुणः शुद्धः प्रकाशस्वरूपो निर्विकार एव, रजस्तमसी च नानाविधानां मनोरोगाणां शोक-मोह-मात्सर्यईर्ष्या-द्वेषादीनां काम-क्रोध-लोभ मोह-हर्षादीनां च कारणे स्तः। यथा तमोभूतो राहुः सूर्यं चन्द्रमसं च गृह्णाति ग्रसति वा, अमुथैव प्राकृतानां जनानां मनांसि रजसा तमसा वाव्रियन्ते, परन्तु भगवति नैवं भवति, तस्माद् विष्णुः प्रसन्नात्मोक्तो भवति।

भवतश्चात्रास्माकम्—

सूर्योद्गते विश्वमिदं प्रसन्नं
सूर्याभिमुख्ये च मनः प्रसन्नम्।
मध्यागतैश्चाथ [1]विजातियोगै-
र्द्रष्टाथ दृश्यं लभते विकारम्।।३११।।

न तत्र देवेऽस्ति विकारजातं
न मध्यपाती च विहन्ति तं कम्[2]।
तस्मात् प्रसन्नात्मपदेन वाच्यो
विष्णुस्तनोत्येव जगत् प्रसन्नम्।।३१२।।

एतेन भगवतो विष्णोर्नाम्नी—'विशोकः' नामसंख्या ६३१, श्लोके ८०। 'शोकनाशनः' नामसंख्या ६३२, श्लोके ८०, इत्यपि व्याख्याते भवतः।

---

१. सूर्यचन्द्रमसोर्मध्यपाती विजातीयो राहुः। २. कम्=विष्णुम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विश्वधृक्—२३८

'धृष् प्रागल्भ्ये' सौवादिकः। घृष्णोतीति 'धृक्' 'क्विन्' प्रत्ययः। ***'ऋत्विग्दधृक्०'*** (पा० ३।३।५६) इत्यादि सूत्रे निपातनदर्शनात्। विश्वं धृष्णोति प्रागल्भ्ये स्थापयतीति 'विश्वधृक्। विश्वं ज्ञानानुपूर्वं सप्रगल्भं प्रपंचयतीति कृत्वा विश्वे सर्वा योनयस्तमेव विश्वधृषं जगद् व्यश्नुवानं विष्णुं प्रकाशयन्तः स्वेन स्वेन ज्ञानचातुर्येण विचरन्ति।

मन्त्रलिङ्गञ्च—

प्रजापतिश्चरति गर्भे अन्तरदृश्यमानो बहुधा विजायते।
अर्धेन विश्वं भुवनं जजान यदस्यार्धं कतमः स केतुः ।।

अथर्व० १०।८।१३।।

भवति चात्रास्माकम्—

उत्पत्तिभेदैरुत कालभेदैः
प्रसूनभेदैरथ पर्णभेदैः ।
रसस्य भेदैर्वयसश्च भेदैर्धृष्णोति
विश्वं स कविः स विष्णुः।।३१३।।

प्रतियोन्युत्पत्तिक्रमो भिन्नो भिन्नः, प्रत्युद्भिदभेदमुत्पत्तिक्रमो भिन्नो भिन्नः, ऋतुश्चापि भिन्नो भिन्न एवादीयते उत्पत्तौ, प्रसून-पर्ण-रस-वयसां भेदः पृथक्-पृथक् च व्यवस्थित इति कृत्वा स विष्णुर्विश्वधृगुक्तो भवति।

उक्तं च—

सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः।

विश्वभुक्—२३६

विश्वं भुंक्ते पालयतीति 'विश्वभुक्', विश्वं भुजति अष्टविधया गत्या नियमयतीति 'विश्वभुक्,' 'भुज कौटिल्ये' धातुः।

अष्टविधगतिविषये विशिष्टं २१८ संख्याके अग्रणीनाम्नि द्रष्टव्यम्। यथाकर्मवशात् प्राणिन ऊर्ध्वमधस्तिर्यक् च नयतीति कृत्वा 'विश्वभुग्' विष्णुरुक्तो भवति। चतुर्भुजेति १४० संख्यात्मके नाम्नि विशदं व्याख्यातचरं द्रष्टव्यम्।

मन्त्रलिङ्गञ्च—

विश्वभृदग्निः पिपर्त्वयसा सजोषाः। अथर्व० ५।२८।५।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

स विश्वभुग् विश्वमिदं सनाद्वै
भुनक्ति भुंक्ते भुजतीति तज्ज्ञाः।
वदन्ति, नानागणितप्रयोगै-
र्ग्रहानुरूपैः श्रुतिमन्त्रपूर्व्यैः ॥३१४॥

विभुः—२४०

विविधं भवतीति विभुः। विपूर्वात् भवतेः ***'विप्रसंभ्यो ड्वसंज्ञायाम्'*** (पा० ३।२।१८०) इत्यनेन 'डु' प्रत्ययः।

मन्त्रलिङ्गञ्च—

समेत विश्वे वचसा पतिं दिव एको विभूरतिथिर्जनानाम्।

अथर्व० ७।२२।१॥

वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम्।
तस्मिन्निदं सं च विचैति सर्वं स ओतः प्रोतश्च विभूः प्रजासु॥

यजुः ३२।८॥

विविधं भवतीत्यर्थे मन्त्रलिङ्गञ्च—

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः।
तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः॥ यजु० ३१।१॥
इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः॥

ऋग्० १।१६४।४६॥

ये अर्वाङ् मध्य उत वा पुराणं वेदं विद्वान्समभितो वदन्ति।
आदित्यमेव ते परिवदन्ति सर्वे अग्निं द्वितीयं त्रिवृतं च हंसम्॥

अथर्व० १०।८।१७॥

एतैर्निदर्शनभूतैर्मन्त्रैरसंशयं ज्ञायते यत् स एक एव सर्वकला व्यश्नुवानो विविधेषु कृतविकल्पेषु भवति। विविधानि लोकलोकान्तराण्यात्मना भावयतीति वा विभुर्विष्णुरुक्तो भवति। लोके प्रतिपंद स विभाव्यते तस्माद् 'विभु'रुक्तो भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवन्ति चात्रास्माकम्—

चराचरे ज्ञाननयेन[1] वेद्ये
विभुर्भवत्येव विचित्ररूपैः ।
स एव सूर्यः स उ चन्द्रमा वा
सोऽग्निः स इन्द्रः स उ वा गरुत्मान्।।३१५।।

व्याप्ते विभौ विश्वमिदं समस्तं
लोके भवत्येकगृहेण तुल्यम् ।
तथा यथा वाप[2]-गुणेन युक्ता
भवन्ति पुत्रा विविधाश्च पौत्राः ।।३१६।।

एवं स विष्णुर्विविधस्वरूपै-
र्विभावयत्येव निजं स्वरूपम् ।
व्यवस्थया विश्वमिदं दधानो
विदत्सु बुद्धिं दृशये युनक्ति ।।३१७।।

सत्कर्त्ता—२४१

'अस् भुवि' आदादिकः भुवि भवत्यर्थे, अस्तीति सत्। अस्तेर्वर्त्तमाने लट्, तस्य लटः स्थाने 'शतृ'—***'लटः शतृशानचावप्रथमासमानाधिकरणे'*** (पा० ३।२।१२४), अस्तेरकारस्य ***'श्नसोरल्लोपः'*** (पा० ६।४।१११) इत्यनेन लोपः=स्+अत्=सत्।। 'डुकृञ् करणे' भौवादिकः, तस्मात् कर्तृ कारके ***'ण्वुल्तृचौ'*** (पा० ३।१।१३३) इत्यनेन 'तृच्' प्रत्ययः, करोतीति 'कर्त्ता'। सच्चासौ कर्त्ता च=सत्कर्त्ता। सदैव वर्त्तमानः कर्त्ताऽस्य विश्वस्येति कृत्वा 'सत्कर्त्ता' भगवान् सर्वं व्यश्नुवानो विष्णुरुक्तो भवति।

सतः सत्स्वरूपस्य प्राकृतस्य जगतः कर्त्ता सत्कर्त्ता विष्णुः प्रकृतिं सत्तया वर्तमानां साधनीकृत्य जगत् कुरुत इत्यर्थः।

लोकेऽपि च पश्यामः—प्रजां प्रजिजनिषुः प्रकृतिरूपां स्त्रियं वर्तमान उपस्थितामुपादायैव प्रसवितुमुपकल्पयति जीवम्। एषैव व्यवस्था सर्वत्र लोके प्रतिपदमुदाहरणत्वेनोह्यते।

---

१. ज्ञाननयेन=ज्ञानचक्षुषा। २. वपतीति वापो जनकः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

न तं विदाथ य इमा जजान अन्यद् युष्माकमन्तरं बभूव।

ऋक् १० ।८२ ।७ ।।

प्रजापतिश्चरति गर्भे अन्तरदृश्यमानो बहुधा विजायते।
अर्धेन विश्वं भुवनं जजान यदस्यार्धं कतमः स केतुः।।

अथर्व० १० ।८ ।१३ ।।

'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।
दिवं च पृथिवीं चान्तरिक्षमथो स्वः।। ऋग्० १० ।१९० ।३ ।।
विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे।
इन्द्रस्य युज्यः सखा।। ऋग्० १ ।२२ ।१९ ।।

सत्कर्त्ता=सम्मानकर्त्ताऽप्येतस्मादेव। सन्तं श्रद्धया युनक्ति पूजयतीति वा।

भवति चात्रास्माकम्—

कर्त्ता विकारान् कुरुते प्रकृत्या
विकार्यकर्त्रोश्च समानसत्ता।
सत्कर्तृशब्देन स विष्णुरुक्तो
जगच्च तं सत्कुरुते सदैव।।३१८।।

सत्कृतः—२४२

'सत्कृतः=पूजितः'। 'धातूनामनेकार्था भवन्ती'ति कृत्वा सत्कारः पूजा सम्मानना वा।

मन्त्रलिङ्गञ्च—

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत।
स देवाँ एह वक्षति।। ऋग्० १ ।१ ।२ ।।
गायन्ति त्वा गायत्रिणो अर्चन्त्यर्कमर्किणः।
ब्रह्माणस्त्वा शतक्रत उद् वंशमिव येमिरे ।। ऋग्० १ ।१० ।१ ।।
अर्चत प्रार्चत प्रियमेधासो अर्चत। अथर्व० २० ।९२ ।५ ।।

यतो हि स विष्णुः सत्कृतोऽस्त्यतो जीवाः प्रार्थयन्ते—

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ।।

ऋग्० १ ।८९ ।८ ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एवं बहुत्र वेदे तस्यैव स्तुतिर्गीता वर्त्तते। तस्मात् स 'सत्कृतो' विष्णुरुक्तो भवति। भगवद्गुणयुक्तः पुरुषोऽपि 'सत्कृतः' भवति।

भवति चात्रास्माकम्—

स सत्कृतो विष्णुरनन्तकर्मा
पूर्वैर्नवैश्चाप्यृषिभिः सदैव ।
स्तुतोऽथ गीतो विविधेन साम्ना
तं सत्कृतं विष्णुमुदीरयन्ति।।३१६।।

लोकेऽपि च पश्यामः—सस्यं क्षेत्रपतिना सत्कृतं भवति। गावो गोपतिना सत्कृता भवन्ति। पुरोहितो यजमानेन सत्कृतो भवति। एवं लोकं दृष्ट्वा विविधोहा ऊहितव्या भवन्ति।

साधुः—२४३

'साध संसिद्धौ' सौवादिकः, तस्मात् ***'कृवापाजिमिस्वदिसाध्यशूभ्य उण्'*** (उणादि १।१) इत्यनेन 'उण्' प्रत्ययः। साध्नोतीति 'साधुः'। ण्यन्तो वा साधयतीति वा 'साधुः'।

साध्नोति विश्वसर्जनात्मकं कर्मेति भगवान् सर्वव्यापको विष्णुरिति 'साधुः'साधयति सिद्धेन जगता जीवानां शुभाशुभोदयं कर्म, तस्मात् स विश्वकर्मा 'साधु'रुक्तो भवति। कृतं जगत् सहजस्वभावेन सरलतया वा गमयतीति कृत्वा वा भगवान् विष्णुः 'साधु'रुक्तो भवति।

मन्त्रलिङ्गञ्च—

बृबदुक्थं हवामहे सृप्रकरस्नमूतये। साधुकृण्वन्तमवसे।।

ऋग्० ८।३२।१०।।

वाचस्पतिं विश्वकर्माणमूतये मनोजुवं वाजे अद्या हवेम ।
स नो विश्वानि हवनानि जोषद् विश्वशम्भूरवसे साधुकर्मा।।

ऋग्० १०।८१।७।।

लोकेऽपि च पश्यामः—प्रतियोनि यद्यद् यथाविधं च शरीरं विविधविकल्पनया विक्लृप्तं सत् जीवाय जीवकृतकर्मफलोदयाय भगवता दत्तमस्ति, तच्छरीरं सरलतमं वहति क्रियाम्। साधुकर्मैव जीवोऽपि स्वकानि यन्त्राणि सरलयति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रियाविधौ। यथा भगवान् विश्वकर्मा, तथैव जीवोऽपि विविधवस्तूनां कर्तृत्वात् साधुकर्मा वोच्यते। एवं लोकत ऊहनीयं भवति।

भवतश्चात्रास्माकम्—

स साधुकर्मा स हि विश्वकर्मा
स साधनैः साध्यमिदं तनोति ।
सारल्यसद्भावमुपेत्य विश्वं
तत् तं स्तुवन् विष्णुमनक्ति साधुम्।।३२०।।

सुज्ञानमेवं सुलभं सुगम्यं
कर्मास्ति देवस्य ततः स साधुः।
तज्ज्ञानसिद्धौ मनुजोऽपि तद्वत्
साध्नोति यन्त्राणि यथार्थकानि ।।३२१।।

जह्नुः—२४४

'ओहाक् त्यागे' जौहोत्यादिकः, तस्मात् ***'जहातेर्द्वेऽन्त्यलोपश्च'*** (उणा० ३।३६) सूत्रेण नुः प्रत्यय। जहातीति 'जह्नुः' भगवतो विष्णोः कर्मणि दोषो नास्तीति कृत्वा 'जह्नुः' शुद्धस्वरूपः। भगवान् स्वके कर्मणि दोषं जहाति त्यजतीति कृत्वा भगवान् जह्नुरुक्तो भवति शुद्धस्वरूपत्वात् तस्य।

मन्त्रलिङ्गञ्च—

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।।

यजु० ३१।१८।।

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम् ।
कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः।।

यजुः ४०।८।।

तत्सवितुर्वरेण्यं[1] भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।।

यजु० ३०।२।।

---

१. भर्गः=शुद्धः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यथा विष्णुः स्वयं शुद्धस्वरूपोऽस्ति, तथैव स जीवानां देहान् शुद्धान् भावयितुं तेषां मलान्यपनेतुं काये मलोत्सर्गाय नवद्वारान् निर्ममे। स्त्रीकाये द्वादशद्वारान्। एकं गर्भाशयद्वारम् द्वे च दुग्धद्वारे। शरीरधातवोऽपि प्रतिधातूत्थं दोषमहरहः स्रोतोभिर्बहिष्कुर्वन्ति। एवं कृत्वा जहाति दोषं दोषान् वा 'जह्नुः' शरीरमप्युक्तं भवति।

वृक्षादयोऽपि पत्र-पुष्प-फलत्यागेन कर्मणा तमेव जह्नुं प्रतिपदं प्रकटयन्ति स्तुवन्ति प्रकाशयन्ति वा। सारार्थस्त्वयं यद् भगवान् स्वयं शुद्धः सन् तत्कृतिमपि जह्नुरूपेण भावयितुं दोषापहाराय प्रतिपदं दोषनिर्मोक्तृभिः स्रोतोभिः संयुनक्ति।

भवति चात्रास्माकम्—

जहाति दोषानुत वापि दूष्यान्
जह्नुः स विष्णुः स विशुद्धरूपः।
अकाय उक्तः स विशोक उक्तो
भर्गः स उक्तस्तमसः परस्तात् ।।३२२।।

स जाह्नवं विश्वमिदं वितन्वन्
दोषापहृत्यै कुरुते च खानि ।
यथार्हदोषस्य परापसृत्यै
स्रोतांस्यनल्पानि च वा तनोति ।।३२३।।

स स्थावरेऽनन्तविभेदभिन्ने
वृक्षे लतायां किमु वापि गुल्मे।
यथाप्तदोषस्य विमोक्षणाय
पत्रावपातं नियतं विधत्ते ।।३२४।।

'जह्नुः' कश्चिद्राजर्षिर्वा, तद्योगाद् जाह्नवी गंगाप्युच्यते। गंगाजले मानसदोषापहारस्य विशेषशक्तेः सद्भावाद् गंगापि जाह्नवीपदवाच्या भवति। स्वार्थेऽण् 'जह्नुरेव जाह्नवी वा'।

नारायणः—२४५

'नृ नेये' भौवादिकः, नृ नये इत्यप्येके पठन्ति। 'नृ नये' रौधादिकः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आभ्यां पचा'द्यच्' तेन 'नरः' इति। नृणातीति 'नरः' नयतीत्यर्थः। 'अयन' माश्रयः। एतेर्ल्युटि अयनम्। जलानि द्रवन्ति गच्छन्ति गमयन्ति वा। नद्यादिषु नयन्ति वहन्ति स्थानात् स्थानान्तरं प्राप्य प्रापयन्तीति कृत्वा 'नरा' आपः जलं वा। सृष्ट्युत्पत्तिवर्णने वेदः—

अम्भः किमासीद् गहनं गभीरम्। ऋग्० १० ।१२६ ।१ ।।

पुनश्च—

तम आसीत् तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वमा इदम्।
तुच्छ्येनाभ्वपिहितं यदासीत् तपसस्तन्महिना जायतैकम्।।

ऋग् १० ।१२६ ।३ ।।

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न ।
यो अस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद।

ऋक्० १० ।१२६ ।७ ।।

एवमृचां पर्यालोचनेन ज्ञायते यत् सृष्टेर्मूर्तावस्थायाः प्राक् सलिलमेव सलिलमासीत्। तेभ्यः सलिलेभ्यः पृथिव्युदबभूव। यथा साम्प्रतमपि समुद्रे पर्वतानां सद्भाव उपलभ्यते। ते नरास्ता आपो वा कमाश्रयीकृत्यासन्नित्याशंकायां वक्तव्यं भवति यत्—परमात्मानं सर्वलोकाध्यक्षमाश्रयीकृत्यासन्निति। नरो 'नारो' वा शब्दः सलिलार्थेऽप्रसिद्धः। वेदार्थतत्त्वदर्शिना मनुना अपामर्थे नारा शब्दो निर्दिष्टः, विनियुक्तो वा। तद्यथा—

आपो नारा इति प्रोक्ता आपो वै नरसूनवः।
ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः ।। मनु० १ ।१० ।।

यतस्ता नारा नराख्यस्य परमात्मनः सूनवोऽपत्यानि, ***'तस्येदम्'*** (पा० ४ ।३ ।१२०) इत्य'ण्' प्रत्ययः। यद्यप्यणि कृते ङीप् प्रत्ययः प्राप्तस्तथापि छान्दसत्वेन स्मृतिषु व्यवहारात् 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति पाक्षिको ङीप् प्रत्ययः। तस्याभावपक्षे सामान्यलक्षणप्राप्ते 'टापि' प्रत्यये कृते 'नारा' इति रूपसिद्धिः।

आपोऽस्य परमात्मनो ब्रह्मरूपेणावस्थितस्य पूर्वमाश्रय इत्यसौ 'नारायणः' गोविन्दराजेन तु-आपो इति पठितं व्याख्यातं च-'नरायणः' इति प्राप्ते ***अन्येषामपि दृश्यते*** (पा० ६ ।३ ।१३७) इति दीर्घत्वेन नारायण इति रूपम्। अन्ये 'त्वापो नारा' इति पठन्ति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लोकेऽपि च पश्यामः—जायमानो गर्भो जरायुस्थे जल एव वृद्धिमेति। प्रसवनात् प्राक् तासामपां बहिः प्रस्रवणं भवति। ता आपो यथा मातरमाश्रयीकृत्य सगर्भं तिष्ठन्ति, तथैव ससलिला पृथिवी च तमेवैकं सर्वाधारमाश्रयीकृत्यासीदतः स भगवान् 'नारायणः' उक्तो भवति।

द्रवतामापन्नयोरेव शुक्ररजसोर्गर्भे बीजं निमग्नं भवति। 'लोकसम्मितोऽयं पुरुषः' इति च समानं भवति लोकेन। एवं विविधमुदाहरणानामूहितव्यं भवति। तद्यथा कृषीवलस्तावत् क्षेत्रं पूर्वं वारिणा सिंचति ततोऽनुवपति बीजमिति समानं भवति सलिले बीजस्य सद्भावः पृथिव्या इव। रूपाणि चिकीर्षुः शिल्पी अयः सुवर्णं ताम्रं वा पूर्वं द्रावयति, ततोऽनु संचयेषु संचिनोति। एवं पृथिव्यंशपूर्णानि सलिलानि सर्वत्र रूपाणां बिभृतौ दृश्यानि भवन्ति, सर्वत्रैवैष क्रम ऊहायाः।

मन्त्रलिङ्गञ्च—

तमिद् गर्भं प्रथमं दधु आपो यत्र, देवा समगच्छन्त विश्वे।

ऋक्० १० ।८२ ।६ ।।

दिव्यं सुपर्णं पयसं बृहन्तमपां गर्भं वृषभमोषधीनाम्।

अथर्व० ७ ।३६ ।१ ।।

अहं सुवे पितरमस्य मूर्धन् मम योनिरप्स्वन्तः, समुद्रे।

अथर्व० ४ ।३० ।७ ।।

समुद्रे ते हृदयमप्स्वन्तः सं त्वा विशन्त्वोषधीरुतापः।

यजु० ८ ।२५ ।।

समुद्रयोनिर्वै यज्ञः (=विष्णुः)। काठ० सं० २६ ।६ ।।

अथर्व० ७ ।३६ ।१ ।।

भवति चात्रास्माकम्—

नारास्तु यं स्तम्भमुपेत्य गुप्ता[1]
नारायणं तं प्रवदन्ति तज्ज्ञाः ।
यथाश्रयत्येव जलाप्तगर्भं
माता तथा विष्णुरिदं जलाप्तम् ।।३२५ ।।

१. गुप्ता रक्षिताः। यथा गर्भो मातरि गुप्तो रक्षितो भवतीत्यवसेयम्। ये आपो नरा इत्येव पठन्ति। तत्र भवति चास्माकम्—"**नरास्तु यं स्तम्भमुपेत्य**" इत्यादिः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यथा मातुर्मध्यमे भागे गर्भ आधृतो भवति, अभितश्च मातुः शरीरं तं गर्भमावृणोति, तथैवायं नारायणो नाम भगवान् विष्णुः स्वयं स्वाधारः सन् अपामाधारो विश्वं व्यश्नुवानो लोकलोकान्तराणि जनयति। उक्तं च—

'अर्धेन विश्वं जजान'। अथर्व० १० ।८ ।१३ ।।

नरः—२४६

नर उक्तौ प्रकृतिप्रत्ययौ नारायण इति नामव्याख्याने। नयतीति 'नरः' परमात्मा। प्रवाहतो विश्वमिदं कल्पकल्पान्तं नयतीति कृत्वा विष्णुः स्वकेन नरति नृणाति वा धर्मेण सर्वं व्यश्नुवानो 'नरः' उक्तो भवति।

मन्त्रलिङ्गञ्च—

स घा यस्ते दिवो नरो धिया मर्तस्य शमतः।
ऊती स बृहतो दिवो द्विषो अंहो न तरति ।।

सामः पूर्वार्चिके ऐन्द्रकाण्डे ८ ।६ ।।

कदा क्षत्रश्रियं नरमावरुणं करामहे।
मृडीकायोरुचक्षसम्।। ऋग्० १ ।२५ ।५ ।।

व्यासवचनं च—

नयतीति नरः प्रोक्तः परमात्मा सनातनः।

अन्यच्च—

नराज्जातानि तत्त्वानि नारायणान्यतो विदुः।
तान्येव चायनं तस्य येन नारायणः स्मृतः ।। महाभारते।।

जीवोऽपि 'नर' उच्यते—नयति सर्वांगसमुदितं शरीरं प्राप्तव्यस्य प्राप्त्यै। मनुष्योऽपि नर एतस्मादेवोच्यते—

न कर्म लिप्यते नरे। यजु० ४० ।२ ।।

प्रतिपदं नयतिधर्मेण संश्लिष्टं विश्वं तमेव प्रकटयति।

भवति चात्रास्माकम्—

प्रवाहतो विश्वमिदं समस्तं
नृणाति विष्णुर्नर उच्यतेऽतः।
जीवोऽपि सर्वांगसमूढकायं
नृणन्नराख्यां लभते सदैव।।३२६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

असङ्ख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः।
सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः।।४०।।

२४७ असङ्ख्येयः, २४८ अप्रमेयात्मा, २४९ विशिष्टः, २५० शिष्टकृत्, २५१ शुचिः।
२५२ सिद्धार्थः, २५३ सिद्धसंकल्पः, २५४ सिद्धिदः, २५५ सिद्धिसाधनः।।४०।।

असंख्येयः—२४७

समुपसर्गः सम्यगर्थे, समानभावैकीभावार्थे वा। सम्यक् समानभावेन=एकीभावेन वा ख्यातुमर्हः शक्यो वा 'संख्येयः'। न संख्येयोऽ'संख्येयो' भगवान् विष्णुः।

सम्पूर्वात् 'ख्या प्रकथने' इत्यादादिकादार्धधातुकविषये चक्षिङः ख्याञादेशो वा ***''अचो यत्''*** (पा० ३।१।९७) इति सूत्रेण 'यति' ***''ईद्यति''*** (पा० ६।४।६६५) इति सूत्रेण यति परे आत ईद्विहिते गुणे च 'संख्येयः' इति। नञा समासे नञो नलोपे चा 'संख्येयः'।

संख्याविषयमतिक्रान्तोऽसंख्येयः। स्वयं परात्परो भगवान् विष्णुरनन्तसत्तोऽनन्तज्ञानोऽनन्तानन्दोऽनन्तगुणोऽनन्तविभूतिश्च कथमेकद्विरित्यादिसंख्यागोचरः स्यात्? सर्वथा देशतः कालतो वस्तुतश्चापरिच्छेद्यः=अपरिमेय इति।

अथ च संख्याः=समानप्रख्याः, समानज्ञाना भवन्ति। अत एव समानप्रख्यावतां समूहः पञ्च, पञ्चायतनं वाभिधीयते परन्तु यस्माद् भिन्नस्तत्समानप्रख्यः कश्चित् स्यादेव न, तत्राभिधेयार्थाभावे संख्यातीते संख्या न प्रवर्तते।

एकशब्दस्त्वौत्सर्गिकत्वाद् व्यवहारार्थं प्रयुज्यत एव। तथा चैकमात्रके सर्वव्यापकेऽसंख्येये विष्णौ संयोगवियोगौ गुणनविभजने च न युज्येतेऽतोऽ'संख्येयः' उक्तो भवति भगवान्। व्यवहारार्थमेकशब्दप्रयोगस्तु बहुत्र ब्रह्मणि यथा—

एको विश्वस्य भुवनस्य राजा। ऋग्० ६।३६।४।।
दिव्यो गन्धर्वो भुवनस्य यस्पतिरेक एव। अथर्व० २।२०।१।।
एको दाधार भुवनानि विश्वा। ऋग्० १।१५४।४।।
य एक इत्तमु ष्टुहि। ऋग्० ६।४५।१६।।
एको विभुरतिथिर्जनानाम्। ऋग्० ७।२१।१।।
यो देवानां नामधा एक एव। अथर्व० २।१।३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्रह्मणि संख्या न प्रवर्तते, इति दार्ढ्येन समर्थयति वेदः—

न द्वितीयो न तृतीयश्चतुर्थो नाप्युच्यते।
न पञ्चमो न षष्ठः सप्तमो नाप्युच्यते ।
नाष्टमो न नवमो दशमो नाप्युच्यते ।
स एष एकवृदेक एव।। अथर्व० १३।४।१६-१८,२०।।

भवति चात्रास्माकम्—

विष्णुस्त्वसंख्येयपदेन वाच्यो
विश्वं प्रशास्त्येकरसेन वर्त्मना[१] ।
न तत्समः कोऽपि च दृष्टपूर्व-
स्तस्मान्न संख्याविषयोऽस्ति विष्णुः।।३२७।।

अथापि चैकनवतितमत्रिषष्टितमद्विचत्वारिंशत्तमेषु श्लोकेषूक्तानि षड्विंशत्त्युत्तर-सप्तशततमाष्टषष्ट्युत्तरचतुःशततमद्व्युत्तरत्रिशततमानि नैकनैकात्मनैकरूपनामानि च व्याख्यातानि भवन्ति।

एषां मन्त्रलिङ्गानि च—

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ।।
ऋग्० १।१६४।४६।।

स धाता स विधर्ता स उ वायुर्नभ उच्छ्रितम्।
सोऽर्यमा स वरुणः स रुद्रः स महादेवः ।।
सोऽग्निः स सूर्यः स उ एव महायमः ।। अथर्व० १३।४।३-५।।
तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः ।
तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः।। यजु० ३२।१।।

वस्तुत एक एवात्मा कर्मभेदात् शक्तिभेदाच्च बहुधा गीयते। यतः कर्मभेदान्नामभेदोऽस्ति, ततश्चैतेन नैककर्मकृदिति त्रिषष्टितमश्लोकोक्त-मेकोनसप्तत्युत्तरं चतुःशततमन्नाम व्याख्यातं भवति।

---

१. एकरसेन वर्त्मना=परिवर्तितुमशक्येन वेदेनेत्यर्थः। एतद्व्याख्यानेनैव ६१ एकनवतितमश्लोकोक्तं पञ्चविंशत्युत्तरं सप्तशततममेक इति नाम व्याख्यातं भवति। तथा षोडशोत्तरशततमश्लोकोक्तं पञ्चषष्ट्युत्तरं नवशततममेकात्मेति नाम च व्याख्यातं भवति। आत्मशब्दः स्वरूपवचनः। एकात्मा= एकस्वरूप इत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

नैकात्मा नैकमायश्च, नैकरूपोऽथ नैककः ।
एकात्मैकश्च नामानि, व्याख्यातानि प्रसङ्गतः ।।३२८।।

अप्रमेयात्मा—२४८

प्रमाणैः प्रमातुमशक्योऽ'प्रमेयः'। 'आत्मा' स्वरूपवचनः। अप्रमेय आत्मा स्वरूपमस्यास्तीत्य'प्रमेयात्मा'। अप्रमेय इति नामव्याख्याने विशेषमुक्तं तत्र द्रष्टव्यम्। नामसंख्या-४६, श्लोके १६ एकोनविंशतितमे।

लोकोदाहरणं यथा-यावत् प्रमाता प्रमेयाद् भिन्नो न भवति तावन्नासौ प्रमाणैः प्रमेयं प्रमातुं शक्नोति। तद्यथा-जलस्थः कश्चित् स्वयं जलमयः सन् जलरूपेण मेयेन जलं महाजलाशयं वा मातुं न शक्तो भवतीत्यमुथैव न हि ब्रह्मतो भिन्नं तत् किंचिन्मात्रमप्यस्ति यत्र तद् ब्रह्म न स्यात्। अतः प्रमाणानां तत्राशक्यत्वमुक्तं भवति।

तथा च मन्त्रलिङ्गम्—

न तस्य प्रतिमाऽअस्ति यस्य नाम महद् यशः। यजु० ३२।३।।
यतः सूर्य उदेत्यस्तं यत्र च गच्छति।
तदेव मन्येऽहं ज्येष्ठं तदु नात्येति कश्चन।। अथर्व० १०।८।१६।।
विमितेऽमितं स्कम्भं तं ब्रूहि कतमः स्विदेव सः। अथर्व० १०।७।३६।।
नैनमूर्ध्वं न तिर्यञ्च न मध्ये परिजग्रभत्।। यजु० ३२।२।।

भवति चात्रास्माकम्—

को वा स्वयं स्वेन निजात्मकं वा
प्रमाणमात्रैः प्रभवेत् प्रमातुम् ।
अतोऽप्रमेयात्मपदेन विष्णुः
सनातनः सर्वगतो ह बोध्यः ।।३२६।।

छन्दोभेदेन भवतः पुनरस्माकम्—

यथा जलं जलेनैव मातुं नार्हति कर्हिचित्।
मातृमेयप्रमाणानां सत्ता नास्ते पृथग्यतः।।३३०।।
न तद् दृश्यं न तच्छ्रव्यं विष्णुर्यत्र न विद्यते ।
अप्रमेयस्वरूपोऽतः परमात्मात्र गीयते ।।३३१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विशिष्टः—२४६

'शिष्लृ विशेषणे' रौधादिकः। सर्वं व्यश्नुवानस्य भगवतो विष्णोर्महिमा विविधविशेषणानुस्यूतो गीयतेऽतो 'विशिष्टो' विष्णुरुच्यते।

मन्त्रलिंगं च—

बृहद्भानो यविष्ठ्य।

ऋग्० १।३६।१५।।

नि षु सीद गणपते गणेषु त्वमाहुर्विप्रतमं कवीनाम् ।
न ऋते त्वत् क्रियते किंचनारे महार्क मघवञ्चित्रमर्च।।

ऋग्० १०।११२।६।।

तदेवाग्निस्तदादित्यस्तद् वायुस्तदु चन्द्रमाः।
तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः।। यजु० ३२।१।।
स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्।
कविर्मनीषी परिभूः स्वयंभू०।। यजु० ४०।८।।

इत्यादिनिदर्शनमात्रमुक्तम्।

लोकेऽपि च पश्यामः-विशिष्टशक्तिमन्तमर्थिनो बहुविधविशेषणैः स्तुवन्ति। योऽयं बहुविधविशेषणविशिष्टप्रयोगोदयः, स एतस्यैव भगवतो विशिष्टेति नाम्न एवान्वाख्यानमात्रम्।

एवं बहुविधमनुरूपोपकारक्रियाकलापसाधकैर्ज्ञानविज्ञानवर्त्मभिरेक एव बहुधा गीयते। तद्यथा-एक एव निम्बो विविधकार्यसाधकः सन् विविधगुणेन तत्तज्ज्ञाननिष्णातैर्गीयते। एवं बहुविधमूहानामूहितव्यं भवति लोकं दृष्ट्वा। लोक एव वास्तविकं व्याख्यानं भगवतो विज्ञानस्य।

भवति चात्रास्माकम्—

बहुत्र वेदेषु स एक एव
विशेषणैर्गीत इहास्त्यनेकैः ।
लोकेऽर्थिनो ज्ञानधनाप्तमर्थ्यं
स्तुवन्त्यलंकारशतैः[1] पुनस्तम्।।३३२।।

---

१. अलंकारशतैः=विविधविशेषणैरिति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शिष्टकृत्—२५०

'शासु अनुशिष्टौ' आदादिकः, तस्मात् 'क्त'-प्रत्यये ***'शास इदङ्हलोः'*** (पा० ६।४।३४) इत्यनेन हलादौ किति शास उपधाया इत्वम्, तेन 'शिष्ट' इति शब्दः साधुर्भवति। शिष्टं प्रवाहतोऽनुशासितं जगत् करोतीति 'शिष्टकृद्' विष्णुरुक्तो भवति।

प्रतिप्राणि जन्मत एव स्वयं सिद्धं ज्ञानमनुनयन् (जन्मतः) प्राप्तेन ज्ञानेनैव कार्यं प्रवहन्ति। तत्र मनुष्योऽपि स्वयं मनुष्यं ज्ञानगुणेनानुवृद्धं कुरुते, पशून् पक्षिणश्च। योऽयं ज्ञानक्रमः स कुत आयात इति जिज्ञासायां वक्तव्यं भवति-यच्छिष्टकृता भगवता सर्वं चतुर्विधयोनिमयं विश्वं प्रवाहतोऽनुशासनानुस्यूतं यथापूर्वं व्यवस्थाप्यते।

अत्रेदं ज्ञातव्यं यत् स्वल्पज्ञानवता जीवेन योन्यन्तरमवाप्तवता भिन्नं भिन्नं ज्ञानं स्वभावोदयेनैव स्व-स्व-क्रियासाधनाय व्यवह्रियते। अतोऽवश्यं वक्तव्यं भवति यत् शिष्टं करोतीति 'शिष्टकृत्' स इति।

भवतश्चात्रास्माकम्—

स्वल्पान्तरैर्विश्वमिदं विभिन्नं
यद्यौन[1]भेदैश्च विभूषितं यत् ।
प्रवाहतः शिष्टमिदं समस्तं
स शिष्टकृत् तत् कुरुतेऽप्रकम्प्यम्[2] ।।३३३।।

प्रवाहतोऽशेषधरेण वीणाः[3]
सूर्यादयो यान्ति विना प्रमादम् ।
न नूतनं शास्ति न कार्यजातं
शिष्टानुशिष्टं विधिवद् विधत्ते ।।३३४।।

तद्यथा लोके पश्यामः-वानराणां युद्धम्, वानराणां निर्विषीकरणे बुद्धिवैभवं स्वकस्य भोज्यस्य पदार्थस्य विषये। एकदा १९६१ वैक्रमाब्दे स्नानार्थमक्षयतृतीयायां गतेन मया प्रत्यक्षं पश्यद्भ्यः श्रुतं यत्-

१. योनीनां समूहो बहुत्वं वा यौनम्। २. अप्रकम्प्यम्= अन्यथाकर्तुमशक्यम्। ३. वीणाः=भ्रमणाय वेगीकृताः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बकासुरस्थाने, 'बक्सर' इति नाम्ना साम्प्रतं प्रसिद्धे तीर्थे तत्रत्यैर्वानरेभ्यो विविधं दुःखं प्राप्तवद्भिस्तेषां वानराणां मारणाय तेषां कृते निर्मिते क्षीरे विषं संमिश्रितं, क्षीरं च तत् खारीमितमासीत्। तत्र वानरास्तत् क्षीरं घ्रायं घ्रायं त्यजन्ति स्म। तत्रैको वानरो झटिति वनं गत्वा कंचित् काष्ठमानीतवांश्च तत् काष्ठं वानरैर्भित्त्वा तस्मिन् क्षीरे तावत्कालं निर्वापितं यावत् तन्निर्विषतामुपगतम्, पुनः पुनः निर्वापणं कर्म त्यजद्भिस्तैर्वानरैस्तन्नासया घ्रायते स्म, निर्विषे जाते वृद्धवानरेणानुशिष्टैस्तैस्तद् भोज्यं पश्यत्स्वेव जनेषु भुक्तम्। विस्मयचकिताश्च दर्शका अभूवन्।

अतो ज्ञायते शिष्टान् करोतीति 'शिष्टकृत्' स्वकेन शिष्टकृद्धर्मेण सकलं विश्वं व्यश्नुवान एवास्ते। वयो नामा पक्षी स्वनीडनिर्माणे लब्धकीर्तिक एव श्रूयतेतराम्। अन्यच्च श्येनात् पतत्रिणः संविजन्ते।

मन्त्रलिङ्गञ्च—

यथा श्येनात् पतत्रिणः संविजन्ते अहर्दिवि सिंहस्य स्तनथोर्यथा।
एवा त्वं दुन्दुभेऽमित्रानभिक्रन्द प्रत्रासयाथो चित्तानि मोहय ।।

अथर्व० ५।२१।६।।

पशवो विविधा औषधीः स्वत एव जानन्ति। मन्त्रं च यथा

वराहो वेद वीरुधं नकुलो वेद भेषजीम् ।
सर्पा गन्धर्वा या विदुस्ता अस्मा अवसे हुवे ।।
याः सुपर्णा आङ्गिरसीर्दिव्या या रघटो विदुः।
वयांसि हंसा या विदुर्याश्च सर्वे पतत्रिणः ।
मृगा या विदुरोषधीस्ता अस्मा अवसे हुवे ।।
यावतीनामोषधीनां गावः प्राश्नन्त्यघ्न्या यावतीनामजावयः।
तावतीस्तुभ्यमोषधीः शर्म यच्छन्त्वाभृताः।।

अथर्व० ८।७।२३-२५।।

इत्यादि निदर्शनमात्रमुक्तं शिष्टकृतः शिष्टकृत्त्वं विज्ञापनाय। लोकं दृष्ट्वा विविधमुदाहरणानामूहितव्यं भवति। लोके एव वास्तविकं व्याख्यानं भगवतो विज्ञानस्य।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शुचिः—२५१

'ईशुचिर् पूतीभावे' दैवादिकः, शुच्यतीति 'शुचिः'। ***'इगुपधात् कित्'*** (उणा० ४।१२०) इत्यनेन 'इन्' प्रत्ययः, कित्त्वात् गुणाभावः। शुचिः=शुद्धः।

मन्त्रलिङ्गञ्च—

राज्ञो नु ते वरुणस्य व्रतानि बृहद् गभीरं तव सोम धाम ।
शुचिष्ट्वमसि प्रियो न मित्रो दक्षय्यो अर्यमेवासि सोम।।

ऋ० १।९१।३।।

अग्नी रक्षांसि सेधति शुक्रशोचिरमर्त्यः।
शुचिः पावक ईड्यः।। अथर्व० ८।३।२६।।

लोकेऽपि च पश्यामः-भगवान् सर्वव्यापको विष्णुः शुचिः सन् सर्वं विश्वं वर्षाणां वर्षणव्यवस्थापितनियमेन पृथिवीं शुच्यति पवित्रीभावं नयति। भगवतः शौचं कर्मान्वाख्यानमात्रमेव मनुष्यादीनां जलेन देहशोधनं च ज्ञातव्यं भवति। 'लोकसम्मितः पुरुषः' इति कृत्वा। यथा मेघजलं पार्थिवं मलं शोधयति, जीव-जन्तूंश्च जलप्रवाहेणापनयति, तथैव स्नानं कर्म मनः प्रसादयति, इन्द्रियाणि चौजसा योजयति, शारीरक्रिमींश्चापनयति।

वानस्पत्यं चौजसा युज्यते शुध्यति च। तत्र भागवतं शुचिधर्ममन्वाख्यायन्तः पशवः पक्षिणश्चापि स्नानं कृत्वा स्वकमात्मानं शोचयन्ति। एवं जगति सर्वं व्यश्नुवानस्य विष्णोः शुचिस्वरूपं सर्वत्र दृश्यत इति कृत्वा शुचिर्विष्णुरुक्तो भवति।

भवति चात्रास्माकम्—

शुचिर्हि विष्णुः शुचिमद् विधत्ते
जगत् सदा वारिधरप्रपातैः[1] ।
आमर्त्यकीटान्तमिदं समस्तं
स्नात्वा वपुः शुच्यति याति चौजः।।३३५।।

सिद्धार्थः—२५२

सिद्धः-सत्यश्चासावर्थः सिद्धार्थः सिद्धनामार्थ इति। तद्यथा यत् पदार्थजातं

१. वारिधर-प्रपातैः=मेघानां जलधारापातैरिति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यदोत्पद्यते तदा यो हि रसोदयः पृथिव्यां भवति, स्व-स्व-ऋतुकृतः स तस्य मूले भवति। सर्वप्रथमं बीजं मूलरूपेण परिणमते, ततोऽनु यथाकालं तद्बीजं स्तम्भरूपेण परिवर्धते। यावता कालेन स्तम्भरूपेण वर्धते, तावत्कालजो यो रसोदय ऋतुकृतः स स्तम्भस्तेन गुणेन युज्यतेऽतः स गुणस्तस्मिन् स्तम्भ उपचितो भवति। तस्मात् मूलगुणाद् भिन्नगुणस्तम्भ इत्युपपन्नः।

ततोऽनु यदा क्षुपे बीजोदय आरभते स तस्मात् क्षीरोदयादारभ्य फलपरिपाककालं यावत् यावन्तं कालमुपादत्ते तावत्के काले य ऋतुकृतो रसोदयस्तं गुणं स निष्पद्यमानो बीजात्मको फलोदय आददान आस्ते, तमेव च गुणं तन्निष्पन्नं फलं व्यनक्ति। एष वै प्रकारः क्षुपेषु ज्ञानस्य।

चिरस्थायिषु तु यदा नूतनपल्लवोदयस्तदारभ्य तत्फलपाकान्तं यः कालः, तन्मध्यपतितानामृतूनां यावतामतिक्रमणं तत्र तं तमृतुकृतं रसोदयमनुपश्यता विपश्चिताध्यवसेयं यदेतत् मूले पत्रे त्वचि पुष्पे फले च पृथक् पृथक् गुणोदयं रक्षति। यद्रसप्रधानं पंचांगे पृथक् पृथगयं भवति तद्रसानुसंपृक्तं वातपित्तकफानां वृद्धि-कोपप्रशमनं व्यनक्ति। स अर्थे पदार्थे सिद्धः सत्यत्वेन निष्ठः सन् स्वकं रूपं सदैव व्यनक्ति। एष च क्रमः सर्वत्र सदातोऽव्याहत आयातीति कृत्वा तस्यैव भगवतो व्यवस्थां व्यनक्तीति कृत्वा स सर्वत्र व्यश्नुवानो भगवान् 'सिद्धार्थः' उक्तो भवति।

एवं स सिद्धार्थः प्रभुः चतुर्विधयोनिं सिद्धार्थत्वेन व्याप्य तिष्ठति। यो वृक्षो नवोत्तरं दशमं मासमुपादत्ते पुष्पोदयात् फलपरिपाकान्तं यावत् स ब्राह्मणो वृक्षो रसायनो वा रसायनवृक्षो वा। तद्यथा-आमलकी वृक्षो रसायनवृक्षः, चतुरङ्गुलवृक्षो रसायनवृक्षः। क्षुपेषु च यथा-गोधूम-क्षुपः कार्त्तिके मास्युप्यते, चैत्रान्ते परिपाकमेति। भूगोलमपेक्षीकृत्य यत्र पूर्वं गोधूमा उप्यन्ते, तत्र चैत्रतः पूर्वं शीघ्रं वा लूयन्ते। तत्र षट्सु मासेषु यो योंऽशस्तस्य क्षुपस्य बहिरुद्याति, स क्षुपस्तत्तत्कालकृतं गुणं स्वात्मन्यधितिष्ठति। प्रकृतिभूतं गुणं स न त्यजति, स्वभावस्य सिद्धत्वात्। कुतः, स्वयं जातेन स्वयंभुवा वा तस्य व्यवस्थापनात्। तद्यथा समान एव काले गोधूमा यवा वोप्यन्ते। तत्र यवा रूक्षाः शीता लघवो मलवर्धकाश्च, परन्तु न गोधूमाः।

शरीरप्रभावमधिकृत्यार्षायुर्वेदसंहितासु द्रव्याणां गुणनिर्देशः कृत आस्ते, तं 'निघण्टुः' इति चाचक्षते पुराणाः। तत्र मासेषु १-५-९इति ब्राह्मणमासाः, ते च यथाक्रमं वैशाख-भाद्रपद-पौषा इति। २-६-१० क्षत्रियाः, ते च यथाक्रमं ज्येष्ठाश्विनमाघाः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

३-७-११ वैश्याः, ते च यथाक्रमं आषाढकार्तिकफाल्गुना इति। ४-८-१२ शूद्राः, ते च यथाक्रमं श्रावण-मार्गशीर्षचैत्रा इति । विशदं च व्याख्यातम् 'आदित्य'-नाम्नो व्याख्याने।

वेदे चतुर्धा जगतो विक्लृप्तेरुक्तत्वात्। तत्र भूगोलमधिकृत्य शीतोष्णयो-र्न्यूनाधिक्यं दृश्यते। तत्र जातानां पदार्थानां समानजातीयत्वेन सतामपि रूप-रस-गुण-वीर्य-विपाकादिषु भेदो दृश्यते। एवं स भगवान् 'सिद्धार्थः' उक्तो भवति। स्वयं प्रकाशस्य सतस्तस्य ब्रह्मणस्तत् कृतमपि सर्वं स्वयमेवात्मना स्वकमर्थ्यं च व्यनक्तीति कृत्वा स भगवानेव सिद्धार्थत्वेन विश्वं व्यश्नुवानः 'सिद्धार्थः' उक्तो भवति, इति दिङ्मात्रमुक्तम्। लोकं शास्त्रं च दृष्ट्वा विविधमुदाहरणानामूहनीयं भवति।

मन्त्रलिङ्गं च—

अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः। ऋ० १।१।५।।

भवति चात्रास्माकम्—

सिद्धस्य तस्याखिलशब्दवाच्य-
स्यात्माप्तकामस्य महाविभूतेः ।
सिद्धार्थता भाति तथैव यद्वत्
सिद्धः स्वयं भाति च सूर्य एकः।।३३६।।

सूर्य इत्युपलक्षणम्, सर्व एते ग्रहा स्वकीयां सिद्धार्थतां व्यंजन्तश्चरन्ति। सूर्य एक इति यदुक्तं तत्र मन्त्रलिङ्गञ्च—

सूर्य एकाकी चरति चन्द्रमा जायते पुनः। यजुः० ३।१०,४६।।

अर्थः=नाम्ना व्यवहर्त्तुमर्हं पिण्डभूतम्। तद्यथा-दात्रं शब्दः, सकाष्ठमुष्टीको कृतदन्तलोहो दात्रम्, लोहमात्रेण वा निर्मितं दात्रमुच्यते, लावनकर्मणि साधनीभूतम्।

सिद्धसङ्कल्पः—२५३

सिद्धः=अनायासनित्यप्राप्तः सङ्कल्पः=शक्तिः कामो वा यस्य स 'सिद्धसङ्कल्पः'। 'सम्पूर्वात्' 'कल्पते' र्भावे 'घञ्' प्रत्ययः। ***'कृपो रो लः'*** (पा० ८।२।१८) इति रेफस्य लत्वञ्च। न हि भगवता स्वसङ्कल्पितार्थसाधने प्रयत्यते, स्वतः सिद्धसर्वार्थो ह्यसौ सर्वथा समर्थश्च।

स च 'सिद्धसङ्कल्पो' भगवान् स्वेन सिद्धसंकल्पनामानुगतगुणेन विश्वं व्यश्नुवानश्चतुर्भेदविभक्तमिदं चतुर्विधयोनिसंक्लृप्तं विश्वं स्वतः सिद्धेनेच्छारूपेण

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सङ्कल्पेन निष्पाद्य प्राणिहितं कुरुते। सर्वं वा पदार्थजातं स्वमूलभूतभगवत आयातं स्वसामर्थ्यं प्रकटयति। तदेतत्सर्वं भगवतः सिद्धसंकल्पस्यानुकरणमात्रम्।

तथा च लोकेऽपि दृश्यते—ज्ञानवतां विविधा आविष्काराः स्वतोऽन्तरात्मन एव प्रादुर्भवन्ति। अनन्तसामर्थिकेन भगवता विविधा आविष्काराः स्वतोऽन्तरात्मन एव प्रादुर्भवन्ति। अनन्तसामर्थिकेन भगवता जगदप्यनन्तसामर्थ्यवद्विहितम्। अत एव जगदवलोकनेन सद्यो भगवान् सिद्धसङ्कल्पो ज्ञानमार्गमारोहति।

मन्त्रलिङ्गं च—

अकामो धीरो अमृतः स्वयंभू रसेन तृप्तो न कुतश्चनोनः।

अथर्व० १० ।८ ।४४ ।।

भवन्ति चात्रास्माकम्—

स सिद्धसङ्कल्प इदं विधत्ते
गुणेन 'सामर्थ्य' इतीरितेन ।
ऋतञ्च सत्यञ्च विमिश्रितञ्च
नपुंसकस्त्रीपुरुषस्वरूपे ।।३३७।।

तं सत्यसन्धं कवयो हृदिस्थं
पश्यन्ति नित्यं भुवने त्रिनेत्रम्।
तं सिद्धिदं स्तोत्रशतैरनेकैः
सिद्धाः स्तुवन्त्यात्मरजोविमृष्ट्यै ।।३३८।।

आस्थावरं तारकितं नभो यत्
स्वं सिद्धसंकल्पकितं[1] व्यनक्ति ।
रूपं स्वभावो गुणवीर्यवत्त्वं
न सिद्धसंकल्पमतीत्य किञ्चित् ।।३३९।।

सिद्धिदः—२५४

सिद्धिः—साफल्यं मङ्गलक्रिया च, सा च साधनाधीना। अतो जागतप्राणिनां यथार्हभोगभोगाय शारीरक्रियासाधनाय च साधनानीन्द्रियाणि ददातीति 'सिद्धिदः'

१. सिद्धसंकल्पकित इत्यत्र स्वार्थे कः प्रत्ययः सिद्धसंकल्पकः, स संजातोऽस्येति तारकादितच् प्रत्ययः। तदस्य संजातमित्यादि अष्टाध्यायी (५।२।३६)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वव्यापको विष्णुः। साधनभूतग्रहोपग्रहैर्दृश्यजगतो व्यवस्थापकत्वाच्चापि सिद्धिदः। 'सेधते' भावे स्त्रियां क्तिनि 'सिद्धिः'।

तथा च दृश्यते लोके- कलाकारः कर्माणि साधयितुमपेक्षते साधनानि। कर्मणां कारयिता चापि कर्मकरेभ्यो ददाति साधनानि। तथैव भगवान् विष्णुरपि स्वकृतकर्मफलोपभोगाय, स्वेष्टसाधनाय वा प्रतिप्राणि नानाविधानीन्द्रियाणि दादाति, इति 'सिद्धिदः' स उच्यते। अत एवायमात्मा जीवः स्वेन्द्रियस्थैर्यं प्रार्थयते भगवन्तम्।

तथा च—

ऋचं वाचं प्रपद्ये मनो यजुः प्रपद्ये साम प्राणं प्रपद्ये चक्षुः श्रोत्रं प्रपद्ये।
वागोजः सहोजौ मयि प्राणापानौ।। यजुः ३६।१।।
भद्रं कर्णेभिः श्रृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरङ्गैस्तुष्टुवा ँ सस्तनूभिर्व्यशेमहि देवहितं यदायुः।।
यजुः २५।२१।।

मन्त्रलिङ्गं च—

यस्मादृते न सिध्यति यज्ञो विपश्चितश्चन।
स धीनां योगमिन्वति।। ऋ० १।१८।७।।
य आत्मदा बलदा यस्य विश्व उपासते। यजु० २५।१३।।

भवन्ति चात्रास्माकम्—

स सिद्धिदः साधनदोऽथ गीतः
स साधनैः सिद्धमिदं तनोति।
यथा स युक्त्वा समनोभिरक्षै-[1]
र्जन्तुं प्रचाराय[2] करोति शक्तम् ।।३४०।।

तथैव साध्यैः स उ देवसिद्धैः
सिद्धैः प्रवाहेण सदास्तिमद्भिः।
करोति विश्वं विविधं वितन्वन्
स सिद्धिदो विष्णुरिहास्ति गीतः।।३४१।।

---

१. अक्षैरिन्द्रियैः। २. प्रचारः-व्यवहारो भ्रमणं वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तं सिद्धिदं सर्वमनोऽभिरामं
रामं विरामं[1] च नमन्ति देवाः।
तस्यानुकृत्या मनुजः स्वसृष्टिं
तन्तन्यमानस्तनुते सहायान्[1]।।३४२।।

सिद्धिसाधनः—२५५

सिद्धिशब्दो व्युत्पादितस्तासां सिद्धीनां साधनं साधनः। 'साध संसिद्धौ' इति सौवादिकण्यन्तधातो ***'नन्दिवाशिमदिदूषिसाधिवर्द्धिशोभिरोचिभ्यो ण्यन्तेभ्यः संज्ञायाम्'*** (पा० ३।१।१३४) इति नन्द्यादिगणसूत्रेण 'ल्यु' प्रत्यये योरनि च साधयतीति 'साधनः' कर्तृवाची शब्दो निष्पद्यते। साध्यतेऽनेनेति करणे ल्युट्यपि 'साधनम्'। एवंञ्च यः सर्वासां सिद्धीनां कर्तृभूतः करणभूतश्च। न ततोऽन्यः कश्चित् सिद्धीनां साफल्यानां मङ्गलक्रियाणां वा साधनः साधनं वा, न तदनुग्रहं विना कश्चिज्जगति साफल्यमेतीति भावः।

सत्यञ्चैतद्यथा लोकेऽपि सदप्येतत्सर्वाङ्गसमुदितं शरीरं सति जीवापाये सद्यः कार्यक्षमतां जहाति, न किञ्चित्कर्तुं क्षमत इत्यर्थः। एतेन प्रतीयते जीवात्मैव शरीरे करणं कर्ता चेन्द्रियादिरूपेणेति 'सिद्धिसाधनः' उच्यते।

एवं सर्वेषामादिकारणत्वेन सर्वेषां सिद्धिदो मङ्गलदश्च भगवान् विष्णुः 'सिद्धिसाधन' उच्यते। इदमिह स्थविष्ठमुदाहरणम्-**'सूर्य आत्मा जगतस्तस्थुषश्च'** (यजुः ७।४२) इत्यादि मन्त्रलिङ्गात् (यजुः ३।४६) सूर्यः सर्वस्यात्मा, किन्तु सूर्यस्य आतयिता प्रवर्तयिता क इति प्रश्ने भगवान् विष्णुरेव तस्यात्मेति 'सिद्धिसाधनः' स उच्यते।

मन्त्रलिङ्गं च—

कण्वा इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनम्। अथर्व० २०।१३८।३।।
यस्मादृते न सिद्ध्यति यज्ञो विपश्चितश्चन।
स धीनां योगमिन्वति ।। ऋक् १।१८।७।।

---

१. राम-विरामे विष्णोर्नाम्नी स्तः, रमते=क्रियां करोति जगद् यस्मिन् स रामः। तस्मिन्नेव विरामं यात्यतो विरामः। २. सहायः=साधनम्। यथा कुम्भकारो घटनिर्माणाय दण्डचक्रसूत्रादीनि साधनान्युपादत्ते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

स साधनः साधनवर्गमुख्यो,
न तं विना साधनमत्र किञ्चित् ।
सूर्यो यथात्मा सकलस्य लोके
तस्यात्मभूतः[1] स उ विष्णुरेकः ।।३४३।।

पुनश्चात्रास्माकम्—

सिद्धिसाधन आख्यातो, विष्णुः प्राणेन सम्मितः ।
भुक्तं व्याप्तञ्च प्रत्यङ्गं, सर्वं पुष्णाति वर्ष्म तत् ।।३४४।।

❖ ❖ ❖

वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ।
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ।।४१।।

२५६ वृषाही, २५७ वृषभः, २५८ विष्णुः, २५९ वृषपर्वा, २६० वृषोदरः।
२६१ वर्धनः, २६२ वर्धमानः, च, २६३ विविक्तः, २६४ श्रुतिसागरः,।।४१।।

वृषाही—२५६

वृषोऽग्निः, **'वृषो अग्निः समिध्यते'** (ऋक् ३।२७।१४) इति ऋङ्मन्त्रलिङ्गात्।

अहः=प्रकाशः, वृषस्याग्नेरहो=प्रकाशो 'वृषाहः' इति। तत्पुरुषसमासे ***'राजाहःसखिभ्यष्टच्'*** (पा० ५।४।९१) सूत्रेण 'टच्' प्रत्ययः, तस्य ताद्धितत्वात् ***'नस्तद्धिते'*** (पा० ६।४।१४४) इति सूत्रेण टिलोपः।

वृषशब्दोऽत्राग्निवाचकः सन् सर्वाञ्ज्योतिष्मत उपलक्षयति। एवञ्च सर्वेषां ज्योतिष्मतां ज्योतिरस्यास्ति, अर्थाद्यः सर्वेषां ज्योतिष्मतां=प्रकाशवतां द्योतयिता=प्रकाशयिता स 'वृषाही' त्युच्यते।

सर्वत्र प्रकाशमानेषु सूर्याग्न्यादिषु यः प्रकाशः, स तस्यैव भगवतो ज्योतिःस्वरूपस्य वृषाहिणः। स एव स्वप्रकाशेन सर्वं व्याप्नुवन् विविधनामभिरभिधीयमानो 'बृहद्भानु' रित्युक्तो भवति।

---

१. तस्यात्मभूतः=सूर्यस्यात्मभूतः। सिद्धिसाधनः=साधनानां प्राणभूतः। यथैकरूपमप्यन्नं पृथक् पृथगवयवेषु गतं पृथक्-पृथक् परिपाकं विधत्ते, तत्र प्राणस्यैव प्राधान्यम्, एवं पृथक् पृथक् साधनभूतं जगत् स एकः साधयतीति सर्वसाधनः स 'सिद्धिसाधन' उच्यते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यथा ज्ञानप्रकाशरूपो जीवात्मा सर्वाणीन्द्रियाणि प्रकाशवन्ति विधत्ते, तथायं सर्वगतः परमात्मा सर्वं जडचेतनवर्गं प्रचिकाशयिषुरग्निरूपतामापद्य व्यवतिष्ठमानः, समुद्रगो वडवानलाख्यां, वनकाष्ठगतो दावानलाख्यां, तथा प्राणिगतो वैश्वानराख्याञ्च धत्ते।

दृश्यते च लोकेऽपि जीवो यावच्छरीरं चेतयति, तावदेव देहस्थः पञ्चविधोऽग्निः प्रकाशते स्वलक्षणलक्षितः। व्यपगते च जीवे शाम्यति सोऽपि सद्यः। अग्निकृतश्चायं सार्वत्रिकः समविषमरूपस्वभावभेदो रूपभेदश्च। तथा हि विविधेषु प्राणिषु या नानाविधा विकृतयो दृश्यन्ते, ता जलसहकृतविषमभावरूपविषरूपापन्नाग्निकृता एव सर्वाः। तथा चोक्तं विषशब्दं निर्ब्रुवता महर्षिणा चरकेण—

जगद्विषण्णं तं दृष्ट्वा तेनासौ विषसंज्ञितः।

चरकसं० अ० २३। श्लोक ५।।

मन्त्रलिङ्गञ्च—

त्वं भासा रोदसी आततन्था जस्त्रेण शोचिषा शोशुचानः।

ऋक् ७।५।४।।

आ यस्ततन्थ रोदसी वि भासा श्रवोभिश्च श्रवस्यँस्तरुत्रः।

ऋक् ६।१।११।।

इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजित् धनजिदुच्यते बृहत्।

ऋक् १०।१७०।३।।

त्वमिन्द्राभिभूरसि त्वं सूर्यमरोचयः। ऋक् ८।९८।२।।

भवतश्चात्रास्माकम्—

वैश्वानरः प्राणिगतोऽभिधीयते
तथाब्धिगो वाडवनामवाच्यः।
दावानलः काष्ठगतस्तथेति
धत्ते स नामानि तदाप्तिभेदात्।।३४५।।

विभाति भानुप्रभया विभावसु-
र्विभावसुश्चास्ति विनात्मभासा।
[१]स्वयम्प्रभासाद्रविरेति भासं
विष्णुर्वृषाहीति निगद्यतेऽतः।।३४६।।

---

१. स्वयम्प्रभासो=विष्णुः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वृषभः—२५७

वृषभोऽग्निः, स हि सूर्यस्थानीयः सन् वर्षति। वृषो वर्षणं वृष्टिर्वा, तेन वर्षणेन भाति प्रकाशितो भवति स वृषभः=सूर्यः। स हि वृषभाणामपि वृषभो विष्णुः सर्वत्र स्वशक्त्या जगद् व्यश्नुवान आस्ते।

मन्त्रलिङ्गञ्च—

त्वमग्ने वृषभः पुष्टिवर्धन उद्यतस्रुचे भवसि श्रवाय्यः।
आहुतिं परि वेदा वषट्कृतिमेकायुरग्रे विश आविवाससि।।

ऋग् १।३१।५।।

बह्वर्थोऽयं वृषभशब्दः। तद्यथा—**'त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आ विवेश'।** (ऋग् ४।५८।३; यजुः १७।९१)। वृषभः पदनामसु निघण्टौ संगृहीतः। अनेकविभक्त्यन्तो वृषभ—शब्दो वेदेषु प्रयुक्तो नानार्थत्वं व्यनक्ति। तत्र सुधीभिः सर्वव्यापके विष्णौ यथामति संगमनीयम्।

भवति चात्रास्माकम्—

वृषत्वधर्मेण जगन्निबद्धं,
विभाति चाकल्पत अद्य यावत्।
तं सर्ववन्द्यं विविधार्थयुक्तं
नमन्ति देवा वृषभाख्यविष्णुम्।।३४७।।

विष्णुः—२५८

सर्वत्र विष्टः सर्वं वेवेष्टि वा स्वकया विभूत्या स विष्णुः। न हि किमपि स्थानं यत्र भगवतः सत्ता न स्यात्।

यद्युच्यते-सर्वत्रास्तीति चेत् कथन्नावाप्यते? तत्राह तत्प्राप्तिसाधनं श्रद्धाख्यो मानसिकः सात्त्विको भावस्तया श्रद्धया सोऽवाप्यते। तथा च वेदः-

श्रद्धयाग्निः समिध्यते श्रद्धया हूयते हविः।
श्रद्धां भगस्य मूर्धनि वचसा वेदयामसि । ऋग् १०।१५१।१।।

अस्मिन्नेव श्रद्धासूक्ते—

श्रद्धां प्रातर्हवामहे श्रद्धां मध्यंदिनं परि ।
श्रद्धां सूर्यस्य निम्रुचि श्रद्धे श्रद्धापयेह नः।। ऋग् १०।१५१।५।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यो हि भगवन्तं सर्वत्रव्यापकं पश्यत्यनुभवति वा, स सत्यया बुद्ध्या युक्तः सन् सुखमश्नुते। उक्तं तत्रैव—**'श्रद्धया विन्दते वसुः'** (ऋग् १० ।१५१ ।४)।

भवति चात्रास्माकम्—

निष्पापबुद्ध्या य उ विश्वमात्रे
भर्गस्य देवस्य कृतेर्बहुत्वम् ।
पुनः पुनः पश्यति तत्त्वदर्शी
स सर्वविष्टं मनुते ह विष्णुम्।।३४८।।

विष्णोस्त्रिधा विक्रमणस्वरूपं यथास्मत् पद्ये—

विष्णुर्हि सूर्यः स हि त्रैधमित्वा
त्रिभिः पदैः क्रामति विश्वमात्रम् ।
सोऽग्निः स मित्रः स उ इन्द्र एको
न चास्ति विष्णोः परमत्र किञ्चित्।।३४६।।

मन्त्रलिङ्गञ्च—

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्।।
ऋक् १ ।२२ ।२०।।

स वरुणः सायमग्निर्भवति स मित्रो भवति प्रातरुद्यम् ।
स सविता भूत्वान्तरिक्षेण याति स चन्द्रो भूत्वा तपति मध्यतो दिवम्।
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति ।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुंच पाशान् ।।
अथर्व० १३ ।३ ।१३।।

स वरितुमर्हः सूर्यः प्रातरुद्यन् 'मित्र' संज्ञां लभते। स सूर्योऽन्तरिक्षेण गच्छन् सवितेति संज्ञां लभते। स सूर्यो मध्येऽह्नि 'इन्द्र' इति संज्ञां लभते। स सूर्योऽस्त समयेऽग्निसंज्ञां लभते। एवं प्रत्येकस्मात् स्थानात् सूर्यस्त्रिभिः पदैर्विश्वं स्वस्मिन्नात्मनि वेशयति प्रवेशयतीति कृत्वा 'विष्णुः' सूर्यः सन् भगवांश्च तस्मिन्नप्यवस्थितः सन् विशति वेशयतीति वा कृत्वा विष्णुरुक्तो भवति। **'इदं विष्णुर्विचक्रमे त्रेधा निदधे पद'** (यजुः ५ ।१५) मित्यादि मन्त्रं च व्याख्यातं भवति।

वृषपर्वा—२५६

पर्व सन्धिरुच्यते। प्रीणाति पूर्वात् परमिति पर्व। मन्त्रलिङ्गञ्च यथा—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अंगादंगाल्लोम्नो लोम्नो जातं पर्वणि पर्वणि।

यक्ष्मं सर्वस्मादात्मनस्तमिदं वि वृहामि ते।। ऋक् १०।१६३।६।।

'वृषो'ऽग्निः, विश्वमिदं सर्वमग्निसन्धिमत्। लोकेऽपि च पश्यामः-शरीरस्य प्रतिधातु स्वकोष्मा पृथक्त्वेन कार्यकरो भवति। तथाग्निरेव पित्तं शरीरे, इति कृत्वा तच्च पित्तं पंचधात्वं प्राप्तं सत् सन्धावपि तिष्ठति। येयं व्यवस्था शरीरस्य सेयं व्यवस्था जगतः। जगति च पश्यामः- वायोरग्नेश्च यः सन्धिस्तद्विद्युतं नाम। तथा च समुद्रे वडवानल इति, वने च दावानल इति। भूमेर्मध्यादुदीर्यमाणोऽनलो ज्वालामुखमिव ज्वालामुखीत्युक्तो भवति। एवं जगत् तमेव **'वृषपर्वाणं'** भगवन्तं व्याचष्टे।

धर्मो वा 'वृषः' उच्यते, धर्मपर्वेदं जगत्। तद्यथा- नहि चक्षुः श्रवणमारभते। सर्पो हि चक्षुश्रवा उच्यते, तत्रैतज्ज्ञेयम्-नहि चक्षुः शृणोति, परन्तु एकमेव गोलकं द्वयोरिन्द्रियकर्मणोः साधकं भवति। यथोर्ध्वकाये बहुसन्धिभिर्धृतं ज्ञानगोलकमयमिदं वृषपर्वा धर्मपर्वा वोक्तं भवति।

अपरं चोदाहरणम्— समुद्राणां परस्परं जलसन्धयः स्वस्वधर्मे तिष्ठन्ति। अनेकविधलोकधारकग्रहोपग्रहनक्षत्रराशिपर्वमयं कृतं कर्म तं भगवन्तं वृषपर्वाणं सर्वत्र व्यश्नुवानं व्यनक्ति, प्रकटयति वा।

मन्त्रलिङ्गञ्च—

इन्द्राय सोमाः प्रदिवो विदाना ऋभुर्येभिर्वृषपर्वा विहायाः।

प्रयम्यमानान् प्रति षू गृभायेन्द्र पिब वृषधूतस्य वृष्णः ।।

ऋ० ३।३६।२।।

भवति चात्रास्माकम्—

वृषो ह्यग्निरथो धर्मो, द्वयोः सन्धिश्च पर्व तत्।

स विष्णुरग्निधर्माभ्यां, विश्वं व्याप्नोति पर्ववत्।।३५०।।

युक्तियुक्तं वह्निः पुष्णाति जगत्। यथा शरीरसन्धीन् युक्तियुक्तं पित्तं पुष्णाति, तदेव च पित्तं विकृतं सत् शरीरसन्धीन् शिथिलयति। एवमेव सर्वं जगद् युक्तियुक्तेन वह्निना यज्ञरूपेण धार्यते क्रियायां व्यवस्थाप्यते। एवं विविधमूहनीयं भवति।

वृषोदरः—२६०

वृषः=अग्निः। मन्त्रलिङ्गञ्च—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वृषोऽग्निः समिध्यते देवानां यज्ञवाहनः।
तं हविष्मन्त ईडते।। ऋग् ३।२७।१४।।

सोऽग्निरुदरे यस्य स 'वृषोदरः'। स च विष्णुरुक्तो भवति।

लोकेऽपि च पश्यामः-प्रतिप्राणि चतुर्विधस्य लेह्य-चर्व्य-चोष्य-पेयस्य पक्त्यै जठरेऽग्निः पाचकपित्तसंज्ञया स्थितिमाधत्ते। तदेकमेव पित्तं पंचधात्वमाप्नोति। सर्वं पित्तमात्रमाग्नेयम्। यथोदरे पित्तं, तथैव सर्वब्रह्माण्डोदरे सूर्यरूपोऽग्निः सर्वं दृश्यं रूपगुणवीर्यविपाकैः पचतीव। सैषा व्यवस्था वृषोदरस्य भगवतः सर्वव्यापकस्वरूपं व्यनक्ति। समुद्रे वडवाग्निः, पृथिवीतश्चोदीरणानि वह्नेरर्चीषि। एवं सुधीभिर्विविधमुन्नेयं भवति।

भवतश्चात्रास्माकम्—

वृषोदरो विष्णुरनन्तरूपो
विश्वं व्यवस्थाप्य करोति वह्निम्।
मध्ये शरीरस्य तथोदधौ च
पृथ्वी च वह्निं बहुशो व्यनक्ति ।।३५१।।

एषा व्यवस्था हि वृषोदरस्य
विज्ञं विधिज्ञं क्षणशो व्यनक्ति।
अग्नौ स्थिते जीवितमाहुरर्च्यं[१]
वृषोदरो वर्षति वह्निमन्तः[२] ।।३५२।।

वानस्पतिके च जगति दृश्यते यत् अजमोदा-निचयो रात्रौ जलेनार्द्रीकृत्य निधाप्येत, तर्हि तस्मिन् अजमोदा-निचये यदि हस्तो दीयते तदा तस्मिन् वह्निवद्दाहोऽनुभूयते, प्रत्यक्षं कृत्वानुभूतमस्माभिः। अमुथैव सर्वा एव विषात्मिका मूल-पत्र-फल-पुष्प-रूपा ओषधयो वृषोदरा एव, विषरूपात्मकस्याग्नेरन्तरुदरमिव तेषु सद्भावात्। एवं भगवान् विष्णुर्वृषोदरनाम्ना सर्वत्र व्याप्तोऽस्ति।

मन्त्रलिङ्गञ्च—

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
ऋ० १०।१२१।१।।

१. अर्च्यं जीवमिति। स एव हि शरीरेऽर्च्यः श्रेष्ठतमो वा। २. यदुक्तं वर्षति वह्निमन्तरिति। लोकेऽपि च पश्यामः ग्रीष्मर्तावग्नेस्तापस्याधिक्यात् सर्वं शुष्कमिव भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

वृषो वाग्निर्विषं वाग्निर्यथादृश्यं वनस्पतौ।
तथा वृषोदरः श्रीमान्, विष्णुर्विश्वं समश्नुते।।३५३।।

एवं बहुविधमुदाहरणानामूहितव्यं भवति।

वर्धनः—२६१

'वृधु वृद्धौ' भौवादिकः, वर्धयते ण्यन्तात् कर्तरि संज्ञायां 'ल्यु' प्रत्ययः। नन्दिग्रह्यादि (पा० ३।१।१३४) सूत्रे वार्त्तिकम्—***'नन्दिवासिमदिदूषिसाधिवर्धिशोभिरोचिभ्यो ण्यन्तेभ्यः संज्ञायाम्'।*** योऽयमायुषा निबन्धनक्रमो यथाशरीरबलं लोकलोकानुरूपं च तं क्रमं वर्धयतीति कृत्वा 'वर्धने'ति नाम विष्णुर्बिभर्ति। सर्वत्रैवास्य क्रमस्यानुस्यूतत्वात्।

लोकेऽपि च पश्यामः-जीवः स्वकं निर्मितं वस्तुजातं चिराय संवर्धयितुं प्रयतते। ईश्वरानुस्यूतस्य सर्वव्यापकस्य कर्मणोऽनुरूपं कर्म। तद्यथा चतुर्दशमन्वन्तराण्यस्य भू-कल्पस्यायुषः प्रमाणमिति।

मन्त्रलिङ्गञ्च—

स वर्धिता वर्धनः पूयमानः सोमो मीढ्वां अभि नो ज्योतिषावीत्।
येना नः पूर्वे पितरः पदज्ञाः स्वर्विदो अभि गा अद्रिमुष्णन् ।।

ऋक् ६।६७।३६।।

यस्य ब्रह्म वर्धनं यस्य सोमो यस्येदं राधः स जनास इन्द्रः।

अथर्व० २०।३४।१५।।

भवति चात्रास्माकम्—

स वर्धनो विष्णुरनन्तशक्ति-
र्विश्वं समग्रं नयते चिराय ।
समग्रलोकानुत जीवदेहा-
नाभूतृणान्[1] मेरुपदं[2] च यावत्।।३५४।।

सूर्योऽपि वर्धन एतस्मादेव। स्वयं स वर्धमानः सन् सकलं चराचरं वर्धयति। आयुषे कल्पयति, प्राणेभ्यो योक्तुं समर्थयति इति कृत्वा।

१. भुवस्तृणम्-भूतृणम् २. मेरुपदं पर्वतपरिच्छदम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

आप्नुहि श्रेयांसमति समं क्राम। अथर्व २।११।५।।

वर्धमानः—२६२

वर्धन इति व्याख्याने यदुक्तं तमायुर्निबन्धनक्रमं वर्धयन् स्वयमपि वर्धते, विष्णु रूपत्वात्तस्य। वर्धयन्तं वर्तमानेन योजयति स्थितौ स्थापयति। स्वकं नित्यात्मकं गुणं सर्वत्र व्यापयन् विष्णुः 'वर्धमानः' इत्युक्तो भवति।

तद्यथा लोकेऽपि च पश्यामः-वृद्धिमन्तं स्वकं जातकं माता-पिता च तदनुकूलोपकरणानामुपस्थापनेन वर्धयत इति कृत्वा वर्धमानेति गुणं तावपि बिभ्रतौ वर्धमानौ वक्तुमर्ह्येते। अमुथैव मालाकारः स्वक उद्याने वर्धमान इव।

मन्त्रलिङ्गञ्च—

ऋधङ्मन्त्रो योनिं य आबभूवामृतासु वर्धमानः सुजन्मा।

अथर्व० ५।१।१।।

शृण्वे वीर अग्रमुग्रं दमायन्नन्यमन्यमतिनेनीयमानः।
एधमानद्विडुभयस्य राजा चोष्कूयते विश इन्द्रो मनुष्यान्।।

ऋ० ६।४७।१६।।

भवति चात्रास्माकम्—

स वर्धमानः सकलं जनित्वा
यथार्हकालं स्थितिमद् विधत्ते।
नित्यो हि विष्णुर्नियतं[1] विचिन्वन्[2]
कला[3] स्वका व्याप्य विराजते च।।३५५।।

विविक्तः—२६३

'विजिर् पृथग्भावे' जौहोत्यादिकः, विविक्तः=पृथग्भूतः। यथा हि लोके यन्त्राणामाविष्कर्ता यथार्हावश्यकतानुकूलं यन्त्रं विधाय तस्माद् यन्त्रात् स्वयं

१. नियतं=नियतकालाय गृहीतायुष्कम् २. विचिन्वन्=विविध-लिंगलक्षणोपेतं पृथक्-पृथक् विवेकार्हं कुर्वन्निति ३. कलाः=भगवतो गुणराशिज्ञापकलक्षणानि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पृथग्भूतो यन्त्रं यथार्हगन्तव्यं प्रति गमयति, तथैवायं सकलसृष्टिकर्त्ता भगवान् विष्णुः स्वकेन पृथग्भूत-गुणेन युक्तो 'विविक्तः' इति संज्ञां प्रापितस्तत्त्वदर्शिभिः।

एवं लोक उदाहरणानां बहुत्वं कल्पनीयं भवति। तद्यथा-कं=जलम्। कस्य मलं कमलं, क-मलाज्जायमानं पुष्पं=कमलं जलात् पृथगसंपृक्तं भवति, अर्थात् कमलपत्रे जलं पृथगिवात्मानमाभासयति।

मन्त्रलिङ्गञ्च—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति।।

ऋक् १।१६४।२०।।

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिं विश्वतो वृत्वात्यतिष्ठद् दशांगुलम्।। ऋक् १०।९०।१।।

भवति चात्रास्माकम्—

सृष्ट्वा जगत् सर्वविधं विधाता
स्वयं विविक्तो ह्यजरोऽमरः सः ।
सहस्रशीर्षा स सहस्रदृष्टिः
स सर्वबन्धुः[1] स पृथक् च दृश्यात्[2] ।।३५६।।

श्रुतिसागरः—२६४

श्रूयतेऽनयेति श्रुतिः। 'श्रु श्रवणे' इति भौवादिकधातोः ***'स्त्रियां क्तिन्'*** (पा० ३।३।९५) इति सूत्रपठितवार्तिकेन ***'श्रुयजीषिस्तुभ्यः करणे'*** इत्यनेन करणे 'क्तिन्' प्रत्यये सिध्यति।

एवञ्च यया वेदवाचा स्वस्थं लौकिकं पारलौकिकञ्च विधानं, कर्तव्यमेतन्न कर्तव्यमेतदिति श्राव्यते सा श्रावणसाधनं श्रुतिः। ल्युटोऽपवादः क्तिन्। अस्त्रियान्तु ल्युटि श्रवणम्।

गॄ निगरण इति तौदादिकधातोः ***'ॠदोरप्'*** (पा० ३।३।५७) इत्यनेन भावे 'अप्' प्रत्यये गरणं गरः। गरेण सह वर्तते सगरः, सगर एव 'सागरः' स्वार्थेऽण्।

१. सर्वबन्धुः=सर्वं बध्नाति स्वकेन नियमेनेति कृत्वा। २. दृश्यात्=दृश्यरूपाज्जगतः, शिष्याद् वा शासितुमर्हाज्जगत इत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नदीनां निलयनस्थानं भौमः समुद्र इव श्रुतीनां=वेदानां सागरो निलयनस्थानमाश्रय इत्यर्थः।

सर्वं व्यश्नुवाने तस्मिन् विष्णौ श्रुतयो नद्यः समुद्र इव स्थिताः। सर्वत्र व्याप्ते खे यथा शब्दव्याप्तिः, अर्थात् सर्वत्र व्याप्त आकाशो यथा शब्दं बिभ्राण आस्ते, तथायं भगवान् विष्णुः सर्वश्रुतिनिलयो जगद् व्याप्नुवन् सर्वं व्यवहारक्षमं विधत्ते।

एतदर्थाभिधायकं मन्त्रलिङ्गञ्च यथा—

ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः।

ऋक् १।१६४।३६।।

अपूर्वेणेषिता वाचस्ता वदन्ति यथायथम्।

वदन्तीर्यत्र गच्छन्ति तदाहुर्ब्राह्मणं महत्।। अथर्व १०।८।३३।।

भवति चात्रास्माकम्—

यथा नदीनां बहवोऽम्बुवेगाः
समुद्रमेवाभिमुखा द्रवन्ति।
तथा श्रुतीनां बहवोऽर्थकल्पा
विष्णुं विना नान्यमियन्ति कञ्चित्।।३५७।।

सारांशः—सर्वासां विष्णुरेवाश्रयः।

❖ ❖ ❖

सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः।
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः।।४२।।

२६५ सुभुजः, २६६ दुर्धरः, २६७ वाग्मी, २६८ महेन्द्रः, २६६ वसुदः, २७० वसुः।
२७१ नैकरूपः, २७२ बृहद्रूपः, २७३ शिपिविष्टः, २७४ प्रकाशनः।।४२।।

सुभुजः—२६५

'सु' उपसर्गः 'भुज पालनाभ्यवहारयोः' रौधादिको, 'भुज कौटिल्ये' तौदादिकश्च धातू, तयोः ***'हलश्च'*** (पा० ३।३।१२१) इति सूत्रेण करणे घञि, ***'भुजन्युब्जौ पाण्युपतापयोः'*** (पा ७।३।६१) इति सूत्रनिपातनाद् गुणाभावः, चजोरिति कुत्वाभावश्च। मूलविभुजादेराकृतिगणत्वाद् वा 'क' प्रत्ययेन साध्यम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रजापतिरूपं धर्मं दधत् स सर्वत्र व्याप्तः सर्वाः प्रजा रक्षयति भोजयति, कुटिलयति च बन्धनविशेषैरितिं शोभनभुजः 'सुभुजः' उच्यते। सर्वत्र च लोके भोजनरूपः पालनरूपस्तथा कुटिलीभावनारूपश्च धर्मो दृश्यते। तथा च बहुबन्धनवद्धि वपुर्जीवानां, शाखाप्रशाखावितानरूपबहुबन्धनविततश्च वृक्षः कुटिलीभावमापन्नः 'सुभुजः' इति वक्तुमर्हः। एवमुदाहरणवैविध्यमूह्यम्।

पालनप्रकाराणि च तस्य विष्णोर्विविधानि। तद्यथा-श्वासप्रश्वासरूपेण वायुना पालयति सर्वं जलस्थान् जलेन जलवाताभ्यां वा, वियच्चरानाकाशवाताभ्यां, तथा गण्डूपदांश्च मृदा पालयति, ते हि मृदमश्नन्ति। चकोरोऽग्निं, पशवस्तृणानि, पक्षिणः कृमीनन्नञ्च, सिंहादयो मांसं कुक्कुटादयश्च मांसमन्नञ्चाश्नन्ति। एवं लोकं दृष्ट्वा बहुधोन्नेयम्।

श्रूयन्ते च लोकप्रसिद्धाः विविधा रक्षाप्रकारास्तस्य। तद्यथा-परं हन्तुं प्रवृत्तं मनुष्यं पशुं पक्षिणं वा तत्प्रेरिताः सर्पादयो बध्नन्ति। तथा हि श्रूयते एकैषमस्तनी घटना-'रोहतक' मण्डलान्तर्गतगोहानानिकटस्थे ग्रामे कश्चित् स्वयं पितृव्य एव न्यूनद्वादशाब्दकं स्वं भ्रातृव्यं हन्तुं प्रवृत्तः। परशुहस्तः स तदवस्थ एव सर्पेण चतुरस्त्र्य पर्यावृत्य निबद्धो रक्षापुरुषैश्च प्रार्थितः स सर्पस्तं परित्यज्यान्तर्दधे। पितृव्यो हि स्वभ्रातृव्यस्वभूतभूमिं जिघृक्षुस्तं जिघांसति स्म।

पशवोऽपि तद्व्यवस्थानुसारं मूत्र-पुरीष-दुग्ध-दधि-घृत-चर्म-मांस- लोम-वसा-अस्थिप्रभृतिभी रक्षन्ति प्राणिनम्। अत्रापि पशुशरीरयन्त्राधिष्ठातृत्वेन स 'सुभुज' एव रक्षकः।

वेदोपदेशरूपवाचापि स विश्वं भुनक्ति=रक्षतीति सोऽन्वर्थो नाम 'सुभुजः''। अग्निरपि विविधकर्मभिर्विश्वं रक्षति। एवं महार्थोऽयं सुभुजेति विष्णोर्नामशब्दो बहुधास्माभिर्व्याख्यातः लोकं दृष्ट्वा विविधमूहनीयं, दिङ्मात्रमस्माभिरुदाहृतम्।

मन्त्रलिङ्गानि च। भोजने यथा—

अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि संजयामि शश्वतः ।
मां हवन्ते पितरं न जन्तवो अहं दाशुषे विभजामि भोजनम्।।

ऋक् १० ।४८ ।१।।

रक्षार्थे—

तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम्।
पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ।।

यजुः २५ ।१४ ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बन्धनार्थे—

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्।। यजु० ३।६०।।

भवति चात्रास्माकम्—

बह्वर्थमेतत्सुभुजेति नाम
तं वक्ति विष्णुं विविधस्वरूपम् ।
भुनक्ति भुङ्क्ते भुजतीति यस्माद्
विश्वं स तस्मात् सुभुजोऽत्र गीतः।।३५८।।

'सुभुजः' इत्यत्र बहुव्रीहिः समासो वा। शोभनौ भुजौ यस्येति भुजशब्दो बाहुवचनः। भोजन-रक्षण-बन्धनरूपकर्मकरौ च तावेव। भुङ्क्ते, भुनक्ति, बध्नाति वा कुटिलीभावमापाद्य याभ्यामिति भुजौ। बाह्वोर्गुणप्रकर्षद्योतकौ मन्त्रौ यथा-

प्रदिशो यस्य बाहू । (ऋग् १०।१२१।४)
बाहू राजन्यः कृतः। (यजु० ३१।११)

प्रसङ्गप्राप्तबाहुशब्दसिद्धिश्च—***''अर्जिदृशिकम्यमिपंसिबाधामृजिपशितुग्धुग्दीर्घहकाराश्च*** (उणादि० १।२७) सूत्रेण 'कु' प्रत्ययो बाधृधातोर्धकारस्य हकारश्च। बाधेते इति बाहू। दृशेः पशादेशः कुप्रत्ययश्च, पश्यतीति पशुः, पश्यन्ति येन वा स पशुरग्निः। पश्यति सर्वमिति पशुरीश्वरः।

भवति चात्रास्माकम्—

नूनं हि मन्ये सुभुजोऽत्र विश्वं
यथार्थसिद्ध्यै विविधान् प्रदाय ।
भुजान् समेभ्यः प्रतिपालशक्तं
कृत्वा स्वयं तिष्ठति निर्विकल्पः।।३५९।।

बहुव्रीहावपि व्याख्यानं समानम्।

दुर्धरः—२६६

'दु' रुपसर्गः कृच्छ्रार्थे, तत्पूर्वाद् 'धृञ् धारणे' इति भौवादिकाद्धातोः ***'ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्'*** (पा० ३।३।१२६) सूत्रेण 'खल्' प्रत्ययः। दुःखेन ध्रियन्त इति दुर्धराणि लोकलोकान्तराणि तान्यस्य सन्तीति मत्वर्थीयेऽचि 'दुर्धरः'। तथा च यः साधारणप्राकृतप्राणिभिर्दुर्धराणि जगति तदन्तर्गतानि सूर्यचन्द्रादिरूपाणि ज्योतींषि च चक्षूरूपेण धरतीति 'दुर्धरः' स उच्यते भगवान् विष्णुः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यथा लोके भगवतात्मव्यवस्थया कर्मभोगार्थं जीवायं दत्तं शरीरं जातिभेदात् प्रतिप्राणि भिन्नं भिन्नं दृश्यते। तच्च पञ्चभूतमयत्वादनित्यन्नश्वरं, पृथिव्यंशबहुलत्वाच्च पार्थिवं, वायोरंशाधिक्ये वायवीयं, तथा जलांशाधिक्ये जलीयमिति भूतांशाधिक्ययोगेन तत्तद्भूतनाम्ना व्यपदिश्यमानमपि सामान्यतः पार्थिववद् भाति। तच्च शरीरं शुक्रशोणितयोराद्यसंयोगक्षणादारभ्य यावद्देहान्तं भगवद्व्यवस्थानुसारं समनस्केनात्मना धृतं भवति। तद्दुर्धरं शरीरं जीवो धारयतीति जीवो 'दुर्धरः' उक्तो भवति। अमुथैव स्वशक्त्या कल्पकल्पान्तमिदं सर्वं चराचरं धारयिष्यति चेति स दुर्धर उच्यते।

मन्त्रलिङ्गञ्च—

यस्य सूर्यश्चक्षुश्चन्द्रमाश्च पुनर्णवः ।
अग्निं यश्चक्र आस्यं तस्मै ज्येष्ठाय ब्रह्मणे नमः।। अथर्व १० ।७ ।३३ ।।
येन द्यौरुग्रा पृथिवी च दृढा येन स्वः स्तभितं येन नाकः।
ऋग् १० ।१२१ ।५ ।।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधे ।।
ऋग् १० ।१२१ ।१ ।।

भवति चात्रास्माकम्—

यथा शरीरं गतिमद्विधत्ते
[1]मनोऽर्थवज्जीव उ दुर्धराख्यः।
तथार्थवद्[2] भेषु[3] जगद्विभक्तं
स [4]दुर्धरस्तद् गतिमद्विधत्ते।।३६०।।

सारांशतः-यथा प्रत्यक्षदर्शनरहितो जीव इदं पार्थिवं शरीरं प्रतिपदं धारयन् तमेव दुर्धर-धारकं व्याचष्टे, अमुथैव चक्षुषा मृल्लोष्ठवद् द्रष्टुमशक्यं सदपि ब्रह्म दुर्धरस्य लोकलोकान्तरस्य धारकं सत् दुर्धरधर इति वक्तव्ये 'दुर्धरः' इत्युच्यते मध्यमपदस्य लोपात्।

वाग्मी—२६७

'वच परिभाषणे' आदादिकः, तस्मात् ***'क्विब्वचिप्रच्छि०'*** (उणा० २ ।५७)

---

१. मनोऽर्थवत्=मनोयुक्तं पञ्चेन्द्रियार्थयुक्तञ्च। २. अर्थवत्=प्रयोजनवत्। ३. भेषु=ग्रह-नक्षत्र-राशिषु। ४. दुर्धरः=दुर्धरधरः, इति भावार्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्यादिसूत्रेण क्विप्, दीर्घत्वमसम्प्रसारणत्वं च विधीयते, तेन 'वाक्' शब्दो निष्पद्यते। तस्मात् वाक्प्रातिपदिकात् ***'वाचो ग्मिनिः'*** (अ० ५।२।१२४) इत्यनेन मत्वर्थे मिनिः प्रत्ययो विधीयते गश्चान्तादेशः, तेन 'वाग्मी'। युक्तियुक्तमितभाषी 'वाग्मी' त्युक्तो भवति। यो हि सम्यग् बहु भाषते सोऽपि 'वाग्मी' त्युक्तो भवति।

मन्त्रलिङ्गं च—

चित्पतिर्मा पुनातु वाक्पतिर्मा पुनातु देवो मा सविता पुनातु।
यजु० ४।४।।

यथेमां वाचं कल्याणीमावदानि जनेभ्यः। यजु० २६।२।।

वाग्मी नामवतो भगवतो गुणस्य प्रत्यक्षतो व्यापनं लोके दृश्यते। तद्यथा पशुपक्षिणः स्वप्रयोजनमात्रज्ञापनाय युक्ते काले युक्तं मितं च भाषन्ते। शकुनीनां यथार्थवाक्त्वमधिगत्यैव शाकुनं शास्त्रं तत्त्ववेदिभिर्लोकोपकाराय प्रवर्त्तितम्।

तद्विषये मन्त्रलिङ्गञ्च यथा—

आवदंस्त्वं शकुने भद्रमा वद तूष्णीमासीनः सुमतिं चिकिद्धि नः।
यदुत्पतन् वदसि कर्करिर्यथा बृहद् वदेम विदथे सुवीराः ।।
(ऋक्परिशिष्टे)

भद्रं वद दक्षिणतो भद्रमुत्तरतो वद भद्रं पुरस्तान्नो वद भद्रं पश्चात् कपिञ्जल।

एवमादि पञ्चर्चं शकुनिविषयमधिकृत्यैव गीतमस्ति। तत्रैव तद् द्रष्टव्यम्।

वृषस्यन्त्यो गावो महिष्यश्च यथाकालं यावत्प्रयोजनसाधकमात्रं च भाषन्ते। स्तनथुर्विद्युत्पातं विज्ञापयति। वर्षाश्चिकीर्षुर्मेघः स्वकेन शब्देन वर्षणं विज्ञापयति। रात्रौ यदि मेघो गर्जति तर्हि तत्र नूनं वर्षणं भवति। लोके समुद्रोऽपि महान्तं शब्दं कुर्वन् श्रुतिगोचरतां गतः। ततोऽनु घटीनां दशकानन्तरं 'कलकत्ता' जलेनापूर्णोऽभूद् दशवर्षकात्पूर्वमित्यश्रौषम्। अत एव च वेदोक्तं संगच्छते—

अपूर्वेणेषिता वाचस्ता वदन्ति यथायथम्।
वदन्तीर्यत्र गच्छन्ति तदाहुर्ब्राह्मणं महत्।। अथर्व १०।८।३३।।

वाग्मी=यथायथं वक्ता। यदत्र वाचां बहुत्वेन प्रयोगः, तत् सर्वविधवाग्विषयमधिकृत्य या या वाचो लोक उदीरिता भवन्ति।

पुरुषस्य वाचि सत्यानृत्वं च भवति, काम-क्रोध-लोभ-मोहाहंकारवशात्, दोषाणां विकृतेः, विकलांगहेतुना वा, राज्यभयाद् वा, जातिदंडभयाद् वा। अत एव च संगच्छते।

अपक्रामन् पौरुषेयाद् वृणानो दैव्यं वचः ।
प्रणीतिरभ्यावर्तस्व विश्वेभिः सखिभिः सह।। अथर्व ७।१०५।७।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एवं भागवते जगति प्रतिपदं यथार्थपदपर्यायो वाग्मिधर्मो गुणो वा व्यश्नुवानो दृश्यते। तस्यैव वाग्मिनो भगवतो गुणसान्निध्यमिच्छन्तो योगिनो मौनव्रतमाचरन्ति। सिद्धे च मौने मितं भाषन्ते। ते मौनव्रतिनस्तमेव वाग्मिनं सर्वत्रानुपश्यन्तस्तं ध्यायन्ति। संयमन-फलं भवति 'वाक्सिद्धिः।'

तूष्णीं भावेनापि प्रकृतिः सत्यार्थं प्रकटयति। तद्यथा-शीततौं धूमपातो यस्मिन् दिने पतति तस्माद्दिनादारभ्याशीत्युत्तरे एकशततमे १८० दिने नूनं मेघा वर्षन्ति। इतिदिङ्मात्रमुक्तं विशेषं सुधीभिः स्वयमुन्नेयं जगद् दृष्ट्वा।

भवति चात्रास्माकम्—

यथार्थवाचः श्रुतयो वदन्त्य-
स्तं वाग्मिनं सर्वगतं स्तुवन्ति ।
जगत् समस्तं नियतार्थबद्धं[1]
तं वाग्मिनं वक्ति यथार्थवाचम्[2] *।।३६१।।*

मनुष्याः स्वस्या वाचः विविधानुष्ठानैः प्रियभावायापि प्रयतन्ते। वक्ति च वेदः- ***'वाचस्पतिर्वाचन्नः स्वदतु'***। यजु० ६।१।।

महेन्द्रः—२६८

'इन्द्र' शब्द उणादौ ***'ऋजेन्द्राग्रवज'*** (२।२८) सूत्रे निपात्यते। 'इदि परमैश्वर्ये' धातुर्भौवादिकः। इन्धे इध्यते वा तेजोभिरिति इन्द्रः। इन्धे 'रन्' प्रत्ययोऽन्त्यस्य दकारश्च निपात्यते (दशपाद्युणादिः ८।४६)। 'इन्धेः भूतानीति वा'। निरुक्ते १०।८। एक एव आत्मा बहुधा स्तूयते। निरुक्ते ७।४।। महांश्चासाविन्द्रो महेन्द्रः।

मन्त्रलिङ्गं च—

रश्मिभिर्नभ आभृतं महेन्द्रा एत्यावृतः। अथर्व १३।४।२।।

उपयामगृहीतोऽसि महेन्द्राय वैष ते योनिमहेन्द्राय त्वा।
यजु० २६।१०।।

शन्न इन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः। ऋक् १।९०।९।।

---

१. नियतार्थबद्धम्=नियतेन अर्थेन=प्रयोजनेन बद्धम्। यथाविधा वाक् यस्मै प्राणिनेऽपेक्ष्यते तथाविधा वाक् तस्मै प्रदत्ता। स्त्रीपुंसयोश्च वाचि स्वारस्यस्य भेदादियं स्त्रियो वाक्, इयं च पुरुष-वागित्यपि सुखेन भेदं प्रकटयति। २. यथार्थवाचम्=निष्प्रयोजनं न भाषमाणम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स सूर्य इन्द्रो भूत्वा मध्यत अन्तरिक्षेण तपति।

मन्त्रलिङ्गं च—

स वरुणः सायमग्निर्भवति, स सविता भूत्वा अन्तरिक्षेण याति।

स इन्द्रो भूत्वा तपति मध्यतो दिवम्।। अथर्व १३।२।१३।।

अत्र भूगोले यो या यद् वा यत्र तिष्ठति, स सा तद् वा स्वके शिरस्यागतं सूर्यं मध्ये तपन्तं मन्यते। एवं स एक एव सूर्यः सर्वदैवान्तरिक्षस्य मध्यममध्यासीनः सर्वत्र व्यापकमिवात्मानं विद्योतयति। तथैवायं सूर्याणामपि सूर्यो महेन्द्रो भगवान् विष्णुर्दिग्-देश-कालादिभिर्विभागं नाप्नोतीति कृत्वा 'महेन्द्रः' उक्तो भवति।

भवति चात्रास्माकम्—

इन्द्रो ह सूर्यो य उ मध्यतो दिवं
गोले स्वकात् पश्यति मध्यतो जगत् ।
महेन्द्र-नामा भगवान् स वर्धनो[1]
विश्वं जगत्[2] *पश्यति मध्यमः स्थितः।।३६२।।*

भवति चात्रास्माकम्—

विभ्राजमानस्य गुणेन लोके
सर्वस्य मूलं स महेन्द्र एकः ।
विश्वं समस्तं स समश्नुवानो[3]
यथायथं शास्ति च विश्वमात्रम् ।।३६३।।

वसुदः—२६६

वसु ददातीति 'वसुदः'। 'वसु' शब्दो व्याख्यातः १०४ चतुरुत्तरैकशततमे नामव्याख्याने। अत्र जगति यस्य यावदायुष्प्रमाणमस्ति, तं तावदायुष्प्रमाणं जीवयितुं तस्मै तदर्होपकरणभूतानां साधनानां दाता सन् 'वसुदः' उक्तो भवति।

लोकेऽपि च पश्यामः-जायमानः शिशुः स्वकेन जन्मना साकमेव मातुः स्तनयोर्दुग्धोत्पत्तिलक्षणानि प्रादुर्भावयति। एषा हि भागवती व्यवस्था जीवनाय तदर्होपकरणानि सर्वकस्मै ददात्येव। एवं लोक-दर्शनेन वसुदो भगवान् सर्वत्र

---

१. 'वर्धनः' इति विष्णोर्नाम। २. चतुर्थे चरणे जगच्छब्दो द्वितीयान्तः। अपरप्रकारेण च- इन्द्रो राजा। मन्त्रलिंगं च-**'इन्द्रो राजा जगतश्चर्षणीनाम्'** (ऋक् ७।२७।३) ईश्वराणामपि य ईश्वरः स 'महेन्द्र' इति। ३. समश्नुवानः=समेकीभावेन सर्वत्र प्राप्नुवन्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्यश्नुवानोऽनुभूयते, प्रत्यक्षतश्च दृश्यते।

मन्त्रलिङ्गञ्च—

द्रविणोदा ददातु नो वसूनि यानि शृण्विरे। देवेषु ता वनामहे।
ऋक् १।१५।८।।

संसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ।
इळस्पदे समिध्यसे स नो वसून्याभर।। यजु० १५।३०।।
सायं सायं गृहपतिर्नो अग्निः प्रातः प्रातः सौमनसस्य दाता।
वसोर्वसोर्वसुदान एधि वयं त्वेन्धानस्तन्वं पुषेम।। अथर्व १६।५५।३।।
प्रातः प्रातर्गृहपतिर्नो अग्निः सायं सायं सौमनसस्य दाता।
वसोर्वसोर्वसुदान एधीन्धानास्त्वा शतं हिमा ऋधेम।। अथर्व १६।५५।४।।

प्रत्येकप्राणिशरीररचनां दृष्ट्वेदं निश्चीयते यत् वासयितुं आच्छादयितुमर्हाण्युपकरणानि सर्वकस्यैव पृथक् पृथक् सन्ति। एवमेव स्थावरवृक्ष-क्षुप-गुल्म-लतादिष्वपि दृश्यते।

भवतश्चात्रास्माकम्—

सृष्ट्वा जगद्विष्णुरनेकरूपं
पृथक् पृथक् साधनवद्विधत्ते ।
लोके प्रसिद्धो 'वसुदः' स एव
स एव सूर्यः स उ चाग्निरुक्तः।।३६४।।

यो वस्त्र-दाता[1], य उ चान्न-दाता
यो वास्ति भूमेरुत तोयदाता।
ज्ञानस्य दाता किमु धैर्यदाता
स्वयं निमग्नो[2] वसुदोऽस्ति तेषु ।।३६५।।

वसुः—२७०

वसु-शब्दो व्युत्पादितचरश्चतुरुत्तरैकशततमे १०४ नामव्याख्याने, तत्र द्रष्टव्यम्। वसुरूपेण गुणेन व्याप्तिमता भगवता सर्वमिदं जगद् व्याप्तमस्ति।

मन्त्रलिङ्गञ्च—

१. 'वस्त्रदाते' त्यादिषु सम्बन्धषष्ठ्या समासः। २. निमग्नः=अन्तर्हितः, अन्तः स्थितो वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ईशा वास्यमिदं सर्वं यत्किंच जगत्यां जगत् । यजु० ४० ।१।।
त्वं हि नः पिता वो त्वं माता शतक्रतो बभूविथ।
अथाते सुम्नमीमहे।। ऋक् ८ ।६१ ।११।।

वसु=धनम्। तत्र–

देवो वः सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना।
यजु० १।१६।

वसोष्पते निरमय मय्येवास्तु मयि श्रुतम्। अथर्व १।१।४।।

वसुर्वसुपतिर्हि कमस्यग्ने विभावसुः। स्याम ते सुमतावपि।।
ऋग्० ८।४४।२४।।

न हि ते शूर राधसोऽन्तं विन्दामि सत्रा।
दशस्या नो मघवन् नू चिदद्रिवो धियो वाजेभिराविथ।।
ऋग् ८।४६।११।।

इति दिङ्मात्रं न्यस्तम्।

भवति चात्रास्माकम्–

वसुः स्वयं विष्णुरजां[1] निबध्नन्[2]
वसौ[3] च रूपं स्वकमाततान ।
लोकेऽर्थ्यतेऽतो वसुमान्[4] वसुर्वा[5]
जगच्च मन्ये [6]वसुनास्ति गुप्तम्[7] ।।३६६।।

नैकरूपः–२७१

'न' निषेधार्थीयः। एकशब्दः संख्यावचनः। त्रिपदो बहुव्रीहिः। न एकं रूपमस्येति 'नैकरूपः'। 'रूप' शब्दो 'रु शब्दे' इत्यादादिकाद् धातोः ***'खष्पशिल्पशष्पवाष्परूपपर्पतल्पाः'*** (३।२८) इत्युणादिसूत्रेण 'प' प्रत्यये रोरुकारस्य दीर्घे च सिध्यति।

अथवा–'रूप रूपक्रियायाम्' इति चौरादिकण्यन्तधातोः 'प' प्रत्ययः पकारलोपो गुणाभावश्च निपात्यते। रूपयति रूप्यते वा 'रूपम्' चक्षुर्विषयः, सौन्दर्यमाकृतिर्वा। तथा च वेदवचनं **'नक्षत्राणि रूपम्'** (यजु० ३१।२२)।

---

१. अजां=प्रकृतिम्। २. निबध्नन्=जगद्रूपेण प्रचारयन्। ३. वसौ=धने। ४. वसुमान्=धनवान्। ५. वसुर्वा=धनं वा। ६. वसुना=विष्णुना। ७. गुप्तम्=रक्षितम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नक्षत्रमण्डलञ्च न समानसंख्यकतारकम्। यथा-अश्विनीनक्षत्रमण्डले तिस्रस्तारका भवन्ति, भरणीनक्षत्रमण्डलेऽपि तिस्रः, कृत्तिकामण्डले षट् तथा रोहिणीनक्षत्रमण्डले पञ्चेत्यादि ज्योतिःशास्त्रतः स्पष्टं ज्ञेयम्। समिद्धदीप्तयः सप्त ग्रहा अपि गत्या रूपेण च भिन्नाः, चन्द्रसूर्यौ च प्रतिमासं द्वादशसु राशिषु भ्रमन्तौ पृथक्-पृथक् शीतोष्णे दत्तः। जङ्गमसृष्टिः स्त्रीपुरुषसंयोगेन भवति।

भवति चात्रास्माकम्—

आब्रह्मकीटान्तमिदं निबद्धं
पुंस्त्रीप्रयोगेण जगत् समस्तम्।
पृथक् स शुक्रं स पृथग्रजो वा
भिनत्ति भुक्तैकरसश्च सत्त्वम्।।३६७।।

मनुष्यशरीरेऽप्यङ्गानां नैकरूपता, अर्थात् नानाविधरूपा युग्मता दृश्यते। नैकरूपरूपस्य भगवतो गुणस्य सर्वत्र वर्तमानत्वात्। एवमितरेष्वपि प्राणिषु नैकरूपता। किन्तु तत्रापि तस्याः पृथग्विधता व्यवस्थिता। यथा कपालास्थ्नां विन्यासः पृथग्विधः, पर्शुकास्थ्नां विन्यासः पृथग्विधः, ग्रीवाकशेरुकाणां पृष्ठकशेरुकाणां कटिकशेरुकाणाञ्च विन्यासः पृथक् पृथग्विध इति।

प्रतिहस्तं पञ्चाप्यङ्गुल्यो रूपेणाकारेण च भिन्ना-भिन्नाः। यदि ता अङ्गुल्यः कथञ्चित् केनचित् साधनेन सङ्कोच्यैकतामानीयेरन्, तदा सर्वाङ्गुलीविनाशः स्यात्। तत्र भगवतो नैकरूपतारूपस्य धर्मस्य लोपात्।

आत्ममनोऽर्थानां संयोगो जीवनं, तेषां पृथक्करणञ्च मृत्युः। संयोगो वियोगतां नीतो नेष्टं साधयति, वियोगश्चैकतां नीतो नेष्टं साधयति। एवं शरीराङ्गसन्धयो जीवं जीवयन्ति, विश्लिष्टाश्च ते मारयन्ति। भगवान् विष्णुर्नैकरूपतामाश्रितो विश्वं सृजति।

मन्त्रलिङ्गं च—

रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय ।
इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश।।

ऋ० ६।४७।१८।।

प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परिता बभूव।

यजु० १०।२०।।

भगवतो या विविधा विकल्पना सा माया, तथा ताभिर्वा मायाभिः स पुरुरूपः=बहुरूप इत्यवगम्यते। मायाशब्दो ज्ञापनलिङ्गार्थोऽपि। सर्वमेतन्माया-शब्दनिरूपणं 'महामाय' नाम्नि विहितम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

स नैकरूपो भगवान् वरेण्यो
विश्वं सृजन्नैकविधं विधत्ते ।
यो नैकरूपं तमु हृद्गुहास्थः
पश्यञ्जगत् पश्यति वीक्षते सः।।३६८।।

बृहद्रूपः—२७२

बृहन्महद् रूपमस्येति बृहद्रूपः। मन्त्रलिङ्गञ्च—

यस्य भूमिः प्रमान्तरिक्षमथोदरम् ।
दिवं यश्चक्रे मूर्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः।।
यस्य सूर्यश्चक्षुश्चन्द्रमाश्च पुनर्णवः ।
अग्निं यश्चक्र आस्यं तस्मै ज्येष्ठाय ब्रह्मणे नमः।।
यस्य वातः प्राणापानौ चक्षुरंगिरसोऽभवन्।
दिशो यश्चक्रे प्रज्ञानीस्तस्मै ज्येष्ठाय ब्रह्मणे नमः।।
स्कम्भो दाधार द्यावापृथिवी उभे इमे स्कम्भो दाधारोर्वन्तरिक्षम् ।
स्कम्भो दाधार प्रदिशः षडुर्वीः स्कम्भ इदं विश्वं भुवनमाविवेश।।

अथर्व० १० ।७ ।३२-३५ ।।

एतेन मन्त्रनिदर्शनेन ज्ञायते यत् सूर्यादीनां तेजस्विनामपि धारको कश्चिदन्य - एव। तमेव विश्वं व्यश्नुवानं भगवन्तं विष्णुं महद्रूपतामुपगतं वेदोऽनुगायति।

भवति चात्रास्माकम्—

यो रूपतां विश्वमियर्ति[1] नित्यं
यो वा च गर्भे तमु[2] आदधाति ।
रूपेण विश्वं बृहता स विष्णु-
र्जगद् दधद् रूपमयं[3] विधत्ते।।३६९।।

१. इयर्त्ति=प्रापयति। २. तं=विश्वम्। तमु आ०=निपात एकाजनाङ् (पा० १।१।१५) इति प्रगृह्यत्वात्र सन्धिः। ३. रूपमयं=दर्शनविषयम्। सामान्यतो विश्वमिदं पांचभौतिकं पंचभिरेवेन्द्रियैर्ज्ञातुमर्हं भवति। तत्र प्रत्यक्षस्य प्राधान्यादिदमुक्तं भवति 'रूपमयं विधत्ते' इति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शिपिविष्टः—२७३

'शिपयो' बालरश्मयः, तैर्बालकिरणैराविष्टो बालसूर्यः 'शिपिविष्ट' उच्यते। यथा हि भूगोल उदीयमानसूर्यः सर्वकैः पूज्यते प्रीयते नमस्कारेण च योज्यते। सर्वत्र च गोले सर्वस्मिन् काल एव च सूर्य उदीयमानावस्थां प्राप्नुवन्नास्ते, तथैवायं भगवान् विष्णुः प्रतिक्षणं चतुर्विधसृष्टिं नवनवां समुद्भावयन्नात्मनः शिपिविष्टाख्यगुणेन विश्वं व्याप्नुवन्नास्ते। अत एव च बालैर्भगवान् स्वकेन शिपिविष्टत्वगुणेन बालमुखात् सत्यं निर्विकल्पं च वाचयति। मन्त्रलिङ्गञ्च—

किमित्ते विष्णो परिचक्ष्यं भूत् प्र यद् ववक्षे शिपिविष्टो अस्मि।
मा वर्पो अस्मदप गूह एतद् यदन्यरूपः समिथे बभूथ।।
ऋक् ७।१००।६।।

विष्णुः शिपिविष्ट उरावासन्नो विष्णुर्नरन्धिषः। यजु० ८।५५।।

भवति चात्रास्माकम्

उदीयमानः प्रपले[1] पतंगो[2]
गोले[3] जनानां समुपैति दृष्टिम्।
विष्णुः स्वयं वै शिपिविष्ट-नामा
जगद् विधत्ते शिपिविष्टरूपम्।।३७०।।

पशवो वा शिपयस्त एव शिपयस्तेषु विविधरूपेण वर्तमानेन पशुना दृश्यरूपेण द्रष्टृरूपेण च जगता स्वकस्थो भगवान् वरेण्यः शिपिविष्टरूपेण प्रपदं व्यज्यत इति। ***'यज्ञो वै विष्णुः, पशवः पिशिर्यज्ञ एव पशुषु प्रतितिष्ठति।'*** (तै० सं० १।७।४)।

भवति चात्रास्माकम्—

पशुर्जगत् पश्यतिमात्रहेतो-
र्विष्णुर्विशन् ख्यापयते तनूं स्वाम्।
अतोऽस्ति लोके शिपिविष्ट उक्तो
नमन्ति तं वीक्ष्य जना जगत्याम्।।३७१।।

प्रकाशनः—२७४

'प्र' उपसर्गः। 'काशृ दीप्तौ' भौवादिकः, तस्मात् णिच्, तस्मात् बाहुलकात्

१. प्रपलं=प्रतिपलम्। २. पतंगः=सूर्यः। ३. गोले=खगोले।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कर्त्तरि 'युच्' प्रत्ययः। प्रकाशयतीति 'प्रकाशनः'। स प्रकाशननामा भगवान् विष्णुः सूर्यादीनां तेजसामपि प्रकाशकः सन् 'प्रकाशनः' उक्तो भवति। प्रकाशरूपगुणेन सर्वं व्यश्नुवानः सन् प्रकाशन उक्तो भवति।

लोकेऽपि च पश्यामः- पार्थिवं शरीरं धरन् जीवात्मा स्वकेन प्रकाशधर्मेण चक्षुरादीनि पञ्चेन्द्रियाणि तथा पञ्चार्थान् प्रकाशयति। व्यपगते जीवे न चक्षुः प्रभृतीनीन्द्रियाणि स्वविषयादानाय प्रबुध्यन्ते, प्रकाशन्ते, रुचिमादधति। मन्त्रलिङ्गञ्च—

इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत्।
विश्वभ्राट् भ्राजो महि सूर्यो दृश उरु पप्रथे सह ओजो अच्युतम्।।

ऋक् १०।१७०।३।।

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमाभासि रोचनम्।।

ऋक् १।१७०।३।।

इदं स्वरिदमिदास वाममयं प्रकाश उर्वन्तरिक्षम्। ऋक् १०।१२४।६।।

आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च।

ऋक् १।११५।१।।

सूर्यो ह्यत्र विश्वात्मा विष्णुः। अन्तरात्मा वा सूर्यः पार्थिवस्य शरीरस्य प्रकाशकत्वात्।

भवति चात्रास्माकम्—

प्रकाशनो विश्वमिदं समस्तं
प्रकाशयन् सर्व-जगद्[1] बिभर्ति।
स्वयंप्रकाशः स उ सर्ववन्द्य-
स्तेजांसि[2] सर्वाणि च तं नमन्ति।।३७२।।

यद् वा प्रकाशन्ते सर्व एव ग्रहास्तेन करणभूतेन तस्मात् स विष्णुः 'प्रकाशनः' उक्तो भवति।

भवति चात्रास्माकम्—

प्रकाशते दीप्तिमतः प्रदीप्त्या
सूर्यः शशाङ्कोऽपि तथा तयैव।
प्रकाशनं तं प्रणमन्ति सर्वे
ग्रहाः समस्ताः स्वविकारयुक्ताः[3]।।३७३।।

---

१. सर्वजगत्=सर्वं जगत् तत्। २. तेजांसि=तेजोगुणवन्ति। ३. स्वविकारयुक्ताः-स्वेन विकारेण च युक्ताः, चक्षुः सूर्यस्य विकार इत्यादिः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ।
ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः ।।४३।।

२७५ ओजस्तेजोद्युतिधरः, २७६ प्रकाशात्मा, २७७ प्रतापनः।

२७८ ऋद्धः, २७९ स्पष्टाक्षरः, २८० मन्त्रः, २८१ चन्द्रांशुः, २८२ भास्करद्युतिः।।४३।।

ओजस्तेजोद्युतिधरः–२७५

ओजः- 'उब्ज आर्जवे' तौदादिः, ***'उब्जेर्बले बलोपश्च'*** (दशपाद्युणादिः ६।५२) उब्जेर्धातोरसुन् प्रत्ययो भवति बले गम्यमाने बलोपश्च भवति। उब्जतीति 'ओजो' बलम्।

तेजः- 'तिज निशाने' भौवादिकः, ***'सर्वधातुभ्योऽसुन्'*** (उणादिः ४।१९०। दशापाद्युणादिः ६।४६)। तितिक्षत इति तेजः' दीप्तिः।

द्युतिः-'द्यु अभिगमने' आदादिकः, 'स्त्रियां क्तिन्' द्युतिः। ओजश्च तेजश्च द्युतिश्च ओजस्तेजोद्युतयः, तासां धर 'ओजस्तेजोद्युतिधरः'। 'द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते' इति, तेन ओजोधरः, तेजोधरः, द्युतिधर इति च विगृहीतं भवति।

द्युतिरभिगतिः, आभिमुख्येन गमनम्। यथा सूर्यादयो ग्रहा राशेर्राशिमभिक्रामन्ति, तथैवायं देहाभिमानी आत्मा देहाद्देहान्तरमतिक्रामति। जीवोऽपि 'द्युतिधरः' उक्तो भवति। भगवता विश्वमिदमोजसा तेजसा द्युत्या च धृतमास्ते, तथैवायं जीवोऽपि स्वके देहे ओजस्तेजो द्युतिं च धारयन् जीवितुं क्षमते। ओजस्तेजोद्युतिधरेण विष्णुना विश्वमिदं ओजसा तेजसा द्युत्या च धृतमास्ते।

मन्त्रलिङ्गञ्च–

ओजोऽस्योजो मयि धेहि, तेजोऽसि तेजो मयि धेहि। यजु० १९।९।।
द्युमाँ असि क्रतुमाँ इन्द्र धीरः। ऋग् १।६२।१२।।
त्वं हि मन्यो अभिभूत्योजाः स्वयंभूर्भामो अमिमातिषाहः।
विश्वचर्षणीः सहुरिः सहावानस्मास्वोजः पृतनासु धेहि ।।
ऋक् १०।८३।४।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

ओजस्तेजोद्युतिधरस्तथा, व्याप्य जगत् स्थितः।
यथा जीवो वपुर्नित्यं, व्याप्नोत्योजोभिरान्तकम्[1] ।।३७४।।

प्रकाशात्मा—२७६

प्रकाशो दीप्तिः, आत्मा शब्दः स्वरूपपर्यायः, प्रकाश एव आत्मा स्वरूपं यस्य स 'प्रकाशात्मा' विष्णुः।

मन्त्रलिङ्गञ्च—

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्। यजु० ३१।१८।।
तदेवाग्निस्तदादित्यस्तद् वायुस्तदु चन्द्रमाः । यजु० ३२।१।।
इदं स्वरिदमिदास वाममयं प्रकाश उर्वन्तरिक्षम्। ऋग् १०।१२४।६।।

यथायं भगवान् सूर्यः स्वयं प्रकाशस्वरूपः सन् विश्वमिदं प्रकाशयति, तथैवायं प्रकाशात्मा भगवान् विष्णुः सकलं तैजसं जगत् प्रकाशयति। लोकेऽपि च पश्यामः-प्रकाशस्वरूप आत्मा शरीरेन्द्रियाणि प्रकाशयति, तैः प्रकाशमाप्तैरिन्द्रियैर्युक्तं वपुरपि प्रकाशात्मोक्तं भवति। प्रकाशोऽस्मिन् आत्मनि अस्तीति 'प्रकाशात्मा' आत्मात्र विग्रहवाचकः।

यद्वा- प्रकाशेन साकं नित्यमतति गच्छतीति 'प्रकाशात्मा' सूर्यः। सूर्य-प्रकाशे जगत् नित्यम् अतति गच्छतीति प्रकाशात्मा जगदुक्तं भवति। अमुथैव भगवद् व्यवस्थात्मके यथानियत-ज्ञानात्मके प्रकाशे जगदतति प्रलयोदयौ लभत इति कृत्वा 'प्रकाशात्मा' जगदप्युक्तं भवति। एवं विकल्पनाः 'प्रकाशात्म' नाम्नो विश्वे वैविध्यविज्ञानायैव प्रदर्शिता भवन्ति।

भवति चात्रास्माकम्—

[2]प्रकाशकानामपि योऽन्तरात्मा
स्वयं स्वरूपेण च यः प्रकाशः ।
विश्वस्य सर्वस्य गतौ रतस्य
प्रकाशभूतः स उ चाऽऽत्मभूतः।।३७५।।

---

१. आ अन्तकम्=आन्तकम्, यावन्मृत्युरिति। यद्यपि शरीरौजसादयो गुणाः पार्थिवास्तथापि जीवापाये ते गुणा न कार्यक्षमा भवन्तीति कृत्वोक्तं भवति-व्याप्नोत्योजोभिरिति।
२. प्रकाशकानाम्=सूर्यादीनां तैजसाम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रतापनः—२७७

'तप संतापे' भौवादिकः। तस्माण्णिच्, तस्मात् ***'ण्यासश्रन्थो युच्'*** (पा० ३।२।१२४) इत्यनेन बाहुलकात् कर्तरि 'युच्' प्रत्ययः। प्र उपसर्गः प्रकर्षे। प्रतापयतीति 'प्रतापनो' विष्णुः सूर्यादीनपि तापयति। गर्भस्थमपि सजीवं पिण्डं मातृगर्भाशयोष्मणा तापयति। भूमिस्थं बीजं च भूमेरूष्मणा तापयति। तस्य भगवतोऽभीद्धतपस ऋतं सत्यं चोत्पन्ने।

मन्त्रलिङ्गं च—

ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत। ऋग् १०।१९०।१।।

वृषा विजज्ञे जनयन्नमर्त्यः प्रतपञ्ज्योतिषा तमः। ऋग् ६।१०८।१२।।

अतः स विष्णुस्तापन उक्तो भवति। सूर्योऽपि 'प्रतापनः' उक्तो भवति, सर्वं जगत् तापयतीति कृत्वा।

भवति चात्रास्माकम्—

प्रतापनो विष्णुरनन्तरूपः
[1]प्रतापभेदैश्च जगत् समस्तम्।
प्रतापयन् सौति[2] शुभाप्तये[3]ऽदस्-
तपस्विनं स्वीकुरुते च विद्या।।३७६।।

ऋद्धः—२७८

'ऋधु वृद्धौ' दैवादिकः सौवादिकश्च। 'ऋद्धः' वृद्धः, पूर्ण इत्यर्थः। सर्वकमेव लोके स्वकेन सरणभूतेन साधनेन पूर्णमिति कृत्वा 'ऋद्ध' रूपो भगवान् विष्णुः सर्वं व्यश्नुवान आस्ते।

तद्यथा मानुषं वपुः सर्वक्रियाक्षमं सत् ऋद्ध-नामानं भगवन्तं विष्णुं प्रपदं व्याचष्टे, अमुथैव मनुष्योऽपि स्वकानि यन्त्राणि निर्मिमाणस्तद्यन्त्रं ऋद्धं सुचारुरूपेण क्रियाक्षमं कर्तुं प्रयतते। यो य एवं प्रयत्नगुणः स तस्यैव 'ऋद्धः' इति नामतो व्याप्तस्यानुकरणमात्रमेव।

---

१. प्रतापभेदैः= सूर्यप्रतापः, अग्निप्रतापः, गर्भप्रतापः, भूमिप्रतापः, कालप्रतापः, पित्तदोषप्रतापः, कर्मपरिपाकः, इत्येवमादिः। २. सौति=अभ्यनुजानाति। ३. शुभाप्तये=शुभप्राप्तये।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

यद्वा प्रवृद्ध सत्पते न मरा इति मन्यसे। उतो तत्सत्यमित्तव।।

अथर्व २०।११२।२।।

आत् ऋध्नोति हविष्कृतम्।। ऋग् १।१८।८।।

समित्तन् वृत्रहाखिदत् खे अदौ इव खेदया। प्रवृद्धौ दस्युहाभवत्।।

ऋक् ८।७७।३।।

भवति चात्रास्माकम्—

ऋद्धः स्वयं स भगवान् वरेण्यो
विश्वं समग्रं कुरुते ह वृद्धम्।
ऋध्नोति चार्थ्यान्[1] बहुधार्थिनः[2] स
काया[3] तमृद्धं प्रपदं विचष्टे ।।३७७।।

यत्तूक्तम्—'ऋध्नोति चार्थ्यान् बहुधार्थिनः सः' तत्र मन्त्रलिङ्गञ्च यथा—

प्रातः प्रातर्गृहपतिर्नो अग्निः सायं सायं सौमनसस्य दाता।
वसोर्वसोर्वसुदान एधीन्धानास्त्वा शत ᳚ हिमा ऋधेम।।

अथर्व० १६।५५।४।।

स्पष्टाक्षरः—२७६

'स्पश बन्धने' भौवादिकः, 'स्पष्टो' बद्धः। अक्षरं नक्षरं नक्षत्रं वा। बद्धं नक्षत्रैर्जगत् येन, स 'स्पष्टाक्षरो' भगवान् विष्णुः सर्वं नक्षत्रैर्बद्धं जगत् नयति, यावदायुःप्रमाणं यस्य।

तद्यथा—मानुषे शरीरेऽस्थिबन्धनानि न नश्यन्ति यावदायुःप्रमाणम्, अमुथैव सर्वस्मिन् शरीरे यथाशरीरभोगाय कृतान्यस्थिबन्धनानि च न नश्यन्ति यावदायुःप्रमाणं तस्य जीवस्य। मांसमयैः स्नायुभिस्तानि निबद्धानि सन्ति। एवं स्पष्टाक्षरत्वगुणो भगवतो विष्णोः स्पष्टाक्षरेति नामवतः स्पष्टाक्षरत्वं सर्वत्र व्याप्तं दृश्यते। अमुथैव वीरुध-वृक्ष-गुल्म-लतादिष्वपि योजनीयं भवति।

अक्षरधर्मकानि नक्षत्राणि यावदायुःप्रमाणमस्य कल्पस्य तावन्निबद्धानि कल्पमेनदग्रे नयन्ति। ग्रहा अपि नियतमार्गचलनेन निबद्धा एव जगद् भावाभावाय

१. अर्थ्यान्= लब्धुमर्हान्। २. अर्थिनः=याचकान्। ३. काया=सर्वप्राणिनां काया।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नयन्ति। प्रपदं संख्यातुमनर्हाणि तमेव स्पष्टाक्षरं सर्वव्यापकं विष्णुं गायन्ति।

मन्त्रलिङ्गञ्च—

यानि नक्षत्राणि दिव्यन्तरिक्षे अप्सु भूमौ यानि नगेषु दिक्षु।
प्रकल्पयंश्चन्द्रमा यान्येति सर्वाणि ममैतानि शिवानि सन्तु।।

अथर्व १६।८।१।।

तमृतं च सत्यं च सूर्यश्च चन्द्रश्च नक्षत्राणि चानुव्यचलन्।।

अथर्व १५।६।५।।

अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः। सूराय विश्वचक्षसे।।

ऋग् १।५०।२।।

भवति चात्रास्माकम्—

स्पष्टाक्षरो विष्णुरसंख्य-भेषु[1]
नद्ध्वा ग्रहान् नह्यति विश्वमेतत्[2]।
स्पष्ट्रा निबद्धं जगदात्ममानं[3]
नयन् जगन्नह्यति विश्वमात्रम्[4]।।३७८।।

वर्णपर्यायकोऽक्षरशब्दः कविनाम्नि व्याकृतः।

मन्त्रः—२८०

'मन ज्ञाने' दैवादिकः, 'मनु अवबोधने' तौदादिकः। आभ्यां ***'सर्वधातुभ्यः ष्ट्रन्'*** (उणादि० ४।१५६)। मन्यते मनुते अनेनेति 'मन्त्रः'। जगति यज्ज्ञानं प्रसृतं वर्त्तते तस्य ज्ञानस्य प्रवर्त्तनं येन भवति, स विष्णु'र्मन्त्रः'। ज्ञानस्य साधनीभूता ऋचोऽपि 'मन्त्र' शब्दवाच्या भवति।

मन्त्र-नामायं भगवान् विष्णुः स्वकृते विश्वे प्रतिपदं ज्ञानेनानुस्यूतं सर्वं गमयति। तद्यथा—यस्मिन् देशे यस्मिन् काले यथाविधप्रक्रियया यदुद्भवति, तत्तथैव कल्पान्तं यावदुद्भविष्यति। सूक्ष्मपरिज्ञानापय वेदस्य सृष्ट्युत्पत्तिक्रम-ज्ञानमवश्यं कर्त्तव्यं भवति। वेदोक्तसिद्धान्ताश्चाविचलाः सन्ति। तद्यथा **'गावो घृतस्य मातरः'** (अथर्व ६।९।३)।—गावो धेनवो घृतस्य मातरो जनन्यः सन्ति। महिष्यादीनां घृतं सदोषत्वान्नादृतम्।

१. भ-शब्दो लग्न-राशि-ग्रह-नक्षत्राणां च वाचकः प्रयुक्तो भवति। २. विश्वमेतत्=चतुर्भेदविभक्तं जगत्। ३. जगदात्ममानं=जगदायुरिति। ४. विश्वमात्रम्=निःशेषमिति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अपरं च यथा—

संभूतिं च विनाशं च यस्तद् वेदोभयं सह।
विनाशेन मृत्युं तीर्त्वा संभूत्यामृतमनुश्ते।। यजुः ४० ।११।।

विनाशो=निर्यातो विक्रयो वा। मृत्युः=नैत्यिको विषमीभावः। सम्भूतिः=निर्माणं, अमृतं यावदायुःप्रमाणजीवनाय समर्थीभावः। आकल्पमनश्वरोऽयं सिद्धान्तः।

अपरं यथा—**'दशमे मासि सूतवे'** (अथर्व ५।२५।१०-१३)। नवमासानामान्तर्येण सर्वराशीनां प्रादुर्भावः, मेषाख्यो राशिः स्वकात् नवोत्तरं जनयति, स राशिश्च मकरः, मकरो नवान्तरायोत्तरमुत्पादयति, स च राशिस्तुलास्थानीयः, तुला च स्वकान्नवोत्तरं दशमं कर्कराशिं जनयति, कर्कश्च स्वकान्नवान्तरायोत्तरं मेषाख्यं राशिं जनयति। अमुथैव २।११।८-५ इत्यस्मिन् वर्गे योज्यम् अमुथैव च ३।१२।६-६ इत्यस्मिन् वर्गे योजनीयम्। इति दिङ्मात्रमुक्तम्।

मनुष्यसिद्धान्तितं ज्ञानं नैकान्ततोऽवितथं भवति। अत एव च सिद्धान्तितं वेदे—

अपक्रामन् पौरुषेयाद् वृणानो दैव्यं वचः।
प्रणीतिरभ्यावर्तस्व विश्वेभिः सखिभिः सह।। अथर्व ७।१०५।१।।

मन्त्रः समानं भवति 'ज्ञ' इत्यनेन। मन्त्रेण विष्णुना सर्वमिदं विश्वं ज्ञानेन नियतीकृतमास्ते। तस्माद् यो यस्य ज्ञानं मन्त्रं तत्त्वं वेद स तस्य विष्णोर्व्याप्तं गुप्तं तत्त्वं वेद, एवं विविधमूहनीयं भवति।

मन्त्रलिङ्गञ्च—

यस्मादृचो अपातक्षन् यजुर्यस्मादपाकषन्।
सामानि यस्य लोमान्यथर्वाङ्गिरसो मुखं स्कम्भं तं ब्रूहि कतमः स्विदेव सः।।
अथर्व १०।७।२०।।

कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान्व्यधाच्छाश्वतीभ्यः समाभ्यः।
यजु ४०।८।।

यथेमां वाचं कल्याणीमावदानि जनेभ्यः। यजु २६।२।।

भवति चात्रास्माकम्—

ज्ञानात्मना विश्वमिदं समस्तं
मन्त्रेण गुप्तं[1] तदु याति कल्पम्।

१. मन्त्रेण गुप्तम्-विष्णुना गुप्तं रक्षितम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वो वेद मन्त्रं स उ वेद विश्वं[1]
मन्त्रेण गुप्तेन[2] समूढमेतत्।।३७६।।

चन्द्रांशुः—२८१

'चन्द्र'-शब्दो हि 'चदि आह्लादे दीप्तौ च' भौवादिकः, तस्मात् 'रक्' प्रत्ययः। ***'स्फायितंचिवंचि०'*** (उणादि १।१३) सूत्रेण सिध्यति। चन्दति आह्लादयति हर्षयति दीपयतीति वा 'चन्द्रः' सोमः रात्रिपतिर्वा।

'अंशुः'-'अंश विभाजने' चौरादिकः, तस्मात् मृगय्वादित्वात् 'कुः' प्रत्ययः, बाहुलकाद् वा 'उः' प्रत्ययः। अथवा-'अशूङ् व्याप्तौ संघाते च' 'अश भोजने च' अस्माद् बाहुलकाद् बाहुलकादौणादिक 'उ' प्रत्ययो नुमागमश्च। यद्वा-'अन प्राणने' अस्मात् 'उ' प्रत्ययः 'शुगागमश्च'। यद्वा-'अम गतौ' धातोः 'उ' प्रत्ययः शकारागमश्च। एवं विविधधातुकल्पनया 'अंशु' शब्दः साध्यते।

अत्र भाष्ये स्मर्तव्यं सर्वत्र च योजनीयं यद् बहूनर्थान् विज्ञापयितुं बहूनां धातूनां किं वा कस्यचिद्धातुविशेषस्य कल्पना सम्भाविनोऽथस्य किञ्चिन् निमित्तमधिकृत्य शब्द-व्युत्पत्तिः क्रियते। तेनान्वाख्यानानि वैविध्यमापद्यन्ते। उक्तं च—

अन्वाख्यानानि भिद्यन्ते शब्दव्युत्पत्तिकर्मसु।
बहूनां सम्भवेऽर्थानां निमित्तं किंचिदिष्यते।। वाक्यपदीये २।१७१।।

चन्द्रांशुशब्दस्य धातुभेदादिमेऽर्थाः सम्पद्यन्ते-आह्लादते विभजतीति च, आह्लादते व्याप्नोति च, आह्लादते संघातयति च, आह्लादते अश्नाति च, आह्लादते प्राणिति च, आह्लादते अमति गच्छति च।

योजनात्वेवं—भगवत आह्लादनविभजनोभयरूपधर्मः पुष्पे दृश्यते। तत्र पुष्पपत्राणि हर्षकराणि विभजनवन्ति च भवन्ति। प्रतिप्राण्यंगानि विभजनवन्ति सन्त्यपि प्राणिनं प्रति तस्य क्रियायां साधकानि सन्ति प्राणिनो हर्षमाह्लादं च जनयन्ति। तद्यथा-द्वे जंघे द्वे भुजे विंशतिश्चांगुलयः पृथक्-पृथक् चेन्द्रियद्वाराणि वामनत्वाद् अर्थात् विविधज्ञानमयत्वात् तस्य विष्णोरिति।

१. मन्त्रेण विष्णुना गुप्तेनान्तःस्यूतेन। २. समूढं=सर्वतो निबद्धमिव व्याप्तमस्ति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एवं चन्द्रांशुरूपेण भगवान् विष्णुः सर्वं व्याप्नुवन्नात्मना प्रकाशतेतराम्। यथा नियन्ता स्वकया व्यवस्थयाऽऽत्मानं दीपयति, व्याप्नोति च, तथैव भगवान् विष्णुः स्वके शासितव्ये जगति स्वकां व्यवस्थां व्यवस्थापयन् प्रतिवस्तु चन्द्रते दीपयति प्रकाशयति वा।

आह्लादते संघातयतीति च यदुक्तं तत्र लोके पश्यामः—स्थानान्तरं प्रतिष्ठासुर्मनुष्यः स्वकानि विकीर्णानि साधनानि संघातयति, अमुथैवायं भगवान् सर्वं व्यश्नुवानो विष्णुः प्रतिपदं लोकान् संघातयति यथा मृत्युः प्रतिपदम्मनुष्यान् निगृह्णाति।

यदुक्तं—आह्लादते-अश्नाति च। यथा लोके पश्यामः-परिवारे बाला युवानो वृद्धा वा पृथक्-पृथग् व्यंजनेन भुंजाना आह्लादमनुभवन्ति, तथैवायं प्राणिने नानाविधान् शाक-फल-मूलान् नानाविधान्यन्नानि च समुद्भावयति। तेनैतेन कर्मणा 'चन्द्रांशुत्वं' तस्य सर्वत्र व्याप्तं दृश्यते।

यत्तूक्तं—आह्लादते प्राणिति च। अत्र भूगोले विचित्रचित्रचित्रितासु परिस्थितिषु तिष्ठन् प्राणी सहर्षं जीवति, जीवनाय वा कृतमोहो दृश्यते, अमुथैव भगवान् चन्द्रांशुर्विष्णुः प्रतिप्राणि हृदयाकाशे विराजमानस्तं तं प्राणिनं हर्षयति, जीवयति, भोगैर्योजयति च।

यत्तूक्तं-आह्लादते अमतीति, तत्र-प्रतिपदं लोके पश्यामः-सर्वक एव विश्वे गतिं कुर्वन्नेव प्रसादयत्यात्ममनसी, एवं चन्द्रांशुत्वं तस्य विष्णोः सर्वत्र व्यश्नुवद् दृश्यते। एवं सम्भवेऽर्थेऽर्थं व्यञ्जयितुं निमित्तमन्वेष्टव्यं भवत्येवेति। य एवं लोकं पश्यति जानाति वा स मन्त्रमिमं साक्षात् कुरुते—

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्।।

ऋक् १।२२।२०।।

दृश्यमानचन्द्रकिरणमिव सर्वजगदाह्लादको वा विष्णुश'चन्द्रांशु' रुक्तो भवति। मन्त्रलिङ्गञ्च—

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः।
तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः।।

यजु० ३२।१।।

भागं देवेभ्यो वि दधात्यायन् प्र चन्द्रमास्तिरते दीर्घमायुः।

ऋ० १०।८५।१९।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

चन्द्रांशुराह्लादयते समस्तं
चन्द्रांशुरन्तःकरणानि यौति ।[1]
चन्द्रांशुमन्तर्विततं ह लोके
पश्यन्ति कर्माणि च तस्य विज्ञाः[2] *।।३८०।।*

भास्करद्युतिः—२८२

भाः प्रकाशः, तं करोतीति भास्करः। ***'दिवाविभानिशाप्रभा०'*** (पा० ३।२।२१) इत्यादिना सूत्रेण करोतेष्टः प्रत्ययः। द्युतिः=प्रकाशः। भास्करस्य द्युतिः=भास्करद्युतिः, भास्करे विष्णोरेवैषा द्युतिरिति।

मन्त्रलिङ्गञ्च—

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमाभासि रोचनम्।।
ऋक् १।५०।४।।

इन्द्रो राजा जगतश्चर्षणीनाम्। ऋक् ७।२७।३।।

इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमम् विश्वजिद्धनजिदुच्यते बृहत्।
ऋक् १०।१७०।३।।

स इन्द्रो भूत्वा तपति मध्यतो दिवम्। अथर्व० १३।२।१३।।

लोकेऽपि पश्यामः-स्थावरे नश्वरे चास्मिन् शरीरे द्युतिः प्रकाश आत्मन एव, उक्तं च वेदे—**'सूर्य आत्मा जगतस्तस्थुषश्च'** (ऋक् १।११५।१)। एवं समानं भवति लोके विष्णोर्ज्योतिस्तथैव यथा शरीरे जीवस्येति।

भवति चात्रास्माकम्—

प्रकाशकानां स उ एक एव
प्रकाशकः सर्वजगद्वरेण्यः ।
यथा शरीरस्य उ सूर्य आत्मा
प्रकाशकोऽस्यापि[3] *तथैव विष्णुः।।३८१।।*

❖ ❖ ❖

१. यौति=विविध-भावाभावाय च मिश्रयति वियुनक्ति वा। २. विज्ञाः=विविधज्ञानविज्ञाननिष्ठाः, लोकमर्मज्ञा इत्यर्थः। ३. अस्य=सूर्यस्य।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अमृतांशूद्भवो भानुः शशबिन्दुः सुरेश्वरः।
औषधं जगतः सेतुः सत्यधर्मपराक्रमः।।४४।।

२८३ अमृतांशूद्भवः, २८४ भानुः, २८५ शशबिन्दुः, २८६ सुरेश्वरः।
२८७ औषधम्, २८८ जगतः सेतुः, २८९ सत्यधर्मपराक्रमः।।४४।।

अमृतांशूद्भवः—२८३

अमृतं=जलम्, 'अंश विभाजने' तस्मात् 'अंशुः' विभाग इति। उद्भव उत्पत्तिः=जलं विभज्य उत्पद्यते इति 'अमृतांशूद्भवः' इति।

मन्त्रलिङ्गं च—

तम आसीत् तमसा गूढमग्रेऽप्रकेतं सर्वमा इदम्।
तुच्छ्येनाभ्वपिहितं यदासीत् तपसस्तन्महिना जायतैकम्।।

ऋक् १०।१२६।३।।

सारार्थतस्तु—अमृतं यथान्यायं विभज्यात्मानं जीवानां कृते उच्चैः प्रकाशयतीत्य'मृतांशूद्भवो' विष्णुः।

लोकेऽपि च पश्यामः- गर्भस्थजले पृथग् निर्विकारं स्थापयन् गर्भं जनयति। कमल-शृंगाटक-शेवाल-प्रभृतीनि च तमेव विष्णुं निर्विकल्पं कृतिषु नियतनियमं व्यञ्जन्ति।

अमुथैव जीवो जलं पिबन्, अन्नमश्नंश्च स्वयं प्रकृत्यैव विभज्य शरीरमुद्भावयति वर्धयति प्रकाशयति। रस एव तस्य सार इति। एवं सर्वत्र लोके प्रतिक्षणं वैष्णवं कर्म दृष्ट्वा योजनीयं भवति। एवं 'अमृतांशूद्भवः' स्वकेन नाम्ना सर्वं व्यश्नुवान आस्ते।

भवति चात्रास्माकम्—

जलं स विष्णुस्तपसा विभिन्दन्
जगत् प्रकाश्यं[1] कुरुते ह नित्यम्।
तञ्चामृतांशूद्भवनामगेयं[2]
जगत् समस्तं प्रपदं विचष्टे[3]।।३८२।।

१. प्रकाश्यम्=प्रकाशमानेतुमर्हम्। २. अमृतांशूद्भवनामगेयम्=अमृतांशूद्भवेन नाम्ना गातुमर्हं स्तोतुमर्हमस्तीत्यर्थः। ३. विचष्टे=विविधप्रकारैराख्याति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भानुः—२८४

'भा दीप्तौ' आदादिकः, *'दाभाभ्यां नुः'* (उणादि० ३।३२) इत्यनेन 'नुः' प्रत्ययः'। भातीति 'भानुः' सूर्यः। सर्वेषां भास्वतां भास्करः स विष्णुर्भानुरुक्तो भवति। यथेदं बाह्यं जगत् भानुना दीप्तं सत् प्रकाशते, तथैवास्मिञ्छरीरेऽग्निः प्रभामास्थापयति।

उक्तं च चरके—

आयुर्वर्णो बलं स्वास्थ्यमुत्साहोपचयौ प्रभा ।
ओजस्तेजोऽग्नयः प्राणश्चोक्ता देहाग्निहेतुकाः।।
शान्तेऽग्नौ म्रियते युक्ते चिरं जीवत्यनामयः ।
रोगी स्याद्विकृते मूलमग्निस्तस्मान्निरुच्यते ।।

चरकचिकित्सा० १५।३-४।।

एवमग्निरूपेण चराचरं भानुत्वरूपेण च भगवान् विष्णुर्जगदात्मानं व्यश्नुवानः सन् 'भानु' रुक्तो भवति।

मन्त्रलिङ्गं च—

पाहि नो अग्ने रक्षसः पाहि धूर्त्तेरराव्णः।
पाहि रीषत उत वा जिघांसतो बृहद्भानो यविष्ठ्य।।

ऋग् १।३६।१५।।

अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा यजत्र ।
येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः।।

यजु० १२।४८।।

प्रसंगतः—चित्रं भातीति 'चित्रभानुः' आदित्यः अग्निश्च। स्वर्भातीति 'स्वर्भानुः' राहुः। बृहति भातीति 'बृहद्भानुः'। विश्वे भातीति 'विश्वभानुः'।

भवति चात्रास्माकम्—

भानुर्हि विष्णुः स विभाति विश्वे
चरेऽग्निरूपेण विभाति काये।
स चित्रभानुः स उ विश्वभानुः
स भास्वतां चापि विभासकोऽत्र।।३८३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शशविन्दुः—२८५

'शश' प्लुतगताविति भौवादिको धातुः, ततः पचादिलक्षणेना'च्' प्रत्ययेन 'शश' इति सिद्ध्यति। ये तरन्त इव क्षिप्रगामिनस्ते 'शशाः' इत्युच्यन्ते।

'विन्दु' शब्दश्च ज्ञानार्थकाद् 'विद्धातोः' ***'विन्दुरिच्छुः'*** (पा० ३।२।१६६) सूत्रेण 'उः' प्रत्ययो निपातनान्नुमागमश्चैवं सिद्धम्।

एवञ्च तरतामिव गच्छतां सूर्यचन्द्रादिग्रहाणां तेषां गतेश्च यो ज्ञाता स 'शशविन्दु' रित्युच्यते। तथा च यो यस्य ज्ञाता तत्त्वतः स तस्य प्रवर्तकः, यथा लोके पश्यामः- मनःसहितानामिन्द्रियाणां ज्ञाता=तत्त्वविदात्मा समनस्कानामिन्द्रियाणां प्रवर्तकः, तथैव सूर्यचन्द्रादीनां पूर्णरूपेण ज्ञाता सर्वाध्यक्षो भगवान् सर्वेषामेषां प्रवर्तकः, अर्थादेषां सर्वेषां गतिदाता नियन्ता चास्ति। एतदेवाभिप्रेत्य विद्वांसो भगवन्तं 'शशविन्दु' नाम्ना स्तुवन्ति।

एष भगवतः शीघ्रगामित्वरूपोऽथापि ज्ञानशीलत्वरूपश्च गुणः सर्वत्र लोके व्याप्तोऽस्ति। अत एवेह लोके प्रत्येकं जीवः स्वोद्देश्यपूर्त्यै महतीं त्वरां विधत्ते, करोति चाविष्कारं शीघ्रगामिनां यन्त्राणाम्। प्राणिषु शीघ्रवेदि मनो, ग्रहेषु च शीघ्रगश्चन्द्रः 'शशविन्दु' रुच्यते।

मन्त्रलिङ्गञ्च—

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति'।।
तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।। यजु० ४०।४,५।।
यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा।।
१०।८२।३।।

भवति चात्रास्माकम्—

जिज्ञासवस्तं शशविन्दुमग्र्यं
मनोजवेनैव विदन्ति वेद्यम् ।
गतिं स विश्वे प्रणिधाय सर्वां
गत्यैव सर्वानणुशो युनक्ति।।३८४।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुरेश्वरः—२८६

सूपसर्गपूर्वो'रा' दाने आदादिकः, तस्मात् 'क्विप्' प्रत्ययः='सुरः' शोभनदानः। को नाम शोभनदानः ? यो हि सत्त्वगुणसंसिक्त-मनोबुद्धीभ्यां ददाति। तेषामीश्वरः रक्षकः स्वामी वा सुरेश्वरः। 'ईश्वर' शब्दो हि 'ईश ऐश्वर्ये' आदादिकः, तस्मात् ***'स्थेशभासपिसकसो वरच्'*** (पा० ३।२।१७५) सूत्रेण 'वरच्' प्रत्ययः, तच्छीलतद्धर्म-तत्साधुकारिष्वर्थेषु।

आदत्तस्य विसर्जनं दानं भवति। पात्रापात्रविवेचनं दानस्य स्थानविवेचन-मात्रमेव। दानादाने नित्यशो लोके भवतः। तद्यथा— श्वास आदानं, उच्छ्वासो दानं; अशनमादानम् हदनं दानम्; द्रवस्य पानमादानम्, मूत्रप्रसेको दानम्।

लोकेऽपि च पश्यामः— स्थावरस्य वनस्पतिजगतः पत्र-पुष्प-फलानि प्राणिभिरादीयन्ते, वनस्पतिभ्यश्च दीयमानानि प्राणिभिर्मलमूत्रस्वेदादीनि वनस्पतीन् पुष्णन्ति। एष हि क्रमः सार्वत्रिकः। यो हि मन्दबुद्धिः क्रममेनं व्युत्क्रम्य दानं विसर्जनं त्यागं वा न कुरुते, अयुक्ते स्थाने अयुक्ते वा काले त्यागं करोति, नासौ यशो लभते न च पुण्यानि वचांस्यादत्ते।

प्रत्यहं विष्णुः स्वयं कृते लोके दानादानाभ्यां व्याप्तः सन् दानेऽप्रमादिनामीश्वरत्वं स्वीकुर्वन् "सुरेश्वरः" उक्तो भवति। ये हि युक्तियुक्तं दानं न कुर्वन्ति ते म्रियन्ते, कुतः पुनस्तेषामीशित्वं स्यात्।

मन्त्रलिङ्गञ्च—

अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि संजयामि शश्वतः।
मां हवन्ते पितरं न जन्तवो अहं दाशुषे विभजामि भोजनम् ।।

ऋक् १०।४८।१।।

देवो नः सविता वसोर्दाता वस्वदात्। यजु० ४।१६।।

त्वं दाता प्रथमो राधसामसि सत्य ईशानकृत्।।

अथर्व० २०।१०४।३।।

भवतश्चत्रास्माकम्—

पुष्णाति लोकेऽत्र चरं हि तस्थिवान्
स्थिरं[1] च पुष्णाति चरँस्तथैव।

---

१. स्थिरं जगत्=स्थाणुजगत् वृक्ष-लता-क्षुप-वनस्पति-प्रभृतीनि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुरेश्वरोऽयं भगवान् वरेण्यो
सुरं जगत्[1] शास्ति सनात् पुराणः।।३८५।।

हित्वा च यो दानविधिं विमुग्धो
जिजीविषेद्दीर्घमथापि कालम्।
तं नष्टबुद्धिं भगवान् जहाति
तं प्राणवायुश्च जहाति सद्यः।।३८६।।

यो हि नाम कश्चित् आदत्त एव न विसृजति स म्रियते। तद्यथा-कश्चिद् भुक्त एव न हदति स म्रियते। तथा यो ददात्येव न चादत्ते, तद्यथा अतिसारिवत् अतिसरत्येव नाश्नाति, स म्रियत एव। तेषां मृत्युमभिसरतां नासावीश्वरः। तद्यथा-न हि मृतस्य सेनाध्यक्षो राजा वा सेनायामीशिता, तथैव सुदातृणामीश्वरः सुरेश्वरः इत्युक्तो भवति।

औषधम्—२८७

'उष दाहे' भौवादिकः, ओषो दाहः पाको वा स ओषो धीयतेऽत्रे'त्यौषधिः'। दकारोपजनत्वाद्दोषो धीयतेऽत्र दोषधिः स'न्नोषधि'रुच्यते। ओषधेर्विकारः कर्म वा 'औषधम्'।

सूर्यस्य भूगोलं प्रति यत्र यत्र यथाविधप्रकारः सन्तापप्रभावस्तथाविधेन य उत्पन्नः पृथिव्यां रसस्तं रसमोषेण सहितं मूलिन आददते। ते तं रसं बहिरुन्नयन्ति, बहिरागतस्य च तस्य फलमिति संज्ञा क्रियते।

यथा हि मूलिनः पृथिवीस्थमोषं दधति, तथैव वृक्ष-गुल्म-लतावनस्पतीनां पंचांगं जीवानां शरीरस्य दोषम् ओषं वा दधाति, तद्यथा-क्षुधोष्माणमन्नं दधाति, दोषेण प्रवृद्धमूष्माणं स्वयं निगीर्यामलकी-हरिद्रा-गुडूच्यादीनि नामग्राहं संख्यातुमशक्यानि शरीरिणमुपकुर्वन्ति।

यथा लोके वह्न्याधानाय भ्राष्ट्रचुल्लाहसन्तीप्रभृतीनि निर्मीयन्ते, तथैव भगवता प्रतिप्राणि अग्न्याशयं प्रकल्प्य तत्र पित्तरूपेणाग्निः प्रस्थापितोऽस्ति। अग्निरेव पित्तं-पित्तं वाग्निः समानं भवति पूर्वेण। समुद्रो हि वाडवाग्नेरधिष्ठानम्।

एवं वक्तुमर्ह्यते-ओषधिः समुद्रः, ओषधिः=अग्न्याशय इति। एतत् कर्म केन

१. सुरं जगत्=दानादाने प्रवृत्तं जगदिति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कृतम् ? उत्तरं भवति विधिना विधिश्च धाता ब्रह्मपर्यायः। अत एव मृते पुरुषे सत्यपि सर्वावयवे न कोऽपि पुनरग्निं पित्ताख्यं कार्याय समर्थयितुं शक्तोऽभूत्।

सूर्यः कस्मिंस्तपति ? खे, खञ्च तत् । तस्मात् सूर्यात्मकस्यौषस्य धारणात् 'ओषधि' ब्रह्म। ओषधेः कर्म औषधं सर्वं जगत्। तदस्यास्तीति मत्वर्थीयोऽच्। अत एतदुपपद्यते-औषधं ब्रह्म, ब्रह्म वौषधं, औषधं विष्णुः, विष्णुर्वौषधमिति। ओषधिरूपेण, औषधरूपेण वा भगवान् सर्वत्र प्रपदं व्यश्नुवान आस्ते। अत एव चोपपद्यते मन्त्रोक्तम्।

अवपतन्तीरवदन् दिव औषधयस्परि ।
यं जीवमश्नवामहै न स रिष्याति पुरुषः।। ऋग् १० ।९७ ।१७ ।।

सर्वमिदं सूक्तमौषधिमधिकृत्यास्ति, तत् सुधीभिरध्येयम्। प्राणिनि पुनरग्न्याशयं कार्यकरणाय समर्थयितुमौषधय एव प्रभवन्ति। यावद् भगवान् रक्षति प्राणिनं तावदोषधयोऽपि तं प्राणिनं जीवयन्ति। यदा क्षीणायुष्ट्वाद् ब्रह्म तं जीवं जहन्निवास्ते, तदा नैता पार्थिवा औषधयस्तं मुमूर्षुं रक्षन्ति। अत एवेदमुक्तं भवति सर्वेषामौषधीनां प्रधानौषधभूतत्वाद् ब्रह्मैव 'औषधम्' ।

मन्त्रलिङ्गञ्च—

आप[1] इद्वा उ भेषजी आपो अमीवचातनः। अथर्व ३ ।७ ।५ ।।

मन्त्रलिङ्गञ्च—**'आपो ब्रह्म जना विदुः'**। अथर्व १० ।७ ।१० ।।

भवन्ति चात्रास्माकम्—

ओषस्य पित्तस्य यथाविधस्य
प्रकल्पनं ब्रह्म चकार पूर्वम्।
तथाविधं नैव शशाक कर्तुं
प्रकल्पनं ना [2]भगणैरनेकैः ।।३८७।।

तस्यौषधस्यापि च पात्रभूतं
कलामयं[3] ब्रह्म चकार जालम्।
चरं समस्तं किमु वाचरं वा
तमौषधं विष्णुमुपस्तुवन्ति ।।३८८।।

१. आपो वै ब्रह्म। २. भगणैः=वर्षगणैरिति। ३. कलामयम्-आयुर्वेदविदो भाषन्ते 'षष्टिः पित्तधरा कलाः' इति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ओषो हि सूर्यः स उ तं ज्वलन्तं
स्वकोदरे ब्रह्म दधाति नित्यम् ।
अतोऽस्ति विष्णुः कथितः पुराणैः
स औषधं ब्रह्म च तत् स देवः।।३८६।।

जाताववर्तमानादोषधिशब्दात् ***'ओषधेरजातौ'*** (पा० ५।४।१३७) सूत्रेण स्वार्थिकोऽण् प्रत्ययः, ओषधिरेवौषधम्। यद्वा ओषरूपकर्मोपपदाद्धधातेः ***'आतोऽनुपसर्गे कः'*** (पा० ३।२।३) इति सूत्रेण 'क' प्रत्यये, आतो लोपे, ओषधं तदेवौषधं ब्रह्म स्वार्थिकोऽण् प्रत्ययः।

एवं विविधमूहनीयं भवति। तद्यथा कामातुराय पुरुषाय 'स्त्री' औषधं, स्त्रियै च पुरुष औषधमस्ति।

जगतःसेतुः—२८८

जगत्—गत्यर्थाद् 'गच्छतेः' क्विपि ***'द्युतिगमिजुहोत्यादीनां द्वे च'*** (पा० ३।२।१७८वा०) इति क्वौ द्विर्वचनं, ***'गमः क्वौ'*** (पा० ६।४।४०) इत्यनेनानुनासिकलोपः। अथवा—***'वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्च'*** (उणा० २।८४) इत्यनेन 'गम्लृ' गतौ भौवादिकः, अस्य द्विर्वचनं टिलोपश्च निपात्यते। आददानः सूर्यो लोकलोकान्तरान् गमयति, क्षयं प्रति वा नयतीति 'जगत्' विश्वपर्यायः।

सेतुः-'षिञ् बन्धने' सौवादिकः, ***'सितनिगमि०'*** (उणा० १।६६) इत्यादिना 'तुन्' प्रत्ययः। ***'तितुत्रतथ०'*** (पा० ७।२।९) इत्यादिना इण् निषेधः। सिनोति बध्नातीति 'सेतुः'। समुद्रोऽपि ''सेतु'रस्मादेव द्वीपाद् द्वीपं बध्नातीति। नदीसंक्रमो वा 'सेतुः', तटात् तटं सिनोति बध्नातीति कृत्वा।

जगतः सयनं बन्धनं करोति 'जगतः सेतुः'। षष्ठ्या अलुका निर्देशो बाहुलकात्। जगतः सेतुः किम् ? मेरुदण्डम् पृष्ठवंशो वा। प्रतिप्राणि पृष्ठवंशोंऽगानि बध्नाति। तत्र च पृष्ठवंशकशेरवः-सप्त ग्रीवा-कशेरुकाः, द्वादशपृष्ठकशेरुकाः, पञ्चकटिकशेरुकाः, पञ्चानां कशेरुकाणां मिलितानामस्थ्नां समाहारभूतमस्थि चैकम्, अनुत्रिकास्थि चैकम्। श्रोणिफलके द्वे, तानि सङ्कलितानि-अष्टाविंशति भवन्ति। अनुत्रिकास्थि प्राचां च यत् गुदास्थि तत् यदि त्रिकास्थ्न्येव परिगण्येत, तर्हि सप्तविंशतिरेव संख्या भवति ग्रीवात आगुदान्तं श्रोणिफलकसहितानाम्।

यथैवैतत् कशेरुमयं जगतो गच्छतो गतिमतः प्राण्यङ्गानां निबन्धनं कुरुते,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्मिन्नेव च मेरौ इडा पिङ्गला सुषुम्णा च निवसति। इडा वामनासया, पिंगला च दक्षिणनासया सम्बन्धमातिष्ठति। सुषुम्णा ज्ञानं वहति।

अमुथैव सप्तविंशतिर्नक्षत्राणि अभिजिता प्राधान्येन युक्तानि च अष्टाविंशतिर्भवन्ति। तानि समग्रस्य गतिमतः संसारस्य निबन्धनकर्तृणि भवन्ति। तेषु नक्षत्रेषु ग्रहाः खगा इति निबद्धाः सन्ति।

अत एव च ज्ञानप्रधानानामिद्रियाणामाशयभूतं शिरःकशेरुकाणां निबन्धनेन निबद्धं सत् लोकवच्छरीरमिदं ज्ञानेन निबध्नाति। तथैव सर्वशक्तिमान् भगवान् स्वकेन ज्ञानातिशययोगेन गच्छतां ग्रहाणां सेतुभूतं नाक्षत्रं मण्डलं निबध्नाति, तस्मात् भागवतं नामैव 'जगतः सेतुः' इत्युक्तं भवति। प्रतिप्राणि कशेरुमयस्य दण्डस्य दर्शनाद् वेवेष्टित्त्वं तस्य भवगतो दृश्यते। अतः विष्णुः 'जगतः सेतुः' इति युक्तमुपपद्यते। 'लोकसम्मितः पुरुषः' इति च चरकोक्तमुपपद्यते।

भवति चात्रास्माकम्—

यथा जगद् भेषु[1] निबद्धमेतत्
तथैव जन्तुश्च कशेरुदण्डे ।
कशेरुकाणामथ तारकाणां[2]
मर्त्येऽस्ति साम्यं श्रुतिसम्मतं तत्।।३६०।।

को नाम शक्नोति विना महेशं
कर्तुं ह सेतुं जगतां[3] यथार्थम्।
प्रभासते तत् प्रतिजन्तु-कायं
विष्णुर्ह उक्तो जगतां स सेतुः।।३६१।।

यथा नभोगा उडुमार्गबद्धाः[4]
करैः स्वकैर्विश्वमिदं विभान्ति[5] ।
तथात्र वंशाक्त-शिरःस्थितानां[6]
खानां च भासा[7] प्रतिभाति काया।।३६२।।

अन्तर्गर्भितण्यर्थकोऽयं क्रियाशब्दः। त्रिस्कन्धज्यौतिषं चास्यैव व्याख्यानभूतम्। आत्मा वै सूर्यः शरीरे, मनश्चन्द्रस्थानीयः। स मनः शरीरेऽणुना कालेन क्रियाः

---

१. भेषु=नक्षत्रेषु। २. तारकाणाम्-नक्षत्राणाम्। ३. जगतां=नभोगानाम्। ४. उडुमार्गबद्धाः= नक्षत्र-राशिबद्धाः। करैः=किरणैः। ५. विभान्ति=विविधं प्रकाशन्ते। ६. वंशाक्तशिरःस्थितानां=पृष्ठवंशेन बद्धशिरोगतानाम्। ७. भासा=ज्योतिषा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कारयति। तद्यथा प्राचां सूत्रम्–

'आत्मा बुद्ध्या समेत्यार्थान् मनो युंक्ते विवक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ।।
मारुतस्तूरसि चरन् मन्दं जनयति स्वरम्। (पाणिनीयशिक्षा)

अमुथैव सर्वत्र योजना कर्तव्या भवति। तद्यथा द्रष्टुमीहमान आत्मा–

आत्मा बुद्ध्या समेत्यार्थान् मनो युंक्ते दिदृक्षया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ।।
मारुतो दृष्टि–स्रोतांसि गत्वा दृश्यं प्रकाशयेत् ।।

अमुथैव–

आत्मा बुद्ध्या समेत्यार्थान् मनो युंक्ते रिरंसया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ।।
मारुतो शुक्रस्रोतांसि गत्वानङ्गं प्रहर्षयेत् ।।

अमुथैव–

आत्मा बुद्ध्या समेत्यार्थान् मनो युंक्ते ह लिप्सया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ।।
मारुतश्चाप्यस्रोतांसि गत्वा लोभं प्रचोदयेत् ।।

एवं शारीरभावेषु सर्वत्र योजनीयं सुधीभिरिति। तद्यथा

आत्मा बुद्ध्या समेत्यार्थान् मनो युंक्ते निनंसया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ।।
मारुतो रसस्रोतांसि गत्वा चुम्बमुदीक्षते ।।

निनंसा=चुम्बनेच्छा।

आत्मा बुद्ध्या समेत्यार्थान् मनो युंक्तेऽहमास्थितः ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ।।
मारुतो बाहुस्रोतांसि गत्वा बाहुमुदस्यति ।।

अमुथैव–

आत्मा बुद्ध्या समेत्यार्थान् मनो युंक्ते जिघत्सया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ।।
मारुतो वह्निस्रोतांसि गत्वा क्षुत् समुदीरयेत् ।।

अमुथैव–

आत्मा बुद्ध्या समेत्यार्थान् मनो युंक्ते पिपासया ।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ।।
मारुतो वारिस्रोतांसि गत्वा तर्षमुदीरयेत् ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एष हि कल्पनाक्रमो मया स्वकैः पद्यैः प्रदर्शितो मार्गप्रदर्शनाय।

यथा हि द्वादश राशयो नक्षत्राण्यन्तर्भावयन्ति, तथैव शरीरेऽपि प्रतिबाहु त्रिंशदस्थीनि भवन्ति। एवमेव हि प्रतिसक्थ्नि त्रिंशदस्थीनि भवन्ति। अत उक्तं च सुश्रुतसंहितायां शारीरस्थाने पंचमेऽध्याये ***''त्रीणि सषष्टीन्यस्थिशतानि वेदवादिनो भाषन्ते''*** (१७ खण्डे)।

मन्त्रलिङ्गञ्च—

द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत।
तत्राहतास्त्रीणि शतानि शंकवः षष्टिश्च खीला अविचाचला ये।।

अथर्व १०।८।४।।

चरके च—**'त्रीणि सषष्टीनि शतान्यस्थ्नां सह दन्तोलूखलनखेन'** शारीरस्थाने-७। एवं समानं भवति लोकेन शरीरं, 'लोकसम्मितः पुरुष' इति च युक्तमुपलभ्यते।

सत्यधर्मपराक्रमः—२८६

सत्य-शब्दो धर्म-शब्दश्च प्रकृतिप्रत्ययाभ्यां पृथक् निर्दिष्टौ। परा-आङ्-पूर्वात् 'क्रमु पादविक्षेपे, धातोः घञ्-प्रत्यये 'पराक्रमः' इति। सत्ये धर्मे पराक्रमो यस्यास्ति स 'सत्यधर्मपराक्रमो' विष्णुः।

यथा हि भगवता सत्येनायुषा धर्मेण धारयितुं क्षमेण रक्षणाय क्रियायां समर्थयितुं वा हृदयं पराक्रमते। यथावदनेकविधरोगेषु सत्स्वपि स्वयं परमेण आक्रमणेन आकर्षणेन क्रमते, स्वानि पदानि जीवतीत्येवं ज्ञापनीयलक्षणैर्विक्षिपति, तथैवायं भगवान् विष्णुः सत्ये यथार्थे धर्मे जन्म-मरण-युक्तैः षड्भावविकारैर्योजयितुं विश्वं पराक्रमते।

एष हि तस्य सर्वव्यापको नियमः-यावज्जीवो हृदये विराजते तावत् हृदयं पराक्रमते। एवमेव हि यावत् विष्णुरभीद्धेन तपसा सत्ये धर्मे जगन्नियोजयति, तावत् दृश्यमिदं जगत् तमेव विष्णुं सत्यधर्मपराक्रमगुणवन्तं स्तुवन्—**'तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्'** (ऋक् १।२५।२०) इति व्याचष्टे।

मन्त्रलिङ्गञ्च—

शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा।
शं न इन्द्रो बृहस्पतिः शंनो विष्णुरुरुक्रमः ।। ऋक्० १।९०।६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मा मा हिंसीत् जनिता सः पृथिव्या ये वा दिवं सत्यधर्मा व्यानट्।

यजुः १२।१०२।।

सर्वं तदिन्द्र ते वशे। ऋक् ८।६३।४।।

भवति चात्रास्माकम्—

षड्भिर्विकारैः प्रतिवस्तु युक्तंऽ
यथाप्तकालं परिरक्षते यः ।
तं सत्यधर्मेषु पराक्रमन्तं
विष्णुं ह लोकः प्रपदं गृणाति[1] ।।३६३।।

सारार्थतः—यावदायुः प्रमाणमस्याः सृष्टेस्तावदायुर्यावद् विश्वमिदं सत्यधर्मे गमयितुं पराक्रमयतीति कृत्वा 'सत्यधर्मपराक्रम' इत्युक्तं भवति। सर्वत्र व्यश्नुवानो विष्णुरिति। बहुलमेतन्निदर्शनमिति सर्वेषु नामव्याख्यानेषु ज्ञातव्यम्।

❖ ❖ ❖

भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।
कामहा कामकृत् कान्तः कामः कामप्रदः प्रभुः।।४५।।

२६० भूतभव्यभवन्नाथः, २६१ पवनः, २६२ पावनः, २६३ अनलः।
२६४ कामहा, २६५ कामकृत्, २६६ कान्तः, २६७ कामः, २६८ कामप्रदः, २६९ प्रभुः।।

भूतभव्यभवन्नाथः—२६०

भूतं च भव्यं च भवच्च भूतभव्यभवन्ति, तेषां नाथः स्वामी प्रभुर्वा 'भूतभव्यभवन्नाथः'। यदा हि ध्याता ध्यायति स वर्तमानः कालः, अतीतः कालो भूतसंज्ञां लभते, आयियासुः कालो भविष्यत् संज्ञां लभते। तस्मिन् काले स्थितस्य सर्वस्य विश्वस्य स नाथः।

'नाथृ' धातुर्भौवादिकः, तस्माद् याच्ञा-उपताप-ऐश्वर्य-आशिष्षु वर्त्तमानाद् 'घञि' 'नाथ' शब्दः सिध्यति। तैर्याचितः याच्यते याचयिष्यते च स तानुपातीतपत् उपतापयति उपतापयिष्यति च । स तानैष्ट ईष्टे ईक्ष्यते च, स तानशिषत् शास्ति शासिष्यति च।

१. गृणाति शब्दते स्तौति वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एषा कालकृता तिङ्व्यवस्था मनुष्यबुद्धिमधिकृत्यैव प्रदर्शिता, ब्रह्मणि कालकृतो भेदो नोपपद्यते, उक्तं च 'भूतभव्यभवत्प्रभुः' चतुःसंख्याके नामव्याख्याने। किमुक्तम् ?—

यो देश-दिक्-काल-विभागमुक्तःस्वयं प्रभुः सन् सृजते च विश्वम्।
तमच्युतं सर्वतिङां समूहो व्यनक्तिमात्रं न भिनत्ति कालात्।।

सर्वं वा तत्रोक्तं व्याख्यानमत्रापि स्मर्तव्यं सुधीभिः। एवं स सर्वव्यापनशील-त्वाद् विष्णुरुक्तो भवति।

मन्त्रलिङ्गञ्च—

यो भूतं च भव्यं च सर्वं यश्चाधितिष्ठति।
स्वर्यस्य च केवलं तस्मै ज्येष्ठाय ब्रह्मणे नमः।। अथर्व १०।८।१।।
पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम्।
उतामृतस्येशानो यदन्नेनातिरोहति ।। यजुः ३१।२।।

भवति चात्रास्माकम्—

नाथः स विश्वस्य जगन्नियन्ता
त्रिकालभेदेन विभक्तमात्रम्।
त्रिलोचनः पश्यति काल-भक्तं[1]
तथा यथा विश्वमिदं दिनेशः।।३६४।।

पवनः—२६१

'पूञ् पवने' भौवादिकः, पवत इति 'पवनः'। पूञ् पवने क्रैयादिकः, ल्युटि प्रत्यये पवनः। वायुः, अग्निः, जलम् पृथिवी चेत्यादीनि पवित्राणि पुनन्ति। उक्तं च—***'वायुः पवित्रं स मा पुनातु अग्निः पवित्रं स मा पुनातु'*** (निरुक्त ५।६) इत्यादि। एतेन ज्ञायते यत् भागवते जगति तस्य पवित्रीकरणगुणः सर्वं व्यश्नुवान आस्ते।

मन्त्रलिंगं च—

अनस्थाः पूताः पवनेन शुद्धाः। अथर्व ४।३४।२।।
तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम्।
यजु० ४।४।।

---

१. कालभक्तम्=भूत-भव्य-भविष्यदभिर्भेदमापादितम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्। यजुः ४०।८।।

भवति चात्रास्माकम्—

स विश्वकृत् सर्वजगन्नियन्ता
विश्वं पवित्रं कुरुते ह सर्वम् ।
शुद्धः स विष्णुः स पुनाति लोकान्
परस्परं शुद्धमुशन्ति विश्वम् ।।३६५।।

पावनः—२६२

पावयतीति 'पावनः', 'पूङ् पवने' आभ्यां ण्यन्ताभ्यां बाहुलकात् कर्तरि नन्द्यादि'ल्युः', योरनः। पावयतीति 'पावनः'।

एकस्य विकारमपरः शमयति, एष हि सार्वत्रिको नियमः। तद्यथा वृश्चिकस्य विषं पुनाति शमयति वा रक्तमारिच्यमम्भः कर्णे च्योतितम्। एवं हि मक्षिका नेत्रेऽञ्जनवदञ्जिता-उदर्दाख्यं विकारं शीतपित्ताख्यं वा सद्यः शमयति पावयतीति वा। एवं बहुत्र योजनीयं भवति। तद्यथा-अपामार्गपत्रस्वरसः कर्णे च्योतितः कर्णनिःस्रावं शमयति निःशूलं च कुरुते।

मन्त्रलिङ्गं च—

शुचिः पावको अद्भुतो मध्वा यज्ञं मिमिक्षति। ऋक् १।१४२।३।।
पवमानः सो अथ नः पवित्रेण विचर्षणिः।
यः पोता स पुनातु मा।। यजु० १६।४२।।

भवति चात्रास्माकम्—

स पावनो विष्णुरनन्तशक्ति-
र्विश्वं मिथः पावयते समस्तम्।
तं पावनं नौति जगत् समस्तं
नेनीयते विश्वमिदं च तेन ।।३६६।।

तद्यथा नदी वेगेन शुद्ध्यति, नद्यां प्लुतं च नदी पावयति, अमुथैव अग्निः शुद्ध्यति स्वार्चिषा, अग्नौ च क्षिप्तं वह्निः पावयति। एषा हि सार्वत्रिकी योजना।

अनलः—२६३

अनन्तीत्यनाः प्राणिनस्तांल्लात्यादत्त इति 'अनलो' वह्निः सूर्यो वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्राणिनामादानञ्च शारीराग्नेः शमीभावेन सुषुम्नायाः सूर्यरश्मिविच्छेदेन वा। व्यापनशीलत्वाच्चानलत्वरूपगुणस्य स विष्णुरित्युक्तो भवति।

लोकेऽपि च पश्यामोऽनलस्याधिक्यं सर्वं शोषयति जरयति। तथा ग्रीष्मर्तौ नद्यः शुष्यन्ति, निर्बलाश्च सत्त्वा उत्कटं तापमसहमानाः प्राणान् जहति।

यद्वा—'णल गन्धने' इति भौवादिकधातोः पचाद्यचि 'नल' इति। नलति=गन्धं गृह्णातीति 'नलः'। गन्ध इति सर्वविषयोपलक्षणं, सर्वविधान् रूपरसादीन् विषयान्न गृह्णातीति 'अनलः' सर्वविधविषयरहित इत्यर्थः। तथा चोक्तम्— **'अशब्दमस्पर्शमरूपमगन्धं ब्रह्म'** इत्यादि।

यथा च वायुर्यं यं देशं स्पृशति, ततस्ततस्तदीयं गुणमादाय स्थानान्तरं नयति, एवमयं निर्विषयो जीवो येन येनान्तःकरणजन्येन संस्कारेण वासनया वा युक्तः शरीरं त्यजति, गच्छति तेन तेन संस्कारेण वासनया वा युक्तोऽन्यच्छरीरम्। एष एव क्रमो भगवतोऽनलत्वरूपगुणस्य सर्वत्र व्याप्तस्य दृश्यते। स्वयं सर्वविधविषयविहीनोऽपि सर्वं जगत् सविषयं निर्मिमीते।

यद्वा-न अलं पर्याप्तिः=पूर्णता यस्य सोऽ'नल':, अनन्त इत्यर्थः। लोकेऽपि च पश्यामः-अस्मिन् वैष्णवे जगति न हि कस्य चिदन्तः=एतावत्त्वं दृश्यते। यथा रूपवानग्निः, स च विश्वं विविधरूपवद् विदधाति। तथैव भगवाननलो नैजेनानलत्वरूपेण गुणेन विश्वे व्यष्टोऽ'नल': इत्युक्तो भवति।

मन्त्रलिङ्गञ्च—

यतः सूर्य उदेत्यस्तं यत्र च गच्छति।
तमेव मन्येऽहं ज्येष्ठं तदु नात्येति कश्चन।। अथर्व० १०।८।१६।।
यस्य च्छायाऽमृतं यस्य मृत्युः कस्मै देवाय हविषा विधेम।।
ऋक् १०।१२१।२।।
अकामो धीरो अमृतः स्वयंभू रसेन तृप्तो न कुतश्चनोनः।
अथर्व १०।८।४४।।
मा मा हिंसीज्जनिता यः पृथिव्या यो वा दिवं सत्यधर्मा व्यानट्।
यजुः १२।१०२।।

भवति चात्रास्माकम्—

विष्णुर्विरूपं[१] कुरुते ह विश्वं
स्वयं विगन्धः कथितो विरूपः[२]।

---

१. विरूपं=विविधं रूपम्। २. विरूपः=विगतरूपः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनन्तकर्तुर्भुवने[1] न शक्तो
जीवः कदाचित् परमाप्तुमस्य[2] ।।३६७।।

कामहा—२६४

काम इच्छा एषणा वा। तद्यथा लोकैषणा पुत्रैषणा वित्तैषणा मानैषणा इत्येवमादि। सर्वे वेदा ब्रह्मण्येव स्वात्मानमुपरमन्ते तस्माद् ब्रह्मज्ञस्य कामा उपरमन्ति । अत एवोक्तं भवति 'कामहा' विष्णुरिति।

एष हि सर्वव्यापको नियमो नूनं दृश्यते-तद्यथा महोच्चैः शिखरे गत्वा शिखरारूढो न हि नीचैस्तराणामधिरोहणमालिप्सते, तथैव सर्वज्ञानमयस्य भगवतः कृतस्य विश्वस्य परिज्ञानानन्तरं न हि कामा अवशिष्यन्ते। अतः 'कामहा' विष्णुरित्युक्तमुपपद्यते । ब्रह्मज्ञश्च अकामो भवति, अकामत्वाद् ब्रह्मण इति।

मन्त्रलिङ्गञ्च—

अकामो धीरो अमृतः स्वयंभूः रसेन तृप्तो न कुतश्चनोनः।
तमेव विद्वान् न बिभाय मृत्योरात्मानं धीरमजरं युवानम्।।

अथर्व० १० ।८ ।४४ ।।

यत्कामास्ते जुहुमऽस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्।

ऋक् १० ।१२१ ।१० ।।

यथैव आनन्दरसेन तृप्तः स्वयंभूर्विष्णुस्तथैव तज्ज्ञोऽपि आनन्दरसेन तृप्तः सन् 'अकामो' भवति। अथवा ब्रह्मज्ञानं तस्य कामान् परिपूर्य शमयति समानं भवति 'कामहा' पदनेति।

भवति चात्रास्माकम्—

विष्णुः स्वयंभूर्न कुतश्चनोन-
स्तज्ज्ञस्य[3] कामान्[4] स निराकरोति ।
[5]रसेन तृप्तः स नरोऽत्र लोके
विष्णोः पदं गायति चाप्रमत्तः ।।३६८।।

१. भुवने=विश्वे। २. पर्याप्तिम्=अन्तभावम्। ३. तज्ज्ञं=ब्रह्मज्ञम्। ४. कामान्=एषणाः। ५. रसेन तृप्तः=आत्मस्थो ब्रह्मस्थो वा आनन्दः सः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कामकृत्—२६५

कामान् करोति पूरयतीति 'कामकृत्'। सर्वे कामास्तस्मिन्नेव विष्णौ समुद्रे जन्तव इव निभृताः सन्ति। अतः प्रार्थ्यमानस्य कामान् स जोहूयमानस्य वा कामान् समेधयतीति कृत्वा विष्णुः कामकृदुक्तो भवति। लोकेऽपि च पश्यामः- समृद्धार्थ एव व्यसमृद्धर्थं कामैरुद्वर्धयति।

मन्त्रलिङ्गञ्च—

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव।
[१]यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्[२]।।

ऋक् १०।१२१।१०।।

कामानस्माकं प्रपूरय प्रतिगृह्णाहि नो हविः। अथर्व० ३।११।१६।।

भवति चात्रास्माकम्—

व्यृद्धः समृद्धार्थमुपैति यद्वत्
तद्वद् ह विष्णुं समुपैति जीवः।
कामान् स तेषां हृदयस्थितः सन्
पुष्णाति गीतः स उ कामकृत्[३] कः[४]।।३६६।।

कान्तः—२६६

कमेर्णिङन्तात् कर्मणि क्तः। काम्यत इति 'कान्तः' सुखरूपत्वात् सर्वेषां कामविषयीभूतोऽर्थः। मनोरमणे हि वस्तुनि सुखोपलब्धिः। मनसश्च रमणं मनोहरे रमणीये वस्तुनि। अतोऽशेषं जगद् व्याप्य विलक्षणविविधरूपप्रतिवस्तुसंस्थः प्राणिनां मनोरमणहेतुत्वात् 'कान्तः' इत्युच्यते रमणीयपर्यायः। सर्वत्र चात्र जगति तस्य कान्तत्वं व्याप्तम्।

तत्र मन्त्रलिङ्गञ्च—

प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते।
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा।।

यजुः ३१।१६।।

---

१. यत्कामाः=यं यं काममधिकृत्य जुहुमः स्तुतिं वितनुम इति। २. रयीणाम्=लौकिक-भोगसाधनभूतस्य विविधसाधनतामुपगतस्य धनस्य तेषामिति। ३. कामान् कृन्तति वा 'कामकृत्। आत्मजिज्ञासोर्जीवस्यासत्यान् कामान् कृन्तति। ४. कः=ब्रह्मा। यथा ह्रदे स्थितस्य जलीयान् कामान् ह्रदः पूरयति, तथैव विष्णुरिति भावः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

कान्तः स विष्णुः सुखरूप उक्तः
स विश्वरूपः प्रतिवस्तुसंस्थः।
विद्वांस्तमीशं विविधस्वरूपं
पश्यन् मुहुर्हृष्यति वीतमोहः ।।४००।।

कामः—२६७

'कमु कान्तौ' भौवादिकः, तस्मात् 'घञ्'। काम्यत इति 'कामः'। कामः=इच्छा, तद्धेतुभूतः संकल्पो वा 'कामः'।

मन्त्रलिङ्गञ्च—

कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्।
सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा ।।
ऋग् १०।१२६।४।।

त्वं काम सहसासि प्रतिष्ठितो विभुः। अथर्व० १६।५२।२।।

कामोऽग्रे सृष्टिकाले तत् समवर्त्तत समनुगतवान्। किं तत्? मनसः मननस्य ज्ञानात्मकस्य रेतः बीजं कारणं प्रथममनन्यपूर्वं यदासीत्। सतो विद्यमानस्य महदादिविकारस्य बन्धुं बन्धनमूलं यतः प्रभवति। न हि निर्बीजोत्पत्तिर्दृश्यते। एतदधृदि प्रतीष्य पर्येष्य कवयो मेधाविनो मनीषा प्रज्ञया निश्चिन्वन्ति। बीजभावः पूर्वार्धर्चेन प्रदर्श्यते। वस्तुतस्तु यद्ब्रह्म न सत् न असत्, अविकारकं वा ब्रह्म। तदपि पुनर्महदादिषु विकारेषु जगत् तनोति।

मन्त्रलिङ्गञ्च—

ऋतं च सत्यं चाभीद्धात् तपसोऽध्यजायत। ऋग् १०।१६०।१।।

सदसद्भावे मन्त्रलिङ्गञ्च—

नासदासीन्नो सदासीत्। ऋग् १०।१२६।१।।

कस्यचिद् वचनं च। यथा—

यदा तथा सिसृक्षुस्तु भवेद् देवो रजस्वलः ।
विभक्तेषु विशेषेषु स तदैव प्रतायते।।

लोकेऽपि च पश्यामः=स्वपतो मनुष्यस्य जागरणं लभमानस्याणुनाऽन्तरेणैव काम इच्छोत्पद्यत इदमिदं वा कर्तुमर्ह्यं मया कार्यमस्तीति। एवं स भगवान् कामः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सन् सर्वं व्यश्नुते। आब्रह्मकीटान्तमिदं जगत् कामेन व्याप्तं वर्तते। समानं च भवति लोकसम्मितः पुरुष इति।

इतरोऽपि काम एतस्मादेव बहुत्वमात्मनो विभावयिषुर्युवा प्रकृतिभूतां क्षेत्रभूतां वा स्त्रियमुपादत्ते। पुनः स तस्यां बीजाधिष्ठानं गर्भमाधित्सति। सा प्रकृतिरूपा क्षेत्ररूपा वा स्त्री तस्मै कमनीया वांछनीया वा भवति।

काम्यते वा सा सर्वकेण चतुर्विधयोनिविक्लृप्तेन जगता तस्मात् 'काम' उक्तो भवति। काम्यमधिकृत्य तत्साधनीभूतानां क्षेत्राणामपि बहुत्वमुपपद्यते। तद्यथा-तापसः तपःसिद्धयै व्रतान्याचरति। विद्यार्थी विद्याप्त्यै गुरुं शुश्रूषते। धान्यार्थी च क्षेत्रं मृद्नाति। एवं स एक एव कामात्मा प्रभुः स्वकेन कामरूपधर्मेण विश्वं व्याप्नोति।

अत एवैतदुक्तं भवत्यस्माकम्—

संकल्पप्रभवः कामः, संकल्पः काम एव वा।
संकल्प-वृक्ष-संक्लृप्तं, जगद् भोगाय कल्पते।।४०१।।

अत एव च मनसिजः काम उक्तो भवति, हृदयभावजो वा। यथा हि चन्द्रमा मनुष्यस्य जन्मलग्ने गर्भाधानलग्ने वा यथाविधानां ग्रहाणां दृष्टिमुपगतः स्यात्, तथा विधानां कामानां स चन्द्रमा तन्मनो वा प्रसविता भवति। **'चन्द्रमा मनसो जातः'** (यजु० ३१।१२) इति याजुषमन्त्रलिंगदर्शनात्। चन्द्रमा वा मनो ब्रह्मणः।

एतेन विज्ञानेन विज्ञायते यत् नूतनवर्षारम्भसमये मेषराशेः प्रथमेंऽशे वैशाखस्य प्रथमे दिने वा यादृशी चन्द्रमसः स्थितिर्भवति, उदयकाले तादृक्षमावर्षं प्रजानां मनः क्षेमाय क्षोभाय वा प्रवृत्तिमारभते। इति बहुधा परीक्षितमस्माभिः।

अनङ्गो वा काम एतस्मादेव। 'रहसिजो' वाऽप्येतस्मादेव, यतो हि रहस्येव नानाविधा नवनवका ऊहापोहा आविष्कर्तॄणां विचारकाणां चोत्पद्यन्ते । रहसि वा कामो जागर्ति। रात्रिर्हि रहः। एवं कामो विष्णुः सर्वं व्यश्नुवानः 'काम' उक्तो भवति। स काम एवाभिमतं ददातीति कृत्वा कामदेवोऽपि विष्णुरुक्तो भवति।

महादेवोऽपि काम एतस्मादेव। स हि इच्छयोद्वेलितो महता बलेनोत्थाप्यं तृणवल्लघीयांसं कृत्वा स्थापयति। दृश्यते च लोके पशूनां मैथुनप्रसंगे। महाभारवतां वृषभ-महिषादीनां चोत्पतनं निजां गर्भधिं प्रति। कामेनैव मुनष्यैर्महाभारोत्थानसमर्थानां यन्त्राणामाविष्करणं कृतम्। समानश्च भवति लोको वेदेन। एवं लोकं दृष्ट्वा विविधा ऊहा ऊहितव्या भवन्ति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चन्द्रमूलत्वात् कामानां मनसिजो रेतोऽधः गच्छन् लौकिकं सुखमुपजनयति। मनसि तिष्ठन् ब्रह्मसुखमनुभावयति। स एव कामः तिर्यग् गच्छन् विविध-शब्द-स्पर्श-रूप-रस-गन्धादिषु लोकं तदर्हवस्तूनामुत्पादने कल्पयति।

यथा मनो विविधानां रूपाणां कल्प्ता दृश्यते, तथैव लोके चन्द्रस्थानीया स्त्री विविधानां रूपवतां जातकानां प्रसवित्रीत्वेन दृश्यते। यथा चन्द्रमा सप्तविंशति दिनानि नक्षत्राणि वा पर्येति, तथैव स्त्री प्रतिचन्द्रमासं रजसा पर्येति नियतं वर्षाणां यावत् तावत्। यथा चन्द्रमसि कलंको दृश्यते स्त्रियो गर्भाशयदोषपरापसृत्यै रूपाणां संभृत्यै वा स्त्रियः शारीरदोषान् प्रतिमासं प्रवर्त्तमानं रजो बहिरपनयति। यतो हि रजः लोकानां प्रसवे कारणं भवति। अतो रजांसि लोका उच्यन्ते।

चन्द्रमंगलसंयोग एव रजः, तत्र सूर्यशुक्रसंयोगेन सात्मगर्भः क्रियाक्षमो भवति बृहस्पतिना संयुक्तेन सद्दृष्ट्या परिपाकाय निबद्ध्यते। शनिना स्वाकाराय विकृताकाराय वा समर्थ्यते। राहुणा दृढतायै, विघ्नोदयाय वा। इत्यादिकं शास्त्रान्तरात् विविधमुन्नेयम्। ज्ञानस्य प्रकारनिदर्शनमात्रमेवास्माकमभिमतत्वाद् ग्रहाणामंशांशानुस्यूतत्वात् सर्वजगतः।

भवति चात्रास्माकम्—

कामो हि विष्णुः स ससर्ज विश्वं
रूपाणि कामो विविधानि वव्रे ।
तत्कामक्लृप्तः समनस्कमात्मा
खानां सहायेन तनोति तन्यम्।।४०२।।

तन्तुः=संतानम्, स्वं तन्त्र तायत इति कृत्वा स्वतन्त्र इत्यप्युक्तं भवति।

प्रसंगतः-एतद्व्याख्याप्रसंगेन कामदेवः-६५१, श्लोके-८३, कामपालः-६५२, श्लोके-८३, कामी ६५३, श्लोके—८३, कामप्रदः—२६८ श्लोके-४५, अपि व्याख्याता भवन्ति। कामान् प्रददातीति 'कामप्रदः'। कामान् ददातीति 'कामदेवः,' कामान् पालयतीति 'कामपालः', कामोऽस्यास्तीति 'कामी'।

भवति चात्रास्माकम्—

स कामदेवः स उ कामपालः
कामी स उक्तः स उ कामदश्च।
स एव विश्वं विविधं विधत्ते
भाशांशयुक्तैः प्रतिवस्तुनिष्ठैः ।।४०३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

अग्निः प्रियेषु धामसु कामो भूतस्य भव्यस्य।
सम्राडेको विराजति।। यजु० १२।११७।।
कामेन मा काम आगन् हृदयाद्धृदयं परि। अथर्व १६।५२।४।।

कामप्रदः—२६८

कामान् प्रददातीति 'कामप्रदः'। प्रपूर्वाद् ददातेः ***'प्रे दाज्ञः'*** (पा० ३।२।६) इत्यनेन 'कः' प्रत्यय' इति। इष्टमापूरयतीति वा कामप्रदः।

मन्त्रलिङ्गञ्च—

उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सं सृजेथामयं च।
अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत।।
यजुः १५।५४।।

अग्निना रयिमश्नवत् पोषमेव दिवे दिवे।
यशसं वीरवत्तमम्।। ऋक् १।१।१३।।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्।
ऋक् १०।१२१।१०।।

वत्सः कामदुघो विराजः स गुहा चक्रे तन्वः पराचैः।
अथर्व० ८।६।२।।

भवति चात्रास्माकम्—

अग्निः समस्मै प्रददाति कामान्
कामेन युक्तश्च[१] विभाति जन्तुः।
[२]कामप्रदो विष्णुरिहास्ति गीतः
कस्तं विनाग्निं ज्वलयेच्च काये।।४०४।।

प्रभुः—२६९

प्रभुः—***'विप्रसम्भ्यो ड्वसंज्ञायाम्'*** (पा० ३।२।१८०) इति 'डु' प्रत्यये कृते प्रभवति समर्थो भवतीति 'प्रभु'र्विष्णुः, तस्य भगवतः शक्तेः सर्वत्र व्यापनशीलत्वात्।

१. कामेन युक्तः-अग्निना युक्त इत्यर्थः। २. कामप्रदः=आमाशयेऽग्नेरधिष्ठातृत्वात् कामप्रदः अग्निप्रदो वा समानं भवति। समिद्धाग्निः समाग्निर्वा कामान् प्रार्थयितुं समुत्सहते, तान् स पूरयति। विशदं 'काम' नाम व्याख्यायां द्रष्टव्यम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

त्वष्टा रूपाणि हि प्रभुः पशून् विश्वान्त्समानजे।
तेषां नः स्फातिमा यज।। ऋ० १।१८८।६।।
सं चोदय चित्रमर्वाग्रधि इन्द्र वरेण्यम्।
असदित्ते विभुः प्रभुः। अथर्व० २०।७१।११।।
विभु च मे प्रभु च मे पूर्णं च मे पूर्णतरं च मे यज्ञेन कल्पन्ताम्।
यजु० १८।१०।।

भवति चात्रास्माकम्—

सामर्थ्ययुक्तस्य विभोर्जगत्यां
विना प्रभुत्वेन[1] न किंचिदस्ति।
[2]प्रभुर्हि विष्णुः स समस्तमित्वा
जगत् समस्तं कुरुते सशक्तम्[3]।।४०५।।

❖ ❖ ❖

युगादिकृद्युगावर्तो नैकमायो महाशनः।
अदृश्यो व्यक्तरूपश्च सहस्रजिदनन्तजित्।।४६।।

३०० युगादिकृत्, ३०१ युगावर्तः, ३०२ नैकमायः, ३०३ महाशनः।
३०४ अदृश्यः, ३०५ व्यक्तरूपः च ३०६ सहस्रजित्, ३०७ अनन्तजित्,।।४६।।

युगादिकृत्ः—३००

'युजिर् योगे' युज समाधौ' 'घञि' उञ्छादिपाठाद् गुणाभावनिपातनाच्च 'युग' शब्दः सिद्ध्यति। युज्यतेऽस्मिन् सर्वमिति युगम्=कालचक्रम्। तदादीयते यत इति, आङ्पूर्वाद् दाधातोः—***'उपसर्गे घोः किः'*** (पा० ३।३।९२) सूत्रेण 'किः' प्रत्ययः, आतो लोप आदिः। युगस्यादिर्युगादिस्तं करोतीति युगादिकृदिति सोपपदात् करोतेः 'क्विप्' तुक् चेति 'युगादिकृत्'। पृथक् पृथक् समुदितं युक्तं सज्जीभूतं समाहितं वा ग्रह-नक्षत्रोपनक्षत्रसहितं विश्वं करोति, विश्वं प्रचिचालयिषुस्तं गतिमत् कुरुत इति 'युगादिकृत्' विष्णुरुक्तो भवति।

१. प्रभुत्वेन=सामर्थ्येन। २. प्रभुः=समर्थः। ३. सशक्तम्=स्वशक्तिगुणेन युक्तं सशक्तमिति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लोकेऽपि च पश्यामस्तद्यथा-पृथक् वृषभौ, उष्ट्रः, यन्त्रं वा, पृथक् योक्त्रं पृथक् हलम्, पृथक् प्रेरणयष्टिः, पृथक् रश्मिः, एवं पृथक् पृथक् साधनेषु सत्सु सस्यमुत्पिपादयिषुः कृषीवलस्तान् सर्वान् अधिकरणभूते क्षेत्रे गतिमत् कुरुते। एवं कृत्वा स कृषकोऽपि स्वकर्मसिद्धये 'युगादिकृत्' उक्तो भवति। लोकसम्मितत्वात् पुरुषस्य, पुरुषकृतेर्वा। एवं सर्वत्र तस्यैव विष्णोर्व्याप्तं कर्म दृश्यते।

तस्मात् मन्त्रोक्तं च संगच्छते—

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः।
दिवीव चक्षुराततम् ।। ऋग् १।२२।२०।।

पदं=पदनीयं ज्ञातुमर्हं, भगवन्तं विज्ञापयितुमर्हं वा कर्म ज्ञानपूर्वकमुद्घाटितचक्षुष्काः सूरयः सदा पश्यन्ति। यथाऽऽकाशे सामान्यो जनः सूर्यं पश्यति। मन्त्रलिङ्गञ्च—

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।
दिवं च पृथिवीं चान्तरिक्षमथो स्वः ।। ऋग् १०।१९०।३।।
ततो विराडजायत विराजोऽधिपूरुषः ।
स जातो अत्यरिच्यत पश्चाद् भूमिमथो पुरः।। यजु० ३१।५।।
इयं विसृष्टिर्यत आबभूव। ऋक् १०।१२६।७।।

भवति चात्रास्माकम्—

पृथक् स्थितान् विश्वहिते समर्थान्
ग्रहानुडून्, भानि[1] दिशोऽथ कालम्।
संयोज्य चक्रं कुरुते सलीलं
युगादिकृत् तं कथयन्ति विष्णुम् ।।४०६।।

इति श्री १०८ पण्डितसत्यदेववासिष्ठकृते
महाभारतानुशासनपर्वान्तर्गतस्य (अ० १४६)
विष्णुसहस्रनामस्तोत्रस्य
वेदप्रमाणोपवृहितसत्यभाष्ये
तृतीयं नामशतकं
सम्पूर्णम्।

❖ ❖ ❖

१. भानि=राशयः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

युगावर्तः—३०१

युगशब्दोऽधिकरणे घञन्तः कालविशेषवाचकः। ***'चजोः कु घिण्ण्यतोः'*** (पा० ७।३।५२) इति सूत्रेण जस्य कुत्वे गकारे उञ्छादिपाठाद् गुणाभावः। युज्यते=सम्बध्यते सर्वमस्मिन्निति युगस्तं तत्स्थांश्चावर्तयति=परिभ्रमयतीति युगाावर्तः। युगशब्दो हि लक्षणया कालं तत्स्थांश्चाह। एवञ्च युगं युगान्तर्गतान् सूर्यचन्द्रादींश्च यः पुनः पुनरावर्तयतीति 'युगावर्तो' भगवान् विष्णुः।

तथा च यथा लोके कुम्भकारादिः कर्ता कृतं घटादिकं द्रव्यं पुनः पुनरेकरूपेणैवावर्तयति एवं विष्णुरपि यावत्कल्पं सूर्यचन्द्रादीन् यथापूर्वक्रमं नित्यमावर्तयति=परिभ्रमयतीति विष्णोरेष गुण आवर्तनरूपं प्रतिपदं प्रतिपलञ्च लोके व्याप्तो दृश्यते। मन्त्रलिङ्गं च—

स्वस्ति पन्थामनुचरेम सूर्याचन्द्रमसाविव।
पुनर्ददता घ्नता जानता संगमेमहि ।। (ऋक् ५।५१।१५)

संगमनं युगसमानार्थकं, संगतं युक्तं भवतीति यतः।

या गौर्वर्तनि पर्येति निष्कृतं पयो दुहाना व्रतवीरवारतः ।
सा प्रब्रुवाणा वरुणाय दाशुषे देवेभ्यो दाशद्धविषा विवस्वते।।
ऋक् १०।६५।६।।

यो भूतं च भव्यं च सर्वं यश्चाधितिष्ठति। (अथर्व १०।७।१।।)

भवति चात्रास्माकम्—

आवर्तयन् सोऽत्र युगं युगस्थं
विष्णु 'र्युगावर्त' इहास्ति गीतः।
यथादिकालं भगणं[1] युनक्ति
सोऽद्यापि विष्णुस्तमु तं तथैव।।४०७।।

नैकमायः—३०२

नञो भिन्नो निषेधार्थीयो 'न'-निपातः, एका-असहाया, माया ज्ञापनहेतुभूता

१. भगणं=ग्रहगणं नक्षत्रगणञ्च।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रिया। माया-शब्दो व्युत्पादितो महामायेति १०७ नाम-व्याख्यानावसरे। विशदं च तत्र द्रष्टव्यम्।

नास्ति एका माया यस्य स 'नैकमायः'। अर्थादापद्यते यत् स विष्णुर्भूयसीः क्रिया विज्ञापनसाधनीभूता वहति, गुणप्रधाना वा। विष्णुसहस्रनामात्मकं सर्वं समुदितं व्याख्यानमस्तीति शास्त्रज्ञाननिष्णातैर्ज्ञेयम्।

मन्त्रलिङ्गञ्च—

इन्द्रो मायाभिः पुरुरूपमीयते। ऋक् ६।४७।१८।।
मायाभिरिन्द्र मायिनं त्वं शुष्णमवातिरः। ऋक् १।११।७।।
त्वं मायाभिरपमायिनोऽधमः स्वधाभिर्ये शुद्वावजुह्वत।
ऋक् १।५१।५।।

भवति चात्रास्माकम्—

इन्द्रो महान् दीधितिभिः स्वकाभि-
र्मानं स एकं कुरुते ह्यनेकम्।
यथास्थिमानं कुरुते स बाहौ
तथास्थिमानं कुरुते च सक्थ्नि ।।४०८।।

प्रत्येकं बाहुः त्रिंशदस्थ्नां बिभर्त्ति, सक्थि च तथैव त्रिंशदस्थ्नां बिभर्त्ति। रूपं कर्म च तयोर्मर्त्यदेहे भिन्नं भवति। तथैव तं विष्णुमनुकुर्वन् मनुष्यो नियतेन साधनेन रूपाणामनेकत्वं कुर्वन् स्वकं ज्ञानं विज्ञाने परिवर्त्तयन् सुखमश्नुते समानं च भवति 'लोकेन सम्मितः पुरुष' इति।

महाशनः—३०३

अशनः—'अशूङ् व्याप्तौ ''अश भोजने' आभ्यां ल्युटि 'अशनः' सिद्ध्यति। महदशनमस्यास्तीति 'महाशनः'। 'अशनं' हि नाम-आत्मनि धारणं रूपान्तरे वा व्यवस्थापनम्।

तद्यथा—अन्नं भुञ्जानः स्वोदरे भोज्यं निदधाति, भुक्तं च वा दोष-धातुमलेषु विपरिणमय्य रूपान्तरे व्यवस्थापयति। अमुथैव विष्णोर्व्यवस्थया आदित्यः प्राणिन आददानो याति। तदव्यवस्थयैव मृत्युः प्राणिनो मारयति। मृतं देहान्तरेण योजयति, मृत-शरीर-विकारान् पंचभूतानि निगृह्णन्ति=स्वात्मनि निलाययन्ति।

एष क्रमः सर्वत्र व्यश्नुवानो दृश्यतेऽतो 'महाशनो' विष्णुरिति युक्तं संगच्छते।

एवं विविधमूहनीयं भवति। तद्यथा-पृथिव्या विकारान् वृक्षा आददते। ते वृक्षाः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पुनस्तं विकारं पत्र-पुष्प-फलेषु विपरिणमयन्ति। तानि पत्र-पुष्प-फलानि मनुष्योऽश्नाति। स मनुष्यस्तं दोष-धातु-मलेषु च विपरिणमयति। तं पौरुषं जैवं वा पुनर्वृक्षाः स्व-खाद्यरूपेणाददते। एवं चक्रवद् भ्रमति लोको महाशनस्य विष्णोर्गर्भे। एष क्रमस्तमेव 'महाशनं' विष्णुमन्वाख्याति।

मन्त्रलिङ्गञ्च—

वायुरनिलममृतमथेदं भस्मान्त ँ शरीरम्। यजु० ४० ।१५ ।।

मृत्युर्यमस्यासीद्दूतः। अथर्व १८ ।२ ।२७ ।।

यमः परोऽवरो विवस्वान् ततः परं नाति पश्यामि किंचन।

अथर्व १८ ।२ ।३२ ।।

तस्मिन्निदं सं च विचैति सर्वं स ओतः प्रोतश्च विभूः प्रजासु।

यजु० ३२ ।८ ।।

भवति चात्रास्माकम्—

मृत्युर्न तृप्तिं भजते कदाचित्
मृता यतन्ते न च देहलब्ध्यै।
भुक्तं ह्यभुक्तं[1] कुरुते ह विश्वं
महाशनं विष्णुमियर्त्ति[2] भोज्यम्।।४०६।।

अदृश्यः—३०४

अदृश्यः—'दृशिर् 'प्रक्षेपणे' धातुः चक्षुषा द्रष्टुं शक्यं दृश्यम्, तस्य प्रतिषेधोऽदृश्यम्। विष्णुरपि स्थूलचक्षुषा द्रष्टुमशक्योऽस्तीति कृत्वा'ऽदृश्यः' उक्तो भवति।

तद्यथा गर्भोऽनुमानगम्यः, मातृकलाभिरन्तः पिहितत्वाद् गर्भस्य। गर्भोऽस्ति चादृश्यश्च, तथैव विष्णुरस्ति चादृश्यश्च। मन्त्रलिङ्गञ्च—

प्रजापतिश्चरति गर्भे अन्तरदृश्यमानो बहुधा विजायते।
अर्धेन विश्वं भुवनं जजान यदस्यार्धं कतमः स केतुः ।।

अथर्व १० ।८ ।१३ ।।

न तं विदाथ य इमा जजानान्यद् युष्माकमन्तरा बभूव।

ऋक् १० ।८२ ।७ ।।

एष एव च तस्य विष्णोः क्रमश्चतुर्विधसृष्ट्यां सर्वं व्यश्नुवानो दृश्यते।

१. अभुक्तं=दोष-धातु-मलेषु विपरिणमय्य वृक्षादिभ्यो भोज्यरूपेण तदेव ददातीति भावः। २. इयर्त्ति=प्राप्नोति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

स विष्णुरन्तः प्रतिप्राणिसंस्थो
विद्योतयत्यात्मविभूतिमन्तः ।
तथा यथा जन्तुरनन्यबुद्धि-
र्गुह्यानि[1] कुर्वन् न जनैर्हि दृश्यः ।।४१०।।

व्यक्तरूपः—३०५

व्यक्तरूपः-'वि' उपसर्गः। 'अंजतेः' क्त-प्रत्यये 'अक्तः'। 'रूप' शब्दश्च 'रु शब्दे' धातोः ***'खष्प-शिल्प-शष्प-वाष्प-रूप-तर्प-तल्पाः'*** (उणादि० ३।२८) इत्यनेन सूत्रेण 'प' प्रत्ययस्य दीर्घस्य च निपातनात् सिध्यति। व्यक्तं स्पष्टं रूपयतीति 'व्यक्तरूपो' विष्णुः।

भागवतेऽस्मिन् लोके प्रच्छन्नमपि भगवान् व्यक्तं रूपयति। तद्यथा-इयमन्तर्वत्नी पुत्रगर्भा वेति जिज्ञासायां लज्जावन्तं क्षुपं स्पृशन्ती माता व्यक्तं विजानाति विज्ञापयति वान्तःस्थं गर्भम्। तत्र यदि लज्जालुः क्षुपः स्वानि पत्राणि संकोचयति तदा पुत्रवती। यदि लज्जालुः क्षुपः स्वानि पत्राणि न संकोचयति, तदा पुत्रीगर्भेयमिति व्यक्तं रूप-दर्शनमिव भवति। अन्तर्वत्न्या नेत्रयोर्गुरुत्वलघुत्व-सद्भावोऽपि गर्भं लिंगभेदे स्पष्टं व्यक्तरूपमिव विवेचयति।

एवं सर्वत्र भगवान् विश्वमिदं व्यक्तरूपं कुर्वन् सर्वत्र स्वात्मगुणेन व्यक्तरूपेण विश्वं वेवेष्टीति कृत्वा विष्णु'र्व्यक्तरूपः' उक्तो भवति। एवं विविधमूहनीयं भवति लोक-'वेद-ज्ञाननिष्णातैर्जिज्ञासुभिरिति।

मन्त्रलिङ्गञ्च—

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः।
दिवीव चक्षुराततम्।। अथर्व ७।२६।२।।
सुसंदृशं त्वा वयं मघवन् वन्दिषीमहि। यजुः ३।५२।।
अपश्यमस्य महतो महित्वमर्त्यस्य मर्त्यासु विक्षु। ऋक् १०।७६।१।।
रूपं रूपं मघवा बोभवीति मायाः कृण्वानस्तन्वं परि स्वाम्।
ऋक् ३।४३।८।।
रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय।
ऋक् ६।४७।१८।।

---

१. गुह्यानि=गुप्तानि, जनेभ्यः प्रतिरक्षितुमर्हाणि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

सोऽव्यक्तरूपो हि महान्[1] वरेण्यो
व्यनक्ति रूपं प्रतिवस्तुसंस्थम् ।
तं व्यक्तरूपं प्रतिवस्तुसंस्थं
विजानते ज्ञानदृशः समन्तात् ।।४११।।

सहस्रजित्—३०६

शत-सहस्र-शब्दौ बहुपर्यायौ निघण्टौ पठितौ। सहस्रं जयतीति 'सहस्रजित्'। मन्त्रलिङ्गञ्च—

गोजिन्नः सोमो रथजिद्धिरण्यजित् स्वर्जिदब्जित् ।
यं देवासश्चक्रिरे पीतये मदं स्वादिष्टं द्रप्समरुणं मयोभुवम्।।
ऋक् ६।७८।४।।

पवस्व गोजिदश्वजिद्विश्वजित् स्तोमरण्यजित्। ऋ० १०।५६।१।।

इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत्।
ऋक् १०।१७०।३।।

लोकेऽपि च पश्यामः— इनेन स्वामिनात्मना सहितेन सम्पूर्णावयवयुक्तेन मनुष्येण जय्यं जीयते, न हि निर्गतेनो मृतस्तथाकर्तुं शक्नोति। एष हि तस्य विष्णोः सर्वं व्यश्नुवानस्य नियमो दृश्यते, अतः 'सहस्रजिद्' विष्णुरुक्तो भवति।

भवति चात्रास्माकम्—

सेना यथा स्वाम्युपदिष्टनेत्रा
जयत्यशेषान् द्विषतां महौघान् ।
तथैव देही सकलाङ्गयुक्तो
जय्यं पराजित्य च मोमुदीति ।।४१२।।

अनन्तजित्—३०७

मनुष्यो यत् संख्यायं संख्यायमियत्तया परिच्छेत्तुं न शक्नोति तदनन्तं

१. महान्=विष्णुः। तत्र मन्त्रलिंगं-**'महिना महान्'** (ऋग् ८।१२।२६) इन्द्र इति शेषः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तज्जयतीति='अनन्तजित्'। अनन्तानि लोकलोकान्तराणि भगवान् विष्णुः स्वकेन वीर्येण जयति वशे कुरुत इति वा, तस्मात् स 'अनन्तजिद्' विष्णुरुक्तो भवति।

तद्यथा लोकेऽपि पश्यामो-यद् यावज्जीवं मनुष्योऽनन्तान् विघ्नान् जयति, तेषां विघ्नानां जये वा कृतप्रयत्नस्तिष्ठति, परन्तु विघ्नानामन्तं न पारयति। अत उक्तं भवति विघ्नास्त्वनन्ताः, तान् जयतीति कृत्वा मनुष्योऽप्यनन्तजिदुक्तो भवति। मनुष्यस्यानन्तजित्त्वं तस्यैवानन्तजितोर्विष्णोरन्वाख्यानमात्रमेव भवति।

मन्त्रलिङ्गञ्च—

अनन्तं शुष्ममुदियर्त्ति भानुना। ऋग् १० ।७५ ।३ ।।

उग्रं ते पाजो नन्वा रुरुध्रे वशी वशं नयसे एकजत्वम्।

ऋक् १० ।८४ ।३ ।।

संक्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत् साकमिन्द्रः।

ऋक् १० ।१०३ ।१ ।।

अहमिन्द्रो न पराजिग्ये। ऋक् १० ।४८ ।५

भवति चात्रास्माकम्—

अनन्तजिद् विष्णुरनन्तलोकान्
वशे स्ववीर्येण दधाति नित्यम् ।
तथा यथा ना निजसिद्धशक्त्या
विघ्नाननन्तान् निहतान् विधत्ते।।४१३।।

❖ ❖ ❖

इष्टोऽविशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः। क्रोधहा क्रोधकृत्कर्त्ता विश्वबाहुर्महीधरः ।।४७।।

३०८ इष्टः, ३०९ अविशिष्टः, ३१० शिष्टेष्टः, ३११ शिखण्डी, ३१२ नहुषः, ३१३ वृषः। ३१४ क्रोधहा, ३१५ क्रोधकृत्कर्त्ता ३१६ विश्वबाहुः, ३१७ महीधरः।।४७।।

इष्टः—३०८

'देवपूजा-संगतिकरण-दानार्थाद् यजतेः' 'क्त' प्रत्यये ***'वचिस्वपियजादीनां किति'*** (पा० ६ ।१ ।१५) इत्यनेन संप्रसारणे कृते, ***'व्रश्चभ्रस्जसृजमृजयज-राजभ्राजच्छशां षः'*** (पा० ८ ।२ ।३६) इत्यनेन झलि परतः पदान्ते च 'षान्तादेशः'।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रत्यय-तकारस्य **'ष्टुना ष्टुः'** (पा० ८।४।४१) इत्यनेन टवर्गादेशः। एवं निष्पद्यते 'इष्टः' शब्दः।

यद्वा-इच्छार्थादिषेर्वा 'इष्टः'। यः सर्वैरिज्यते यद्वा सर्वैरिष्यते=इच्छाविषयीक्रियते प्राप्तुमितीष्टः। तथा च-वेदे **'यज्ञेन यज्ञमयजन्त देवाः'** (यजु० ३१।१६)'यज्ञो वै विष्णु' रिति च ब्राह्मणम्। विष्णुमयजन्त पूजितवन्तो वा तस्माद्विष्णुरिष्टः उक्तो भवति।

यज्ञो हि संगतिकरणाद् दानादानाद् वा सर्वं व्यश्नुवानो दृश्यते।

यदुक्तं संगतिकरणादिति तत्रायमभिसंधिः- सूर्यादयो ग्रहाः सनक्षत्रा गत्या भिन्ना अपि सन्तो विश्वस्योपकाराय संलग्नाः समाने काले व्रजन्तो यजन्ते। तद्यथा- एकस्मिन् मेरुदण्डे संगता हस्त-पाद-पर्शुकाः सशिरस्काः देहिनमात्मानं यजन्ते। अत्र शरीरे विष्णुरात्मा स्वशक्त्या प्रत्येकं मनसा पुरुषं शरीरं पशुं पश्यतिमात्रं निबध्नाति, एवं हि दानादानेन च परस्परं पश्यतिमात्रं पुरुषं जगत् निबद्धं भवति।

मन्त्रलिङ्गञ्च—

इष्टो यज्ञो भृगुभिराशीर्दा वसुभिः।
तस्य न इष्टस्य प्रीतस्य द्रविणहागर्भः।। यजु० १८।५६।।
इष्टो अग्निराहुतः पिपर्तु नः। यजु० १८।५७।।
यज्ञेन यज्ञमयजन्त देवाः। यजु० ३१।१६।।
यज्ञो यज्ञेन कल्पताम्। यजु० २२।३३।।

भवति चात्रास्माकम्—

यज्ञेन देवा अयजन्त यज्ञ-
मिष्टो हि तस्मादिह विष्णुरुक्तः।
यज्ञेन विश्वं परिवर्त्तमानं
गर्भे स्वके तत्[1] कुरुते ह यज्ञः[2]।।४१४।।

अविशिष्टः—३०६

विशेषेण युक्तो विशिष्टो न विशिष्टोऽ'विशिष्टः' इति निर्विशेष इत्यर्थः। समानरूपेण सर्वान्तर्यामित्वादविशिष्टः। अथवा प्रतिजातिभेदेन समानरूपेण

१. तत्=विश्वमिति। २. विष्णुरिति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दत्तेन्द्रियान्तःकरणादिसाधनत्वाद् 'अविशिष्टः'।

तद्यथा मनुष्याः सर्वत्र समानेन्द्रियगोलकव्यवस्थाना दृश्यन्ते, एवं काकाः मृगाः मत्स्याः मकराः कच्छपाः सिंहाः शृगाला इत्यादयः। एवं वृक्ष-लता-गुल्मेष्वपि दृश्यते। यत्र भूगोलकृतो भेद उत्पद्यते, तत्र सर्वेषु तत्रत्येषु समानरूपेणैव भेदो व्यश्नुवानो दृश्यते।

मन्त्रलिङ्गञ्च—

न तं विदाथ य इमा जजानान्यद् युष्माकमन्तरा बभूव।
ऋक् १०।८२।७।।

मां हवन्ते पितरं न जन्तवो। ऋक् १०।४८।१।।

पञ्चजना मम होत्रं जुषध्वम्। ऋक् १०।५३।५।।

शृण्वन्तु विश्वे अमृतस्य पुत्राः। यजु० ११।५।।

यत्र विश्वं भवत्येकनीडम्। यजु० ३२।८।।

भवति चात्रास्माकम्—

समानरूपेण स जन्तुमात्रं
युनक्त्यशेषैः करणैः समानैः।
लोकेऽविशिष्टः कथितोऽस्ति विष्णु-
स्तथैव वृक्षादिषु कल्पनीयम्।।४१५।।

शिष्टेष्टः—३१०

शिष्टः-'शासु अनुशिष्टौ' इत्यस्मादादादिकात् 'क्त' प्रत्यये "शास इदङ्हलोः' (पा० ६।४।३४) सूत्रेण शास 'उपधाया इत्वं' ***'शासिवसिघसीनां च'*** (पा० ८।३।६०) इत्यनेन 'षत्वं', ***'ष्टुना ष्टुः'*** (पा० ८।४।४१) इत्यनेन ष्टुत्वम् 'इष्ट' शब्दो व्युत्पादितचरः शिष्टैरिष्टो, यज्ञेन यज्ञ इष्ट, इति 'शिष्टेष्टः' के पुनः शिष्टाः? साध्या देवाः।

मन्त्रलिङ्गञ्च—

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः।।
यजु० ३१।१६।।

तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तेन देवा अयजन्त साध्या ऋषयश्च ये।। यजुः ३१।६।।

साध्यैर्देवैरयं सर्वव्याप्तो यज्ञ इष्टस्तस्मात् 'शिष्टेष्टत्वं' सर्वव्याप्तं दृश्यते। यतः प्रत्यहं प्रतिक्षणं लोकोऽयं यज्ञे प्रतिष्ठमान निर्दिष्टत्वात्।

सर्वव्याप्तत्वं यज्ञस्यात्रैव यथा–**'यत् पुरुषं व्यदधुः'** (यजु० ३१।१०) इत्यत्र जगत्पर्यायः पुरुष-शब्दो यता नपुंसकलिंगेन निर्दिष्टत्वात्।

यत् पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः।। यजुः ३१।१४।।

तत्र यज्ञे वसन्तर्तुराज्यं घृतमासीत्। कुत एवं हेमन्तशिशिरयोश्चितं संघीभूतं द्रवमयं वसन्ते सूर्यखरांशुभिर्द्रवतां प्राप्नोति। पृथिव्यां पार्थिवा रसाः, मनुष्ये च श्लेष्मा धातवश्च उपचयं प्राप्ताः सन्तः फाल्गुनस्य पंचदशदिनानि व्यतियाय १५ वैशाख इति यावत् स्वद्रवणधर्ममनुप्राप्ताः श्लैष्मिकान् रोगान् कुर्वते।

अमुथैव विश्वयज्ञे ग्रीष्मर्तुरिध्म-स्थानीयः, प्रखरतरत्वात्सूर्यकिरणानां सर्वं जारयति, हविःस्थानीयः शरदृतुसूर्यः, तत्र शीताभिमुखत्वात् सूर्यस्य, अत एव च 'यवैर्व्रीहिभिर्वा जुहुयात्' इयुक्तं संगच्छते। यव-व्रीहयोः शरदन्तर्भूतत्वात्।

अस्य पुरुषस्य अर्थात् जगतः सप्त परिधय आसन्। ते च सप्त वायवः। तद्यथा-आवह-प्रवहानुवह-संवह-विवह-परावह-परिवहाः। तत्र मेघपृथिव्योरन्तराले 'आवहः', मेघसूर्ययोरन्तराले 'प्रवहः', सूर्यचन्द्रमसोरन्तराले 'अनुवहः', चन्द्रनक्षत्रयोरन्तराले 'संवहः', नक्षत्रग्रहयोरन्तराले 'विवहः', ग्रहसप्तर्षयोरन्तराले 'परावहः', सप्तर्षिध्रुवयोरन्तराले 'परिवहः'।

विश्वयज्ञस्यास्य त्रिगुणिताः सप्तसमिधः-सूर्य-चन्द्र-मंगल-बुध-गुरु-शुक्र-शनयः। ते हि दीप्तिमत्त्वात् समिध इव। ते च वसन्ते ग्रीष्मर्तौ शरदृतौ च समिद्धतेजसो भवन्ति, हेमन्त-शिशिर-वर्षर्तूनामपेक्षया। भूगोलस्य सूर्यकृतौष्ण्यभेदादृतूनां तथैव कल्पना कर्त्तव्या भवति। वेदस्य वस्तु-तत्त्वभूत-नियम-निर्देशनपरत्वात्।

एवं संक्षेपतो यज्ञस्य विश्वव्यापकत्वमुक्तम्। संगच्छते च ब्राह्मणम्-**'यज्ञो वै विष्णु'**रिति।

भवति चात्रास्माकम्–

शिष्टा हि साध्या अयजन्त यज्ञं
यज्ञो हि विश्वं परितोऽभ्युपैति ।
शिष्टेष्ट-नाम्ना च स विष्णुरुक्त-
स्तं चानुकुर्वन्ति नराश्च शिष्टाः।।४१६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शिखण्डी—३११

'शिखा' शब्दः-'शीङ्' धातोः ***'शीङो ह्रस्वश्च'*** (उणादि ५।२४) सूत्रेण 'खः'-प्रत्ययो धातोरीकारस्य ह्रस्वश्च। तथा स्त्रीत्वविवक्षायां टाबिति सिध्यति ज्वालार्थकः।

'अण्ड' शब्दश्च गत्यर्थकाद् 'अम' धातोः ***'ञमन्ताड्डः'*** (उणादि १।११४) सूत्रेण 'ड' प्रत्यये सिध्यति। तथा च— अमति=गच्छति व्याप्नोति वा—'अण्डः'। शिखया=तेजोरूपया ज्वलया शेते आकाशे व्याप्नोति, विषयं गच्छत्यूर्ध्वमाकाशमिति वा 'शिखण्डः' सूर्योऽग्निर्दीपो वा। 'शिखा+अण्डः' इत्यत्र शकन्ध्वादिलक्षणं पररूपं 'शिखण्डः' इति। स स्वविकारसहितः शिखण्डः सूर्योऽस्यास्मिन् वास्तीति 'शिखण्डी' विष्णुः। मतुबर्थीय इनिः।

यद्वा 'शक्लृ शक्तौ' इति स्वादिगणपठितधातोर्बाहुलकादुणादिः 'अण्डन्' प्रत्ययो, धातोरिकारागमो वर्णविपर्ययश्चेति। शक्नोति सर्वथेति 'शिखण्डः' समर्थः। समर्थाश्चेमे सृष्ट्यवलम्बनाः सशक्तिका ब्रह्मादयस्तेऽस्य सन्तीति 'शिखण्डी' परमेश्वरो विष्णुः।

आकाशशयनरूपार्थसामान्यात् 'शिखण्डे'ति इन्द्रधनुषोऽपि नाम, तदपि शेत आकाशे। निर्वचनञ्चाक्षरवर्णसामान्यादर्थसामान्याद्वा विधेयमिति नैरुक्तसिद्धान्तः। तदस्यास्तीति 'शिखण्डी' सूर्योऽपि।

मन्त्रलिङ्गञ्च तदर्थे—

धनुर्बिभर्षि हरितं हिरण्ययं सहस्रघ्नि शतवधं शिखण्डिनम्।
रुद्रस्येषुश्चरति देवहेतिस्तस्यै नमो यतमस्यां दिशीतः।।

अथर्व ११।२।१२।।

सर्वासु दिक्ष्विन्द्रधनुषः सद्भावः। तस्मिंश्चेन्द्रधनुषि हरितपीतसुवर्णाभवर्णविविधता प्रत्यक्षं दृश्यते। तस्य चाकाशे शयनात् शिखण्डत्वं सूर्यप्रभवाच्च सूर्यस्य शिखण्डित्वम्। सूर्योऽपि खे शेत इति सूर्यः स्वयमपि 'शिखण्डः', स च विष्णोरेवेति विष्णुः 'शिखण्डी'।

मयूरपुच्छस्यापि खे शयनात् शिखण्डत्वं तच्च मयूरस्य स्वमिति मयूरः 'शिखण्डी'। मयूरपुच्छेऽपि इन्द्रधनुषीव रोचना विविधवर्णता। मयूरवचनः शिखण्डिशब्दो वेदे यथा—

यत्राश्वत्था न्यग्रोधा महावृक्षाः शिखण्डिनः।
तत् परेताप्सरसः प्रतिबुद्धा अभूतन ।। अथर्व ४।३७।४।।
आनृत्यतः शिखण्डिनो गन्धर्वस्याप्सरापतेः।। अथर्व ४।३७।७।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लोकेऽपि च पश्यामः—सूर्यदैवतस्य चक्षुषो द्युलोकसम्मित उत्तमाङ्गे स्थितस्योपरितने भागे स्थितस्यावरणपटलस्य भृकुटेर्धनुषाकारता पक्ष्मणाञ्च किरणतुल्यता। चक्षुषि जलस्य सद्भावश्च नैसर्गिकः। यथा चात्र चक्षुषः सन्निकृष्टो नासिकाया विन्यासस्तथैव सूर्यस्य सन्निकृष्टे राशौ बुधस्य सन्निवेश इति पुनर्वसोरात्रेयस्य सिद्धान्तोऽनुपदं पुष्यते, 'लोक-सम्मितः पुरुषः' इति।

द्विपदेषु पुरुषो लोकसम्मितः, चतुष्पदेषु गौर्लोकसम्मितः, तथा हिंस्रेषु सिंहो लोकसम्मितः। परन्तु चक्षुर्वर्त्मनः सर्वत्र धनुर्वदायाम ऋते पक्षिवर्गात् पक्षिणां नेत्रेन्द्रियगोलकस्य निर्माणं तेषामुड्डयनसौकर्यमुद्दिश्य कृतम् । एवं चक्षुर्मात्राव-लोकनेन भगवतः शिखण्डिनः सर्वव्यापकता दृश्यते। शिखण्डित्वरूपेण गुणेन सर्वत्र व्याप्तस्य भगवतः 'शिखण्डी'ति नामोपपद्यतेतराम्। तथा च मन्त्रः—

तद्विष्णो परमं पदं[1] सदा पश्यन्ति सूरयः।
दिवीव चक्षुराततम्।। यजु० ६।५।।

भवन्ति चात्रास्माकम्—

शीङ्ह्रस्वमाप्नोति च खेन युक्त-
श्चूडा शिखा खे शयनात् सदुक्ता[2]।
उणादिसूत्राणि च यानि तत्र
शब्दस्य सिद्ध्यै बहुलप्रयोगः ।।४१७।।

अनन्तपारस्य च शब्दराशे-
र्यथाकथं पारमवाप्तुमत्र ।
अण्डन्विधानं[3] कुरुते पुरस्तात्
तज्ज्ञापयत्येव बहुत्वमस्य ।।४१८।।

शेते यथा खे वरुणस्य[4] हेति-
स्तथैव लोके नयनस्य वर्त्म ।
सूर्यो हि तद्वान् कथितः शिखण्डी
चक्षुश्च तद्वत् कथितं शिखण्डि।।४१९।।

१. परमं पदं=तत्त्वतो ज्ञेयं कर्म। प्रसङ्गतो दीपहस्तः पुरुषोऽपि शिखण्डी दीपज्वालया समुपेतत्वात्। २. सदुक्ता=सद्भिरुक्ता। ३. अण्डन्प्रत्ययस्य विधानमिति विग्रहः। ४. वरुणस्य हेतिः=इन्द्रधनुः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नैकस्य वर्णस्य यथा निवेशो
रुद्रस्य हेतौ प्रपदं ह दृश्यः।
तथा मयूरस्य च बर्हिमात्रे
बहुत्वमन्वेति च वर्णकानाम् ॥४२०॥

आग्नेयधर्मा कथितो मयूर-
स्तथाग्निधर्मानुसृतञ्च चक्षुः।
बुधो यथार्कस्य तथात्र नासा
सख्यं[1] विधत्ते नयनस्य नित्यम् ॥४२१॥

विष्णुः शिखण्डी स्वगुणं ततानो
विश्वे समस्ते कुरुते च दृश्यम्।
निजं स्वरूपं कवयः प्रसन्नाः
पश्यन्ति नित्यं हृदि सन्निविष्टम्॥४२२॥

नहुषः—३१२

'णह बन्धने' दैवादिकः, ***'नहिकलिहन्यर्त्तिलसिभ्य उषच्'*** सायणः (ऋग् १।३१।११) मन्त्रभाष्ये। एतेन सूत्रेण ज्ञायते यदुणादिसूत्राणां बहुधा निबन्धनानि सन्ति। वर्त्तमान उपलभ्यमाने उणादिग्रन्थे सूत्रं—***'पृनहिकलिभ्य उषच्'*** (उणादि ४।७५), ***'ऋनहिभ्यामुषन्'*** (दशपाद्युणादिसूत्रे ६।१३)। एवमुषजन्तोऽयं 'नहुष' शब्दः सिद्ध्यति।

यथात्रोणादिसूत्रेषु भेदः तथैवान्योपि दृश्यते। तद्यथा—***'भृमृदृशियजिपर्वि-पच्यमितमिनमिहर्य्यिभ्योऽतच्'*** (३।११०) 'दृशिर् प्रेक्षणे' धातौ दर्शन इति पदं व्याकुर्वन् माधवीयधातुवृत्तिकारो माधवः सूत्रमेनद् ***'भृमृदृशियजिपर्वि-पच्यमितमिनमिहर्य्यिभ्योऽनच्'*** इति पठति। तेन-भरणः, मरणः, दर्शनः, यजनः, पर्वणः, पचनः, अमनः, तमनः, नमनः, हर्यणः इति।

इति प्रसंगप्राप्तमुक्तमस्माभिः। प्रकृतमनुसरामः-नह्यति बध्नाति सर्वं विश्वं सर्गादारभ्यासर्गान्तं निर्विकल्पमिति 'नहुषो' विष्णुरव्ययः। बन्धनं चापि द्विविधं-सन्धिमतामपृथग्भावः। तद्यथा— अंगुलीनां पुटकानां, अपरेषां च सर्वांगसन्धिमतां

१. सख्यं=समानस्थानम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सन्धावेवास्थापनम् अपरं च- पृथक्-पृथक् स्थितानां बाहुजंघांगुलीनां च पृथक्-पृथक् भाव एवास्थापनं बन्धनमुक्तं भवति। एषा योजना सर्वत्र वृक्षादिस्थावर-जातिष्वप्यवगन्तव्या भवति।

अयमत्राभिसन्धिः— बद्धस्य पृथक्करणं मरणं नाशो, वा, पृथक्-पृथक् स्थितस्यैकीकरणं मृतिर्नाशो वा। तौ बद्धाबद्धौ यदि विपर्यस्ततामापाद्येयातां, तर्हि सर्वं विपर्यस्येत्। अत उक्तं भवति-नह्यति बध्नातीति 'नहुषो' विष्णुरिति । एष च गुणस्तस्य सर्वं व्यश्नुवानो दृश्यते सर्वस्मिन् चराचरे विश्वे।

मन्त्रलिङ्गञ्च—

त्वामग्ने प्रथममायुमायवे देवा अकृण्वन् नहुषस्य विश्पतिम् ।
इडामकृण्वन् मनुषस्य शासनीं पितुर्यत् पुत्रो ममकस्य जायते।।
ऋक् १।३१।११।।

असौ यः पन्था आदित्यो दिवि प्रवाच्यं कृतः।
न स देवा अतिक्रमे तं मर्तासो न पश्यथ ।। ऋक् १।१०५।१६।।
स्कम्भेनेमे विष्टभिते द्यौश्च भूमिश्च तिष्ठतः ।
स्कम्भ इदं सर्वमात्मन्वत् यत्प्राणन्निमिषच्च यत्।। अथर्व १०।८।२।।

उषजन्तो नहुष–प्रयोगः (ऋक् ५।१२।६) इत्यत्रापि।

भवतश्चात्रास्माकम्—

यदत्र धात्रा विहितं पुरस्तात्
बद्धं स्वरूपात् किमु वाप्यबद्धम् ।
तथैव तन्नह्यति निर्विकल्पं
विपर्यये नाशमियात् समस्तम् ।।४२३।।

यथा खगा[१] नामस्वरूपभिन्नाः
सन्तोऽपि राशेः परियन्ति वर्त्म[२] ।
तथैव देहे पृथगिन्द्रियाणि[३]
देहं निबद्धं परियन्ति चैकम् ।।४२४।।

---

१. खगा ग्रहाः। २. राशिवर्त्म=नक्षत्रक्रान्तिमार्गः। ३. इन्द्रियाणि रसादयो धातव उपधातवो दोषाश्च ग्रहदैवतकाः सन्तोऽपि समानराशिं शरीरमधितिष्ठन्ति। एवं सर्वत्रैकता पृथक्ता च दरीदृश्यते। तां पृथक्तामेकतां च नह्यति बध्नातीति 'नहुषो' विष्णुरुक्तो भवति। एवं विविधमूहानां कल्पनीयं भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वृषः—३१३

'वृषु सेचने' भौवादिकः। ***'इगुपधज्ञाप्रीकिरः कः'*** (पा०३।१।१३५) इत्यनेन 'कः' प्रत्ययः। 'वृषो'ऽग्निः, अग्निरेव सर्वं निष्पादयति। अग्निः सूर्यः, स हि ऋतून् विकल्पयति। अग्निरेव चतुर्विधं पचति। सूर्य एव पृथिव्यां रसानामुदयं करोति, स्वस्य तापस्य योगेन।

मन्त्रलिङ्गञ्च—

वैश्वानरो यतते सूर्येण। ऋग् १।९८।१।।

प्रतिप्राण्यन्तः स्थितोऽग्निश्च वैश्वानरसंज्ञां लभते। ***'अहं वैश्वानरो भूत्वा... पचाम्यन्नं चतुर्विधम्'*** इति गीतायाम्। ***'तिष्ठत्येव हि भूतानां जठरे जठरे ज्वलन्'*** बृहद्देवता (१।६५)। आतृणात् सूर्यपर्यन्तं पृथक्-पृथक् स्थिता अग्नयो 'वैश्वानर' संज्ञां लभमाना विश्वं परिपालयन्ति।

तेषामभिमतं कृत्वा 'वृषो'ऽग्निः। सोऽग्नि' सर्वं व्यश्नुवानः सन् विष्णोर्नामसु 'वृष' शब्देनाभिधीयमानोऽलंकुरुते तं बृहन्तं भगवन्तं विष्णुं सर्वव्यापकमीश्वरम्।

मन्त्रलिङ्गञ्च—

वृषोऽग्निः समिध्यतेऽश्वो न देववाहनः।
तं हविष्मन्त ईडते।। अथर्व २०।१०२।२।।
अचिक्रदद् वृषा हरिर्महान् मित्रः न दर्शतः।
सं सूर्येण दिद्युतदुदधिर्निधिः।। यजु०३८।२२।।
वृषाग्निं वृषणं भरन्नपां गर्भं समुद्रियम्। यजु० ११।४६।।

अग्निः किं वर्षति ददाति वा किंचिन्मात्रमुच्यते—

पृथिवी धेनुस्तस्या अग्निर्वत्सः सा मेऽग्निना वत्सेनेषमूर्जं कामं दुहाम्।
आयुः प्रथमं प्रजां पोषं रयिं स्वाहा।। अथर्व ४।३६।२।।
अग्नावग्निश्चरति प्रविष्टः ऋषीणां पुत्रो अभिशस्तिपा उ।
नमस्कारेण नमसा ते जुहोमि मा देवानां मिथुया कर्मभागम्।।
अथर्व ४।३६।६।।
हृदा पूतं मनसा जातवेदो[१] विश्वानि देव वयुनानि विद्वान्।
सप्तास्यानि तव जातवेदस्तेभ्यो जुहोमि स जुषस्व हव्यम् ।।
अथर्व ४।३६।१०।।

---

१. जातवेदोऽग्निः, वृषो वाग्निः। सर्ववेत्तृत्वं चास्य निर्विकल्पमुक्तं मन्त्रे। अतो वृषो विष्णुर्वा युक्तमुपपद्यते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवतश्चात्रास्माकम्—

वृषोऽग्निरेको बहुधा विक्लृप्तो
विश्वं समस्तं परियाति धत्ते ।
नष्टोऽति वोग्रो कुरुते विनाशं
'वेदे त्वमग्ने[1] कथितोऽसि रुद्रः' ।।४२५।।

सोऽग्निः समस्तं समभावमाप्त-
स्तं तत्स्थभावेन युनक्ति विश्वम्।
अग्नेर्विधानं य उ वेत्ति विद्वान्
कामानशेषान् स उ दोग्धि तस्मात्।।४२६।।

धर्मोऽपि वृष उच्यते—

वृषो हि भगवान् धर्मः, स्मृतो लोकेषु भारत।
नैघण्टुक-पदाख्याने विद्धि मां वृषमुत्तमम्।।

महाभारते शा० प० ३४२।८८।।

क्रोधहा—३१४

'क्रुध कोपे' दैवादिकः, क्रुध्यतेर्भावे 'घञ्' प्रत्ययः—क्रोधः। क्रोधं हन्तीति 'क्रोधहा'। क्रोधो हि नाम ग्रहणीस्थ-पित्तोष्मा वायुनातिप्रवृद्धो रसवहाभिः सिराभिर्हृदयं गत्वा अणुना कालेन च मस्तिष्कं गत्वा परुषं सातिक्षेपं सातिदण्डप्रपात-विज्ञापनीयं च कर्म कारयति। स एव चोष्मा निम्नाभिगामिस्रोतःसु गत्वा शिश्नमनुप्राप्तः काम इति संज्ञां लभते।

कामक्रोधयोर्विपरीतीकरणं तयोश्चिकित्सा भवति। तद्यथा कामोदयः क्रोधं, क्रोधोदयश्च कामं शमयति। सर्वाधारे विष्णौ क्रोधोदयो न भवति, क्लेशकर्मविपाकाशयैरपरामृष्टत्वात्तस्य। अत उक्तं भवति प्रभोर्गुणानुध्यानपरस्यापि सर्वकस्य स क्रोधोदयं हन्ति। सर्वको वा भगवद्गुणानुप्रेरितः क्रोधं जहाति, सर्वस्मिन् तमनुस्यूतं पश्यन्। द्वितीयं प्रति क्रोधोदयो भवति।

लोकेऽपि च पश्यामः— दुर्व्यवहरन्तं भगवान् श्वासप्रश्वासाभ्यां न वियुनक्ति, सत्कर्मवृत्तं च नातिश्वासप्रश्वासाभ्यां वा युनक्ति। अमुथैव सर्वत्र योजनीयं

१. 'त्वमग्ने रुद्रः' ऋग् २।१।६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति। तद्यथा- क्रुध्यन्तं सूर्यः स्वसंतापेन न वियुनक्ति, शान्तं च नातियुनक्ति। ज्ञानपूर्वकं मन्युर्भवति। उक्तं च यजुषि—**'मन्युरसि मन्युं मयि धेहि'** (अ० १६।६)। मन्यते मन्युरिति।

एवमत्र व्याख्याप्रसंगेन 'जितक्रोधः' द्विषष्टितमे ६२ श्लोके द्विषष्ट्युत्तरं चतुः-शततमं ४६२ च नाम व्याख्यातं भवति। तथैव-त्रयोदशोत्तरैकशततमे ११३ श्लोके चतुस्त्रिंशदुत्तरं नवशततमं ६३४ च नाम 'जितमन्यु' रिति च व्याख्यातं भवति। यत्तु कदाचिज्जनपदप्रध्वंसिनि भूकम्पाद्यनिष्टे जात उच्यते दैवः=देवसम्बन्धी कोपोऽयमिति। तत्रोच्यते- न हि स वस्तुतो देवसम्बन्धी कोपो भवति, किन्तु जगदन्तर्गतग्रहनक्षत्रतिथि-लग्न-सम्बन्धविशेषजनितो जगदनिष्टकरो भौतिको विकारविशेषो भवति। भवति च स सम्बन्धविशेषव्यवस्थितो, यथा जरायौ सदपि जलं ग्रहनक्षत्रतिथिलग्नादिसम्बन्धविशेषं प्राप्य बहिः स्रवति न तु ततः प्राग् व्यवस्थितत्वात्।

एतेन सिद्धं यद्दैवप्रकोपशब्देनाभिधीयमानः कोपो देवस्य न भवति किन्तु ग्रहनक्षत्रादिसंसर्गरूपव्यवस्थाविहितः। न हि सर्वा अन्तर्वर्त्य एकस्मिन्नेव ग्रहनक्षत्रलग्नतिथिषु प्रसुवते। अमुथैव सर्वत्र प्राकृतेषु विकारेषूहनीयं भवति। अनन्तत्वाद् प्राकृतविकाराणाम्, सान्तत्वाच्च मनुष्यस्यायुषो बुद्धिबलोदयस्य च।

भवन्ति चात्रास्माकम्—

स क्रोधहा विष्णुरनन्तशक्ति-
र्नाप्नोति कोपं न च मन्युमेति।
अकाय उक्तो न हि तत्र मन्ये
द्वन्द्वोदयो जीव इवाभ्युपैति ।।४२७।।

दैव-प्रकोपोऽयमिति ब्रुवाणा
आत्माल्प-विज्ञान-बलादिहेतोः ।
बम्भ्रम्यमाणाश्च निजार्थनाशै-
र्निन्दन्ति नन्दन्ति च तं महेशम्।।४२८।।

यदत्र विश्वे प्रतिसूर्यलग्नं
स्पृश्यं च वा श्रव्यमथापि दृश्यम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत् सर्वकं मर्त्यकृतेऽस्ति नित्यं[1]
सूते यथा सव्यमनिन्द्य-योनिः ।।४२६।।

उक्तं च संगच्छते विष्णुसहस्रनाम-माहात्म्ये—

न क्रोधो न च मात्सर्यं न लोभो नाऽशुभा मतिः।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ।।

भागवतं कर्म पश्यन् न क्रुध्यति, न मुह्यति, न शोचति, इत्यादिः।

भवति चात्रास्माकम्—

स क्रोधहा विष्णुरजेयशक्तिः
पुष्णाति विश्वं निजमार्गबद्धम्।
न क्रोधमन्वेति न हर्षमेति
कर्मानुबद्धं च युनक्ति भोगैः ।।४३०।।

'मनुष्यवद् देवताभिधानं भवतीति' नैरुक्तानां समयः, इति कृत्वा।

मन्त्रलिङ्गञ्च—

तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः।
अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः ।।

ऋक् १।२४।११।।

वृषा न क्रुद्धः पतयद्रजः स्वा यो अर्मपत्नीरकृण्मेदिमा अपः।

ऋक् १०।४३।८।।

अहेडमान उपयाहि यज्ञं तुभ्यं पवन्त इन्दवः सुतासः।

ऋक् ६।४१।१।।

'हेड' इति क्रोध नाम। एवं बहुत्र 'अहेडमानः' इति वेदे।

विश्वस्य हि प्रेषितो रक्षसि व्रतमहेडयन्नुच्चरसि स्वधा अनु।

ऋक् १०।३७।५।।

यथायं क्रोधहा उक्तो भवति, तथाय'मशस्तिहा' अप्युक्तो भवति। तद्यथा—

अपाधमदभिशस्तीरशस्तिहा अथेन्द्रो द्युम्न्याभवत्।
देवास्त इन्द्र सख्याय येमिरे बृहद्भानो मरुद्गण ।। ऋक् ८।८९।२।।

एव बहुत्र वेदे।

---

१. नित्यं=नितम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रोधकृत्कर्त्ता—३१५

क्रोधं करोतीति क्रोधकृत्, 'क्रोधकृतं कृन्तति छिनत्ति हन्ति वा स 'क्रोधकृत्कर्त्ता। यद्वा क्रोधोदयकरं कारणं कृन्तति स 'क्रोधकृत्कर्त्ता। यद्वा-क्रोधकृतं करोतीति क्रोधकृत्कर्त्ता। उभयथा विग्रहः कर्तुं शक्यते। क्रोधोदयप्रकारः क्रोधहेति नामव्याख्याने व्याख्यातः। अग्निः स्वयं स्वकैर्विकारैश्च जगद्धारयति, क्रोधश्चाप्याग्नेयः। तत्र औषधयश्चाप्याग्नेयाः, तत्रैव स भगवान् विष्णुस्तत्प्रति-रोधकमौषधं कुरुते जनयति।

एषैवावस्था सर्वत्र लक्ष्यते। तद्यथा जलं जलप्रधानं पदार्थं च जनयति, तस्य शमनमग्निः अग्निप्रधानं च पदार्थजातं कुरुते जनयति वा। एतस्य प्रसिद्धोदाहरणं लोके यथा-विच्छू-बूटीति प्राकृतं नाम, तद् ह्याग्नेयं, पालकेति प्राकृतनामतः प्रसिद्धं तस्य समीप एव नातिदूरे वा जनयति। मारकरक्षकाभ्यां व्याप्तमिदं जगत् तमेव क्रोधनाम्ना व्यश्नुवानं विष्णुं प्रतिपदं व्याख्याति।

सारार्थत एवं वक्तुमर्ह्यते-विकारं कुर्वन्तं विकृतं वा कृन्तति छिनत्तीति, विकारं कुर्वाणस्य विकृतस्य वा शमयितारं करोतीति वा 'क्रोधकृत्कर्त्ता' विष्णुरुक्तो भवति। मनुष्यवद्दैवताभिधानं नैरुक्तसमयेन।

मन्त्रलिङ्गञ्च—

व्यास इन्द्र पृतनास्वोजा अधा विश्वं शत्रूयन्तं जघान।
ऋग् ७।२०।३।।

उदगादयमादित्यो विश्वेन सहसा सह।
द्विषन्तं मह्यं रन्धयन् मो अहं द्विषते रधम् ।। ऋ० १।५०।१३।।
ऊर्ध्वो नः पाह्यंहसो निकेतुना विश्वं समत्रिणं दह ।
कृधी न ऊर्ध्वाञ्चरथाय जीवसे विदा देवेषु नो दुवः।।
ऋग् १।३६।१४।।

भवति चात्रास्माकम्—

विकारकर्तॄन् स उ हन्ति नित्यं
विकारभावं स निराकरोति।
जगत् समस्तं स समे प्रकुर्वन्
सव्येन साकं कुरुतेऽपसव्यम्।।४३१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विश्वबाहुः—३१६

'बाहुः'-'बाधृ विलोडने' भौवादिकः तस्मात् ***'अर्जिदृशिकम्यमिपसिबाधां ऋजिपशितुक्बुक्दीर्घहकाराश्च'*** (उणादिः १।२७) इत्यनेन 'कुः' प्रत्ययः धातोर्हकारान्तादेशश्च। बाधते विलोडत इति 'बाहुः'। बाध्यन्ते विलोड्यन्तेऽभीप्सितार्था याभ्यां तौ 'बाहू' भुजपर्यायौ। 'विश्व'-शब्दो व्युत्पादितो 'विश्वम्' इति नामव्याख्यानावसरे। 'विश्व' शब्दो जगत्पर्यायः सर्वपर्य्यायश्च। विश्वस्य सर्वस्य चराचरस्य यो विलोडनकर्त्ता प्रध्मयिता वा स 'विश्वबाहुः'। विश्वेषां विलोडन-कर्तृ-साधनानि विश्वबाहुसंज्ञां लभन्ते। विश्वानि भूतानि याभ्यां बाहुभ्यां स्वकीयमभिमतं विलोडयन्ति, मथ्नन्ति पुनः पुनस्तदेव कर्माभ्यस्यन्ति वा तौ बाहू।

मन्त्रलिङ्गञ्च—

विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात्।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः ॥

ऋग् १०।८१।३॥

'विश्व' शब्दो बहुपर्यायः। तत्रार्थे मन्त्रलिङ्गञ्च—

सहस्रबाहुः पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा अत्यतिष्ठत् दशांगुलम्॥ अथर्व १९।६।१॥

शत-सहस्रशब्दौ च बहुनामसु पठितौ निघण्टौ।

लोकेऽपि च पश्यामः-क्षेत्रं विवप्सवः कृषीवलाः सर्वप्रथमं क्षेत्रं विलोडन्ति मथ्नन्ति क्षुभ्नन्ति। अत्र क्षोभन-विलोडन-बाधन-साधनीभूतं सर्वमपि बाहु-शब्दवाच्यतां साधनशब्दवाच्यतां वा प्राप्नोति। तद्यथा कृषीवलस्य सीरं तस्य बाहुः, येनासौ क्षेत्रं मथ्नाति। बलीवर्दौ वा बाहू ययोः साहाय्येन कृषीवलः क्षेत्रं विलोडते, तस्य स्वकौ शरीराङ्गभूतौ साधनेषु मूर्द्धन्यौ च बाहू उच्येते। एवं हि भगवान् विलोडनधर्ममनुसारयन् सर्वं बाहुरूपेण व्यश्नुवानो दृश्यते।

तद्यथा-वाक् शब्दं मथ्नाति। बाहू कर्माणि मथ्नीतः। पादसनाथे सक्थिनी मार्गं मथ्नीतः। दन्ता जिह्वा-साहाय्येन भुज्यमानमन्नं मथ्नन्ति। अन्त्राणि चतुर्विधं चर्व्यं चोष्यं लेह्यं पीतं च वा मथ्नन्ति। वृषणौ द्वौ तौ च बाहू इव यभमानयोः शुक्ररजसी मथ्नीतः। नेत्रे दृश्यं मथ्नीतः, हेयोपादाने प्रति सतर्के भवतः। नासा प्रियमप्रियं च विज्ञापयति गन्धं विलोडयन्ती, मस्तिष्कं च सत्यानृते मथ्नाति हेयोपादाने विवेचयति। श्वासप्रश्वासौ च देहिनं जीवयितुं नक्तंदिनं च मथ्नीतः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुरुः शिष्यं दण्डमाध्यमेन विद्योपदेशेन वा मथ्नाति। प्रजां प्रजिजनियिषुः स्त्रीक्षेत्रं शिश्नमाध्यमेन बाधते विलोडति मथ्नाति वा, एवं सर्वत्र बाधनं मथनं विलोडनं वा यद् दृश्यते तत् तस्यैव भगवतो विश्वबाहुरूपकं स्वरूपं सत् तं सर्वं व्यश्नुवानं भगवन्तं विश्वबाहुं विष्णुं प्रपदं व्याख्याति।

एवमनन्तविधमूहनीयं भवत्युदाहरणानां लोके पशु-पक्षि-वक्ष -लता-यन्त्राणि च मनुष्यकृतानि दृष्ट्वा। दिग्दर्शनमात्रमेव प्रदर्शनं तावदस्माकमिहाभिमतम्।

भवति चात्रास्माकम्—

स विश्वबाहुर्भगवान् वरेण्यो
व्याप्नोति मथ्नाति गुणेन नित्यम्।
तं विश्वबाहुं कवयः सदैव
ध्यायन्ति कर्माणि च बाधमानाः ।।४३२।।

यथा बाहू द्वौ तथैव अयने द्वे, शरीरे च द्वयं द्वयमङ्गानां भवति, एवं बाहोरिव विश्वं द्वित्वेन व्याप्तमस्ति।

भवति चात्रास्माकम्—

यथैव बाहू सकलं तथैव
युग्मेन युक्तं कुरुते ह विष्णुः।
तस्मान्मयोक्तं बहुधाऽत्र भाष्ये
यो वेत्ति लोकं स उ वेत्ति वेदम्।।४३३।।

उक्तं च स्वके सत्याग्रहनीतिकाव्ये—

अनन्तकर्तुः कर्मापि नालमन्ताय कर्हिचित् ।
जगद् वेदस्य व्याख्यानं वेदो विश्वप्रकाशकः।।
लोकज्ञो न च वेदज्ञो वेदज्ञो न च लोकवित्।
एकपक्षखगस्येव वाक्यं तस्यावसीदति ।। ५।६, १०।।

महीधरः—३१७

'मह पूजायाम्' भौवादिकः चौरादिकश्च। महति महयति वा 'महः' पचाद्यच् प्रत्ययः। मह-शब्दोऽयं गौरादिषु पठितस्तस्मात् स्त्रियां 'ङीष्' प्रत्ययः, तेन 'मही' पृथिवीपर्यायो वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्र मन्त्रलिङ्गञ्च–

यदा प्राणा अभ्यवर्षीत् वर्षेण पृथिवीं महीम्।
औषधयः प्रजायन्तेऽथो याः काश्च वीरुधः।। अथर्व ११।४।१७।।

प्रसंगतः–महच्छब्दश्च गौरादित्वान्ङीषं लभते–महती। गौराद्यन्तर्गते पिप्पल्यादिगणे पृथिवीशब्दोऽपि स्त्रियां ङीषं लभते। महीं पूजां धारयतीति 'महीधरः'।

मन्त्रलिङ्गञ्च–

वाजस्य नु प्रसवे महीमदितिं नाम वचसा करामहे ।
यस्या उपस्थ उर्वन्तरिक्षं सा नः शर्म त्रिवरूथं नियच्छात्।।

अथर्व ७।६।४।।

पृथिवी-पर्याये मन्त्रलिङ्गञ्च–

रातिं वामस्य सुभगां महीमिषं दधासि सानसिं रयिम्।

यजु० १२।११०।।

स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।

यजुः १३।४।।

महीशब्दो गीर्वाण्या पृथिव्याश्च वाचको वेदे बहुत्र गीतोऽस्ति।

प्रसङ्गतः–**'सूर्य आत्मा जगतस्तस्थुषश्च'** (यजुः ७।५२) यथैवायं सूर्यः सरणधर्मा चराचरस्यात्मा, सततं गतावास्थापयिता, तथैवायं जीवोऽपि पृथिव्यादिपंचभूतविकारात्मकस्य शरीरस्य यावज्जीवनं तावद् गतावास्थापयिता दृश्यते। समानं च भवति लोको वेदेन। यथैवायं जीवो देहाद् देहान्तरं गच्छति, तथैवायं सूर्योऽपि राशेः राश्यन्तरं क्रमते।

मन्त्रलिङ्गञ्च–

आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्।।

यजु० ३३।४३।।

प्रतिशरीरात्मा धारयतीति कृत्वाऽऽत्मापि 'महीधर' उक्तो भवति।

यथाऽनन्ता लोका भगवता निजव्यवस्थया व्यवस्थापिताः सन्ति, तथैवायं जीवोऽपि भगवद्व्यवस्थया व्यवस्थापितः सन् नानाविधा योनीर्धारयति। मनुष्योऽपि तासां योनीनां नामग्राहं ग्राहं नान्तं प्राप्तुमर्हति।

शरीराण्यपि महीमिव बहूनां कृमियोनीनामधिष्ठानानि भवन्ति। यथैव भूम्यां नद्यः प्रस्रवन्ति, तथैव शरीरे महाधमन्यो महासिराश्च स्व-स्वशाखाप्रशाखाभिः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सहिता वहन्ति। सर्वा योनयः स्थानकालभेदाद् वाणीं भिन्दन्ति। तां वाणीरूपामपि महीं भगवान् धारयति जानाति तासां स्वाभिमतं साधयति इति कृत्वा भगवान् समानेऽर्थे 'महीधरो' 'वाणीधरो' वा वक्तुमर्हो भवति। एवं लोके महीधरत्वं तस्य विष्णोः प्रपदं दृश्यते।

भवन्ति चात्रास्माकम्—

महोऽत्र पूजार्थविधानसिद्धोऽ-
यं प्राप्य गौरादिषु चैति ङीषम्।
द्यावापृथिव्योरुत वाचि भूमौ
नूनं प्रसिद्धो गवि चापि वेदे ॥४३४॥

तां योऽप्रमादं विविधार्थसिद्धां
महीं सदा धारयते स विष्णुः।
महीधरं तं कवयो विधिज्ञाः
पश्यन्ति नित्यं कमलासनस्थम् ॥४३५॥

महीधरो विष्णुरनन्तकर्मा
महीं सदा धारयते यथैव ।
तथैव देहो प्रकृतेर्विकारं
वहन् नितान्तं तमु वक्ति विष्णुम्॥४३६॥

देहाद्यथा देहमुपैति देही
तथैव भाद् भं समुपैति सूर्यः ।
सूर्यो यथाऽऽत्मा सकलस्य लोके
तथा शरीरे स उ सूर्य आत्मा ॥४३७॥

❖ ❖ ❖

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः।
अपां निधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥४८॥

३१८ अच्युतः, ३१९ प्रथितः, ३२० प्राणः, ३२१ प्राणदः, ३२२ वासवानुजः।
३२३ अपां निधिः:, ३२४ अधिष्ठानम्, ३२५ अप्रमत्तः ३२६ प्रतिष्ठितः॥४८॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अच्युतः—३१८

'च्युङ् गतौ' भौवादिकः, तस्मात् 'क्तः' प्रत्ययः गत्यर्थात् कर्तरि क्तः, **'गत्यर्थाकर्मक०'** (पा० ३।४।७२) प्रतिषेधार्थकेन नञा युक्तोऽ'च्युतः' इति।

सर्गारम्भे यत् यत् यथाविधव्यवस्थया व्यवस्थापितं, तत् तत् तथैवाद्यावध्यायाति, तथैव च कल्पान्तं यास्यतीति कृत्वाच्युतर्धर्मस्य भगवतो विष्णोः सर्वव्यापकगुणं व्याचष्टे।

लोकेऽपि च पश्यामः—यस्या यस्या योनेः प्रसवकाले यावान् कालः सर्गारम्भ आसीत्तावानेव कालोऽद्यापि लगति। अमुथैव स्थावरयोनिष्वपि पत्र-पुष्प-फलोद्गमो यथानियतकालमायाति कल्पान्तञ्च तथैव यास्यति। एतत् सर्वं विश्वं ससूर्यादिग्रहकं तमेवाच्युतं प्रतिपदं व्याख्याति। एवं विष्णोः सर्वं व्यश्नुवानमच्युतं गुणं कवयः प्रपदं पश्यन्ति।

मन्त्रलिङ्गञ्च—

ध्रुवोऽच्युतः प्रमृणीहि शत्रूञ्छत्रूयतोऽधरान् पादयस्व। अथर्व ६।८८।३।।

स पर्वतो न धरुणेष्वच्युतः सहस्रमूतिस्तविषीषु वावृधे।

ऋ० १।५२।२।।

इन्द्रः किल श्रुत्या अस्य वेद स हि जिष्णुः पथिकृत्सूर्याय ।
आन्मेनां कृण्वन्नच्युतो भुवद्गोः पतिर्दिवः सनजा अप्रतीतः।।

ऋ० १०।१११।३।।

यावती द्यावापृथिवी यावच्च सप्त सिन्धवो वितस्थिरे ।
तावन्तमिन्द्र ते ग्रहमूर्जा गृह्णाम्यक्षितं मयि गृह्णाम्यक्षितम्।।

यजुः ३८।२६।।

अक्षितम्=अच्युतम्।

भवति चात्रास्माकम्—

वशी वसिष्ठः स उ चात्मकल्पै-
गुणैर्निबध्नन् जगदावृणोति।
न तत्र किंचिच्च्यवते स्वधर्मात्
प्रकाशयच्चाच्युतमर्च्यमर्कैः[1] ।।४३८।।

---

१. अर्कैः=स्तोत्रैः। अर्किणः स्तोतार इति। तत्र मन्त्रलिङ्गञ्च—

'गायन्ति त्वा गायत्रिणो अर्चन्त्यर्कमर्किणः'। ऋक् १।१०।१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उदाहरण-कल्पन-प्रकारो यथा- मनुष्यस्य तत्रैव नेत्रे सपरिच्छदे संलग्ने स्तो यत्र कल्पादावृषीणामास्ताम्। एवमेवापरेष्वङ्गेषु व्यवस्था याति, तथैव च कल्पान्तं यास्यति, अपरासु च योनिष्वपि तथैवोहनीयं भवति।

प्रथितः—३१६

'प्रथ प्रख्याने' भौवादिकश्चौरादिकश्च। ***'गत्यर्थाकर्मक०'*** (पा० ३।४।७२) सूत्रेण 'क्तः'। प्रथते प्रख्यातो भवतीति 'प्रथितः। आसर्गात् सर्गान्तं विश्वं यथावदवस्थानेन धारयतीति कृत्वा प्रख्यातः सन् 'प्रथितः' इत्युक्तं भवति।

तद्यथा लोकेऽपि च पश्यामः'यथा प्लक्षन्यग्रोधोदुम्बरान् कृतवान्, तथैव तान् सर्गान्तं नेष्यतीति तस्य प्रख्यातिः। न हि केनापि प्लक्षन्यग्रोधोदुम्बरा अद्यावधिः कृताः, न चाग्रे कर्तुं शक्ष्यन्ते, इति कृत्वा स विष्णुः स्वकया व्यवस्थया 'प्रथितः' उच्यते।

मन्त्रलिङ्गञ्च—

यावती द्यावापृथिवी यावच्च सप्त सिन्धवो वितस्थिरे।
तावन्तमिन्द्र ते ग्रहमूर्जा गृह्णाम्यक्षितं मयि गृह्णाम्यक्षितम्।।

यजु० ३८।२६।।

महाँ इन्द्रः परश्च नु महित्वमस्तु वजिणे।
द्यौर्न प्रथिना शवः।। ऋ० १।८।५।।
वर्धमानो महाँ आ च पुष्करे दिवो मात्रया वरिम्णा प्रथस्व।

यजु० १३।२।।

भवतश्चात्रास्माकम्—

प्रख्यातवीर्यः स उ विश्ववन्द्यो
लोकेऽस्ति गीतः 'प्रथितः' स विष्णुः।
तं रोदसी, तं च समुद्रयुग्म[1]
व्यंजन्ति नित्यं प्रथितं पुराणम् ।।४३६।।

स नेति षड्भावविकारसंघं
चक्रं क्रमन्तं कुरुते स नित्यम् ।

---

१. पार्थिवमन्तरिक्षीयञ्च।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यथाविधं यच्च कृतं विधात्रा
तथाविधं कर्तुमिहास्ति नान्यः ।।४४०।।

समर्थ इति शेषः।

प्राणः—३२०

'प्र' पूर्वात् 'अनते' घञि अचि वा 'प्राण' शब्द उपपद्यते। तत्र स्वरो विभेदकः। सूत्रात्मना भगवान् प्राणरूपो विष्णुर्विश्वं जीवनाय समर्थयति।

यावद्भिः सूर्यभगणैरायुनक्ति प्राणिनं तावत्सु सूर्य-भगणेष्वतियातेषु प्राणी म्रियते। एष वै नियमः सर्वं व्यश्नुवानो दृश्यते सर्गारम्भात् सर्गान्तं च । अत एव च ज्योतिर्विद्भिरायुर्मीयते मनुष्यस्य। एवं 'प्राणः' एव भगवानुक्तो भवति।

मन्त्रलिङ्गञ्च—

प्राणाय नमो यस्य सर्वमिदं वशे ।
यो भूतः सर्वस्येश्वरो यस्मिंत्सर्वं प्रतिष्ठितम्'।। अथर्व ११।४।१।।
प्राणमाहुर्मातरिश्वानं वातो ह प्राण उच्यते।
प्राणे ह भूतं भव्यं च प्राणे सर्वं प्रतिष्ठितम्।। अथर्व ११।४।१५।।
रयिर्न चित्रा सूरो न संदृगायुर्न प्राणो नित्यो न सूनुः।
ऋ० १।६६।१।।

सर्वकमेतत् सूक्तं प्राणस्य व्याख्यानं, तत् सूरयः स्वयमनुशीलयन्तु। निदर्शनमात्रमुक्तमस्माभिः।

भवन्ति चात्रास्माकम्—

प्राणः स विष्णुः स उ वस्तुमात्रं
युनक्ति सूर्यस्य कलाभिरन्तः।
सूर्यो यथा विश्वमिदं दधाति
प्राणस्तथा विश्वमिदं दधाति ।।४४१।।

[1]कफोढकाभ्यामनुयन्ति केचिद्
यथा मनुष्याः पशवो वयश्च ।
त्वचा परे प्राणमुषन्ति लोके
मीनादयो वारिचरा यथा के ।।४४२।।

१. कफोढकौ=फुफ्फुसौ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्वक्फुफ्फुसाभ्यां बलमर्हयन्ति
केचिद् यथा दर्दुरकोऽत्र लोके ।
एवं त्रिधा प्राणिति सर्वजन्तुः
प्राणात्मके ब्रह्मणि वर्त्तमानः ।।४४३।।

प्राणदः—३२१

पूर्वं 'प्राणद' नामव्याख्याने प्रकृतिप्रत्ययाभ्यां व्युत्पादितचरं तत्र द्रष्टव्यम्। प्राणान् ददाति द्यति खण्डयति वा स 'प्राणदः'।

मन्त्रलिङ्गञ्च—

प्राणदा अपानदा व्यानदा वर्चोदा वरिवोदाः ।
अन्यांस्ते अस्मत्तपन्तु हेतयः पावको अस्मभ्यं शिवो भव।।
यजु० १७।१५।।

यः प्राणदः प्राणदवान् बभूव यस्मै लोकाः धृतवन्तः क्षरन्ति।
अथर्व ४।३५।५।।

प्राणो मृत्युरपि। तद्यथा—

प्राणो मृत्युः तक्मा प्राणं देवा उपासते।
प्राणो ह सत्यवादिनमुत्तमे लोक आदधत्।। अथर्व ११।४।११।।

एतेन प्राणद-नाम्ना विज्ञायते यत् सर्वं प्राणाख्येन भगवता प्राणदेन जीवनमरणात्मकेन गुणेन व्याप्तमस्ति। अतः 'प्राणदो' मृत्युरिति विष्णोर्नाम प्रपदं सर्वं लोकं व्यश्नुवानमास्ते।

भवति चात्रास्माकम्—

स प्राणदो भूतविकारयुक्तान्
प्राणेन जीवान्, किमु लोकमात्रम् ।
चिराय वस्तुं[1] कुरुते, पृथक् च
मृत्युश्च प्राणान् द्यति सर्वकस्य।।४४४।।

वासवानुजः—३२२

निवासार्थक आच्छादनार्थको वा भौवादिक आदादिकश्च वसधातुस्ततः

१. वस्तुम्=वसनाय।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'कृवापाजिमिस्वदिसाध्यशूभ्य उण्' (उणादि १।१) सूत्रेण बाहुलका'दुण्' प्रत्ययः। वसति सर्वत्र वस्ते वा सर्वमिति 'वासु'रीश्वरः। वासोरिदं 'वासवं' सर्वं जगत्। वासवं जगदनुजातो=अनुप्रविष्टो 'वासवानुजः'। अजातोऽपि जगदनुप्रविष्टत्वाज्जात इव प्रतीयमान इत्यर्थः।

भगवतोऽभीद्धतपसो ब्रह्मण ऋतसत्यरूपं द्वन्द्वमजायत। अत एव सर्वमिदं जगदृतसत्यरूपद्वन्द्वरूपम्। इह हि सर्वं युग्मरूपमुपलभ्यते। तथा हि-स्त्रीपुरुषौ, नक्तन्दिनं, दक्षिणोत्तरायणे, सव्यापसव्ये, नेत्रे, जंघे, नासिके तथा हस्तौ, पादौ, बाहू च। द्वे दंतपंक्ती, द्वे जिह्वोपजिह्वे, द्वौ (कफोढौ=फुप्फुसौ), हृदयमपि-उभयपार्श्वस्थितेभ्यश्चतुर्भ्यः प्रकोष्ठेभ्यश्चतुर्धाविभक्तं युग्मकद्वयरूपम्।

तथा हि-हृदये चत्वारः प्रकोष्ठाः द्वौ वामभागे, द्वौ च दक्षिणभागे। तेषाञ्चोभयपार्श्वयोरौत्तराधर्येण स्थितानां क्रमशो दक्षिणालिन्दः १, दक्षिणनिलयः २, वामालिन्दः ३, वामनिलयः ४, इत्येतानि। तेषाञ्चैकः प्रकोष्ठोऽशुद्धं रक्तमाकर्षत्यपरस्तद्रक्तं फुप्फुसयोः प्रक्षिपति। तृतीयः फुप्फुसाभ्यां प्रत्याकर्षति, चतुर्थश्च तद् रक्तं महाधमन्या सर्वस्मिञ्छरीरे व्यापयति।

यकृत्प्लीहानौ द्वौ, ग्रहण्यामाशयौ द्वौ। दोषदुष्टो ह्यामाशयो ज्वरं जनयति, क्षुधाञ्च नाशयति। ग्रहण्यां स्थितो दोषो वायुना रसरक्तमांसमेदोऽस्थिमज्जाशुक्रेषु यदा प्रक्षिप्यते, तदा तत्तद्धातुजलक्षणा विकाराः प्रादुर्भवन्ति। धातवश्चानुलोम्य-प्रातिलोम्याभ्यामन्यत्र धातुषु प्रक्षिप्ता विविधान् विकारान् जनयन्ति। विस्तरश्चरकाद्यार्षसंहितासु द्रष्टव्यः।

मनोविकाराणां जन्मभूमिश्च ग्रहणी। दुष्टा ग्रहणी मनो विकरोति। मनश्च विकृतं प्रवृद्धैश्चिन्ताशोकभयक्रोधकाममलोभमोहादिभिर्ग्रहणीं विकरोति। ततो विक्षिप्तचित्तो हसति, शोचति रोदिति, हसति, करोति चातिमानुषाणि कर्माणि।

लघुष्वन्त्रेषु सामदोषमलसञ्चयो विषमज्वराणां मूलम्। आक्षेपकम्पार्द्धाङ्ग-वातप्रभृतीनां विकाराणामधिष्ठानं सामदोषमलैर्योगो बृहदन्त्राणाम्।

शरीरोत्तमाङ्गे नासिका, शरीराधोभागे च शिश्नमिति। शिश्नसम्बन्धिनो विकाराः प्रमेहसंज्ञिनो भवन्ति। नासिकासम्बन्धिनश्च प्रतिश्यायपीनस-नासाक्षयादिसंज्ञिनः। अत एव प्रवृद्ध उपदंशे नासाक्षयः।

मुखमन्नग्रसनद्वारम्, मलविसर्जनद्वारञ्च पायुः। शिश्नप्रसारो बाह्यो भवति, योनिश्चान्तर्गह्वरा भवति। दृढधातुप्रधानो हि पुरुषः, कोमलधातुप्रधाना च स्त्री। पुरुषहृदयापेक्षया स्त्रीहृदयमल्पभारं भवति, अत एव स्त्रीहृदयं न चिराय रहस्यं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रक्षितुं प्रभवति। यथा प्रत्यर्तु स्त्रीणामार्तवं न तथा पुरुषस्य, शुक्रस्य सर्वकालं शुद्धत्वात्।

स्त्री क्षेत्रं, पुरुषो वीर्यरूपस्य बीजस्य वप्ता। पुरुष एकोऽपि बह्वीषु स्त्रीषु बीजमाधातुं प्रभवति। न तथा स्त्री प्रसवान्तं बहूनां बीजानां धात्री=धारयित्री भवति, पुरुषो हि लोकसम्मित इति हेतोः। गर्भाशयगतं बीजं वायुर्यावद्धा भिनत्ति तावानेव प्रसवभेदो भवति, युग्मकस्ततोऽधिको वा। अनेकप्रसवे चायमपि नियमः-यदा यस्य जन्मनि सूर्यराशेर्वर्गे शनिर्भवति, तदा भवति युगलप्रसूतिः। यदि च नवांशेऽपि शनिः सूर्यवर्गराशिमधितिष्ठति, तदा युगलादधिकानामपि प्रसवः।

रूपाणामधिष्ठानं स्त्री, तस्यां रूपाणामाधापयिता च पुरुषः। यथा सूर्यश्चन्द्रमसं सुषुम्णाख्येन रश्मिना विद्योतयति, तथा सर्गादारम्भादद्यपर्यन्तं पुरुषः स्वां प्रेयसीं विविधालङ्कारैर्विभूष्य विद्योतयति। इत्येतदृतसत्यद्वन्द्वरूपं जगत् प्रतिपदं भगवन्तं वायवानुजं व्याचष्टे।

य एवं वेद स तत्त्वतो विष्णुं वेद। इदं सर्वं भगवतो विष्णोर्लीलामात्रमिति जानन्ना न ग्लायति, न हृष्यति, न रोदिति, न हसति, न रमते, न विरमति, न युध्यते, न सन्दधाति। न परुषं वक्ति, न मृदुवचनैः सन्तोषयति। एवं विविधमूहनीयं भवति। इति दिङ्मात्रमुक्तम्।

मन्त्रलिंगं च—

या त इन्द्र तनूरप्सु या पृथिव्यां यान्तरग्नौ या त इन्द्र पवमाने स्वर्विदि। ययेन्द्र तन्वान्तरिक्षं व्यापिथ तया न इन्द्र तन्वा शर्म यच्छ तवेद्विष्णो र्बहुधा वीर्याणि। अथर्व १७।१।१३।।

भवतश्चात्रास्माकम्—

वासुर्हि विष्णुः स उ चान्तरङ्गः
स्वाभीद्धतापस्य विकारभूते ।
ऋतञ्च सत्यञ्च पृथग् जनित्वा
ताभ्यां प्रपञ्चं कुरुते समस्तम् ।।४४५।।

एवं हि यो वेत्ति स वेत्ति विश्वं
विष्णुं स वा पश्यति सर्वयातम् ।
तं [१]वासवानूजमनन्तशक्तिं
तातन्यमानं कवयः स्तुवन्ति ।।४४६।।

१. अनूजशब्दे दीर्घश्छन्दोऽनुरोधात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अपांनिधिः—३२३

'अप' शब्दो व्याप्त्यर्थकाद् 'आप्लृ'धातोः— ***'आप्नोतेर्ह्रस्वश्च'*** (उणादि २।६१) इत्युणादिसूत्रेण क्विपि धातोर्ह्रस्वत्वे च सिध्यति, नित्यं स्त्रियां बहुवचनान्तः। आप्यन्ते जीवनाये'त्यापो' जलानि। 'निधि'शब्दश्च 'निपूर्वाद्दधाते' रधिकरणे 'कि' प्रत्यये निधीयतेऽस्मिन्निति 'निधिः' सिध्यति।

एवञ्चापां जीवनसाधनानां भौमानामान्तरिक्षाणाञ्चाम्भसां निधिः=स्थानं भगवान् विष्णुः 'अपान्निधि'-शब्देनोच्यते।

मन्त्रलिङ्गञ्चात्र—

यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम।।

ऋक् १०।१२१।४।।

आपो ह यद् बृहती विश्वमायन् गर्भं दधाना जनयन्तीरग्निम्।
ततो देवानां समवर्तासुरेकः कस्मै देवाय हविषा विधेम ।।

ऋग् १०।१२१।७।।

इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत् पर्वतानाम्।

ऋक् १०।८६।१०।।

भवति चात्रास्माकम्—

अपां निधिर्विष्णुरशेषबन्धु-
र्द्वैधं स पाथांसि ससर्ज चैकः ।
स पार्थिवानां निधिरम्भसां वा
स खेशयानाञ्च निधिर्जलानाम्।।४४७।।

अधिष्ठानम्—३२४

'ष्ठा गतिनिवृत्तौ' भौवादिकः, तस्मा'दधिपूर्वाद' धिकरणार्थे ***'करणाधिकरणयोश्च'*** (पा० ३।३।११७) सूत्रेण 'ल्युट्' प्रत्ययः। ***'युवोरनाकौ'*** (पा० ७।१।१) सूत्रेणानादेशे, ***'आदेशप्रत्यययोः'*** (पा० ८।३।५६) इत्यनेन षत्वे कृते, ***'ष्टुना ष्टुः'*** (पा ८।४।४१) सूत्रेण टवर्गादेशे कृते 'अधिष्ठानम्'।

यस्मिंश्चराचरं तिष्ठति तद् 'अधिकरणम्' तमक्षरमधिकरणीकृत्य सर्वं तिष्ठतीति 'अधिष्ठानं' ब्रह्म। तस्य च ब्रह्मणोऽधिष्ठानात्मको गुणः सर्वं व्यश्नुवानो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दृश्यते। तद्यथा लोकेऽपि च पश्यामः-गर्भो मातरमधितिष्ठति, गर्भे च तस्य गर्भस्य स्वानि शरीराङ्गानि तं गर्भस्थदेहमधिकरणीकृत्य तिष्ठन्ति। तत्रस्थं हृदयमधिकृत्य शुभाशुभभावोदया अधितिष्ठन्ति। शुभाशुभभावोदयमधिकरणीकृत्य जातकस्य सर्वा मरणान्ताः क्रिया अधितिष्ठन्ति। एवं कृत्वा सर्वत्राधिष्ठानपरम्परा दृश्यमाना तम् 'अधिष्ठान'-नामानं व्यापकधर्मेण व्यश्नुवानं विष्णुमेव व्याचष्टे।

मन्त्रलिङ्गञ्च—

किं स्विदासीदधिष्ठानमारम्भणं कतमत्स्वित्कथासीत्।
यतो भूमिं जनयन्विश्वकर्मा विद्यामौर्णोन्महिना विश्वचक्षाः।।
ऋक् १० ।८१ ।२ ।।

यत्रेमा विश्वा भुवनानि तस्थुः। ऋक् १ ।१६४ ।२ ।।

यस्मिन् विश्वानि भुवनानि तस्थुः। यजुः १७ ।३० ।।

प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते।
तस्य योनिं परिपश्यन्ति धीरास्तस्मिन् ह तस्थुर्भुवनानि विश्वा।।
यजुः ३१ ।१६ ।।

मनीषिणो मनसा पृच्छतेदु तद्यदध्यतिष्ठत् भुवनानि धायन्।
ऋक् १० ।८१ ।४ ।।

बृहन्नेषामधिष्ठाता अन्तिका दिव पश्यति। अथर्व ४ ।१६ ।१ ।।

इति दिङ्मात्रं निदर्शितम्।

भवति चात्रास्माकम्—

स एव विष्णुः प्रपदं समग्रं
स्वस्मिन्नधिष्ठापयते ह विश्वम्।
तस्मादधिष्ठानमिति गृणन्तो
गायन्ति देवास्तमचिन्त्यशक्तिम्।।४४८।।

अप्रमत्तः—३२५

'अप्रमत्तः' प्रमादरहितः। 'प्र' 'मदी हर्षे' धातोः 'क्त' प्रत्यये 'प्रमत्तः'। स प्रतिषेधार्थकेन नञा युक्तो'ऽप्रमत्तः'। भगवान् स्वकव्यवस्थात्मकर्मणो न प्रमाद्यति, तस्माद् 'अप्रमत्तः' स विष्णुरुक्तो भवति।

लोकेऽपि च पश्यामः—स्वस्थस्य प्राणिनः समनस्केन्द्रियाणि स्वानि कर्माणि कुर्वन्ति न प्रमाद्यन्ति, न वोपरमन्ते । तथैव च श्वासप्रश्वासौ न प्रमाद्यतः। हृदयं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

च वा यावज्जीवं न प्रमाद्यति। अमुथैव सूर्यादयो ग्रहोपग्रहा भ्रमन्तो न प्रमाद्यन्ति, यतो हि तेषां ग्रहोपग्रहाणां व्यवस्थापनं भगवता ऽप्रमत्तेन विष्णुना कृतमास्ते। एवं लोकं दृष्ट्वा विविधमूहानामूहनीयं भवति।

मन्त्रलिङ्गञ्च—

महांस्त्वेन्द्रो रक्षत्यप्रमादम्। अथर्व १२।१।१८।।

भवतश्चात्रास्माकम्—

स विश्वबन्धुर्न पुरा न पश्चात्
प्रमादमैच्छत् न करिष्यते वा।
तथा यथा भानुरचिन्त्यवीर्यः
प्रमादमन्वेति न दृश्यमानः ।।४४६।।

तं चाप्रमत्तं प्रपदं ह विष्णुं
विश्वेऽथ देहेऽथ नियुक्तमात्रम् ।
सन्नद्धकर्मानुरतं ह विश्वं
दृष्ट्वा प्रसीदन्ति नमन्ति तं वा।।४५०।।

प्रतिष्ठितः—३२६

'ष्ठा गतिनिवृत्तौ' भौवादिकः, तस्मात् 'क्तः'। तस्मिन् परे ***'द्यतिस्यतिमास्थामित्ति किति'*** (पा० ७।४।४०) इत्यनेनेकारादेशः। 'प्रति' उपसर्गः, तस्मादुत्तरस्य तिष्ठतेः षकारादेशः, ***'उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्*** (पा० ८।३।६५) इत्यनेन सूत्रेण। यद्वा—सर्वं प्रत्यादरभावेन स्थितिः प्रतिष्ठा, सा सञ्जातास्येति तारकादेराकृतिगणत्वादितच्प्रत्यये 'प्रतिष्ठितः' शब्दः सिध्यति।

यो हि यं प्रति आदरभावेन स्थितो भवति, स हि तं प्रति स्थितः सन् 'प्रतिष्ठितः' उक्तो भवति। तद्यथा सभां प्रति आदरभावेन स्थितः पुरुषः सभापतित्वे प्रतिष्ठाप्यते। स हि तावन्तं कालं सभायां विष्णुरिव प्रकाशते, सभां व्यवस्थापयति वा। सभाया गुणदोषौ च तं प्रतिष्ठितं पुरुषं लिम्पतः। विसृष्टायां सभायां तस्य पुरुषस्य तेजस्विता न कार्योपयोगिनी भवति न च मान्या भवति।

एवं शरीरेऽपि शारीरकर्मणि शरीरं यावज्जीवं प्रवर्तयितुं जीवो देहे प्रतिष्ठितो भवति। यस्मात् स जीवः प्रतिष्ठितो भवति तस्मात् स जीवो देहं परित्यजति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मृत्युना चोदितः सन्।

एवं हि भगवान् चराचरविश्वस्य सर्जनं प्रति विश्वस्य नियमनं प्रति वा स्थितः प्रतिष्ठितः' उक्तो भवति। अत एव च सर्वत्र सदा वा स विष्णुः स्वकेन प्रतिष्ठित-गुणेनात्मानं व्यञ्जन् सन् प्रतिष्ठित उक्तो भवति। एवं विविधमुदाहरणानामूहनीयं भवति।

मन्त्रलिङ्गञ्च—

असति सत् प्रतिष्ठितं सति भूतं प्रतिष्ठितम्।
भूते ह भव्य आहितं भव्यं भूते प्रतिष्ठितं तवेद्विष्णो बहुधा वीर्याणि।
त्वं नः पृणीहि पशुभिर्विश्वरूपैः सुधायां मा धेहि परमे व्योमन् ।।

अथर्व १७।१।१६।।

भवन्ति चात्रास्माकम्—

सनातनो विष्णुरिदं[1] सिसृक्षुः
प्रतिष्ठितः पश्यति विश्वमात्रम् ।
यावन्तमन्वेति सभा स्वकालं
तावत्सभेशोऽपि[2] प्रतिष्ठितः स्यात्।।४५१।।

प्रवाहतोऽनादिमदस्ति विश्वं
विश्वव्यवस्थाकृतबन्धहेतोः ।
प्रतिष्ठितो विष्णुरिहास्ति गीतो
दिग्देशकालानतिवर्त्तमानः ।।४५२।।

तं सर्ववन्द्यं प्रपदं ह विष्णुं
पश्यन्ति सर्वत्र ततं जगत्याम् ।
तथा यथात्मा स्वरथे[3] स्थितः सन्
शक्त्या स्वया स्थापयते ह कायम्।।४५३।।

❖ ❖ ❖

१. इदं=जगदित्यर्थः। २. प्रे हे वेति छान्दसनियमेन लघुत्वमिह ज्ञेयम्। ३. रथे=शरीरे।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्कन्दः, स्कन्दधरो धुर्यो वरदो वायुवाहनः।
वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः ।।४६।।

३२७ स्कन्दः, ३२८ स्कन्दधरः, ३२६ धुर्यः, ३३० वरदः, ३३१ वायुवाहनः।
३३२ वासुदेवः, ३३३ बृहद्भानुः, ३३४ आदिदेवः, ३३५ पुरन्दरः।।४६।।

स्कन्दः—३२७ स्कन्दधरः—३२८

'स्कन्दिर् गतिशोषणयोः' भौवादिकः, तस्मात् सामान्येन 'अच्' प्रत्ययः पचादिलक्षणः ***'सर्वधातुभ्योऽच्'*** सामान्येन नियमेन वाच् प्रत्ययः। यः स्कन्दति गच्छति शुष्यति च स 'स्कन्दः'। अथवा-यो गमयति शोषयति च स 'स्कन्दः'। ण्यन्ताद् वा 'अच्' प्रत्ययं कृत्वा 'स्कन्दः' इति रूपं साधुत्वाय कल्पते।

लोके चापि पश्यामः-गतिर्हि वायौ दृश्यते, जले च सरणता दृश्यते, समुद्रे जलानां विविधरूपगुणधर्मवतां वीचीनां नियोगात् सततं गतिमत्ता दृश्यते। तत्रैव च समुद्रे महाकायवतां मीनादीनां पिण्डशरीरवतां गमनं दृश्यते। तत्रैव च समुद्रे महाकायवतां पाषाण-गुणवतां शुष्कानां पर्वतानामुद्गमोऽपि दृश्यते।

तथैव लोकसाम्यमुपगतेऽस्मिन् प्राणि-शरीरेऽपि रसादिषु सप्तधातुषु सत्सु तत्रास्थि-धातुं शुष्कं पाषाणमिव दृढं कुरुते। सौषिर्येण च योजयति, तत्र वायुःप्रकोपं माऽऽपद्येतेति कृत्वा तस्मिन्नस्थ्नि मज्जानं निवेशयति। अमुथैव वानस्पत्ये जगत्यपि ज्ञातव्यं भवति। तस्य भगवता एषा व्यवस्था नित्यं विश्वं व्यश्नुवाना दृश्यते।

एवं भगवान् विष्णुः स्वकेन व्यापकगुणेन विश्वं विभ्राणः स्कन्दः सन् सकलं स्वात्मनि धारयतीति कृत्वा स 'स्कन्दधर' श्चाप्युक्तो भवति।

मन्त्रलिङ्गञ्च—

अधि स्कन्दवीरयस्व।' अथर्व ५।२५।८।।

येन द्यौरुग्रा पृथिवी च दृढा येन स्वः स्तभितं येन नाकः।

यजु० ३२।६।।

द्रप्सश्चस्कन्द प्रथमाँ अनु धूनिमं च योनिमनुयश्च पूर्वः।

ऋक् १०।१७।११।

तदेजति तन्नैजति तद् दूरे तद्वन्तिके। यजु० ४०।५।।

अत्र दृढेति पदं पृथिव्या विशेषणम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'नारायणः' इति नामव्याख्यायां च विशेषं द्रष्टव्यम्। सलिलात् पृथिव्या उद्गम इति।

अत्र व्याख्याने-स्कन्दः, स्कन्दधरश्चापि व्याख्यातं भवति।

स्कन्द-नामाधिकृत्यास्माकम्—

स्कन्दः स विष्णुः प्रतिजन्तुनिष्ठः
शुष्कद्रवाभ्यां कुरुते शरीरम् ।
तं सर्वदृश्यं मुनयः पुराणं
गायन्ति नित्यं भुवने त्रिनेत्रम् ।।४५४।।

स्कन्दधरमधिकृत्यास्माकं भवतः—

स्कन्द-व्यवस्थाकृतविश्वरूपं
यश्चाप्रमत्तो धरते स विष्णुः ।
लोके नराः स्कन्दधरं पुराणं
गायन्ति पश्यन्ति च तं गुहास्थम्[१] ।।४५५।।

यस्तत्त्वतः शोष-गती विदित्वा
यन्त्राणि कर्तुं यततेऽप्रमत्तः ।
शिल्पी स विश्वं विविधोपकारै-
र्युञ्जन् स्वयं याति च शर्म दिव्यम्।।४५६।।

धुर्यः—३२६

'धूः' इति प्रत्येकं वस्तुनो मुखस्याग्रभागस्य वा नाम। तां धुरं वहति प्राप्नोति वा स 'धुर्यः'। एकत्र धुर् शब्दाद् ***'धुरो यड्ढकौ'*** (पा० ४।४।७७) इत्यनेन सूत्रेण 'यत्' प्रत्ययोऽन्यत्र च 'धू'रुपकर्मोपपदाद् 'या प्रापणे' धातोः ***'आतोऽनुपसर्गे कः'*** (पा० ३।२।३) इति सूत्रेण 'कः' प्रत्ययः आल्लोपः। ***'हलि च'*** (पा० ८।२।७७) सूत्रेण प्राप्तो दीर्घश्च ***'न भकुर्च्छुराम्'*** (पा० ८।२।७९) इति सूत्रेण निषिध्यते। 'धुर्यः' इति विष्णोर्नाम, यतो हि स एव सर्वस्याग्रभागं याति=प्राप्नोतीत्यर्थः।

न हि कश्चिन्निरवलम्बं यातुं प्रभवति किमन्यत् वातादयोऽपि सावलम्बं वान्ति। यश्च कश्चिन्निरवलम्बं गन्तुं यतते, सोऽवश्यं पततीति प्रत्यक्षं दृश्यते।

१. गुहास्थम्=हृदयस्थितम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अवलम्बश्च सर्वस्यान्तर्यामित्वात् सर्वव्यापकः सर्वेषां पुरोगो भगवान् विष्णुरेवेति, सोऽतो 'धुर्यः' उच्यते।

यद्वा—'धुर्यः' इति श्रेष्ठस्य मुख्यस्य वा नाम। मुखेति चाग्रस्य नाम, मुखे भवो मुख्यः पुरोगामी=मार्गनिर्देष्टा। यथा च लोके विदुषां मार्गनिर्देष्टा विद्वद्धुर्यः, शिल्पिनां मार्गनिर्देष्टा शिल्पिधुर्य इत्युच्यते, तथा सर्वेषां मार्गनिर्देष्टृत्वाद् भगवान् सर्वशेषेण निर्विशेषणेन 'धुर्य' शब्देनोच्यते।

मन्त्रलिङ्गं च—

प्र यदेते प्रतरं पूर्व्यं गुः सदः सदं आतिष्ठन्ता अजुयम्।
कविः शुषस्य मातरा रिहाणे जाम्यै धुर्यं पतिमेरयेताम् ॥

अथर्व ५।१।४॥

इह त्वष्टारमग्रियं विश्वरूपमुपह्वये। अस्माकमस्तु केवलः।

ऋ० १।१३।१०॥

भवति चात्रास्माकम्—

सर्वाग्रगामी भगवान् स विष्णुः
सङ्कीर्त्यते धुर्यपदेन विज्ञैः ।
निर्दिश्य मार्गं सकलस्य नेता
स सर्वमुख्यः सकलान्तरात्मा॥४५७॥

धूरिति भारस्यापि नाम तद् वोढृत्वेन वृषभोऽपि 'धुर्य' उच्यते।

वरदः—३३०

व्रियते=प्रार्थ्यत इति 'वरो' ऽभीप्सितोऽर्थस्तं ददातीति 'वरदो'=अभीप्सितार्थदः। सर्व एव शुभमाप्तुमिच्छति नाशुभमत आयातं वरेति शुभस्य कल्याणस्य वा नाम। 'वृञ् वरण' इति धातोः ***'ग्रहवृदृनिश्चिगमश्च'*** (पा० ३।३।५८) इति सूत्रेण कर्मणि 'घञि' 'वर' शब्दः सिध्यति। 'वर' शब्दोपपदाद् 'दा' धातोः ***'आतोऽनुपसर्गे कः'*** (पा० ३।२।३) इति 'कः' प्रत्ययः, आल्लोपः।

वरदत्वादेव च स वरेण्यो=वरितुं योग्यः। तत्र मन्त्रः—'**तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि**' (यजुः ३०।२)। तुष्टो हि वरं ददाति, तुष्यति च भगवान् प्रार्थनाभिरत एव स वराकाङ्क्षिभिः प्रार्थ्यते। तथा च मन्त्रलिङ्गानि—

''यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्।''

ऋक् १०।१२१।१०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तेजोऽसि तेजो मयि धेहि। यजु० १९।९।।

भूरिदा भूरि देहि नो मा दभ्रं भूर्या भर। भूरि घेदिन्द्र दित्सति।

ऋग् ४।३२।२०।।

आग्निर्नो वनते रयिम्। यजु० १७।१६।।

मा न आयुः प्रमोषीः। यजु० १८।४६।।

भवति चात्रास्माकम्—

विष्णुर्वरेण्यो वरदस्तथास्ति
यथा वरेप्सुर्वृणुते वदान्यम् ।
विपश्चितस्तं बहुधा स्तुवन्ति
वर्च्चः प्रजाः सम्पदमाप्तुकामाः।।४५८।।

वायुवाहनः—३३१

'वायु' शब्दो वा गतिगन्धनयोरिति धातोः ***'कृवापाजिमिस्वदिसाध्यशूभ्य उण्'*** (उणादि० १।१) इत्युणादिसूत्रेण 'उणि' प्रत्यये सिध्यति। 'वाहन' शब्दश्च 'वह प्रापणे' धातोर्ण्यन्ताल्'ल्युटि सिध्यति। यद्वा— ण्यन्ताद् 'वाहि' धातोर्बाहुलकात् कर्तरि 'ल्युटि' वाहनशब्दः सिध्यति। एवञ्च वायुर्वाह्यते प्रवर्त्यतेऽनेनेति, वायुं वा वाहयति सञ्चारयति सर्वत्रेति 'वायुवाहनो' भगवान् विष्णुः।

इत्थञ्चास्य नाम्न उपपत्तिः- वायुर्हि भगवतो विष्णोः प्रवर्तिकारूपां शक्तिमधिगम्य प्राणादिभेदमापन्नः सर्वं प्रवर्तयति। तथा हि - प्रलयकाले स्वान्तर्निस्तब्धशयानस्य स्वादृष्टवशाच्छुभाशुभकर्मफलभोगप्राप्तसमयस्य जीववर्गस्य फलभोगे सञ्जननाय स वायोः सञ्चारायाकाशरूपमवकाशं सृष्ट्वा वायुं सृजति। तेन च प्राणादिबहुभेदमाप्तेन वायुना वाहयति=सञ्चारयति सर्वमिदं दृश्यवर्गमतः स 'वायुवाहन' इत्युच्यते।

लोके चापि पश्यामः- सर्वोऽपि यन्त्रगणो वायुना वाह्यते=प्रवर्त्यते। वायुः स्वयं गतिमापद्य सर्वं गतिमद् विधत्ते इत्यर्थः। सूर्योऽपि विष्णुरूपो 'वायुवाहन'-शब्दाभिधानीयः-यतो हि सोऽपि क्वचित् प्रभञ्जनाख्यं महावातं वृष्टिमिश्रं झञ्झावातं वा, क्वचिच्च मन्दं मन्दं गन्धवहं प्रवाह्य सङ्क्लेशयति सुखयति वा जीवान् तत्तच्छुभाशुभकर्मानुसारम्। नियामिका च तत्र काचित् सर्वान्तर्यामिनी शक्तिः, त्रिविधं हि कर्म जीवस्य शुभमशुभं, शुभाशुभमिश्रञ्च।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स एव च सूर्यः सर्वात्मभूतो जीवात्माभिधानीयः स चापि 'वायुवाहनो', यतो हि स जीवात्मापि स्वस्थं वायुं यथेच्छं प्रवर्त्य कदाचिन्मन्थरं चलति, कदाचिच्च वेगितं धावति। यथा अश्वो बहु धावति न च श्राम्यति, न तथा मनुष्यः। सिंहादयो हिंस्रा जीवा उत्कटं कूर्दन्ते। मनुष्योऽपि यथाशक्ति कूर्दते। तत्र नियामिका भगवच्छक्तिर्जीवादृष्टं वा।

मन्त्रलिङ्गञ्च—

तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति।

यजु० ४०।४।।

कस्मादङ्गाद्दीप्यते अग्निरस्य कस्मादङ्गात् पवते मातरिश्वा।

अथर्व० १०।७।२।।

क्व प्रेप्सन् ऊर्ध्वो अग्निः क्व प्रेप्सन् पवते मातरिश्वा।

अथर्व १०।७।४।।

यत्राग्निश्चन्द्रमा' सूर्यो वातस्तिष्ठन्त्यार्पिताः।
स्कम्भं तं ब्रूहि कतमः स्विदेव सः।। अथर्व १०।७।१२।।

यस्माद् वाता ऋतुधा पवन्ते यस्मात् समुद्रा अधि विक्षरन्ति।

अथर्व १३।३।२।।

कुर्मस्त आयुरजरं यदग्ने यथा युक्तो जातवेदो न रिष्याः।
अथा वहासि सुमनस्यमानो भागं देवेभ्यो हविषः सुजात ।।

ऋग् १०।५१।७।।

भवन्ति चात्रास्माकम्—

वायुवाहननामायं, लोकानां सुखदुःखदः।
प्रवर्त्य बहुधा वातं, लोककर्मानुसारतः ।।४५९।।

क्वचिन्महावातमथापि मन्दं
वायुं प्रवर्त्यातयते त्रिलोकीम् ।
स [1]सातसक्लेशयुगं दधानो
जीवेषु जीवात्मकृतानुसारम् ।।४६०।।

१. सातम्=सुखम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स एव सूर्यो जगदात्मरूपः
स एव जीवः प्रतिवर्ष्मनिष्ठः।
स एव प्राणादिभिदा प्रभिन्नः
प्रवर्तको जीवगणस्य विष्णुः।।४६१।।

वासुदेवः—३३२

'वासु शब्दो 'वस निवासे' 'वस आच्छादने' इति वा ण्यन्ताद्धातोर्बाहुलकादौणादिके 'उणि' प्रत्यये सिध्यति। वसति सर्वत्र, वासयति=आच्छादयति वा सर्वमात्मनेति 'वासुः'। दीव्यति, क्रीडति विजिगीषते व्यवहरति द्योतते मोदते स्तूयते वा सर्वैः स्वलीलाक्षेत्रे जगतीति 'देवः'। वासुश्चासौ देवो 'वासुदेवो' भगवान् विष्णुः।

सर्वत्र प्रसृतैः सूर्यांशुभिरिवेदं सर्वं जगदध्युष्य सर्वमात्मनाच्छादयतीति 'वासु'रुच्यते। स एव च वासुः स्वलीलाक्षेत्रेऽस्मिञ्जगति स्वतोऽन्यान् विजिगीषून् विजिगीषुस्तथा व्यवहरति यथा स तान् दृढं नियम्य द्योतमानः स्तूयमानश्च मोदतेऽतः स 'देवः' उच्यते। सर्वमिदं जगद् वासेनाच्छादनेन, नियमरूपेण व्यवहारेण, मोदेन द्योतनेन वा व्याप्नोतीति सङ्गतार्थनामा 'वासुदेवः' इति।

लोकेऽपि पश्यामो—नास्ति कश्चिदेवंविधो यो न वीप्सेत् सर्वं, न विजिगीषेत स्वविजिगीषुं, न व्यवजिहीर्षेत सर्वं स्वायत्तीकर्तुं, न विवसिषेत सर्वं, न विवत्सेत् सर्वत्र, न दुद्योतिषेत सर्वदा, तथा न मुमुदिषेत स्तूयमानश्चेति।

मन्त्रलिङ्गञ्च—

ईशा वास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्। यजु० ४०।१।।

विश्वावसुरभि तन्नो गृणातु दिव्यो गन्धर्वो रजसो विमानः।

ऋक् १०।१३६।५।।

इमामेषां पृथिवीं वस्त एकोऽन्तरिक्षं पर्येको बभूव। अथर्व १०।८।३६।।

भवति चात्रास्माकम्—

सर्वं वसानो निवसन्नशेषे
नियम्य सर्वं विजिगीषया च।
विद्योतमानः स्तुतिमोदमानः
स वासुदेवेति बुधैः प्रदिष्टः।।४६२।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बृहद्भानुः—३३३

'बृहच्छब्दो' वृद्ध्यर्थकाद् 'बृह धातोः' ***'वर्तमाने पृषन्महद्बृहज्जगच्छतृवच्च'*** (उणादि० २।८५) इत्युणादिसूत्रेण 'अति' प्रययान्तो निपात्यते। गुणाभावोऽपि निपातनादेव। 'भानु शब्दश्च 'भा दीप्तौ' इति धातोः ***'दाभाभ्यां नुः'*** (उणादि० ३।३२) इत्युणादिसूत्रेण 'नु' प्रत्यये सिध्यति। एवञ्च बृहन्तो=भूयांसो वृद्धाः=दीर्घा वा भानवो=दीप्राः किरणा यस्य स 'बृहद्भानुर्विष्णुः।

इत्थमस्य नाम्न उपपत्तिः—ये हि प्रत्यक्षं दृश्यमाना ज्योतिष्मन्तः सूर्यादयो ग्रहाः सनक्षत्राः तेषु सर्वव्यापकस्य ज्योतिःस्वरूपस्य भगवत एव दीप्रा भानवो भान्ति। न केवलं सूर्यादिष्वेव तस्य भाः, अपितु प्रत्येकं वस्तु यत् स्वरूपेण प्रकाशते, तत्र सर्वत्र तस्यैव प्रकाशः। परमा च तस्य भा वाग्रूपा या सर्वं चराचरं व्याप्य स्थिता। वाग्घि परमं ज्योतिर्यतो हि प्रत्यक्षादि सर्वं प्रमाणागोचरमपि वस्तु वाग्ज्योतिषा ज्ञानगोचरं भवति।

तथा च पश्यामो लोकेऽपि सर्वथा घनान्धकारावच्छिन्ने समये मनुष्यो मनुष्येतरो वा जीवः कुतश्चिदुद्भूतां वाचं श्रुत्वोद्बुध्यते झटिति जानाति च कुतः किमिति। यद्यपि सर्वाणीन्द्रियाणि तज्ज्योतिषा सामान्येन व्याप्तानि, तथापि पात्रस्य पात्रानुरूपं गुणग्राहित्वं व्यञ्जच्चक्षुरिन्द्रियं सूर्यदैवतत्वात्तैजसम्, अत एव विशेषतस्तेजोग्राहि सत् सर्वं स्पष्टं चष्टे। एवं सर्वत्र प्रसृतभो भगवान् 'बृहद्भानु' रित्युच्यते।

मन्त्रलिङ्गञ्च—

पाहि नो अग्ने रक्षसः पाहि धूर्तेरराव्णः।
पाहि रीषत उत वा जिघांसतो बृहद्भानो यविष्ठ्य। ऋ० १।३६।१५।।
देवास्त इन्द्र सख्याय येमिरे बृहद्भानो मरुद्गण । ऋक् ८।८६।२।।
बृहद्भानो शवसा वाजमुक्तं दधासि दाशुषे कवे ।। यजु० १२।१०६।।

भवति चात्रास्माकम्—

विष्णुर्बृहद्भानुपदाभिधानः
प्रसार्य तेजांसि बृहन्ति विश्वे।
वागादिरूपाणि समिन्धरूपः
ज्योतिर्मयं सर्वजगद् विधत्ते।।४६३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आदिदेवः—३३४

'देव' शब्दो व्याख्यातः। आदत्त इति 'आदिः'। 'आ' इत्युपसर्गः' तदुपसृष्टाद् 'दा'-धातोः ***'उपसर्गे घोः किः'*** (पा० ३।३।६२) इति सूत्रेण 'कि' प्रत्ययः 'आल्लोपः'। यथोर्णनाभः कीटः स्वान्तः स्थितेनाव्यक्तरूपेणोपादानोर्णातन्तून् विस्तार्य पुनस्तानादत्ते स्वस्मिन् समावेशयति, तथायं भगवान् विष्णुरुपादानभूताव्यक्ताख्यया प्रकृत्या सृष्ट्वेदं सर्वं पुनराददानः=उपसंहरन् 'आदि' रित्युच्यते। स चासौ देव इति 'आदिदेवः'।

लोकेऽपि च पश्यामः=सर्वो हि मनुष्यः स्वतः स्वीयं कार्यं विस्तार्य पुनरुपसंहरति। सूर्यः प्रातरुद्यन् स्वकिरणान् विकिरति, निलाययति चास्तं यन् स्वस्मिन्निति।

एवं सर्वत्रादिदेवाभिधस्य भगवतो विष्णोरादिदेवत्वं व्याप्तं दृश्यते।

मन्त्रलिङ्गञ्च—

यस्माज्जातं न पुरा किंचनैव य आबभूव भुवनानि विश्वा।
यजु० ३२।५॥

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्।
यजु० १३।४॥

एषो ह देवः प्रदिशोऽनु सर्वाः पूर्वो ह जातः स उ गर्भे अन्तः।
यजु० ३२।४॥

यो विश्वस्य जगतः प्राणतस्पतिर्यो ब्रह्मणे प्रथमो गा अविन्दत्।
ऋक् १।१०१।५॥

न त्वद्धोता पूर्वो अग्ने यजीयान्। ऋग् ५३।५॥

अपूर्वेणेषिता वाचस्ता वदन्ति यथायथम्। अथर्व १०।८।३६॥

भवति चात्रास्माकम्—

यथोर्णनाभोऽथ यथा च सूर्य-
स्तन्तूंस्तथांशून् पुनराददाते।
सृष्ट्वा तथैतत् पुनराददानो
विष्णुर्बुधैरुक्त इहादिदेवः ॥४६४॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पुरन्दरः—३३५

'पृ पालनपूरणयोः' इति जौहोत्यादिको धातुः, ततः ***'भ्राजभास०'*** (पा० ३।२।१७७) इति सूत्रेण 'क्विप्' प्रत्ययस्तस्य च सर्वस्यापहारः। तत ***'उदोष्ठ्यपूर्वस्य'*** (पा० ७।१।१०२) सूत्रेण रपरमुत्वं, गुणाभावः, प्रातिपदिकसंज्ञायां स्वादिकार्ये पूरिति सिध्यति। पिपर्ति=पालयति पूरयति वा 'पूरि'ति तदुपपदाण्ण्यन्ता 'द्वारि'-विदारणार्थकाद्धातोः ***'पूःसर्वयोर्दारिसहो'*** (पा० ३।२।४१) इति सूत्रेण 'खच्' प्रत्ययः। ***'खचि ह्रस्वः'*** (पा० ६।४।८४) इति सूत्रेण दारेर्ह्रस्वः, णिलोपः। ***'वाचंयमपुरन्दरौ च'*** (पा० ६।३।६६) सूत्रेण पुरोऽमन्तत्वनिपातः, अनुस्वारपरसवर्णौ, प्रातिपदिकसंज्ञा, स्वादिकार्यञ्चेति सिद्धः 'पुरन्दर' शब्दः पुरं दारयतीति।

पूरिति शरीरस्य आवरणस्य वा नाम, यतो हि जरायुजाण्डजस्वेदजादि-जीवानामावरकं पालकं पूरकं वा शरीरं भवति। शरीरेणैव सम्पृक्तः पूर्ण आत्मा भोगभुक्तौ समर्थो भवति। तच्चान्ते भगवान् दारयतीति भगवान् 'पुरन्दरः' उच्यते। पुरश्शरीरवाच्यत्वे च प्रमाणम्—**'अष्टचक्रा नवद्वारा देवानां पूरयोध्या'** (अथर्व० १०।२।३१) इत्यादि।

यथा चेदं स्थूलं शरीरमात्मन आवरणभूतमेवं धातुष्वपि पूर्वः पूर्वो धातुः स्वोत्तरस्य धातोः पूरक आवरको वा भवति। तथा च रसधातू रक्तधातोः पूरको भवति—अत एव रक्तातिसारेण म्रियते नरो यदि तस्य रक्तधातो रसधातुः पूरको न भवति। अमुथैव फलादिष्वपि ज्ञेयम्।

तथा च यथेदं शरीरं त्वग्रूपया पुरा पूर्णं भवति, तथैव फलेऽपि तत्त्वक् पूरित्युक्ता भवति। एवञ्च वक्तुं शक्यते यत् फलबीजस्य पूः फलमज्जा, मज्जायाश्च पूः फलत्वक् त्वचावृतञ्च तत् फलं पिपर्त्यात्मानं भोक्तुश्च। यथा च भगवान् पुरं दारयति, तथा मांसमादित्सुर्जीवोऽपि त्वचं विदार्य मांसमादत्तेऽपरस्य जीवस्य। फलं जिघत्सुरपि प्राक् तत्त्वचं विदारयति। पुरुषोऽपि भगवतोऽनुकरणमात्रं कुरुते। पशवश्च हिंस्रा अहिंस्रा वा हस्तराहित्यान्न त्वचं पृथक्कर्तुं क्षमा इति सत्वचमेवाखेटं फलं वाश्नन्ति, यथा सिंहो विडाल इत्यादयः।

इक्षुदण्डे रस आत्मा, दण्डश्च तस्य रसस्य पूः। गुडं प्रेप्सुस्तद्दण्डरूपं पुरं निष्पिष्य प्राप्तरसो गुडं निर्माति। एवं भगवान् पुरन्दरत्वधर्मेण सर्वं व्याप्य सर्वत्रात्मानं व्यनक्ति।

एतच्चात्र सूक्ष्मतया ज्ञेयं यद् गोधूमयवादिधान्यानां तुषं तथान्यशिम्बाधान्यानां चणक-मुद्गादीनाञ्च शिम्ब्येव पूरुक्ता भवति। एतानि च धान्यानि त्वचं विदार्यैव

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्यवह्रियन्ते। एवं भागवतं दृश्यात्मकं लोकं काव्यं दृष्ट्वा सुधीभिर्विविधमुन्नेयम्। उक्तञ्च वेदे **'देवस्य पश्य काव्यं न ममार न जीर्यति'** (अथर्व १०।८।३२) भगवतो दृश्यं काव्यं जगत्तथा श्रव्यं काव्यं वेदो भवति। इति दिङ्मात्रमुक्तम्—

मन्त्रलिङ्गञ्च—

पुरन्दरो गोत्रभिद् वज्रबाहुरायातु यज्ञमुप नो जुषाणः।।

यजु० २०।३८।।

इन्द्रो मन्थतु मन्थिता शक्रः पुरन्दरः। अथर्व ८।८।१।

एवं **'पुरभिदि'**त्यपि। तत्रापि मन्त्रलिङ्गम्—**'पुरभित्'**। ऋग् ८।३३।५।।

भवन्ति चात्रास्माकम्—

पुरन्दरो विष्णुरनन्तशक्तिः
पुरं स दत्त्वा प्रभिनत्त्यथाऽन्ते।
पूरेव चात्रास्ति वपुर्हि वेद्यं
तद्दारकश्चात्र पुरन्दरोऽस्ति ।।४६५।।

पुरन्दरं तं सकलानुसृप्तं
जीवोऽनुकुर्वन् कुरुते तथैव ।
विचित्रचित्राभरणं विराजं
दृणाति कालेन पुरन्दरः सः ।।४६६।।

पुरन्दरं विष्णुमिदं समस्तं
जगत् सदानक्ति शरीरमूलम् ।
तथा यथा लिङ्गिनमन्तरस्थं
व्यनक्ति गात्री निजलभ्यलिङ्गैः।।४६७।।

भगवतो विराड् वपुरपि महाप्रलयकाले प्रलीयते।

❖ ❖ ❖

अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः।
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः।।५०।।

३३६ अशोकः, ३३७ तारणः, ३३८ तारः, ३३९ शूरः, ३४० शौरिः, ३४१ जनेश्वरः।
३४२ अनुकूलः, ३४३ शतावर्तः, ३४४ पद्मी, ३४५ पद्मनिभेक्षणः।।५०।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अशोकः—३३६

'शुच शोके' भौवादिक, 'ईशुचिर् पूतीभावे' दैवादिकः। ताभ्यामकर्तरि कारके 'घञि' 'शोक' शब्दसिद्धिः। तथा चेत्थं द्वयोरपि धात्वोरर्थसङ्गतिः— न विद्यते शोको यस्य सोऽ'शोकः', यद्वा न शुच्यति=क्लिद्यति, आर्द्रीभवति नासाक्षिस्वेदजलैरिति सोऽ'शोकः'। तथा हि—यथा कश्चिल्लौकिकः साधारणो जीवः सत्यामापदि भयकारणे वा कदाचिद् रोदिति कदाचिन्मुह्यति कदाचित् स्विद्यति, एवं नासाक्षिजलैरार्द्रीभवति। न तथा भगवान्, तस्य भयशोकादिराहित्याज्ज्ञानस्वरूपत्वाच्च।

यश्चेहत्यो मनुष्यः प्रज्ञामलिनकरै रागद्वेषक्रोधमोहलोभमानापमाना-दिद्वन्द्वैरप्रभावितो विचार्य कार्यं कुरुते, न स शोकमाप्नोति। भगवांस्तु केवलो ज्ञानरूपस्तस्मान्न तस्मिन् शोकलेशोऽप्यतो'ऽशोकः' स उच्यते। लोकेऽपि च पश्यामो— न हि सर्वं वस्तु सर्वदा शोकयुक्तं दृश्यतेऽपि तु सर्वदा स्वस्याशोकत्वं दर्शयति। कुत एतद् ? अशोकरूपस्य ब्रह्मणः सार्वत्रिक्या व्याप्तेः।

भवति चात्रास्माकम्—

तमोगुणे शोक उदेति नित्यं
ज्योतिःस्वरूपे च न शोकलेशः ।
क्लेशोदयो यश्च यथा मनुष्ये
सज्ज्ञानरूपे न तथास्ति विष्णौ ।।४६८।।

शोको ह्युत्पन्नो ग्रहणीं प्राप्य विकरोति बुद्धिमुद्बोधयति च प्रियवियोगं तथा लब्धप्रणाशस्मृतिम्। ततश्च प्रकुपितो वायुरणुना कालेन रसवहानि स्रोतांसि प्राप्य शोकेन ग्रहणीस्थं रसधातुविकारभूतं कफं विद्राव्य पित्तसाहाय्येन च सन्ताप्याश्रुरूपेण बहिर्निःसारयति, नासिकया स्रावयति। एवञ्च तस्य मुखाभा म्लायति दैन्यञ्चापद्यते। जिह्वा श्रथ्नाति, धैर्यं च्यवते, क्षुत्पिपासे शाम्यतः, बुद्धिर्विपर्येति, विरक्तिरुदेति, कायः क्षायति, मनो भ्राम्यति। अयं शोकपरिवारो न भगवति सत्त्वमुपलभते क्लेश-कर्म-विपाकाशयैरस्पृष्टत्वाद् भगवतो ज्ञानमयत्त्वाच्च।

भवन्ति चात्रास्माकम्—

यः क्लेशकर्माशयबद्धजन्तु-
र्लोकेऽस्ति दृष्टः स हि याति शोकम्।
यथा मनुष्याः पशवोऽपि तद्वत्
क्लिश्यन्ति शोकेन निपीडिताङ्गाः ।।४६९।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परन्तु नैतत्सकलानुयाते
सन्दृश्यते ब्रह्मणि वीतशोके ।
अतोऽस्ति लोके कथितः पुराणै-
र्विष्णुर्ह्यशोको न कुतश्चनोनः ।।४७०।।

यस्तत्त्ववित् पश्यति देवकाव्यं
शृणोति देवस्य[1] च वेदकाव्यम्।
स शोकसन्तानवितानभावं
नाप्नोति, शान्तो रमतेऽमृते स्वे।।४७१।।

तत्र मन्त्रलिङ्गमशोकनाम्नि—

तत्र को मोहः कः शोक एकत्वमनुपश्यतः। यजुः ४०।७।।
आनन्दा मोदाः प्रमुदोऽभीमोद्मुदश्च ये।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः।। अथर्व ११।७।२६।।
अकामो धीरो अमृतः स्वयंभू रसेन तृप्तो न कुतश्चनोनः।
अथर्व १०।८।४४।।
यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त। यजु० ३२।१०।।

तारणः—३३७; तारः—३३८

'तॄ प्लवनसन्तरणयो'रिति भौवादिको धातुः, तस्माण्णिजन्तान्नन्द्यादिल्यु-र्बाहुलकाल्ल्युड्वा योरनः, णत्वम्='तारणः' तारयतीति।

यथा सेतुर्नद्या अपरतटाज्जीवं परतटं नयत्यतः स 'तारणः' उच्यते, एवं विश्वे विविधविषयविषक्तचेतसस्तथा तद्रामणीयकविमोहितमनसो जीवाः केवलं तदादानसततप्रयत्ना एव सर्वमायुः क्षपयन्त्यात्मन इति। तेषाञ्चेतस्ततो भ्राम्यतां विमूढमनसां सूत्ररूपो भगवानेव तारयिताऽतः स 'तारणः'।

वेदे सूत्रशब्देन भगवानभिहितः सूक्ष्मत्वात् सर्वत्रानुस्यूतत्वाच्च। तथा हि—**"सूत्रं सूत्रस्य यो विद्यात् स विद्यात् ब्राह्मणं महत्"** (अथर्व० १०।८।३७)। सूत्रस्य सूत्रमित्यस्य सम्यग्ज्ञानाय "भूतभव्यभवत्पति" नाम्नो व्याख्या द्रष्टव्या। तथा चतुर्भुजेति नाम्नो व्याख्यानमपि द्रष्टव्यम्। सूत्रयति=ग्रन्थयति=बध्नाति सूत्ररूपं

१. देवस्य दृश्यं काव्यं जगत्, श्रव्यञ्च वेद इति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जगदिति सूत्रं ब्रह्म। यश्च ब्रह्मणो नियमनव्यवस्थां वेत्ति स तरति। इहोक्तायां सृष्टौ यद्यद् यथाविधं विविधभेदप्रभिन्नं वस्तु तदेव यः सत्यं मन्यते विकृतिमन्तरा स तरति। तथा च यो विकृतमपि विकृतत्वेन सम्यग्जानाति सोऽपि यथार्थज्ञानित्वात्तरति। एवंविध एव नियमः सर्वत्र।

यथा च सेतुः पूर्वतटादपरं ततश्च पुनः पूर्वतटं नयति, तथा भगवान् जन्ममरणव्यवस्थया कर्मापेक्षं परलोकरूपात्तटादैहिकलोकरूपं तटं प्रापयति। तथास्माल्लोकतटान्मृत्युमाध्यमेन परलोकरूपं तटं प्रापयति। प्राप्ततटश्च जीवो यथाकर्मजातसंस्कारानुसारं कर्म कर्तुमारमते।

तथा च पश्यामो वयं लोकेऽपि-पूर्वतटादपरं तटं यियासुः पादाभ्यां हस्ताभ्याञ्च जलमास्कन्दन् प्राप्नोति तटमारभते च यथेप्सितं कर्म स्नानं जपं पठनं व्यायामं यात्रां गानं युद्धं वा। ततश्चास्मात् पारयिता भगवान् 'तारणः' उच्यते 'तारो' वा।

यथा हि तरणे जलस्य माध्यममनिवार्यं, तथा जीवोऽपि तितीर्षुर्मातृगर्भ-जरायुजलमनिवार्यत्वेनापेक्षते। तस्मान्मातृगर्भसंमूढान्धकूपात् पारावाररहितात् समुद्रादिव भगवानेव तारयति तमत एव 'स तारक'स्तारण' 'स्तार' उद्धारको वोक्तो भवति।

उद्=ऊर्ध्वं नयतीत्युद्धारको यथा सेतुः। चतुर्विधायाः सृष्टेर्जननं मरणञ्च प्रतियोनि भिन्नभिन्नप्रकारकं यथा, तथा सेतुसम्बद्धमम्भोऽपि भिन्नभिन्नप्रकारकमिति विविधमूहितव्यं भवति।

मन्त्रलिङ्गञ्च—

स न इन्द्र इव देवेभ्यो वह्निः सन्तारणो भव। यजु ३५।१३।।

अनृणा अस्मिन्ननृणाः परस्मिन् तृतीये लोके अनृणाः स्याम।
ये देवयानाः पितृयाणाश्च लोकाः सर्वान् पथो अनृणा आक्षियेम।।
अथर्व ६।११७।३।।

जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः।।
ऋक् १।९७।१।।

अश्मन्वती रीयते सं रभध्वमुत्तिष्ठत प्रतरत सखायः।
अत्रा जहाम ये असन्नशेवाः शिवान् वयमुत्तरेमाभिवाजान्।।
ऋक् १०।५३।८।।

तटात्तटान्तरमुत्प्लुत्यापि गम्यतेऽतो धातोः सन्तरणप्लवनार्थौ तारणनाम्नि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

युक्तं सङ्गच्छेते। एकस्मिंश्च काले घटनैषा श्रुता दृष्टा च समीपस्थैः। तथा हि—मृतः कश्चित् पुरुषोऽपरस्मिन् मृतशरीरे प्रविष्टः सजीवः स्वजन्मान्तरभवं सर्वं वृत्तं संस्मृत्याब्रूत, पर्यचिनोच्च स्वजनमान्तरसम्बन्धिनः। एवञ्च तारणस्तारस्तारक उद्धारक उत्प्लावकश्चेत्युक्तो भवति।

तथा च कञ्चित् प्लवनानभिज्ञमसमर्थं तरणे, कश्चित् सबलः पुरुषः स्वस्कन्धं क्रोडं वारोप्य तारयति, तदा स पुरुषोऽपि 'तारणा'दि-शब्दवाच्यो भवति। एवं विविधा ऊहाः कर्तव्या भवन्ति। तथा च वेदो वदति ***'देवस्य पश्य काव्यं'*** (अथर्व १० ।८ ।३२)। देवस्य दृश्यं काव्यं जगत्, तस्य च दृढनियमनिबद्धस्य जरामरणे न भवतोऽत उक्तं **'न ममार न जीर्यति'**।

भवतश्चात्रास्माकम्—

स तारणो विष्णुरनन्तशक्तिः
सदा जराजन्मनिबद्धजीवम् ।
परादिदं दृश्यतटं तथास्मात्
तटात् स जीवं नयते परञ्च।।४७२।।
यथात्र लोके कवयः पुराणा
नवं नवं पारमवाप्तुकामाः ।
वाञ्छन्ति नित्यं [1] गहनानुकूल्यं
तितीर्षुरेवं च सदात्र जीवः।।४७३।।

शूरः—३३६

'शू' सौत्रो धातुर्गत्यर्थकः, ततः ***'शुसिचिमीनां दीर्घश्च'*** (उणादि० २।२५) सूत्रेण 'क्रन्' प्रत्ययो धातोरुकारस्य च दीर्घः। शवति=गच्छति सर्वत्राप्रतिबन्धमिति 'शूरः'। यद्वा-ण्यर्थग्रहणे शवति=प्रापयति सर्वमभीष्टमिति 'शूरः'। यद्वा—चौरादिकात् 'शूरवीर विक्रान्तौ' इति धातो'रच्' प्रत्यये 'शूर' इति। तस्य च विक्रमणशीलो-विक्रमितेत्यर्थः। विक्रमणशीलत्वात् सूर्यः शूरस्तथा विष्णुरपि।

सूर्यो हि त्रिधा विक्रमते। तथा च—उदयमानो मित्रसंज्ञां लभते, मध्याह्न इन्द्रसंज्ञां लभते, अस्तञ्च यन्नग्निसंज्ञां लभते। अत्र चैतदर्थकं मन्त्रलिङ्गञ्च—

१. गहनो विष्णुः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स वरुणः सायमग्निर्भवति स मित्रो भवति प्रातरुद्यन् ।
स सविता भूत्वान्तरिक्षेण याति स इन्द्रो भूत्वा तपति मध्यतो दिवम्।
(अथर्व० १३।३।१३)

एवञ्चैतत् सिद्ध्यति यत् सूर्यं हि प्राणी त्रिधा पश्यति। यथा च सूर्यः स्वकैः क्रमणैः किरणैश्च त्रिधा व्याप्नोति, तथा सर्वेश्वरो विष्णुरपि स्वकैः क्रमणैरुत्पादन-स्थापन-विलापनरूपैः समस्तं विश्वं व्याप्नोति। यद्वा बाल्ययौवनवार्धक्यरूपैरवस्थाविशेषैः सर्वत्राक्रामतीति स सर्वव्यापको भगवान् सर्वस्येष्टं गमयन् 'शूरः' इत्युक्तो भवति।

मन्त्रलिङ्गञ्च—

आ यात्विन्द्रोऽवसऽउप नऽइह स्तुतः सधमादस्तु शूरः।
यजु० २०।४७।।

अस्माकं शत्रून् परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः। यजु० ८।५३।।

त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रम्। यजु० २०।५०।।

अभि त्वा शूरनोनुमोऽदुग्धा इव धेनवः ।
ईशानमस्य जगतः स्वर्दृशमीशानमीन्द्र तस्थुषः।। ऋक्० १०।१२१।१।।

भवति चात्रास्माकम्—

शूरो हि विष्णुः स ददाति सर्वऽ
पदैस्त्रिभिर्विश्वमिदं मिमानः ।
स कालदिग्देशविभागमुक्तः
त्रिधा स्थितं विश्वमिदं बिभर्ति।।४७४।।

शौरिः—३४०

'शूर विक्रान्तौ' इति चौरादिको धातुः, ततो बाहुलकाद् ***'वसिवपियजि०'*** (उणादि ४।१२५) इत्यादिनोणादिसूत्रेण 'इञ्' प्रत्ययो, वृद्धिः 'शौरिः' सुबन्तः सिध्यति। शूरयत इति शौरिर्विक्रान्तिकारी। शूरशौरिनाम्नोः प्रायः समानार्थता।

चतुर्विधयोनिविभक्तमिदं विश्वं सर्वदा विक्रान्तिमाददानं दृश्यते, उत्पत्तिक्षणादारभ्य यावत् प्रलयम्। न हि किञ्चिदपि व्यनक्त्यात्मानमिति।

मन्त्रलिङ्गञ्च—

'यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा'।
यजु० ५।२०।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तेषामिन्द्र वृत्रहत्ये शिवो भूः सखा च शूरोऽविता च नृणाम्।

अथर्व २०।३६।१०।।

एवा ह्यसिवीरयुवरेवा शूर उत स्थिरः। एवाते राध्यं मनः।

अथर्व २०।३६।१।।

भवति चात्रास्माकम्—

शौरिर्हि विष्णुः स्वकृतेऽत्र कल्पे
न कञ्चिदप्येकरसं विधत्ते ।
वृद्धिक्षयाभ्यां किमुतांशरूपै-
र्नित्यं युनक्त्येकरसः स्वयं सः।।४७५।।

अत्र किञ्चित् प्रासङ्गिकम्—

वीरयते=विक्रान्तिं करोतीति वैरिरित्यप्यनुक्तं व्याख्यातं भवति। वीरयते-र्बाहुलकादौणादिक 'इञ्' प्रत्ययः।

जनेश्वरः—३४१

जनानाम्=जन्मिनामीश्वरः=ईशिता—ऐश्वर्यस्य दातेति 'जनेश्वरो' विष्णुरुक्तो भवति।

एतदेवाभिप्रेत्य जनेश्वरं भगवन्तं संस्मरन् जीवः प्रार्थयते—**'मा न आयुः प्रमोषीः'** (यजु० २१।२) तथा **''तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम्''** (यजु० २५।१२८) इत्यादि।

मन्त्रलिङ्गञ्च—

य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम।

यजु० २३।३।।

ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः। यजु० २७।३५।।

कालो ह सर्वस्येश्वरो यः पितासीत्प्रजापतेः। अथर्व १६।५३।८।।

यो भूतः सर्वस्येश्वरो यस्मिन् सर्वं प्रतिष्ठितम्। अथर्व ११।४।१।।

तथा च भवति चास्माकम्—

स सर्ववित् सर्वविधानकर्ता
विश्वस्य विक्रान्तिमितस्य भर्ता।
अतोऽस्ति लोके मुनिभिः स गीतः
सदा सदा सर्वजनेश्वरः सः ।।४७६।।

प्रसङ्गतोऽनुक्तमपि 'वीरजनेश्वरः' इति विष्णोर्नाम व्याख्यातं भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनुकूलः—३४२

'कूल आवरणे' इति भौवादिको धातुः ततः ***'इगुपधज्ञाप्रीकिरः कः'*** (पा० ३।१।१३५) इति सूत्रेण 'कः' प्रत्ययो, गुणाभावः, गतिसमासः। ***'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः'*** (पा० २।४।२६) सूत्रेण परवल्लिङ्गतायां प्राप्तायां ***''द्विगुप्राप्तापन्नालं पूर्वगतिसमासेषु प्रतिषेधः''*** (पा० २।४।२६) सूत्रस्थवार्तिकेन निषिध्यते। कूलति=आवृणोति प्रतिबध्नाति जलादिकमिति कूलं तटादि। कूलशब्द इह तटपर्यायो, यथा नद्याः कूले जपति। कूलमनुवर्तते इत्यनुकूलं नद्या जलम्।

यथा च नद्या जलं कियन्तमप्यध्वानं प्रवहत् कूले निर्माति, तथा चेयं जलस्य प्रवृत्तिर्विज्ञापयति यत् स्वप्रवहणे जलं कूलद्वयमपेक्षते। अर्थात् कूलानुस्यूतं जलं रक्षितं भवति। तथेयं सृष्टिरपि स्वसंचलने कूलद्वयमपेक्षते। तथा च वेदः **''द्यौस्त्वा पिता पृथिवी माता''** (अथर्व २।२८।४) अनेनैव तटद्वयेन नियन्त्रिता चतुर्विधजरायुजोद्भिज्जस्वेदजाण्डजभेदभिन्ना सृष्टिः प्रवहति।

अस्मिंश्च पार्थिवशरीरे पादौ पृथिवीस्थानीयौ शिरश्च द्यौस्थानीयम्। यथा द्यवि ज्योतिःस्वरूपाणां ग्रहाणां निवेशः, तथा शिरसि प्रकाशप्रधानानां ज्ञानेन्द्रियाणां निवेशः। द्यौरेकं कूलं पृथिवी च द्वितीयमनयोश्च मध्यवर्ति हृदयं नदीस्थानीयम् तत्र चोरसि महाधमनी सम्पृक्ते महासिरामुखे चलमिव रक्ताख्यं रसं प्रवाहयति।

सर्वत्र लोकेऽपि च पश्यामः सर्वमिदं द्वन्द्वेन निबद्धं कूलरूपेण। तथा च—द्वे नेत्रे, द्वे मस्तिष्के, द्वौ कर्णौ, द्वे जिह्वे, द्वे नासिके, द्वे दन्तावल्यौ, द्वौ फुफ्फुसौ, द्वौ हस्तौ, द्वौ यकृत्प्लीहानौ, अन्त्राणि द्विविधानि, बृहल्लघुभेदभिन्नेऽन्तर्गुह्येन्द्रियछिद्रे द्वे, वृष्णौ द्वौ, ससक्थिजङ्घे द्वे, पादौ द्वौ, विश्वञ्चेदं स्थावरजङ्गमभेदभिन्नं द्विविधं, बीजे द्वे।

यथा नदी तटद्वयमध्यगा प्रवहति, तथेदं सर्वं जगद् द्वन्द्वानुस्यूतं युगलमध्यगं वा आदितोऽन्तपर्यन्तं प्रवहति चलतीत्यर्थः। एवं सर्वत्रानुकूलतारूपेण गुणेन व्याप्ता भगवाननुकूलः सर्वमनुकूलं विधत्ते। अत एव च तस्या'नुकूले'ति नाम।

यच्चोक्तं **''सूर्य आत्माजगतस्तस्थुषश्च''** इति (यजु० १६।४६) तत्रात्मा हृदये निवसति, हृदयञ्चान्तराले द्यावापृथिव्योरुत्तमाङ्गपादरूपयोः। अत एव निर्विवादमेतद् यद्हृदयं चेतनास्थानमिति।

एवञ्च वक्तुं युज्यते, यदियं मनोनदी, जगद्रूपा नदी वा द्युलोकस्य तथा पृथिवी लोकस्य मध्यवर्तिनी सती प्रवहति। यथा च जले बहूनां पदार्थानां स्थितिस्तथा मनस्यपि सर्वं शुभमशुभञ्च विचारजालमोतं प्रोतञ्च भवति। तथा च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वेदे **''सर्वमोतं प्रजानाम्''** (यजु० ३४।५) मनसीति प्रसज्यते। यस्मिंश्च मनसि ज्ञानमिदं सर्वं निहितमस्ति। तथा च वेदः **''यस्मिन्नृचः साम यजू ँ षि यस्मिन् प्रतिष्ठिता रथनाभाविवारा.... तन्मे मनः शिवसङ्कल्पमस्तु''** (यजु० ३४।५)। यथा च नदी न कदाचिद्विरमति रात्रिन्दिवञ्च प्रवहति तथेदं मनोऽपि जाग्रति स्वप्ने सुषुप्तौ च सर्वदा गतिशीलं न कदाचिद् गतिनिवृत्तिं भजते।

एवं लोकमवलोक्यानुकूलपदव्याख्यानुकूलान्युदाहरणान्यूहनीयानि। मातृपितृरूपे द्वे तटे तयोर्मध्य इदं जन्मि जगत् प्रवहति। एवं सर्वं सव्यवस्थं कूलमनुवर्तमानं दृश्यते।

मन्त्रलिङ्गञ्च—

अश्मन्वती रीयते संरभध्वं ववीरयध्वं प्रतरता सखायः।
अत्राजहीत ये असन् दुरेवा अनीवानुत्तरेशेमाभिवाजान्।।

अथर्व १२।२।२६।।

उत्तिष्ठता प्रतरता सखायोऽश्मन्वती नदी स्यन्दत इयम् ।
अत्रा जहीत ये असन्न शिवाः शिवान् स्योनानुत्तरेमाभिवाजान्।।

अथर्व १२।२।२६, २७।।

भवन्ति चात्रास्माकम्—

यथा जलं कूलयुगानुसृप्तं
नदीति संज्ञां लभतेऽनवद्याम् ।
तथा नगं गञ्च जगत् समस्तं
द्यावापृथिव्योरनुयाति कूलम् ।।४७७।।

यथा नदी कूलमलङ्करोति
तथान्तराले [1]दहरं विभाति ।
मनो निवासो हृदयेऽस्ति नूनम्
चित्तं प्रतिष्ठं च हृदन्तराले ।।४७८।।

सर्वत्र बीजेषु वितत्य यौग्म्यं
धाता सना शास्ति च विश्वमात्रम्।
पितोपरिष्टादधरा च धात्री
द्यौरूर्ध्वमुर्व्याः पृथिवी ह्यधस्तात्।।४७९।।

---

१. अवकाशः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ च शरीरमध्यभागावयवानधिकृत्य किञ्चिदुच्यते—यथा समुद्रोऽन्तरिक्ष स्थानीयस्तथा शरीरमध्यभागावलम्बित्वात् सहस्तौ भुजावन्तरिक्षस्थानीयौ, तयोः समकक्षञ्च हृदयमान्तरिक्षसमुद्र इव—उरःस्थम्। पार्थिवसमुद्रस्थानीया च मूत्राधिष्ठानभूता वस्तिः, पार्थिवसमुद्रस्याधोभागवर्तित्वात्। अभ्रवच्चापि फुफ्फुसावुरो-गुहागतौ हृदयसमकक्षौ वस्तिसहायौ च वृक्कौ अधस्तात् कृतौ। एतदेवाभिप्रेत्य लोकसमितः पुरुषः इत्युक्तम्।

तथा च भवतोऽत्रास्माकम्—

अधः शयानो जनको न वामा-
मलं भवेत्तर्पयितुं कदाचित् ।
उच्चैः पिता द्यौः कथितोऽस्ति वेदे
धरा ह्यधस्ताद् धरणीव योषा ।।४८०।।

[1]वेद्यञ्च यो वेत्त्यनुकूलसंज्ञं
तं विघ्नबाधा न विहन्ति मर्त्यम्।
सुखं शयानः पदमप्रमेयं
पश्यन् सदा नन्दति वीतशोकः।।४८१।।

शतावर्तः—३४३

'शत' शब्दो बहुपर्याय 'आवर्त'शब्दश्च चक्रपर्यायः। शतं=बहूनावर्तयति=चक्रवद् भ्रमयतीति 'शतावर्तः'। यद्वा—शतेन=बहुरूपेण विविधेन पदार्थगणेनावर्तत इति 'शतावर्तो' भगवान्। तथा हि स सूर्य-चन्द्र-नक्षत्रादिरूपं ज्योतिर्गणं जीवात्मानञ्च बहुश आवर्तयति=भ्रमयति प्रतिक्षणमित्यतः 'शतावर्तः'।

यद्वा—स एव प्रत्येकं पदार्थरूपेण समन्ताद् वर्तत इति 'शतावर्तः' उच्यते। तथा चोच्यते वेदे=**"सूर्यस्यावृतमन्वावर्ते"** (अथर्व १०।५।३७) तथा **"यं सुपर्णः परावत श्येनस्य पुत्र आभरत्। शतचक्रं यो ह्यो वर्तनिः"** (ऋग् १०।१४४।४) इत्यादि। यद्वा—शतं=बहव आवर्ताश्चक्राणि यस्मिन् स'शतावर्तोऽ'यं संसारः स चास्यास्तीति मत्वर्थीयोऽच्।

तथा च पश्यामो लोके—यथास्मिन् भौतिके शरीरे मूलाधारचक्रम्—

---

१. वेद्यम्=विष्णुम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गुदाचक्रम्—नाभिचक्रम् अन्त्रचक्रम्—इत्यादीनि बहूनि चक्राणि सन्ति, तथा लोकेऽपि समष्टिरूपे ग्रहचक्र—राशिचक्र—नक्षत्रचक्रादीनि बहूनि सन्ति चक्राणि। लोकश्चायं भगवत एवेत्यतः स 'शतावर्त' उच्यते।

शिरोनिर्माणन्तु चक्रवत् सर्वेषां प्रत्यक्षमेव। यन्त्रञ्चापि बहुचक्रयुक्तं निर्मीयते तन्निर्मात्रा। एवं भगवान् स्वकीयेन 'शतावर्ताख्येन गुणेन सर्वं जगद् व्याशयन् प्रतिपदं व्यनक्त्यात्मानम्। य एवं भगवन्तं शतावर्ताख्यं वेद स उन्मीलितलोचनो दिवि सूर्यमिव प्रत्यक्षं तत्त्वरूपं विष्णुं पश्यति सम्यक्। तथा च मन्त्रः—''**तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्**'' यजुः ६।५।।

मन्त्रलिङ्गञ्च—

जातवेदो निवर्तय शतं ते सन्त्वावृतः।
सहस्त्रं त उपावृतस्ताभिर्नः पुनराकृधि।। अथर्व ६।७७।३।।
स्वाम्भेनेमे विष्टभिते द्यौश्च भूमिश्च तिष्ठतः।
स्कम्भ इदं सर्वमात्मन्वद्यत्प्राणान्निमिषच्च यत्।। अथर्व १०।८।२।।
क्वार्धमासाः क्व यन्ति मासाः संवत्सरेण सह संविदानाः।
यत्र यन्त्यृतवो यत्रार्णवः तं ब्रूहि कतमः स्विदेव सः।।
अथर्व १०।७।५।।
यत्राग्निश्चन्द्रमाः सूर्यो वातस्तिष्ठन्त्यार्पिताः ....।।
अथर्व १०।७।१२।।

भवतश्चात्रास्माकम्—

विष्णुः शतावर्तपदप्रसिद्धो
विश्वं सचक्रं कुरुतेऽनवद्यम्।
यो वेत्ति विश्वं स उ वेत्ति कायं
यो वेत्ति कायं स उ वेत्ति वेदम्।।४८२।।
निर्दोषमुक्तं श्रुतिनिष्ठतत्त्वं
जगच्छ्रुती कूलयुगस्वयम्भोः।
जगत् सदुक्तं श्रुतिभाष्यमानं
श्रुतिश्च विश्वस्य समाससूत्रम्।।४८३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पद्मी—३४४

पद्यते पदनं वा पद्म=ज्ञानम्। 'पद गतौ' धातोरौणादिके 'मनि' 'पद्म' शब्दसिद्धिः। गत्यर्थानां धातूनां गतिज्ञानप्राप्त्यर्थत्वनियमाच्चात्र ज्ञाने वृत्तिः। एवञ्च पद्म ज्ञानमस्यास्तीति 'पद्मी' मत्वर्थीय इनिः, ज्ञानीत्यर्थः।

यद्वा—यथा हि पङ्कसारभूतं जलोद्भवं विविधदलानुस्यूतं पद्म जले तिष्ठन्नपि जलेनासम्पृक्तं चक्षूरमं मनोज्ञं च भवति, तथैवेयं जलोद्भवा विविधद्वीपरूपदलानुस्यूता जलस्थिता जलासम्पृक्ता च पद्माकारा पृथिवी पद्मेव भाति। एतच्च पृथिवीरूपं पद्मास्तीत्यस्य स भगवान् 'पद्मी'। एवञ्च पद्मशब्देनेह नैर्मल्यासंसर्गित्वरूप-धर्मसामान्यात् ज्ञानं, कमलं, पृथिवी चाभिधीयत इति।

तच्च पद्म पितृरूपः पाति, मातृरूपो निर्मिमीते। धर्तृरूपो धारयति, हर्तृरूपो हरति। जनयितृरूपो जनयति, रेतःस्वरूपः सर्वविधबीजानभिषिञ्चति। बन्धुरूपो बध्नाति। अहोरूपः प्रकाशकौ सूर्याचन्द्रमसौ व्यवस्थापयति। सन्धातृरूपः पद्मदलानीव पृथिवीं सन्दधाति। मनुरूपश्च सर्वं मनुते बोधयतीत्यर्थः। एवं विविधमूहनीयम्।

मन्त्रलिङ्गं च—

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।

यजु० ३२।१०।।

तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति।

ऋक् १।१६४।२०।।

भवति चात्रास्माकम्—

पद्मी स शम्भुर्विविधानुसृप्तं,
ज्ञानं स्वकं ज्ञापयतेऽवदातम्।
एवञ्च यः पद्मिनमन्तरस्थं
जानात्यसौ तुष्यति युग्ममुक्तः।।४८४।।

पद्मनिभेक्षणः—३४५

पद्मम्=ज्ञानं कमलञ्च। निभशब्दः सादृश्याभिधायी। ईक्षणं=दर्शनं, ईक्षणशब्देनेह जगल्लक्ष्यते, ईक्षणसहकृतापोमूलत्वाज्जगतः यदुक्तं तत्त्वदर्शिभिः—'स ऐक्षत' 'स तपोऽतप्यत,' 'सोऽसृजत' इत्यादि।

तच्चेक्षणं भगवतः सङ्कल्परूपं, कामरूपं वा, सङ्कल्पप्रभवत्वात् कामस्य। यदुक्तं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गीतोपनिषत्सु **'सङ्कल्पप्रभवान् कामान्'** इत्यादि। तथा च **'स ऐक्षत, स ऐच्छत्, सोऽकामयत'** इत्याद्येकमेव सङ्कल्परूपमर्थमुद्दिश्य बहुधोच्यते स्पष्टप्रतिपत्त्यर्थम्। सिध्यति चैवं सङ्कल्पमूलिकेयं सृष्टिरीक्षणमूलिका, काममूलिका वा।

पद्मशब्देन स्वस्य संकोचविकासरूपौ धर्मौ लक्ष्येते। एवञ्च पद्मनिभं= पद्मसदृशं संकोचविकासशीलमीक्षणं जगद् यस्य स 'पद्मनिभेक्षणो' भगवान् विष्णुः। जगच्चेदं भगवदीक्षातः सृष्टिरूपेणाविर्भवति=विकसति, यथाकालं स्थित्वा भगवदीक्षातः प्रलीयते चेति पद्मवत् सङ्कोचविकासौ भजते।

लोके च पश्यामः, प्रत्येकं वस्तु स्वरूपत आविर्भूय=विकासमेत्य प्रलीयते। प्रत्यक्षमेतत् सर्वत्र दृश्यते। सूर्यादयो ग्रहा उदेत्य विकसन्ति, सायङ्काले यथासमयं वा सङ्कोचरूपमस्तं यान्ति। सूर्यकिरणाश्चात्र प्रात्यक्षिको दृष्टान्तस्तथा हि ते सूर्योदये विकसन्ति सायङ्काले च संकुचन्ति। एवमेतद्विविधेन धर्मेण सर्वत्र व्याप्तो भगवान् पद्मनिभेक्षणनाम्नोच्यते।

मन्त्रलिङ्गञ्च—

मित्रा ईक्षमाण आवृत्त आनन्दः। अथर्व १०।७।२३।।

वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम् ।
तस्मिन्निदं सं च वि चैति सर्वं स ओतः प्रोतश्च विभूः प्रजासु।।
यजु० ३२।८।।

भवति चात्रास्माकम्—

विष्णुः स सङ्कोचविकासशीलं
जगत् सृजन् पद्मनिभेक्षणोऽस्ति।
तदीक्षणोद्भूतमिदं समस्तं
तमेव विष्णुं प्रपदं व्यनक्ति।।४८५।।

❖ ❖ ❖

पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत्।
महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः।।५१।।

३४६ पद्मनाभः, ३४७ अरविन्दाक्षः, ३४८ पद्मगर्भः, ३४६ शरीरभृत्। ३५० महर्द्धिः, ३५१ ऋद्धः, ३५२ वृद्धात्मा, ३५३ महाक्षः, ३५४ गरुडध्वजः।।५१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पद्मनाभः—३४६

'पद्मनाभ' शब्दो व्याख्यातः प्रकृतिप्रत्ययविभागेन। इह किञ्चिदान्तर्येण पुनर्व्याख्यायते—पद्मेति पुष्पनाम, नाभशब्दश्च न भातीति नभः एव नाभः, स्वार्थेऽण् प्रत्ययः। पद्मश्चासौ नाभश्च पद्मनाभः। पद्मशब्दस्य प्रकाशरूपोऽर्थो लक्ष्यो, नाभशब्दश्च तद्विरुद्धमर्थमाह, एवञ्च यः प्रकाशते न प्रकाशते च, स 'पद्मनाभः' इत्युच्यते भगवान् विष्णुः।

प्रत्येकं वस्तुनो ज्ञानाज्ञानापेक्षमवस्थाद्वयं भवति। तथा कस्यचिद् वस्तुनोऽवस्थाभेदेऽन्यदपि निमित्तं भवति। पद्मस्यावस्थे द्वे- विकासरूपा मुद्रारूपा च। तत्र पूर्वस्यां सूर्योदयो निमित्तमपरस्यां च सूर्यास्तः। सूर्योदये तस्य पद्मरूपता, तस्मिंश्चास्तमिते नाभरूपता, अर्थात् सति सूर्यास्ते तस्य भाः दीप्तिर्न भवति।

सूर्यश्चायं प्रत्यक्षं दृश्यमानो भवति पद्मरूपो ज्ञातत्वान् नाभरूपश्चास्तंगतोऽज्ञातत्वात्तदानीमिति। एषा हि सर्वस्य गतिः।

मनुष्योऽपि जीवितः पद्मनिभो, मृतश्च नाभसदृश इति। इत्थं सर्वस्यान्तर्यामी भ्राजिष्णुर्भगवान् सूरिभिर्ज्ञातः सन् पद्मरूपः प्रकाशतेऽज्ञातश्च तदितरैर्नाभो न प्रकाशत इति पद्मनाभेति नाम भजते। न हि पश्यन्तोऽप्यज्ञानिनः पृथुदृशो भगवद्विभूतिं भगवन्तं तत्त्वतः परिचिन्वन्ति। इयं हि वैष्णवीव्यवस्था द्विरुपात्तेनैतेन पद्मनाभनाम्ना विज्ञाप्यते।

मन्त्रलिङ्गञ्च—

पुण्डरीकं नवद्वारं त्रिभिर्गुणेभिरावृत्तम् ।
तस्मिन् यद् यक्षमात्मन्वत् तद् वै ब्रह्मविदो विदुः।।

अथर्व १० ।८ ।४३ ।।

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः।
दिवीव चक्षुराततम् ।। (यजु० ६ ।५)
पश्यदक्षणवान् न विचेतदन्धः।। (अथर्व ६ ।१४ ।१५)

व्याख्यायते च पुनरपरथा—'पद्मनाभ' शब्दस्यैवार्थः—

तम आसीत्तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वमा इदम्।
तुच्छ्येनाभ्वपिहितं यदासीत् तपसस्तन्महिनाजायतैकम् ।।

ऋग् १० ।१२६ ।३ ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्यनेन मन्त्रेण प्रकाश्यते। अर्थात् य एवं सृष्टेः प्राक् अप्रकाशरूपः= अव्यक्तरूपो मूलत आसीत्, स एव स्वमहिम्ना व्यक्तरूपतां लभते। अर्थात् स मूलतो नाभरूपोऽपि ज्ञातः सन् पद्मरूपतां प्रतिपद्यते। यथा पद्मोऽज्ञायमानेन नालेन नाभो ज्ञायमानेन पत्रकेसरादिना च पद्मः प्रकाशरूप इत्यस्ति, स 'पद्मनाभः'। अमुथैव भगवान् स्वरूपेण नाभो जगद्रूपेण च पद्म। एवञ्च तस्य या भासमानावस्था सा सदित्युच्यते, या चाव्यक्तावस्था सा—असदित्युच्यते।

असत् शब्दो हि वर्तमानकालस्य निषेधको, न तु भूतकालस्य। तथा कस्यचित् पिता जीवन् सन्नित्युच्यते मृतश्चासन्, तत्र मृताभिधायके नासच्छब्देन स इदानीं नास्तीत्येषोऽर्थोऽभिधीयते।

अमुथैव यन्त्रस्याविष्कर्ता यावज्जीवति तावत् सच्छब्देनाभिधीयते मृतश्च त्यक्तवर्तमानकालिकसत्तत्वादसच्छब्देन, किन्तु तस्य सार्वकालिकं कारणत्वं न निषिध्यते। एवं भगवान् विष्णुरपि **'नासदासीत् नो सदासीत्'** (ऋक् १०।१२६।१) श्रुत्यनुसारं सदसद् दृश्यादृश्यकार्यकारणरूपो युग्मगुणैर्विश्वं बिभ्राणः 'पद्मनाभः' इत्युक्तो भवति।

भवन्ति चात्रास्माकम्—

स पद्मनाभोऽनुपमप्रकाशो
दृश्यः सदा कर्मभिरस्ति विज्ञैः ।
तं पद्मनाभं सनमोवचोभिः
स्तुवन्ति विज्ञाः स्वहृदासनस्थम्।।४८६।।

येऽतर्क्यमेतद् भगवत्स्वरूपं
तर्कप्रमाणेन तदाप्तुकामाः ।
वृथाप्रयासा न सदुक्तवन्तः
क्लिश्यन्ति ते सूर्यदृशोऽधिरात्रौ।।४८७।।

एवं य विद्वांस्तमु सर्वकालं
सन्तं तथासन्तमभीष्टदोहम् ।
ज्ञानत्रिनेत्रं सकलाधिवासं
पश्यत्यनिन्द्यं स भवत्यशोकः ।।४८८।।

अनेनैव व्याख्यानेन 'सदसती' च—व्याख्याते भवतः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अरविन्दाक्षः—३४७

'ऋ गतिप्रापणयोः' इति भौवादिको धातुः भावे 'अपि' प्रत्यये 'अर' इति सिध्यति। अरणम्=अरः, सा च गतिः, तां विन्दति=प्राप्नोती'त्यरविन्दः' सूर्यश्चन्द्रोऽग्निर्वा। अरेत्युपपदाद् 'विद्लृ लाभे' धातो'श्शे' प्रत्यये 'नुमि' चा'रविन्द'शब्दसिद्धिः। विश्वं व्यश्नुवानौ सूर्याचन्द्रमसावक्षिणी यस्य सः—'अरविन्दाक्षो' भगवान् विष्णुः।

भगवतः सर्वनियन्तुर्ज्येष्ठाख्यस्य विष्णोः सूर्याचन्द्रमसावक्षिरूपौ, तावेव च प्राणिषु चक्षुर्मनोरूपौ। पश्यामश्चात एव लोकेऽपि—उन्मीलितञ्चक्षुर्मनश्च दिवि दविष्ठमपि सूर्यादिकं नक्षत्रमण्डलं वा, अरम्=शीघ्रं झटिति व्याप्नुतः। एवं भगवानरविन्दाक्षः प्रतिपदं चक्षुषा मनसा च स्वं रूपं व्यनक्ति। तत्त्ववेदितृभिश्चैतदेवाभिप्रेत्यासा'वरविन्दाक्षे'ति नाम्ना व्यवह्रियते।

मन्त्रलिङ्गञ्च—

यस्य सूर्यश्चक्षुश्चन्द्रमाश्च पुनर्णवः।
अग्निं यश्चक्र आस्यं तस्मै ज्येष्ठाय ब्रह्मणे नमः।। अथर्व १०।७।३३।।

तवेदं विश्वमभितः पशव्यं यत् पश्यसि चक्षसा सूर्यस्य।
गवामसि गोपतिरेक इन्द्र भक्षीमहि ते प्रयतस्य वस्वः।।
ऋग् ७।९८।६।।

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत।
श्रोत्राद् वायुश्च प्राणश्च मुखादग्निरजायत।। यजु० ३१।१२।।

भवतश्चात्रास्माकम्—

अरविन्दाक्षः स वै विष्णुर्यो ज्योतींषि नियच्छति।
चक्षुर्हि वारविन्दाक्षं, मनो वा देवतानुगम् ।।४८९।।

तथा—सूर्यानुगं चक्षुः। चन्द्रानुगं मनः।

एवं हि यो वेत्ति वरेण्यमीशं
लोकेऽरविन्दाक्षपदप्रसिद्धम् ।
स एव विष्णुं परितोऽभ्युपैति
मनश्च चक्षुः शुचि संविधत्ते।।४९०।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पद्मगर्भः—३४८

पद्मनाभव्याख्याने पद्मशब्दस्तथा हिरण्यगर्भशब्दव्याख्याने गर्भशब्दश्च प्रकृतिप्रत्ययाभ्यां व्युत्पादितः। पद्मशब्देन लक्षणया सङ्कोचविकासावुच्येते। तथा च यथा बीजभूतानां पद्मकेसराणां यथासमयं सङ्कोचविकासाववरोधं नाप्नुतस्तथामीषां चतुर्विधसर्गभाजां जीवानामपि सुप्तानां जागरितानां वा वृद्धिक्षयरुपः सङ्कोचविकासरूपो वा गतिप्रवाहो नावरोधमाप्नोति, न कदाचित् प्रतिबन्धमेतीत्यर्थः।

अमुथैवैतत् सङ्कोचविकासशालि पद्मोपमं समस्तमपि विश्वं यस्य भगवतो विष्णोर्गर्भे स्थितं सर्वदा वृद्धिक्षयरूपं गतिप्रवाहं भजमानमास्ते। अर्थाद् यथा सुप्तोऽपि जीवः शुभाशुभाभ्यां युक्तस्तदनुसारञ्च सुखदुःखरूपं स्वाप्नं फलं भुञ्जानो भवति, एवं प्रलयावस्थायामपि काञ्चिदनिर्वचनीयां गतिमाप्नोत्येव, न कदाचिद्गतिहीनस्तिष्ठतीत्यर्थः।

इममेव महार्थं 'पद्मगर्भे'ति नाम प्रकटयति। भोगान् भुञ्जानानाञ्च सर्वेषां भोगभुक्तौ प्रवर्तको भगवान् विष्णुरेव। तथा च सूर्योऽपि 'पद्मगर्भः'।

मन्त्रलिङ्गञ्च —

स जातो गर्भो असि रोदस्योरग्ने चारुर्विभृत ओषधीषु।

ऋक् १०।१।२।।

आत्मा देवानां भुवनस्य गर्भो यथावशं चरति देव एषः।

ऋक् १०।१६८।४।।

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्।

यजु० १३।४।।

तस्मिन् ह तस्थुर्भुवनानि विश्वा। यजु० ३१।१९।।

गर्भो देवानां पिता मतीनां पतिः प्रजानाम्। यजु० ३७।१४।।

भवतश्चात्रास्माकम्—

स पद्मगर्भो नियतायुरर्है-
र्भोगैर्यथाकर्म युनक्ति जीवान्।
विज्ञाः शुभं कुर्वत एव कर्म
शुभेप्सवस्तं नमसा गृणन्तः।।४६१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बीजो यथा गर्भगतोऽप्यदृश्यः
समेधते मातरि कालबद्धः[1] ।
तथात्र विश्वं नियतायुरर्थै-
र्युञ्जन् समिन्धे ननु पद्मगर्भे।।४६२।।

यथा पृथक् पृथग् योनीनां गर्भपाककालः पृथक् पृथग् भवति, तथैव लोकलोकान्तराणामायुर्मानं पृथक् पृथग्भवति । इत्यवगन्तव्यम्।

शरीरभृत्—३४६

शीर्यते=हिंस्यत इति 'शरीरं' तद् बिभर्ति=पुष्णाति, दधाति वा स शरीरभृत्। शरीरशब्दः ***'कृशॄपृकटिपटिशौटिभ्य ईरन्'*** (उणादि ४।३०) इत्युणादिसूत्रेण 'ईरन्' प्रत्यये, गुणे रपरे च सिद्धः। ब्रह्मणो विराडाख्याच्छरीरादारभ्य क्षुद्रतमकीटशरीरपर्यन्तमपि यो बिभर्ति=पुष्णाति; यद्वा—विश्वमनुप्रविश्य य इदं विश्वसंज्ञकं शरीरं दधाति स 'शरीरभृत्'।

यथा शरीरानुप्रविष्टो जीवः शरीरं पोषयति=क्रियायोग्यं कल्पयति, तथायं विष्णुरपि जगदनुप्रविष्टो जगत् पोषयत्यतः स 'शरीरभृदु'च्यते।

मन्त्रलिङ्गञ्च—

शरीरं ब्रह्म प्राविशत्, शरीरेऽधिप्रजापतिः। अथर्व ११।८।३०।।

आदित्यैरिन्द्रः सगणो मरुद्भिरस्माकं भूत्वविता तनूनाम्।।

अथर्व २०।६३।२।।

प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते।

यजु० ३१।।१६।।

स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।

यजु० १३।४।।

यदा च जीवः शरीरं त्यजति तदेदं शरीरं नश्यति। तथैव सविशेषता परिजिहीर्षौ विष्णौ जगदिदं प्रलीयते। पार्थिवशरीरेषु जीवप्रवेशक्रमं विज्ञापयन् भगवान् विष्णुः स्वकीयं शरीरभृत्त्वं गुणं जगति व्यापयति, लभते च विष्णुसंज्ञाम्।

---

१. कालबद्धः=नियतकालावधि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवतश्चात्रास्माकम्—

शरीरभृद् विश्वमिदं समस्तं
स्वतेजसा दीपयते प्रसह्य ।
तथा यथा जीव इदं शरीरं
बिभर्ति, युक्तञ्च शुभाशुभाभ्याम्।।४६३।।

शरीरभृद् विष्णुरिदं समस्तं
विरच्य जीवान् गमयत्यजस्रम् ।
शुभोदयाप्त्यै दुरितापसृप्त्यै
लीलायते [1]सर्वखगानुबन्धुः ।।४६४।।

महर्द्धिः—३५०, ऋद्धः—३५१, वृद्धात्मा—३५२

'ऋधु वृद्धौ' दैवादिकः तस्मात् स्त्रियां भावे 'क्तिन्' प्रत्ययः=ऋद्धिः। महती ऋद्धिर्यस्य स 'महर्द्धिः'। 'ऋध्यते'रेव 'क्त'-प्रत्यये 'ऋद्ध' इति साधुर्भवति। वृधु वृद्धौ इति धातोः 'क्त'प्रत्यये 'वृद्ध' इति शब्दः सिध्यति। एवञ्च क्रमशः अखिलब्रह्माण्डरूपसम्पत्तिशालित्वेन 'महर्द्धिः'। सर्वत आप्तकामत्वादत एव परिपूर्णत्वाद्'ऋद्धः'। सर्वतो बृहत्त्वाच्च 'वृद्ध' इति। आत्मशब्दः स्वरूपवचनो, वृद्धस्वरूप इत्यर्थः। स हि महर्द्धित्वर्द्धत्वरूपैर्गुणैः सर्वत्रानुस्यूतः।

इदञ्च सर्वं विश्वमेकनीडे तस्मिन् वसति। यथा मूलपुरुषे जीवति सति तस्य पुत्रपौत्रप्रपौत्रादयः स्वभावेन भिन्नाः, कर्मणा भिन्ना, निवासस्थानेन भिन्ना, वृत्तेन भिन्नाः किमुत विभिन्नार्जनमार्गगा अपि सन्त एकनीडमिवैकगृहमाश्रित्य वसन्ति तथैवान्तर्बहिश्च सर्वतः परिपूर्णब्रह्मणि पृथक्-पृथक् स्थिता अर्थात् सत्तया भिन्ना गत्या च भिन्ना लोका एकगृहायन्ते विष्णौ। वृद्धं सृष्टिकाले विविधभावैः स्वरूपं यस्य स वृद्धात्मा। एवं भगवान् विष्णुः सकलं व्यश्नुवानः स्वरूपं व्यनक्तितराम्।

मन्त्रलिङ्गञ्च—त्रिषु समानम्

शतं सहस्रमयुतं न्यर्बुदमसंख्येयं स्वमस्मिन् निविष्टम्।

अथर्व १०।८।२४।।

त्वं सुतस्य पीतये सद्यो वृद्धौ अजामकाः।।

---

१. सर्वान् खगान्=ग्रहाननुबध्नातीति सर्वखगानुबन्धुः विष्णुः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इन्द्र ज्यैष्ठ्याय सुकृतो।। अथर्व २० ।६६ ।४ ।।

वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम्।
तस्मिन्निद॑ सञ्च वि चैति सर्व॑ स ओतः प्रोतश्च विभूः प्रजासु।।

यजुः ३२ ।८ ।।

अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि सं जयामि शश्वतः।

ऋक् १० ।४८ ।१० ।।

एवा हिते विभूतय उतय इन्द्र मावते। सद्यश्चित्सन्ति दाशुषे।

अथर्व २० ।६० ।५ ।।

भवन्ति चात्रास्माकम्—

महर्द्धिरन्तः स उ वा बहिश्च
स एव चर्द्धस्तमु वा स्तुवन्ति।
वृद्धस्वरूपः सकलाप्तगर्भो
विश्वं भवत्येकगृहञ्च तस्मिन् ।।४६५।।

मूले तथा जीवति वृद्धरूपे
पुत्रादितज्जञ्च पृथक्स्वभावम् ।
रूपेण वृत्त्या च तथैव भिन्नं
तस्मिन् भवत्येकगृहं समस्तम् ।।४६६।।

एवं खगोले शतशोऽथ गोलान्
गत्या च भिन्नान् किमु धामभिन्नान्।
बध्नाति वृद्धात्मनि सूत्रवत्तान्
वृद्धस्वरूपः स हि बन्धुदृष्टिः ।।४६७।।

महाक्षः—३५३

'अक्ष' शब्दः प्रकृतिप्रत्ययाभ्यां व्याकृतचरः। महाँश्चासावक्षः महाक्षः। सर्वतो महान् सर्वस्याशयिता व्यापयिता वा 'महाक्षः' इत्युक्तो भवति। 'अक्षः' इति चक्रस्यापि नाम। तच्च यथा शकटादेर्गमयिता=प्रवर्तकः, तथायं सूर्यः सर्वस्य गतिदः=सञ्चालकः—अतः सूर्यस्यापि नाम 'महाक्षः' इति।

यावत्यां भकक्षायां सूर्यचन्द्रभौमबुधगुरुशुक्रशनैश्चराणां ग्रहाणां प्रभावसम्पदा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वर्तते, तत्रत्यानां सर्वेषां लोकानामक्षभूतः सूर्य एव। एवं सर्व एव स्वकानां भावानामाशयितारो, गमयितारः, प्रापयितारो, व्यापयितारो वा भवन्ति। दृश्यते च प्रत्यक्षं ग्रहे स्थानभ्रष्टे सति तद्भाव्येऽपि भ्रष्टता।

एवञ्चपि बहुव्रीहिसमासमाश्रित्य वक्तुं शक्यते— महान्तो भूयांसो जगतः प्रवर्तकाः सन्ति यस्य स 'महाक्ष' इति। तथा हि लोकेऽपि दृश्यते—न ह्येकेन चक्रेण किञ्चिद् यन्त्रादिकं चलति। एकमपि प्राणिशरीरं प्रवर्तयितुं तस्मिन् विविधानामक्षाभिधानानामिन्द्रियाणां मनोबुद्धिचित्ताहङ्काराणाञ्च सन्निवेशो विहितः। एवं भगवान् स्वेन महाक्षत्वगुणेन विश्वं व्यश्नुवानो विष्णुरिति विद्भिरुच्यते।

मन्त्रलिङ्गं च—

महान् इन्द्रो य ओजसा कदाचन स्तरीरसि कदाचन प्रयुच्छसि।।

यजु ३३।२७।।

तस्य नाक्षस्तप्यते भूरिभारः सनादेव न छिद्यते सनाभिः।

अथर्व ६।६।११।।

स ओतप्रोतश्च विभूः प्रजासु। यजु० ३२।८।।

भवति चात्रास्माकम्—

विष्णुर्महाक्षो ग्रहगम्यगोले
स्थितान् ह लोकान् गमयत्यजस्त्रम्।
तथा यथा देहमिमं महाक्षं
जीवोऽश्नुते कर्मसु[1] चार्थसार्थः[2] ।।४६८।।

गरुडध्वजः—३५४

'गरुड'शब्दः—'गॄ निगरणे' धातोरौणादिके *"गिर उडच्"* (उणादि ४।१५६) इत्युडच्प्रत्यये सिध्यति। तथा 'ध्वज'शब्दो 'ध्वज गतौ' इति भौवादिकध्वजधातोः पचाद्यति सिध्यति। गिरतीति गरुडः, ध्वजतीति ध्वजः। गरुडश्चासौ ध्वज इति 'गरुडध्वजः' सूर्यः। यतो हि स सर्वं जगन्निगिरन्=आददानो ध्वजति=गच्छतीत्यत एव स आदित्य इति संज्ञां लभते। इममेवार्थं धातुद्वयव्युत्पन्नो 'गरुडध्वज'शब्दो व्याचष्टे।

तथा चास्मिन् गारुडध्वजे विश्वे सर्वस्योत्पत्तिलयव्यवस्थाया व्यवस्थापयिता

१. कर्मसु-इमं देहमश्नुते व्यापारयति, णिजर्थोऽत्राभिप्रेतः। २. अर्थसार्थः=प्राप्तव्यार्थसहायः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भगवान् 'गरुडध्वजः' उच्यते। स च गरुडध्वजो निगरणरूपेण गमनरूपेण वा धर्मेण विश्वं व्यश्नुते वक्ष्यति[1] च सर्गान्तम्।

गरुडः, गारुडो वा पुरुषोऽप्युच्यते, यः सर्पविषस्य हन्ता। सूर्यवंश्याः खे दृश्यमानं गरुडं ध्वजमिव मन्यमानाः, गरुडोपेतं ध्वजं स्वचिह्नं मन्यन्ते। इतरो विहङ्गमोऽपि गरुड एतस्मादेव जीवितमपि सविषं सर्पादिकं निगिरति शीघ्रं गच्छतीति वा। वंशस्थो लक्तकोऽपि निरन्तरचलनाद् ध्वजसंज्ञां लभते।

मन्त्रलिङ्गञ्च—

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।

ऋक् १।१६४।४६।।

तत्रेदं सर्वमार्पितमेजत्प्राणत्प्रतिष्ठितम्। अथर्व० १०।८।६।।

यतः सूर उदेत्यस्तं यत्र च गच्छति । अथर्व १०।८।१६।।

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न।

ऋक् १०।१२६।७।।

भवति चात्रास्माकम्—

सूर्यो हि लोके गरुडध्वजोऽस्ति
विश्वं निगृह्णन् कलते स सर्वम्।
उत्पाद-संहार-विकार-जातै-
र्विश्वं नियच्छन् गरुडध्वजोऽसौ ।।४६६।।

❖ ❖ ❖

अतुलः शरभो भीमः समयज्ञो हविर्हरिः।
सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिञ्जयः।।५२।।

३५५ अतुलः, ३५६ शरभः, ३५७ भीमः, ३५८ समयज्ञः, ३५९ हविर्हरिः। ३६० सर्वलक्षणलक्षण्यः, ३६१ लक्ष्मीवान्, ३६२ समितिञ्जयः।।५२।।

अतुलः—३५५

नास्ति तुला=उपमा यस्य सो'ऽतुलः'। यदिदञ्चतुर्भेदभिन्नं जगद् दृश्यते, न

१. 'वक्ष्यति'—वहधातोः लृटि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्र किञ्चित् केनचित् समं दृश्यते। सर्वस्य हि परस्परं जात्याकृतिगुणादिभेदतो विषमता भवति। तथा च नाम्रवृक्षो वटवृक्षेण, पिप्पलवृक्षेण, जम्बुवृक्षेण, वांपि साम्यं भजति।

एवं सर्वत्र शाकवर्गे वनस्पतिवर्गे प्राणिवर्गे च ज्ञेयम्। तथा च वानरो मनुष्येण, गौरश्वेन, महिषश्चाश्वेन समतां=तुलां न लभन्ते इति। यतो हि सर्वत्रात्र भगवतोऽतुलस्य व्यवस्थैवातुलत्वसंपादिनी। अत्र च व्यापकत्वेन स्थितो भगवान् प्रतिपदं स्वातुलत्वं व्यनक्तिं।

जरायुजादिचतुर्भेदभिन्ने च जगति भगवान् सर्वेषां गुणवीर्यविपाकानां वयसां च पार्थक्यं विधत्ते, विधत्ते च ग्रहगतीश्चाप्यतुलाः स्वातुलत्वस्वभावानुसारम्। सति चैवं परस्परमतुलमिदं जगत् कथं भगवतस्तुलां भजेदिति भगवा'नतुलः' उच्यते। वक्ति च वेदः—**''न द्वितीयो न तृतीयश्चतुर्थो नाप्युच्यते। न पञ्चमो०''** (अथर्व १३।५।३५) इत्यादि।

मन्त्रलिङ्गानि च—

न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः। यजु ३२।३।।
न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते।यजु० २७।३६।।
न त्वदन्यः कवितरो न मेधया धीरतरो वरुण स्वधावन्।
अथर्व ५।११।४।।

नहि नु ते महिमनः समस्य न मघवन् मघवत्तस्य विद्म।
न राधसो राधसो नूतनस्येन्द्र नकिर्ददृशे इन्द्रियं ते।। ऋग् ६।२७।३।।
तमेव मन्येऽहं ज्येष्ठं तदु नात्येति किं चन। अथर्व १०।८।१६।।

भवतश्चात्रास्माकम्—

स विश्वनाथोऽतुलवीर्यविद्यो
विश्वं ह्यतुल्यं कुरुते समस्तम्।
रसेन वीर्येण गुणेन किञ्चा-
तुल्यं विधत्ते वयसा च सर्वम् ।।५००।।

एवंविधे राजति विश्वमात्रे
कः संमिमीते तुलया नरस्तम् ।
शक्ताऽतुलं तं संख्या न भेत्तुं
संख्या स्वयं भेदमियर्त्यतोऽतः।।५०१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शरभः—३५६

'शरः' शृणातेः। यथा च धनुषो निर्गता इषवो हिंसासाधनत्वाच्छरा उच्यन्ते, तथा शाणान्निर्गताः स्फुलिङ्गाः शरा उच्यन्ते, तद्वद् भाः=दीप्तिर्यस्य स 'शरभः'। एतेन सूर्यस्याग्नेर्वा सार्वत्रिकी व्याप्तिर्विज्ञायते। सा च दीप्तिर्यथा शाणेऽन्तर्हिता भवति, तथा सत्तारूपेण सर्वत्र विद्यमानोऽपि भगवान् जगत्यन्तर्हितोऽस्ति।

मन्त्रलिङ्गं च—

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्।

यजु० ३१।१८।।

सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि। यजु० ३२।२।।

इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत्।

ऋक् १०।१७०।३।।

भवति चात्रास्माकम्—

शाणायसोर्घर्षणजा शराभा
या भा तयासौ शरभोऽत्र विष्णुः।
तं सर्वसंस्थं शरभं शरण्यं
नमन्ति पश्यन्ति च देवसंघाः ।।५०२।।

भीमः—३५७

भयार्थकाद् 'भी' धातोरपादाने कारके 'मक्' प्रत्यय औणादिके विभेत्यस्मादिति 'भीमः' सिध्यति। तथा ***'भियः षुग्वा'*** (उणादि १।१४८) इत्यौणादिके वैकल्पिके षुकि मकि च प्रत्यये 'भीष्मः' सिध्यति, समान एवार्थ उभयोः।

भीमो भयहेतुरित्यर्थः। यस्माद् यो बिभेति स भयस्य हेतुभूतस्तं बिभ्यतं प्रति 'भीमः'इत्युच्यते। लोकेऽपि चायमेव नियमो दृश्यते—यथा बलवतोऽबलो बिभेति सवषाच्च निर्विष इति प्रत्येकं वस्तु यत्संहर्तृ तत्संहार्यमुद्दिश्य भीमाभिधानं लभते। मृत्योः सर्वं बिभेत्यतोऽत्यन्तं भयानकरूपिणं तं भीमं साक्षान्मृत्युरयमिति ब्रुवन्ति। एवं भीमरूपेण सर्वत्र भगवान् विष्णुरेव व्याप्त इति मन्यमानो जनो न बिभेति न कञ्चिद् भापयते।

मन्त्रलिङ्गञ्च—

आशुः शिशानो वृषभो न भीमो। यजु० १७।३३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मृगो न भीमः कुचरो गिरिष्ठाः। ऋग् १० ।१८० ।२ ।।
सिंहो न भीमो मनसो जवीयान्। ऋग् ६ ।६७ ।३८ ।

भवतश्चात्रास्माकम्—

प्रकम्पयन् विष्णुरिदं समस्तं
विधानबद्धं त्वचलं विधत्ते ।
भीमाभिधो भीममनाश्च मृत्यु-
मर्त्यं भयार्तं कुरुते स्वभोज्यम् ।।५०३।।

सर्वं जगद् भीमपदेन युक्तं
सद् भीमभीतं रमतेऽप्रमत्तम् ।
स्वयं भयं नार्हति भीतभीतम्
शम्भुः स्वकान्नो[१] भयमेति भीमः।।५०४।।

समयज्ञः—३५८

समः=समानः—अयो=गमनं 'समयः' शकन्ध्वादेराकृतिगणत्वात् पररूपम्। यद्वा—सम्यगयः=गमनं'समयः' तं जानातीति 'समयज्ञः'। प्रतिजानते ह्यस्य विश्वस्य चतुर्दशमन्वन्तराणि परमायुर्ज्योतिर्विदः। तस्मिन्नियतायुष्यके विश्वे किं किं भवित्रिति भगवन्तं समयज्ञं विना को ज्ञातुं शक्नुयादिति स भगवान् विष्णुरेव 'समयज्ञः' इत्युक्तो भवति।

दिवानिशोः षष्टिघट्यात्मकः समयः कुतो व्यवस्थित इति स एव जानात्यतः स समयज्ञः। ग्रहगतिभेदादुत्पन्नं मासक्षयं मासवृद्धिं वा तज्जनितं प्राणिहिताहितञ्च स वेत्तीति 'समयज्ञः' स उक्तो भवति व्यस्थापयिता सूर्यस्य। इह च भूगोले सूर्यशैत्यौष्ण्यकृतदेशभेदानुसारं यादृक्काल आयाति प्राणिप्रलयोद्भवकरस्तस्य स एव व्यवस्थापयितातः स 'कालज्ञः' काल इति चोच्यते।

मृत्युरपि 'कालः' 'कालज्ञश्च'। यतो हि स वेत्ति प्राणिनां जीवनाय नियतकृतमायुषः प्रमाणं, ग्रसते च तान् स यथाकालमिति। लोकेऽपि च दृश्यते—स्वयङ्कृतव्यवस्थानो यन्त्राधिपतिः प्रत्येकं कर्मकराणां कार्यकालं जानाति, तस्मात् 'समयज्ञ' उक्तो भवति। अमुथैव समयज्ञेन व्यवस्थापिते जगति

१. 'नो' निषेधार्थीयमव्ययम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यथानियतकालमाम्रमञ्जरीणामुद्गमो भवति। एवं लौकिकीं सरणिमनुसरद्भिर्विविधमूहनीयम्।

मन्त्रलिङ्गञ्च—

संख्याता अस्य निमिषो जनानामक्षानिव श्वघ्नी निमिनोति तानि।

अथर्व ४।१६।५।।

यो भूतं च भव्यं च सर्वं यश्चाधितिष्ठति।
स्वर्यस्य च केवलं तस्मै ज्येष्ठाय ब्रह्मणे नमः।। अथर्व १०।८।१।।

त्वं सुतस्य मदे अरिणा अपो वि वृत्रस्य समया पाष्यरुजः।

यजु० १।५६।६।।

भवन्ति चात्रास्माकम्—

विष्णुः स एकः समयज्ञ उक्तः
स एव जानाति शुभाशुभे च।
मन्वन्तराणामित उत्तराणां
कल्पे ह्वि जागर्ति सदाप्रमत्तः ।।५०५।।

तञ्चानुकुर्वन् मनुजोऽपि तद्वत्
बध्नाति कालस्य सदैव यातिम्[1]।
परन्तु दोषोपहतस्वभावः
प्राप्नोति शैथिल्यकृतावरोधान् ।।५०६।।

नैवंविधं दोषमुपैति शम्भु-
र्विश्वं नियच्छन्निह कालरज्ज्वा।
तं कालबन्धं स हि कालबन्धुः
सर्गान्तमित्त्वा विदधाति सर्वम् ।।५०७।।

अतः स लोके समयज्ञ उक्तो
गतिर्हि काले स पलैर्हि कल्यः।
कालो गतिर्वा गणकेन शक्या
संख्यातुमत्राविरतं यतित्वा ।।५०८।।

---

१. यातिं=सरणिम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हविर्हरिः—३५६

'हु' धातोरौणादिक 'इसि' प्रत्यये 'हविः'। 'हरते' रौणादिके 'इनि' प्रत्यये 'हरिः'। हविर्द्वारेणाहूतो विष्णुः स्वात्मानं प्रापयत्यतः स विष्णु'र्हविर्हरि'रित्युक्तो भवति।

लोके चापि पश्यामः—आह्वानविधयाहूतः सर्वोऽपि स्वात्मानं प्रापयति=प्रकाशयति यथा समर्यादं गीतः शब्दः रागरागिणीषु निबद्धः स्वं स्वरूपं हरति=प्रापयति देवरूपं, तथा निर्मर्यादं संलग्नविकृतस्वरस्त्यक्तस्वरो वा गीतो देवमपाकरोति। अत एव वेदे बहुत्रोक्तम्— **''हविषा विधेम''** (यजु० १३।४) **''श्रद्धया हूयते''** (ऋक् १०।१५१।१) **''सोम रारन्धि नो हृदि गावो न यवसेष्वा। मर्य इव स्व ओक्ये''** (ऋ० १।९१।१३) इत्यादि।

मन्त्रलिङ्गञ्च—

आ त्वा सुशिप्रहरयो वहन्तूशन्हव्यानि प्रतिनो जुषस्व।ऋक् १।१०१।१०।।

अया रुचा हिरण्या पुनानो विश्वा द्वेषांसि तरति स्वयुग्वभिः।
सूरो न स्वयुग्वभिः। धारा सुतस्य रोचते पुनानो अरुषो हरि।।
ऋक् ६।१११।१।।

अतन्द्रो दूतो अभवो हविर्वाट्। 'ऋक् १।७२।७।।

समिद्धो अग्न आहुत देवान्यक्षि स्वध्वर। त्वं हि हव्यवाडसि।।
ऋक् ५।२८।५।।

'तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम्।
पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये।।
यजु० २५।१८।।

यथा च भृत्यः पुत्रः स्त्री राजा गुरुरभ्यागत इमे सर्वे भिन्नभिन्नसम्बोधनपदैराहूयमानाः प्रापयन्त्यात्मानमित्यतो विज्ञायते विष्णोरेवैष आह्वानसाधनात्मकप्रापणरूपो गुणः सर्वजगद्व्यापक इति।

भवति चात्रास्माकम्—

यदत्र विश्वे विभुना निबद्धं
तत्सर्वकं स्वैरभिधानमन्त्रैः[1]*।*
ह्वातारमभ्येति स विष्णुरुक्तो
हविर्हरिर्विश्वमुखोऽक्षिबाहुः।।५०६।।

१. स्वमर्यादितविधिना।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वलक्षणलक्षण्यः—३६०

'लक्ष दर्शनाङ्कनयोः' इति चौरादिको धातुः। 'सर्व'शब्दः साकल्यवचनः। अङ्क्यते दर्श्यते वा येन तल्लक्षणम्, सर्वाणि च तानि लक्षणानि सर्वलक्षणानि तैर्लक्ष्यते ज्ञायत इति 'लक्षणः'। 'लक्षि' धातोः ***'बहुलमन्यत्रापि'*** (उणा० २।७८) इत्युणादिसूत्रेण 'युच्' प्रत्ययः कर्मणि। यद्वा—तैर्लक्षयत्यात्मानमिति तेनैवौणादिकेन सूत्रेण कर्तरि 'युच्' प्रत्ययः। एवञ्च जगति दृश्यमानैः सर्वैर्लक्षणैर्यो लक्ष्यते—ज्ञायते, ज्ञापयति वात्मानमिति सर्वलक्षणलक्षणः, सर्वलक्षणलक्षणे साधुः सर्वलक्षणलक्षण्यः ***'तत्र साधुः'*** (पा० ४।४।९८) इति ताद्धितो 'यत्'।

एवञ्च लक्षणभूतेन जगता जगदन्तर्गतैश्च नानाविधैरङ्कैश्चिह्नैः स लक्षितो बोधितो भवति, बोधयति वा स्वयमात्मानमित्यर्थत आयाति।

लोकेऽपि च पश्यामो नश्वरेऽस्मिन् पार्थिवे शरीरेऽव्यक्तोऽत एवातीन्द्रियोऽपि जीवात्मा शरीरेहाजन्यक्रियामयैर्भावैर्लक्ष्यते, लक्षयति वा जीवः स्वयं स्वसत्ताम्। इत्थमेव भगवान् विष्णुरपि देवमनुष्यादिशक्त्यगोचरैर्जगद्रचनाप्रकारैर्नानाविधैर्भावैर्व्यवस्थानियमैश्चाप्रत्यक्षोऽपि लक्ष्यते—प्रत्याय्यते, लक्षयति—प्रत्याययति वा सर्वव्यापिकां स्वसत्तामिति।

अपरञ्चोदाहरणं यथा—सन्तप्तस्य पयसो यः 'सूं सूं' इत्याकारः, प्रज्वलतोऽग्नेर्यो धग्धगादिरूपस्तथा पच्यमानायाः कृशरायाश्च यः खड़बड़ादिरूपोऽव्यक्तो ध्वनिस्तेन ध्वनिना तारत्वमन्दत्वनिवृत्तिरूपैः पय आदीनामुत्फाणौष्ण्यनैयून्यादिरूपः प्रचण्डमन्दज्वालादिरूपस्तथा स्थाल्यासङ्गाधिकसन्तापादिरूपश्चान्तर्गतो विकारो लक्ष्यते। एवमन्यत्राप्यूहनीयम्।

अथापि च दृश्यते लोके—मृत्युमाप्नुवति प्राणिनि मरणात् प्राग् अरिष्टानां मरणलक्षकानां लक्षणानां प्रादुर्भावो भवति। तत्रापि तैर्मरणसूचकैर्लक्षणैः कालरूपस्य भगवतः सत्ता लक्ष्यत इति मृत्युरपि सर्वलक्षणलक्षण्याभिधानार्हः। उक्तञ्च चिकित्साकोविदैराचार्यैः—**'मरणञ्चैव तन्नास्ति यन्नारिष्टपुरस्सरम्।'** अरिष्टलक्षणमपि तत्रैव चरके—

क्रियापथमतिक्रान्ताः केवलं देहमाश्रिताः।
दोषाः कुर्वन्ति यल्लिङ्गं दरिष्टं प्रचक्षते ॥

चरक इन्द्रियस्थाने अ० ११—श्लोक २६

मन्त्रलिङ्गञ्च—

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्॥

ऋक् १।२२।२०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्य योनिं परिपश्यन्ति धीराः तस्मिन् ह तस्थुर्भुवनानि विश्वा।।
यजु० ३१।१६।।

वेनस्तत् पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम्।
यजु० ३२।८।।

उपेदहं धनदामप्रतीतं जुष्टां न श्येनो वसतिं पतामि।
इन्द्रं नमस्यन्नुपमेभिरर्कैर्यः स्तोतृभ्यो हव्यो अस्ति यायन् ।।
ऋक् १।३३।२।।

को अद्धा वेद क इह प्रवोचत् कुत आ जाता कुत इयं विसृष्टिः।
अर्वाग् देवा अस्य विसर्जनेनाथा को वेद यत आबभूव।।
ऋक् १०।१२६।६।।

भवति चात्रास्माकम्—

विश्वं समस्तं [1]सकलप्रसूर्भू-
र्व्यनक्ति सा स्वात्मभवैर्विकारैः ।
स्वभावभिन्नैः क्षणभंगुरैश्च
विष्णुस्तथा [2]लक्ष्मभिरस्ति गम्यः।।५१०।।

लक्ष्मीवान्—३६१

लक्ष्मीशब्दो व्याख्यातचरः। लक्ष्मीरस्यास्मिन् वास्तीति 'लक्ष्मीवान्'। लक्ष्मीति विभूतेः सम्पदो विष्णुपत्न्या वा नाम।

मन्त्रलिङ्गं च—

अयमग्निः पुरीष्यो रयिमान् पुष्टिवर्धनः ।
अग्ने पुरीष्याभि द्युम्नमभि सह आयच्छस्व।। यजु० ३।४०।।
अश्याम तं काममग्ने तवोती अश्याम रयिं रयिवः सुवीरम्।
ऋक् ६।५।७।।

वृषभो द्युम्नवाँ असि समरध्वष्विध्यसे। ऋक् ५।२८।४।।
ऋतं सत्यं तपो राष्ट्रं श्रमो धर्मश्च कर्म च।

---

१. सकलप्रसूः=सकलस्य चराचरस्य प्रसवित्री=जननी। २. लक्ष्मभिः=लक्षणैश्चिह्नैरित्यर्थः। तथा च—**सर्वलक्षणलक्षण्य उक्तः शम्भुः सनातनः।**
सुकारैर्वा विकारैर्वा, चिह्नैरन्तः प्रकाश्यते।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भूतं भविष्यदुच्छिष्टे वीर्यं लक्ष्मीर्बलं बले ।। अथर्व ११।७।२७।।

सूर्योऽपि लक्ष्मीवानुच्यते । तथा च मन्त्रलिङ्गम्—

भूरिदा भूरि देहि नो मा दभ्रं भूर्याभर। भूरि चेदिन्द्र दित्ससि।।

भूरिदा ह्यसि श्रुतः पुरुत्रा शूर[1] वृत्रहन्। आ नो भजस्व राधसि।।

ऋ० ४।३२।२०, २१।।

राधो=धनम्। धनञ्चापि लक्ष्मीत्युच्यते, यतो हि भूमिष्ठमपि धनं स्वामिनो मस्तिष्केणाङ्कितं=दृश्यं भवत्यतो लक्ष्मीपदेनोच्यते। सर्वस्य भोगसाधन-भूताया लक्ष्म्याः स एव स्वामीति कृत्वा 'लक्ष्मीवानु'क्तो भवति।

भवति चात्रास्माकम्—

लक्ष्मीर्यदङ्कं समुपैति लौल्यात्
तत्पार्श्वमभ्येति पदञ्च विष्णोः ।
विष्णोर्हि लक्ष्मीः कथितास्ति पत्नी[2]
तद्वान् तया विश्वमिदं बिभर्ति[3] ।।५११।।

समितिञ्जयः—३६२

समितिः=युद्धं तज्जयतीति 'समितिञ्जयः'। समित्युपपदाद् 'जि अभिभवे' धातोः ***''संज्ञायां भृतृवृजिधारिसहितपिदमः''*** (पा० ३।२।४६) इति सूत्रेण 'खचि' प्रत्यये 'मुमि' च 'समितिञ्जयः' शब्दो निष्पद्यते।

यद्यपि योद्धृणामयन्नियमो यत्समेन=स्वतुल्योपकरणबलेन युध्येत, यथा शस्त्री शस्त्रिणा रथी रथिना पदातिः पदातिना युध्येत, किन्तु न कश्चिद् भगवतो विष्णोः सम इति प्रतिद्वन्द्व्यभाव एव 'समितिञ्जय' शब्देनोच्यते। तथाभूतश्च विष्णुरेव यस्य न कश्चित् प्रतिद्वन्द्वी अतो विष्णुरेव 'समितिञ्जय' शब्दवाच्यः।

यद्वा—लोकदर्शनानुसारं यथा व्यवसायी मनुष्यो नित्यं स्वेष्टसिद्ध्यै व्यवसायिनान्येन युध्यते। विद्यार्थी विद्याप्त्यै पाठशालायामधीयानो विद्यया स्वसमानैर्विद्यार्थिभिश्च सह युध्यमान इव तिष्ठति, जयति चान्ततो विद्याम्। स्वसमानबलेन मल्लेन युध्यमानो जयत्यल्पबलमपरो बलवान् मल्लः।

---

१. शूर ! वृत्रहन् ! इति सूर्यविशेषणे ज्ञेये, विष्णोर्वा। २. तथा च मन्त्रो लक्ष्म्या विष्णुपत्नीत्वे— **'श्रीश्च ते लक्ष्मीश्च पत्न्यौ।'** यजु० ३१।२२।। ३. बिभर्तीति क्रिया कालत्रयोपलक्षिका—बभार, बिभर्ति भरिष्यति च।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बलवाँश्चैकोऽपि बहुभिर्युध्यमानस्तान् सर्वान् जयति स चात एव महाबल इत्युक्तो भवति। एवमेकेन धार्मिकेण सहस्रमधार्मिका युध्यन्ते, किन्तु स तान् सर्वान् पराजयते। एतेषु सर्वत्र जेतृषु भगवान् स्वशक्तिं निधाय सर्वान् जयन् भगवानेव 'समितिञ्जयः' उच्यते। तथा च वेदः—**'यं कामये तं तमुग्रं कृणोमि'** (ऋक् १०।१२५।५)। एवं सर्वे प्राणिनो यावज्जीवं युध्यन्ते, किन्तु विजयन्ते भगवत्कृपाभाज एव। कृपा हि नाम सामर्थ्यं, क्लृपू सामर्थ्ये धातोर्निष्पन्नत्वात्। एवं भगवतः समितिञ्जयत्वं सर्वत्र व्याप्तं दृश्यते सनात्।

मन्त्रलिङ्गञ्च—

प्रभञ्जन् सेनाः प्रमणो युधा जयन्नस्माकमेध्यविता रथानाम्।

यजु० १७।३६।।

जयेम शतिनं सहस्रिणं वैश्वानर वाजमग्ने तवोतिभिः।

ऋक् ६।८।६।।

संक्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत् साकमिन्द्रः।

ऋक् १०।१०३।१।।

इन्द्रो जयाति न पराजयाता अधिराजो राजसु राजयातै।

अथर्व ६।९८।१।।

न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते।

यजु० २७।३६।।

भवन्ति चात्रास्माकम्—

समानमानाः स्वसमानमानै-
र्युध्यन्त आत्मेष्टमवाप्तुकामाः ।
एकेन साकं शतिनो यदा स्युः
सहस्रिणो वा किमु वाप्यनल्पाः।।५१२।।

एको हि यस्तान् हतभान् विधत्ते
न तत्र मर्त्योद्भवमस्ति वीर्यम् ।
तत्रास्ति शम्भोः समितिञ्जयस्य
बलं ह्यजय्यं हृदि सर्वभानोः ।।५१३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स एव मर्त्ये किमु जीवमात्रे
सामर्थ्यमाधाय निजं ह्यधृष्यम् ।
नित्यं विधत्ते समितिञ्जयन्तं
तं विश्ववन्द्यञ्च नमन्ति तस्मात्।।५१४।।

❖ ❖ ❖

विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः।
महीधरो महाभागो वेगवानमिताशनः ।।५३।।

३६३ विक्षरः, ३६४ रोहितः, ३६५ मार्गः, ३६६ हेतुः, ३६७ दामोदरः, ३६८ सहः। ३६९ महीधरः, ३७० महाभागः, ३७१ वेगवान् ३७२ अमिताशनः।।५३।।

विक्षरः—३६३

क्षरति स्वरूपाच्च्यवत इति 'क्षरः'। विगतः क्षरादिति'विक्षरः', अच्युतस्वरूपोऽक्षरः। विक्षराक्षरौ शब्दौ समानार्थौ।

मन्त्रलिङ्गञ्च—

ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः।

ऋक् १।१६४।३९।।

यस्मान्न ऋते विजयन्ते जनासो यं युध्यमाना अवसे हवन्ते ।
यो विश्वस्य प्रतिमानं बभूव यो अच्युतच्युत् स जनास इन्द्रः।।

अथर्व २०।३४।९।।

ध्रुवोऽच्युतः प्रमृणीहि शत्रूञ्छत्रूयतोऽधरान् पादयस्व।

अथर्व ६।८८।३।।

भवति चात्रास्माकम्—

स विक्षरः सर्वगुहानुसृप्तः
स्वाभाविकज्ञानबलक्रियाभिः।
न क्षीयते नान्यमुपैति भावं
तमक्षरं विष्णुमिहार्चयन्ति ।।५१५।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रोहितः—३६४

'रुह बीजजन्मनि प्रादुर्भावे च' इति धातुः ततो ***''रुहे रश्च लो वा''*** (उणादि ३।६४) इत्युणादिसूत्रेण 'इतन्' प्रत्ययो, रोहति=प्रादुर्भवतीति रोहितः। प्रादुर्भावो नामान्तर्हितस्य सतो व्यक्तीभावः। यद्वा—रोहयति=प्रादुर्भावयतीति रुहेरन्तर्गर्भितण्यर्थः। एवञ्च यः स्वयं नानारूपेषु प्रादुर्भवति, प्रादुष्करोति वा नानाविधान् पदार्थान् स 'रोहित' इत्युच्यते।

यथा हि सूर्यः स्वयमुदेत्य स्वोदयेन पृथिव्यन्तर्गतानि बीजानि—आरोहयति=प्रादुष्करोति, उत्पादयतीत्यर्थः, तथा च सर्वरोहहेतुभूतः सूर्यो 'रोहितः' इत्युच्यते, अमुथैव स्वाभीद्धेन तपसा सर्वसूर्यादिग्रहसहितजगत्प्ररोहहेतुभूतोऽथवा तत्तद्रूपैः स्वयं बहुधा व्यक्तो भगवान् विष्णुः—'रोहित' नाम्नोच्यते।

मन्त्रलिङ्गं च —

नमो रोहिताय स्थपत्ये। यजु० १६।१६।।

यो रोहितो विश्वमिदं जजान स त्वा राष्ट्राय सुभृतं बिभर्तु।।

अथर्व १३।१।१।।

यो रोहितो वृषभस्तिग्मशृङ्गः पर्यग्निं परि सूर्यं बभूव।

अथर्व १३।१।२५।।

रोहितो रश्मिभिर्भूमिं समुद्रमनु सं चरत्। अथर्व० १३।२।४०।।

भवति चात्रास्माकम्

स रोहितो विष्णुरिदं समस्तं
युगे युगे रोहयतीह [1]दृश्यम्।
तथा यथा [2]बीजमनन्तमन्तः-
सुप्तं[3] स्वभावेन[4] भवेच्च दृश्यम्[5]।।५१६।।

मार्गः—३६५

'मार्ग अन्वेषणे' धातुश्चुरादावाधृषीयः ततः कर्मणि 'घञि' मार्ग्यत इति 'मार्गः'। आधृषीयत्वाण्णिजभावपक्षे ण्यन्तात् ***''एरच्''*** (पा० ३।३।५६) इत्यनेन

१. चराचरम्। २. बीजमिति जातावेकवचनम्, अनन्तं संख्यातुमशक्यम्। ३. सुप्तं मूर्छावस्थापन्नम्। ४. स्वभावेन=प्रवाहतोऽनादिमद् भावेन। ५. दृश्यं भवेत्=कार्यरूपतां, चक्षुरिन्द्रियविषयतां वा प्राप्नुयादिति। लोके च पश्यामः सर्वमुत्पद्यते—उत्पद्य च सर्वमन्यदन्यस्योत्पत्तिहेतुर्भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अचि णेर्लोपे च 'मार्गः' इति। आनन्दरूपो हि भगवान्, सर्वे च मार्गयन्त्यानन्दमिति सर्वैर्मार्ग्यमाणत्वा'न्मार्गो' भगवान् विष्णुः।

लोके च मार्गणसाधनभूतः पन्था अपि 'मार्ग' शब्देनाभिधीयते। तथा हि पश्यामो लोके—अन्वेष्टव्यमन्वेष्टुकामः पन्थानं मध्यमं करोति। तेन च पथा तदन्विष्य—अर्थात् प्राप्तव्यमधिगत्य विरमति।

अमुथैव भगवन्तं प्रेप्सूनां भगवत्प्रापणसाधनत्वेन मध्यमभूतो भास्करो, जीवान् भगवन्तं प्रापयितुमाकल्पं यतते मार्गभूतोऽत एव स प्रत्येकं प्राण्यधिगन्तव्यत्वेन 'मार्ग'इति संज्ञां लभते।

मन्त्रलिङ्गञ्च—

यतः सूर्य उदेत्यस्तं यत्र च गच्छति ।
तदेव मन्येऽहं ज्येष्ठं तदु नात्येति किं च न।। अथर्व १०।८।१६
तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।
यजु० ३१।१८।।
यस्यासौ पन्था रजसो विमानः कस्मै देवाय हविषा विधेम।
अथर्व ४।२।३।।
येन सिन्धुं महीरपो रथाँ इव प्रचोदयः पन्थामृतस्य यातवे तमीमहे।।
अथर्व २०।६३।६।।

भवति चात्रास्माकम्—

अशेषलिप्साविषयः स एको
मार्गाभिधानः सकलाध्वभूतः ।
बह्वन्तरालव्यवधानसत्तं
स[1] ब्रह्मतत्त्वं कुरुतेऽधिगम्यम्।।५१७।।

हेतुः—३६६

हिनोति कार्यरूपेण वर्द्धत इति'हेतुः' कारणं वा। 'हि गतिवृद्ध्यो'रिति सौवादिकाद्धातोः ***'कमिमनिजनि'*** (उणादि १।७३) इत्याद्युणादिसूत्रेण 'तुः' प्रत्ययो गुणश्चेति 'हेतु' शब्दः सिध्यति। यथा गर्भाशयगतं कारणरूपं बीजं कार्यभावमापद्य वृद्धं सत्स्वलक्षणैरात्मानं व्यनक्ति तथैव जगद्बीजं भगवान् विष्णुः

१. सः=सूर्यः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कामरूपतामापद्य तत्कार्यं जगत् सृजन् विचित्रैर्जगल्लक्षणैः स्वकामं प्रकाशयन् व्यनक्ति स्वस्य सार्वत्रिकीं व्यष्टिमिति स 'हेतु'संज्ञामाप्नोति।

लोकेऽपि च पश्यामः—उदरमध्यगतो भक्षितो मूलकनामा कन्दो दर्शनागोचरोऽपि पक्तिमापद्यमानः स्वलक्षणैरात्मानं व्यनक्ति। योऽयं लक्षणकृतो व्यापारो यं व्यनक्ति स 'हेतु'रिति। अत एव चादिकारणं हेतुरित्युक्तो भवति। एवं भगवान् विष्णुः सर्वलोकलोकान्तररूपेण कार्येण स्वस्यादिकारणत्वं व्यञ्जयन् 'हेतु' रुक्तो भवति।

मन्त्रलिङ्गञ्च—

तस्माद्ध जज्ञ इदं सर्वं यत्किं चेदं विरोचते। अथर्व १३।१।१५५।।

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न।

ऋक् १०।१२। ।१।।

यो विष्टभ्नाति पृथिवीं दिवं च तस्माद्देवा अधि सृष्टीः सृजन्ते।

अथर्व १३।१।२५।।

अर्धेन विश्वं भुवनं जजान यदस्यार्धं कतमः स केतुः।

अथर्व १०।८।१३।।

प्रजापतिश्चरति गर्भे अन्तर जायमानो बहुधा विजायते।

यजु० ३१।१६।।

भवति चात्रास्माकम्—

हेतुर्हि विष्णुः स हि कामरूपो
विश्वं सृजन् तत्प्रभवैर्विकारैः।
व्यनक्ति हेतुत्वमचिन्त्यरूपै-
स्तथा यथा मूलकमात्मरूपैः।।५१८।।

दामोदरः—३६७

दाम रज्जुः, बन्धनं वा, तदुदरे यस्य तद्दामोदरं जगत्, तदस्यास्मिन्निति वा दामोदरः, मत्वर्थीयोऽच्। सर्वेषामन्नाशिनां पेयपायिनां चोष्यचोषिणां चर्व्यचर्विणाञ्च प्राणिनामुदरेष्वन्त्राणां सद्भावोऽस्ति । अन्त्राणामुपचितिरेव ज्ञानेन ज्ञानिनो बध्नाति, यथा शरीरबलोपचित्या मल्लं मल्लोऽपरो बध्नाति।

मूलानुसन्तताः क्षुपलतावृक्षादीनाञ्च स्थूलसूक्ष्मजटाप्रताना रज्जुरिव भवन्ति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्थमिदं सकलं जगत्—रज्जुमत् स'द्दामोदर' नाम्नोक्तं भवति। यथा बहुसूत्रानुग्रथितः सूत्रराशी रज्जुनाम बिभर्त्ति, तथा बहुत्रुटिपलादिग्रथितो दिनाद्युपचितो मासाभिधः कालो, विकलाकलांशादिभिरुपचितो ग्रहसंक्रान्तिमार्गो राशिश्च रज्जुसमतामापन्नो 'रज्जु'नामा भवति।

एवं भगवतो विराज उदरे दामरूपै राशिभिर्निबद्धान् दामोदरवद् भान्तः स्वव्यापकं दामोदरं स्तुवतश्च सूर्यादिग्रहाननुकुर्वन्तो, ग्रामजनपदमण्डलप्रान्त-देशौपाधिका भूखण्डा अपि पथिततिरूपया रज्ज्वा निबद्धाः स्वस्य दामोदरत्वं विज्ञापयन्ति। एवंमिदं सर्वं जगद् भगवतः दामोदरस्य व्याख्यानभूतमस्ति।

मन्त्रलिङ्गानि च—

यो विद्यात् सूत्रं विततं यस्मिन्नोताः प्रजा इमाः। अथर्व १०।८।३७।।

तस्मिन्निदं सं च विचैति सर्वं स ओतः प्रोतश्च विभूः प्रजासु।

यजु ३२।८।।

उदुत्तमं वरुणपाशमस्मदवाधमं वि मध्यमं श्रथाय। ऋक् १।२४।१५।।

ये ते पाशा वरुण सप्त सप्त त्रेधा तिष्ठन्ति विषिता रुशन्तः।

अथर्व ४।१६।४।।

भवन्ति चात्रास्माकम्—

सूत्रानुसूत्रैर्वलितं हि यत् स्याद्
दामेति संज्ञां लभते तदेव ।
यथा तथा प्राणकलांशयुक्तो
राशिस्तथैवास्ति च मास उक्तः।।५१६।।

ग्रहा निबद्धाः किल राशिभोगैः
कालो निबद्धो दिनरात्रिमासैः ।
एवं हि जीवा रदनैर्निबद्धा
ये ते च बद्धा उदरान्त्रजालैः ।।५२०।।

अतः स विष्णु कथितः सुविज्ञै-
र्दामोदरः सर्वजगत्प्रसृप्तः ।
यथा सदन्तास्तरवस्तथैव-
मूलैर्जटाभिश्च निबद्धपादाः ।।५२१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एवं जगद्दामनिबद्धमन्त्रै-
र्दामोदरं ख्याति च पुष्पहासम्।
दामोदरस्यानुचरंश्च शिल्पी
करोति यन्त्राणि सबन्धनानि ।।५२२।।

सहः—३६८

सहते सर्वमिति 'सहः' पचाद्यच्। 'सहो' हि भगवान् विष्णुः, स हि सर्वदा समावस्थोऽविक्रियः पुण्याचारमपुण्याचारं वा सर्वं सहते 'नाशुभाचाराय क्रुध्यति, न च शुभचाराय स्पृहयति। सर्वस्य साक्षी शुभाशुभफलदानप्रतिभूः।

लोकेऽपि च पश्यामः सर्वेऽपि जीवाः समविषमभावं भजमाना अपि सहनशीलाः। इयं हि सहनशीलता तेषां सर्वव्यापकस्य भगवतः सर्वत्र व्याप्तं सहत्वरूपं गुणं व्यनक्ति।

मन्त्रलिङ्गं च—

प्र चक्रे सहसा सहो बभञ्ज मन्युमोजसा। ऋक् ८।४।५।।
सहोऽसि सहो मयि धेहि'। यजु १६।६।।
विश्वं दधिषे केवलं सहः। अथर्व २०।१५।६।।

भवति चात्रास्माकम्—

सहो हि विष्णुः कुरुते च सर्वं
सहिष्णु दृश्यं किमु वाप्यदृश्यम्।
यथाबलं यत् सहते तथा त-
ज्जपद् व्यनक्त्येव सहं सनात्तम्।।५२३।।

महीधरः—३६९

मही पूज्या वेदवाणी तस्या धरो=धारयिता महीधर इत्युच्यते। यद्वा-महीशब्दः सामान्यवाणीवचनस्तस्या धरः।

मन्त्रलिङ्गानि च—

उच्छिष्टे घोषिणीरापः स्तनयित्नुः श्रुतिर्मही। अथर्व ११।९।२०
यत्र ऋषयः प्रथमजा ऋचः साम यजुर्मही । अथर्व १०।७।१४।।
इयं या परमेष्ठिनी वाग्देवी ब्रह्मसंशिता । अथर्व १९।९।३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अयं यज्ञो विश्वस्य भुवनस्य नाभिर्ब्रह्मायं वाचः परमं व्योम।
अथर्व ६।१०।१४॥

इडा सरस्वती मही तिस्रो देवी मयोभुवः।
बर्हि सीदन्त्वस्रिधः॥ ऋक् १।१३।६॥

हन्वोर्हि जिह्वामदधात् पुरीचीमधा महीमधि शिश्राय वाचम्॥
अथर्व १०।२।७॥

सत्या हि वागग्न्याश्रया सूर्याश्रया वा, भौमोऽग्निः सूर्यांशत्वात् सूर्यरूप एव। सर्वत्र भगवता वाचोनिधानेन स्वस्य व्याप्तिर्दर्शिता। मेघेष्वपि विद्यते स्तनथुरूपा वाक्। ज्योतिर्विदाञ्चैष समयः, प्राकृतगणनया राशीनां पञ्चमं स्थानं वाचो, विद्यायाः, ज्ञानस्य, सन्तानस्य वा सूर्यस्य पञ्चमराश्यधिपतित्वात्।

यथाभूतञ्च यस्य पञ्चमं स्थानं, तथाभूतं तस्य तद्भावभवं फलं भवति। यथा च वाणीधरो भगवान् तथा वेदवागीशोऽप्युच्यते। एतेनेहानुक्तमपि सगुणं 'वेदवागीशे'ति नाम व्याख्यातं भवति।

भवतश्चात्रास्माकम्—

महीधरो विष्णुरचिन्त्यशक्तिः
प्रजाः सवाचो विदधात्यशेषाः ।
[1]साम्ना स्तुवत्यो विविधेन वाचा
[2]पदं तृतीयं गमयन्त्यनिन्द्यम् ॥५२४॥

वाणीधरं ये भुवि भारभूता-
स्त्यक्त्वा नरा मर्त्यमरं स्तुवन्ति ।
ते स्वप्रयुक्तां वृथयन्ति वाचं
मर्त्येन साकं म्रियते च वाक् सा॥५२५॥

महाभागः—३७०

महान्=बृहद् भागोऽस्येति 'महाभागो' विष्णुः। 'भज सेवायाम्' इति भौवादिकाद्धातोः कर्मणि'घञि' 'भाग' शब्दः सिध्यति। केवलोऽपि भज धातुरिह

१. यदुक्तं विविधेन साम्ना, तत्र मन्त्रः— **''उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम्। नमो भरन्त एमसि॥''** साम० पू० १।२।४॥

२. यदुक्तं पदं तृतीयमिति, तत्र मन्त्रः— **''यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त।''** यजु ३२।१०॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विभजनार्थकः। एवञ्च महान्तो भागाः=विभागा आकाशादयो यस्य स 'महाभागो' विष्णुः। स्वरूपत एकोऽपि भगवान् स्वयमाकाशादिरूपेणाविभक्तोऽपि विभक्त इव प्रतीयमानो 'महाभागा'भिधानं लभते।

तथा हि—आकाशादयो महान्तो भागाः=अंशा इव ते च महतो राशिस्थानीयस्य तस्यैवेति। एको महान् राशिर्यावद्धा विभज्यते, तावत्सु भागेषु व्यापकरूपेण स्थितः सन्नात्मानं तावद्धा व्यनक्ति। यथा पञ्चधा विभक्तो दशकः पञ्चधात्मानं प्रकाशयति, यतो हि स दशको राशिस्तेषु स्वरूपेण व्याप्तः।

विभिन्नविविधपदार्थानां मूलभूतैकराशेर्भगवतो यावानंशो यस्मिन् प्रकाशते, तत् सा स वा तावता भागेन प्रकाशमानो महाभाग उच्यते। वस्तुतो मूलराशिरेव भागात्मना प्रकाशते।

अत उक्तं भवति—भागो भाजकेन गुणितः शेषेण युक्तश्च भाज्यसमानो भवति, निश्शेषतायाः सूचकश्च तत्र गणितकोविदैः शून्यांको (०) निधीयते। अत एव नष्टे वस्तुनि तद्‌गुणः प्रकृतौ लीयते। प्रकृतिर्नाम मूलं कारणं जगतः। चैतन्यरूपो गुणश्च चैतन्ये। तथा च मन्त्रः—**सूर्यं चक्षुर्गच्छतु** (ऋक् १०।१६।३) इत्यादि।

मन्त्रलिङ्गञ्च—

अहं सूर्यस्य परियामि। ऋग् १०।४६।७।।
अहं सा अस्मि यः पुराः। ऋग् १।१०५।७।।
अहं होता न्यसीदं। ऋग् १०।५२।२।।
अहं केतुरहं मूर्धा। ऋग् १०।१५६।२।।
अहं ता विश्वा चकरं। ऋग् ४।५२।६।।
अहमस्मि महामहो। ऋग् १।११६।१२।।
अहमिन्द्रो न पराजिग्ये। ऋग् १०।४८।५।।
अहमेव वात इव। ऋग् १०।२५।५।।
अहमेव स्वयमिन्द्रं। ऋग् १०।१२५।५।।
अहं मनुरभवं सूर्यश्चाहं। ऋग् ४।२६।१।।

ऋग्वेददशममण्डलस्य अष्टचत्वारिंशत्तमस्य तथैकोनपञ्चाशत्तमस्य सूक्तस्य सर्वे मन्त्रा इह मन्त्रलिङ्गमिति बोद्धव्यम्।

अन्यच्च—

''तव प्रयाजा अनुयाजाश्च केवल ऊर्जस्वन्तो हविषः सन्तु भागाः।
तवाग्ने यज्ञोऽयमस्तु सर्वास्तुभ्यं नमन्तां प्रदिशश्चतस्रः।।''

ऋग् १०।५१।६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

स एव सूर्यः स हि सर्वगः स-
न्नंशैः स्वकैर्विश्वमिदं बिभर्ति ।
तं सत्यसन्धाः कवयः पुराणं
स्तुवन्ति नित्यं [1]बहुभागमर्कैः ।।५२६।।

वेगवान्—३७१

'विजिर भयसञ्चलनयोः' इति धातोर्भावे 'घञि' 'वेग'शब्दः सिध्यति। अतिशयितो वेगोऽस्येत्यातिशायनिके 'मतुपि' वेगवान्' विष्णुः। वेगो-जवः। क्षिप्रा गतिर्वा, सा च वाय्वादिषु प्रत्यक्षं दृश्यमाना, कारणगुणपूर्वकाः कार्यगुणा इति न्यायानुसारं सर्वेषां कारणभूते भगवति सिध्यति। अत एव स वेगो वायुमनुयन् तत्कार्येषु वायव्येष्वप्यन्वेति।

वातचराः पक्षिणोऽपि स्वतः सिद्धेन वेगेन यथेच्छमुड्डीयन्ते। वाताग्निसंयोगरूपा विद्युन्महावेगवती दृश्यते। चन्द्रमा वेगवान्, तज्जं मनोऽपि वेगवत् परन्त्वेतत्सर्वापेक्षया वेगवान् विष्णुः सर्वातिशायिवेगो, यतो हि सर्वत्र जगति तद्वेगस्यैव प्रसारः। सर्वत्र हि वायोः सत्ता, अतः सर्वत्र न्यूनाधिकभावेन वेगो वर्तते।

सूर्यो हि प्रकाशवान्। प्रकाशस्य च गतिरत्यन्तं तीव्रा। अतः सूर्योऽपि वेगवान्।

मन्त्रलिङ्गञ्च—

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत् ।
तद्धावतोऽन्यानत्येति तिष्ठत् तस्मिन्नपो मातरिश्वा दधाति।

यजु ४०।४।।

यस्ते रथो मनसो जवीयानेन्द्र तेन सोमपेयाय याहि।
तूयमा ते हरयः प्र दवन्तु येभिर्यासि वृषभिर्मन्दमानः।।

ऋक् १०।११२।२।।

दिवस्पृष्ठे धावमानं सुपर्णमदित्याः पुत्रं नाथकाम उपयामि भीतः।

अथर्व १३।२।३७।।

भवति चात्रास्माकम्—

स वेगवान् विष्णुरनन्तवेगो
निजेन वेगेन जगत्समस्तम् ।

---

१. बहुभागं=महाभागम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तथा विधत्ते गतिमद् यथा ना
प्राप्तव्यमर्थं गमयेच्च वेगात्।।५२६।।

प्राप्नुयादिति शेषः।

अमिताशनः—३७२

न मितं='अमितम्'। अश्यतेऽनेने'त्यशनः'। अमितस्याशनोऽ'मिताशनः' यद्वा=अमितान् प्राणिन आशयति=भोजयतीत्'यमिताशनः' ण्यन्ताद् 'अश भोजने' धातोर्नन्द्यादिलक्षणे 'ल्यौ' 'आशनः'। अमितस्याशनोऽमिताशनः। यतो हि स एवामितानां प्राणिनां भोजनस्य साधनः साधको वेति हेतोर्भगवान् विष्णुर'मिताशन' उक्तो भवति।

अमितत्वञ्च जीवबुद्ध्या, भगवज्ज्ञानेऽनन्ते सर्वस्य मितत्वात्। मनुष्यो=जीवो हि नैकयोनिसम्भूतानां शरीराणामपि मानं कर्तुं प्रभवति। इममेवार्थं बोधयितुं भगवतो नाम्नि 'अमित'पदनिवेशो, मनुः, वसुमना इत्यादि च भगवतो नाम।

इयञ्चैतस्य नाम्न उपपत्तिः—इह हि जगति कियत्यः पिपीलिकाः, कियन्तो मर्कोटकाः (मकौडे), कियन्तो मत्स्या मर्कटाश्चेति, सन्त्येवंविधप्रश्नोत्तरणे मनुष्या मूकाः, परन्तु भगवतोऽमिताशनस्य व्यवस्थया लब्धभोजनाः सर्व एते सूयन्ते वर्धन्ते म्रियन्त इति। इमं महार्थं विज्ञापयितुं भगवतोऽमिताशनेति नाम।

मनुष्यैर्मनुष्या अपि न सम्यक् संख्यातुं शक्यन्ते, इति निर्विवादं वक्तुं शक्यते कुतः? प्रतिक्षणं मरणोत्पत्तिरूपद्वन्द्वस्य सद्भावात्।

मन्त्रलिङ्गं च—

खले न पर्षान् प्रतिहन्मि भूरि किं मा निन्दन्ति शत्रवोऽमिन्द्राः।।
ऋक् १०।४८।७।।

सो अग्निः स उ सूर्यः स उ एव महायशः। अथर्व १३।४।५।।

मां हवन्ते पितरन्न जन्तवो अहं दाशुषे विभजामि भोजनम्।
ऋक् १०।४८।१।।

यो मारयति प्राणयति यस्मात् प्राणन्ति भुवनानि विश्वा।
अथर्व १३।३।३।।

द्युक्षं सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसम्। अथर्व २०।६।२।।

तस्मिन्निदं सं च विचैति सर्वं स ओतः प्रोतश्च विभुः प्रजासु।
यजु० ३२।८।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवतश्चात्रास्माकम्—

अशक्यमानस्य च जीवराशेः
कृतां व्यवस्थां स हि भोजनस्य ।
जानाति विष्णुर्न परोऽस्ति वेत्ता
नमन्ति गायन्त्यमिताशनं तम् ।।५२७।।

सर्वे हि तृप्यन्ति यथा स्वशक्ति
जीवा मृता वा किमु यद्गता वा ।
परन्तु मृत्युर्न हि याति तृप्तिं
लोकेऽस्ति मृत्युर्ह्यमिताशनोऽतः ।।५२८।।

एवं कृत्वा सर्वव्यापकत्वममिताशनस्य।

❖ ❖ ❖

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः।
करणं कारणं कर्त्ता विकर्त्ता गहनो गुहः ।।५४।।

३७३ उद्भवः, ३७४ क्षोभणः, ३७५ देवः, ३७६ श्रीगर्भः, ३७७ परमेश्वरः। ३७८ करणम्, ३७९ कारणम्, ३८० कर्त्ता, ३८१ विकर्त्ता, ३८२ गहनः, ३८३ गुहः ।।५४।।

उद्भवः—३७३

उद्=उच्चैर्भवतीत्युद्भवः' सूर्यः। सूर्यो ह्युच्चैर्भवन् सर्वेण दृश्यते। अन्तर्भावितण्यर्थश्चायमुद्भवशब्दो भगवन्तमभिधत्ते, उच्चैर्भावयतीत्यर्थः। उद्भवत्यस्मादिति वो'द्भवः'। एवञ्च य उद्भवति, यस्मादुद्भवति, यश्चोद्भावयतीति त्रयोऽर्थाः संगृह्यन्ते। तथा च प्रत्येकं वस्तु स्वोपादानादुद्भवद्यथाव्यवस्थं भगवतोद्भाव्यत, इति भगवान् विष्णु'रुद्भव' उच्यते।

लोकेऽपि च पश्यामः—उपस्थद्वारेण मातुरुद्भवन्तं गर्भमपानवायुरुद्भावयति, धात्र्यादयो वोद्भावयन्ति=आकर्षन्तीति। अत एवं वक्तुं शक्यते यदुद्बुभूषुरपि गर्भो दशमासावधि भगवता सुरक्षितो नियन्त्रितश्च गर्भाशये प्रलय इव दशमे मासि चोद्भवति स्वमात्रेच्छाप्रेरितः।

अतो यथोद्भवन् सूर्य 'उद्भव' उच्यते, तथा प्रत्येकं वस्तु स्वयोनेरुद्भवति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मातुरिच्छया भगवांश्चोद्भावयति। सार्वत्रिको ह्येष नियमस्तं सर्वव्यापकं व्यनक्ति प्रात्यक्षिकमिव। यतो हि भगवान् लक्षणैर्लक्ष्यते, अत एव च तस्य प्राग्व्याख्यातं 'सर्वलक्षणलक्षण्यः' इति नाम सूपपन्नं भवति।

पृथिव्या उद्भवद्बीजं यावत्पृथिव्यामदृश्यं तिष्ठति, तावदव्यक्तधर्मा भगवान् तत् स्वकेन व्यवस्थापननियमेन गत्या युनक्ति। एतस्यैव नाम (कायाकल्पः) इति भवति, कायस्य कल्पः=सामर्थ्यं, तदुद्भवाय क्रियमाण उपचारो वा। बीजमेतेनोपचारेण स्वक्षुपात्मकमिव शरीरं प्राप्तं भवति—इति काये सामर्थ्याधानेन कायस्य नवनिर्माणमिव कायाकल्प इत्युच्यते।

यथा कश्चिद् भ्रमिनामा जन्तुः स्वनिसर्गज्ञानेन मृतसद्म निर्माय तत्र कृतनिखाते कञ्चिज्जीवन्तं तृणजलौकानामानं जन्तुमानीय निधत्ते, मृत्सद्मनो मुखञ्च पुनः पिधत्ते। एवञ्च स तृणजलौकाजन्तुर्भ्रमिरूपगुणसम्पत्सम्पन्न उड्डयते।

एवमाचार्योऽपि शिष्ये वर्चोरूपं सामर्थ्यमाधातुं स्वान्तःकरोति= उपनयतीत्यर्थः। तथा च वेदे—**''आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः तं जातं द्रष्टमभिसंयन्ति देवाः''** (अथर्व ११।७।३) इति च संगच्छते।

अत एवेदमपि सङ्गतं भवति—**''तम आसीत्तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वमा इदम्। तुच्छ्येनाभ्वपिहितं यदासीत्तपसस्तन्महिना जायतैकम्।''** (ऋक् १०।१२६।३)। सर्वाङ्गसमुदितमेकमजायत=प्रकाशं प्राप्तवदित्यर्थः। तस्य च कृतव्यवस्थस्य सत्यधर्मपरायणस्य भगवतो महिमा सर्गादद्यावधि गूढोऽभूदस्ति भविष्यति चासर्गान्तम्।

मन्त्रलिङ्गञ्च—

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न।

ऋक् १०।१२६।७।।

यतः सूर्य उदेत्यस्तं यत्र च गच्छति। अथर्व १०।८।१६।।

य आबभूव भुवनानि विश्वा। यजु० ३२।५।।

यत्राधि सूर उदितो विभाति। यजु० ३२।७।।

उदु त्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्।।

ऋक् १।५०।१।।

भवति चात्रास्माकम्—

सूर्यो यथेहोद्भवतीह नित्यं
जीवस्तथेहोद्भवतीह नित्यम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

य उद्बुभूषोः कुरुते व्यवस्थां
ण्यन्तार्थगम्यं तमनक्ति[1] सर्वम्।।५३०।।

एतेन व्याख्यानेन विष्णोः **सर्वभूतभवोद्भवोऽपि** नाम व्याख्यातं भवति।

उक्तञ्चात्रैव—

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम्।
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ।।

विष्णुसहस्रनाम, श्लोक ७

क्षोभणः—३७४

'क्षुभ सञ्चलने' धातोर्णिजन्ताच्छुद्धाद्वा बाहुलकात् कर्तरि 'ल्युट्', योरनः='क्षोभणः'। क्षोभयतीति 'क्षोभणः'। क्षोभयति सर्वं चराचरमिति 'क्षोभणो' विष्णुः।

अत्र मन्त्रलिङ्गञ्च—

आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम्।।

ऋक् १०।१०३।१।।

स एव सं भुवनान्या भरत् स एव संभुवनानि पर्यैत्।।

अथर्व० १६।५३।४।।

तथा सूर्योऽपि 'क्षोभणः' स हि दक्षिणोत्तरगत्या विश्वं क्षुभ्नाति। अथापि स सर्वस्य जगत आत्मा। तथा च वेदः—**"सूर्य आत्मा जगतस्तस्थुषश्च"**। (अथर्व २०।१०७।१४)। लोकेऽपि च पश्यामः— समुद्रतरङ्गवत् सर्वमिदं विश्वं क्षोभिसत्परस्परं क्षोभयत् 'क्षोभण'मुच्यते, यथावस्थञ्च जीवनकालं निर्वहति। एवं भगवान् स्वक्षोभणरूपेण गुणेन सर्वं व्यश्नुवानो 'क्षोभण' उक्तो भवति।

लोकेऽपि च पश्यामः—शरीरान्त्राणि जग्धमन्नं क्षोभयन्ति, सर्वशरीरेन्द्रियाणि पुष्णन्ति, जीवयन्ति च प्राणिनः।

भवति चात्रास्माकम्—

स क्षोभणो विष्णुरिमान् समग्रान्
संक्षोभयन् लोकगणान् बिभर्ति।

---

१. अनक्ति=व्यनक्ति प्रकाशयतीत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तथा यथान्त्राणि[1] च जग्धमन्नं
संक्षोभ्य पुष्णन्ति समस्तगात्रम्।।५३१।।

देवः—३७५

'दिवु' धातो पचाद्यचि 'देवः'। दीव्यति=क्रीडति लोकोत्पत्तिक्षयरूपेण क्रीडनकेनेति 'देवः'। विजिगीषते वा समस्तं ग्रहोपग्रहयुक्तमिदमिति वा 'देवः'। व्यवहरति जगता, व्यवहारयति वा तदिति 'देवः'। यद्वा—विद्योतते स्वसत्तया, सत्तावच्च विद्योतयति वा। सः स्तूयमानः स्तुत्यो भवति सर्वगश्च सर्वं गमयति।

मन्त्रलिङ्गं च—

शं नो अज एकपद् देवो अस्तु। ऋक् ७।३५।१३।।
एषो ह देवः प्रदिशोऽनु सर्वाः ।। यजु० ३२।४।।
देवो देवैः सवीर्यो वज्रहस्तः पुरन्दरः। यजु० २८।३।।
विधूय देवस्तमो दिवमारुहत्। अथर्व १३।२।८।।
द्यावाभूमी जनयन् देव एकः। ऋक् १०।८१।३।।
देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे। यजु० १।१।।

भवति चात्रास्माकम्—

देवः स्वयं स्वेन गुणेन युक्तो
जगद् विधत्ते बहुभूतिमत् सः।
तं देवमीड्यं सवितारमर्च्यं
नरा नमोभिर्बहुधा स्तुवन्ति ।।५३२।।

श्रीगर्भः—३७६

'श्री' शब्दो धनवचनो विभूतिवचनो वा। इदं हि विश्वं भगवतः सर्वान्तर्यामिनो विराड्रूपं शरीरमुक्तं भवति। स वेदं वैविध्येन राजमानं विश्वरूपं शरीरं गर्भमिव स्वान्तर्दधातीति कृत्वा स 'श्रीगर्भः' उक्तो भवति। अथवा अन्तर्यामित्वादस्य श्रीरूपस्य विश्वस्य गर्भ इव 'श्रीगर्भो' विष्णुरुक्तो भवति। तथा च मन्त्रः—***'शरीरं ब्रह्म प्राविशत्'।*** (अथर्व ११।८।३)

---

१. अन्त्राणां बहुत्वं स्थानभेदात्, तथा बहुविधकार्यप्रकाशकत्वाच्च भवति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अमुथेदं भगवान् सूर्योऽपि उद्यन् विश्वस्य समस्तां श्रियं तिग्मतेजा गर्भ इव स्ववशे कुरुते, निगृह्य च तामन्तरिक्षेण याति। अत एव च रात्रौ श्रीः पद्म इव निःश्रीका भवति—अतः सूर्योऽपि 'श्रीगर्भः' उच्यते। जगतश्चैतस्यात्मा सूर्य एव। तथा च मन्त्रः—**'सूर्य आत्मा जगतस्तस्थुषश्च'।** यजु० १३।४६।।

लोकेऽपि च पश्यामः समनस्केन्द्रियशरीरस्य विभूतीर्गर्भं दधज्जीवात्मा 'श्रीगर्भो' भवति, मृतशरीरे श्रियः क्षयस्य दर्शनात्।

मन्त्रलिङ्गञ्च—

श्रियो वसानश्चरति स्वरोचिः। यजु० ३३।२२।।
शिरो मे श्रीर्यशो मुखम्। यजु० २०।५।।
वैराजेन श्रिया श्रियं हविरिन्द्रे वयो दधुः। यजु० २१।२१।।
यस्मिन् विश्वा अधि श्रियो रणन्ति सप्त संसदः। अथर्व १०।११०।२।।
हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
यजु० १३।१४।।

धनार्थिनो धनवन्तं श्रयन्त इत्यतो हिरण्यपर्यायेऽपि 'श्री' शब्दः। अग्निरपि 'श्रीगर्भः' उक्तो भवति—''**अग्निर्नो वनते रयिम्**'' (यजु० १७।१६।।) इत्यादिमन्त्रलिङ्गात्।

भवन्ति चात्रास्माकम्

श्रीगर्भ उक्तः स उ विश्वयोनिः
श्रीस्तत्र गुप्ता स उ वा कुबेरः।
स विश्वमात्रं नियतार्थबद्धं
युनक्ति [१]तत्काम्यमनोविकारैः ।।५३३।।

यस्यास्ति सव्ये स उ विश्वमूर्तिः
स एव दाता स उ वा धनेशः ।
यथा सगर्भा यदुपैति धाम
स्वगर्भगर्भं कुरुते गृहं तत् ।।५३४।।

सहस्रिणो वाप्यथ लक्षिणो वा
प्रवेशमात्रेण गृहं चकास्ति ।

१. तदिति विश्वम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तथा स शम्भुः कमनीयकान्त्या
श्रिया सदाभासयतीह विश्वम्।।५३५।।

परमेश्वरः—३७७

परं मिमीत इति 'परमः', ईशनशील 'ईश्वरः'। 'ईश ऐश्वर्ये' आदादिकाद्धातोः ***स्थेशभासपिसकसो वरच्*** (पा० ३।२।१७५) इति सूत्रेण 'वरच्' प्रत्यय ईश्वरः। परमश्चासावीश्वरः 'परमेश्वरः'। यद्वा—परा=उत्कृष्टा, मा=शोभा यस्य स परमः, स चासावीश्वरः 'परमेश्वरः'।

अयमत्राभिप्रायः—भगवान् स्वयमीश्वरः सन् परं औपाधिकभेदभिन्नं जीवात्मानमपि तदायत्तवस्तुन ईश्वरं विधत्त इति स 'परमेश्वरः' उच्यते। अर्थाद्येऽत्र स्वविषयाधिकृता अधीश्वरास्ते सर्वे भगवता विहिता। यद्वैवमवगन्तव्यम्—न हीश्वरत्वं प्रयत्नसाध्यं किन्तु भगवत्कृपालभ्यमिति।

तथा च लोकेऽपि पश्यामः—चक्षुर्दर्शनाधिपति श्रवणेन्द्रियं श्रवणाधिपति, एवं शेषाणीन्द्रियाणि यथानियतविषयकमाधिपत्यं लभन्त इति। तथैव बुद्धिः सन्दिग्धविषयनिर्णायिकेति बोधनाधिपतिशब्दव्यवहार्या। षड्जस्वरस्य मयूरोऽधिपतिः। ऋषभस्वरस्याधिपतिर्वृषभ इत्यादि। अन्येषामपि स्वराणामधिपतयो नियताः सन्ति।

जगतः समष्ट्यात्मा सूर्यो व्यष्ट्यात्मनो जीवस्याधिपतिः। जीवश्च शरीराधिपतिः। उक्तञ्च वेदे—**''सूर्य आत्मा जगतस्तस्थुषश्च''** (अथर्व २०।१०७।१४) एवं सनात्समेषामीश्वराणामधिपतिभूतस्तथा तेषां नियन्ता सर्वव्यापको भगवान् विष्णुसंज्ञ एव परमेश्वरः। एवं सर्वत्रोहितव्यम्।

यच्चेदं मनुष्याणां मनुष्यहेतुकमीश्वरत्वं, तस्मिन् भगवान् सत्यधर्मरूपेण सद्भावरूपेण वा यावत्तिष्ठति, तावन्न तद् विहतं भवति। एवं सर्वस्य नित्यस्यानित्यस्य चेश्वरः स भगवान् 'परमेश्वरः' उक्तो भवति। भगवता मृत्युतत्त्वमाध्यमेन शरीरादाकृष्यमाणस्य जीवस्याधिपत्यं च्याव्यते, किन्तु भगवत ऐश्वर्यान्न ततः कदाचिच्च्यवत इत्यतः स 'परमेश्वरः'।

मन्त्रलिङ्गञ्च—

य ईशे अस्य द्विपदश्चतुष्पदः। यजु २३।३।।
इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत् पर्वतानाम्।
ऋ० १०।८९।१०।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यो भूतः सर्वस्येश्वरो यस्मिन् सर्वं प्रतिष्ठितम्।

अथर्व ११।६।१।।

प्राणो ह सर्वस्येश्वरो यच्च प्राणिति यच्च न।

अथर्व ११।६।१०।।

कालो ह सर्वस्येश्वरो यः पितासीत् प्रजापतेः।

अथर्व १६।५३।८।।

य ईशे महतो महान् तेन गृह्णामि त्वामहम्। यजु० २०।३२।।

भवति चात्रास्माकम्—

य ईश्वरो यस्य सनात् स्वकस्य
यस्तं मिमीते परमेश्वरः सः ।
एवं स विष्णुर्जगदश्नुवानो
रूपं समञ्जन् सकलं बिभर्ति।।५३६।।

तथा च वेदः—

तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम्।

यजु० २५।१८।।

करणम्—३७८

क्रियतेऽनेनेति'करणम्'। डुकृञ् करणे'धातोः करणे 'ल्युटि''करण'पदसिद्धिः। सर्वविधप्राणिशरीरे सर्वविधक्रियासाधनीभूतानामिन्द्रियाणामेव प्राधान्यम्। तान्यपि च सर्वाणि विनेन्द्रियेशेन मनसा न क्रियासमर्थानि भवन्त्यतः प्रधानं करणं मन एव। मनश्च प्रत्येकं प्राणिषु स्थितं भवति।

भगवता विधात्रा यथेन्द्रियाणि विविधानि विहितानि तदनुसारं तद्बोधोपपत्तये मनुष्याणां कार्यसिद्धिमुद्दिश्य तत्साधनभूतानि भूयांस्युपकरणानि निर्मितानि। तानि चोपकरणानि पशुपक्ष्यादीनां मुखचञ्चुपादशृङ्गादिपर्यालोचनजेन ज्ञानेन मनस उपज्ञारूपाणि। मन्त्रलिङ्गञ्च —''**कामस्तदग्रे समवर्तत**'' (अथर्व १६।५२।१)। कामः=इच्छा च मनोधर्मो मन एव। अतो वक्तुं शक्यते—'मनस्तदग्रे समवर्ततेति'।

एवं मन एव सर्वेषु करणेषु प्रधानमिति मनः करणं, मनःप्रधानकरणके च जगति सर्वत्र व्याप्तो भगवान् विष्णुः 'करणा'भिधानः। तथा च मन्त्रः—**'येन कर्माण्यपसो मनीषिणो यज्ञे कृण्वन्ति विदथेषु धीराः'** (यजु० ३४।२)।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

अवधीत् कामो मम ये सपत्ना उरुं लोकमकरन्मह्यमेधतुम्।
अथर्व ६।२।११।।

त्वं काम सहसासि प्रतिष्ठितो विभुर्विभावा। अथर्व १६।५२।२।।

नान्य इन्द्रात् करणं भूय इन्वति। ऋक् ८।१५।११।।

कण्वा इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनम्। अथर्व २०।१३८।३।।

मंसीमहि तव वयमस्माकं देव पूषन्।
मतीनां च साधनं विप्राणां चाधवम्।। ऋक् १०।२६।४।।

केतुं यज्ञानां विदथस्य साधनं विप्रासो अग्निं महयन्त चित्तिभिः।
ऋक् ३।३।३।।

भवतश्चत्रास्माकम्—

कामो मनः सर्वसमीहितार्थे
प्रजाजनानां कुरुते सहायम् ।
आत्मा नियुंक्ते तदु चार्थसिद्ध्यै
लोके प्रसिद्धः करणेन विष्णुः।।५३७।।

कामो हि सङ्कल्पविकल्पयुक्तं
मनो जगद्भेदभिदा प्रभिन्नम् ।
व्यनक्ति विष्णुं करणेन नाम्ना
व्याप्तं मनः स्यूतमिदं हि तेन।।५३८।।

कारणम्—३७६

कारणं हेतुर्निमित्तं प्रयोजनमित्यनर्थान्तरम्। अथ च कार्यनियतपूर्ववृत्ति कारणमिति—न्यायोक्तकारणलक्षणानुसारं, कार्याज्जगतो नियता पूर्ववृत्तिता=पूर्वभावो यस्य स भगवान् 'कारणम्'। अर्थात् भगवद्रूपकारणावलम्बिकैव भगवद्रूप-कार्योत्पत्तिरतो भगवान् विष्णुरेवैतस्य विविधविचित्ररचनस्य जगतः कारणमिति।

लोके च कारणशब्दार्थे निमित्तहेतु प्रयोजनादिशब्दा अपि प्रयुज्यन्ते । तथा चेत्थमत्रोपपत्तिः जीवानां हितमुद्दिश्य ब्रह्मा विचित्रमिदं जगद्रचितवान्। कार्याच्च प्राक् कारणस्थितिरवश्यमभ्युपेतव्या। कारणञ्चेह जीवहितं, तदेव च निमित्तं, हेतुः प्रयोजनादि। सर्वव्यापकत्वाद् भगवानेव च निमित्तादिरूपेण सर्वत्र व्याप्तः, इति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स एव सर्वस्य सर्वथा कारणं सत् 'कारण' शब्देनाभिधीयते।

मन्त्रलिङ्गानि च—

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।

यजु ३२।१०॥

ब्रह्मणा भूमिर्विहिता ब्रह्म द्यौरुत्तरा हिता।

ब्रह्मेदमूर्ध्वं तिर्यक् चान्तरिक्षं व्यचो हितम्। अथर्व १०।२।२५॥

सखा पिता पितृतमः पितॄणां कर्तेमु लोकमुशते वयोधाः।

ऋक् ४।१७।१७॥

याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः। यजु० ४०।८॥

भवति चात्रास्माकम्—

निमित्तमुद्दिश्य समस्तभूतं
मनःप्रचारं कुरुते क्रियासु।
तत्कारणं सर्वजगत्प्रसृप्तं
ब्रह्मैव तत् त्यं कुरुते च सार्थम्॥५३६॥

कर्ता—३८०

करोतीति 'कर्ता'। सामान्येन यः कश्चित् कार्यं करोति, स तस्य कार्यस्य'कर्ता' भवति। यश्चापि कञ्चिदन्यं प्रेर्य तेन किञ्चित् कारयति, सोऽपि'कर्तृ'संज्ञां लभते। यथा कश्चित् स्वयं पचन्नन्येन वा पाचयन् पाचकः पाककर्ता वाभिधीयते, एवम्मनोऽपि कामप्रेरितं तत्तदिन्द्रियस्रोतःसु वातं समुद्भाव्याणुना कालेन तास्ता नानाविधाः क्रियाः कारयति, लभतेऽतः 'कर्तृ' संज्ञाम्। तथैव भगवानपि प्रकृतिं प्रेर्य प्रकृत्या जगत् कारयन् 'कर्ता' भवति स्वतन्त्रः सन्निति।

मन्त्रलिङ्गं च—

सखा पिता पितृतमः पितॄणां कर्तेमु लोकमुशते वयोधाः।

ऋक् ४।१७।१७॥

कर्ता सुदासे अह वा उ लोकं दाता वसु मुहुरा दाशुषे भूत्।

ऋक् ७।२०।२॥

त्वष्टेदं विश्वं भुवनं जजान वहोः कर्त्तारमिह यक्षि होतः।

यजु० २६।६॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रणेतारं वस्यो अच्छाकर्त्तारं ज्योतिः समत्सु । सासाह्वांसं युधामित्रन्।।
अथर्व २०।४६।१।।

भवति चात्रास्माकम्—

स कारयन् सर्वमिदं प्रकृत्या
कर्तेतिसंज्ञां लभते महेशः ।
मनो विधत्ते विविधाः क्रियाश्च
कामप्रणुन्नं करणैकबन्धुः ।।५४०।।

विकर्ता—३८१

विशिष्टः कर्ता विकर्ता, विविधं वा करोतीति 'विकर्ता'। संकल्पविकल्पात्मकं हि मनः, तच्च स्वस्वरूपानुसारं विचित्रचित्ररमणीयं विविधं जगत् कल्पयति, प्रचारयति च स्वकं विविधकर्तृत्वरूपं धर्मं जगति। वैशिष्ट्यञ्च कर्तुरेतदेव यत् स्वयमरूपोऽपि विलक्षणं बहुविधरूपसम्पन्नं जगद्विधत्ते। अत एव तद्विशिष्टकर्तृरूपं विविधकर्तृरूपं वा मनो वृद्धिक्षययुक्तं स्वाधिष्ठानभूतं चन्द्रसंज्ञकं विष्णुं व्यनक्ति।

मन्त्रलिङ्गञ्च—

तेषामिष्टानि विहितानि धामश स्थात्रे रेजन्ते विकृतानि रूपशः।
अथर्व ६।६।१७।।

निष्टज्जभार चमसं न वृक्षाद् बृहस्पतिर्विरवेणा विकृत्य।
अथर्व २०।१६।८।।

यं कृन्तदित् वि योन्यः। ऋक् ८।४५।३।।
करेणेव वि चकर्ता रवेण। ऋग् १०।६७।६।।

भवति चात्रास्माकम्—

मनो हि सङ्कल्पविकल्पयुक्तं
विलक्षणं कर्म करोति नित्यम्।
कामानुविद्धो जगति प्रसृप्तो
विष्णुर्विचित्रं कुरुते च विश्वम्।।५४१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गहनः—३८२

'गाहू विलोडने' भौवादिको धातुः, ततो 'बहुलमन्यत्रापि' (उणादि २, ७८) इत्युणादिसूत्रेण 'युच्' प्रत्ययो, योरनः। बाहुलकाध्रस्वश्च। गाह्यत इति गहनो गाहत इति वा गहनः। सूर्यो ह्यन्तरिक्षेण गच्छन् प्रत्यक्षं सर्वं जगद्विलोडते। यथा च वेदे—**'स सविता भूत्वा अन्तरिक्षेण याति स इन्द्रो भूत्वा तपति मध्यतो दिवम्।'** अथर्व १३।३।१३।।

यश्च यस्माद् बलवत्तरो दीर्घो वा भवति, स तं गाह्यं गाहते=विलोडयति। तथा च पश्यामो लोके—बलवान् मनुष्यः पयः प्रमथति, अमुथैव सर्वव्यापको भगवान् विष्णुर्विश्वं गाहमानो 'गहन' इत्युक्तो भवति।

मन्त्रलिङ्गञ्च—

राजा समुद्रं नद्यो विगाहते अपामूर्मिं सचते सिन्धुषु श्रितः।
ऋक् ६।८६।८।।

विदे यदासु सन्ददिर्महीरपो वि गाहते। ऋक् ६।६६।७।।

अभि गोत्राणि सहसा गाहमानोऽदयो वीरः शतमन्युरिन्द्रः।
यजु० १७।३६।।

यद्वा—सर्वस्य गाहनविषयोऽयं भगवान् तत्त्वरूपो 'गहन' इत्युच्यते।

तथा च मन्त्रलिङ्गम्—

तमेव विदित्वा अति मृत्युमेति। यजु० ३१।१८।।

तस्य योनिं परि पश्यन्ति धीराः। यजु० ३१।१६।।

तमेव विद्वान् न बिभाय मृत्योः। अथर्व १०।८।४४।।

भवति चात्रास्माकम्—

स गाहते विश्वमिदं समस्तं
तथा यथा साधनसिद्धपाणिः ।
मथ्नाति मथ्यं बहुशोऽप्रमत्तो
जन्यं [1]मनोज्ञं [2]कमनीयमीप्सुः।।५४२।।

भूयश्च लोके पश्यामः—पृथिव्यां प्रसृतानि वृक्षमूलानि स्वगहनत्वरूपेण पृथिवीस्थपञ्चभूतसमुदायात् स्वगुणानुसारं रसं गृह्णन्ति, स्वोदगतपत्रपुष्पफला-

---

१. मनोज्ञम्=मनोभिन्नेन्द्रियागोचरमपि मनसा ज्ञातुमर्हमित्यर्थः। २. कमनीयम्=एषितव्यम्—इच्छाविषय इति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दिभिरात्मानं विकासयन्ति। एष एव च क्रमः प्राणिशरीर आन्त्राणां वर्तते। आन्त्राणि हि चतुर्विधं चर्व्यं पेयं चोष्यं लेह्यञ्चान्नं स्वेन गहनधर्मेण विलोड्य शरीरं पुष्णन्ति।

य एष क्रमः सर्वत्र दृश्यते स सर्वव्यापकस्य भगवतोऽन्वाख्यानमात्रम्। यतो हि कार्यसमवायिनः कारणगुणा, अत एव भगवतो विष्णोर्गहनाख्यो गुणः समस्तविश्वसमवायी। एवम्बहुधा कविभिरूहनीयम्। तथा च समुद्रे वाडवाग्निः समुद्रमवगाहते। चक्षुर्दृश्यमवगाहते। शिल्पिकृतञ्च यन्त्रं यदुद्दिश्य विहितं, तदुद्देशमवगाहत इत्यादि।

एवं भगवान् स्वकं गहनत्त्वरूपं धर्मं सर्वत्र व्यापयति। य एवं भगवन्तं गहनाख्यं सर्वत्र पश्यति स्मरति वा,स भगवन्तं प्रत्यक्षं पश्यति। तल्लीलायिते जगति च न कदाचिन्मुह्यति। सुखं स्वदमानो मोदते पुष्पहासः सामभिर्गायँस्तमिति।

भवति चात्रास्माकम्—

नित्यः स विष्णुर्गहनः स्वभावाद्
विश्वं समञ्चात्मसमं विधत्ते।
तथा यथा मूलिन आत्मभृत्यै
गाहन्त आप्यं[1] समयानुकूलम्।।५४३।।

गुहः—३८३

'गुह संवरणे' भौवादिको धातुः, ततः इगुपधलक्षणः 'क' प्रत्ययः। गूहति=संवृणोत्यात्मानं स्वलीलया, आत्मना वा सर्वमिति 'गुहः'। भगवतो विष्णोर्गुहेति नाम, यतो हि सः स्वयं स्वलीलया संवृतः=गूढ आत्मना सर्वं संवृणोति।

तथा च लोकेऽपि पश्यामः—शासको हि स्वाधिकृतं सर्वं संवृणोति शासनविधानेन। जीवात्मा स्वचैतन्यगुणेन शरीरं वृणोति। मुत्युरपि स्वेन मारणात्मकेन कर्मणा सर्वं संवृणोति। तथा च य एष संवरणात्मो धर्मो विश्वे दृश्यते, स तस्यैव भगवतो विष्णोः प्रकाशकः।

मन्त्रलिङ्गञ्च—

स वै गुह्यः प्रजापतिः। अथर्व १०।७।४१।

---

१. आप्यम्=रसम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्र तद् वोचेदमृतं नु विद्वान् गन्धर्वो धाम विभृतं गुहासत्।

यजु० ३२।६।।

ईशा वास्यमिदं सर्वं यत्किं च जगत्यां जगत्। यजु० ४०।१।।

उच्छिष्टे द्यावापृथिवी विश्वं भूतं समाहितम्

आपः समुद्र उच्छिष्टे चन्द्रमा वात आहितः।। अथर्व ११।७।२।।

प्रिया पदानि पश्वो निपाहि विश्वायुरग्ने गुहा गुहं गाः।

ऋक् १।६७।३।।

भवति चात्रास्माकम्—

स लीलया संवृत एव विष्णु-
र्व्याप्त्यावृणोत्यत्र जगत्तु सर्वम्।
गुहं स्तुवानाः कवयः पुराणाः
संवृण्वते स्वं चपलं मनश्च ।।५४४।।

क्रियाभिरिति शेषः। इतरा गुहाप्येतस्मादेव यतो हि सा स्वान्तर्गतं पुरुषं पशुं पक्षिणं—अन्यद्वा किञ्चिद्वस्तु संवृणोति।

मन्त्रलिङ्गञ्च—

उपह्वरे गिरीणां संगमे च नदीनाम्। धिया विप्रो अजायत।।

यजु० २६।१५।।

❖ ❖ ❖

व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः।
परर्द्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः ।।५५।।

३८४ व्यवसायः, ३८५ व्यवस्थानः, ३८६ संस्थानः, ३८७ स्थानदः, ३८८ ध्रुवः। ३८९ परर्द्धिः, ३९० परमस्पष्टः, ३९१ तुष्टः, ३९२ पुष्टः, ३९३ शुभेक्षणः।।५५।।

व्यवसायः—३८४

'षिञ् बन्धने' धातुः सौवादिकः, ततोऽधिकरणे 'घञ्'। विशेषेण अवबद्धं=निबद्धमस्मिन्निति 'व्यवसायः'। एतच्च सर्वं भगवता सम्यङ्निबद्धमपि स्वात्मानमबद्धं=स्वतन्त्रमिवानुभवति। तथा चापादमस्तकमिदं शरीरं स्नाय्वस्थ्या-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शयादिभिर्निबद्धमस्ति, किन्तु जीवः स्वतन्त्रेणैवैतेन व्यवहरति। एतदेव वैशिष्ट्यं भगवतो विष्णोर्यत् स निबद्धमपि अबद्धमिवानुभावयति।

इतरोऽपि व्यवसाय उद्योगापरनामैतस्मादेव, यतो हि जीवस्तस्मिन्निबद्धो भवति। यद्वा—स जीवस्तेन वृत्तिकर्मणा निबध्यत इति।

भवति चात्रास्माकम्—

स शम्भुरेको व्यवसायनामा
सर्वञ्जगत्तेन निबद्धमास्ते।
वैशिष्ट्यमस्त्येव च तस्य विष्णो-
र्बद्धोऽप्यबद्धं मनुते निजं ना॥५४५॥

प्रतिपदं लोके पश्यामः—समनस्कानि दशेन्द्रियाणि नियतविषयकाणि सन्ति तं प्रभुमन्वाचक्षते। य एवं वेद स न मुह्यति। सूर्योऽपि दक्षिणोत्तरायणाभ्यान्निबद्धोऽबद्ध इव दृश्यते। एवं सर्वेऽपि ग्रहा निबद्धाः सन्तोऽबद्धा दृश्यन्ते।

जगदिदं द्वादशसु भावेषु निबद्धमस्ति। तेषां द्वाद्वशभावानां ग्रहा अपि स्वामित्वरूपेण निबद्धाः। ग्रहाणां गतिरपि निबद्धा, ग्रहाश्च ते सर्वं जगन्निबध्नन्ति। एवं सर्वं निबद्धमपि स्वात्मानं स्वतन्त्रं मन्वानं तन्यं कर्म तनुते। यथा द्वौ पटावेकं सूत्रं सिनोति=निबध्नाति, तथा स सूत्रभूतो भगवान् विश्वं बध्नाति।

मन्त्रलिङ्गानि च—

नमोऽस्तु ते निर्ऋते तिग्मतेजोऽयस्मान् वि चृता बन्धपाशान्।
अथर्व ६।६३।२॥

तस्मिन्निदं सं च विचैति सर्वं स ओतः प्रोतश्च विभूः प्रजासु।
यजु० ३२।८॥

तस्मिन् छ्रयन्ते य उ के च देवा वृक्षस्य स्कन्धः परित इव शाखाः।
अथर्व १०।७।३८

यो विद्यात् सूत्रं विततं यस्मिन्नोताः प्रजा इमाः।
सूत्रं सूत्रस्य यो विद्यात् स विद्यात् ब्राह्मणं महत्॥
अथर्व १०।८।३७॥

यथा सम्वत्सरे ३६० दिनानि भवन्ति, तथा शरीरेऽस्थ्नां त्रिशती षष्ट्यधिका भवति। अस्ति वर्ष्मवर्षयोः समानता।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्यवस्थानः—३८५

व्यवोपसर्गद्वयपूर्वात्तिष्ठतेर्बाहुलकात् कर्तरि 'ल्युट्'। प्रत्ययान्तरं युज्वा। व्यवतिष्ठत इति 'व्यवस्थानः', व्यवस्थापयतीति वा प्रेरणार्थः। तथा च स्वयं स्वरूपेण व्यवस्थितोऽच्युतत्वरूपेण स्थित एव व्यवस्थापयति=यथार्हस्थान-मध्यासयति सर्वमिति। एतस्य विशदं व्याख्यानं स्थानदनाम्नि द्रष्टव्यम्, तत्र व्याख्यास्यामः।

संस्थानः—३८६

सम्यक् समाना वा स्थितिः 'संस्थानं', तदस्यास्तीति 'संस्थानः'। मत्वर्थीयो'ऽच्'। इहापि प्रेरणार्थग्रहणे समीचीना स्थापना यस्येति स 'संस्थानः'। व्यवस्थापितस्य पुनः सम्यक् स्थापनं संस्थानं, तच्च यत्कर्तृकं स कर्ता 'संस्थानः'। एतेन नाम्ना व्यवस्थाननामाभिधेयस्य दृढीकरणं समर्थ्यते।

तथा च यथा लोकेऽपि पश्यामः—इह हि शरीरेन्द्रियाशया यथा प्राग् भगवता व्यवस्थापितास्तथैवाद्यावधि कल्पान्तञ्चायान्ति यास्यन्ति च। एष एव क्रमः स्थावरे जगत्यपि दृश्यते। मनुष्या अपि भागवतस्य व्यवस्थानस्य संस्थानस्य चानुकरणं कुर्वन्तः प्रथमं कीलकादिकं व्यवस्थापयन्ति=रोपयन्ति, ततस्तत् संस्थापयन्ति=दृढीकुर्वन्ति। एवं व्यवस्थानसंस्थानरूपगुणधृग् भगवान् प्रत्यक्षं सर्वत्र विश्वे व्याप्तो दृश्यते।

मन्त्रलिङ्गञ्च—

यो भूतः सर्वस्येश्वरो यस्मिन्त्सर्वं प्रतिष्ठितम्। अथर्व ११।४।१।।
प्राणेह भूतं भव्यं च प्राणे सर्वं प्रतिष्ठितम्। अथर्व ११।४।१५।।
यस्य संस्थे न वृण्वते हरी समत्सु शत्रवः। अथर्व २०।६६।२।।
आ मातरा स्थापयसे जिगत्नू अत इनोषि कर्बरा पुरूणि।
ऋक् १०।१२०।७।।

भवतश्चात्रास्माकम्—

व्यवस्थानो महेष्वासो भगवान् विष्णुरूर्जितः।
संस्थानः स्थानदश्चापि गुणैः सर्वत्र दृश्यते।।५४६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

य एवं वेत्ति तं स्तुत्यं प्रत्यक्षं सर्वव्यापकम्।
निर्ममो निरहङ्कारो ब्रह्मभूयाय कल्पते ।।५४७।।

स्थानदः—३८७

स्थानं ददातीति 'स्थानदः'। स्थानरूपकर्मोपपदाद्'दा'धातोः। ***'आतोऽनुपसर्गे कः'*** (पा० ३।२।२) सूत्रेण 'कः' प्रत्ययः, आतो लोपः। तिष्ठन्त्यस्मिन् तत् 'स्थानम्' स्थाधातोरधिकरणे 'ल्युट्'। द्यावापृथिव्यन्तरिक्षरूपम्।

सूर्यादयो ग्रहास्तेषामुपग्रहास्तथा नक्षत्रादयश्च नियतीकृतस्थाना द्यवि स्वके स्वके राशिवर्त्मनि खगोले यथा परिभ्रमन्ति, तथैवास्मिन् शरीरे ज्ञानेन्द्रियाणां कर्मेन्द्रियाणाञ्च कृते स्थानं ददातीति'स्थानद'उक्तो भवति भगवान् विष्णुः। एवञ्च स सर्वं स्थानेन युनक्ति। तथा हि—ज्ञानेन्द्रियाणि शरीरे द्युस्थानीयेन मस्तिष्कस्थानेन युनक्ति। द्यावापृथिव्योरन्तरालरूपेण स्थानेन माध्यमिकान् युनक्ति। एवं शरीरे सहस्तं बाहुं वायुं फुफ्फुसौ तत्तत्स्थानैर्युनक्ति हृदयञ्च।

यथा पृथिव्यां समुद्रस्याधोदेशे स्थानं, तथा शरीरे क्षारसमुद्रस्थानीयस्य मूत्राशयस्याधोदेशे स्थानम्। रक्तशोधनौ वृक्कावधिवृक्कौ च शरीरमधितिष्ठतः। यथा च नाभसं वारि नद्यः समुद्रं नयन्ति, तथैव धमनीभिः शिराभिश्च परिवर्त्यमानं रक्तं गवीन्यौ (एतन्नामिके नाड्यौ) वस्तिमुखं प्रापयतः प्रतिक्षणञ्च शरीरे स्रवत्तत् स्थानेन युनक्ति।

यथा च **''द्यौस्त्वा पिता पृथिवी माता''** (अथर्व २।२८।२) तथा द्यवि स्थितेन मस्तिष्केन परिरक्षितं शरीरं, पृथिवीव मलमूत्रे दधाति, मलमूत्रयोः कृते पृथिव्यां स्थानं दत्तमस्ति तेनातः स 'स्थानदः' इत्युक्तो भवति। सर्वेषां बीजानां सत्ता द्यवि, तानि च ततः पृथिवीं प्राप्य बहुधा भवन्ति। अतस्तेषां स्थानं पृथिवीत्युच्यते।

यथा कामप्रेरितस्य पुरुषबीजस्य स्थानं स्त्री, स्त्रियं प्राप्य बीजं भेदं विकासञ्चैति। अत एव चोच्यते वर्षणाभावे सस्याभाव इति। उप्तायामपि भूमौ जलदानमन्तरेण सस्यं नोद्भवति। एवञ्च भगवान् विश्वाय विश्वविकारभूताय च स्थानं ददात्यतः स 'स्थानदः' इत्युक्तो भवति। य एवं वेद स भागवते विश्वे सर्वथा व्यवहरन्नपि न कदाचिन्मुह्यति, न ग्लायति, न बिभेति कुतश्चित्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एवं हि विष्णोः स्थानदत्वरूपो गुणः सर्वव्यापको दृश्यतेऽतः स 'स्थानदः' उच्यते।

स्थानदनाम्ना सङ्कीर्त्यमानश्च भगवान् प्रतिप्राणि तत्कर्मकरणार्हं स्थानं ददाति। तथा च लोके वादकाय गायकाय च पृथक्—पृथक् स्थानं धनञ्च दत्तं भवति। गुरुशिष्ययोरप्येवं ज्ञेयम्। एषैव व्यवस्था पशुजगति। गौर्मेघ इव वर्षणधाराभिर्दुग्धधाराभिः सिञ्चति जीवन्ति च प्राणिनस्ताभिर्धाराभिः। अश्वो हि नाम वातप्रधानः पशुः, स च वात इव एकस्थानात् स्थानान्तरं प्रापयति। एवञ्च यद्वायोः स्थानं तदश्वस्य। तथा च वायुः समः सन् बहून् भेदानाप्नोति, तथैव स्थानान्तरस्य प्रापकेषु अश्वगर्दभाश्वतरौष्ट्रप्रभृतिषु गतीनां भगवता प्रत्तं पृथक् पृथक् स्थानमस्ति।

समिन्धनभेदादग्नेरपि तीव्रातितीव्रत्वरूपस्थानस्य स एव दाता। नभोगेभ्योऽपि पृथक् पृथग्गन्तुमर्हां शक्तिं दत्त्वा तेषामन्तरिक्षे स्थानं बध्नाति। महाशरीरवतां मत्स्यानाञ्च कृते समुद्रे स्थानं कल्पितम्। दिङ्मात्रमुदाहृतं शेषा ऊहाः स्वयं करणीया विद्वद्भिः।

तद्यथा महाक्रमः—जगदिदं दक्षिणोत्तरायणाभ्यां यथा परिरक्षितं भवति, तथैवेदं शरीरं तत्तद्द्वन्द्वैः परिरक्षितं भवति तथा नेत्रद्वयं, नासिकारन्ध्रद्वयं, बाहुद्वयं, जङ्घाद्वयं, पादद्वयमिति। यथा च पञ्चभूतानामेष व्यापारस्तथा सोपकरणस्य पञ्चाङ्गुलिकस्य मनुष्यस्य व्यापार इति 'स्थानद'स्य विष्णोर्व्याख्यानमात्रम्।

मन्त्रलिङ्गञ्च—

येन द्यौरुग्रा पृथिवी च दृढा येन स्वः स्तभितं येन नाकः।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम।।

यजु० ३२।६।।

यस्य भूमिः प्रमान्तरिक्षमुतोदरम् ।
दिवं यश्चक्रे मूर्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः।।
यस्य सूर्यश्चक्षुश्चन्द्रमाश्च पुनर्णवः।
अग्निं यश्चक्र आस्यं तस्मै ज्येष्ठाय ब्रह्मणे नमः। अथर्व १०।७।३२, ३३।।
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत ।। यजु० ३१।१२।।
नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्त्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ अकल्पयन्। यजुः।।३१।१३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

द्यावापृथिव्योरिह मध्यगं यत्
तत्स्थानदेनास्ति यथा विभक्तम्।
तथा स धामानि ददाति गात्रे
तदाशयेभ्यो न च याति मोहम्।।५४८।।

प्रगण्डास्थिमूलमारभ्य कफोणिपर्यन्तं फुफ्फुसहृदययकृत्प्लीहानां स्थानं मध्यममिवेति, स्थानदस्य सङ्गतार्थत्वस्य पोषक इति लोकायुर्वेदविदां 'लोकसम्मितः पुरुषः' सिद्धान्तः पुष्टो भवति। यथा च द्यवि ग्रहाणां विन्यासो, लोकस्य क्षेमाय क्षोभाय वा भवति तथा द्युलोकसम्मिते मस्तिष्के कामक्रोधलोभमोहाहङ्काराणां विन्यासः प्रजानां क्षेमाय क्षोभाय वा भवति। एवं यः समष्टिरूपं लोकशरीरं, व्यष्टिरूपं शरीरञ्च वेत्ति, स एव वास्तविकतत्त्वज्ञो युक्तिज्ञश्च भवितुमर्हति। ऊरू द्युलोकस्थानीये। जङ्घेऽन्तरिक्षस्थानीये। पादौ च पृथिवीस्थानीयौ।

ध्रुवः—३८८

'ध्रु गतिस्थैर्ययो'रिति तौदादिको धातुः, ततः पचा'द्यच्' प्रत्ययो='ध्रुवः' इति। स्वस्य ध्रुवत्वात् स्वधर्मानुसारमिदं प्रवाहतोऽनादिमज्जगद्यथा सर्गादौ प्रवर्तयति, तथा तद् ध्रुवति=व्यवस्थापयति, व्यवस्थया स्थिरं करोतीत्यर्थः। अर्थात् सर्गारम्भे यद्वस्तु यादृग्रूपमाविष्कृतं तत्सर्गपर्यन्तं तादृगेव व्यवस्थितं रक्षतीत्यर्थः। अतो विष्णु'र्ध्रुवः' इत्युक्तो भवति।

तथा च यथा बीजादंकुरोत्पत्तौ पञ्चभूतानि कारणं, न केवलं भूमिजलादिकं वा। ध्रुवश्चैष नियमः। एवंविधा ध्रुवता च तस्य सर्वत्र दृश्यते। चले चास्मिन् जगति भगवत एषा व्यवस्थाचला ध्रुवा वर्तते। अतः स भगवान् स्वयंभूत्वाद्'ध्रुवः' इत्युक्तो भवति।

लोकेऽपि चापि पश्यामः—ध्रुवं जन्म, ध्रुवं मरणम्। सूर्यस्योदयो ध्रुवः, ध्रुवञ्चास्तगमनम्। एवं भगवान् स्वयं ध्रुवोऽध्रुवेषु भावेषु ध्रुवत्वमिव स्थापयन् सर्वं व्याप्नोति।

मन्त्रलिङ्गञ्च—

आ त्वाहार्षमन्तरेधि ध्रुवस्तिष्ठाविचाचलिः ।
विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधि भ्रशत् ।। ऋक् १० ।१७३ ।१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च।
धर्त्ता च विधर्ता च विधारयः ।। यजुः १७।८२।।

भवति चात्रास्माकम्—

स्वयं ध्रुवो विष्णुरमेयकर्मा
ध्रुवत्वधर्मेण जगच्चलं सः ।
प्रवाहसिद्धं कुरुतेऽचलं तत्
यथोदितं मृत्युरुपैत्यवश्यम्।।५४६।।

परर्द्धिः—३८६

'ऋधु वृद्धौ' इति धातोः 'क्तिनि' सिध्यति 'ऋद्धि'रिति शब्दः। ततश्च परा उत्कृष्टा सर्वोत्तमा ऋद्धिर्यस्य स 'परर्द्धि'रिति बहुव्रीहिसमासे 'परर्द्धि'र्भगवतो नाम। ऋद्धिरिति वृद्धेः सम्पत्तेर्विभूतेर्वा नाम। तथा च विविधेषु जात्यादिभेदभिन्नेषु वस्तुषु या विभिन्नप्रकारिका विभक्ता दृश्यते ऋद्धिस्तस्याः समूहालम्बनभूतं भगवान् विष्णुरेवैकमधिकरणम्। अर्थात् प्रतिवस्तु यात्र विभिन्ना विभक्ता चर्द्धिर्दृश्यते, सा सर्वा संवदर्ध्याधारभूताद् भगवत एवायातेति भगवान् विष्णुः 'परर्द्धि' रुच्यते।

तथा च पश्यामो लोके कश्चिद् बहुविधरागगानतत्त्ववित्पुरुषो विभज्य लोके रागान् च निर्माय तद्विषयकबहुवित्त्वमात्मनः प्रकाशयति, तथा भगवानपि प्रतिवस्तु विभक्तदर्ध्या प्रतिपदमात्मानं प्रकाशयति सर्वव्यापकमिति।

मन्त्रलिङ्गञ्च—

राद्धिः समृद्धिरव्यृद्धिमतिरुदितयः कुतः। अथर्व० १०।२।१०।।
एवा हि ते विभूतय ऊतय इन्द्रमावते।
सद्यश्चित् सन्ति दाशुषे।। ऋक १।८।६।।
भवा मित्रो न शेव्यो घृतासुतिर्विभूतद्युम्न एवया उ सप्रथाः।
ऋक् १।१५६।१।।
धाता रातिः सवितेदं जुषन्तां प्रजापतिर्निधिपतिर्नो अग्निः।
अथर्व ७।१८।४।।
अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि सं जयामि शश्वतः।
ऋक् १०।४८।१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

परर्द्धिनामा भगवान् स विष्णु-
र्ऋद्ध्या समृद्धं कुरुते समस्तम् ।
नैतद् विधातुं क्षमते तदन्य-
स्ततं तयर्द्ध्येदमनन्तचक्रम् ॥५५०॥

परमस्पष्टः—३६०

परमम्=उत्कृष्टं दृढं वा स्पशति बध्नातीति 'परमस्पष्टः'। बन्धनार्थकात् 'स्पश'धातोः *''वा दान्तशान्तपूर्णदस्तस्पष्टछन्नज्ञप्ताः''* (पा० ७।२।२७) इति सूत्रेणेडभावनिपातनेन सिध्यति 'स्पष्ट'शब्दः। एतेन च परमपूर्वपदेन स्पष्टशब्देन भगवान् विष्णुरभिधीयते, यतो हि स यथा प्रत्येकं वस्तु द्रढिम्ना स्पशति बध्नाति, न तथा ततोऽन्यः कश्चित्।

तथा च पश्यामो लोके—इमानि सर्वाणि जान्तवानि शरीराणि, सन्धिबन्धनतस्तथा बद्धानि, यथा न तानि व्यसून्यपि (=मृतान्यपि) विश्लिष्यन्ति। ज्ञायतेऽतो यद् भगवता यथाविधं यन्निर्मितं तत्तथाविधमेव सुबद्धं तिष्ठति। इदमेव सर्वसुबद्धत्वं भगवतः सर्वव्यापकं परमस्पष्टत्वं व्यनक्ति।

मन्त्रलिङ्गञ्च—

तं सूर्यं हरितः सप्त यह्वीः स्पशं विश्वस्य जगतो वहन्ति।

ऋक् ४।१३।३॥

अस्य स्पशो न निमिषन्ति भूर्णयः पदे पदे पाशिनः सन्ति सेतवः।

ऋक् ६।७३।४॥

दिवः स्पशः प्रचरन्तीदमस्य सहस्राक्षा अति पश्यन्ति भूमिम्।

अथर्व ४।१६।४॥

त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सुः त्रीण्यन्तः समुद्रे।

यजु० २६।१५॥

भवतश्चात्रास्माकम्—

बध्नाति विष्णुः स जगद्यथा त-
न्निर्बन्धवद् भाति दृशा सुबद्धम् ।
तथा यथा कान्तमिदं शरीरं
बद्धं स्वतन्त्रञ्च मृतञ्च बद्धम्॥५५१॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दृढं स्पशानः परमेति पूर्वः
स्पष्टाभिधानः परमेश्वरोऽत्र ।
तथा शरीरं स्पशते स जन्तो-
र्यथा न विश्लिष्यति तन्मृतञ्च[1] ॥५५२॥

तुष्टः—३६१

परिपूर्णसर्वकामत्वादतुषदिति तुष्टः। 'तुष्यतेः' कर्तरि 'क्तः'। तस्य चैष सन्तोषाख्यो गुणो विश्वं व्याप्नोतीति कृत्वा तद्गुणवद्विश्वमपि सर्वथा सन्तुष्टमिव दृश्यते। अतः स्वगुणव्यापनद्वारा विश्वस्य तुष्टिं करोतीति कृत्वापि स 'तुष्टः' इत्युच्यते।

दृश्यते च लोके—यद् दुर्गतिं प्राप्तोऽपि जीवो मरणं नेच्छति। तदेष भगवतस्तुष्टिगुणस्य व्याप्तेरेव प्रभावः।

मन्त्रलिङ्गञ्च—

अकामो धीरो अमृतः स्वयंभू रसेन तृप्तो न कुतश्चनोनः।
अथर्व १० ।८ ।४३ ॥

हरिर्निकामो हरिरागभस्त्योः। ऋक् १० ।६६ ।३ ॥

स्वर्यस्य च केवलं तस्मै ज्येष्ठाय ब्रह्मणे नमः। अथर्व १० ।८ ।१ ॥

उतामृतत्वस्येश्वरो यदन्येनाभवत्सह। अथर्व १६ ।६ ।४ ॥

भवति चात्रास्माकम्—

तुष्टः स विष्णुः कुरुते ह तुष्टं
जगत् समस्तं परिपूर्णमर्थैः ।
यस्यां स्थितौ तुष्यति यच्च यत्र
तस्यां स्थितौ तुष्यति तच्च तत्र।॥५५३॥

पुष्टः—३६२

सर्वदावाप्तसर्वकामत्वादेवापुषदिति'पुष्टः' इत्यर्थः। समानो हि गुणः समानं गुणं पुष्णाति, तथैव यस्य जीवस्य यद् भक्ष्यं करोति तद्भक्ष्यं तज्जीवशरीरं पुष्णाति। पोषणार्हस्य वीर्यस्य तत्र सद्भावात्।

---
१. च—इत्यप्यर्थे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्य चायं पोषणाख्यो गुणः सर्वमश्नुवानः प्रत्येकमध्यणु पुष्टिं निदधातीति कृत्वा स वाताशेन वाताशिनं, मृदाशेन मृदाशिनं, पाषाणकणाशेन पाषाणकणाशिनं पुष्णाति, परिपूर्णत्वादिति 'पुष्टः' स उच्यते।

मन्त्रलिङ्गञ्च—

यस्ते मन्योऽविदधद् वज्रसायक सह ओजः पुष्यति विश्वमानुषक्।

अथर्व ४।३२।१।।

येन विश्वा पुष्यसि वार्याणि सरस्वति तमिह धातवे कः।

अथर्व ७।११।१।।

अहं पशूनामधिपा असानि मयि पुष्टं पुष्टपतिर्दधातु।

अथर्व १६।३१।६।।

अग्ने त्वं पुरीष्योरयिमान् पुष्टिमान् असि। यजुः १२।५६।।

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। यजु० ३।६०।।

भवति चात्रास्माकम्—

विष्णुर्हि पुष्टः कुरुते ह पुष्टं
जगत् समस्तं परिपुष्टिमत् सः।
यद्भोजनो यश्च कृतोऽस्ति तेन
तद्भोजनः पुष्यति तत्र सक्तः ।।५५४।।

शुभेक्षणः—३६३

शुभम् ईक्षणं=दर्शनं ज्ञानम्, नेत्रस्थानीयौ सूर्याचन्द्रमसौ वेक्षणे यस्य स 'शुभेक्षणः'। भगवत ईक्षणे=नेत्रे सूर्याचन्द्रमसौ स्त इति वेदप्रतिपादितोऽर्थः। सूर्य आत्मा मनश्च चन्द्रमा, यस्य च शुभे आत्ममनसी वर्तेते, तस्य हृदि शुभेक्षणत्वरूपधर्मेण विराजमानो भगवान् स्वस्य शुभेक्षणत्वरूपं स्वधर्मं व्यनक्ति। जन्मकुण्डल्यां शुभस्थानस्थौ सूर्यचन्द्रौ, जातकस्य सज्ज्ञानवत्त्वं सद्भाववत्त्वञ्च व्यङ्क्तः। एवं स भगवान् 'शुभेक्षणः' शुभाशुभेक्षणयोगेन विविधं जगद्दर्शयति।

मन्त्रलिङ्गानि च—

यथेमां वाचं कल्याणीमावदानि जनेभ्यः। यजु० २६।२।।

यस्य सूर्यश्चक्षुश्चन्द्रमाश्च पुनर्णवः। अथर्व १०।७।३३।।

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। यजु० ३६।२४।।

दृते दृंहमा ज्योक् ते सन्दृशि जीव्यासम्। यजु० ३६।१।६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

शुभेक्षणो विष्णुरिदं समस्तं
जगद्विधत्ते शुभनेत्रयोगी ।
यस्यास्ति सूर्यः शुभयोगयुक्तः
तथैव चन्द्रः स सुलोचनो ना।।५५५।।

सूर्यचन्द्राभ्यां शुभदृष्ट्या दृष्टो भावः, शुभेक्षणस्य भगवतः शुभेक्षणत्वं प्रतिपदं व्यनक्ति। अथवा शुभदृष्ट्या यो ग्रहो यं ग्रहं पश्यति, तत्र स्वयं शुभेक्षणः स्थितः स्वकं रूपं व्यनक्ति, शुभदृष्टियुक्तञ्च भावं प्राप्य भगवन्तं स्मरति स्तौति च। शुभेक्षणः=निष्पापः।

लोकेऽपि च पश्यामः, निष्पापस्य जनस्येक्षणे शुभे भवतः। या च ग्रहस्य ग्रहोपरि शुभा दृष्टिस्तस्यां स्वयं भगवान् विराजमानस्तं भावं स्वगुणेन समर्धयति।

मन्त्रलिङ्गञ्च—

यस्य सूर्यचक्षुश्चन्द्रमाश्च पुनर्णवः। अथर्व १० ।७ ।३३ ।।

चक्षोः सूर्यो अजायत। यजु ३१ ।१२ ।।

❖ ❖ ❖

रामो विरामो विरतो मार्गो नेयो नयोऽनयः।
वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ।।५६।।

३६४ रामः, ३६५ विरामः, ३६६ विरतः, ३६७ मार्गः, ३६८ नेयः, ३६६ नयः, ४०० अनयः। ४०१ वीरः, ४०२ शक्तिमतां श्रेष्ठः, ४०३ धर्मः, ४०४ धर्मविदुत्तमः ।।५६।।

रामः—३६४

'रमु क्रीडायां' धातोरधिकरणे'घञ्'रमते=क्रीडति विश्वमस्मिन्निति 'रामः'। इदं हि सर्वं विश्वं तस्मिन्नेव ब्रह्मणि रममाणमुदयमस्तञ्च लभत इति।

इह राष्ट्राध्यक्ष राज्ञि, स्वायत्तस्वाध्यक्षे स्वामिनि वा सर्वत्रैष रामत्वरूपो गुणो व्याप्तोऽत एव राजा, राजसभास्वामी वा, स्वायत्तप्रदेशस्थाः प्रजा रमयति। एवं समस्तचराचरप्राणिवर्गस्य रमणस्थानं भगवान् राम इत्युच्यते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

यस्मिन् क्षियानी भुवनानि विश्वा।
आपश्चिदस्य व्रत आ निमृग्रा अयं चिद् वातो रमते परिज्मन्।
ऋक् २।३८।२।।

वसोष्पते निरमय मय्येवास्तु मयि श्रुतम्। अथर्व १।१।२।।

इन्द्रं सखायो अनु सं रभध्वम्। यजु० १७।३८।।

यदेजति पतति यच्च तिष्ठति प्राणदपानन्निमिषच्च यद् भुवत्।
तद् दाधार पृथिवीं विश्वरूपं तत् संभूय भवत्येकमेव ।।
अथर्व १०।८।११।।

भवति चात्रास्माकम्—

रामः स विष्णुः सकलं[1] हि विश्वं
प्रस्थाय तस्मिंल्लभते विरामम् ।
स्वतन्त्रवत्तद् रमयत्यजस्रं
बद्धं तथा भाति यथा स्वतन्त्रम्।।५५६।।

विरामः—३६५

यथा रमन्तेऽस्मिन्निति रामस्तथा विरमन्त्यस्मिन्निति 'विरामः'। एवञ्च यत्रेदं सर्वं विश्वं रममाणं विरमति=अवसानँल्लभते, स 'विरामो' विष्णुरिति। यत्र रमणं तत्रैव रमणावसानम्। भगवत इद्धात्तपसो जातमत एव सुप्तोत्थितमिवेदं जगद्रमते। ततश्च रमणाद्विरम्य तत्रैव लीयतेऽतः स 'विराम' इत्युच्यते।

प्रकृतिविकृतिनिचयो हि जगत्, स्वनियतायुष्कं कालं व्यतीत्य पुनः प्रकृतिमापद्यत इति। यस्मादुद्भवो यत्र च प्रलयः स उभयाधारो 'विरामः'। तथा च यथा पञ्चभूतोद्भूतमिदं पार्थिवं शरीरं पञ्चभूतेष्वेव रममाणमन्ततो रमणाद्विरम्य पञ्चभूतेषु लीयते।

मन्त्रलिङ्गञ्च—

यस्मिन् देवा अधि विश्वे निषेदुः। ऋक् १।१६४।३६।।

तस्मिन्निदं सं च वि चैति सर्वं स ओतः प्रोतश्च विभूः प्रजासु।
यजु० ३२।८।।

यो मारयति प्राणयति यस्मात् प्राणन्ति भुवनानि विश्वा।
अथर्व १३।३।३।।

---

१. सकलम्—कलया सहितं विश्वमित्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कालेनोदेति सूर्यः काले निविशते पुनः। अथर्व १६।५४।१।।
यत्रामृतं च मृत्युश्च पुरुषेऽधि समाहिते। अथर्व १०।७।१५।

भवतश्चात्रास्माकम्—

विरामसंज्ञो भगवान् वरेण्यो
जगद्विधत्ते स विरामशीलम् ।
सूर्योऽप्रमत्तो भ्रमणे प्रसक्तः
कालात्यये खे रमते विरामे।।५५७।।

विष्णुर्विरामः कुरुते ह विश्वं
विरामधर्मं प्रलयेऽनिवार्ये ।
यथोदितोऽलङ्कुरुतेऽस्तकालं
तथा विरामं लभते ह जन्तुः।।५५८।।

विरतः—३६६

रामविरामशब्दाभ्यां प्रकृतेः प्रकृतिविकाराणाञ्च रमणस्थानं रमणाभावरूप-प्रलयस्थानञ्चोक्त्वा, विरतशब्देन तदुभयाभावरूपं जगतः पृथग्भावं ताटस्थ्यं कूटस्थत्वञ्च द्योत्यते।

एवञ्च प्रकृतिं प्रवर्तयन् संहरँश्च स ततः पृथगपि कूटस्थरूपोऽवतिष्ठतेऽत एव च स 'विरतः' उच्यते। केचिदिह 'विरजः' इति नाम पठन्ति। तेषां मते विरजो=रजोरहित इत्यर्थः। तथा च वेदः —**'आदित्यवर्णं तमसः परस्तात्'** (यजु० ३१।१८)।

मन्त्रलिङ्गञ्च—

तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति।
ऋक् १।१६४।२०।।
अकामो धीरो अमृतः स्वयम्भूः। अथर्व १०।८।४४।।
वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्। यजु० ३१।१८।।

भवति चात्रास्माकम्—

रजो न तस्मिन्न तमश्च तस्मिन्
सत्त्वस्वभावो हि स विष्णुरुक्तः ।
सोऽस्ति स्वभावादमितप्रकाशो
वेदेऽस्ति गीतस्तमसः परस्तात्।।५५९।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मार्गः—३६७

'मृजू शुद्धौ' इति धातुः, ततो 'घञि' मार्गः। मृज्यन्ते शरणत्वेन स्वसम्पर्कमिताः प्राणिनो येन स 'मार्गः' इति। यद्वा—'मार्ग अन्वेषणे' इति चौरादिकः, ततः कर्मणि 'घञ्', मार्ग्यते सुखरूपत्वेन सर्वैरन्विष्यत इति 'मार्गो' भगवान् विष्णुः। स स्वयं शुद्धरूपोऽन्येषां शोधनाद् भर्गोऽप्युच्यते। तथा च वेदः—"**भर्गो देवस्य धीमहि**" (यजु० ३०।८)।

मन्त्रलिङ्गञ्च—

मार्जाल्यो मृज्यते स्वे दमूनाः कविप्रशस्तो अतिथिः शिवो नः।

ऋक् ५।१।८।।

स पूर्व्यो वसुविज्जायमानो मृजानो अप्सु दुदुहानो अद्रौ।

ऋक् ६।६६।१०।।

अवस्यूरसि दुवस्वान् शुन्ध्यूरसि मार्जालीयः। यजु० ५।३२।।

अनुमार्ष्टु तन्वो यद्विलिष्टम्। यजु० २।२४।।

भवति चात्रास्माकम्—

मार्गः स विष्णुः स हि भर्ग उक्तः
शुचिः स विष्णुर्विरजाः स एव।
स एव शुद्धस्तमु वा स्तुवन्ति
रामं विरामं सकलेशमर्च्यम् ।।५५६।।

नेयः—३६८

'णीञ् प्रापणे' धातोरर्हार्थे 'यति' गुणे च सिध्यति 'नेयः' शब्दः। 'नेयः'=प्राप्यः प्राप्तुं योग्य इत्यर्थः। अथवा सर्वप्रमाणाविषयत्वात् स मनसा नेतुमर्हो=मन्तुं योग्यो मननीयो भवति।

मन्त्रलिङ्गञ्च—

दृढो दृंहस्थिरो न्यो ब्रह्म विश्वसृजः। अथर्व ११।७।४।।

विश्वो देवस्य नेतुर्मर्तोवुरीत सख्यम्। यजु० ४।८।।

नहि त्वदन्यन्मघवन् न आप्यं वस्यो अस्ति पिता चन।

ऋक् ७।३२।१६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।
यजु० ३१।१८।।

भवति चात्रास्माकम्—

सर्वप्रमाणाविषयः स विष्णु-
र्ज्ञेयो मनोभिर्मननीय एकः।
तमन्तरा चेह न किञ्चिदाप्यं
यच्छ्रेयसे स्यात् सुतरां नराणाम्।।५६१।।

नयः—३९९

'णीञ् प्रापणे' धातोरच् प्रत्ययो, नयतीति 'नयः', सर्वस्य नेतेत्यर्थः। भगवान् विष्णुर्हि सर्वमिदं विश्वं यथोद्देशलक्ष्यं प्रापयन् नयति=प्रापयति सर्वोत्तमं ज्योतिः—स्वरूपं स्वं रूपमिति 'नयः' उच्यते।

यद्वा—सच्चिदानन्दरूपो भगवान् सदादितत्तदंशेनात्मानं प्रकृतौ नयति=प्रापयतीर्त्थः। स्वयं विशोको जीवमपि विशोकं कुरुते। एवं स नयनामा भगवान् स्वनाम्ना स्वस्य विष्णुत्वं=सर्वव्यापकत्वं प्रथयति।

मन्त्रलिङ्गञ्च—

विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम्। यजु० २२।२१।।
स नो नेता वाजमा दर्षि भूरिम्। अथर्व २०।७७।८।।
अग्ने नय सुपथा राये अस्मान्। यजु० ४०।१६।।

भवति चात्रास्माकम्—

नयः स विष्णुः स्वकृते ह विश्वे
रूपं निजं प्रापयते हि नित्यम्।
स सच्चिदानन्दमयः प्रकृत्या
सच्चिन्मयं चापि जगद् विधत्ते।।५६२।।

अनयः—४००

नयति=प्रापयत्यात्मानं विविधेषु भावेषु, विविधं वेदं जगदात्मनीति 'नयः' इति प्रागुक्तम्। इदानीं तस्यानयत्वं प्रतिपाद्यतेऽनय इति नाम्ना। अर्थात् स नयः सन्ननयोऽपि भवति। यतो हि स आत्मानं विविधरूपतामापादयन् यद्वा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विविधमिदमात्मरूपतां नयन्नपि, तद्व्यतिरिक्तकूटस्थाविचालिरूपेणापि तिष्ठत्यतोऽ-'नयो'ऽपि स उच्यते।

यद्वा—एतीत्ययोः गतेः कर्ता। गत्यर्थादिण्धातोरच् प्रत्ययः। न—एतीत्यनयः, गतिरूपक्रियारहितो व्यापकत्वात् कूटस्थत्वाच्च।

मन्त्रलिङ्गञ्च—

तदेजति तन्नैजति तद् दूरे तद्वन्तिके। यजु० ४०।५।।

अनेजदेकं मनसो जवीयो। यजु० ४०।४।।

षडभाराँ एको अचरन् बिभर्ति। ऋक् ३।५६।२।।

अरं कामाय हरयो दधन्विरे स्थिराय हिन्वन् हरयो हरी तुरा।

ऋक् १०।९६।७।।

भवति चात्रास्माकम्—

विष्णुर्नयः सन्ननयः स उच्यते
कूटस्थनित्यो गमको जगत्याः ।
यथाविधानं गमयत्यजस्त्रं
जातोऽमरो नास्ति यथात्र तद्वत्।।५६३।।

इति श्री १०८ पण्डितसत्यदेववासिष्ठकृते
महाभारतानुशासनपर्वान्तर्गतस्य (अ० १४६)
विष्णुसहस्रनामस्तोत्रस्य
वेदप्रमाणोपवृहितसत्यभाष्ये
चतुर्थं नामशतकं
सम्पूर्णम्।

❖ ❖ ❖

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वीरः—४०१

वीरशब्दो विविधं व्याख्यातचरो १६६ वीरहानाम्नो व्याख्यानावसरे तत्र द्रष्टव्यम्। तत्र अजेर्वीभावः ***स्फायितञ्चीत्यादिना*** (उ० २।१३) रगन्तश्च साधितः। यद्वा—वीर विक्रान्तौ धातुनापि साध्यते। एवञ्च वीरयते विक्रमतेऽमित्रेषु वीरयति कम्पयति वामित्रानिति वीरः।

तथा च वेदे—

स घा वीरो न रिष्यति यमिन्द्रो ब्रह्मणस्पतिः सोमो हिनोति मर्त्यम्।
ऋक् १।१८।४।।

मन्त्रलिङ्गञ्च—

शृण्वे वीरो विन्दमानो वसूनि महद्देवानामसुरत्वमेकम्।
ऋक् ३।५५।२०।।

ददिर्हि वीरो गृणते वसूनि स गोपतिर्निष्षिधां नो जनासः।
ऋक् ४।२४।१।।

इन्द्रं सत्यैरेरयामा कृतेभिः स हि वीरो गिर्वणस्युर्विदानः।
ऋक् १०।१११।१।।

अयमग्निर्वीरतमो वयोधाः सहस्त्रियो द्योततामप्रयुच्छन्।
यजु० १५, ५२।।

भवन्ति चात्रास्माकम्—

वीरः स विष्णुः प्रपदं जगत्यां
गतिं दधानः क्रमतेऽविरामम् ।
यस्मिन् हि यावान् क्रमते तदंशः
स मर्त्यभूतोऽपि न रिष्यतेऽर्थात्।।५६४।।

सूर्यो हि वीरः स निजांशयोगाद्
ग्रहान् यथास्थानगतान् युनक्ति ।
बलेन दीप्त्या निजराशिवर्गे
स्थितांस्तथा दीप्ततमान् करोति।।५६५।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हिनस्ति तेजः स सधस्थयातु-
वीरो यथा शत्रुगणान् क्षिणोति ।
अतोऽस्ति वीरः परमादरार्हः
पदञ्च विष्णोः कवयः स्तुवन्ति।।५६६।।

मन्त्रलिङ्गञ्च—

तद्विप्रासो विपन्यवो जागृवांसः समिन्धते विष्णोर्यत्परमं पदम्।
यजु० ३४।४४।।

यत्त्वधिग्रहमुक्तं, तज्ज्योतिर्विद्ययावगन्तव्यम्।

शक्तिमतां श्रेष्ठः—४०२

शक्तिः—'शक्लृ शक्तौ' सौवादिको धातुः, तस्मात् ***''स्त्रियां क्तिन्''*** (पा० ३।३।९४) सूत्रेण स्त्रियां भावे 'क्तिन्' प्रत्ययः, ततो मतुप् प्रत्ययो, मतुबन्तात्षष्ठीबहुवचनम्। श्रेष्ठः—प्रपूर्वात् 'शंसु स्तुतौ' धातोः क्यपि नलोपे 'प्रशस्य'। 'अतिशयेन प्रशस्यः' इत्यर्थे—***''अतिशायने तमबिष्ठनौ''*** (पा० ५।३।५५) सूत्रेणेष्ठन्' प्रत्ययः। तस्मिन् परतः ***''प्रशस्यस्य श्रः''*** (पा० ५।३।६०) इति सूत्रेण 'श्रादेशः'। ***''प्रकृत्यैकाच्''*** (पा० ६।४।१६३) इत्यनेन प्रकृतिभावात् ''टेः'' इति टिलोपाभावो गुणश्च 'श्रेष्ठ' इति।

शक्तिमतां श्रेष्ठ निर्धारणे षष्ठी। अतो ***''न निर्धारणे''*** (पा० २।२।१०) इति समासनिषेधः। शक्तिमतां श्रेष्ठ इति विष्णोः सूर्यस्य वा नाम सङ्गतार्थं भवति।

मन्त्रलिङ्गञ्च—

शुष्मिन्तमो हि शुष्मिभिर्वधैरुग्रेभिरीयसे। ऋक् १।१३३।६।।

य उग्रेभ्यश्चिदोजीयाञ्छूरेभ्यश्चिच्छूरतरः। ऋक् ६।६६।१७।।

इन्द्रो जयाति न परा जयाता अधिराजो राज सुराजयातै।
अथर्व ६।९८।१।।

महो यस्पतिः शवसो असाम्या महो नृम्णस्य तूतुजिः।
ऋक् १०।२२।३।।

तदेव मन्येऽहं ज्येष्ठं तदु नात्येति किंचन। अथर्व १०।८।१६।।

सारांशः—कस्तं शक्तिमतां श्रेष्ठं विष्णुं सूर्यं वा विना विश्वानि भुवनानि वोढुं क्षम इति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

शक्तिर्हि या प्राणिनि वा जगत्यां
तामादिधाता स महान् सहिष्णुः।
स शक्तिमत्स्वाकथितः प्रशस्यः
श्रेष्ठं तमाहू रविमात्मसंस्थम् ।।५६७।।

शरीरस्थ आत्मा स्वाङ्गैर्यदाकर्षणविकर्षणे करोति, तत्तस्यैव शक्तिमतः श्रेष्ठस्यादिस्रोतस्वतोऽन्वाख्यानमात्रम्।

तत्र नियमः—यो हि यस्य विकारः स स्वप्रकृतिं प्रत्याकृष्टो भवति, यथा गोर्वत्सः स्वमातरं गां प्रति, मनुष्यशिशुश्च स्वां मातरं प्रति, पृथिव्या विकारो लोष्ठः पृथिवीं प्रति, सूर्यस्य विकारोऽग्निः सूर्यं प्रति, अन्तरिक्षविकारा आपो धूम्रतामापन्ना अन्तरिक्षं प्रति। नियतोऽयं वैज्ञानिकसिद्धान्तो भगवता पतञ्जलिना ***"स्थानेऽन्तरतमः"*** (पा० १।१।५०) सूत्रे सम्यङ् निरूपितः, पुराणैराचार्यैराविष्कृतश्च।

धर्मः—४०३

धर्म इति—'धृञ् धारणे' भौवादिको धातुः, तस्मात् ***'अर्तिस्तुसुहुसृधृक्षि०'*** (उणादि १।१४०) इत्यादिना औणादिंको 'मन्' प्रत्ययः। धारयतीति 'धर्मः'। धार्यते वा येन जगदिति 'धर्मः' विष्णुर्वा सूर्यो वा धर्मशब्दाभिधेयः।

अत्र मन्त्रलिङ्गम्—

इममञ्जस्पामुभये अकृण्वत धर्माणमग्निं विदथस्य साधनम्।
ऋक् १०।९२।२।।

पितुं नु स्तोषं महो धर्माणं तविषीम्। ऋक् १।१८७।१।।

धर्मोऽस्मि विशि राजा प्रतिष्ठितः। यजु० २०।९।।

ध्रुवां भूमिं पृथिवीं धर्मणा धृताम्। अथर्व १२।१।१७।।

धर्मशब्दोऽयं—विविधविभक्तिवचनेषु यथाप्रकरणं वेदे प्रयुज्यते अतस्तत्र वेद एव जिज्ञासुभिर्द्रष्टव्यम्।

भवतश्चात्रास्माकम्—

धर्मो हि विष्णुः स हि वास्ति सूर्यः
सूर्यात्मधर्मेण जगद्धृतं वै ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सूर्यञ्च यो धारयते स विष्णुः
तस्मिन्ह तस्थुर्भुवनानि विश्वा।।५६८।।

व्यवस्था वा धर्मः—

व्यवस्थितौ यो नियुनक्ति विश्वं
नक्षत्रसूर्यादिगणान् समस्तान्।
स विष्णुरेकः क उ तं विना स्याद्
धर्मोऽस्ति संख्यातुमिह प्रवृत्तः।।५६६।।

तथा च मन्त्रलिङ्गम्—

स दाधार पृथिवी द्यामुतेमां कस्मै देवाय हविषा विधेम।। यजु०१३।४

धर्मविदुत्तमः—४०४

धर्मो=धारकः, धारकान् धर्मान् वेत्तीति 'धर्मवित्' धर्मविदां मध्ये य उत्तमः= उद्गततमः स 'धर्मविदुत्तमः'। उत्तमशब्दे उदुपसर्गात् परस्य कस्यचिदपि क्तान्तधातुरूपस्य लोपोऽवगन्तव्यो भवति। कुतः—उपसर्गो हि धात्वर्थमाकर्षति, तस्मात्—उद्गततमः उत्तमः। उद्भूततमः उत्तमः। उद्याततमः उत्तमः। उच्चैर्निःसृततमः उत्तमः। अत्र बुद्धेर्वैशद्याय बहुधा व्यासीकृत्योपन्यस्त उत्तमशब्दः। व्यासो हि विश्लेषः।

'धर्मविदुत्तम' इति पदस्य लोकं दृष्ट्वा अमुना प्रकारेण व्याख्यातं भवति। तद्यथा मानुषशरीरे किंवा पशुपक्षिशरीरे यावन्तः सन्धयः सन्ति, ते प्रायशः परस्परं भेदमापन्नाः सन्ति। तद्यथा—सर्वकं शरीरं गुल्फसन्धिर्धारयति। स यथाविधः सन्धिरस्ति, न तथाविधो जानुसन्धिरस्ति। यथाविधो जानुसन्धिरस्ति न तथाविध ऊरुदण्डसन्धिः। यथाविध ऊरुदण्डसन्धिरस्ति न तथाविध ऊरुफलकसन्धिः। यथाविध ऊरुफलकसन्धिः न तथाविधस्त्रिकास्थ्नां सन्धिरस्ति। यथाविधस्त्रिकास्थ्नां सन्धिः, न तथाविधः शेषाणां पृष्ठकशेरुकाणां सन्धिरस्ति। सन्धिमन्तरा स धर्मविदुत्तमो विष्णुरमोघधर्मा सन् कशेरुकानां स्वरूपमपि विविधं करोति।

स्वकं धर्मविदुत्तमत्वरूपं गुणं साकल्येन व्याचक्षाणः सन् यथाविधः कशेरुकाणां सन्धिरस्ति, न तथाविधः शिरःकपालानां सन्धिरस्ति। यथाविधः शिरःकपालानां सन्धिरस्ति, न तथाविधः सन्धिरस्ति शिरःकपालमध्ये वर्तमानानामस्थ्नाम्। अमुथैव हन्वोः सन्धिर्हनुमूलसन्धिश्च भिन्नः। दन्तानां सन्धिर्भिन्नः। बाहुमूलसन्धिर्भिन्न एव ऊरुदण्डास्थिसन्धिमपेक्षीकृत्य। उरः-पर्शुकानां सन्धिः परस्परं, मेरुदण्डेन च

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सन्धिः किञ्चिद् भेदमापन्न एव। कफोणीसन्धिर्भिन्नो जानुसन्धेरपेक्षया। एवमेव मणिबन्धसन्धिर्गुल्फसन्धेरपेक्षया भिन्न एव। एवं कृत्वा मांससन्धिष्वपि वैशिष्ट्यं दृश्यतेऽस्थिसन्धीनामपेक्षया।

धर्मो हि धारणालक्षणः। सर्वं समुदितं मांससन्धि-धातुसन्धि-आशयसन्धि-अस्थिसन्धिमयं शरीरं तमेव धर्मविदुत्तमं प्रतिपदं व्याचष्टे। नैतावतैवालम्, तत्र उष्ट्रशरीरास्थ्नां निर्माणं सन्धानञ्च गोरपेक्षया भिन्नमेव, गोः शरीरसन्धानमश्वापेक्षया भिन्नमेव। एवमेव मयूरचटकादिषूत्प्रेक्ष्यम्।

मत्स्ये समुद्रान्तःशायिनि सर्पशरीरे च स्फुटं भेदो दृश्यते। अनेनैव विधिना क्षुपलता-वीरुध्-वृक्षेष्वपि संयोजनीयं भवति। नैतावतैव स भगवान् धर्मविदुत्तमोऽलमाश्रयति, परन्तु नभश्चराणां ग्रहाणां गतिभेदं व्यवस्थाप्य तेषां सन्धीन् विविधं करोति, भावाभावाय लोकानाम्।

ऋतुसन्धिरयनसन्धिस्तथोदयास्तसन्धिरेते सन्धयः परस्परं भिन्ना एव। तारकाणां सन्धिर्भिन्नः। तद्यथा—सप्तर्षयो दिवि दृश्यमाना न परस्परं विरुद्ध्यन्ति, कुतः सन्धीनां बहुत्वात्।

अतो वेदवाक् स्पष्टयति स्वमात्मानम्। आत्मा—शब्दो निजशब्दपर्यायः, निजं स्वरूपमिति। **'स नो बन्धुर्जनिता०'** (यजु० ३२।१०)। यो यस्य जनिता भवति, स एव तस्य बन्धुर्भवति। बन्धुः=बन्धनकर्ता सन्धाता वा समानार्थः।

लोकेऽपि च पश्यामः—य एव जनिता भवति, स एव च विधाता विविधरूपेण धारणकर्ता भवति। परिवारे यो मूलः पुरुषो भवति, स स्वकं सपरिच्छदं परिवारं सन्दधाति पृथक् पृथक् रूपेण। तद्यथा—जामातरं, स्नुषां, पुत्रान्, नप्तॄन्, भृतकान्, पूज्यानतिथींश्चेत्यादि स्वयमूह्यं लोकं दृष्ट्वा।

यो हि जनिता भवति, स एव हि विधाता भवति। स एव हि धामानि स्थानानि "लोके च पत्तनानि" इति ज्ञानक्रमः। एतस्यैव वैष्णवनियमस्य व्याख्यामात्रं परिपाटीमन्वियन् दृश्यते। वेद=जानाति, भुवनानि—भवनानि प्राप्तसत्ताकानि त्यक्तसत्ताकानि प्राप्यमाणसत्ताकानि च, विश्वानि=यत्र=यस्मिन् जनितरि देवाः साध्याः ऋषयश्च येऽमृतं नाशरहितं धर्मम् 'आनशानाः' समन्ताद् गतिं प्रयच्छन्तः तृतीये धामनिऐरयन्त। तृतीयं धाम ज्ञानाधिष्ठानं तत्र विचरन्ति विचरिष्यन्ति वा।

लोकेऽपि च पश्यामः पादादुर्वन्तमेकं पदमूरोः शिरः कपालसन्ध्यन्तं द्वितीयं पदं, शिरस्तृतीयं ज्ञानप्रधानम्। एवम्भूतं ज्ञानमार्गमनुनिशम्य सुधीभिर्वेदमन्त्राणां विविधा ऊहा ऊहितव्या भवन्ति। प्रसङ्गप्राप्तमत्र व्याख्यातमस्माभिः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

स धर्मविद् धर्मविदां वरेण्यः
स एव सन्धीन् कुरुते विचित्रान्।
स एव तान् वेत्ति च सन्दधाति
स एव मर्त्येन च गेय[1] एकः।।५७०।।

य एव धर्मविदुत्तमं विष्णुं वेद, स एव कुशलः शिल्पी, प्रबन्धकः, व्याख्याता, ज्ञानदाता, उपदेष्टा, प्रभोः साक्षाद्दृष्टा च भवति। स एव च सपरिच्छदे परिवारे ससुखं निवसति।

अत एव च —**'तद् विष्णोः परमं पदं सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्।'** यजु० ६।५।। इति मन्त्रः सत्यापयति स्वकं भावम्।

मन्त्रलिङ्गञ्च—

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।
यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त। यजु० ३२।१०।।
यो अस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद।
ऋक् १०।१२६।७।।

को अद्धा वेद क इह प्रवोचत कुत आजाता कुत इयं विसृष्टिः।
ऋक् १०।१२६।६।

त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः।
अतो धर्माणि धारयन्।। यजु० ३४।४३।।

❖ ❖ ❖

वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः।
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ।।५७।।

४०५ वैकुण्ठः, ४०६ पुरुषः, ४०७ प्राणः, ४०८ प्राणदः, ४०९ प्रणवः, ४१० पृथुः।

४११ हिरण्यगर्भः, ४१२ शत्रुघ्नः, ४१३ व्याप्तः, ४१४ वायुः, ४१५ अधोक्षजः ।।५७।।

---

१. गेयः स्तुत्यः स्तोतुमर्ह इत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वैकुण्ठः—४०५

'कुठि प्रतिघाते' भौवादिको धातुः। प्रतिघातो नाम संश्लेषविघातः। इदित्त्वान्नुम् अनुस्वार-परसवर्णौ, भावे घञ् प्रत्ययः। विपूर्वो बहुव्रीहिः विकुण्ठः। समासान्तोऽत्र कप्रत्ययो न भवति तस्य वैकल्पिकत्वेन। कुण्ठा संश्लेषविघातो विगतो येषां ते विकुण्ठाः, त एव 'वैकुण्ठा'। महाभारतेऽपि—

मया संश्लेषिता भूमिरद्भिर्व्योम च वायुना।
वायुश्च तेजसा सार्द्धं वैकुण्ठत्वं ततो मम।।

महाभारत शां. प. ३४३—५०।।

घातो नाम यथाभूतस्य विकार आपादनम्। तद्यथा—गच्छतो गत्यवरोधनम् तस्य बन्धनम्। प्रतिघातः किम्? अवरुद्धगतेः, अवरुद्धस्य मोक्षणम्।

उदाहरणं यथा लोके—काष्ठपट्टद्वयं कीलकैः शिल्पिना प्रतिहन्यते। प्रतिहतं बद्धं तत् काष्ठपट्टद्वयं शिल्पिना प्रतिहत्य पृथक् पृथक् क्रियते। तयोः काष्ठपट्टयोः स्वतन्त्रा गतिः प्रतिरुद्ध्यते प्रथमकल्पेन उद्घटनेन। द्वितीया गतिर्वस्तुधारणसामर्थ्यं प्रतिहतं=विश्लिष्टं विकुण्ठितं वा भवति।

लोकेऽपि च प्रतिपदं पश्यामः—कृषको बीजं वपति, स बीजः स्वात्मन्यवरुद्धक्षुपारोहणधर्मा सन् भूमौ गत्वा स्वकं कुण्ठितं धर्मं जहाति, सोऽयं कल्पो बद्धस्य प्रत्याहारभूतस्य स्वात्मलीनगतिकस्य वा। आरोहणधर्मा बीजो यावदारोढव्यो भवति तावदारुह्य कुण्ठितो भवति, गतिं परित्यजति, परिपाकमुपलभ्य शोषं याति, बीजभावाय कल्पते।

एष एव क्रमः सर्वत्र स्थावरजङ्गमयोनिष्विति। जङ्गमे यथा शुक्रशोणितौ गर्भाशयं गत्वा स्वकं प्रधानं कर्म त्यक्त्वा समुदितौ गर्भपरिवृद्ध्यै गतिमन्तौ भवतः। गर्भशय्यायाञ्च जहत्स्वार्थवृत्तिको गर्भः प्रसवं लब्ध्वा जहत्स्वार्थवृत्तिकं धर्मं परित्यज्य, रोदिति, हसति, दहते, मूत्रयति, अङ्गानि चेष्टयति, स्तन्यं धयति चेति गर्भकुण्ठामपेक्षीकृत्य कुण्ठाप्रतिघातः। ततो वक्तुं शक्यते, विगता कुण्ठा 'गर्भभूता' अस्य जातकस्य स 'वैकुण्ठः' स्वतन्त्र इति।

स एव च जीवो यावज्जीवं सर्वाणि लौकिकानि कर्माणि कुर्वन् मृत्युना पुनः स्वातन्त्र्येण कर्म कर्तुमनर्हः क्रियते, गत्यवरोधं प्रतिघातं वोत्पाद्य। एवं स शवोऽपि 'वैकुण्ठः' उच्यते। वैकुण्ठस्य मृतस्य शवभूतस्य वहनाय यत् साधनं क्रियते, तत् सम्बन्धनमपि 'वैकुण्ठं' नाम। तत्साधनञ्च स्त्रीलिङ्गान्तं यद्यस्ति, तदा 'वैकुण्ठी' इत्युच्यते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सारार्थत एवं वक्तुं शक्यते—यदेतद् गतिमज्जगत् प्रलयप्राप्तञ्च जगत् यत्र विश्राम्यति स 'वैकुण्ठः'। स च वैकुण्ठनामा विष्णुः प्रपदं जगद् व्यश्नुवानो दृश्यते, संश्लेषप्रतिघातधर्मेण, विश्लिष्टस्य गतिमतः संश्लेषधर्मेण च। ते विकुण्ठां प्राप्ता, मृता, जीवा यत्र विश्राम्यन्ति, तत्स्थानं वैकुण्ठं नाम।

लोकेऽपि च पश्यामः—कृषको बीजं क्षेत्रे वपति, तं बीजं क्षेत्रं पुनः स्वात्मनि स्वापयति बहुधा परिणमयति च। द्वितीयमुदाहरणम्—स कृषकोऽन्नं भुक्त्वा स्वात्मनि लीनयति, हदित्वा च पुनर्बीजाय साहाय्यं प्रददाति, एष एव सर्वत्र नियमः, एवं लोकं दृष्ट्वा बहुविधा ऊहा ऊहितव्या भवन्ति।

मन्त्रलिङ्गञ्च—

तत्रेदं सर्वमर्पितमेजत् प्राणत प्रतिष्ठितम्। अथर्व १० ।८ ।६ ।।

यतः सूर्य उदेत्यस्तं यत्र च गच्छति। अथर्व १० ।८ ।१६ ।।

यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त। यजु० ३२ ।१० ।।

येन स्वः स्तभितं येन नाकः। यजु० ३२ ।६ ।।

मित्र ईक्षमाण आवृत्त आनन्दः। अथर्व ६ ।७ ।२३ ।।

भवन्ति चात्रास्माकम्—

चराचरं विश्वमिदं समस्तं
यत्तेजसा याति गतेर्बहुत्वम् ।
तत्तेज एवारभते च कुण्ठां
वैकुण्ठनामा स महान् वरेण्यः ।।५७१।।

सदेकभावान्म्रियते न शम्भुः
सदेकभावान्न स जायते वा ।
सर्वत्र सद्भावमितः स शम्भु-
र्न कुण्ठते नापि विकुण्ठते वा।।५७२।।

इयं विसृष्टिर्विभुना प्रणुन्ना
वैकुण्ठ्यकुण्ठ्ये विजहाति याति।
रविर्यथा यात्युदयास्तहीनो
दिनं निशां वा कुरुते दिनेशः ।।५७३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पुरुषः—४०६

अत्र विष्णोर्नामसु पठितं 'पुरुषे'ति नाम बहुधा निर्वक्तुं शक्यते। यथा—

१. पूर्वोऽस्माद् विश्वात्तदादिकरणत्वादिति पुरुषः।

२. "उष दाहे" पुरून् सर्वानोषति दहतीति वा 'पुरुषः'।

३. पिपर्ति पृणाति पालयति पूरयति इति वा 'पुरुषः'।

४. "पुर अग्रगमने" पुरति अग्रगामी भवतीति वा 'पुरुषः'।

५. पुरि देहे शेते—इति वा 'पुरुषः'।

तत्र पूर्वोऽस्मादिति निर्वचने लिंगम् —"**इयं विसृष्टिर्यत आबभूव**" (ऋग् १०।१२६।७)। यतः=आदिकारणादित्यर्थः। पुरून् सर्वानोषतीति यन्निरुक्तं तत्रापि '**ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत**' (ऋक् १०।१९०।१) अभितः सर्वत इद्धात्प्रवृद्धतेजसः सन्तप्तादत एव। द्रवीभूतात्प्रकृतित्वादयं प्रपञ्चः पाञ्चभौतिक-समुदायरूपोऽजायतेत्यर्थः। अत्र प्रकृतितत्त्वस्य स्वतेजसा सन्तापयिता पुरुष एव विष्णुरूपः।

अत्र दृष्टान्तो यथा कश्चिच्छिल्पी धातुं सन्ताप्य विद्राव्य मूषासु च सम्पात्य तस्य सुवर्णताम्रादिधातोर्यथा मन ईप्सितानि रूपाणि विधत्ते, तथा पुरुषोऽपि प्रकृतितत्त्वं सन्ताप्य स्वेच्छारूपया मूषया जगदिदं नाना रूपं विधत्ते। अथ स भगवान् पुरुषनामा विष्णुः सर्वमिदं जडचेतनवर्गं यथापेक्षितैर्यत्नैः स्वप्रत्तकालावस्थं पिपर्ति पृणाति पालयतीति। तस्य पालनपूर्णरूपो गुणोऽशेषविश्वव्यापकः। सर्वे पदार्था जगति यथा प्रकृति विकसिताः पूर्णाश्च भवन्ति, दृढोऽयं नियमः पारमेश्वरीय इति।

यथा च गर्भे स्थितमर्भकं यथानियतकालं पालयति, पूरयति च, यथानियतकालार्हैः सर्वविधै रसगुणवीर्यविपाकैराप्याययति। एवञ्च स एव विष्णुः पुरुष इत्युच्यते। शेते चाप्यसौ स्थावरजंगमशरीरेषु स्वविरचितेषु व्यापकत्वेन। पुरुषशब्दो यथाक्रममागतो व्याख्यातचरः।

मन्त्रलिङ्गञ्च—

पञ्चस्वन्तः पुरुष आविवेश तान्यन्तः पुरुषे अर्पितानि।
यजु २३।५२।।

पुरुष एवेदं यत्भूतं यच्च भाव्यम्।
उतामृतत्वस्स्येशानो यदन्नेनाति रोहति।। यजु ३१।२।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

योऽसावादित्ये पुरुषः सोऽसावहम्। यजु ४० ।१७ ।।
तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः।। ऋक् १० ।६० ।७ ।।
नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूर्मिदिशः श्रोत्रात् तथा लोकाँ अकल्पयन्।।
ऋक् १० ।६० ।१४ ।।

भवतश्चात्रास्माकम्—

सोऽभीद्धतेजाः पुरुषः पुराणः
सूर्यादिकान् दीप्तिमतः करोति ।
एवं स शिल्पी कुरुतेऽर्थवन्ति[1]
धातूत्थरूपाणि निजार्थकानि[2] ।।५७४।।

गर्भेऽर्भकं पाति यथा स शम्भुः
तस्याह्र्ययोगैर्विदधाति वृद्धिम् ।
लोके तथैवास्य पथोऽनुगन्ता
कर्ता च कृत्यानि[3] सदा करोति ।।५७५।।

प्राणः—४०७

'प्रा पूरणे' आदादिको धातुः। तस्माद् ***'गत्यर्थ'*** (पा० ३ ।४ ।७२) इति कर्तरि 'क्तः', ***'संयोगादेरातो धातोर्यण्वतः'*** (पा० ८ ।२ ।४३) सूत्रेण 'नत्वम्', नस्य णत्वम्। प्राणः पूर्णः। **'न कुतश्चनोनः'** (अथर्व १० ।८ ।४३) इति श्रुतिः।

मन्त्रलिङ्गञ्च—

प्राणाय[4] नमो यस्य सर्वमिदं वशे।
यो भूतः सर्वस्येश्वरो यस्मिन्त्सर्वं प्रतिष्ठितम्।
(अथर्व० ११ ।४ ।१)
प्राणो ह सर्वस्येश्वरो यच्च प्राणिति यच्च न। अथर्व ११ ।४ ।१० ।।
प्राणो विराट् प्राणो देष्ट्री प्राणं सर्व उपासते। अथर्व ११ ।४ ।१२ ।।

१. अर्थवन्ति=प्रयोजनवन्ति। २. निजार्थकानि शिल्पिप्रयोजनकारीणि। ३. कृत्यानि=कर्तुमर्हाणि कार्याणि। ४ प्राणाय= पूर्णायेत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'पूर्णात् पूर्णमुदचति पूर्णं पूर्णेन सिच्यते।' अथर्व १० ।८ ।२९ ।।

भवति चात्रास्माकम्—

न चास्ति किञ्चिद्भुवि दृश्यमानं
किं वापि चित्तेन विचिन्त्यमानम्।
न यत्र शक्त्या स भवेत् प्रपूर्णः
पूर्णात्मके पूर्णमिदं[1] दधाति ।।५७६।।

प्राणदः—४०८

प्राणदः पूर्णदः पूर्णस्य दाता। कः पुनः पूर्णः ? स एव व्यापको विष्णुः सर्वत्र पूर्णः। स्वकं पूर्णमात्मानं सर्वत्र समर्प्य सर्वं जगत्पूर्णं करोति, एतदेव तस्य प्राणदत्वं नाम।

लोकेऽपि च पश्यामः=शरीरे शरीरधातवः सर्वत्र पूर्णाः सन्ति दुग्धे घृतवत्, क्षीरिवृक्षे क्षीरवत्। मनुष्योऽपि तमनुकुर्वन् निजस्य शरीरस्य सर्वत आच्छादने समर्थकानि वासांसि करोति। मनुष्यो हि तस्य प्राणदस्य विष्णोरेव कर्माण्यनुकरोति। एवं लोकं विलोक्य विविधाः कल्पनाः कल्पयितव्या भवन्ति। तद्यथा=प्राणदेन पूर्णदेन परिपूर्णोपकरणा सर्वा प्राणिजातिः प्रसूयते।

मन्त्रलिङ्गञ्च—

प्राणदा अपानदा व्यानदा वर्चोदा वरिवोदाः। यजु० १७ ।१५ ।।

यः प्राणदः प्राणदवान् बभूव यस्मै लोका घृतवन्तः क्षरन्ति। अथर्व ४ ।३५ ।५ ।।

मया सोऽन्नमत्ति यो विपश्यति यः प्राणति। अथर्व ४ ।३० ।४ ।।

भवन्ति चात्रास्माकम्—

पूर्णः स्वयं शम्भुरचिन्त्यशक्तिः
विश्वं विधत्ते बहुशः[2] प्रपूर्णम्।
तथा यथा पूर्णमिदं शरीरं
दोषैर्मलैर्धातुभिरातनोति ।।५७७।।

तं प्राणदं पश्यति वीतशोको

१. इदं=सकलं जगत्। २. बहुशः=वैविध्येन—अनेकधा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

निजे स्वरूपे स पुनर्बहिस्तम्।
पश्यन् दृशा याति तथैव हर्षं
यथा शिशुर्मातरमत्र पश्यन्।।५७८।।

को नाम मूढः परिहृत्य विष्णो-
रङ्कं [1]सुखापूर्णमियादपूर्णम्।
[2]इयत्त्वमात्रं जगदस्ति सर्वं
तत्प्राणदेनाततमित्यबुद्ध्वा[3] ।।५७९।।

प्रणवः—४०६

विष्णुसहस्रनामस्तोत्रे प्रणवः प्रणम इति द्विविधः पाठ उपलभ्यते। तयोश्च प्रणव—प्रणम—शब्दयोः सिद्धिश्चेत्थं विज्ञेया—'णु स्तुतौ' प्रपूर्व आदादिको धातुः। ***''णो नः''*** (पा० ६।१।६५) इति नत्वम्। नौतिरिहान्तर्भावितण्यर्थस्य नमेरर्थे वर्तते, 'अनेकार्था हि धातवः' इति वैयाकरणसमयात्। ततः 'पचाद्यच्', गुणावादेशौ णत्वञ्च ***'उपसर्गादसमासेऽपि णोपदेशस्य'*** (पा० ८।४।१४) सूत्रेण। यद्वा—प्रपूर्वात् नौतेः ***'ऋदोरप्'*** (पा० ३।३।५७) इति सूत्रेण कर्मण्यप्रत्ययो, गुणावादेशौ णत्वञ्च पूर्ववत्। प्रणौति स्तौति यं स 'प्रणवः' ओमित्येव ब्रह्मवाचकः शब्दः सिध्यति।

'प्रणमः'—प्रोपसृष्टो 'णम प्रह्वत्वे शब्दे च' इति भौवादिको धातुः। ***'णो नः'*** (पा० ६।१।६५) इति नत्वे, णिचि वृद्धिः। ***''नोदात्तोपदेशस्य मान्तस्यानाचमेः''*** (पा० ७।३।३४) इति सूत्रस्य नात्र प्रवृत्तिर्ण्णितः कृतः परत्वाभावात्। तत्र ***''जनीजृष्क्नसुरञ्जोऽमन्ताश्च''*** इति घटादिगणसूत्रानुशासनाद् घटादिषु नमतेः सद्भावः। ***''ज्वलह्वलह्मलनमामनुपसर्गाद्वा''*** इति गणसूत्रन्तु नात्र प्रवर्तते; सोपर्गात्वात्। तेन नित्यमेव मित्त्वातिदेशः। ***'घटादयो मितः'*** इति गणसूत्रेण णौ ***'मितां ह्रस्वः'*** (पा० ६।४।९२) इति ह्रस्वादेशः। पचाद्यचि णिलोपे णोपदेशतया ***''उपसर्गादसमास''*** (पा० ८।४।१४) इति णकारादेशः। एवं 'प्रणमः' शब्दः सिध्यति।

---

१. सुखापूर्णम्=सुखेन आपूर्णम्=आसमन्तात्परिपूर्णम्=आनन्दघनमित्यर्थः। २. इयत्त्वमात्रम्—केवलमियदेव इयत्तया परिच्छिन्नम्=परिमितमित्यर्थः। ३. अबुद्ध्वा=अविमृश्य।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

दिव्यो गन्धर्वो भुवनस्य यस्पतिरेक एव नमस्यो विक्ष्वीड्यः।

अथर्व २।२।१।।

ईडेन्यो नंमस्यस्तिरस्तमांसि दर्शतः। अथर्व २०।१०२।१।।

अभित्वा शूर नोनुमोऽदुग्धा इव धेनवः। अथर्व २०।१२१।१।।

'प्रणवः' अत्र विष्णोर्नामसु 'प्रणवः' इति नाम सङ्गतार्थम्। कुतः ? ओमित्यस्य प्रत्यायको हि 'प्रणव'शब्दः ***'प्रणवष्टेः'*** (पा० ८।२।८६) इत्यत्र सूत्रे तथैव दृष्टत्वात्। प्रणवितुं स्तोतुमर्हत्वात् स विष्णुः 'प्रणवः' इत्युक्तो भवति। प्राञ्चोऽप्याहुः—

सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद् वदन्ति ।

यदिच्छन्तो ब्रह्मचर्यं चरन्ति, तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्।।

कठोपनिषत् । अ० १, वल्ली २, ३५।।

सर्वे वेदाः किं वदन्ति, तमेव कर्तारं विष्णुमिति। उक्तञ्च अथर्वणि—**''वदन्तीर्यत्र गच्छन्ति तदाहुर्ब्राह्मणं महत्''** (अथर्व १०।८।३३)। वदन्तीः=वाचः। स्तुत्यत्वाद् ब्रह्मण ओमित्येव पदं वेदमन्त्रैराक्षेप्स्यते। प्रणवादीनि मन्त्राणि इतिं च।

अत्र विष्णोः सहस्रनामसु परिगण्यमानेषु नूनम्—'ओम्' पदपर्यायकेण प्रणवशब्देन भाव्यमिति। तस्मात् 'प्रणवः' एव सङ्कीर्त्यमानेषु नामसु युक्तियुक्तं सङ्गच्छतेतराम्। 'प्रणमो'ऽपि भवतु। उक्तञ्च मयैव —***''को नाम शक्नोति नरो नियन्तुं तमच्युतं नामसहस्ररज्ज्वा''*** श्लोके १२ व्याख्याने। सर्वकमिदं जगत् तमेव विष्णुं प्रतिपदं प्रकटयति, ज्ञानदृष्टिमन्तं मनुष्यञ्च विवशयति तं प्रति प्रणमितुं वा। उक्तञ्च वेदे **''पश्यदक्षण्वान्न विचेतदन्धः''** (ऋक् १।१६४।१६) इति। उक्तमस्माभिर्नाम्नामारम्भे 'ओम्' पदमधिकृत्य तत्रैव जिज्ञासुभिर्द्रष्टव्यम्।

मन्त्रलिङ्गञ्च—

विश्वे देवास इह मादयन्तोम्प्रतिष्ठ। यजु० २।१३।।

ओ३म् क्रतो स्मर। क्लिवे स्मर। कृतं स्मर। यजु० ४०।१५।।

ओ३म् खं ब्रह्म। यजु० ४०।१७।।

ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः।।

ऋक् १।१६४।६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

स एव नूनं प्रणवोऽत्र विष्णु-
र्यो व्याप्य विश्वं कुरुते विचित्रम्[1] ।
तमेव वेदास्तमु विश्वदेवाः[2]
स्तुवन्ति गायन्ति नमन्ति यान्ति[3] ।।५८०।।

यथा जङ्गमे दशेन्द्रियाणां समनस्कानां व्यवस्थापनं प्रतियोनिभिन्नं भिन्नमेव, स्थावरेष्वप्येवमेवोह्यम्।

पृथुः—४१०

'प्रथ प्रख्याने' चौरादिको धातुः। तस्मात् ***'प्रथिम्रदिभ्रस्जां सम्प्रसारणं सलोपश्च'*** (उणादि० १।२८) इत्युणादिसूत्रेण 'कु' प्रत्ययः सम्प्रसारणम् ऋकारादेशश्च 'पृथु'रिति। प्रख्यातः प्रसिद्धो भवति सर्वत्रेति 'पृथुः'। 'प्रथ विस्तारे'ऽपि दृश्यते' भौवादिवच्च शपं लभते। प्रथते विस्तीर्णा भवतीति पृथिवी स्वामिदयानन्दः सरस्वती स्वकीयोणादिवृत्तौ प्रयुंक्ते १।१५० सूत्रे।

मन्त्रलिङ्गञ्च—

उरुः पृथुः सुभूर्भुव इति त्वोपास्महे वयम्। अथर्व १३।६।१।।
उरुः पृथुः सुकृतः कर्तृभिर्भूत्। यजु० ७।३६।।
बृहन्निध्म एषां भूरिशस्तं पृथुः स्वरुः।
येषामिन्द्रो युवा सखा।। यजु० ३३।२४।।
त्वं वाजः प्रतरणो बृहन्नसि त्वं रयिर्बहुलो विश्वतस्पृथुः।
ऋक् २।१।१२।।

भवतश्चात्रास्माकम्—

पृथुः स विष्णुः प्रथते ह सर्वं
चराचरं विश्वमिदं समस्तम् ।
सोऽनन्तधर्मा कुरुते ह्यनन्तं
चराचरं[4] तस्य दृशा च सान्तम् ।।५८१।।

---

१. विचित्रम्=विविधसंयोजनैश्चितमिति। २. विश्वदेवाः=सर्वे देवाः। ३. यान्ति=प्राप्नुवन्ति।
४. तस्य विष्णोः दृशा=ज्ञानदृष्ट्या इदं जगत् सान्तं—एतावत् इयता युक्तमित्यर्थः। तद्यथा—शिल्पी यन्त्रस्योच्चावचं वित्त्वाऽऽविष्कर्तुं प्रयोक्तुं चार्हति, न तथोपभोक्ता।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पृथुं हि यो पश्यति पार्थदृष्टिः
स एव देहं मनुते च विष्णुम् ।
चन्द्रं मनः सूर्यमसौ स्वनेत्रम्
विराजमानस्य[1] विराट् शरीरम्।।५८२।।

हिरण्यगर्भः—४११

हिरण्यशब्दो गर्भशब्दश्च पूर्वं प्रकृतिप्रत्ययाभ्यां व्याख्यातचरौ। हिरण्यं गर्भे यस्य स 'हिरण्यगर्भः', हिरण्यस्य गर्भे वा यः स 'हिरण्यगर्भः' इत्युभयथा संयोजनीयम्। हिरण्यं गर्भे यस्येति विग्रहतो हिरण्यगर्भशब्दो व्याख्यातचरः। हिरण्यस्य गर्भे यः स 'हिरण्यगर्भः' इत्यत्र लिङ्गम्—

आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च ।
हिरण्ययेन[2] सविता रथेना देवो याति भुवनानि पश्यन्।।

यजु० ३३।४३।।

यथा रथमध्यमधिष्ठाय कश्चिद् याति, तथैव भगवान् विष्णुर्विश्वस्य चराचरस्य मध्येऽधिष्ठानरूपेण विराजमानः स्तुतिमुपयाति, आहूतो वा भवति।

तथा लोकेऽपि पश्यामः—गृहमधितिष्ठन् गृहपतिराहूयते तद्द्रष्टुकामैः। अध्यापनपदमधितिष्ठंश्च गुरुराहूयते जिज्ञासुभिः। अमुथैव शरीरे विराजमान आत्मा तत्तदिन्द्रियकृतरम्यरूपदर्शनशुचिश्रवः श्रवणादिसाधनिकां स्तुतिमुपयाति। तथैवायं विष्णुरपि विद्वज्जनकृतां स्तुतिमाप्नोति।

मन्त्रलिङ्गञ्च—

हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्।

यजु० १३।४।।

हिरण्यगर्भ इत्येष मा मा हिंसीत्। यजु० ३२।३।।
हिरण्यगर्भं परममनत्युद्यं जना विदुः। अथर्व १०।७।२८।।

भवति चात्रास्माकम्—

हिरण्यगर्भः स उ विष्णुरेको,
देहे यथात्मा मत एक एव।

---

१. विराजमानस्य=देहाभिमान्यात्मन=इदं शरीरं विश्वमात्रञ्च तस्य महात्मनः शरीरम्।
२. हिरण्ययेन=हिरण्यमयेनेत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रथे स्थितः सन् स रथी शरीरी
हिरण्यगर्भोऽपि तथात्र विष्णुः।।५८३।।

अत्र उक्तं भवति—

स एक एव केवलो, न द्वितीयतृतीयादिसंख्याभाक्। विशदं द्रष्टव्यमसंख्येय २४७ इति नाम्नो व्याख्याने।

शत्रुघ्नः—४१२

'शत्रुघ्नः' इति विष्णोर्नाम। तत्र 'शद्लृ शातने' इति तौदादिको धातुः, तस्माण्णिचि वृद्धिः ***'शदेरगतौ तः'*** (पा० ७।२।४२) इत्यनेनागत्यर्थे णिचि दस्य तः ***'रुशातिभ्यां क्रुन्'*** (उणादि ४।१०४) इति औणादिकसूत्रेण 'क्रुन्' प्रत्ययः। ***'नेड् वशि कृति'*** (पा० ७।२।८) सूत्रणेट्प्रतिषेधः। णिलोपः। प्रज्ञादिगणे ह्रस्वपाठात् आकारस्य ह्रस्वादेशः। एवं 'शत्रु'शब्दः सिध्यति। 'हन् हिंसागत्यो'र्धातुरादादिकः, तस्मात् ***'अमनुष्यकर्तृके च'*** (पा० ६।४।५३) इति 'टक्' प्रत्ययः। ***'गमहनजनखनघसां लोपः क्ङित्यनङि'*** (पा० ६।४।६२) इत्यनेन कित्युपधालोपः। ***'हो हन्तेर्ञ्णिन्नेषु'*** (पा० ७।३।५४) इत्यनेनान्तर्तम्यान्नकारे परे हकारस्य 'घकारः' कुत्वम्। ***'अचः परस्मिन् पूर्वविधौ'*** (पा० १।१।५१) इत्यनेनोपधालोपः स्थानिवन्न भवति, नकारे परे कुत्वविधानसामर्थ्यात्।

यदि च शत्रुशब्दे मनुष्यत्वभावना तदा मनुष्यकर्तृकपूर्वपदत्वात् टकोऽप्राप्तिः, तदा ***'कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्'*** (पा० ३।२।५ वा०) इति सूत्रस्थवार्तिकेन 'क' प्रत्ययं विधाय रूपं साधनीयम्। मूलविभुजादिराकृतिगणः। शेषा प्रक्रिया टक्प्रत्ययवज्ज्ञेया। एवञ्च 'शत्रुः' शातयिता प्राणघातकः कार्यविघातको वा भवति। यश्च यस्य शातयिता स तस्य 'शत्रु'रित्युच्यते। तञ्च शत्रुं यो हन्ति स 'शत्रुघ्न' इति शत्रुघ्नशब्दः सङ्गतार्थो भवति।

स च विष्णौ सम्यगन्वेति, अतो विष्णुरेव 'शत्रुघ्न' नाम्नोक्तो भवति। यतो हि यः कश्चिदपि भागवतान्नियमानवमत्य यथेच्छं विशृङ्खलमाचरति, स तन्नियमशातयिता भवति। तञ्च सर्वनियामको विष्णुः स्वकृताभिर्व्यवस्थाभिर्हिनस्ति, तं दण्डयति। अतो विष्णुरेव 'शत्रुघ्न' शब्दान्वर्थकः।

मन्त्रलिङ्गञ्च—

प्राच्या दिशस्त्वमिन्द्रासि राजोतोदीच्या दिशो वृत्रहञ्छत्रुहोऽसि।।
अथर्व० ६।९८।३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शत्रूयतामभितिष्ठा महांसि । यजु० ३३।१२।।
सद्यो जज्ञानो निरिणाति शत्रून्। यजुं० ३३।८०।।
जहि शत्रून् अभि गा इन्द्र तृन्धि। अथर्व० २०।८।१।।

भवति चात्रास्माकम्—

विश्वे कृता या विभुना व्यवस्था
तां यो [1]विभज्याकुरुते क्रियाः स्वाः।
स एव दण्ड्यः किमु वा स घात्यः
शत्रुघ्ननाम्ना कथितः स विष्णुः।।५८४।।

व्याप्तः—४१३

'आप्लृ व्याप्तौ' धातुर्व्युपसर्गः, तस्मात्कर्तरि 'क्तः' प्रत्ययः। सर्वं चराचरं जगद् विशेषेण आप्नोतीति 'व्याप्तः' प्रभोर्विष्णोर्नाम। सर्वं हीदं जगद् भगवद्व्याप्तिमद्, न हि जगत्यङ्गुलीपरिमितमपि स्थानमीदृक् यत्तेन विना भवेत्। भगवतस्तु जगदादिकारणत्वात्, जगदन्तरापि सद्भावः, किन्तु जगतस्तु भगवद्व्याप्तिमत्त्वाद् भगवत्सत्तयैव सत्त्वम्। अत एव स विष्णु'र्व्याप्ता' भिधानः। आप्नोतेरेव 'आपः' ब्रह्मपर्यायः। तथा च वेदे—**'आपो ब्रह्म जना विदुः'** (अथर्व० १०।७।१०), **'ता आपः स प्रजापतिः'** (यजु० ३२।१) इति।

मन्त्रलिङ्गञ्च—

यो अग्नौ रुद्रो यो अप्स्वन्तर्य ओषधीर्वीरुध आविवेश।
अथर्व० ७।८७।१।।
अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि। ऋक् १।१।४।।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः। यजु० ४०।५।।
तस्मिन्निदं सं च विचैति सर्वं स ओतः प्रोतश्च विभूः प्रजासु।
यजु० ३२।८।।
न तं विदाथ य इमा जजानान्यद् युष्माकमन्तरं बभूव।
ऋक् १०।८२।७।।
ईशा वास्यमिदं सर्वं यत् किञ्च जगत्यां जगत्। यजु० ४०।१।।

---
१. विभज्य = भङ्क्त्वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

व्याप्नोति विश्वं स्वक एव गर्भे
माता यथान्तर्निदधाति गर्भम् ।
व्याप्तेन नाम्ना स ततोऽत्र विष्णुः
सङ्कीर्तितो वेदविदां वरेण्यः ।।५८५।।

वायुः—४१४

'वा गतिगन्धनयोः' इत्यादादिकधातोः ***'कृवापाजिमिस्वादिसाध्यशूभ्य उण्'*** (उणादि १।१) इत्यौणादिक 'उण्' प्रत्ययः, ***'आतो युक् चिण्कृतोः'*** (पा० ७।३।३३) सूत्रेण 'युगागमे' व्याकृतो 'वायु'शब्दः। वाति सर्वत्र गतो भवतीति 'वायु'र्विष्णुः। व्यापनशीलत्वात्, स्वसत्तास्फूर्तिभ्यां सर्वं व्याप्नोतीत्यर्थः।

मन्त्रलिङ्गञ्च—

तदेवाग्निस्तदादित्यस्तद् वायुस्तदु चन्द्रमाः। यजु० ३२।१।।
मेधामिन्द्रश्च वायुश्च मेधा धाता ददातु मे। यजु० ३२।१५।।
वायुर्मा तत्र नयतु वायुः प्राणान् दधातु मे। वायवे स्वाहा।
अथर्व० १६।४३।३।।
शतधारं वायुमर्कं स्वर्विदं नृचक्षसस्ते अभि चक्षते रयिम्।
अथर्व० १०।४।२६।।
प्र नः पूषा चरथं विश्वेदेव्योऽपां नपादवतु वायुरिष्टये।
ऋक्० १०।६२।१३।।

भवति चात्रास्माकम्

स्थानन्न तद्यत्र न वाति शम्भुः
स्थानन्न तद्यत्र न तस्य सत्ता।
स वायुरूपं प्रपुनाति विश्वं
विश्वान्तरः प्राणयते ह विश्वम्।।५८६।।

इह पञ्चभूतान्तर्गतवायौ यः प्राणनधर्मः सोऽपि वायुनाम्नो विष्णोरेव।

अधोक्षजः—४१५

'यादृगेव ददृशे तादृगुच्यते' (ऋ० ५।४४।६) इति ऋग्वेदीयवचनमनुसृत्य

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'अधोक्षजः' सूर्यस्य नाम। अधः अक्षाद् जायत इत्यधोक्षजः। ***'पञ्चम्यामजातौ'*** (पा० ३।२।६८) इति सूत्रेण 'जनेर्डः' प्रत्ययः। ***'डित्यभस्यापि टेर्लोपः'*** इत्यनेन वार्तिकेन टेर्लोपात्—'अधोक्षज' इति सिद्ध्यति।

'जनी प्रादुर्भावे' दैवादिको धातुः, प्रादुर्भावो हि नाम सतः पदार्थस्य व्यवधायकस्य विक्षेपराहित्यात् स्वरूपेऽवस्थानम्। सूर्योऽप्येतस्मादेव दिवसः पुत्र उच्यते। **'दिवियोनिः'** (ऋ० १०।८८।७)। इत्यृचि।

भवन्ति चात्रास्माकम्—

जनैर्यथास्थानगतैः स सूर्यः
सुप्रान्तरिक्षादधरादुदायन् ।
निरीक्ष्यतेऽधोक्षजमेनमाहु-
र्विष्णुं रविं भानुमनेकसंज्ञम् ।।५८७।।

न जायते नापि च लीयतेऽयं
दिवि श्रितो द्योतत एव नित्यम्।
यो वाऽर्कराशिः स्पृशतीव गोंऽशं
निरीक्ष्यते लग्नमतस्तमाहुः ।।५८८।।

लग्नं कलांशैः स्फुटयन्ति तज्ज्ञाः
शुभाशुभं लग्नवशाद्धि मर्त्यः ।
भुङ्क्ते यथाकालकृतं च नैजं
लग्नातिरिक्तं न हि किञ्चिदस्ति।।५८६।।

यद्वा द्यौरक्षं पृथिवी चाधस्तयोः प्रादुर्भवन्निव।
दृश्यते लोहितार्कोऽयं ततोऽधोक्षज उच्यते।।५६०।।

अक्षशब्दो बह्वर्थः। तद्यथा—

शंकुर्नरो ना कथितः स एव, खार्द्धाद्रवेर्या विषुवद्दिनार्धे ।
नतिः पलोऽक्षश्च स एव तज्ज्ञैस्तत्रोन्नतिर्यस्य स एव लभ्यः।।

सिद्धान्तशिरोमणौ गणिताध्याये।।

चन्द्राश्विनिघ्ना पलभार्द्धिता च लंकावधिः स्यादिह दक्षिणोक्षः।

लंका निरक्षदेशः। पलभा—मेषादिगे सायनभागसूर्ये दिनार्धभा या पलभा भवेत् सा ग्रहलाघवे—

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उदग् दिशं याति यथा यथा नरस्तथा तथा स्यान्नतमृक्षमण्डलम्।
उदग् ध्रुवं पश्यति चोन्नतं क्षितेस्तदन्तरे योजनजाः पलांशकाः।।

सिद्धान्तशिरोमणौ गोलाध्याये।।

'अक्षा' द्यूतसाधनीभूताः पाशा अप्युच्यन्ते। तथा च वेदे—**''अक्षैर्मा दीव्यः कृषिमित् कृषस्व''** (ऋग् १०।३४।१३)। नेत्रेन्द्रियपर्य्यायोऽ'प्यक्ष'शब्दः। तद्यथा— **भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्रा'।** (ऋग् १।८९८।८)। 'अधोऽक्षमिन्द्रियं स्त्रीपुरुषयोः प्रजननसाधनीभूत इन्द्रिये। ते च स्वार्थसाधकेऽपि। तथा च वेदे—**'रेतो मूत्रं विजहाति योनिं प्रविशदिन्द्रियम्।'** (यजु० १९।७६)

लोकेऽपि च पश्यामः— सदयं जीवः। सतो मातुरुपस्थात् सावकाशे स्थाने प्रादुर्भवति। तथा च वेदे—**''वितिष्ठन्तां मातुरस्या उपस्थात् नाना रूपाः पशवो जायमानाः।''** (अथर्व० १४।२।२)।

'शेफसः' प्रजापतिर्देवता। तद्यथा—**''प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते''** (यजु० ३१।१९); **''यस्यामुशन्तः प्रहराम शेपः''** (अथर्व० १४।२।३८) एवमियं मैथुनी सृष्ट्यपि संगच्छतेतराम्।

बीजांकुरोऽप्यधोभूतमक्षं प्राप्य पृथिव्याः स्तरमतिक्रममाणः प्रादुर्भवति, अतो लोकोऽप्यधोक्षजनामवाच्यार्थः। द्विजः पक्ष्यप्येतस्मादेव—एकधाऽण्डो मातुरुपस्थात् प्रादुर्भवति, पुनश्च तस्मादण्डात् पक्षी प्रादुर्भवति। दन्ता अपि द्विजा एतस्मादेवोच्यन्ते। प्रथमं ते दन्ता दुग्धनिमित्तात् प्रादुर्भवन्ति, ततश्चान्ननिमित्तमधिकृत्य प्रादुर्भवन्ति। दन्तार्थे प्रयोगश्चरके—***''न छित्त्वा द्विजैर्भक्षयेत्''*** (च० सूत्रस्थान, अ० ८।२०)

भवन्ति चात्रास्माकम्—

अधोक्षजो विष्णुरनन्तशक्ति-
श्चतुर्विक्लृप्तं जनयत्यकल्यम्।
पिता यथा द्यौः पृथिवी च माता
तयो रविर्जायत एव दृश्यः।।५६१।।

एवं बुधा सर्वसरं तमाद्यं
सर्वास्ववस्थासु तमेव विश्वे।
पश्यन्ति, शृण्वन्ति, गृणन्ति तं वा
ज्ञानेक्षणा ज्ञानमियन्ति तस्य।।५६२।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लोकेऽस्ति दृश्यं सकलं प्रसूतं
पुंस्त्रीप्रयोगेण कृतं गुणाख्यम् ।
अधोक्षजो विष्णुरिदं विरच्य
जगत् स्वयं तिष्ठति निर्विकल्पः ।।५६३।।

अनुकूलः ३४२ नामव्याख्याप्रसंगे विशदमुक्तं तत्र द्रष्टव्यम्।

❖ ❖ ❖

ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ।।५८।।

४१६ ऋतुः, ४१७ सुदर्शनः, ४१८ कालः, ४१६ परमेष्ठी, ४२० परिग्रहः। ४२१ उग्रः, ४२२ संवत्सरः, ४२३ दक्षः, ४२४ विश्रामः, ४२५ विश्वदक्षिणः।।५८।।

ऋतुः—४१६

ऋतुरिति विष्णोर्नाम। तदित्थं—ऋच्छतीति 'ऋतुः'। ***'अर्तेश्च तुः'*** (उणा० १।७२) इत्यौणादिक'स्तुः' प्रत्ययः, स च कित्। एवञ्च ऋच्छति गच्छतीति 'ऋतु'रिति सूर्योऽभिहितो भवति। कालोऽपि सूर्यपरिस्पन्दनादिगतिलक्षण एव, अतो वसन्तादिरूपः कालोऽप्यृतु'शब्देनोच्यते, कारणधर्मस्य कार्य उपचारात्। सूर्यगतिभेदाच्च कालभेदः सूर्यगतिरूपत्वात्कालस्य तथा च स वसन्तादिरूपेण षोढा भिद्यते, अत एवोच्यते—ऋतवः षडिति।

सूर्यसंक्रमणप्रवृत्ता हि—ऋतवः। यदा सूर्यो दक्षिणत उत्तरां दिशं गन्तुं प्रवर्तते, तदा वसन्ति तेजःकणा यत्र, ग्रसते हिमं। यत्रेत्याद्यन्वर्थकं वसन्ताद्यृतूनां प्रादुर्भावः। यदा चोत्तरतो दक्षिणां दिशं गच्छति, तदा शीर्णा भवन्ति तेजःकणा, यत्र हीना भवन्ति तेजःकणा यत्रेत्याद्यन्वर्थ शरदादि—ऋतूनामुत्पतिः।

ऋतुप्रभावजन्या ऋत्वनुगुणं हि पृथिव्यां रसोत्पत्तिः। बीजधारण-सामर्थ्यात्स्त्रियोऽपि पृथिवीरूपाः। अत एव तासामपि प्रतिमासमृतुधर्मोदयः, एतच्च चान्द्रमासमधिकृत्य। अत एव चान्द्रमासाधिके सम्वत्सरे स्त्रीणामपि तन्मासनिमित्तक ऋतुधर्मो दृश्यते। पूर्वोक्तसूर्यकालादिषु ऋतत्वाद् गतत्वाद्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्याप्तत्वाद् भगवतो विष्णोरेव नाम 'ऋतु'रिति बहुधा स्तूयते। 'आदित्य' नाम्नो व्याख्याप्रसङ्गे विशिष्टमुक्तं तत्र द्रष्टव्यम्।

ऋतुप्रभावाद्यत्र यत्र यस्य वृक्षपत्रफलादिकस्य रसक्षयो भवति, तत्र तत्र तत्तन्नैरस्यमाप्तं शुष्यति। सति चाभिमतरसोदये पुनस्तत्पत्रादिकं सरसं सज्जातरूपं नव्यं भवति। दृश्यते हि—श्लेष्मान्तकस्य "लहसूड़ा" पत्रपातो चैत्रे मासि, वटस्य च वैशाखे। पत्रपातहेतुकं कालभेददर्शनेन; समानजातीयानामपि आन्तरो भेदोऽनुमीयते। ऋतुकृतरसोदयप्रभावादेव भिन्नमासजातानामेकमनुष्यजातकानामपि गुणकर्मस्वभावा भिन्ना दृश्यन्ते।

मन्त्रलिङ्गञ्च—

"यत्पुरुषेण हविषा देवा यज्ञमतन्वत।
वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः॥" यजु० ३१।१४॥

भवतश्चात्रास्माकम्—

ऋतुस्वभावात् प्रतिमासमेति
रसोदयश्चापि भवेद्विभिन्नः।
लोकेऽस्ति दृश्यं विविधौषधीनां
जनित्वमह्नाञ्च समासभेदात्॥५६४॥

भूगोलकृच्चापि रसोदयानां
भेदोऽस्ति दृश्यः पृथिवीस्वभावात्।
उपोर्मिमिद् यन्न तदस्ति मेरौ
प्रभाकरस्यैव मरीचिभेदात्॥५६५॥

पूर्वं सूर्यगतिहेतुकमृतुभवनमिति प्रदर्शितम्। इदानीञ्चन्द्रोऽपि ऋतूनां विधातेत्यत्र।

मन्त्रलिङ्गम्—

द्वे ते चक्रे ब्रह्माण ऋतुथा विदुः।
अथैकं चक्रं यद्गुहातद्धातय इद्विदुः॥ ऋ० १०।८५।१६॥
पूर्वापरं चरतो माययैतो शिशू क्रीडन्तो परियातो अध्वरम्।
विश्वान्यन्यो भुवनाभिचष्ट ऋतूँरन्यो विदधज्जायते पुनः॥
नवो नवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम्।
भागं देवेभ्यो विदधात्यायन् प्र चन्द्रमास्तिरते दीर्घमायुः॥
ऋ० १०।८५।१८, १९॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुदर्शनः—४१७

पश्यति येनेति करणे *'मृदृशियजिवपिपविपच्यमितमिनमिहर्य्यिभ्योऽतच्'* (उणादि ३।११०) सूत्रे अनजपीति माधवमतेन दर्शतसमानार्थको 'दर्शनः' शब्दः सिध्यति। दर्शनशब्दस्य च सूर्यो वाच्यः। यदुक्तं—**''देवो याति भुवनानि पश्यन्''**। यथा सूर्यो देवः सर्वमिदं चराचरं विश्वं पश्यन्, दृग्गोचरीकुर्वन् वा यात्यन्तरिक्षेण वर्त्मना, प्रेरयति च सकलान् प्राणिनो यथार्हं स्वस्वकर्मणि सवितृभूत इत्यत्राथर्ववेदवचनम्—

स (सूर्यः) सविता भूत्वा अन्तरिक्षेण याति। अथर्व० १३।३।१३।।
स देवान्त्सर्वानुरस्युपपद्य संपश्यन् याति भुवनानि विश्वा।
अथर्व० १३।३।१४।।

यथायं शरीरो व्यष्ट्यात्मा स्वशरीरसम्बन्धि सुखं वा दुखं वा सम्यक्पश्यत्यनुभवति, तथायं सकलसमष्ट्यात्मा सूर्यः समग्रं विश्वं पश्यति। अत्र यजुः —**''सूर्य आत्मा जगतस्तस्थुषश्चेति''** (१३।४६)। भगवान् विष्णुः सर्वस्यान्तर्बहिश्च वर्तमानः सर्वमिदं सम्यक्पश्यतीति 'सुदर्शनः' उक्तो भवति। सूपसर्गयुतो दर्शनशब्दः किञ्चिद्वैशिष्ट्यं प्रकटयति दर्शने। सूर्यो हि देशकालव्यवहितं वस्तु कदाचिन्न पश्यति न प्रकाशयति, न तथा विष्णुः यतो हि स देशकालापरिच्छन्नः सर्वदा सर्वद्रष्टा। यदुक्तं **''न द्रष्टुर्दृष्टेर्विपरिलोपोऽविनाशित्वात्''** इत्यार्षवचनम्।

अथवा यथा शरीरी स्वचक्षुर्विषयान्तर्गतञ्चक्षुरिन्द्रियगोलकयुतं सर्वं पश्यति, किन्तु न चक्षुरिन्द्रियम्, न तथा विष्णुः। सर्वेश्वरोऽशेषद्रष्टा विष्णुस्तु चक्षुःस्थानीयाभ्यां सूर्यचन्द्राभ्यामिदं सर्वं पश्यन्नप्युभौ पश्यत्येतदेव सुदर्शनत्वं तस्य। अत एव च 'सुदर्शनः' इत्युक्तो भवति।

मन्त्रलिङ्गञ्च—

शिवा नः शंतमा भव सुमृडीका सरस्वति। मा ते युयोम सन्दृशः।
अथर्व० ७।७१।१।।

धाता विधाता परमो सन्दृक्। यजु० १७।२६।।
दृते दृंह मा ज्योक् ते सन्दृशि जीव्यासम्। यजु० २६।१६।।
त्वचे रूपाय सदृशे प्रतीचीनायते नमः। अथर्व० ११।२।५।।
सुसन्दृशं त्वा वयं मघवन् वन्दिषीमहि। यजु० ३।५२।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

सुदर्शनो विष्णुरिदं विरच्य
जगत्स्वयं पश्यति सूर्यनेत्रः ।
शिल्पी यथा यन्त्रकृतौ प्रवृत्तः
स्वयं हि तज्जानि सुखानि भुंक्ते।।५६६।।

कालः—४१८

"कल संख्याने" धातोर्भावे 'घञ्' मत्वर्थीयो'ऽच्'=कालः। सर्वेश्वरो विष्णुरेव कालो, यतो हि स कलयति गणयति समस्तप्राणिकर्माणि, तदनुकूलफलप्रदानाय। यदि नाम केन प्राणिना कस्मिन् समये कीदृक्कर्म कृतं, शुभाशुभं केन च कियतां कर्मणां शुभाशुभफलं भुक्तमिति गणना न कृता स्यात्, तदा कथन्न यथाकर्मफलप्रदातृत्वनियमभंगो न स्यात्। 'अत्रोक्तौ मन्त्रलिङ्गम् **"स पर्यगा.......याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः"**। यथोक्तं—योनिमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम्। यथाकर्मफलिकां योनिं यथाकर्मफलकं यथाकालाधारकञ्च सुखं दुःखं वा कथं प्राप्नुयात्प्राणी, कालरूपनियन्तारमन्तरेण। लोकेऽपि च पश्यामः—

यथा कश्चिदाकरस्वामी "खनिपतिः" स्वस्वामिकाकरे कर्म कुर्वाणानां कर्मकराणां दैनिकोपस्थितिं कार्यञ्च स्वगणनापट्टे लिखति। सति च पूर्णे मासि गणनापट्टानुसारं कियत्यः कस्योपस्थितयः केन च कियत्कार्यं प्रतिदिनं विहितमिति विविच्य, वेतनरूपं फलं प्रयच्छति। सम्मानार्हाय सम्मानञ्च दत्त्वा अध्यारोपयत्युच्चैस्तमं पदमिति। एवं कालनामा भगवान् विष्णुस्तत्तत्कर्मानुरूपं शुभाशुभं फलं योनिं वा स्वकृतव्यवस्थातः प्रयच्छन् कालशब्देनोक्तो भवति।

मन्त्रलिङ्गञ्च—

कालो अश्वो वहति सप्तरश्मिः। इति दशर्चं सूक्तम्।
अथर्व० १६।५३।।

कालोऽमू दिवमजनयत काल इमाः पृथिवीरुत। अथर्व० १६।५३।५।।

कालादापः समभवन्। अथर्व० १६।५४।। पञ्चर्चं सूक्तमिह ज्ञेयम्।

कालः प्रजा असृजत कालो अग्रे प्रजापतिम्। अथर्व० १६।५३।१०।।

संख्याता अस्य निमिषो जनानाम्। अथर्व० ४।१६।५।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ग्रसनादपि 'कालः'—यथाऽऽकरपतिर्यदेच्छति तदा समापयति स्वमाकरमेवं भगवान् कालोऽपि स्वक्रीडनकभूतं विश्वमिदं प्रकृतिलीलामयं यदा संजिहीर्षति जिग्रसिषति दर्शयति च स्वकालरूपां सत्याभिधानतामिति। तथा वेदे—**'तस्मिन्निदं सं च विचैति सर्वम्'** (यजु० ३२।८)।

भवति चात्रास्माकम्—

कालः स विष्णुः कलयन् समस्तं
स्वभावसिद्धञ्च युनक्ति सर्वम्।
सूत्याऽथ धृत्या ग्रसनेन चापि
स्वयञ्च नोपैति सदैकभावात्।।५६७।।

परमेष्ठी—४१६

परमे पदे तिष्ठतीति ताच्छील्ये 'णिनिः'। परमं पदञ्च परं व्योम। **''ऋचोऽक्षरे परमे व्योमन्''** (ऋक् १।१६४।३६) परमे व्योम्नि स्थितः 'परमेष्ठी' च सूर्यः। ज्ञानप्रधानत्वमत एव पञ्चज्ञानेन्द्रियाणामूर्ध्वे जत्रुणि विन्यासः। अत्र मन्त्रलिङ्गम्—**'ज्योतिषां ज्योतिरेकं तन्मे मनः'** (यजु० ३।४।१) ज्योतींषीन्द्रियाणि। एवं कृत्वा तमसः परस्तात् स 'परमेष्ठी' ज्ञानेन्द्रियैः साम्यमुपगच्छति सर्वत्र ज्ञानानुशायिनि मस्तिष्क एव तिष्ठति।

अत एव वक्तुं शक्यते ज्ञानेन्द्रियेषु स्वयं भगवान् 'परमेष्ठी' तिष्ठति। हृन्मस्तिष्कयोः स्यूतसम्बन्धत्वाद् बुद्धिर्मनः प्रेरयति, तच्च पुनर्ज्ञानेन्द्रियैर्लब्धज्ञानं तदनुरूपं कर्म कर्तुं प्रारभते। अत्र हृन्मस्तिष्कसम्बन्धसमर्थकं मन्त्रलिंगम्—**मूर्धानमस्य संसीव्याथर्वा हृदयञ्च यत्। मस्तिष्कादूर्ध्वः प्रैरयत् पवमानोऽधिशीर्षतः** (अथर्व० १०।२।२६)

एवं हि सर्वत्र तस्य नियमो लोके दृश्यते—यथा व्योम्नि सूर्यादयो विश्वदेवा निषीदन्ति, तथैव प्राण्यूर्ध्वभागे सर्वेषां ज्ञानेन्द्रियाणां निचयः। लोकसम्मितत्वात् पुरुषस्य। एवं हि सर्वज्ञानसमूहः पञ्चेन्द्रियैर्व्यक्तीक्रियते, स च मस्तिष्क एव। प्रवृद्धज्ञानगुणो जन्तुः परमेष्ठिमाचष्टेऽहर्निशम्। तद्यथा योजनगन्धा पिपीलिका स्वस्थानात् योजनान्तरे स्थितमपि वस्तुगन्धमुपादत्ते। गृध्रश्च पक्षी योजनात्पश्यति। उलूको बहुयोजनान्तरितमपि वृत्तं जानानः प्रत्यक्षमिवावेदयति।

इयमत्रानुभूता घटना—कश्चिद्यात्रामारिप्सुः पुरुषश्चलनसमयेऽश्रौषीदुलूकवाचम्। ताञ्च निशम्याशुभेयमिति मत्वा यात्रामतिममुञ्चत्। तदवस्थं तमवलोक्य च तत्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्थितः कश्चित् पक्षिवाग्विदवदत्—कथं यात्रातो विरतोऽसि ? निष्कण्टक इदानीन्ते पन्था इत्युलूको वदति, तत्त्वयाऽवश्यं गन्तव्यम्। अभूदपि तथैव, चतुर्योजनायते मार्गे न स कञ्चिद्यात्राविघातकं विघ्नमाप्नोत्।

मयूरश्च योजनानां शताच्छृणोतीति लोकप्रसिद्धिः। अक्षरे ज्ञाने स्थितानीन्द्रियाणि ज्ञानेन्द्रियाण्युच्यन्ते। यथा जले स्थितो दण्डो जलदण्ड उच्यते।

मन्त्रलिङ्गञ्च भावप्रधानम्—

ऋचोऽक्षरे परमे व्योमन्। ऋक् १।१६४।३६।।

तथा नामप्रधानम्—

परमेष्ठ्यभिधीतः प्रजापतिर्वाचि व्याहृतायाम्। यजु० ८।५४।।

परमेष्ठी त्वा सादयतु दिवस्पृष्ठे ज्योतिष्मतीम्। यजु० १५।५८।।

त्वं त्वा परमेष्ठिन् पर्यहमायुषा वर्चसा दधामि। अथर्व० १३।१।१६।।

ये पुरुषे ब्रह्म विदुस्ते विदुः परमेष्ठिनम्। अथर्व० १०।७।१७।।

प्रजाय चक्रे त्वा शाले परमेष्ठी प्रजापतिः। अथर्व० ६।३।११।।

भवति चात्रास्माकम्—

स एव विष्णुः परमेष्ठिधर्मा
विश्वं समस्तं दिवि सन्दधाति।
तथा यथोर्ध्वं कुरुते स खाना-
ञ्चयञ्च तान्यास्फुटयन्ति विष्णुम्।।५६८।।

परिग्रहः—४२०

परितो ग्रहोऽस्येति 'परिग्रहः', परितः सर्वतो ग्रहणमित्यर्थः। यथा भगवता भास्करेणेदं जगत्परितो गृहीतमस्ति, तथा विष्णुनापि निजज्ञानानुपाति—व्यवस्थया सर्वं चराचरं परितः सर्वतो गृहीतं धृतमस्ति। तथैव च मनुना=मनः संज्ञकेन विष्णुना सर्वप्राणिप्रतिष्ठेन परिगृहीतमस्ति, सर्वं व्यापारजातं स्थावरसम्बन्धि जङ्गमसम्बन्धि वा यन्मनोऽधीनम्।

मन्त्रलिङ्गञ्च—

''येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम्'' यजु० ३४।५।

यद्यप्ययं मन्त्रो मनोदैवतकस्तथापि सर्वमेवैतद् विष्णोः कर्मणामनुव्याख्यानमेव। अतो विष्णुसंज्ञके मनावपि सङ्गच्छते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अपरञ्च—

समिद्धे अग्नावधि मामहान उक्थपत्र ईड्यो गृभीतः।

यजु० १७।५५।।

सं गृभाय पुरुशतोभया हस्त्या वसु शिशीहि। ऋ० १।८१।७।।

स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।

यजुः १३।४।।

स्कम्भेनेमे विष्टभिते द्यौश्च भूमिश्च तिष्ठतः। अथर्व० १०।८।२।।

तस्मिन् छ्रयन्ते य उ के च देवा वृक्षस्य स्कन्धः परित इव शाखाः।

अथर्व० १०।७।३८।।

भवति चात्रास्माकम्—

सूर्यो यथाऽनादित एव विश्वं
गृह्णाति शक्त्या निजया समन्तात्।
तथैव गृह्णाति च विष्णुरेक-
श्चराचरं चित्तमथापि तद्वत् ।।५६६।।

चित्तं=मन इति।

उग्रः—४२१

उग्रः=प्रचण्डः। 'उच समवाये' इति दैवादिकाद्धातो **'ऋज्रेन्द्र०'** (उणादि २।२८) इत्युणादिना 'रन्' प्रत्ययः। यस्मिन् सर्वं संवीतं समवेतं सम्यग्गतं प्रोतं वा भवति, स 'उग्रः'। यथैतत् सर्वं सूर्ये प्रोतं तथैव विष्णौ। अत्र मन्त्रलिङ्गम्—**'स ओतः प्रोतश्च विभूः प्रजासु'** (यजु० ३२।८।)

तस्य विष्णोरनुकरणमात्रत्वान्मनोऽप्येतद्धर्मकम्। यदाह भगवान् वेदः—

यस्मिंश्चित्तँ सर्वमोतं प्रजानां तन्मे मनः शिवसङ्कल्पमस्तु।

(यजु० ३४।५)।

उग्रनाम्नि मन्त्रलिङ्गम्—

उग्रं युयुज्म पृतनासु सासहिम्। ऋ० ८।६१।१२।।

आ न इन्द्रो दूरादा न आसादभिष्टिकृदवसे यासदुग्रः।

यजु० २०।४८।।

नमः शङ्गवे च पशुपतये च नम उग्राय च भीमाय च।

यजु० १६।४०।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इन्द्र वाजेषु नोऽव सहस्त्रप्रधनेषु च। उग्र उग्राभिरूतिभिः।

ऋ० १।७४।।

तदिदास भुवनेषु ज्येष्ठ यतो जज्ञ उग्रस्त्वेष नृम्णः।

ऋ० १०।१२०।१।।

भवति चात्रास्माकम्—

उग्रे यथार्के निचितं हि विश्वं
विष्णौ तथोग्रे निचितञ्च सर्वम्।
विष्णोर्यथोग्रे निचितं हि सर्वं
चित्ते तथोग्रे निचितं प्रजानाम् ।।६००।।

संवत्सरः—४२२

'वस निवासे', भौवादिकौ धातुः 'सर'श्च प्रत्ययः, ***'सस्यार्द्धधातुके'*** (पा० ७।४।४६) इति सस्य 'तः'। सम्यग् निवसति जगद्यस्मिन् स सर्वव्यापको विष्णुः 'संवत्सर'शब्देनोच्यते। तथा सूर्योऽपि संवत्सरः संवसति जगद्येन हेतुनेत्यर्थात्।

संवसति प्राणिनः सर्वं कृताकृतं संस्काररूपेण यत्र मनसि तन्मनोऽपि संवत्सरशब्दाभिधानीयं भवति।

अत्र मन्त्रलिङ्गम्—

संवत्सरो रथः परिवत्सरो रथोपस्थो विराडीषाग्नी रथमुखम्।
इन्द्रः सव्यष्ठाश्चन्द्रमाः सारथिः।। अथर्व० ८।८।२३।।

इदावत्सराय परिवत्सराय संवत्सराय कृणुता बृहन्नमः।

अथर्व० ६।५५।३।।

त्रयोदशभिरस्तुवत मासा असृज्यन्त सम्वत्सरोऽधिपतिरासीत्।

यजु० १४।२६।।

संवत्सरस्ते यज्ञं दधातु नः प्रजा च परिपातु नः। यजु० २६।१४।।

सौधन्वना ऋभवः सूरचक्षसः संवत्सरे समपृच्यन्त धीतिभिः।

ऋ० १।११०।४।।

संवत्सरे मनसि च—

यस्मिन् प्रतिष्ठिता रथनाभाविवाराः। यजु० ३४।५।।

कालोऽपि कलनविषयत्वाद् विश्वाधारत्वाच्च 'संवत्सरः'। यतो हि सर्वमिदं विश्वं कालात्मनि संवत्सरे न्युषितम्। न हि कालमन्तरेण विश्वस्य स्थितिरन्यत्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कुत्रापि। यावच्च दृश्यं वस्तु जगति तत्सर्वं संख्याभाक्, नातिसंख्यं किञ्चिद्वस्तु दृश्यते। वस्तुतो विष्णुनेव संख्ययापि सर्वं जगदनुस्यूतमतः संख्यैव कालः, तस्मिंश्च क्षणादिकल्पान्तात्मके काले सर्वमिदं वसतीति कलयितुमर्हत्वात्कालोऽपि 'संवत्सरः'।

अयञ्च कालात्मकः संवत्सरश्चतुर्विधो ब्राह्मणक्षत्रियवैश्यशूद्रसंज्ञाभेदात्, ब्रह्मणो विराट्पुरुषस्य चतुर्धा व्यवक्लृप्तत्वात्, तथा च वेदे—**'ब्राह्मणोऽस्य मुख०'** (यजु० ३१।११) तत्र संवत्सरावयवभूता एकपञ्चनवसंख्याभाजो मासा ब्राह्मणसंज्ञकाः। द्विषड्दशसंख्याभाजो मासाः क्षत्रियसंज्ञाः। त्रिसप्तैकादशसंख्याभाजश्च वैश्याः। शेषाश्च चतुरष्टद्वादशसंख्यकाः शूद्राः। एवं द्वादशराशिस्थानां ग्रहाणामपि ब्राह्मणादिसंज्ञा ज्ञेया। मासा अपि चतुर्धा विभक्ता ब्राह्मणादिसंज्ञां लभन्ते।

कालनिष्ठा गतिरपि 'संवत्सरा'भिधानिका सर्वस्य निवासहेतुत्वात्। सापि चतुर्धा भिद्यते। तद्यथा—१. ऊर्ध्वादधः, २. अधश्चोर्ध्वम्, ३. तिर्यगात्मिका, ४. स्वस्थानस्थितिरूपा च ब्राह्मणादिवर्णात्मिका। एवञ्च संवत्सरोऽपि ब्राह्मणः, मासोऽपि ब्राह्मणः। वर्षशतकस्याद्यभूता वर्षपञ्चविंशतिरपि ब्राह्मणसंज्ञिका। जन्मेष्टकालोऽपि ब्राह्मणादिवत्। एवंविधयोगलाभस्तु जीवस्य परमेण पुण्यग्रामेण भवति।

गृहमपि 'संवत्सरो', यतो हि गृह एव निवसन्ति सर्व इति कृत्वा। शरीरमपि 'संवत्सरो' यतो हीदमपि निवासभूतमात्मन इन्द्रियाणाम्। विपणिरपि 'संवत्सरो' यतो हि तन्निवासिव्यापारकर्म तद्गृहं विपणिः, सा च किं वर्णात्मिकेति ज्ञातुं पटलाधारभूतानां काष्ठलौहादिशलाकानां गणनां कृत्वा चतुर्भिर्विभज्य शेषेण क्रमश एकशेषे ब्राह्मणी, द्विशेषे क्षत्रिया, त्रिशेषे वैश्या, चतुःशेषे च शूद्रा इति।

एवं कृत्वा संवत्सरस्य व्यापकता प्रदर्शिता बुद्धेर्वैशद्याय।

भवति चात्रास्माकम्—

संवत्सरो विष्णुरमोघकर्मा
करोति विश्वं निजधर्मसिद्धम्।
एवं हि यो वेत्ति महेशमाद्यं
स विष्णुभूतः परमेति धाम।।६०१।।

राशिमधिकृत्य विशेषो द्रष्टव्य आदित्यनाम्नो व्याख्याने।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दक्षः—४२३

'दक्ष वृद्धौ शीघ्रार्थे च' भौवादिको धातुः, तस्मात्पचाद्यचि 'दक्षः'। दक्षते वर्धते क्षिप्रं वा कुरुते 'दक्षः' सूर्यः। सूर्यो हि भूमण्डलस्थप्राणिभिरुदीयमान उदेत्य चास्तङ्गच्छन् क्षिप्रधर्मा दिवि वर्धमानो दृश्यते। तत्र मन्त्रलिङ्गं यथा—''**स इन्द्रो भूत्वा तपति मध्यतो दिवम्**'' (अथर्व० १३।३।१३)।

कूटस्थमेकरस ब्रह्मापि दक्षशब्देनोच्यते, यतो हि इदं जगदुदेति वर्धते शीघ्रयति च परिणमनशीलत्वात्। कूटस्थस्य दक्षार्थाभिधाने च ''***तात्स्थ्यात्ताच्छब्द्यम्***'' इति ज्ञेयम्। एतदेव स्पष्टयितुं दक्षशब्दस्य 'विश्वदक्षिणः' इति पर्य्यायत्वेन पृथङ्नाम कल्पितं तत्त्वदर्शिभिः। दक्षत इति दक्षो दक्ष एव दक्षिणो, विश्वेषु कर्मसु दाक्षिण्यं ज्ञानवैचित्र्यं यस्य स 'विश्वदक्षिण'शब्देनापि दक्षशब्दस्यैवार्थ उक्तो भवति।

किञ्चित्प्रसङ्गप्राप्तञ्चोच्यते—यज्ञे दीयमानमृत्विग्भ्यो यज्ञपूर्णाङ्गकरं धनमपि दक्षिणाशब्देनोच्यते। यतो हि तद्दत्तं धनं यजमानं स्वेनाभीष्टेन फलेन वर्धयति, फलदाने क्षिप्रकारि च भवति। अतः सिद्धान्तितं पूर्व्वै**र्हतं यज्ञमदक्षिण**मिति।

मन्त्रलिङ्ञ्च—

इन्दुर्दक्षः श्येन ऋतावा हिरण्यपक्षः शकुनो भुरण्यः।
यजु० १८।५३॥

शृणोतु मित्रो अयमा भगो नस्तुविजातो वरुणो दक्षो अंशः।
यजु० ३४।५४॥

धर्त्ता दिवः पवते कृत्व्यो रसो दक्षो देवानामनुमाद्यो नृभिः।
ऋ० ६।७६।१॥

भवति चात्रास्माकम्—

दक्षः स विष्णुः कुरुते सदैव
विश्वं समस्तं गतिमत्प्रणुन्नम् ।
स एव दक्षः किमु दक्षिणो वा
स विश्वपूर्वः स महान् स भर्गः।।६०२।।

विश्रामः—४२४

'श्रमु तपसि खेदे च' इति व्युपसृष्टो दैवादिको धातुः। तस्माण्णिचि पचाद्यचि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विश्रामयति सर्वमिति 'विश्रामः'। ***'मितां ह्रस्वः'*** (पा० ६।४।९२) इति ह्रस्वादेशस्तु वैकल्पिको व्यवस्थितविभाषाश्रयणात्। यद्वा— विश्राम्यति यस्मिन् सर्वमति 'विश्रामो' घञि रूपम्, अत्रापि वृद्धेर्निषेधस्तथैवेति। उभयथापि विश्रामशब्देन विष्णुरेवोक्तो भवति। यतो हि सर्वमिदं चराचरं तद्व्यवस्थया निबद्धं विश्राम्यति, तस्मिन् वा व्यापके विश्राम्यतीति।

दृश्यते हि लोके जीवो गर्भे विश्राम्यति विश्राम्यन्तञ्च तं भगवतो विष्णोर्व्यवस्था ''नियमविशेषः'' शुभाशुभकर्मणां तत्कृतानां फलं प्रापयितुं खेदयितुं योनिस्थं प्रेरयति बहिर्निर्गन्तुमिति। अमुथैव **''तस्मिन्ह तस्थुर्भुवनानि विश्वा''** (यजु० ३१।१९) इति निगमप्रामाण्यात् भगवति विष्णौ सर्वलोकानां स्थितेरुक्तत्वाद् विष्णुरेव गौणेन नाम्ना=''गुणकृतेन नाम्ना'' 'विश्रामः' इत्युक्तो भवति।

अथ च यथा रात्रौ जीवा विश्राम्यन्ति स्वस्वकर्मोपरतास्तथैव प्रलये सर्वमिदं चराचरं विश्वं भगवति विश्राम्यतीति कृत्वा स 'विश्रामः' इति।

मन्त्रलिङ्गञ्च—

अन्तरिक्ष आसां स्थाम श्रान्तसदामिव। अथर्व० १।३२।२।।

यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा।

यजु० ५।२०।।

अपि तेषु त्रिषु पदेष्वस्मि येषु विश्वं भुवनमाविवेश।

यजु० २३।५०।।

तस्मिन्निदं सं च वि चैति सर्वं स ओतः प्रोतश्च विभूः प्रजासु।

यजु० ३२।८।।

यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त। यजु० ३२।१०।।

यत्र देवाश्च मनुष्याश्चारा नाभाविव श्रिताः। अथर्व० १०।८।३४।।

भवतश्चात्रास्माकम्—

स विश्रमो विष्णुरनन्तलोकान्
दधाति गर्भे तपसा पुनस्तान्।
संक्षोभ्य संयोज्य समेध्य शक्त्या
पुनर्भवायैव च तान् युनक्ति ।।६०३।।

तथैव लोकेऽपि च मातृगर्भे
जीवः शयानः स्वकृतानि जानन्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विश्रम्य कालं निजयोनिसिद्धं[1]
चेखिद्यमानो बहिरेति धाम।।६०४।।

विश्रमोऽपि व्याख्यातो विश्रामार्थको विष्णोरेव नाम। एतदत्र विशिष्य सन्धातव्यम्—सर्वेषां जीवानां योनिभेदात्स्वगर्भवासकालो भिन्नो भिन्न इति। यथा गौर्नवमासोत्तरं दशमे प्रसूते, मानुषी पूर्णे नवमे मासि, महिषी दशममासोत्तरम् एकादशे मासि, हस्तिनी चतुर्दशे मासि।

विश्वदक्षिणः—४२५

विश्वदक्षिण इति दक्ष ४२३ इति नाम्नो व्याख्याप्रसङ्गेनैव व्याख्यातस्तत्र द्रष्टव्यः।

❖ ❖ ❖

विस्तारः स्थावरस्थाणुः प्रमाणं बीजमव्ययम्।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः ।।५६।।

४२६ विस्तारः, ४२७ स्थावरस्थाणुः, ४२८ प्रमाणम्, ४२६ बीजमव्ययम्।
४३० अर्थः, ४३१ अनर्थः, ४३२ महाकोशः, ४३३ महाभोगः, ४३४ महाधनः।।५६।।

विस्तारः—४२६

'स्तृञ् आच्छादने' विपूर्वः, तस्मात् ***"प्रथने वावशब्दे"*** (पा० ३।३।३३) इत्यनेन 'घञि'=विस्तारः', सर्वरूपस्य विष्णोर्नाम। तथा हि स स्वमात्मानं दृश्यादृश्यजगद्रूपेण विस्तार्य व्यापकत्वधर्मेण च तदाच्छाद्य स्वमहिम्नि स्थितः कूटस्थरूपेण। भगवतो विस्तृतिरेवेदं सर्वमतो लोकात्मना विस्तीर्णतामापन्नः स 'विस्तारः' उच्यते। तेन व्याप्तञ्चेदमशेषं तेनाच्छादितमिव भवति।

पुनश्च जगद्रूपेण विस्तीर्णमात्मानं संक्षिपन् "संहरन्" सूक्ष्मभावमापद्यते स्वस्वरूपमिति। यथा वटबीज एव विस्तीर्णो वटवृक्षः। एवं च सूक्ष्मभावमापन्नो वटबीज इत्युभयथा संक्षेप्तुर्विस्तारयितुश्च परं महिमानं प्रकटयति। वृक्षरसो यथा

१. निजयोनिसिद्धमिति-निजस्य स्वस्य योनिवासनियतीकृतकालं यावत् तत्रोषित्वेत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तत्पञ्चांगेनाच्छादितो भवति, तथा तेनेदं विस्तीर्णं विश्वमाच्छादितं व्यापकत्वधर्मेण, स्वयञ्चाच्छन्नः स्वविस्तृतिरूपेण जगता, इत्युभयथाच्छाद्याच्छादकधर्मा हि स विस्ताराभिधानः।

मन्त्रलिङ्गञ्च—

विष्टारिणमोदनं ये पचन्ति नैनानवर्तिः सचते कदा चन।

अथर्व० ४।३४।३।।

एष यज्ञानां विततो बहिष्ठो विष्टारिणं पक्त्वा दिवमा विवेश।

अथर्व० ४।३४।५।।

तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः। यजु० ४०।५।।

ईशा वास्यमिदं सर्वं यत्किं च जगत्यां जगत्। यजु० ४०।१।।

यो विद्यात् सूत्रं विततं यस्मिन्नोताः प्रजा इमाः। अथर्व० १०।८।३७।।

भवति चात्रास्माकम्—

विश्वं समस्तं कुरुते स्वगर्भे
विस्तारनाम्ना कथितः स विष्णुः।
वटं स बीजे निदधाति यद्वत्
तद्वत् स बीजं कुरुतेऽर्थवृत्तम्[1] ।।६०५।।

स्थावरस्थाणुः—४२७

स्थावरविशेषणविशिष्टं स्थाणुरित्येकं नाम खण्डशो व्याख्यातम्। तत्र 'स्थावरः'—'ष्ठा गतिनिवृत्तौ' इति भौवादिको धातुः। ***''धात्वादेः षः सः''*** (पा० ६।१।६४) इत्यनेन षस्य 'सत्वम्'। ठकारस्य स्वयं थकारो निमित्तापाये। ***''स्थेशभासपिसकसो वरच्''*** (पा० ३।२।१७५) इति 'वरच्' प्रत्ययः, अनिट्। सर्वत्र तिष्ठति तच्छीलः 'स्थावरः'। सर्वस्मिन् तिष्ठतीति वा 'स्थावरः'।

अत्र मन्त्रलिङ्गम्—

प्रत्यङ् जनास्तिष्ठति सर्वतोमुखः। यजु० ३२।४।।

आ स्वमद्म युवमानो अजरस्तृष्वविष्यन्नतसेषु तिष्ठति।

ऋ० १।५८।२।।

अयं विश्वानि तिष्ठति पुनानो भुवनोपरि। सोमो देवो न सूर्यः।

ऋ० ६।५४।३।।

१. अर्थवृत्तम्=सर्वाङ्गसमुदितं वटवृक्षमिति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

योऽन्तरिक्षे तिष्ठति विष्टभितोऽयज्वनः प्रमृणन् देवपीयून्।

अथर्व० ११।२।२३।।

जगति यथा-गच्छत्स्वपि प्राणिषु गच्छतामाधारभूतो मार्गो न गच्छति स्थितिं स्वकीयां न जहाति। मातरि चलन्त्यामपि गर्भः स्वरूपतः स्थितिं न त्यजति। क्रियामयमिदं शरीरं यदाश्रितं सत् क्रियाः कुरुते, क्रियाः शरीरे कुर्वाणेऽपि तदाश्रयीभूतोऽर्थो न कदाचिदपि क्रियाश्रयतां 'विकृतिं' चाञ्चल्यमाप्नोति। एवं भगवान् स्थावरत्वरूपेण गुणेन सर्वं व्याप्य विराजतेराम्। एवं लोके दर्शं दर्शं बह्व्यः कल्पनाः कल्पनीयाः।

भवति चात्रास्माकम्—

स स्थावरः सर्वजगन्नियन्ता
नियम्य विश्वं कुरुते स्थिरं वै ।
तथा यथा मातरि गर्भ एवं
चलत्सु मार्गश्च न याति चालम्।।६०६।।

स्थाणुः—तिष्ठतेः ***'स्थो णुः'*** (उणादि० ३।३७) इत्यौणादिको 'णु' प्रत्ययो बाहुलकात्। तिष्ठति सर्वत्रेति 'स्थाणुः'। स्थावरस्थाणुशब्दयोः केवलं प्रत्ययकृतो रूपभेदो गतिनिवृत्तिरूपोऽर्थस्तु समान एव। यः स्थावरः स एव स्थाणुरिति समानाधिकरणः कर्मधारयः। स्थाणुशब्दे स्थावरशब्दविशेषकृतं वैशिष्ट्यमियदेव, यत्स स्थाणुः कूटस्थोऽपि विक्रियारहितोऽपि स्वयं सर्वत्र विकारवत्सु, भौतिकेषु पदार्थेषु स्थितिशीलः स्वमहिम्ना तानपि स्थितिशीलतामापादयति। तद्यथा-पात्रे जलं, जले कमलं, कमले पिपीलका, पिपीलकामुखे च तण्डुलकणः स्थिर इति।

एवञ्चाविकृतिः सन् सर्वत्र स्थितिशीलः, सर्वांश्च तान् स्वाश्रितान् स्वगुणार्पणेन स्थितिमतो विदधाति, स स्थावरस्थाणुरित्युक्तो भवति। एतन्नामव्याख्यया तस्य सर्वाधारतापि व्याख्याता भवति गौणनाम्नामानन्त्यात्।

मन्त्रलिङ्गञ्च—

निर्दहनी या पृषातक्यस्मिन् तां स्थाणावध्या सजामि।
व्यृद्धयो या असमृद्धयो या अस्मिन् ता स्थाणावधि सादयामि।

अथर्व० १४।२।४८, ४६।।

कृतं तीर्थं सुप्रपाणं शुभस्पती स्थाणुं पथेष्ठामप दुर्मतिं हतम्।

ऋ० १०।४०।१३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवतश्चात्रास्माकम्—

स्थाणुर्हि विष्णुर्विविधं विधाय
विश्वं गुणैस्तिष्ठति चाप्रमत्तः ।
बीजो यथा चात्मगुणैर्द्रुमाङ्गैः
तिष्ठन्ति लिङ्गानि च कार्यकाले।।६०७।।

स स्थावरस्थाणुरनन्तलोकान्
दूरेऽवरे मर्त्यदृशा च दृश्यान् ।
निर्माय तत्रैव करोति धाम
स्वकं यतो वेत्ति स विश्वविश्वम्।।६०८।।

प्रमाणम्—४२८

प्रोपसृष्टो 'माङ् माने' धातुर्जौहोत्यादिकः, तस्मात्करणेऽधिकरणे वा 'ल्युट्'। ***''युवोरनाकौ''*** (पा० ७।१।१) इत्यनेन यो'रनादेशः'। ***''कृत्यचः''*** (पा० ८।४।२२६) इत्यनेन णत्वे प्रमाणम्। प्रमीयतेऽनेन सर्वं, प्रमितमस्मिन् सर्वमिति वा 'प्रमाणं' तद्धि ब्रह्म। यावत्प्रमाणकं यादृग्गुणकं यादृगाकृतिमच्च जगन्निर्मित्सति, तत्प्रमाणं तान् गुणान् ताञ्चाकृतिं जगदारम्भात्पूर्वमेव सङ्कल्प्य तथाभूतमेव तन्निर्माति परिमितमित्यत एव त'त्प्रमाण'मभिधीयते।

अत्र लोके एव दृष्टान्तो—यथा कश्चित्कारुः ''शिल्पी'' कार्यारम्भणात्प्रागेव मनसि सङ्कल्पयति बाह्यतश्च प्रमिमीतेऽहमियदायतमियद्दीर्घमियदाकृति चैतत्कार्यं करिष्ये, ततः कर्तुमारभते। यथा सीवकः कस्यचित्पुरुषस्य कञ्चुकादिकं निर्मिमाणः प्राक्केनचित्प्रमाणेन पुरुषं मिमीते तन्मानानुसारञ्चादाय वस्त्रं सीव्यति कञ्चुकादिकम्। तस्यैव प्रमाणात्मकस्य ब्रह्मणः स्वभावानुकृतिर्विश्वे व्याप्ता सती तत्प्रतिपदं व्याख्याति, सर्वस्य हि शरीरं प्रमाणानतिक्रमि। एवं बहुत्रोहनीयम्।

मन्त्रलिङ्गञ्च—

अनड्वानिन्द्रः स पशुभ्यो विचष्टे त्रयाञ्छको विमिमीते अध्वनः।
अथर्व० ४।११।२।।

नव प्राणान् नवभिः सं मिमीते दीर्घायुत्वाय शतशारदाय।
अथर्व० ५।२८।१।।

धामानि वेद भुवनानि विश्वा। यजु० ३२।१०।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एतावानस्य महिमातो ज्यायांश्च पूरुष। यजु० ३१।३।।
स भूमिं सर्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम्। ऋ० १०।६०।१।।

भवति चात्रास्माकम्—

स विश्वकर्मा मिषतो वशी वा
विश्वं मिमीते च मिमित्समानः ।
तस्यानुमानं कुशलीह शिल्पी
कुर्वन् मितीते कुरुतेऽथ कार्यम्।।६०६।।

बीजमव्ययम्—४२६

बीजमिति—वि उपसर्गो 'जनी प्रादुर्भावे' धातुर्दैवादिकः। ***''उपसर्गे च संज्ञायाम्''*** (पा० ३।२।६६) इति 'डः' प्रत्ययः। ***''डित्यभस्यापि टेर्लोपः''*** इति टिर्लोपः। ***''अन्येषामपि दृष्यते''*** (पा० ६।३।१३७) इति वेरिकारस्य दीर्घः=बीजः-बीजं वा, ***'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य'*** इति महाभाष्यम्। अव्ययमिति-'इण् गतौ' धातुरादादिको, व्युपसर्गः, तस्मात् ***''एरच्''*** (पा० ३।३।५६) इत्यच्' प्रत्ययो, नञ्समासः। एवञ्च बीजञ्च तदव्ययमिति 'बीजमव्ययं' ब्रह्मेति। वैयाकरणाश्चाप्याहुः—

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ।।

एवञ्च विविधं जायते बीजमिति। 'बीज' शब्देन तस्य ब्रह्मणो विविधरूपेष्वभिव्यक्तिरुच्यते। अव्ययशब्देन च जन्मादिषड्विकारराहित्य-मित्यपारमहिम्नस्तस्य सर्वमुपपद्यते। इममेवार्थं वेदोऽप्याह —**''अजायमानो बहुधा विजायते''** (यजु० ३१।१६)।

यथा हि—वृक्षबीजं वृक्षमुत्पाद्यापि तदनुस्यूतं तदवस्थमेव तिष्ठति, पुनश्च स्वसमावेशितवृक्षं स्वनिर्विशेषस्वरूपमापद्यते न च विकुरुते। तथा ब्रह्माप्यव्ययं बीजं जगतो 'बीजमव्यय'मिति नाम्नोच्यते।

यस्य च स्थावरजङ्गमात्मकस्य वस्तुनः सर्गादौ यादृग्बीजं तत्तादृगेवासर्गान्तं तिष्ठति, न हि वटवृक्षबीजमश्वत्थपलाशखदिरादीनां जन्मदातृ। लोके सर्वत्रैषैव व्यवस्था जातविकारं विना। भगवतो वरारोह इति नामापि एतदर्थसाम्यादेव। बीजात्फलं फलाच्च पुनर्बीजमिति व्यवस्थाबद्धो लोकसर्गः। अनव्ययः=अन्यथा भावरहितः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते।

यजु० ३१।१६।।

अध्यस्थात् सानु पवमानो अव्ययं नाभा पृथिव्यां धरुणो महो दिवः।।

ऋग् ६।८६।८।।

द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम्।

ऋक् १।१६४।३३।।

अजस्य नाभावध्येकमर्पितं यस्मिन् विश्वानि भुवनानि तस्थुः।

यजु० १७।३०।।

परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति ।
कं स्वित् गर्भं प्रथमं दध्र आपो प्रथमं यत्र देवाः समपश्यन्त पूर्वे।।

यजु० १७।२६।।

भवति चात्रास्माकम्—

ब्रह्माव्ययं तेन कृतञ्च बीजं
सदाव्ययं सद्भिरिहास्ति गीतम् ।
फलात्स विष्णुः कुरुते ह बीजं
बीजात्फलं वेद स एव मूलम्[1] ।।६१०।।

अर्थः—४३०

'अर्थः' इति 'ऋ गतो' धातुर्जौहोत्यादिकः, तस्मात् ***''उषिकुषिगार्त्तिभ्यस्थन्''*** (उणादि २।४) इत्यौणादिकस्'थन्' प्रत्ययः, गुणो रपरः, अनिट्='अर्थः' इति। अर्यते प्राप्यते ऋच्छन्ति वा यमि'त्यर्थो' विष्णुः। विष्णुरेव हि सर्वस्य जगतः प्रेप्साविषयो, यतो हि स **''सत्यं ज्ञानमनन्तं''** सत्यं सदात्मको ज्ञानं ज्ञानात्मकोऽनन्तमानन्दात्मको, **'भूम्न्येव सुखं नाल्पे'** इत्युपनिषद्वचनात्। एवञ्च सच्चिदानन्दरूपत्वात् स एव सर्वदा सर्वप्राणिवर्गेण प्राप्तुमिष्यते, प्राप्यते चापि।

तद्यथा—जगद्धीदं दृश्यं काव्यं = ''नाट्यम्'', नाटकञ्च न हि नटमन्तरेण सुव्यवस्थितं दर्शयितुमभिनेतुं वा शक्यते अतोऽनुमीयते तथा बुद्ध्या प्राप्यतेऽस्ति कश्चिदस्य जगन्नाटकस्याभिनेतेति। 'कर्तृपूर्वकाणि कार्याणि' इति नियमाल्लोकेऽपि

१. मूलम् = किं पूर्वं कृतमिति बीजं फलं वा आहोस्विद् युगपदिति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दृष्ट्वा कर्तानुमीयते। अथ च यथा कर्तुर्बुद्धौ कार्यस्य सर्वं स्वरूपं चित्रितमिव भवति, तथैव ज्ञानरूपे भगवति सकलमिदं विश्वमृतं भवति स्वभावतः, इति कृत्वा स भगवान् विष्णु'रर्था'त्मना सर्वत्र व्यापकः, तस्मा'दर्थः'।

मन्त्रलिङ्गञ्च—

तस्य व्रात्यस्य। समानमर्थं परियन्ति देवाः। अथर्व० १५।१७।८।।

आरभस्व जातवेदोऽस्माकार्थाय जज्ञिषे। अथर्व० १।७।६।।

अर्थं चिदस्य सुधितं यदेतव आवर्तयन्ति दावने। ऋ० ८।६६।१७।।

तदिन्द्रो अर्थं चेतति सूथेन वृष्णिरेजति । ऋ० १।१०।२।।

ग्रावाणेव तदिदर्थं जरेते गृध्रेव वृक्षं निधिमन्तमच्छ। ऋ० २।३६।१।।

यच्चायं लौकिको व्यवहारप्रवर्तकोऽर्थः सोऽप्येतस्मादेव। यतो हि स सर्वव्यवहारसाधनत्वेन, सर्वत्रर्तो गतो भवति, तस्माद्धनम'प्यर्थ'शब्दाभिधेयम्। तथा च वेदः—**'अर्थमिद्वा उ अर्थिन आ जाया युवते पतिम्'** (ऋ० १।१०५।२)। 'अर्थः' शब्दवाच्योऽपि, यतो हि शब्दोच्चारणेन स प्राप्यते। यथा 'लवित्रमानये'त्युक्ते यदानीयते स लवित्रशब्दस्य वाच्योऽर्थ इति।

भवति चात्रास्माकम्—

अर्थः स विष्णुः प्रपदं व्यनक्ति
गम्योऽहमत्रास्मि जगद्वशे मे ।
तथा यथा यन्त्रमुदीर्य[1] शिल्पी
[2]तस्योच्चनीचे[3] कुरुतेऽधिनैजम्।।६११।।

अनर्थः—४३१

अनर्थ इति—'अर्थ उपयाच्ञायाम्' इति चौरादिको धातुः। तस्मा'ण्णिच्', ततो ***''अकर्तरि च कारके संज्ञायाम्''*** (पा० ३।३।२६) इति 'घञ्'—अर्थः। ततो न विद्यमानोऽर्थो यस्येति बहुव्रीहिः। ***''नलोपो नञः''*** (पा० ६।३।७३) इति नलोपः। ***''तस्मान्नुडचि''*** (पा० ६।३।७४) इति नुडागमे'ऽनर्थः'। एवञ्च यो न किञ्चिदर्थयते सदाप्तकामत्वाद्यश्च सर्वैरर्थ्यते स्वस्वकामप्रेप्सुभिरि'त्यनर्थो' विष्णुरिति।

न्यूनता हि याच्ञाहेतुरतो य आत्मनि किञ्चित्प्रकारकं नैयन्यून्यमनुभवति, स तत्पूर्तिकामस्तदपनयनक्षमं परमुपैति याचते च, न तु सर्वथा सकलकाम्यवस्तुजातप्रपूर्णः।

१. उदीर्य=आविष्कृत्य। २. तस्य=यन्त्रस्य। ३. उच्चनीचे=चालनमवरोधनं तिर्यग्भावनं वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गम्—

यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्।

ऋ० १० ।१२१ ।१० ।।

अकामो धीरो अमृतः स्वयंभू रसेन तृप्तो न कुतश्चनोनः।

अथर्व० १० ।८ ।४४ ।।

वत्सः कामदुघो विराजः स गुहा चक्रे तन्वः पराचैः।

अथर्व० ८ ।९ ।२ ।।

ता ईं हिन्वन्ति हार्यस्य सक्षणिं याचन्ते सुम्नं पवमानमक्षितम्।

ऋ० ९ ।७८ ।३ ।।

सोममिन्मा सुन्वन्तो याचता वसु न मे पूरवः सख्ये रिषाथन।

ऋ० १० ।४८ ।५ ।।

इदं जगदपि भगवन्मूलकेन व्याप्तिमताऽनर्थत्वगुणेन सर्वतो नियन्त्रितमिव स्यूतमिव दृश्यते। प्राचां मतमप्येतदाशयकमेव। 'प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तत' इति।

भवति चात्रास्माकम्—

अर्थार्थिनस्तं भुवने शयानं
स्तुवन्ति याचन्ति जगन्ति वाग्भिः।
तस्मादनर्थो[1] भगवान् वरेण्यो
ह्यल्पार्थता क्लेशयतीह मर्त्यम्।।६१२।।

महाकोशः—४३२

'महाकोशः' इति—'कुशि'श्चौरादिको धातुः। तस्मादधिकरणे 'घञि'=कोशः, महच्छब्दश्च व्युत्पादितचरः। महान् कोशो यस्येति बहुव्रीहिसमासः।' 'कोश'-शब्दो निधिशब्दसमानार्थकः। यथा लोके नानाविधबहुमूल्यवस्तुसंग्रहस्थानं निधिशब्देनोच्यते, तथा कोशशब्देनापि। एतदर्थानुगमादेव भगवानपि 'महाकोश'शब्देनोच्यते। तत्र विशेषणीभूतेन महच्छब्देनाक्षय्यता तस्य द्योत्यते कोशस्येति।

तदिदं तस्माद् भगवतो कोशादनेकब्रह्माण्डोद्गमः, प्रतिब्रह्माण्डञ्चानेके लोकाः, प्रतिलोकञ्चानेके प्राणिनः, प्रतिप्राणि च भिन्ना गुणाः, भिन्नानि कर्माणि,

१. आप्तकामः स विष्णुर्नान्यमर्थयते तस्मा'दनर्थः' इति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भिन्नाश्चाकृतयः तदेतत्सकलं गणयितुमाकलयितुञ्चाशक्यम्। तस्मादेव निर्गतं निर्गच्छति च प्रतिपलं तथापि च स तदवस्थ एव। न नाममात्रमपि न्यूनता तस्मिन्नायाति, किन्त्वक्षय्य एव स 'महाकोश' इति।

तन्महाकोशार्पितमक्षय्यत्वं लौकिकेष्वपि पृथिव्यादिषु। यथा-'रत्नधा वसुन्धरा' इत्यन्वर्थनाम्ना पृथिव्यां सर्वविधौषधानां परमाणवोऽक्षया, मेघे जलम् अक्षयं, समुद्रेऽपि च। अतः एव सकलजगद्व्यवस्थापकमहाकोशात्मकगुणत्वेन सर्वेश्वरो विष्णुरेव 'महाकोशे'ति नाम्ना गीतः।

मन्त्रलिङ्गञ्च—

पूष्णश्चक्रं न रिष्यति न कोशोऽवपद्यते। ऋ० ६।५४।३।।

निधीनां त्वा निधिपतिं हवामहे वसो मम। यजु० २३।१६।।

ग्रावाणेव तदिदर्थं जरेथे गृध्रेव वृक्षं निधिमन्तमच्छ। ऋ० २।३६।१।।

उरुः कोशो व वसुधानस्तवायं यस्मिन्निमा विश्वा भुवनान्यन्तः।

अथर्व० ११।२।११।।

आपूर्णो अस्य कलशः स्वाहा सेक्तेव कोशं सिसिचे पिबध्यै।

ऋ० ३।३२।१५।।

लोकोऽपि तं महाकोशात्मकं विष्णुमनुकुरुते। तथा हि कुम्भकारो मृदमाकोश्य[1] ततस्तद्विकारान् घटादीनुपक्रमते कर्तुमिति।

भवति चात्रास्माकम्—

लोके महाकोशपदेन विष्णु-
गीतः पुराणैः स यतोऽस्ति वेदः।
न क्षीयते तस्य कृता व्यवस्था
जगत्[2] स कोशप्रसु[3] संविधत्ते ।।६१३।।

स्त्रियामप्यव्यक्तः 'कोशो' यत्र गर्भस्वरूपनिष्पत्तिः। बीजाधाने सति व्यक्तो भवति। आहारजन्यरसोपादानो गर्भः सर्वाङ्गसमुदितो दशमे मासि योनिभेदतो यथाकालं वा प्रसूयते। आहारस्य पार्थिवत्वाद् रसोऽपि पार्थिवः। माता च गर्भस्य निमित्तकारणं, नोपादानकारणम्। अमुथैव भगवान् विष्णुर्निमित्तकारणं सन् सर्वासां योनीनां संवर्धनानि—अक्षय्याणि विदधद्दर्शयति स्वमहाकोशगुणस्य व्याप्तिं जगति। मूलेऽर्पित एव गुणस्तत्सर्वाङ्गेषु साकल्यतः समुदेति। यथा वटाश्वत्थनिम्बसमूहस्त्रिवेणीति। एवं लोकदर्शं यथायथमूहनीयमिति।

१. एकत्रीकृत्य। २. जगच्छब्दस्य द्वितीयान्तमेकवचनम्। ३. कोशप्रसुशब्दो जगदविशेषणम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

महाभोगः—४३३

'महाभोगः' इति-'भुज पालनाभ्यवहारयोः' इति रौधादिको धातुः, तस्मात्कर्मणि 'घञ्', ***''चजोः कुः घिण्यतोः''*** (पा० ७।३।५२) इत्यनेन कुत्वे 'भोगः' इति। महान् भोगोऽस्येति 'महाभोगः'। भोगो हि विषयो भुज्यते इति कृत्वा। महत्तत्वञ्च प्रकृतिः, प्रकृतेरेव रूपमिदं नानाविधं विश्वमतो विश्वरूपां प्रकृतिं महासामान्यरूपया सत्तया ज्ञानलक्षणया स्फूर्त्या च विषयीकुर्वन् स 'महाभोगः' इत्युच्यते विष्णुः।

यद्वा—महान्तस्तत्त्वविवित्सवो यं भुञ्जते सेवन्ते विषयीकुर्वन्ति प्राप्तुमिति 'महाभोगः'। यद्वा-महान् आभोगो विस्तारः प्रकृतिमधिष्ठाय जगद्रूपेण यस्य स 'महाभोगः' इति विष्णुरेव। सूर्यादयो ग्रहाः सप्तर्ष्याद्यास्तारका अपि 'महाभोग'-शब्दाभिधानाः। यतो हि तेऽपि यावच्चतुर्दशमन्वन्तरमितं कालं भुञ्जन्ति पालयन्ति भगवत्कृतां व्यवस्थां नियमतो न चातिवर्तन्ते कदाचिदित्यर्थानुगमात्।

लोकेऽपि च दृश्यते-प्रतिवस्तु नियतो भोगकालः, परन्तु प्रत्येकं वस्तु स्वांशतस्सन्तानपरम्परया महाभोगवत्तां प्रतिपद्यते। अत आसर्गात्सर्गान्तं यावत् सन्तानपरम्परया सर्वे प्राणिनो महाभोगवन्त इति 'महाभोग' शब्दवाच्या भवन्ति।

मन्त्रलिङ्गञ्च—

हिरण्ययमुत भोगं ससान हत्वी दस्यून् प्रार्यं वर्णमावत्।
ऋक् ३।३४।६।।

यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त। यजु० ३२।१०।।

पशवस्तत् प्रमोदन्ते महो वै नो भविष्यति। अथर्व ११।४।५।

चतुष्पाद् भूत्वा भोग्यः सर्वमादत्त भोजनम्। अथर्व १०।८।२१।।

किमङ्ग त्वा मघवन् भोजमाहुः। अथर्व २०।८६।३।।

भवति चात्रास्माकम्—

उक्तो महाभोगपदेन विष्णु-
भुनक्ति विश्वं महतः स कालात्।
तत्रैव तद्भोजनमादधाति
साक्षी स्वयं पश्यतिमात्रमात्रः ।।६१४।।

पश्यतिमात्रमात्रः=यथा लोके सर्वः कृतव्यवस्थो यन्त्राधिपतिः स पश्यत्येव न तु स्वयं कुरुते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

महाधनः—४३४

महाधन इति-'धन धान्ये' वैदिको धातुर्जौहोत्यादिकः। धनं हि प्रीणनहेतुकं द्रव्यमुच्यते, यत्प्राप्य सर्वं तुष्यति तृप्यति। 'महाधन' शब्दे महच्छब्दो धनस्यापारिमित्यमाख्याति। एवञ्च महदपरिमितं धनमस्येति 'महाधनः' इत्युच्यते।

जगज्जातानां सर्वेषां किमुतान्येषां महाराजानामपि धनमियत्तावच्छिन्नं परिमितं भवति। परं विराट्पुरुषस्य ब्रह्मण इयदायुरियज्ज्ञानमियानानन्द इयती भोगसामग्री चेति गणनाविषयतां नापद्यते। अतो यस्य सर्वमिदमनन्तं, यञ्च याचन्तेऽन्ये सुखसाधनतृप्तिहेतुकं हिरण्यपश्वादिकं, स 'महाधन'शब्दाभिधेयो भगवान् विष्णुरिति।

मन्त्रलिङ्गम्—

क्रत्वा नो मन्यो सह मेद्येधि महाधनस्य पुरुहूत संसृजि।
अथर्व० ४।३१।६।।

शतं सहस्रमयुतं न्यर्बुदमसंख्येयं स्वमस्मिन् निविष्टम्।
अथर्व० १०।८।२४।।

वयं देवस्य धीमहि सुमतिं विश्वराधसः । अथर्व० ७।१७।२।

निधीनां त्वा निधिपतिं हवामहे वसो मम। यजु० २३।१६।।

जगृम्भा ते दक्षिणमिन्द्र हस्तं वसूयवो वसुपते वसूनाम्।
ऋ० १०।४७।१।।

कोशं न पूर्णं वसुना न्यृष्टमाच्यावय मघदेयाय शूरम्।
ऋ० १०।४२।२।।

अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि संजयामि शश्वतः ।
मां हवन्ते पितरन्न जन्तवो अहं दाशुषे विभजामि भोजनम्।।
ऋ० १०।४८।१।।

भवन्ति चात्रास्माकम्—

कश्चित्सुवर्णं यवकांश्च कश्चित्
वस्त्राणि कश्चित् द्रुमयांश्च कश्चित्।
कश्चिद् गुडूचीं मधुयष्टिकां वा
कश्चित्पशून् वा विनिमातुमेति ।।६१५।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स एव विष्णुः कुरुते निधानं
धनस्य सर्वत्र कृतेऽत्र विश्वे ।
महाधनः स्वेन गुणेन युक्त्या
धनेन तुल्यं कुरुते समस्तम् ।।६१६।।

एवं हि सर्वत्र धनं स विष्णु-
र्महाधनो व्यापयति प्रसह्य ।
तं बुद्धिमन्तः स्वधिया विशेष्य
महाधनं तं स्तुवते महान्तः ।।६१७।।

❖ ❖ ❖

अनिर्विण्णः स्थविष्ठोऽभूर्धर्मयूपो महामखः।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः।।६०।।

४३५ अनिर्विण्णः, ४३६ स्थविष्ठः, ४३७ अभूः (भूः), ४३८ धर्मयूपः, ४३९ महामखः।
४४० नक्षत्रनेमिः, ४४१ नक्षत्री, ४४२ क्षमः, ४४३ क्षामः, ४४४ समीहनः।।६०।।

अनिर्विण्णः—४३५

'अनिर्विण्णः' इति-'नि'रुपसृष्टो 'विद विचारणे' धातुः।***''गत्यर्थाकर्मक०''*** (पा० ३।४।७२) इति कर्तरि क्तः। ***'निर्विण्णस्योपसंख्यानम्'*** (पा० ८।४।२६) इति सूत्रवार्तिकेन पूर्वनकारस्य— ***''ष्टुना ष्टु''***रिति ष्टुत्वेन णः। नञ्समासः='अनिर्विण्णः'। निर्वेदं क्षोभं क्लेशमालस्यं वा न प्राप्नोति सोऽ'निर्विण्णो' विष्णुः। तथा हि— निर्वेदो नाम विकारोऽव्ययस्य कथं स्यात्, निर्वेदादिकं हि सविकारस्य वस्तुनो धर्मः, यदीश्वरोऽपि निर्विण्णः स्यात्तदा निर्वेदवशात्सृष्टेरुच्छित्तिरेव स्यात्। अतो नायं विकारी सन्निर्वेदमाप्नोति, किन्त्वेकरसोऽव्ययः। अत एवा'निर्विण्णो' विष्णुरिति।

पौनःपुन्येन सृष्टिं विदधत्संहरंश्चाप्येकरसः सर्वदाविकृतरूपः। **'कारणगुणकं कार्य'**मिति न्यायाच्च यादृशोऽनिर्विण्णः स्वयं तादृग्गुणानुस्यूतमेव विश्वं विधत्ते। यादृग्गुणसम्पन्नो बीजस्तादृग्गुणसम्पन्नामेव पृथिवीं जनयति। पृथिव्याश्च बीजानामुद्गमोऽविच्छिन्नो, न सा कदाचिन्निर्वेदमापद्यते, अनिर्विण्णस्य विष्णोः कार्यत्वात्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एवं समुद्रोऽपि सर्वतो जलमाददानो न निर्विद्यते। सूर्योऽपि निरन्तरगतिरयं न निर्विद्यते, जगदाकर्षन् सन्तापयंश्च। इदं हि जगद्भगवतो विष्णोरजरममृतं दृश्यं काव्यं **'देवस्य पश्य काव्यन्न ममार न जीर्यति'** (अथर्व० १०।८।३२) इति मन्त्रलिङ्गत्वात्। अत्र दृशिना दृश्यकाव्यस्य जगत एव सम्बन्धः। तस्य श्रव्यं काव्यञ्च श्रुतिपर्यायो वेदः।

मन्त्रलिङ्गञ्च—

प्र वो महे मन्दमानायान्धसोऽर्चा विश्वानराय विश्वाभुवे।
यजु० ३३।२३।।

अकामो धीरो अमृतः स्वयंभू रसेन तृप्तो न कुतश्चनोनः।
अथर्व० १०।८।४४।।

द्रवन्त्यस्य वाजिनो न शोका भयन्ते विश्वा भुवना यदभ्राट्।
ऋ० ४।६।५।।

स्वर्यस्य च केवलं तस्मै ज्येष्ठाय ब्रह्मणे नमः। अथर्व० १०।८।१।।

अतन्द्रो ब्रह्मणा धीरः प्राणो मानु तिष्ठतु। अथर्व ११।४।२४।।

अतन्द्रो दूतो अभवो हविर्वाट्। ऋक् १०।७२।७।।

संक्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत् साकमिन्द्रः।
यजु० १७।३३।।

भवति चात्रास्माकम्—

उक्तो ह्यनिर्विण्णपदेन विष्णुः
समीक्ष्य विश्वं बहुधा ततं यत्।
सूर्यो न निर्वेदमुपैति भेषु[1]
न चोर्मिमाली न धरा च नैजे[2]।।६१८।।

स्थविष्ठः—४३६

'स्थूल परिबृंहणे' चौरादिकः, तस्माण्णिच्यतो लोपः, पचाद्यच, णेर्लोपः, आतिशायिक इष्ठन् प्रत्ययः। ***'स्थूलदूरयुवह्रस्वक्षिप्र०'*** (पा० ६।४।१५६) सूत्रेण यणो लोपो पूर्वस्य च गुणः। अतिशयेन स्थूलः 'स्थविष्ठः'। इष्ठनातिशयस्थूलत्वमुच्यते। स्वभावतः स्थूला जागताः पदार्थाः, यश्च रसरूपेण

१. भेषु=इत्यत्रागच्छन्नित्यध्याहारः। २. नैजे निजविकारेषु बीजोत्पादनादिकर्मसु। तथा समुद्रः स्वकार्येषु सततं निरत इत्यर्थः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तदन्तः प्रविश्य स्थूलतमान् करोति स 'स्थविष्ठः' इत्युच्यते।

परिबृंहणं हि धात्वर्थः, परिबृंहणञ्च परितो वर्द्धनमिति। सर्वजगदन्तर्गतो यावदिच्छति तावद्वर्धयति। जगदिदमतो बृंहणधर्मकत्वात्स्थविष्ठो धात्वर्थानुगमादेव स विष्णुः।

मन्त्रलिङ्गञ्च—

वयमु त्वामपूर्व्य स्थूरं न कच्चिद् भरन्तोऽवस्यवः।
वाजे चित्रं हवामहे।। ऋक् ८।२१।१।।
स्थूरस्य रायो बृहतो य ईशे तमु ष्टवाम विदथेष्विन्द्रम्।
ऋक० ४।२१।४।।
स वर्धिता वर्धनः पूयमानः सोमा मीढ्वान् अभिनो ज्योतिषावीत्।
ऋक् ६।६७।३६।।
त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। यजु० ३।६०।।
त्वं हि सोम वर्धयन्त्सुतो मदाय भूर्णये।
वृषन् स्तोतारमूतये।। ऋक् ६।५१।४।।
वि द्वेषांसीनुहि वर्धयेलां मदेम शतहिमाः सुवीराः। ऋक् ६।१०।७।।

दृश्यते च जगति तस्य स्थूलीकरणरूपोऽनुस्यूतो गुणः। प्रत्येकं वस्त्वन्यत्र प्रविश्य तत्स्थूलयति वर्धयति विकासयति। यतो ह्यन्तःप्रविष्टस्यान्नभूतस्य रसरूपेण परिणतस्य वस्तुनो वर्धनरूपः 'स्थूलीकरणरूपो' धर्मस्तत एव आयातः। यथा-यत्र वस्तुनि जलप्रवेशस्तत् स्थूलीभवति, यतो हि रसरूपतामापन्नं जलं तत्र परितो गतं भवति। अतस्तद्वस्तुस्थूलताहेतुजलं स्थविष्ठं तद्वस्त्वपेक्षया।

स्थूलतरस्योदाहरणं पुनर्यथा—सुनियन्त्रितं वाष्पं महत्तमं यन्त्रं चालयति। शक्त्यतिशयं द्योतयितुं वाष्पस्य स्थविष्ठत्वमुक्तं भवति यन्त्रापेक्षया। एवं विष्णुरपि लोके। यद्यपि ब्रह्मणि स्थूलत्वं कृशत्वं वा न सङ्गच्छते, तथापि तस्यैव ब्रह्मणः प्रपञ्चमात्रमिदमिति विज्ञापयितुं स स्थविष्ठनाम्नोक्तः।

भवतश्चात्रास्माकम्—

नूनं स्थविष्ठः स हि विष्णुरेव
यतोऽस्ति सर्वत्र गतः स्वयं सः।
व्याप्य स्थितः सर्वमतो [1]वशिष्ठो
दीपो यथा रश्मिभिरावृणोति।।६१६।।

---

१. वशिष्ठः=वशिनां श्रेष्ठः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एवं हि यो ध्यायति [1]सत्यबन्धुं
स्थूलाच्च वृद्धं परियातमन्तः ।
देहे यथात्मा विभिनत्ति[2] रूपं
तथा स्थविष्ठः कथितः स एव ।।६२०।।

अभूः—४३७

अभूरिति 'भू सत्तायां' धातुर्भौवादिकः, तस्मात् ***'भुवः संज्ञान्तरयोः'*** (पा० ३।२।१७६) इत्येन संज्ञायां 'क्विप्', तस्य क्विपः सर्वस्य लोपः। नञा समासोऽ'भू'रिति। अथवा—भवनं भूरिति सम्पदादिभ्यो भावे 'क्विप्', ततो नञा समासः। एवञ्च अभूरित्येनन भगवतो भवनक्रियाविषयत्वं निषिध्यते। भवतीति सामान्यक्रिया, तन्निषेधे सर्वेषामर्वाक्तनानां भावविशेषाणां निषेधः।

जायते इति समानार्थिका भवनक्रिया, जायते=भवतीति समानार्थदर्शनात्। एवञ्च सामान्यनिषेधे समापन्न एव विशेषनिषेधः। न हि निर्विशेषं सामान्यमिति न्यायात्। एवञ्च भवनक्रियाविषयो न भवति सः, इत्यनेनाद्यभावविकारो जन्म निषिध्यते। तस्मिन्निषिद्धे च स्वतोऽन्येषां भावविकाराणां निषेधः। अतोऽ'भू'र्भगवान् विष्णुः।

मन्त्रलिङ्गञ्च—

उत नोऽहिर्बुध्न्यः शृणोत्वज एकपात् पृथिवी समुद्रः। यजु० ३४।५३।।
शं नो अज एकपाद् देवो अस्तु। ऋक् ७।३५।१३।।
कविर्मनीषी परिभूः स्वयंभूः। यजु० ४०।८।।
अभूर्वौक्षीर्व्यु आयुरानड्। ऋक् १०।२७।७।।
अकामो धीरो अमृतः स्वयंभूः। अथर्व १०।८।४४।।

भवति चात्रास्माकम्—

अभूः स विष्णुर्ह्यजरोऽमरो वा
न तत्परः कोऽपि न तस्य शास्ता ।
सम्पद्विपद्भ्यां च न सोऽस्ति सक्त-
स्तथा यथा व्योम जगत् प्रसृप्तम् ।।६२१।।

---

१. सत्यया व्यवस्थया बध्नाति यः स 'सत्यबन्धुः' विष्णुरिति। २. विभिनत्ति= बहुविधं दृश्यते शरीरभेदात् यथाशरीराकारम्। सूक्ष्मकीटादहस्त्युत्तरशरीरान्तमिति यावत्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धर्मयूपः—४३८

धर्मयूप इति-'धर्मशब्दो व्युत्पादितचरः। ***'अर्तिस्तु'*** (उणादि १।१४०) इत्यादिनौणादिको मन्प्रत्ययान्तः। 'यूप' शब्दो हि 'यु मिश्रणे' मिश्रणामिश्रणयोरित्येके पठन्ति। धातोरादादिकादन्तर्भावितण्यर्थात् ***''कुयुभ्याञ्च''*** (उणादि ३।२७) इत्यनेनौणादिकः 'पः' प्रत्ययः 'किच्च' सः, तस्माद् गुणाभावः। ***'श्र्युकः किति'*** (पा० ७।२।११) इति नेट्। बाहुलकाद्दीर्घः। यावयतीति 'यूपः'। धर्माणां विश्वस्य धारकाणां पञ्चभूतानां यूप इति 'धर्मयूपः'।

धारको हि धर्मः, स च स्वयं धर्मरूपः। स्वकार्यभूतान्यात्मधर्म-विशिष्टान्याकाशादीनि समुत्पाद्य संयाव्य च पञ्चीकरणेन त्रिवृत्करणेन वा नानाविधं विश्वं विधत्ते। प्रतिवस्तु च तदन्तर्गतस्तदाकारः स्वकारकत्वरूपं धर्मं निदधाति। तेन च प्रत्येकं वस्त्वात्मानं दधदस्तित्वलक्षणं सत्त्वमापद्यते। एवं सर्वानुस्यूतात्मधर्मेण सर्वमिदं जगदात्मनि बध्नातीति कृत्वा 'धर्मयूपः' स इत्यभिधीयते।

यथेक्षुदण्डो मनुष्यैः प्रपीड्य यन्त्रैर्विकृतः स्वविकारेषु गुडशर्करादिषु स्वमधुरत्वलक्षणं गुणं निदधाति, येन सर्वं विकारजातं माधुर्यमापद्यते, भजते च पृथक् पृथग्-नाम। एवं लोकाऽनुभवतः सङ्गमनीयम्।

मन्त्रलिङ्गञ्च—

त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः। अतो धर्माणि धारयन्।।
ऋ० १।२२।१८।।

यस्मिन् भूमिरन्तरिक्षं द्यौर्यस्मिन्नध्याहिता।
यत्राग्निश्चन्द्रमा सूर्यो वातस्तिष्ठन्त्यार्पिताः
स्कम्भं तं ब्रूहि कतमः स्विदेव सः।। अथर्व० १०।७।१२।।
तस्मिन् च्छ्रयन्ते य उ के च देवा वृक्षस्य स्कन्धः परित इव शाखाः।
अथर्व० १०।७।३८।।

वृषा सोम द्युमान् असि वृषा देव वृषव्रतः। वृषा धर्माणि दधिषे।।
ऋ० ६।६४।१।।

देवो देवान् स्वेन रसेन पृञ्चन्, इन्दुर्धर्माण्यृतुथा वसानो०।
ऋ० ६।६७।१२।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

स धर्मयूपः कुरुते विचित्रं
जगत् बहुत्वे कृतबुद्धिरन्तः ।
स वा मनःकामनया च शम्भुः
पुंस्त्रीप्रयोगेण[1] जगद् बभार[2] ।।६२२।।

महामखः—४३६

महामख इति—'मख गतौ' भौवादिको धातुः, तस्मात्—***'पुंसि संज्ञायां घः प्रायेण'*** (पा० ३।३।११८) सूत्रेण करणे 'घः' प्रत्ययः। मख्यते प्राप्यते स्वाभीष्टं येनेति 'मखो' यज्ञः। महान् मखोऽस्येति 'महामखो' विष्णुरिति। तथा हि 'मखो' नाम आदानप्रदानादिरूपां क्रियामभिदधत्सर्वस्य साधारणः।

सर्व एव प्राणिवर्गः स्थावरवर्गश्च किञ्चिदन्यस्मादादत्ते किञ्चिदन्यस्मै ददाति। यथा वृक्षः सूर्यादुष्माणमादत्ते, मेघेभ्यो जलं, पृथिव्या रसञ्चादत्ते जगते फलानि पुष्पाणां सुगन्धञ्च ददाति। एवं स्थावरेष्वपि यद्यपि न स्फुटं दृश्यते आदान-प्रदानक्रिया, तथाप्यस्ति। यतो हि सर्व एव मेघेभ्यो जलं सूर्याच्चौष्ण्यमाददानाः कालक्रमात्क्षयमुपयान्ति मलोपलिप्ताः।

किन्तु भगवतो जगद्रूपं मखः सर्वमखातिशायीत्यतः स 'महामखः' इत्युच्यते। यतो हि स जगदिदमाक्रीडमानं विलोक्य बहु प्रसीदतीत्येतत् प्रसादरूपमेव फलं जगद्यज्ञस्य। ब्रह्मण्यपि प्रसादजन्यसुखानुभवोऽस्त्येवान्यथा तस्यानन्दरूपतान्धस्य सौन्दर्यमिव निष्फला स्यात्, न च भगवति किञ्चिन्निष्फलमस्ति।

मन्त्रलिङ्गञ्च—

मखस्य ते तविषस्य प्रजूतिमियर्मि वाचममृताय भूषन्।
ऋ० ३।३४।२।।

यो यज्ञस्य प्रसाधनस्तन्तुर्देवेष्वाततः।
तमाहुतमशीमहि।। अथर्व० १३।१।६०।।
तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे। यजु० ३१।७।।
एष ते यज्ञो यज्ञपते सह सूक्तवाकः। अथर्व० ७।६७।४।।
देहि मे ददामि ते नि मे देहि नि ते दधे। यजु० ३।५०।।

---

१. पुंस्त्रीप्रयोगः=सर्वत्र युग्मसद्भावाख्यायी। २. भृञ्=भरणे लिटि बभार।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इन्द्रस्य यस्य सुमखं सहो महि श्रवो नृम्णं च रोदसी सपर्यतः।

ऋ० १० ।५० ।१।।

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः।।

यजु० ३१ ।१६।।

यज्ञस्वरूपञ्च—

वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः। यजु० ३१ ।१४।।

इष्टनामव्याख्यावसरे यज्ञमधिकृत्य व्याख्यातचरम्।

भवन्ति चात्रास्माकम्—

महामखो विष्णुरनन्तबोधो
जङ्गज्जगद्दोषगणेन[1] युञ्जन् ।
चयप्रकोपप्रशमांश्च कुर्वन्
यज्ञायते विश्वमिदञ्च सर्वम् ।।६२३।।

शीतोष्णसाम्यैरवनेः प्रदेशा
वसन्तसन्तापगुणान् वहन्तः ।
पृथग्विभक्तौषधिवर्गजातान्
विकास्य पुष्पैरथवा फलैश्च ।।६२४।।

महामखत्वं हि महामखस्य
व्यवस्थया यत्र वितानवृद्धम् ।
व्रते समस्तं न परं हि तस्मा-
न्महामखो विष्णुरतोऽस्ति गीतः।।६२५।।

एवं सर्वत्र पशुपक्षिवनस्पत्यादिषु योजनीयम्। न हि सर्वं वनस्पत्यादिकं सर्वदोद्भवति पाकमुपैति च।

नक्षत्रनेमिः—४४०

नक्षत्रनेमिरिति-'णक्ष गतौ' भौवादिको धातुः, तस्मात् ***''णो नः''*** (पा० ६ ।१ ।६५) इति णस्य नत्वे, ***''अमिनक्षियजिवधिपतिभ्योऽत्रन्''*** (उणादि ३ ।१०५) इत्यौणादिको'ऽत्रन्' प्रत्ययो=नक्षत्रम्। नेमिः-'णीञ् प्रापणे' धातुर्भौवादिको ***''णो***

१. दोषगणेन=दोषत्रयेण

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नः'' (पा० ६।१।६५) इति णत्वे, *''नियो मिः''* (उणादि ४।४४) इत्यौणादिको'मि'प्रत्ययो, गुणो नेहानिट्त्वात्। 'नेमि'र्नयति प्रापयतीत्यर्थः। नक्षत्रस्य नेमि'र्नक्षत्रनेमिः'।

यद्वा—न क्षरति क्षीयते *''नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसक-नक्षत्रनक्रनाकेषु''* (पा० ६।३।७५) इति निपातना'न्नक्षत्रम्' एवञ्च नक्षत्रात्मकस्य ज्योतिषो जगतो नियामकत्वा'न्नक्षत्रनेमिः'।

सर्वदा गतिशीलमेतज्जगत् भ्राम्यदपि यन्निबद्धं स्वपरिधितो न विपर्येति, यथा सर्वथा भ्राम्यन्तोऽपि रथचक्राङ्गा अरा नेमिनिबद्धा नेमिं परित एव भ्राम्यन्ति, न तु परिधीनतिवर्तन्ते। यथा वोत्तमाङ्गस्थानीयज्ञानकेन्द्रनिबद्धानीन्द्रियाणि न स्वस्थानतो विचलन्ति, तथा केन्द्रस्थानीये नेमिरूपे भगवति निबद्धमेतन्नक्षत्र-जगदासर्गात् सर्गान्तिमक्षणं यावन्न किञ्चिदपीतस्ततो विचलति, किन्तु स्वपरिधावेव सुव्यवस्थितञ्चलति। सोऽय'न्नक्षत्रनेमि'र्विष्णुरिति।

स्वाध्यायब्राह्मणेऽपि श्रूयते—

नक्षत्रतारकैः सार्धं चन्द्रसूर्यादयो ग्रहाः।
वायुपाशमयैर्बन्धैर्निबद्धा ध्रुवसंज्ञिते ।।

स्वाध्यायब्राह्मणे शिशुमारवर्णनप्रस्तावे-'विष्णुर्हृदय'मिति वर्ण्यते, शिशुमारा-कृतिवन्नाक्षत्रञ्जगत् तत्पुच्छे ध्रुवमतो ध्रुवनक्षत्रमपि ध्रुवसंज्ञया व्यवह्रियते।

मन्त्रलिङ्गञ्च—

एकचक्रं वर्तत एकनेमि सहस्राक्षरं प्रपुरो नि पश्चा।
अथर्व० १०।८।७।।

विश्वव्यचाश्चमौषधयो लोमानि नक्षत्राणि रूपम्। अथर्व० ६।७।१५।।

तमृतं च सत्यं च सूर्यश्च चन्द्रश्च नक्षत्राणि चानुव्यचलन्।
अथर्व० १५।६।५।।

श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्।
यजु० ३१।२२।।

तस्यामू सर्वा नक्षत्रा वशे चन्द्रमसा सह। अथर्व० १३।४।२८।।

भवति चात्रास्माकम्—

नक्षत्रनेमिर्भगवान् स विष्णु-
र्व्यवस्थया नह्यति नेमिभूतः।
नक्षत्रताराग्रहमण्डलानि
ध्रुवे निबद्धानि च तानि तेन।।६२६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नक्षत्री—४४१

नक्षत्रीति-नक्षत्रशब्दो व्युत्पादितचरः। तस्मान्मत्वर्थीय ***"अत इनिठनौ"*** (पा० ५।२।११५) इति सूत्रेण 'इनि' प्रत्यये, ***'यस्येति च'*** (६।४।१४८) इत्यकारलोपे, ***'सौ च'*** (पा० ६।४।१३) इति दीर्घे 'नक्षत्री'ति।

यद्धि यस्य स्वं भवति, स तेन तद्वान् भवति। स तेन क्षेत्रेण क्षेत्रीत्युच्यते शरीरेण स्वेन शरीरीत्युच्यते। एवं नक्षत्राणामधिपतिर्नक्षत्राणि तस्य स्वमिति स 'नक्षत्री'। मनः शरीरे नक्षत्रं तस्य व्यवस्थापकत्वेनाधिपतिरात्मा स 'नक्षत्री' तथेदं विश्वं नक्षत्रं तस्य व्यवस्थापकोऽधिपतिरात्मभूतो 'विष्णु'र्नक्षत्री।

मन्त्रलिङ्गञ्च—

तदेवाग्निस्तदादित्यस्तद् वायुस्तदु चन्द्रमाः। यजु० ३२।१।।
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। यजु० ३१।१२।।
शकधूमं नक्षत्राणि यद् राजानमकुर्वत। अथर्व० ६।१२८।१।।
विश्वव्यचाश्चमौषधयो लोमानि नक्षत्राणि रूपम्। अथर्व० ९।७।१५।।
तस्यामू सर्वा नक्षत्रा वशे चन्द्रमसा सह। अथर्व० १३।४।२८।।

भवति चात्रास्माकम्—

नक्षत्रलोकस्य यतोऽस्ति शम्भु-
र्विधायकोऽतः कथितः स तद्वान्।
देहे मनः सर्वशरीर आत्मा
विराजते तस्य पदं दधानः ।।६२७।।

तद्वान्-नक्षत्रवान्-नक्षत्रीति समानं भवति।

क्षमः—४४२

'क्षमूष् सहने' भौवादिकः, तस्मात्पचा'द्यच्' क्षमः। क्षमते समर्थो भवति, व्यवस्थाबद्धं जगच्चालयितुम्, कर्तुमकर्तुमन्यथा कर्तुं वा सर्वथा अचिन्त्यापरिमेयशक्तित्वात्, स 'क्षमः'।

अथवा-'क्षमा' नाम कृतापराधेषु दुर्बलेष्वपि स्वतो न्यूनबलेष्वपि क्रोधानाविष्करणम् सा अस्यास्ति स 'क्षमः', मत्वर्थीयोऽच्। दृश्यते च क्षमा नाम गुणस्तस्मिन्, यन्नाम सदुपदिष्टं वेदमार्गमतिक्रम्य कुपथप्रवर्तमानमपि जीवलोकं तदनुरूपफलदानेन विशोध्य, सर्वदोन्निनीषुर्न च तस्मै क्रुध्यति तमुपक्षते च।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सूर्योपि 'क्षमो' यतो हि स भगवता विष्णुना विश्वेषां कर्मसाक्ष्ये नियुक्तः, सर्वदा नैरन्तर्यगमनजन्यं खेदं पृथिव्याकर्षणजन्यञ्च खेदं सहते, न चोपैति विश्रान्तिं जात्वपि। पृथिवी 'क्षमा', क्षमते सहते महान्तं भारमिति कृत्वा।

शारीर आत्मापि 'क्षमः', यतो हि स यावदायुः शरीसम्बद्धः शारीरं सुखदुःखादिरूपं विकारजातं सहते। अत्र सर्वत्र जगति भगवता 'क्षम' नाम्ना विष्णुना स्वकीयः क्षमत्वरूपो गुणो व्यापितः, व्यापकत्वात्स्वस्य।

मन्त्रलिङ्गञ्च—

तत्सवितुर्वृणीमहे वयं देवस्य भोजनम्।
श्रेष्ठं सर्वधातमं तुरं भगस्य धीमहि ।। ऋक्० ५।८२।१।।
शक्तीवो यद्विभरा रोदसी उभे जयन्नपो मनवे दानुचित्राः।
ऋ० ५।३१।६।।

नाक्षस्तप्यते भूरिभारः। ऋ० १।१६४।१३।।
इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न। ऋ० १०।१२६।७।।
अभि द्यां महिना भूवमभीमां पृथिवीं महीम्। ऋ० १०।११९।८।।
प्राणाय नमो यस्य सर्वमिदं वशे।
यो भूतः सर्वस्येश्वरो यस्मिन्त्सर्वं प्रतिष्ठितम्।। अथर्व० ११।४।१।।
साह्याम दासमार्यं त्वया युजा सहस्कृतेन सहसा सहस्वता।
ऋ० १०।८३।१।।

भवति चात्रास्माकम्—

क्षमः स विष्णुः प्रवितत्य विश्वं
क्षमत्वधर्मेण जगच्च युञ्जन् ।
स्वयं क्षमः सन् सहते ह सर्वं
जगत्क्षमं तं [1]पदशोऽनुयाति ।।६२८।।

क्षामः—४४३

क्षामः इति - 'क्षै क्षये' भौवादिको धातुः, ***'आदेच उपदेशेऽशिति'*** (पा० ६।१४५) सूत्रेणैच 'आत्वम्'। ***''गत्यर्थाकर्मक०''*** (पा० ६।१।४५) इति कर्तरि 'क्तः'। ***''क्षायो मः''*** (पा० ८।२।५३) इति तकारस्य 'मकारः'। अनिट्, 'क्षाम'

१. पदशः=प्रपदमिति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति साधुः। यद्वा=क्षायन्ति विलीयन्तेऽस्मिन्नित्यधिकरणे 'क्तः' ***'क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः'*** (पा० ३।४।७६) इति सूत्रेण। एवञ्च य एतस्मिन् विश्वेऽन्तर्लीनस्तिष्ठति सर्वं व्याप्य, यस्मिन्वेदं विश्वं प्रलीयते, यथासमयमित्युभयथापि 'क्षाम'-शब्दोऽन्वर्थो भवति।

इदं विश्वं नामरूपात्मकं वैविध्यं विहाय यदा विलीयते, तदा मूलरूपतामापन्नो यस्तिष्ठति स 'क्षामो' विष्णुः। स एवास्मिन्नशेषे विकारजाते जगदात्मके क्षीणेऽवशिष्यते उच्छिष्ट इव निर्विशेषरूपेणेति सम्यगुक्तो भवति 'क्षामः'।

यथा कश्चिन्मनुष्यः क्षयमापद्यमानान् स्वारम्भानवलोकयन्नपि स्वयं क्षामस्तिष्ठति स्वारम्भमूलत्वात्, न तु जहात्युत्साहमिति। एवमेव वृक्षमूलं स्वोपरितने शाखाप्रशाखादिगणे निकृत्तेऽपि क्षाम इव वर्तमानः पुनः सति समये सत्सत्तः शाखादीन्याविर्भावयति। एवं विश्वव्यापित-क्षामत्वगुणो भगवान् 'क्षामः' इत्युच्यते।

दृश्यते च लोकेऽपरथापि—यथा प्रियतमेषु स्त्रीपुत्रादिषूपरतेषु कश्चित्कुलप्रधानः पुरुषः क्षायति, ग्लानः सन् कृशतां याति, पुनश्च प्रयतते पुत्रादीनधिगन्तुम्। तथा भगवानपि जगति प्राप्तेऽवान्तरप्रलयं, पुनश्चिकीर्षुस्तावत्कालं 'क्षामः' उच्यते।

मन्त्रलिङ्गञ्च—

प्रजापतिश्चरति गर्भे अन्तरदृश्यमानो बहुधा विजायते।
अथर्व० १०।८।१३।।

यतः सूर्य उदेत्यस्तं यत्र च गच्छति ।
तदेव मन्येऽहं ज्येष्ठं तदु नात्येति किंचन।। अथर्व० १०।८।१६।।

तस्मिन्निदं सञ्च विचैति सर्वं स ओतः प्रोतश्च विभूः प्रजासु।
यजु० ३२।८।।

स नः पर्षदति दुर्गाणि विश्वा क्षामद् देवोऽति दुरितान्यग्निः।
अथर्व० ७।६३।१।।

उच्छिष्टे द्यावापृथिवी विश्वं भूतं समाहितम्। अथर्व० ११।७।२।।

य इमे द्यावापृथिवी जजान यो द्रापिं कृत्वा भुवनानि वस्ते।
अथर्व० १३।३।१।।

भवति चात्रास्माकम्—

क्षामः स्वयं सर्वमिदं विधाय
विष्णुः स्वयं तत्कुरुते क्षयार्हम्।
पुनश्चिकीर्षुं समयेऽन्तराले
क्षामेति नाम्ना कवयः स्तुवन्ति ।।६२६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रूयते च—यच्छिशुमाराकृतेरस्य तारागणस्य क्षयेऽपि चतुर्नक्षत्रसंयुक्तो ध्रुवस्तारा तिष्ठति। स ध्रुवः 'क्षामः' क्षामो वा ध्रुव इत्युक्तो भवति।

उक्तं विष्णुपुराणेऽपि—

तारकाश्शिशुमारस्य नास्तमेति चतुष्टयम्।

विष्णुपुराणे २।६।५; १।११। ६६।।

यावन्मात्रे प्रदेशे तु, मैत्रेयावस्थितो ध्रुवः।
क्षयमायाति तावत्तु भूमेराभूतसम्प्लवः ।। वि० पु० २।८।६१।५।।

समीहनः—४४४

समुपसर्गपूर्वं ईह चेष्टायां धातुर्भौवादिकस्तस्मात् णिच् ततो ***'नन्दिग्रहि०'*** (पा० ३।१।१३४) इत्यादिना कर्तरि 'ल्यु' प्रत्ययः ल्युड्वा बाहुलकात्, योरनो, णिलोपः= 'समीहनः'। एवञ्च-सम्यक् चेष्टयति प्रजाः कर्मसु, सम्यक् चेष्टते वा जगद्रचने, कर्मफलप्रदाने चेत्युभयथा सङ्गतार्थः।

अस्य च भागवतस्य रचनात्मकस्य गुणस्य प्रजास्वप्यन्वयः। यतो हि, न केवलं मनुष्यस्यापि तु सर्वस्यापि प्राणिनः स्वसन्तानतन्तुविताने सार्वकालिकी समीहा नैसर्गिकी। अत एव चतुर्भेदभिन्नं सर्गं विदधज्जीवोऽपि 'समीहनः'।

सूर्योऽपि समीहनो, यतो हि समीहते उदयास्ताभ्यां लोकलोकान्तरेभ्य आत्मानं दर्शयितुं कारयितुञ्च कर्माणि। स्वयं वा जीवलोकः स्वात्मभूतं सूर्यं पौनः पुन्येन दिदृक्षुरिति जीवनशक्तिप्राप्त्यै।

मन्त्रलिङ्गञ्च—

यतो यतः समीहते ततो नो अभयं कुरु। यजु० ३६।२२।।

यो अस्य विश्वजन्मन ईशे विश्वस्य चेष्टतः। अथर्व० ११।४।२३।।

यो अस्य सर्वजन्मन ईशे सर्वस्य चेष्टतः।
अतन्द्रो ब्रह्मणा धीरः प्राणो मानु तिष्ठतु ।। अथर्व० ११।४।२४।।

अन्तर्विद्वान् अध्वनो देवयानानतन्द्रो दूतो अभवो हविर्वाट्।

ऋ० १।७२।७।।

यथेमे द्यावापृथिवी सद्यः पर्य्येति सूर्यः। अथर्व० ६।८।३।।

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।
दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः ।। १०।१९०।३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

समीहनो विष्णुरिहास्ति गीतः
कर्तुं स विश्वं कुरुते समीहाम्।
तथैव जीवः कुरुतेऽनुयानं[1]
समीहमानः पुरुरूपभूत्यै[2] ।।६३०।।

❖ ❖ ❖

यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतांगतिः।
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ।।६१।।

४४५ यज्ञः, ४४६ इज्यः, ४४७ महेज्यः, च ४४८ क्रतुः, ४४६ सत्रम्, ४५० सतांगतिः। ४५१ सर्वदर्शी, ४५२ विमुक्तात्मा, ४५३ सर्वज्ञः, ४५४ ज्ञानमुत्तमम्।।

यज्ञः—४४५

यज्ञ इति-'यज देवपूजासङ्गतिकरणदानेषु' इति भौवादिकाद् धातोः ***''यजयाचयतविच्छप्रच्छरक्षो नङ्''*** (पा० ३।३।६०) सूत्रेण 'नङ्' प्रत्ययः, ***''स्तोः श्चुना श्चुः''*** (पा० ८।४।४०) इति चुत्वेन नस्य ञः, सिद्धो='यज्ञ'शब्दः। एवञ्चेज्यते सङ्गम्यते दीयते च यस्मा इति नानार्थी 'यज्ञ'शब्दः। स एव देव एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च'' इत्युक्तलक्षणः सर्वैरिज्यते पूज्यते स्व स्व-कर्मभिः।

स एव प्राप्यते सर्वेषां मूलाधारत्वात्। तस्मिन्नेव सर्वैरेकीभूय स्थीयते। तस्मा एव च सर्वभूतात्मभूताय दीयते यत्किञ्चित्स्वं भवति, यतो हि सर्वेषामात्मेव प्रेष्ठः। अतो विष्णुरेव यज्ञशब्दवाच्यो ***''यज्ञो वै विष्णुरित्युक्तत्वात्''***। तै० सं० १।७।४।।

तथा च स एव विश्वान्तर्गतो विश्वं संयुनक्ति वियुनक्ति चेति संयोगवियोगलक्षणयज्ञतन्त्वनुस्यूतमिदं सर्वं विश्वं यज्ञमयम्।

---

१. अनुकरणमनुयानमनुचलनमिति समानार्थकाः। २. पुरुरूपभूत्यै=बहुत्वभावाय पुत्रपौत्रात्मकरूपेणेति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दाᳪसि जज्ञिरे तस्माद्यजुस्तस्मादजायत।। यजु० ३।१७।।
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ऋ० १।१६५।५०।।
मा प्र गाम पथो वयं मा यज्ञादिन्द्र सोमिनः। अथर्व० १३।१।५६।।
येन यज्ञेन बहवो यन्ति प्रजानन्तः। अथर्व० १३।३।१७।।
उत्तिष्ठ ब्रह्मणस्पते देवान् यज्ञेन बोधय। अथर्व १९।६३।१।।

भवति चात्रास्माकम्—

यज्ञात्मकं विश्वमिदं समस्तं
यज्ञो ह विष्णुः कुरुते प्रयत्नात्।
संश्लेष-विश्लेषमयं हि विश्वं
[१]तस्मात् [२]प्रचारार्थमिहैति सर्वम्।।६३१।।

इज्यः—४४६

इज्य इति-'यज्' धातोः ***''व्रजयजोर्भावे क्यप्''*** (पा० ३।३।९८) इति 'क्यप्', ***''वचिस्वपियजादीनां किति''*** (पा० ६।१।१५) इति सम्प्रसारणं यकारस्येकारः, ***''सम्प्रसारणाच्च''*** (पा० ६।१।१०८) इति पूर्वरूपम्। कित्त्वाद गुणाभावोऽदन्तलक्षणष्टाप्, दीर्घः=इज्याशब्दः साधुः। तत इज्यामर्हति ***''दण्डादिभ्यो यत्''*** (पा० ५।१।६६) इति 'यति' प्रत्यये, ***''यस्येति च''*** (पा० ६।४।१४८) इत्याकारलोपः। ***''हलो यमां यमि लोपः''*** (पा० ८।४।६४) इति प्रथमयकारलोपः, एवं 'इज्यः' शब्दः सिध्यति। 'इज्यो' यष्टुमर्हः।

यजनं हि फलपूर्वकं यजमानो यदा कश्चिद् यियक्षते, तदा फलं पूर्वतोऽनुसन्धत्तेऽमुकदेवयजनेनेदं फलं प्राप्नुयामिति। यथा वृष्टिकाम इन्द्रं, धनकामः कुबेरं तथान्यान्यकामा अन्यानन्यान् देवान्। तथा मनुष्योऽप्यधिकगुणः किञ्चित्कामैरन्यैः।

किन्तु यथा सम्यक्सिक्ताः शाखाः पत्राणि वा न फलदानसमर्था, अपि तु वृक्षमूले सिक्त एव फलावाप्तिः, तथा शाखास्थानीया लोकसर्गाङ्गभूतास्तदनुग्रहलब्ध-

---

१. तस्मात्=विष्णोः। २. प्रचारार्थं=व्यवहारार्थम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सामर्थ्यास्तद्व्यवस्थाबद्धा इन्द्रादयोऽपि न स्वतः शक्तिमन्तः, तेषामपि तन्मूलकत्वात्। अतो मूलसेक एव फलावाप्तिः, तस्मात्स एव यष्टुमर्ह 'इज्यो' विष्णुरिति। यतो हि स एव सर्वेषामेको देवो यज्ञमयः।

सर्वा वैदिकी वाक् तमिज्यमेव स्तौति, इज्य एवान्तर्लीना च भवति, यज्ञयोनित्वाद्वेदवाचः।

मन्त्रलिङ्गञ्च—

अर्चत प्रार्चत प्रियमेधासो अर्चत ।
अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत।।अथर्व० २० ।६२ ।५ ।।
उप त्वा नमसा वयं होतर्वैश्वानर स्तुमः। अथर्व० ३ ।१५ ।७ ।।
य आत्मदा बलदा यस्य विश्व उपासते प्रशिषं यस्य देवाः।
यजु० २५ ।१३ ।।
या मर्त्येष्वमृत ऋतावा होता यजिष्ठ इत् कृणोति देवान्।
ऋक्० १ ।७७ ।१ ।।
तां चायित्वामृतं वसानां हृद्भिः प्रजाः प्रति नन्दन्ति सर्वाः।
अथर्व० ६ ।१ ।१ ।।

भवति चात्रास्माकम्—

इज्यः स विष्णुः सकलैषणेन
मन्त्रैः सकामैः किमु वाप्यकामैः ।
नाम्नापि हव्यः स उ एक एव
साम्नाऽथ गीत्या स्तुतिभिश्च सोऽर्हः।।६३२।।

उक्तञ्च हरिवंशेऽपि—

ये यजन्ति मखैः पुण्यैर्देवतादीन् पितॄनपि।
आत्मानमात्मना नित्यं विष्णुमेव यजन्ति ते। ३ ।४० ।२० ।।

महेज्यः—४४७

'इज्या' शब्दष्टाबन्तः पूर्वं व्युत्पादितः। महत आतिदेशिकः शतृवद्भावोऽतः स्त्रियामुगिल्लक्षणो ङीप्। ततो महती इज्या यस्येति बहुव्रीहौ ***'स्त्रियाः पुंवद्भाषितपुंस्का०'*** (पा० ६ ।३ ।६४) इत्यादिना पुवंद्भावः। ततो महतः सांहितिकमात्वम्, आद्गुणः। ***''गोस्त्रियोरुपर्सजनस्य''*** (पा० १ ।२ ।४८) इति ह्रस्वे सिद्धो 'महेज्यः' शब्दः। 'महेज्यो' हि भगवान् विष्णुरुच्यते, यतो हि स

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जगन्निर्माणरूपं, तदन्तः प्रविश्य च यथापेक्षं प्रतिक्षणं परिवर्तनरूपं महान्तं यज्ञं वितनुते, प्रकटयति च सर्वत्र स्वव्याप्तिम्। तथा हि प्रतिशरीरं वर्तमानानि तदन्तराणि सूक्ष्माणि यन्त्राणि यावन्मरणं नियतं कर्म कुर्वाणानि व्यञ्जयन्त्यात्मनो नियामकं परेशम्।

एवञ्च, यष्टव्यासु देवतास्वयमेव महतीमिज्यामर्हतीति 'महेज्य' उच्यते। यच्चोक्तं ***''सर्वदेवमयो हि सः।''*** उक्तञ्चात्रैव ***''ध्यायन् स्तुवन् नमस्यँश्च यजमानस्तमेव चे''***ति। देवयज्ञादयः पञ्चमहायज्ञाः। औपसर्गादयः सप्त पाकयज्ञाः। अग्निहोत्रादय सप्त हविर्यज्ञाः। अग्निष्टोमादयः सप्त सोमसंस्थाः।

मन्त्रलिङ्गञ्च—

यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत्।
ऋक् ४।१।४।।

त्वं देवानामसि यह्व होता स एनान् यक्षीषितो यजीयान्।
यजु० २६।२८।।

मा चिदन्यद्विशंसत सखायो मा रिषण्यत। ऋ० ८।१।१।।

य त्वा देवासो मनवे दधुरिह यजिष्ठं हव्यवाहन। ऋ० १।३६।१०।।

उतापि धेना पुरुहूतमीट्टे। ऋ० १०।१०४।१०।।

भवति चात्रास्माकम्—

विष्णुर्महेज्यः कुरुते ह नित्यं
विश्वं महत् संयजनेन तुल्यम्।
तथा यथा देहमिमं महेज्यो
धात्वाशयैर्यन्त्रमयैर्विधते ।।६३३।।

क्रतुः—४४८

क्रतुरिति—'डुकृञ् करणे' तानादिकः, तस्मात् ***''कृञः कतुः''*** (उणादि १।७६) इत्यौणादिकः कतुः' प्रत्ययः, कित्वाद्गुणाभावः। ***''इको यणचि''*** (पाव ६।१।७७) इति यणादेशः=क्रतुः। क्रियत इति 'क्रतुर्यज्ञापरनामकं कर्मनाम। अथवा-क्रियते येन ज्ञानेनेति ज्ञाननाम। ज्ञानपूर्वकं हि कर्म, ज्ञानरूपश्च भगवान् विष्णुः कर्माध्यक्षश्चेति विष्णुरेव 'क्रतुः'।

क्रतुर्हि भगवतो जगदिदं, जगदन्तरश्च विष्णुरपि क्रतुः, घटानुस्यूता मृद्घटो, घटश्चापि मृदितिवत्। क्रतवो देवयज्ञादयः परिगणिताः ते लौकिका क्रतवोऽपि

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भगवतो विष्णोरनुकरणमात्रमिति, तस्यैव महामहिम्नो गुणानुविधायिनः। नित्यं स्वकर्मकारित्वाद्विष्णुः क्रतुः।

मन्त्रलिङ्गञ्च—

त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ।

अथर्व० २० ।१०८ ।२ ।।

त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा।
त्वं भद्रो असि क्रतुः।। ऋ० १ ।९१ ।५ ।।
साह्वान् विश्वा अभियुजः क्रतुर्देवानाममृक्तः। ऋ० ३ ।११ ।६ ।।
वीरेण्यः क्रतुरिन्द्रः सुशस्तिरुतापि धेना पुरुहूतमीट्टे।

ऋ० १० ।१०४ ।१० ।।

भवति चात्रास्माकम्—

करोति नित्यं सवनं जनानां
करोति नित्यं मरणं जनानाम्[1] *।*
नित्यक्रियं विश्वमिदं समस्तं
सर्गान्तमन्वेष्यति विष्णुगर्भम्[2] *।।६३४।।*

सत्त्रम्—४४६

षदॣ विशरणगत्यवसादनेषु भौवादिको धातुः। षकारस्य सकारः। ततो ***''गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः''*** (उणादि ४ ।१६७) इति 'त्र प्रत्यय औणादिकः, अनिट्। ***''खरि च''*** (पा० ८ ।४ ।५५) इति चर्त्वं, दस्य तः=सत्त्रम्। सत्रयतेर्वा विस्तारार्थकात्पचाद्यचि, लिङ्गन्तु नैकान्तिकम्, लिङ्गमशिष्यमिति भाष्यवचनात्। एवञ्च सीदति गच्छति सर्वत्र, यद्वा-सत्रयते विस्तारयति विश्वमिति 'सत्त्रम्'। वैष्णवगुणानुस्यूतत्वादत एव तद्गुणानुविधायित्वाद्विश्वमपि 'सत्रम्'। यतो हि न हि सत्रात्मके वैष्णवे विश्वे गतिमन्तरा किञ्चिदस्ति। गतिगुणस्य भगवतः सर्वत्र व्याप्तत्वात्।

लोकेऽपि दृश्यते हृदयं सत्त्रं सदा गतिं कुर्वन्नेव सत्त्रं विष्णुमन्ता राध्नोति, स्थिरञ्च सिराभिः सर्वतो बद्धत्वात्। जलस्रवोऽपि 'सत्रं' महास्रोतसाम्। एवं लोकदर्शं कल्पनीयं तत्त्वविद्भिः।

१. जन्मिनाम्=चतुर्विधयोनिसम्भूतानाम्। २. विष्णुगर्भं=विश्वमिति शेषः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

येन ऋषयस्तपसा सत्रमायन् इन्धाना अग्निं स्वराभरन्तः।

यजु० १५।४६।।

सत्रस्य ऋद्धिरस्यगन्म ज्योतिषा ज्योतिरमृता अभूम।

यजु० ८।५२।।

अवासृजो निवृताः सर्तवा अपः सत्रा विश्वं दधिषे केवलं सहः।

अथर्व० २०।१५।६।।

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत्।

यजु० ४०।४।।

ईशा वास्यमिदं सर्वं यत्किञ्चित् [1]जगत्याञ्जगत्[2]। यजु० ४०।१।।

भवति चात्रास्माकम्—

सत्त्रं स विष्णुः कुरुते हि सर्वं
गत्यानुविद्धं प्रपदं स्थिरं तत्।
सिरानुविद्धं हृदयं स्थिरं सत्
सत्त्रायते जीवयितुञ्च जन्तुम्।।६३५।।

सतांगतिः—४५०

अस्तीति 'सत्' अस्तेश्शतरि षष्ठी विभक्तिः। 'गम्लृ गतौ' भौवादिको धातुः, तस्मात्स्त्रियां कर्मणि क्तिन् अनिट्। ***'अनुदात्तोपदेश०'*** (पा० ६।४।३७) इत्यादि सूत्रेणानुनासिकलोपः। सतां सृष्टिदशायां वर्तमानानां पञ्चभूतादीनां प्रकृतिकार्याणां गतिराश्रयः। सर्वदा तदाश्रितत्वात्प्रकृतेः। षष्ठीसमासोऽत्र, षष्ठ्याश्चालुक् विनाप्याक्रोशं, न हि भगवत्याक्रोशावसरः। आक्रोशो निन्दावचनम्।

सर्वं हि स्थावरजङ्गमात्मकं जगज्जन्ममृत्युभ्यामावर्तनशीलम्। यो जायते स म्रियते, सार्वकालिकमेतद् भ्रमणं जन्ममृत्योः सर्वस्य। भ्रमणं गतिरावर्तनाख्या। यथा सूर्यादयो ग्रहा उदयास्ताभ्यां सदा गतिशीलाः तथैव जीवोऽपि जन्ममृत्युचक्रे निरन्तरं भ्राम्यति। किं बहुना—गत्यनुविद्धाः सर्वे, गतिश्च भगवानेव सर्वेषामत उक्तं सतांगतिर्विष्णुः।

---

१. जगत्याम्=गच्छन्त्याम्। २. जगत्=गतिमत्-इति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्ग्च—

अयमग्निः सत्पतिर्वृद्धवृष्णो रथीव पत्तीनजयत् पुरोहितः।

अथर्व० ७।६२।१।।

आ वाचो मध्यमरुहद् भुरण्युरयमग्निः सत्पतिश्चेकितानः।

यजु० १५।५१।।

रातिं सत्पतिं महे सवितारमुपह्वये।
आसवं देववीतये। यजु० २२।१३।।
त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा।
त्वं भद्रो असिक्रतुः।। ऋ० १।६१।५।।
उच्छिष्टे द्यावापृथिवी विश्वं भूतं समाहितम्। अथर्व० ११।७।२।।
चित्राणि साकं दिवि रोचनानि सरीसृपाणि भुवने जवानि।

अथर्व० १६।७।१।।

भवति चात्रास्माकम्—

यदस्ति लोके तदिहास्ति गच्छद्
गतेर्विना तस्य च नास्ति सत्ता।
सतांगतिर्विष्णुरिदं विरच्य
सम्भ्रामयन् मोहयतीह विश्वम् ।।६३६।।

सर्वदर्शी—४५१

सर्वं द्रष्टुं शीलमस्येति, सर्वशब्दो व्युत्पादितचरः। 'दृशिर् प्रेक्षणे' भौवादिको धातुः तस्मात् ***''सुप्यजातौ णिनिस्ताच्छील्ये''*** (पा० ३।२।७८) इत्यनेन 'णिनिः' प्रत्ययः गुणो रपरः। तत इन्नन्तलक्षणो दीर्घः। ज्ञानचक्षुर्भगवान् विष्णुः, सर्वदा सर्वं विचष्टे स्वाभाव्यात्, अत एव स 'सर्वदर्शी'त्युच्यते।

दृश्यते च लोके—अयं जीवः स्वकृताकृतं ज्ञानेन वा नेत्रेण वा सहजस्वभावतः पश्यति।

मन्त्रलिङ्गञ्च—

विश्व सं पश्यन्त्सुविदत्रो यजत्र इदं शृणोतु यदहं ब्रवीमि।

अथर्व० १३।२।४४।।

समाकृणोषि जीवसे वि वो मदे विश्वासम्पश्यन् भुवना विवक्षसे।

ऋ० १०।२५।६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सहस्त्रशीर्षा पुरुषः सहस्त्राक्षः सहस्त्रपात्। यजु० ३१।१।।
विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात्।
ऋ० १०।८१।३।।
बृहन्नेषामधिष्ठाता अन्तिकादिव पश्यति। अथर्व० ४।१६।१।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्।
यजु० ३३।४३।।

भवति चात्रास्माकम्—

स सर्वदर्शी भगवान् वरेण्यः
पश्यञ्जगज्ज्ञानदृशा बिभर्ति।
सूर्यो यथा विश्वमिदं विचष्टे
तथैव देही निजकर्मचक्रम् ।।६३७।।

विमुक्तात्मा—४५२

'वि' उपसर्गो, मोचनार्थको 'मुच्लृ' धातुस्तौदादिकः। तस्मादविवक्षितकर्मकाद् ''गत्यर्थाकर्मक०'' (पा० ३।४।७२) इत्यादिना कर्तरि 'क्तः' प्रत्ययः, अनिट्। ***''चोः कुः''*** (पा० ८।२।३०) इति कुत्वं 'कः'=विमुक्तः। 'आत्मा' शब्दो व्युत्पादितचरः, स्वरूपपर्यायोऽयमात्मा शब्दः।

एवञ्च विशेषैः प्राकृतैर्गुणैर्नामरूपादिभिर्मुक्त आत्मा स्वरूपं यस्येति 'विमुक्तात्मा' विष्णुः। प्रकृतिद्वारा जगतः कर्ताप्ययं प्रकृतिस्वरूपभूतैर्गुणैस्तथा तद्धर्मभूतैर्नामरूपादिभिश्च न निबद्ध्यते, सर्वदाकाशवन्निर्लेपरूपत्वादत एव विमुक्तात्मा विष्णुः। यथा—कुम्भान् कुर्वाणोऽपि कुम्भकारो न तन्नामरूपादिषु समन्वेति। किन्तु निमित्तकारणत्वात्पृथगेव तिष्ठतीति।

मन्त्रलिङ्गञ्च—

तयोरन्यः पिप्पलं स्वाद्वत्ति, अनश्नन्नन्यो अभिचाकशीति।
ऋक्० १।१६४।२०।।
युज्यमानो वैश्वदेवो युक्तः प्रजापतिर्विमुक्तः सर्वम्। अथर्व० ६।७।२४।।
अकामो धीरो अमृतः स्वयम्भू रसेन तृप्तो न कुतश्चनोनः।
अथर्व० १०।८।४४।।
स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्। यजु० ४०।८।।
स भूमि ँ सर्वत स्पृत्वात्यतिष्ठद्दशांगुलम्। यजु० ३१।१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

गीतो विमुक्तात्मपदेन विष्णु-
रन्तर्बहिश्चास्ति स वर्तमानः ।
तथा यथा भूतविकारदेहा-
दात्मा विमुक्तो निजलिङ्गभेदात्[१] *।।६३८।।*

भास्करोक्तं बीजगणितसूत्रञ्च—***"योगोऽन्तरं तेषु समानजात्योः। विभिन्नजात्योस्तु पृथक् स्थितिः स्यात्"*** पृथग्जात्योस्तु न कश्चित्सम्बन्धः सम्भवति। नायं देहाभिमान्यात्मा पाञ्चभौतिकः, पाञ्चभौतिकञ्चेदं शरीरमिति। भिन्नजातीयत्वात्कथमेतयोः सम्बन्धः स्यात् ? अतः पृथक्सत्तावत्त्वमेव विमुक्तात्मत्वम्।

केषाञ्चिन्मते 'निवृत्तात्मा' इत्यपि विष्णोर्नाम। तत्र 'निपूर्वो वृतु वर्तने' भौवादिको धातुः। ***"गत्यर्थाकर्मक"*** (पा० ३।४।७८) इत्यादिना कर्तरि 'क्तः', ***"यस्य विभाषा"*** (पा० ७।२।१५) इति नेट्। निवृत्तः पृथग्भूतः प्रकृतिविकारेभ्य आत्मा स्वरूपमस्येत्यर्थस्तु समान एव विमुक्तात्मनः।

सर्वज्ञः—४५३

सर्वज्ञ इति—'ज्ञा अवबोधने' क्रैयादिको धातुः, तस्मा'त्सर्वोपपदाद्' ***"आतोऽनुपसर्गे कः"*** (पा० ३।२।३) सूत्रेण 'कः' प्रत्ययः। ***"आतो लोप इटि च"*** (पा० ६।४।६४) इत्यालोपः। 'सर्वज्ञः' सर्वं जानातीति। यो हि यस्य कर्ता भवति, स तद्विषयकं सर्वं जानाति। कार्यज्ञानमन्तरा न हि कर्तुं शक्यते कार्यम्।

यथा यन्त्राणामाविष्कर्ता तथा प्रयोक्ता च यन्त्रविषयकं सर्वं निर्माणविधिं प्रयोगविधिञ्च जानाति। यथा वा पीडार्तः स्वाङ्गे क्व कीदृशी चेति सर्वं पीडाविषयकं वेत्ति, तथैव विष्णुरपि विश्वस्य विश्वं गतिविधिं वेत्ति व्यवस्थाञ्च, इत्यतः 'सर्वज्ञः'।

मन्त्रलिङ्गञ्च—

त्वमिन्द्रासि विश्वजित् सर्ववित् पुरुहूतस्त्वमिन्द्र। अथर्व० १७।१।११।।

---

१. यत्तूक्तं निजलिङ्गभेदादिति—प्रत्येकं वस्तु वस्त्वन्तरात् स्वलक्षणविशेषेण जातिगुणादिना भिद्यते। यथा घटपटाविति, न तयोर्योगः सम्भवति। ययोस्तु समाना जातिस्तयोस्तु सम्भवेदेव सम्बन्धो, यथा परस्परं द्वयोः कम्बलयोरिति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।

यजु० ३२।१०।।

यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा।

ऋक्० १०।८२।३।।

यस्तिष्ठति चरति यश्च वञ्चति यो निलायं चरति यः प्रतङ्कम्।
द्वौ संन्निषद्य यन्मन्त्रयेते राजा तद् वेद वरुणस्तृतीयः।।

अथर्व० ४।१६।२।।

भवति चात्रास्माकम्—

स एव सर्वज्ञपदेन गीतो
विष्णुः पुराणो भुवने शयानः।
यस्मिन् हि यत्तस्य स वेत्ति तत्त्वं
विश्वं हि तस्मिन् स्थितिमेति यस्मात्।।६३६।।

तथा च वेदे—

तस्मिन्ह तस्थुर्भुवनानि विश्वा। यजु० ३१।१९।।

ज्ञानमुत्तमम्—४५४

'ज्ञा अवबोधने' क्रैयादिको धातुः, तस्मात्करणे नपुंसके भावे वा **'ल्युट् च'** (पा० ३।३।११५) सूत्रेण 'ल्युट्' अनादेशे च 'ज्ञान'मिति। एवञ्च ज्ञायतेऽनेनेति ज्ञप्तिर्वा 'ज्ञानम्'। उत्कृष्टवाची उच्छब्दस्तस्मादतिशायने तमप्प्रत्ययः,चर्त्वं दस्य तः। सविशेषणकं नामैतज्ज्ञानमुत्तममिति।

एवञ्च ज्ञानसाधनं ज्ञानफलञ्च ब्रह्मैवामोघज्ञानं सर्वज्ञानातिशायि। यतो हि सर्वत्र विभक्तेषु भूतेष्वनुस्यूतं तद्भागवतं ज्ञानं साधनतां प्रतिपद्यते, ज्ञेयं च ज्ञानरूपं ब्रह्मैवातः फलमपि तदेव। प्राणिज्ञानं हि सर्वत्र जगद्वैचित्र्येण ह्रियते, न तथा भगवज्ज्ञानमिति सर्वत 'उत्तमज्ञानं' ब्रह्मज्ञानमुत्तममुच्यते।

अत एवोक्तं वेदे—

सूत्रं सूत्रस्य यो वेद, स वेद ब्राह्मणं महत्। अथर्व० १०।८।३७।।

दृश्यते च लोके—जीवसद्भाविनि शरीरे ज्ञानोत्पादकानि शरीरयन्त्राणि ज्ञानमुत्पादयन्ति, निर्गते च जीवे न ज्ञानोत्पादः। अतो ज्ञानानां किं ज्ञानमुत्तममिति प्रश्ने वक्तुं युज्यत 'आत्मज्ञान' मिति। अथ च लोकज्ञानापेक्षया ब्रह्मज्ञानमेवोत्तममिति तदेव ज्ञेयम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।

यजु० ३१।१८।।

इदं प्रापमुत्तमं काण्डमस्य यस्माल्लोकात् परमेष्ठी समाप।

अथर्व० १२।३।४५।।

यथेमां वाचं कल्याणीमावदानि जनेभ्यः। यजु० २६।२।।

यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते।

ऋक्० १।१६४।३९।।

यस्मात् कोशात् उद्भराम वेदं तस्मिन्नन्तरव दध्म एनम्।

अथर्व० १९।७२।१।।

भवति चात्रास्माकम्—

ज्ञेयं क्षितावस्ति जनेन किन्तत् ?
तस्यैव गूढस्य विशुद्धरूपम् ।
ज्ञानोत्तमे ब्रह्मणि सत्यबोधे
सत्यस्वरूपे निखिलं हि यस्मात्।।६४०।।

❖ ❖ ❖

सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत्।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ।।६२।।

४५५ सुव्रतः, ४५६ सुमुखः, ४५७ सूक्ष्मः, ४५८ सुघोषः, ४५९ सुखदः, ४६० सुहृत्। ४६१ मनोहरः, ४६२ जितक्रोधः, ४६३ वीरबाहुः, ४६४ विदारणः ।।६२।।

सुव्रतः—४५५

'सु' शोभनार्थक उपसर्गः। 'व्रतिः' सौत्रो धातुः, ततः, ***'अज्विधौ भयादीनामुपसंख्यानम्, नपुंसकेत्यादिनिवृत्त्यर्थम्'*** (पा० सू ३।३।५६) इति वार्तिकेन भावेऽ'च्'। शोभनं व्रतं नियमोऽस्यास्ति 'सुव्रतो' विष्णुः।

तथा हि—तस्य सुव्रतत्वेनानुस्यूतत्वं लोके प्रतिवस्तु दृश्यते। यथा आब्रह्मकीटान्तमामहावृक्षकंतृणान्तं, तथा नक्षत्रग्रहोपेतं सौरमण्डलं सर्वं सुव्यवस्थाबद्धं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सदस्ति कश्चिदस्य विश्वस्य व्यवस्थापको नियन्ता 'सुव्रतः' इत्याख्याति। व्यवस्था चैषा प्रतिपदं लोके दृश्यते।

मन्त्रलिङ्गञ्च–

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। यजु० १३।३३।।

त्वं राजेव सुव्रतो गिरः सोमा विवेशिथ। ऋ० ६।२०।५।।

महीमूषु मातरं सुव्रतानामृतस्य पत्नीमवसे हवामहे।

अथर्व० ७।६।२।।

अग्ने! व्रतपते व्रतमचारिषम्। यजु० २।२८।।

त्वं नो गोपाः पथिकृद्विचक्षणस्तव व्रताय मतिभिर्जरामहे।

ऋक्० २।२३।६।।

भवति चात्रास्माकम्–

स सुव्रतो विष्णुरमोघबोधो
विश्वं नियच्छन् कुरुते व्रते तत्।
व्रती ह सूर्यो वशयंश्च विश्वं
सु-सुव्रतं विश्वमतोऽस्ति सर्वम् ।।६४१।।

सुमुखः–४५६

'खनु अवदारणे' भौवादिको धातुः, तस्माद् ***"डित् खनेर्मुट् चोदात्तः"*** (उणा० ५।२०) इत्यनेना'च्' अल् वा डित्-मुट् चोदात्तः, डित्त्वाट्टिलोपः, एवं 'मुख'शब्दः सिध्यति। सु शोभनं खननं यस्येति 'सुमुखः' शोभनं मनोहरं खननमवदारणं यः करोति स 'सुमुखो' विष्णुः।

यथा सजीवानां प्राणिनामोष्ठद्वयमध्यं विदीर्णं, तथा तन्मध्ये सौषिर्यञ्च भवति भोजनमादातुं वक्तुं वा। एतदनुकरणमात्रं प्राकृतस्य समुद्रस्य। तथा हि–समुद्रः पृथिव्या मुखं, वाडवाग्निश्चातन्द्रितस्तत्र शेते। एतच्च महाखातमयं मुखं सर्वं स्वान्तः समावेशयति। केनेदं खातमिति प्रश्ने, भगवता विश्वस्य कर्त्रा विष्णुनेत्युत्तरमायाति। अतः स 'सुमुखः' उच्यते शोभनखानकः।

पूर्वोक्तस्य भावार्थज्ञानाय स्पष्टीकरणम्–यथा समुद्रात्मके खाते जलादिबहु-वस्तुसद्भावस्तथा मुखेऽपि। तथा हि–मुखे मांसगर्तपिनद्धमूला दन्ता ग्रसिष्णुर्जिह्वा च। एवं प्राणिमात्रस्य मुखं, तदीयं वैविध्यञ्च दृष्ट्वा ज्ञायते यत् प्राणिमुखं समुद्रात्मकं पृथिव्या मुखञ्चोभे समाने। तद्यथा समुद्रे जलस्रोतांसि, मुखे च,

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रसवाहिन्यः सूक्ष्मांकुरितसिरायन्त्रधमन्यश्च। समुद्रे यथा पर्वतास्तथा मुखे दन्ताः। समुद्रे यथा वीचयस्तथा मुखे राजिमयं काकुदमिति निदर्शनमात्रमुक्तं पथप्रदर्शनाय।

मन्त्रलिङ्गञ्च—

अग्निं यश्चक्र आस्यं तस्मै ज्येष्ठाय ब्रह्मणे नमः।

अथर्व० १० ।७ ।३३ ।।

त्वं हि विश्वतोमुख विश्वतः परिभूरसि।

द्विजो नो विश्वतोमुखाति नावेव पारय। ऋक्० १ ।६७ ।६, ७ ।।

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।

यजु० १७ ।१६ ।।

यस्य ब्रह्म मुखमाहुर्जिह्वां मधुकशामुत।

सामानि यस्य लोमान्यथर्वाङ्गिरसो मुखम्। अथर्व० १० ।७ ।१६, २० ।।

भवति चात्रास्माकम्—

विज्ञा विधिज्ञाः सुमुखं तमाहुः
समुद्रखातं बहुशश्च दृष्ट्वा ।
तस्यानुयानं मुखमस्ति जन्तो-
र्मुखैस्तु तैर्ज्ञाप्यवरः स एकः।।६४२।।

यथा समुद्रात्मके खाते सदा जलं, तथा मुखेऽपि जलदैवतका जिह्वा सदा विराजते। इत्युभयोः साम्यमिति।

सूक्ष्मः—४५७

'सूच पैशुन्ये' कथाद्यन्तर्गतश्चुरादिः, ततो णिच्, अतो लोपे 'सूचिः'। ततः ***''सूचेः स्मन्''*** (उणादि ४ ।१७७) इत्युणादिः 'स्मन्' प्रत्ययः सादिः, ***''तितुत्रतथसिसुसरकसेषु च''*** (पा० ७ ।२ ।६) इति नेट्। णेर्लोपः ***''चो कुः''*** (पा० ८ ।२ ।३०) इति चकारस्य कुत्वम्, ***''आदेशप्रत्यययोः''*** (पा० ८ ।३ ।५६) सूत्रेण सस्य षत्वम्=सूक्ष्मं। सूचयति ज्ञापयति आत्मानमिति 'सूक्ष्मः'। तथा हि सूक्ष्मा बुद्धिः, सूक्ष्मं, मनः, सूक्ष्माणीन्द्रियाणीति, ज्ञानसाधनैः सर्वैरेभिः सूक्ष्मैः सूक्ष्मरूपेण सर्वत्रानुगतं सूक्ष्मं स्वं सूचयतीति 'सूक्ष्मो' विष्णुः।

विश्वस्य सर्वं वस्तुजातं प्रतीन्द्रियबोधे किञ्चित्सूचयन्निव तं सूक्ष्ममाख्याति। तथा च वेदे—

देवस्य पश्य काव्यं न ममार न जीर्यति। अथर्व० १० ।८ ।३२ ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'तद्विष्णोः परमं पदम्०' (यजु० ६।५) इत्यादि अव्यक्तस्य तस्याकाशात्मको महाभूतमव्यक्तं तत्र चाव्यक्त एव शब्दः श्रोत्रेन्द्रियग्राह्यः **''दिशः श्रोत्रात्तथा लोकाँ अकल्पयत्''** (यजु० ३१।१३) इति मन्त्रलिङ्गात्।

शब्दोऽपि द्विविधः-आहतोऽनाहतश्च। तत्रानाहतः प्राकृतः शब्दः स्वकर्तुः सूक्ष्मत्वं व्यनक्ति। यथा लोके शब्दः शब्दकारिणं ख्यापयति, गोशब्दो गाम्, मनुष्यशब्दो मनुष्यमित्यादि। दूरस्थश्चक्षुर्विषयतामतीतोऽपि शब्देन व्यज्यते। एवं सूक्ष्मत्वगुणेन सर्वत्रानुगतः 'सूक्ष्मो' विष्णुः।

मन्त्रलिङ्गञ्च—

वालादेकमणीयस्कमुतैकं नैव दृश्यते।
ततः परिष्वजीयसी देवता सा मम प्रिया।। अथर्व० १०।८।२५।।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः। यजु० ४०।५।।
स ओतः प्रोतश्च विभूः प्रजासु। यजु० ३२।८।।
नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत्। यजु० ३२।२।।
वेदाहं सूत्रं विततं यस्मिन्नोताः प्रजा इमाः। अथर्व० १०।८।३६।।

भवन्ति चात्रास्माकम्—

स सूक्ष्मनामा भगवान् वरेण्यो
विष्णुः स्वयं सूचयते प्रसह्य।
जनाय बोधं[1] निजमात्मरूप-
मनन्तगात्रेषु विराजमानम्।।६४३।।

एवं हि यो ना प्रपदे वशिष्ठं
गुहाशयं पश्यति वीतशोकः।
स स्थूलभूतोऽपि शरीरयोगात्
सूक्ष्मायते सूक्ष्मविचारमग्नः[2]।।६४४।।

विद्यामयोऽसौ न तिरोदधाति
रूपं निजं विश्वमयं हि तस्य।
विश्वं हि यो वेद स वेद विष्णुं
[3]तदेव सूत्रस्य च सूत्रमुक्तम्।।६४५।।

१. बोधं—बोधस्वरूपम्। २. सूक्ष्मविचारमग्नः=किं सूचयतीति कृतावधानः। ३. तत्=ब्रह्म।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुघोषः—४५८

'घुषिर् विशब्दने' चौरादिकः; **''घुषिरविशब्दने''** (पा० ७।२।२३) इति निष्ठायामिण्निषेधाल्लिङ्गादनित्यणिजन्तोऽयम्। ततो घञ् प्रत्यये लघूपधगुणे च 'घोषः'। णिजन्ताद् **''एरच्''** (पा० ३।३।५६) इति भावेऽ'च्'प्रत्यये तु 'णेर्लोपे' उपधाया गुणो 'घोषः' इति। सुपूर्वो बहुव्रीहिः 'सुघोषः' पौनःपुन्येनोच्चार्यमाणः शब्दो 'घोषः' सबलमुच्चार्यमाणो वा। शोभनो घोषो यस्य स 'सुघोषः'।

अथवा-शोभनं घुष्यते शब्द्यते सः 'सुघोषः'। यतो हि सर्वत्र वेदे स एव तात्पर्यविषयत्वेनोपतिष्ठते। अथवा-शोभनं यथा स्यात्तथा घोष्यतेऽनेनेति करणे 'घञ्'। एवञ्च महाबलवता प्लुतस्वरेणोच्चार्यमाणेन 'ओ३म्' नाम्ना स प्रतिपदं घोष्यते। स्वपरमार्थभूतत्वादिति 'सुघोष' शब्दो ब्रह्मणि सङ्गतार्थः।

स एष 'सुघोषः' शब्दतोऽर्थतश्च सर्वत्र लोके प्रसृतः। तथा हि-वर्षागमे मेघः स्तनयति, स्तनयन्तञ्च तं वीक्ष्य वृष्टेरित्थम्भावं विदन्ति वर्षाविज्ञाननिपुणाः सुघोषस्य तत्र सत्त्वात्। अमुथैव स्रवतो जलस्य घोषो विज्ञापयति स्वगतेरप्रतिबद्धतां, विकृतश्चावरुद्धतामिति। एवं महायन्त्रघोषो महायन्त्रस्य ज्ञापकः। एतेन ज्ञायते-महाबलो भगवान् 'सुघोषः' स्वरूपेण सर्वत्र व्याप्त इति 'सुघोष'नाम्ना स्तुतिमुपगच्छति।

मन्त्रलिङ्गञ्च—

अपूर्वेणेषिता वाचस्ता वदन्ति यथायथम्।
वदन्तीर्यत्र गच्छन्ति तदाहुर्ब्राह्मणं महत्।। अथर्व० १०।८।३३।।
संरभ्या धीराः स्वसृभिरनर्तिषुराघोषयन्तः पृथिवीमुपब्दिभिः।
ऋक्० १०।६४।४।।
विश्वे देवासो अध मामरक्षन् दु शासुरागादिति घोष आसीत्।
ऋक्० १०।३३।१।
प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम्। यजु० ३४।५७।।
एतद् वचो जरितर्मापि मृष्ठा आ यत्ते घोषानुत्तरा युगाति।
ऋक्० ३।३३।८।।
इमामाघोषन्नवसा सहूतिं तिरो विश्वां अर्चतो याह्यर्वाङ्।
ऋक्० १०।८६।१६।।
नरो यत्र दुहते काम्यं मध्वाघोषयन्तो अभितो मिथस्तुरः।
ऋक्० १०।७६।६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश।

ऋक्० ४।५८।३।।

भवन्ति चात्रास्माकम्—

सुघोषनाम्ना भगवान् मनोज्ञो
घोषं व्यवस्थापयतीह विश्वे।
सद्घोषमात्रे विमलं स्वरूपं
निजं व्यनक्त्येव सुघोषरूपम् ।।६४६।।

एवं हि यो गायति तस्य घोषं
शब्दः स्वयं गायकमाप्तुकामः।
तस्यैव रूपं विविधं व्यनक्ति
तथा यथा चित्रकृतं[1] तु रेखाः ।।६४७।।

घोषो हि कण्ठज्यः, स तु घोषभेदात्
षड्जादिकानात्मनि सन्दधाति।
तानान् बहून् मूर्च्छनया विभक्तान्
तमेव तत् सर्वमिदं व्यनक्ति ।।६४८।।

सुखदः—४५६

'सुख'रूपे कर्मण्युपपदे 'ददातेः' ***''आतोऽनुपसर्गे कः''*** (पा० ३।२।३) 'सूत्रेण कर्तरि 'कः' प्रत्ययः, आल्लोपः। सुखं ददातीति 'सुखदः'। 'सुख'मिति-'सु'पूर्वः 'खनु अवदारणे' धातुर्भौवादिकः, तस्माद् ***''अन्येभ्योऽपि दृश्यते''*** (पा० ३।२।१०१) इति सूत्रबलतो 'डः' प्रत्ययः, टिलोपश्च। सुखयतीति 'सुखं' ब्रह्म। सुखं सुखातं तद्ददातीति 'सुखदो' विष्णुः। एवञ्च सम्यक् खनित्वा कृतं सुखातं, तदेव सुखम्।

यथा लोके आमुखादागुदान्तं खातमिदं शरीरम्। तत्र यदि पृच्छ्येत -क एतस्य महास्रोतसो ''महाबिलस्य'' खानकस्तदेदमेव प्रत्युत्तरं स्यात्, स 'सुखदो' विष्णुः। स हि शरीरे मांसमयं सिराजालं, तथास्थीनि चान्तःखातानि कुरुते। सुव्यवस्थितखातञ्चेदं शरीरं जीवेभ्यो ददातीति 'सुखद' उक्तो भवति।

---

१. चित्रं करोतीति चित्रकृत्, तं चित्रकृतम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एवं प्रतिप्राणिशरीरं सुखातशरीरस्य प्रदातारं भगवन्तं व्यनक्ति। तथा 'सुखद'रूपेण सर्वत्र व्याप्तो भगवानपि स्वस्वरूपव्यञ्जकः। अमुथैव सनक्षत्रं ग्रहमण्डलमन्तरिक्षे व्यवस्थाप्य, तद्भ्रमणाय राशिसंज्ञं सुव्यवस्थितं खातं ददाति इति 'सुखद' उच्यते। यद्वा-खम् आकाशः शोभनं खं सुखं तस्मै सुखायात्मबोध शक्तिं वा ददातीति 'सुखदः'।

दृश्यते हि लोके-यदा सन्निपातादिरोगेषु, विकृतैर्दोषैरन्तःशरीरं सिरास्थ्यादीनां स्रोतांस्यापूर्यन्ते=अवरुध्यन्ते, तदा तत्र सुखस्याभावात्, क्लेशरूपं केवलं शरीरं जीवात्मा जहाति। यतो हि न हि तत्र शोभनं खमवतिष्ठते अपितु दुष्टं खं दुःखरूपं तिष्ठति। तद्दृष्ट्वा च शेषास्तत्र स्थिता जनाः शोचन्ति रुदन्ति मुहुर्महुर्व्याकुलात्मानो भवन्ति। एवं विबुधैर्विचित्रचित्रितां रचनां दृष्ट्वा, बहुधोदाहरणकल्पनाः कर्तव्याः।

मन्त्रलिङ्गञ्च—

आजा न इन्द्र मनसा पुरुष्टुत त्वायद्भ्यो मघवञ्छर्म यच्छ नः। ऋक्० १।१०२।३।।

भद्रं हि शर्म त्रिवरूथमस्ति ते। ऋक्० १०।१४२।१।

शुनमस्मभ्यमूतये वरुणो मित्रो अर्यमा। ऋक्० १०।१२६।७।।

शन्नो मित्रः, शं वरुणः शन्नो भवत्वर्यमा।

शन्न इन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः।। यजु० ३६।६।।

शन्नो भवतु भुवनस्य यस्पतिः। यजु० ३६।२।।

इन्द्रो मे शर्म यच्छतु ब्रह्मा मे शर्म यच्छतु। अथर्व० १६।६।१२।।

भवन्ति चात्रास्माकम्—

स एव लोके सुखदः पुराणो
लोकान्वितं खातमयं शरीरम्।
जीवाय नित्यं प्रददाति सर्गाद्
न मोहमाप्नोति सुखं ददानः।।६४६।।

निर्दोषमेवं किमु वस्तु युक्तं
खं यस्य लोके स सुखी मनुष्यः।
तस्मै ददात्यात्मपदं सुगुप्तं
गीतस्तु तज्ज्ञैः सुखदः स विष्णुः।।६५०।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुखं विना क्लेशपदं हि यत्तत्
स्वयं निगृह्णन् कुरुते स्वकस्थम्।
यस्तं स्वसव्ये कुरुते सदास्थं
स एव मर्त्यः सुखदेन गोप्यः[1] ।।६५१।।

सुहृत्–४६०

'हञ् हरणे' भौवादिकधातोः ''**वृहोष्षुक्दुकौ च**'' (उणादि० ४।१०१) 'कयन्' प्रत्ययो 'दुगागम'श्चौणादिकः। कित्त्वान्न गुणः, एवं 'हृदय'शब्दः सिद्धः। शोभनं हृदयं यस्येति बहुव्रीहिसमासे ''**सुहृद्दुर्हृदौ मित्रामित्रयोः**'' (पा० ५।४।१५०) सूत्रेण हृदयशब्दस्य हृद्भावो निपात्यते 'सुहृद्' इति।

एवञ्च शोभनं कामलोभमोहादिप्राकृतदोषैरनाविद्धं हृदयं सङ्कल्पात्मकं मनो यस्य स 'सुहृत्'। न हि भगवति कामादिदोषाणामस्तित्वमाप्तकामो हि सः। अत एव प्रत्युपकारानपेक्ष-परोपकार-कर्तृमित्रमिव स भवति जीवजातस्य। सुहृत्त्वादेव बृहस्पतिर्जीवैः प्रार्थ्यते, '**यन्मे च्छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पति में तद्दधातु। शन्नो भवतु भुवनस्य यस्पतिः।।**'' (यजु० ३६।२)। सच्चक्षुर्हृदयमनोवद्धि मित्रम्। तस्मान्मित्रत्वाय चक्षुर्हृदयमनोविषयकं निर्दोषत्वं प्रार्थितम्।

एवं स शोभनहृदयो विष्णुः स्वसुहृत्त्वगुणेन विश्वं व्याप्य सकलं व्यवस्थाबद्धं यथागुणं यथास्वभावं यथापरिच्छदञ्च विदधदायाति, यास्यति चेयं तस्य व्यवस्था सर्गान्तम्। अतोऽशेषसुहृद् विष्णुः 'सुहृत्' इति नाम्नोक्तो भवति।

मन्त्रलिङ्गञ्च–

शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा। ऋक्० १।९०।६।।
न यं शुक्रो न दुराशीर्न तृपा उरुव्यचसम्।
अपस्पृण्वते सुहार्दम्।।' ऋक्० ८।२।५।।
सा प्रथमा संस्कृतिर्विश्ववारा स प्रथमो वरुणो मित्रो अग्निः।
यजु० ७।१४।।
प्र प्र वयममृतं जातवेदसं प्रियं मित्रं न शंसिषम्। यजु० २७।४२।।
मित्रं हुवे पूतदक्षं वरुणञ्च रिशादसम्। यजु० ३३।५७।।

---
१. गोप्यः=रक्षणीयः। गुपू रक्षणे धातुः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्वमग्ने प्रथमो अङ्गिरा ऋषिर्देवो देवानामभवः शिवः सखा।
यजु० ३४।१२।।

भवति चात्रास्माकम्—

सुहृत् स विष्णुः सकलं वसानो
मित्रस्य दृष्ट्या परिपाति विश्वम्।
तं मित्रभूतं सुहृदं पुराणं
ध्यायन्ति नित्यं गतवैरदोषाः ।।६५२।।

मनोहरः—४६१

'मन ज्ञाने' दैवादिको धातुः, तस्मात् ***''सर्वधातुभ्योऽसुन्''*** (उणादि० ४।१९०) इत्युणादिसूत्रेणासुन् प्रत्ययः, सस्य उत्वम् ***''हशि च''*** (पा० ६।१।११४) इत्युत्त्वे, ***''आद्गुणः''*** (पा० ६।१।८७) इति गुणः। 'हर' इति='हृञ् हरणे' भौवादिकधातोः ***''हरतेरनुद्यमनेऽच्''*** (पा० ३।२।९) इति 'मनस्युपपदे' कर्त'र्यच्'प्रत्ययः, गुणो रपरः। मनोर्ज्ञानं हरति—अन्यतो निर्वर्त्यात्मानं प्रत्याकर्षतीति 'मनोहरो' विष्णुः। तथा हि- तत्कृतविविधसृष्टेर्वैविध्यकृतं वैचित्र्यं विलोक्य केनेयं विहिता विचित्रा सृष्टिरिति तं स्रष्टारं प्रत्याकृष्टमानसाः सर्वेऽसुभृतो भवन्ति विस्मिताः, इति सर्वेषां मनसो हारको 'मनोहरः'।

मन्त्रलिङ्गञ्च—

यद्वो मनः परागतं यद्बद्धमिह वेह वा ।
तद् व आवर्तयामसि मयि वो रमतां मनः।। अथर्व० ७।१३।४।।
युञ्जते मन उत धियो विप्रा विप्रस्य बृहतो विपश्चितः।
यजु० ५।१४।।
आ ते वत्सो मनो यमत् परमाच्चित्सधस्थात्। ऋक्० ८।११।७।।
अग्निमच्छा देववतां मनसा मनांसि मम चित्तमनु चित्तेभिरेत।
अथर्व० ३।८।६।।
कथं वातो नेलयति कथं'न रमते मनः। अथर्व० १०।७।३७।।
इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न।
ऋक्० १०।१२६।७।।

तच्चैवं—**'ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत। ततो रात्र्यजायत ततः**

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

समुद्रो अर्णवः।। 'अहोरात्राणि विदधद्विश्वस्य मिषतो वशी।' 'सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत्। दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः।' 'तस्माज्जाता अजावयः।' 'द्विपदश्चतुष्पदश्च ये' इत्यादि।

कम्रो हि स सिद्धसङ्कल्पश्च। अतः कम्रं मनोहरमेवेदं विश्वं विधत्ते जीवहितकामो, जीवानां मनसो रमणाय। एतेन मनोहरत्वरूपेण विश्वे भगवतो व्याप्तिर्दर्शिता। दृश्यते हि लोके प्रत्येकं प्राणिनो मनो ह्रियते विषयैरिति, विष्णुरेव 'मनोहर'नामा।

'चन्द्रमा मनसो जात०' (यजु० ३१।१२) इति यजुश्श्रुतेर्ब्रह्मणो मनस उत्पन्नश्चन्द्रमाः प्राणिनां मनसां देवता। स च चन्द्रमा गोतमः, प्राणिनां मनो वेगवत् ''जविष्ठं'' करोति। प्राणिनां हि मनो यथारुचि-सात्त्विकं, राजसं तामसञ्च भवति। न तथा भगवतः शुद्धसत्त्वमयत्त्वात्तस्य **'तमसः परस्तात्'** (यजु० ३१।१८) इत्युक्तेः। अतः सृष्टिं विदधन्न विकरोति ताम् ।

लोकेऽपि दृश्यते-सात्त्विकेन मनसा शान्त्या क्रियमाणं कार्यन्न विकुरुते। सहजश्च प्राणिमनस्सु शिवेतरसङ्कल्पानामुदयः। अत एव शिवसङ्कल्पाय प्रार्थ्यते परमेश्वरः **''तन्मे मनः शिवसङ्कल्पमस्तु''** (यजु० ३४।१)। न तथा ब्रह्मणि शुद्धसत्त्वरूपत्वात्तस्य।

भवतश्चात्रास्माकम्—

मनोहरो विष्णुरिमां वितन्वन्
सृष्टिं विचित्राकृतिरूपयुक्ताम् ।
मनोहरत्वेन करोति रम्यां
कृत्वा विसृष्टिं[1] परिपाति भुंक्ते[2] ।।६५३।।

एवं मनुष्योऽपि मनोहरस्य
कार्यानुकारी कुरुते विसृष्टिम् ।
यथाभिलाषं त्रिगुणोदयां तां
यतः स्वभावात्त्रिगुणात्मकः सः[3] ।।६५४।।

१. विसृष्टिः=विविधप्रकारालंकृता सृष्टिः। सृष्टिः=सर्जनम्। २. भुंक्ते=यथाकालं स्वान्तःक्षयां कुरुते। ३. सः=मनुष्यः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जितक्रोधः—४६२

'क्रुध क्रोधे' दैवादिको धातुर्भावे 'घञि' 'क्रोधः'। 'जि जये' भौवादिकः, कर्मणि क्तः, कित्त्वाद् गुणाभावः='जितः'। जितः क्रोधो येन स 'जितक्रोधः' इति बहुव्रीहिसमासः।

क्रोधो हि ग्रहणीस्थदूषितपित्तमूलको हृदय-मस्तिष्कमनोविकारः। सर्वेषामेव मनोविकाराणां ग्रहणी मूलं, प्रज्ञापराधश्च। अकायत्वात् तमसः परत्वात् ज्ञानरूपत्वाच्च भगवति सर्वव्यापके क्रोधोदयाभावात् स 'जितक्रोधः' स्तूयते। वस्तुतस्तु भगवति प्राकृतविकाराणां सद्भाव एव नास्तीति तदभावतैव तज्जितता शब्दार्थः। क्रोधश्चित्तविकारः, स च नास्ति भगवति प्रकृतिविकारत्वात्तस्य।

लोकेऽपि दृश्यते-मनसः प्रतिकूले क्रोध उदेति, न च भगवतः किञ्चित्प्रतिकूलं, सकलस्य तद्वशवर्तित्वात्, अतः स 'जितक्रोधः'।

मन्त्रलिङ्गञ्च—

अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः।

यजु० २१।२॥

मा नो हिंसीरधि नो ब्रूहि परिणो वृङ्धि मा क्रुधः।

अथर्व० ११।२३।२०॥

मा नः क्रुधः पशुपते नमस्ते। अथर्व० ११।२३।१६॥

एको देवत्रा दयसे हि मर्तान् अस्मिञ्छूर सवने मादयस्व।

ऋक्० ७।२३।५॥

यो अध्वरेषु शंतम ऋतावा होता तमू नमोभिराकृणुध्वम्।

ऋक्० १।७७।२॥

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्। यजु० ४०।८॥

भवति चात्रास्माकम्—

विश्वे जितक्रोध उ विष्णुरेकः
सोऽकाय उक्तस्तमसः परस्तात्।
तस्मिन्न जागर्ति विकारवर्गो
यथा मनुष्ये कृतबुद्धिदोषे ॥६५५॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वीरबाहुः—४६३

वीरौ विलोडनकरौ बाहू यस्य स 'वीरबाहुः'। वीरेति—विक्रान्त्यर्थकाद् 'वीरयते' चौरादिकाद्धातोः, पचाद्यच्='वीरः'।

बाहु-'बाधृ विलोडने' भौवादिकः, तस्मात् ***''अर्जिदृशिकम्यमिपंसिबाधामृजिपशितुग्धुग्दीर्घहकाराश्च''*** (उणादि १।२७) इत्युणादिः 'कु'प्रत्ययो हकारश्च धकारस्य 'बाहुः'। विलोडनं हि बाहुभ्यामेव भवति, जगत्येतत्प्रत्यक्षं दृश्यते। किन्तु भगवांस्तु सङ्कल्पमात्रेण सर्वं विलोडयतीति, विलोडनकर्तृत्त्वात्तस्य बाहुमत्त्वमभिधीयते।

वीरबाहुर्हि विष्णुरत एव सोऽग्निरूपेण सूर्यरूपेण वा मनुष्यैर्बाहुबलाय प्रार्थ्यते—**'बाह्वोर्मे बलमस्तु'** इति। **बहु बाह्वोर्बलम्** (अथर्व० १६।६०।१) बाहू बलाधिष्ठानौ। लोकेऽपि वीरबाहुर्बाहुबलो विजयते। बाहू यत्साधनीकृत्य विलोडयतस्तदपि बाहुशब्देनाभिधीयते। यथा प्रशस्तशस्त्रः प्रशस्तप्रहरणो वीरबाहुरिति। एवं वीरबाहुत्वं बिभ्राणो विष्णुः स्ववीरबाहुत्वगुणेन सर्वत्र जगति प्रतिवस्तु प्रसृतः प्रत्येकं वस्तु स्व-गुणयुक्तं विदधाति।

मन्त्रलिङ्गञ्च—

नह्यङ्ग पुरा चन जज्ञे वीरतरस्त्वव। ऋक्० ८।२४।१५।।

संसृष्टजित् सोमपा बाहुशर्ध्युग्रधन्वा प्रतिहिताभिरस्ता।
ऋक्० १०।१०३।३।।

सहस्रबाहुः पुरुषः सहस्राक्षः सहस्रपात्। अथर्व० १६।६।१।।

अयमग्निर्वीरतमो वयोधा सहस्रियो द्योततामप्रयुच्छन्।
यजु० १५।५२।।

सं बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन्देव एकः।
ऋक्० १०।८१ ३।।

भवति चात्रास्माकम्—

स वीरबाहुर्विधमन् समस्तं
विश्वं जनित्वा कुरुते स्ववश्यम्।
जन्तुस्तदीयेन गुणेन युक्तो
निजाप्रियं बाधत एव नित्यम् ।।६५६।।

अप्रियं=द्वेष्टारम्। जन्तुः=प्राणिमात्रम्। बाधते=मथ्नाति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विदारणः—४६४

'वि' उपसर्गो 'दॄ विदारणे' धातुः क्रैयादिकः, तस्मात् 'णिच्', रपरा वृद्धिः आर्, ततो ***''नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः''*** (पा० ३।१।१३४) इति सूत्रेण 'ल्युः' प्रत्ययो, बाहुलकाद्वा ल्युट्। योरनादेशः ***''युवोरनाकौ''*** (पा० ७।१।१) सूत्रेण। णेर्लोपः='विदारणः' इति। विदारयतीति 'विदारणः'।

सर्वं विश्वं पुंस्त्रीरूपेण विदीर्णमिव द्विधा दृश्यते। प्रत्येकं वस्तुनो बीजस्य मज्जाकार्योत्पत्तिहेतुरान्तरं द्रव्यं द्विधा दृश्यते। तदेतत्—विदारणस्य विष्णोरेव गुणस्य सर्वत्र व्यापकत्वं दृश्यते। तथा हि—योनिर्विदीर्णा, उपस्थेन्द्रियं विदीर्णं, ब्रह्माण्डगोलोऽपि द्विधा विदीर्णः, कालोऽपि दिनरात्रिरूपेण द्विधा, उत्तरदक्षिणायनेऽपि द्वौ। एवं सर्वत्र द्वन्द्वं दृश्यते, तत्सर्वं विदारणस्य विष्णोरेवान्वाख्यानम्।

मन्त्रलिङ्गञ्च—

इन्द्रस्य नु वीर्याणि प्रवोचं यानि चकार प्रथमानि वज्री।
अहन्नहिमन्वपस्ततर्द प्रवक्षणा अभिनत्[1] पर्वतानाम् ।।
अथर्व० २।५।५।।

यदा वलस्य पीयतो जसुं भेद् बृहस्पतिरग्नितपोभिरर्कैः।
अथर्व० २०।१६।६।।

नव यो नवतिं पुरो बिभेद बाह्वोजसा। ऋक्० ८।६३।२।।
बिभेद बलं नुनुदे विवाचोऽथाभवद् दमिताभिक्रतूनाम्।
ऋक् ३।३४।१०।।

अभीदु शक्रः परशुर्यथा वनं पात्रेव भिन्दन्त्सत एतु रक्षसः।
अथर्व० ८।४।२१।।

दृते दृंह मा। ज्योक् ते संदृशि जीव्यासम्। यजु० ३६।१६।।
विभक्तारं हवामहे वसोश्चित्रस्य राधसः।
सवितारं नृचक्षसम्।। ऋक्० १।२२।७।।

भवति चात्रास्माकम्—

विदारणो विष्णुरदृश्यमानो
गर्भे विदार्यैव बहिष्करोति ।

१. अभिनदिति—भिदिर्-विदारणे।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सर्वाङ्गसम्पूर्णविभक्तगात्रं
बीजे च मज्जां कुरुते विभक्ताम्।।६५७।।

❖ ❖ ❖

स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत्।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः।।६३।।

४६५ स्वापनः, ४६६ स्ववशः, ४६७ व्यापी, ४६८ नैकात्मा, ४६६ नैककर्मकृत्।
४७० वत्सरः, ४७१ वत्सलः, ४७२ वत्सी, ४७३ रत्नगर्भः, ४७४ धनेश्वरः।।६३।।

स्वापनः—४६५

'स्वापनः' इति—'ञिष्वप् शये' आदादिको धातुः, तस्मात्प्रेरणार्थको 'णिच्,' उपधावृद्धिः। ततो नन्द्यादिलक्षणो 'ल्युः', बाहुलका'ल्ल्युड्'वा। योरनि णेर्लोपे च= 'स्वापनः' इति। स्वापयति निद्रापयति प्रलयकाले सर्वं प्रकृताविति 'स्वापनः'।

तथा हि-भगवान् सृष्टिकाले सर्वं जागरयति, प्रलयकाले च सर्वं स्वापयति। एवञ्च सृष्टिर्जागरावस्था प्रलयश्च स्वापावस्था। तयोश्चोभयोः कर्ता स एवेति स 'स्वापनः' उच्यते।

सर्वं स्वापयन्नपि स स्वयमतन्द्रित एव तिष्ठति। यथा सूर्यः स्वयन्न स्वपिति, किन्तु रात्रियोगेन, सर्वं स्वापयति कर्मजालान्निवर्त्य। स्वापमूलं हि श्लेष्मा तमश्च। अत एव निशागमे सर्वभूतधात्री निद्रा जन्तून् विश्रमयति, पोषयति च पुनः कर्मकारणाय। एवञ्च स सर्वत्र स्वापगुणेन व्याप्तः स्वापन उच्यते।

सत्त्वप्रधानं दिनं, रजस्तमःप्रधाना उषा, तमःप्रधाना रात्रिरिति ज्ञेयम्। दिने पित्तं रात्रौ च श्लेष्मा बलमाप्नोति अन्यत्र विकारात्।

मन्त्रलिङ्गञ्च—

निष्वापया मिथूदृशा सस्तामबुध्यमाने। ऋ० १।२९।३।।
सहस्रशृङ्गो वृषभो यः समुद्रादुदाचरत्।
तेना सहस्येना वयं नि जनान् स्वापयामसि।। ऋ० ७।५५।७।।
स्वप्न स्वप्नाभिकरणेन सर्वं नि ष्वापया जनम्।
ओत् सूर्यमन्यान्त्स्वापयाव्युषं जागृतादहमिन्द्र इवारिष्टो अक्षितः।।
अथर्व० ४।५।७।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

स स्वापनो विष्णुरतन्द्रितः सन्
रात्रिं विधत्ते शयनाय जन्तोः।
रात्रौ तमः श्लेष्मबलञ्च रात्रौ
निद्रा यतः श्लेष्मतमोभवोक्ता।।६५८।।

विश्वस्य सर्गो दिनमुक्तमार्यै
रात्रिर्हि विश्वस्य तमोऽभ्यधायि।
न स्वापनो याति कदापि निद्रां
तथा यथा याति रविर्न निद्राम्।।६५६।।

स्ववशः—४६६

स्वः—'स्वृ शब्दोपतापयोः' भौवादिको धातुः, तस्माद् *''अन्येष्वपि दृश्यते''* (पा० ३।२।१०१) सूत्रेण 'डः' प्रत्ययः टिलोपश्च=स्वः। वशः='वश कान्तौ' आदादिको धातुः, तस्मात्कर्मणि *''वशिरण्योरुपसंख्यानम्''* (पा० ३।३।५८ वा०) इति 'अप्' प्रत्ययः=वशः। 'स्व' शब्द आत्मवाची, वशशब्दश्चोश्यते काम्यत इति 'वशः' कामार्थः, स्वस्मिन् यस्येति व्यधिकरणो बहुव्रीहिः समासः। एवञ्च यो बाह्यप्राकृतपदार्थानपेक्षकाम आत्मकाम आत्मारामो वा स 'स्ववशो' विष्णुः।

आत्मनोपलब्धोपलभ्यार्थो वा 'शक्तिरूपः'। यथा शक्तिमान् नान्यमपेक्षते क्वचित्कर्मण्युपलभ्यार्थे वा सर्वशक्तिमत्त्वात्, तथायं निरंकुशो निरञ्जनः स्वान्तर्मित-'सर्वकाम' आस्ते।

मन्त्रलिङ्गञ्च—

अहोरात्राणि विदधत् विश्वस्य मिषतो वशी। ऋक्० १०।१६०।२।।

आयात्विन्द्रः स्वपतिर्मदाय यो धर्मणा तूतुजानस्तुविष्मान्।
अथर्व० २०।६४।१।।

अथेदं विश्वं पवमान ते वशे त्वमिन्दो प्रथमो धामधा असि।
ऋक्० ६।८६।२८।।

यदद्य कच्च वृत्रहन् उदगा अभि सूर्य।
सर्वं तदिन्द्र ते वशे।। यजु० ३३।३५।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अकामो धीरो अमृतः स्वयंभू रसेन तृप्तो न कुतश्चनोनः।

अथर्व १०।८।४४।।

भवति चात्रास्माकम्—

स विष्णुरुक्तः स्ववशः पुराणो
विश्वं युनक्त्येव पृथक् पृथक् सः।
तैः साधनैर्यैरलमस्ति कर्ता
तथा यथा पक्षयुगेन[1] पक्षी ।।६६०।।

व्यापी—४६७

'वि' उपसर्ग 'आप्लृ व्याप्तौ' धातुः सौवादिकः, ततः ***''सुप्यजातौ णिनिस्ताच्छील्ये''*** (पा० ३।२।७६) सूत्रेण 'णिनिः' प्रत्ययः, उपसर्गस्य सान्धिको यण्। इन्नन्तलक्षणो दीर्घः, 'व्यापी'ति। स्वस्वरूपभूतगुणैः सर्वं व्याप्नोति स्वभावादिति 'व्यापी'। कथञ्च स स्वगुणैर्व्याप्नोति सर्वमिति तत्त्वविद् वेत्ति।

तथा हि— मनुष्यशरीरे मुख्योर्ध्वभागे पञ्च ज्ञानेन्द्रियाणि, बाह्वोश्च तत्स्थानीयाः पञ्चांगुलयः। मध्यमभागे चैकं हृदयं, द्वौ यकृत्-प्लीहानौ, द्वौ कफोढौ ''फुफ्फुसौ'' इति पञ्च। अधोभागेऽपि पादयोः पञ्चांगुलय एव। अत एव मन्त्रोक्तं सङ्गच्छते—**''इन्द्रो मायाभिः पुरुरूप ईयते''** (ऋक्० ६।४७।१८)। पुरुरूपो=बहुरूपः।

मन्त्रलिङ्गञ्च—

तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः। यजु० ४०।५।।

स ओतः प्रोतश्च विभूः प्रजासु। यजु० ३२।८।।

परीत्य भूतानि लोकान् परीत्य सर्वाः प्रदिशो दिशश्च।

यजु० ३२।११।।

यो अग्नौ रुद्रो यो अप्स्वन्तर्य ओषधीर्वीरुध आविवेश।

अथर्व० ७।८७।१।।

पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीराविवेश।

ऋक्० १।९८।२।।

१. पक्षयुगेन पक्षी=उपलक्षणमात्रमेतत्। प्रतियोनि शरीरं सर्वावयवसमुदितं करोति।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

व्यापी स विष्णुः प्रपदं हि दृश्यो
यथा रविं पश्यति सर्वलोकः।
खपञ्चके ज्ञानसमृद्धमुच्चै-
र्यथा तथा मध्यकरांघ्रिषूह्यम् ।।६६१।।

नैकात्मा—४६८

'आत्मा' शब्द 'अत' सातत्यगमनार्थाद्धातो'र्मनिनि' व्युत्पादितचरः। 'आत्म'-शब्दः स्वरूपवचनः। न एक आत्मा स्वरूपं यस्य स 'नैकात्मा' विविधस्वरूप इत्यर्थः। नैकात्मा-इत्यत्र नलोपस्तु न भवति *''नलोपो नञः''* (पा० ६।३।७३) अत्र नञ एव लोपविधानात्। अत्र च न नञा समासः, किन्तु निषेधार्थेन नकारेण।

बहुरूपो हि स व्यापकत्वात्, यथा वस्त्वनुरूपतामापन्नः। इदञ्च नाम्नां सहस्रं तमेव नैकात्मानं व्याचष्टे।

मन्त्रलिङ्गञ्च—

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः ।
तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः।। यजु० ३२।१।।
त्रीणि छन्दांसि कवयो वि येतिरे पुरुरूपं दर्शतं विश्वचक्षणम्।
अथर्व० १८।१।१७।।
त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ।
ऋक्० ८।६८।११।।

भवतश्चात्रास्माकम्—

आमृत्यु कर्माणि करोति जन्तु-
र्नैकात्मरूपेषु विभक्तसंज्ञः ।
[1]स एव पुत्रः स पिता स भर्ता
स एव शिष्यः स गुरुः स बन्धुः।।६६२।।

१. सः=विष्णुर्नैकात्मेति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स एव भृत्यः स सखा स राजा
स एव निद्राङ्कमितो विमूढ़ः ।
स एव नेता स कविः स गोप्ता
एको ह्यनेकात्मगत[1]स्तथा सः ।।६६३।।

नैककर्मकृत्—४६६

नैककर्मकृदित्यत्र नैकात्मवत् नकारेण समासः, अतो नलोपाभावः। 'डुकृञ् करणे' इति तानादिकाद्धातोः ***''सर्वधातुभ्यो मनिन्''*** (उणादि ४।१४६) इति मनिन् प्रत्यय औणादिः=कर्म। तदुपपदाच्च करोतेः***''सुकर्मपापमन्त्रपुण्येषु कृञः''*** (पा० ३।२।८६) सूत्रेण 'क्विप्' तस्मिंश्च 'तुक्'। न एकं कर्म करोतीति 'नैककर्मकृत्'=सर्वं जगद् व्याप्य जागतप्राणिरूपतामापन्नस्तत्तद्रूपेण नानाकर्मकारी। नैकात्मवद् व्याख्या।

केवलमियांस्तु भेदस्तत्र नानारूपता दर्शिता, इह च नानाकर्मकर्तृता। स एक एव पुरुषः कस्यचित्पुत्रः कस्यचित्पिता पुत्रभूतः पितरौ सेवते, पितृभूतश्च सेव्यते भर्ता च भार्यां बिभर्ति। शिष्यभूतः सेवते गुरुं, विद्याञ्चोपादत्ते ततः। गुरुतामुपगतश्च शिष्यानुपनीय विद्यामुपदिशति। बन्धुः सन् स्नेहेन सर्वं बध्नाति हितेच्छुः। भृत्यः स्वामिनमनुरञ्जयति सेवया। सखा च कस्मैचिद्रहस्यमावेदयति, कस्माचिच्च रहस्यं शृणोति।

स एव नेता नयति स्वीयान् सुवर्त्मना। स एव भावभावितः काव्यं कुर्वाणः कविः। स एव च गोपायन् गोप्तोच्यते। एवं नैककर्मकृतं विष्णुमनुकुरुते वैष्णवं रूपं बिभ्राणमिदञ्जगत्।

मन्त्रलिङ्गञ्च—

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। यजु० १३।३३।।
त्वमङ्ग तानि विश्वानि वित्से येभिः कर्माणि मघवञ्चकर्थ।
ऋक्० १०।५४।४।।
केनेमां भूमिमौर्णोत्.... केन कर्माणि पूरुषः। अथर्व० १०।२।१८।।
अस्येदु प्रब्रूहि पूर्व्याणि तुरस्य कर्माणि नव्य उक्थैः।
अथर्व० २०।३५।१३।।

---

१. अनेकात्मगतः=एक एव विभिन्नेषु देहेषु, तत्तद्रूपेण वर्तमानो, नामभिर्बहुधा गीयमानश्च, नैकात्मवद्=भिन्नो भिन्नो लक्ष्यते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

युजा कर्माणि जनयन् विश्वौजा अशस्तिहा विश्वमनास्तुराषाट्।
ऋक्० १० ।५५ ।८ ।।

भवतश्चात्रास्माकम्—

आमृत्यु कर्माणि करोति जन्तु-
स्तं नैककर्माणमजं विपश्यन् ।
स एव पुत्रः स पिता स भर्ता
स एव शिष्यः स गुरुः स बन्धुः ।।६६४।।

स एव भृत्यः स सखा स राजा
स एव निद्राङ्कमितो विमूढः ।
स एव नेता स कविः स गोप्ता
एवं विपश्यन् न स मोहमेति ।।६६५।।

वत्सरः—४७०

वसतीति 'वत्सरः'—'वस निवासे' भौवादिको धातुरनिट्, तस्माद् ***''वसेश्च''*** (उणादि ३ ।७१) इत्युणादिः 'सरन्' प्रत्ययः, ***''सः स्यार्धधातुके''*** (पा० ७ ।४ ।४६) सूत्रेण 'सस्य तः'। सर्वस्मिन् सर्वमस्मिन् वा वसतीति 'वत्सरः'। इदं सर्वं दृश्यमानञ्जगत् तस्मिन् विष्णावेव वसति, वसति च सर्वत्र जगति विष्णुरत एव स वत्सर इत्युच्यते।

मन्त्रलिङ्गञ्च—

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्। यजु० ४० ।१ ।।

संवत्सरोऽसि परिवत्सरोऽसीदावत्सरोऽसीद्वत्सरोऽसि।
यजु० २७ ।४५ ।।

त्वयि रात्रि वसामसि स्वपिष्यामसि जागृहि। अथर्व० १० ।८ ।१४ ।।

अहमेवास्म्यमावास्या मामावसन्ति सुकृतो मयीमे। अथर्व० ७ ।८४ ।२ ।।

संवत्सरोऽपि तस्मादेव। सर्वं कालात्मके ब्रह्मणि[1] सम्यग्वसतीति 'सम्वत्सरः'।

१. **कालो ह ब्रह्म भूत्वा बिभर्ति परमेष्ठिनम्।** अथर्व० १९ ।५३ ।९ ।।

भवनमपि संवत्सरमुक्तं भवति। तस्य च भेदा विपणिः, क्षेत्रं, जीविकार्था वृत्तिरित्यादयः स्वयमूहनीया वासे हेतुभूताः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवन्ति चात्रास्माकम्—

संवत्सरो वासयति स्वगर्भे
विष्णुर्हि विश्वं सकलं यथार्हम्।
तथा यथा गर्भगतं हि माता
सैवास्य सूते स्वगुणैर्वसन्तम्।।६६६।।

स सद्वचोभिर्नमसा स्तुवन् वा
सदा सदाचारविहारयुक्तः।
तमेव निःशङ्कमुपैत्यशङ्कः
संवत्सरो सर्वगतोऽस्ति यस्मात्।।६६७।।

एवं हि यो वेत्ति पदं गुहस्य
मातेव विष्णुं बहिरन्तराप्तम्।
तमानुकुर्वन् हृदयान्तराले
विश्वे च वा पश्यति निर्विकल्पः।।६६८।।

वत्सलः—४७१

'वद व्यक्तायां वाचि' भौवादिको धातुः, तस्माद् ***''वृतृवदिहनिकमिकषिभ्यः सः''*** (उणादि० ३।६२) इत्यौणादिकः 'सः' प्रत्ययः। ***''तितुत्रेति''*** (पा० ७।२।६)। सूत्रेणेण्निषेधः, चर्त्वम्='वत्सः'। वत्सशब्दाच्च वत्सांसाभ्यां कामवति मत्वर्थीयो 'लच्' इति। वत्सलशब्दः स्नेहवानित्यर्थकः।

एकाग्र्येण मनसा ध्यायति दीने दुःखिनि वा भक्ते, स वत्सलः स्नेहवान् भवत्यतो 'वत्सलः' उच्यते। यथा रुदन्तं धूलिधूसरितमव्यक्तवाचमस्पृश्यमपि बालकमात्मीयं मत्वा वत्सला सती तमङ्कमारोपयति माता, तथा भगवानपि विश्वं सदातः निजेऽङ्के कुरुते, अतः स वत्सलः इत्युच्यते। स स्वकीयं प्रेमाणं सर्वत्र सामान्येन सङ्गमयन्नपि स्तोतॄणां हृदयेषु विशेषतः समर्पयति, येन तेऽपि सर्वप्राणवत्सला भवन्ति। अतो 'वत्सलाख्येन गुणेन सर्वत्र गतो भगवान् 'वत्सलः' उच्यते।

मन्त्रलिङ्गञ्च—

कृण्वन्त्संचृतं विचृतमभिष्टय इन्दुः सिषक्त्युषसं न सूर्यः।

ऋक्० ६।८४।३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वाश्रेव विद्युन् मिमति वत्सं न माता सिषक्ति। ऋक्० १।३८।८।।
सहृदयं सांमनस्यमविद्वेषं कृणोमि वः।
अन्यो अन्यमभिहर्यत वत्सं जातमिवाघ्न्या।। अथर्व० ३।३०।१।।
हिङ्कृण्वन्ती वसुपत्नी वसूनां वत्समिच्छन्ती मनसा न्यागात्।
अथर्व० ७।७७।८।।
गौरमीमेदनु वत्सं मिषन्तं मूर्धानं हिंकृणोन्मातवा उ।
ऋक्० १।१६४।२८।।

भवन्ति चात्रास्माकम्–

स वत्सलो विष्णुरिदं समस्तं
विश्वं निजेऽङ्के कुरुते सदातः।
तं योऽतिहीनो भजते वचोभि-
र्भावेन वा वत्सल एति साक्ष्यम्।।६६९।।

स वत्सलो विष्णुरुदारवीर्यः
समग्रशक्त्या हृदयं बलेन।
सत्येन धैर्येण च साहसेन
गुणेन संयोज्य करोति वाङ्के।।६७०।।

तदङ्कमाप्तः स विभुं स्तुवानः
मातासि धातासि पितासि शब्दैः।
तमेव गायन् तमुपैति पश्यन्
विश्वे ततं वत्सलमेकरूपम्।।६७१।।

वत्सलशब्दः पुनः शरणागतवत्सलः=भक्तवत्सल एवमपि शरणागतं, भक्तं वा वत्सलमिव मत्वा प्रयुज्यते।

वत्सी–४७२

'वत्स'शब्दो वत्सलनामव्याख्याने व्याख्यातचरः। तस्माद् ***''अत इनिठनौ''*** (पा० ५।२।११२) सूत्रेण नित्ययोगे मत्वर्थीय 'इनिः'। ***''यस्येति च''*** (पा० ६।४।१४६) सूत्रेणाकारलोपः, इन्नन्तलक्षणो दीर्घो=वत्सी। वत्सशब्दो हि गोः स्तन्यपायिनि शिशौ रूढः। प्रयुज्यते च प्रौढेऽपि। लोकाश्रितो हि शब्दप्रयोगः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वस्तुतस्तु 'वत्स'शब्दः सामान्येन शिशुमात्रे प्रयुज्यते। तदभिप्रत्यैव भगवतो वत्सी नाम। यथा वत्सोऽस्यास्तीति 'वत्सी' गौः, तथा सर्वे प्राणिनो वत्सा अस्य सन्तीति भगवान् विष्णु'र्वत्सी'।

भगवता हि वत्सपोषाय तत्प्रतिमातृस्तनयोः स्तन्यं व्यवस्थापितमस्ति। कपोतजात्यान्तु प्रत्यक्षमेतद्दृश्यत उद्गिरणं तज्जातकमुखे। स भगवान् विष्णुरेव वत्सी। अत एव जीवा भगवन्तं प्रार्थयन्ते—**'मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम्। मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः।।** (यजु० १६।१५)। पितरौ चापि 'वत्स'शब्देनोच्येते। गौण्या वृत्त्या पोषकमात्रं वा 'वत्सी'।

मन्त्रलिङ्गञ्च—

यूयं नः पुत्रा अदितेरदब्धा अभक्षमध्वं युज्याय देवाः।

ऋक्० २।२८।३।।

अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत। अथर्व० २०।७।५।।

शृण्वन्तु विश्वे अमृतस्य पुत्रा ये धामानि दिव्यानि तस्थुः।

ऋक् १०।१३।१।।

ऋतं शंसन्त ऋजु दीध्याना दिवस्पुत्रासो असुरस्य वीराः।

ऋक् १०।६७।२।।

भवति चात्रास्माकम्—

वत्सी स विष्णुर्वदतां वरेण्यः
स एव माता स पिता स बन्धुः।
तं वत्सिनं सत्यवचोभिरेष्य
स्तुवन्ति गायन्ति नमन्ति यान्ति।।६७२।।

रत्नगर्भः—४७३

रत्नम्—'रमु क्रीडायाम्' भौवादिको धातुरन्तर्भावितण्यर्थः। तस्मात् ***"रमेस्त च"*** (उणादि ३।१४) इत्युणादिसूत्रेण 'न' प्रत्ययः धातोस्तकारान्तादेशश्च। रमयतीति='रत्नम्'।

गर्भः—'गॄ निगरणे' तौदादिको धातुः, तस्मात् ***"अर्तिगृभ्यां भन्"*** (उणादि ३।१५२) इत्यौणादिको 'भन्' प्रत्ययो, रपरो गुणो, गिरतीति=गर्भः। एवञ्च रत्नानि रतिसाधनानि गिरत्यादधात्यन्तरात्मनीति 'रत्नगर्भः' इत्युपपदसमासः। अथवा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रत्नानि गर्भे उदरे यस्य स 'रत्नगर्भः' इति बहुव्रीहिसमास उभयथोपपद्यते। तथा हि गर्भो नाम आन्तरो भागो, गर्भे करणमन्तः प्रवेशनम्।

एवञ्च—भगवान् रतिसाधने मनोरमेण विक्रीडनकेनैव जगता चिरमासृष्टेराप्रलयं विक्रीड्य सर्वमिदं रत्नभूतं विश्वं स्वान्तर्दधातीति 'रत्नगर्भः' उच्यते। अथवा-यो यस्य वशगः सोऽपि तेन निगीर्ण इव गर्भाभिधानो भवति तदाज्ञान्तःस्थायित्वात्। अत्र वेदः—**"आचार्यः......कुरुते गर्भमन्तः।......तं जातं द्रष्टुमभि संयन्ति देवाः।।"** अथर्व० ११।५।३।।

सर्वेऽपि प्राणिनः कपोताविव स्वं गर्भधिं रमयन्त्यात्मानं वा गर्भमाधातुमाधापयितुं वा। मन्त्रलिङ्गञ्च— **"कपोत इव गर्भधिम्"** (अथर्व० २०।४५।१) कपोतः कुत्सितपतनो भवति गर्भधिं=कपोतिकाम्। अत एव सिद्धान्तितमाचार्यैः स्वयोनौ रमते बुधः। धनमपि येन व्यवह्रियते तद् रत्नम्। धनिनो हि व्यवहरमाणा रमन्ते रमयन्ति वा स्व-सम्बन्धिनः।

लोकप्रसिद्धानि खनिजानि हीरकादीन्यपि 'रत्न'शब्दवाच्यानि। रमन्ते हि तेषु जनानां मनांसि, तानि रमयन्तीति वा। तदेतन्नानावस्तुजातरामणीयकस्य किमधिष्ठानमिति प्रश्ने, विष्णुरेव रमणो रमयति सर्वमतः स 'रत्नगर्भः'। तस्यैव रामणीयकं स्वरूपं सर्वत्र प्रसृतं जगति। पुरुषोऽपि रत्नगर्भः, स्वाश्रितानामिच्छापूरणेन रमणत्वात् एवं लोके दर्शं दर्शमभ्यूहितव्यं सुधीभिः।

मन्त्रलिङ्गञ्च—

अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्।। ऋक्० १।१।१।।
हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्।
यजु० १३।४।।
अर्चामि सत्यसवं रत्नधामभि प्रियं मतिम्। अथर्व० ७।१४।१।।
हिरण्याक्षः सविता देव आगात् दधत् रत्ना दाशुषे वीर्याणि।
यजु० ३४।२४।।

भवन्ति चात्रास्माकम्—

स रत्नगर्भो रमयन् स्वगर्भे
विश्वं समस्तं विविधप्रसूतम्[1]।

---

१. विविधप्रसूतं=चतुर्विधसृष्टिविक्लृप्तम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

[1]विश्वप्रचाराय विचित्रचित्रां
    सृष्टिं वितन्वन् रमते स्वसत्त्वे[2] ।।६७३।।

यो लौकिको गर्भ इहास्ति दृश्यः
    स गर्भधिं प्राप्य सुखेन शेते।
मातापि नित्यं रमते स्व-सत्त्वे
    तद् रत्नगर्भस्य पदं वृणीते ।।६७४।।

रत्नानि सर्वाणि दधाति शम्भु-
    गर्भे स्वके सर्वमिहास्ति रत्नम्।
कश्चिद्धनाप्त्यै यतते च तस्मात्
    वधूकृते कोऽपि करोति यत्नम् ।।६७५।।

कश्चित्कृषिं कर्षति सर्वयत्नैः
    क्रीणाति गामश्वमथापि कश्चित्।
कश्चिच्च यन्त्राणि करोति यत्ना-
    ल्लब्ध्वा स्वकार्हाणि सुखेन शेते।।६७६।।

यो रत्नगर्भं भजते मनुष्यो
    जानाति वा सूत्रतमस्य वाच्यम् ।
स रत्नगर्भो भवतीह मर्त्यः
    पश्यन् विकीर्णानि च रत्नकानि ।।६७७।।

न मोहमभ्येति स रत्नकेषु
    न संचयं वा कुरुते च तेषाम्।
न वस्तुहीनो भवतीह खिन्नो
    न हर्षमभ्येति च रत्नगर्भः ।।६७८।।

मन्येऽत्र नूनं बहुजन्मयोगात्
    सद्योऽपि वा तत्त्वविदोऽनुबन्धात्।
संल्लब्धसिद्धिर्मनुजो भवेऽस्मिन्
    मनुष्यरूपे भगवान् स्वयं सः।।६७९।।

१. विश्वप्रचाराय=लोकव्यवहाराय। २. स्वसत्त्वे=स्वकीये सत्त्वप्रधाने ज्ञानानन्दात्मनि।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रत्नानि गर्भे निपतन्ति तस्य
रत्नत्वमस्मास्विदमस्ति भान्ति।
पदार्थजातानि वदन्ति तस्मै
स रत्नगर्भो रमते सुकर्णः॥६८०॥

धनेश्वरः—४७४

'धन धान्ये' इति जौहोत्यादिको धातुश्छान्दसः। छान्दसधातुरूपाणां लोकेऽपि प्रयोगो यथा घृतं वश इत्यादीनाम् तस्मात्पचा'द्यचि' 'धन'मिति साधुः। 'ईश्वरः'—अशूङ् व्याप्तौ संघाते चे'ति सौवादिको धातुः, तस्मात् ***''अश्नोतेराशुकर्मणि वरट् च''*** (उणादि० ५।५७) इत्युणादि'वरट्' प्रत्यय उपधाया ईत्वञ्च। ***'नेड्वशि कृति'*** (पा० ७।२।८) इतीण्निषेधः। अश्नुते व्याप्नोति संहन्ति वा 'ईश्वरः'। व्यापकः संघातकश्चेश्वर इत्यर्थः।

धनुषे धान्येषु वा यदाशुकारित्वं तद् व्यापनशीलस्याशुकरणशीलस्य वा विष्णोरेव गुणः। तथा हि दीयमानं धनं धान्यं वा कर्मकारान्-आशुकरणाय प्रेरयति संहताँश्च तान् करोति। यतो हि ते दत्तेन धनेन तुष्टाः स्वामिनः कार्यं संहता एकमनस्काः सन्त आशु कुर्वन्ति। धनधान्ययोः पर्यायेणापि प्रयोगो यथा यत्कार्यं मुद्रया साधयितुं शक्यते तद्धान्यप्रदानेनापि। एवञ्च सर्वत्र स स्वगुणेन व्याप्तो धनेश्वरो विष्णुरुच्यते।

मन्त्रलिङ्गञ्चं—

अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि संजयामि शश्वतः ।
मां हवन्ते पितरन्न जन्तवो अहं दाशुषे विभजामि भोजनम्॥
ऋक्० १०।४८।१॥

त्वं हि राधस्पते राधसो महः क्षयस्यासि विधतः। ऋक्० ८।६१।१४॥
स बोधि सूरिर्मघवा वसुपते वसुदावन्। यजु० १२।४३॥
वसोरिन्द्रं वसुपतिं गीर्भिर्गृणन्त ऋग्मियम्। अथर्व० २०।७१।१५॥

भवतश्चात्रास्माकम्—

धनेश्वरो विश्वमिदं समस्तं
समेध्य धन्यत्वगुणेन तस्मिन् ।
करोति चाशुत्वमथापि यस्मात्
तस्मात्प्रसिद्धा चपला च लक्ष्मीः॥६८१॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

धनानि शम्भुः स्ववशे विधत्ते
धनेश्वरः सन् स्तुतिमभ्युपैति।
तमेव याचन्ति च लिप्सितार्थाः
स भोजनीयेन युनक्ति विश्वम्।।६८२।।

❖ ❖ ❖

धर्मगुब्धर्मकृद्धर्मी सदसत् क्षरमक्षरम्।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः।।६४।।

४७५ धर्मगुप्, ४७६ धर्मकृत्, ४७७ धर्मी, ४७८ सत्, ४७९ असत्, ४८० क्षरम्, ४८१ अक्षरम्।

४८२ अविज्ञाता, ४८३ सहस्रांशुः, ४८४ विधाता, ४८५ कृतलक्षणः।।६४।।

धर्मगुप्–४७५

'धर्मः'–'धृञ धारणे' भौवादिको धातुः, तस्मात् ***''अर्तिस्तुसुहु०''*** (उणादि० १।१४०) इत्याद्यौणादिकेन 'मन्' प्रत्ययः। गुणो रपरः, अनिट्=धर्मः। 'गुप्'-'गुपू रक्षणे' भौवादिको धातुः, तस्मात् धर्मोपपदात् ***''क्विप् च''*** (पा० ३।२।७६) इति 'क्विप्' प्रत्ययः। ***''गुपूधूपविच्छिपणिपनिभ्य आयः''*** (पा० ३।१।२८) इत्यायप्रत्ययस्त्वार्धधातुके वैकल्पिकः। ***''आयादय आर्धधातुके वा''*** (पा ३।१।३१) इत्यनुशासनात्। कित्त्वाद् गुणाभावो='धर्मगुप्'। धर्मं गोपायति रक्षतीति 'धर्मगुप्' विष्णुः।

यतो हि सर्गादारभ्यासर्गसमाप्तिं प्रजा नियमेन रक्षतीति 'धर्मगुबु'च्यते। लोकेऽप्येतद्दृश्यते–कर्ता स्वकृतं कार्यं यावदायू रिरक्षिषति। तदेतद्विष्णोरेवानुकरणं सर्वत्र।

मन्त्रलिङ्गञ्च–

पितुं नु स्तोषं महो धर्माणं तविषीम्। ऋक्० १।१८७।१।।
त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः।
अतो धर्माणि धारयन्।। यजु० ३४।४३।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्वं विश्वस्मात् भुवनात् पासि धर्मणासुर्यात् पासि धर्मणा।

ऋक्० १।१३४।५।।

आ यो धर्माणि प्रथमः ससाद, ततो वपूंषि कृणुषे पुरूणि।

अथर्व० ५।१।२।।

भवति चात्रास्माकम्—

स धर्णगुब् विश्वमिदं वितत्य
मूलञ्च गोपायति तस्य यत्नात्।
तथा यथा बीजमथापि वृक्षं
बीजाच्च वृक्षं तरुतश्च बीजम्।।६८३।।

एवं सर्वत्र चरेषु योज्यम्। मनुष्यकृताया व्यवस्थाया मनुष्य एव रक्षको नेश्वरः।

धर्मकृत्—४७६

'धर्मकृद्' इति-'धर्म'शब्दो व्युत्पादितचरः। 'धर्मो'पपदा'त्कृञः' कर्तरि 'क्विपि' 'तुकि' च धर्मं करोतीति='धर्मकृत्'। धर्मं धारणलक्षणां मर्यादां करोतीत्यर्थः।

यल्लोके किञ्चिद् दृश्यजातं, तत्सर्वं कयाचिन्मर्यादया निबद्धम्। तद्यथा—सर्वस्यापि प्राणिवर्गस्य शरीरं तदवयवभूतैः षड्भिरङ्गैर्धृतमस्ति। षडङ्गानि चेमानि—शिरोमध्यमभागौ द्वौ, हस्तौ द्वौ, पादौ च सशाखौ।

भगवता धर्मकृता कृतव्यवस्थोऽपांनिधिरपि प्राप्तकालं यथाव्यवस्थं विकुरुते सर्गान्ते। धर्मकृत्कृतमर्यादः सूर्योऽपि निरन्तरं दक्षिणत उत्तरतश्च परिवर्तयत्यात्मानम्। चन्द्रोऽपि समर्यादः शुक्लपक्षीयाः कृष्णपक्षीयाश्च विषमाः कला भजमानो वृद्धिं ह्रासं चोपैति यथानियमम्। एवं स्वकृतं धर्मं गोपायन् स विष्णु'र्धर्मकृद्' उच्यते। स्वकृतस्यैव धर्मस्य स गोप्ता, न मनुष्यकृतस्येति निश्चयतो ज्ञेयम्।

मन्त्रलिङ्गञ्च—

उक्षाणं पृश्निमपचन्त वीरास्तानि धर्माणि प्रथमान्यासन्।

ऋक्० १।१६४।४३।।

इन्द्राय साम गायत विप्राय बृहते बृहत्।
धर्मकृते विपश्चिते पनस्यवे।। अथर्व० २०।६२।५।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्व विश्वस्मात् भुवनात् पासि धर्मणासुर्यात् पासि धर्मणा।

ऋक्० १।१३४।५।।

उत मित्रो भवसि देव धर्मभिः। ऋक् ५।८१।४।।

भवति चात्रास्माकम्—

स धर्मकृद् विश्वमिदं विधाय
गोप्तापि नूनं स्वकृतस्य बोध्यः।
अतोऽस्ति गीतः कविभिः पुराणैः
स धर्मगुब् धर्मकृतं[१] विजानन्।।६८४।।

धर्मी—४७७

धर्मीति—'धर्म'शब्दो व्युत्पादितचरः। तस्मात् ***"संज्ञायां मन्माभ्याम्"*** (पा० ५।२।१३७) सूत्रेण मत्वर्थीय 'इनिः' प्रत्ययः। ***"नस्तद्धिते"*** (पा० ६।४।१४४) सूत्रेण टिलोप इन्नन्तलक्षणो 'दीर्घ'श्च 'धर्मी'। धर्मोऽस्यास्तीति 'धर्मी' नित्ययोग इनिः, यो धर्मं कदाचिन्न व्यभिचरति स एवंविधो 'धर्मी' विष्णुरेव।

तथा हि—भगवता धर्मिणा यद्वस्तु सर्गादौ यद्धर्मकं व्यधायि, तद्वस्तु सर्गान्तं तद्धर्मकमेवात्मानं रक्षति, न तु तद्धर्मात्कदाचिद्विच्यवते। यतो ह्यच्युतधर्मकस्य विष्णोरेव गुणस्य सर्वत्र व्याप्तिः। तथा च लोके— पञ्चभूतानि सूर्यादयो ग्रहा वा न स्वं स्वं भगवता नियतीकृतधर्मं कदाचिज्जहति।

मन्त्रलिङ्गञ्च—

अग्निः पृथुर्धर्मणस्पतिर्जुषाणो अग्निः पृथुर्धर्मणस्पतिः।

यजु० १०।२९।।

पितुं न स्तोषं महो धर्माणं तविषीम्। यजु० ३४।७।।

इममञ्जस्पामुभये अकृण्वत धर्माणमग्निं विदथस्य साधनम्।

ऋक्० १०।९२।२।।

वृषा सोम द्युमाँ असि वृषा देव वृषव्रतः।
वृषा धर्माणि दधिषे।। ऋक्० ९।६४।१।।

१. धर्मकृतं=मर्यादितं विश्वम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

धर्मी स विष्णुः कुरुते समस्तं
धर्मेण युक्तं व्यभिचारहीनम् ।
एवं हि यः पश्यति धर्मिणं तं
स सर्वगं पश्यति विष्णुमेकम्।।६८५।।

सद्—४७८

सदिति—'अस् भुवि' आदादिको धातुः, तस्मात् **''वर्तमाने लट्''** (पा० ३।२।१२३) इत्यतो लडित्यनुवर्तमानेऽपि **''लटः शतृशानचावप्रथमासमानधिकरणे''** (पा० ३।२।१२४) सूत्रे पुनर्लड्ग्रहणाद् ज्ञायते क्वचित्प्रथमासमानाधिकरणेऽपि शता भवितव्यम्। अत एवास्तीति 'सत्'। शेषमेतद्विषयकं प्रागुक्तम्। ***''लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य''*** इति च भाष्यम्। सत्तालक्षणो हि भगवान् स्वेन सत्त्वेन सर्वत्र व्याप्तः। अत एव सर्वे जागतपदार्था अस्तित्वलक्षणं धर्मं भजन्ते।

सत्तालक्षणमस्तित्वं सर्वत्र ''घटोऽस्ति, पटोऽस्ति, गौरस्ति, मनुष्योऽस्ती'' त्यादिरूपेणानुस्यूतम्। किमुत बहुनकारवाच्यस्य निषेधस्याप्यस्तित्वं विना न स्थितिर्नास्ति इति दर्शनात्। तथा चात्मा न म्रियत इत्यमृतेन धर्मेण सोऽमरोऽस्ति 'सत्'। देहोऽयं षड्भावविकारानाप्नोतीत्यतो विकारित्वधर्मेण सोऽमरोऽस्ति 'सत्'। एवं सत्तालक्षणो धर्मः सर्वत्र व्याप्तस्तं सन्तं विष्णुं व्यनक्ति।

मन्त्रलिङ्गञ्च—

एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः।
ऋक्० १।१६४।४६।।

असच्च यत्र सच्चान्तः स्कम्भं तं ब्रूहि कतमः स्विदेव सः।
अथर्व० १०।७।१०।।

आविः सन्निहितं गुहा जरन्नाम महत् पदम्। अथर्व० १०।८।६।।

वेनस्तत् पश्यन्निहितं गुहा सत् यत्र विश्वं भवत्येकनीडम्।
यजु० ३२।८।।

महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ असि। यजु० ३३।३६।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

सन् विष्णुरेकः स्वकृते च विश्वे
सर्वं सता योजयते ह नित्यम् ।
नित्यो हि देही नियतं हि सत् सः
कायो विकारी स तु सत् विकृत्या।।६८६।।

असत्—४७६

असदिति—सतः प्रतिषेधोऽसत्। सतो नञा समासे नलोप। शेषं सर्वं व्युत्पादनं सता समम्। द्विधा हि वस्तुनिरूपणं विधिरूपेण निषेधरूपेण च। तत्र विधिरूपेण सन्निरूपितमस्तीति। निषेधरूपेणेदानीं निरूप्यतेऽसदिति। स स्वस्वरूपेण सदपि जगद्रूपेणा'सत्' उच्यते।

तथा हि—पञ्चीकृतपञ्चमहाभूतमयं प्रकृतिविकृतिभूतमिदं, चतुर्विंशतितत्त्वघटितं जगत्। अत्र च स व्यापकत्वेन सर्वत्र वर्तमानोऽपि बुद्धित्वरूपेण मनस्त्वरूपेण इन्द्रियत्वरूपेण न स बुद्धिरूपो, न स मनोरूपो, न स इन्द्रियरूप एवङ्कारन्निषिध्यते। यथा इक्षुविकारी गुडो नेक्षुरितीक्षुरूपत्वं तस्य निषिध्यते, रसरूपेण तत्र वर्तमानोऽपि। अत एवोच्यते—**''न सत् न चासत्सः''**।

मन्त्रलिङ्गञ्च—

अन्यदद्य कर्वरमन्यदु श्वोऽसच्च सन्मुहुराचक्रिरिन्द्रः।
ऋक्० ६।२४।५।।

असच्च सच्च परमे व्योमन् दक्षस्य जन्मन्नदितेरुपस्थे।
ऋक्० १०।५।७।।

असच्च यत्र सच्चान्तः स्कम्भं तं ब्रूहि कतमः स्विदेव सः।
अथर्व० १०।७।१०।।

बृहन्तो नाम ते देवा येऽसतः परिजज्ञिरे।
एकं तदङ्गं स्कम्भस्यासदाहुः परो जनाः ।। अथर्व० १०।७।२५।।

भवति चात्रास्माकम्—

वैकारिकं तस्य न सत्स्वरूप-
मसत्-सदुक्तः कविभिः पुराणैः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एवं हि यो वेत्ति पदं गुहस्य
स [1]मृत्स्नमूर्तौ न मनो दधाति।।६८७।।

क्षरम् ४८०; अक्षरम्–४८१

क्षरमक्षरमित्युभयं युगपद् व्याख्यायते–'क्षर सञ्चलने' भौवादिकधातोः पचाद्यचि 'क्षरम्'। क्षरस्य प्रतिषेधो'क्षरम्' इति। क्षरशब्दस्य नञा समासो, नञो नकारस्य लोपश्च। 'क्षर'शब्दो हि क्षरति सञ्चलतीति गमनशीलं जगदाह। अक्षर-शब्दश्च न सञ्चलति स्वरूपान्न विच्यवत इति जगदनुस्यूतमात्मानमाह। एवञ्च पाञ्चभौतिकं जग'त्क्षरं', तत्प्रवर्तकञ्च क्षरभिन्न'मक्षरम्'। गच्छतीति जगत् क्षरतीति क्षरमित्युभयोः समानार्थता। चक्रमित्यपि क्षरसमानार्थः। क्षराक्षररूपत्वा-द्विष्णुरेवोभयोर्वाच्यः।

मन्त्रलिङ्गञ्च–

ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः।
ऋक्० १।१६४।३६।।

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।। यजु० ४०।५।।

अक्षरेण प्रति मिम एतामृतस्य नाभावधि सं पुनामि।
ऋक्० १०।२३।३।।

तस्याः समुद्रा अधि वि क्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः।
ततः क्षरत्यक्षरं तद्विश्वमुपजीवति।। ऋक्० १०।१६४।४२।।

तस्याः समुद्रा अधि वि क्षरन्ति। अथर्व० ६।१०।२१।।

भवन्ति चात्रास्माकम्–

क्षरं जगद् दृश्यदृशास्ति दृश्यं
क्षराणि नामानि च तस्य विष्णोः।
दिने महेन्द्रः सविताऽग्निरेवं
मासानुपातेन पृथक् पृथक् सः।।६८८।।

---

१. मृत्स्नं=मृत्तिका। एतच्चोपलक्षणं पाषाणसुवर्णादिधातूनाम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एवं हि यो वेत्ति पदं क्षरस्य
क्षरेऽक्षरं पश्यति तस्य चक्षुः ।
तथा यथा यन् मनुजो पदाभ्याम्
चलाचलेनैति पदेन धाम ।।६८६।।

तत्राक्षरो जीव इलामभीप्सुः
क्षराक्षरे तत्र चरे क्षरे ते।
विक्लृप्तिरेषा भुवनेऽस्ति दृश्या
न चाक्षरे ब्रह्मणि सञ्चलत्वम्।।६६०।।

अविज्ञाता—४८२

'अविः'—'अव् रक्षणादौ' भौवादिको धातुः, तस्मात् ***''सर्वधातुभ्य इन्''*** (उणादि ४।११८) इत्युणादिः 'इन्' प्रत्ययः='अविः'। 'ज्ञातेति'-'ज्ञा अवबोधने' क्रैयादिको धातुः, तस्मात् ***''ण्वुल्तृचौ''*** (पा० ३।१।१३३) सूत्रेण 'तृच्' प्रत्ययः कर्तरि कृत्त्वात् प्रातिपदिकसंज्ञा, अनङ्दीर्घादि सौ।

एवञ्च—अविश्चासौ ज्ञातेति कर्मधारयसमासे अवति रक्षति सर्वं दीप्यते सर्वत्र सूर्यादिरूपः, शृणोति शरणागताभ्यर्थनां, गच्छति सर्वत्रान्तर्यामिरूपेण, सकलस्य विश्वस्य स्वामित्वञ्चाप्नोतीत्यर्थकोऽ'विः'। जानाति च सकलमिति 'ज्ञाता'। 'अविज्ञाता' विष्णुः। पूर्वोक्ताः सर्व एवार्था विष्णौ समन्विताः।

मन्त्रलिङ्गञ्च—

अविर्वै नाम देवतर्तेनास्ते परीवृता। अथर्व० १०।८।३१।।

गृभ्णाति रिप्रमविरस्य तान्वा शुद्धो देवानामुपयाति निष्कृतम्।
ऋक्० ६।७८।१।।

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।
यजु० ३२।१०।।

द्वौ संनिषद्य यन्मन्त्रयेते राजा तद्वेद वरुणस्तृतीयः।
अथर्व० ४।१६।२।।

भवति चात्रास्माकम्—

ज्ञानोदयो विष्णुरमोघधर्मा
करोति पूर्णं न कुतश्चनोनम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यद्यत् कृतं तेन भवेऽस्ति दृश्यं
तत्तत् तमाख्याति च निर्विकल्पम्।।६६१।।

यद्वा-अविशब्दः प्रकृतेर्वाचकः, तस्या अवेर्ज्ञाता अविज्ञाता। यथाऽजेति प्रकृतेर्नाम तथैवाविरपि प्रकृतेर्नाम। तत्र मन्त्रलिङ्गञ्च—

अविरासीत् पिलिप्पिला। यजु० २३।१२।।

योऽयं 'पिलिप्पिला' वैदिकः शब्दस्तस्थैवापभ्रंशो लोके 'पिल्पिला' शब्दः। लोकेऽपि च पश्यामः- कुम्भकारो घटान् चिकीर्षुः पूर्व मृदं मृद्नाति, अवशोषयति च मृदः पिल्पिलामवस्थाम्। एवं हि सर्वत्रैवोह्यम्। यथा भोजनार्थं करपट्टिकां पिपक्षुः पिषाणं मृद्नन् पिल्पिलमवशोष्य करपट्टिकां शष्कुलीं वा निर्मिमीते, तथैव प्रथमावस्थायां सिसृक्षुर्भगवानपि प्रकृतिं पिलिप्पिलां कुरुते, ततः कालातियोगेन संघातमापन्नमिदं जगद् व्यवहारायोपकल्पते।

भवतश्चात्रास्माकम्—

जगत् सिसृक्षुः प्रकृतेर्विकारान्
पिलिप्पिलारूपमुपाददानः ।
करोति विश्वं मनुजैरतर्क्यं
स्वयं ह्यविज्ञातृपदं दधानः।।६६२।।

नरोऽनुकुर्वन् निजकर्मसिद्ध्यै
पिलिप्पिलं रूपमुपाददानः ।
करोति रूपाणि यथार्हकाणि
स्मरन् ह्यविज्ञातृपदं हृदिस्थम्।।६६३।।

सहस्रांशुः—४८३

'सहस्र'शब्दोऽनन्तपर्यायः। 'अंशु'शब्दश्चन्द्रांशुनामव्याख्याने व्युत्पादितः। सहस्रमनन्ता अंशवो रज्जुस्थानीयाः करस्थानीया वा किरणा यस्य स 'सहस्रांशु' रिति। व्यापना'दशु'रित्यर्थानुगमादंशुशब्दो ज्ञानं प्रभां वाचष्टे। ज्ञानं प्रभा वा स्वविषयं व्याप्नोति। अनन्तज्ञानानन्तप्रभश्च विष्णुरतः 'सहस्रांशुः'।

मन्त्रलिङ्गञ्च—

सहस्रशृङ्गो वृषभस्तदोजा विश्वाँ अग्ने सहसा प्रास्यन्यान्।

ऋक्० ५।१।६।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सहस्रशृङ्गो वृषभो जातवेदा घृताहुतः सोमपृष्ठः सुवीरः।

अथर्व० १३।१।१२॥

प्र प्यायस्व प्र स्यन्दस्व सोम विश्वेभिरंशुभिः। ऋक्० ६।६७।२८॥

आप्यायस्व मदिन्तम सोम विश्वेभिरंशुभिः। यजु० १२।११४॥

भवति चात्रास्माकम्—

सहस्रदीप्तिर्भगवान् प्रसिद्धः
सहस्रबोधोऽपि स एव तस्मात्।
सूर्यो यथासंख्यकरैर्व्यनक्ति
स्वं विश्वमेतच्च सहस्ररश्मिः॥६६४॥

विधाता—४८४

'वि'पूर्वको डुधाञ् धारणपोषणयो'र्जौहोत्यादिको धातुः, तस्मा'त्तृच्' प्रत्ययः कर्तरि। अनिट् चायन्धातुः। सावनङ् दीर्घादि='विधाते'ति। विदधाति करोति विश्वं विविधैः फलयोगैर्नियमैश्च पालयति धारयति वेति 'विधाता' विष्णुः। विष्णुर्हि जीवानां यथा जात्यायुर्भोगभोगाय नानाविधं प्राणिशरीरं विधत्ते।

मन्त्रलिङ्गञ्च—

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।

यजु० ३२।१०॥

विश्वकर्मा विमना आद्विहाया धाता विधाता परमोत संदृक्।

ऋक्० १०।८२।२॥

यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा।

यजु० १७।२७॥

धाता विधाता भुवनस्य यस्पतिर्देवः सविताभिमातिषाहः।

अथर्व० ५।३।६॥

भवति चात्रास्माकम्—

धातुर्विधाता भगवान् स विष्णु-
र्जायाञ्च जन्यञ्च[1] समानकाले ।
दधाति पुष्णाति पृथक् पृथक्[2] सः
धाता विधाता कथितः स सन्दृक्[3]॥६६५॥

१. जनिष्यमाणम्। २. पृथक्=अंगभेदेन पार्थक्यम्। ३. सन्दृक्=समानदृष्टिः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कृतलक्षणः—४८५

'डुकृञ् करणे' तानादिको धातुः, तस्मात्कर्मणि 'क्तः'। अनिडयं गुणाभावश्च कित्त्वात् 'कृतः' इति। 'लक्षणम्'-'लक्ष दर्शनाङ्कनयो'रिति चौरादिको धातुः, तस्मा'ण्णिच्' **"लक्षेरट् मुट् च"** (उणादि० ३।७) इत्युणादिसूत्रेण 'नः' प्रत्ययः 'अडागमश्च', णिलोपो णत्वं 'लक्षण'मिति। लक्षयति अङ्कयति वा 'लक्षणम्'। कृतानि लक्षणानि परिचायकानि, चिह्नविशेषाणि येन स 'कृतलक्षणः'।

भगवता हि प्रत्येकं वस्तु तदन्तरङ्गमव्यक्तं भावं व्यक्तीकर्तुं केनचिच्चिह्नविशेषेण विशेषितम्। यथा गोरेभणेन व्यज्यत इयं वृषस्यतीति, एवं महिष्यपि। एतद्धि रेभणशब्दनलक्षणं तदन्तरङ्गमव्यक्तं कामं ज्ञापयति।

व्यवायान्तर्गतं विषं नेत्रविकारादिलक्षणैर्व्यक्तं भवति। एवं सूर्यादयो ग्रहोपग्रहास्तमव्यक्तं स्वव्यवस्थापकं लक्षणभूता व्यञ्जन्ति। एवं कृत्वा बहिरागतं चिह्नविशेषमन्तःस्थं गुणं दोषं वा प्रकटयति।

अथापि च ये जागताः पदार्थास्ते सर्वे केनचिच्चिह्नविशेषेण चिह्निताः, येन तेषां पृथक् पृथक् परिचितिः स्यात्। समानजातीया अपि पृथक् चिह्नाङ्किताः किमुत विजातीयाः। एवञ्च स कृतलक्षणत्वेन सर्वत्र व्याप्तः। एवं सर्वत्रोहनीयम्।

मन्त्रलिङ्गञ्च—

उपेदहं धनदामप्रतीतं जुष्टां न श्येनो वसतिं पतामि ।
इन्द्रं नमस्यन्नुपमेभिरर्कैर्यः स्तोतृभ्यो हव्यो अस्ति यामन्।।

ऋक्० १।३३।२।।

दिशो यश्चक्रे मूर्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः।।

अथर्व० १०।७।३२।।

यस्य भूमिः प्रमान्तरिक्षमुतोदरम्।
दिवं यश्चक्रे मूर्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः।। अथर्व० १०।७।३२।।

कस्मादङ्गाद् दीप्यते अग्निरस्य कस्मादङ्गात् पवते मातरिश्वा।
कस्मादङ्गाद् विमिमीतेधि चन्द्रमा मह स्कम्भस्य मिमानो अङ्गम्।।

अथर्व० १०।७।२।।

त्रेधा भागो निहितो यः पुरा वो देवानां पितॄणां मर्त्यानाम्।

अथर्व० ११।१।५।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवन्ति चात्रास्माकम्—

स विष्णुरेकः स्वमनिन्द्यसत्त्वं
प्रकाशयन् लक्षणमातनोति ।
तथा यथा व्यक्ततरं विकारं
बहिर्गतं लक्षणमातनोति ॥६६६॥

कृता व्यवस्था सुखदेन[१] येन
सुखे[२] शरीरे किमु वा जगत्याम् ।
गायन्ति याचन्ति यथाभिलाषं
नमन्ति तं वा कृत[३] लक्षणं ते ॥६६७॥

सैषा व्यवस्था प्रतिवस्तु वीक्ष्या
मूलं त्वरिष्टिस्य समग्रमस्मिन् ।
यत्तत्त्वविद्भिः प्रपदं व्यकारि[४]
शास्त्रे, तदर्हं निचितं हि यत्नात् ॥६६८॥

एवं हि यो वेत्ति स वेत्ति सूक्ष्मं[५]
स्वयं भवे दुर्मतिमास्थितो वा।
ज्ञानं पवित्रं कुरुते पवित्रं
तैर्दुर्गतैर्दुर्गमितं मनुष्यम् ॥६६९॥

ज्ञानान्यनेकानि निरञ्जनं तं
व्यञ्जन्त्यसक्तं भुवने शयानम् ।
सच्छ्रद्धया नम्रतया च तज्ज्ञान्
संसेव्य पृच्छेत् परमादरेण ॥७००॥

ज्ञानस्य लिङ्गम्, तपसश्च लिङ्गम्
नपुंसकं लोकमतं प्रसिद्धम् ।
भोगान् परित्यज्य मनो निदध्यात्
शास्त्रे गुरूणां वचने च यत्नात् ॥७०१॥

❖ ❖ ❖

१. विष्णुना। २. सुखाते। ३. विष्णुम्। ४. विपूर्वकः कृविक्षेपे कर्मणि लुङि। ५. विष्णुम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः।
आदिदेवो महादेवो देवेशो देवभृद्गुरुः ।।६५।।

४८६ गभस्तिनेमिः, ४८७ सत्त्वस्थः, ४८८ सिंहः, ४८९ भूतमहेश्वरः।
४९० आदिदेवः, ४९१ महादेवः, ४९२ देवेशः ४९३ देवभृद्गुरुः।।६३।।

गभस्तिनेमिः—४८६

'गभस्तिरिति'—'भस भर्त्सनदीप्त्यो'रिति जौहोत्यादिकश्छान्दसो धातुः। धनधातुवदस्यापि भाषायां प्रयोगो नाम्नां छन्दोवद्भावाद्वा। ***'वसेस्तिः'*** (उणा० ४।१८१) इत्युणादिर्बाहुलकादत्रापि 'तिः' प्रत्ययः। ***''तितुत्रत०''*** (पा०७।२।९) इति सूत्रेणेण्निषेधः। पृषोदरादित्वाद् वर्णागमो 'भकारस्य गकारः'।

'नेमिः'—'णीञ् प्रापणे' भौवादिको धातुः ***''नियो मिः''*** (उणादि० ४।४४) इत्युणादिसूत्रेण 'मिः' प्रत्ययो गुणः, नेडयम्। एवञ्च गभस्तीन् मयूखान्नयति प्रापयति सर्वत्र सर्वस्य प्रकाशायेति 'गभस्तिनेमि'र्भगवान् विष्णुः।

किरणसमूह एव प्रकाशोऽतः 'सहस्रांशुः' सूर्य इति व्याख्यातचरः। यथाग्नेरधिपतिः सूर्यो लोके प्रकाशकः प्रसिद्धः, एवं यः सर्वेषां प्रकाशकानां प्रकाशको विष्णुः स 'गभस्तिनेमि'रुच्यते। बृहतां भासकत्वाद् 'बृहद्भानुः' अपि स एव विष्णुः।

मन्त्रलिङ्गञ्च—

पाहि नो अग्ने रक्षसः पाहि धूर्तेरराव्णः ।
पाहि रीषत उत वा जिघांसतो बृहद्भानो यविष्ठ्य।।
ऋक्० १।३६।५।।

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्। यजु० ३१।१८।।

नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरा। अथर्व० २०।५४।३।।

स प्रत्यङ् विश्वा भुवनानि तस्थावप्रयुच्छन् तरणिर्भ्राजमानः।
ऋक्० १०।८८।१६

यो रोहितो वृषभस्तिग्मशृङ्गः पर्यग्निं परिसूर्यं बभूव।
अथर्व० १३।१२५।।

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। ऋक्० १।५०।४।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवन्ति चात्रास्माकम्—

गभस्तिनेमिः कथितो ह सूर्यः
प्रकाशकोऽनन्तमयूखगर्भः ।
तस्यापि यो भासयिता स विष्णु-
र्गीतो बृहद्भानुपदेन वेदे ॥७०२॥

आत्मा शरीरेऽस्ति गभस्तिनेमिः
पृथु प्रभावत्कुरुते शरीरम् ।
मृतं शरीरं सकलं यथावत्
सच्चापि तेजोरहितं यतस्तत्[1] ॥७०३॥

एवं हि यो वेत्ति गभस्तिनेमिं
स दीपकानां कुरुते विकासम् ।
ज्योतिः पुरस्कृत्य तदर्थलिङ्गं
गभस्तिनेमौ रमते विशङ्कः ॥७०४॥

सत्त्वस्थः—४८७

'सत्त्वस्थः' इति-सतो भावः सत्त्वम् ***"तस्य भावस्त्वतलौ"*** (पा० ५।१।११९) इत्यनेन भावे ताद्धि'तस्त्व'प्रत्ययः। तद्रूपे सुप्युपपदे 'ष्ठा गतिनिवृत्तौ' धातोः ***'सुपि स्थः'*** (पा० ३।२।४) इति सूत्रेण 'कः' प्रत्ययः कर्तरि आल्लोपश्च। सत्त्वं सद्भावः सत्त्वाख्यो गुणो वा प्रकाशरूपस्तमधितिष्ठतीति 'सत्त्वस्थः'।

हृदयं मनश्चापि सत्त्वाभिधाने, मनसो हि हृदये निवासः। अत्र च **'हृत्प्रतिष्ठं यदजिरम्'** (यजु० ३४।६) इति मन्त्रलिङ्गम्। एवञ्च भगवान् विष्णुः शुद्धप्रकाशरूपे सत्तालक्षणे स्वरूपे तिष्ठतीति सत्त्वस्थः।

अथवा- हृदये मनसि वा विश्वेषां प्राणिनां भगवान् तिष्ठति। पुण्डरीकाक्षनामवत्सर्वं व्याख्येयम्।

लोकेऽपि च दृश्यते-षड्भावविकारमयमिदं सर्वं स्वकारेण सत्तालक्षणे तिष्ठति। एवं सत्त्वस्थरूपेण गुणेन विश्वं व्यश्नुवानः 'सत्त्वस्थ' उच्यते विष्णुः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रलिङ्गञ्च—

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।।
यजु० ३१।१८।।

उद्वयं तमसस्परि स्वः पश्यन्त उत्तरम्।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ।। यजु० २०।२१।।
ततः परिष्वजीयसी देवता सा मम प्रिया। अथर्व० १०।८।२५।।
प्र वो महे मन्दमानायान्धसोऽर्चा विश्वानराय विश्वाभुवे।
यजु० ३३।२३।।
न तं विदाथ य इमा जजानान्यद् युष्माकमन्तरं बभूव।
ऋक्० १०।८२।७।।
कविर्मनीषी परिभूः स्वयंभूः। यजु० ४०।८।।

भवतश्चात्रास्माकम्—

सत्तैव सत्त्वं हृदयं मनो वा
सत्त्वं गुणो वा सततप्रकाशः ।
तं योऽधिकुर्वन् स्थितिमातनोति
'सत्त्वस्थ'नाम्ना भगवान् स विष्णुः।।७०५।।

यः शुद्धसत्त्वो भजते स्वकान्तः
सत्त्वस्थभावं लभते स मर्त्यः ।
रजस्तमो वा निजवर्गयुक्तं
तं सत्यसन्धं न वियौति [1]मार्गात् ।।७०६।।

सिंहः—४८८

'सिंहः' इति—'षिच् क्षरणे' तौदादिकधातोः ***"सिचेः संज्ञायां हनुमौ कश्च"*** (उणादि० ५।६२) इत्युणादिसूत्रेण 'कः' प्रत्ययो धातोरन्तादेशो 'हकारो' 'नुम्' च=सिंहः। यद्वा-'हिंसि हिंसायां' धातोः पचादिलक्षणोऽ'च्' पृषोदरादित्वा'द्वर्णविपर्ययो' 'नुम्' च। यद्वा-काशकृत्स्नमते 'सिहि' धातुर्हिंसार्थकः, तस्माद् इदित्त्वान्नुमि

१. मार्गः—शुद्धस्वरूपम्, मृजूष् शुद्धौ। मार्गो विष्णुः, वैष्णवमार्गाद्वा।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'पचाद्यचि' च='सिंहः'। एवञ्च सिञ्चति मेघैः पृथिवीं कर्मफलैर्वा जगद् इति 'सिंहः'।

हिनस्ति हिंसति वा कालक्रमेण प्राणिनामायूंषि इति 'सिंहः', अतुलपराक्रमो विष्णुः प्रतिक्षणं प्राणिनामायुर्न्यूनयन् तानन्ततो मृत्युभाजो विधत्ते। इत्थञ्च सर्गान्तं जगतः सर्वे भावाः क्षीयन्ते। किमुत बहु-कल्पस्याप्यायुषश्चतुर्दशमन्वन्तराणि प्रमाणमस्ति। ततश्च यदिच्छया कल्पाख्यः कालोऽपि विलीयतेऽतः स 'सिंहः'।

अत एव कस्यचिदतुलबलवत्तां दिद्योतयिषुः कश्चित्तं सिंहेनोपमिमीते, यथाभिषक्केसरीति। केसरीशब्दः सिंहपर्यायः सिंहसदृशः तेजस्त्वपराक्रमत्वादिगुणयुक्तो निर्भीकश्च भिषगित्यर्थः। भगवांश्च स्वयमचरः सन् सर्वं क्षारयतीत्यतः 'सिंहः'। इतरो लौकिकोऽपि 'सिंहः' एतस्मादेव यतो हि स प्राणिनामायूंषि क्षारयति हिनस्ति।

मन्त्रलिङ्गञ्च—

सिंहं नसन्त मध्वो अयासं हरिमरुषं दिवो अस्य पतिम्।

ऋक्० ९।८९।३।।

उभे त्वष्टुर्बिभ्यतुर्जायमानात् प्रतीची सिंहं प्रति जोषयते।

ऋक्० १।९५।५।।

एना व्याघ्रं परिषस्वजानाः सिंहं हिन्वन्ति महते सौभगाय।

अथर्व० ४।८।७।।

भवति चात्रास्माकम्—

सिंहः स विष्णुर्हि जगद् विरच्य
करोति तत्क्षारगुणेन युक्तम् ।
क्षारत्वमाप्नोति न यः कदाचिद्
यो ह्यक्षरश्चास्ति स एव सिंहः ।।७०७।।

युक्तमुक्तं भर्तृहरिणा—

यदा मेरुः श्रीमान्निपतति युगान्ताग्निदलितः
समुद्राः शुष्यन्ति मकरनिकरग्राहगलिताः।
धरा गच्छत्यन्तं धरणिधरपादैरपि धृता,
शरीरे का वार्ता करिकरभकर्णाग्रचपले ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भूतमहेश्वरः—४८९

'भूतमहेश्वरः' इति—भूतः-महत्-ईश्वर-शब्दाः पृथक्-पृथक् व्युत्पादितचराः। भूतानां भवनधर्मकाणां त्रिकालभावानां महान् प्रधान एक ईश्वरो नियामकः कर्मस्वाशु प्रेरयिता 'भूतमहेश्वरो' विष्णुः।

लोके यथा—पृथिव्यामुप्तं बीजं यथाकालमाशु कार्यान्यत्वमापद्यते अंकुररूपतामाप्य च प्रकटयत्यात्मानम्, एवं सर्वत्र विश्वे व्याप्तो दृश्यते 'भूतमहेश्वरः'। रजोवीर्ये प्राप्तसंयोगे यथाकालं दशमे मासि प्रसवतामापद्येते। सर्वत्रोहनीयम्।

मन्त्रलिङ्गञ्च—

भवाशर्वौ मृडतं माभि यातं भूतपती पशुपती नमो वाम्।
अथर्व० ११।२।१।।

य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम।
यजु० २३।३।।

यो भूतानामधिपतिर्यस्मिंल्लोका अधिश्रिताः ।
य ईशे महतो महाँस्तेन गृह्णामि त्वामहम्०।। यजु० २०।३२।।
हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः परितेक आसीत्।
ऋक्० १।१२१।१।।

भवति चात्रास्माकम्—

महेश्वरो भूतपदादिमोऽयं
विना विरामं त्वरया युनक्ति।
विश्वं समस्तं रसभावमायन् [1]
स्वयं स्थिरः [2] ***पश्यति हेमगात्रः*** [3] ***।।७०८।।***

आदिदेवः—४९०

'आदिदेवः' इति-'आदि'शब्दो जगतः प्राक्तनीं कैवल्यावस्थामाह देवशब्दश्च ज्योतिःस्वरूपतामाह। एवञ्च यः सृष्टेः प्राक्कालं कैवल्येन स्वरूपेणावतिष्ठते स आदिदेवः। अत एवोक्तं **"तमसः परस्तात्"** (यजु० ३१।१८) इति।

१. षड्भावविकारानापादयन्। २. स्थिरः=कूटस्थः। ३. हेमगात्रः=हेमाङ्गो विष्णुः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथवा—आदत्ते ग्रसति जगत्प्रलयकालं स 'आदिः'। दत्ते विसृजति च बहिः सर्गकाले स 'देवः'। आदिश्चासौ देव इत्यादिदेवो' विष्णुः। तस्यैष आदानप्रदानरूपो गुणश्च सर्वत्र जगति प्रसृतस्तं प्रतिपदमाचष्टे।

यथा सूर्यो रसानादत्ते, स एव पुना रसं सर्वत्र ददाति। अग्नीषोमीयं जगत्, आदिदैव्यं वा जगदित्यनर्थान्तरमिति।

मन्त्रलिङ्गञ्च—

त्वमग्ने प्रथमो अङ्गिरा ऋषिर्देवो देवानामभवः शिवः सखा।

ऋक्० १।३१।१।।

एषो ह देवः प्रदिशोऽनु सर्वाः पूर्वो ह जातः स उ गर्भे अन्तः।

यजु० ३२।४।।

यो जात एव प्रथमो मनस्वान् देवो देवान् क्रतुना पर्यभूषत्।

ऋक्० २।१२१।१।।

एको ह देवो मनसि प्रविष्टः प्रथमो जातः स गर्भे अन्तः।

अथर्व० १०।८।२८।।

भवति चात्रास्माकम्—

स आदिदेवो भगवान् वरेण्यो
विक्रीडयन्नेति[1] जगत्समस्तम्।
आदानमादिर्निहितं हि यस्मिन्
ददाति चान्तं स उ देव एकः।।७०६।।

महादेवः—४६१

'महादेव' इति—महाँश्चासौ देवो 'महादेवः'। 'मह'च्छब्दो 'देव'शब्दश्च व्युत्पादितचरौ। 'महच्'छब्दः पूजार्थकः, 'मह पूजायां' धातोर्निष्पन्नः। स च यथा विष्णोरभिधानं तथा सूर्यस्यापि, द्वयोरेकरूपत्वात्केवलं नाममात्रं भिन्नमिति।

तथा चेदं प्रात्यक्षिकं यत् सर्वेषु विद्यमानेष्वपि ग्रहनक्षत्रादिषु रात्रौ सूर्ये च गते दृष्टेरगोचरतां नैतन्नक्षत्रादिकं तथा पूज्यं लोकस्य, सूर्यो यथा जागरितस्य। लोके च शरीरे आत्मा महादेवो भवति, समनस्कानीन्द्रियाणि देवास्तेष्वयमेव पूज्यः।

---

१. विविधभावैः क्रीडयन्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एवमेव सकले विश्वे विष्णुः सकलस्य चराचरस्य प्रवर्तयिता पूजार्हः। सर्वञ्चेदं जगत् परस्परं विजिगीषुताख्येन गुणेन युञ्जानो लोके 'महादेवः' उच्यते।

मन्त्रलिङ्गञ्च—

बण्महाँ२।।असि सूर्य, बडादित्यमहाँ२।।असि।
महस्ते सतो महिमा पनस्यते अद्धा देव महाँ २।।असि।।

यजु०३३।३६।।

देवो देवानामसि मित्रो अद्भुतो वसुर्वसूनामसि चारुरध्वरे।

ऋक्० १।६४।१३।।

वट् सूर्य श्रवसा महाँ असि सत्रा देव महाँ असि।

ऋक्० ८।१०१।१२।।

य ईशे महतो महाँस्तेन गृह्णामि त्वामहम्०। यजु० २०।३२।।
सोऽर्यमा स वरुणः स रुद्रः महादेवः। अथर्व० १३।४।४।।
सोऽवर्धत स महानभवत् स महादेवोऽभवत्। अथर्व० १५।१।४।।

भवति चात्रास्माकम्—

विष्णुर्महादेवपदेन गीतः
स दीप्यमानः स्तुतिमभ्युपैति ।
तथा यथा भूषणभूषिताङ्गं
वपुस्तमाख्याति च भूषणं स्वम्।।७१०।।

देवेशः—४९२

'देवेशः' इति-'देव'शब्दो व्युत्पादितचरः। 'ईश'शब्दश्च 'ईश ऐश्वर्ये' धातोः ***"इगुपधज्ञाप्रीकिरः कः"*** (पा० ३।१।१३५) इति कः प्रत्ययः। ईष्ट इती'शः'। देवानामीशो 'देवेशः' देवशब्दस्य इन्द्रादयो देवाः समनस्कानीन्द्रियाणि च वाच्यार्थः। एवञ्च देवानामीशस्तत्तदधिकृतकर्मसु प्रेरको नियामको व्यवस्थापको वा 'देवेशो' विष्णुः।

आत्मापि मनसेन्द्रियाणां कर्मसु प्रवर्तकत्वा 'देवेशः', मनोऽपि तथा 'देवेशः'। एवं भगवान् देवेशत्वरूपस्वसामर्थ्येन सर्वत्र व्याप्तः।

मन्त्रलिङ्गञ्च—

स देवानामधिपतिर्बभूव सो अस्मासु द्रविणमादधातु।

अथर्व० ७।५।२।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यो देवेष्वधि देव एक आसीत् कस्मै देवाय हविषा विधेम।

ऋक्० १० ।१२१ ।८ ।।

यो जात एव प्रथमो मनस्वान् देवो देवान् ऋतुना पर्यभूषत्।

अथर्व० २० ।३४ ।१ ।।

तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम्।

यजु० २५ ।१८ ।।

भवति चात्रास्माकम्—

विष्णुः स देवेश इहास्ति बोध्यः
सूर्योऽपि देवेश इहास्ति सिद्धः।
मनोऽपि देवेशमुदाहरन्ति
देवेश आत्मा कथितः स देही।।७११।।

देवभृद्गुरुः—४६३

'देवभृद्गुरु'रिति-'देव'शब्दो 'गुरु'शब्दश्च व्युत्पादितचरौ। भृच्छब्दः, पालनपोषणार्थको 'डुभृञ्' धातुर्जौहोत्यादिकः, तस्मात् 'क्विप्' 'तुक्' च=भृदिति। देवान् बिभर्ति=देवभृच्चासौ गुरुश्चेति 'देवभृद्गुरु'रिति।

देवं रोचिष्णुं विश्वं बिभर्ति, तत्र च स्वनिगूढस्वरूपं प्रत्यक्षमिव दर्शयति द्रष्टुकामेभ्यस्तत्त्वज्ञानिभ्यः संजनितव्यक्तलक्षणैः।

यथा—नियतकालमाम्रवृक्षेषु मञ्जर्युद्गमो, वसन्तागमं गृणाति शंसति उपदिशति वा। दिनानां वृद्धिह्रासौ उत्तरायणं, दक्षिणायनञ्च व्यंक्तः। मयूराणां बर्हपातो बर्होदयो वा तं तं नियतं कालं व्यनक्ति। विष्णोरयमेवोपदेशनमार्गः। एवञ्च स विष्णुरेककाले स्वोभयात्मकेन गुणेन विश्वं व्यश्नुवानः सन् 'देवभृद्गुरु'रित्युक्तो भवति।

मन्त्रलिङ्गञ्च—

मित्राय पञ्च येमिरे जना अभिष्टिशवसे।
स देवान् विश्वान् बिभर्ति।। ऋक्० ३ ।५६ ।८ ।।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।

यजु० १३ ।४ ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्कम्भो दाधार द्यावापृथिवी उभे इमे स्कम्भो दाधार उर्वन्तरिक्षम्।
स्कम्भो दाधार प्रदिशः षड्उर्वी स्कम्भ इदं विश्वं भुवनमाविवेश ।।

अथर्व० १० ।७ ।३५ ।।

सर्वा ह्यस्मिन् देवता गावो गोष्ठ इवासते। अथर्व० ११ ।८ ।३२ ।।

मन्त्रो गुरुः पुनरस्तु सो अस्मा अनु मृक्षीष्ट तन्वं दुरुक्तैः।

ऋक्० १ ।१४७ ।४ ।।

पुनानश्चमूजनयन्मतिं कविः सामो देवेषु रण्यति।

ऋक्० ६ ।१०७ ।१८ ।।

भवन्ति चात्रास्माकम्—

स देवभृद् विष्णुरिदं विरच्य
सहैव लोकेन च वक्ति कालम् ।
भूतं भवन्तं बहुधा च भव्यं
तच्छाकुनं शास्त्रमुदाहरन्ति ।।७१२।।

वृष्टिर्यदा सामयिकी न भूता
दुर्भिक्षतायाः कथनं तदेतत् ।
रोगोदयो राष्ट्रविनाशकर्ता
पापेऽतिवृद्धे तदरिष्टमाहुः[१] ।।७१३।।

स देवभृत् पक्षिमुखैर्ब्रुवाणः
स्वं नाम सार्थं कुरुते मतं मे ।
तथा यथा सर्वसमृद्धगात्रः
क्रियाः समस्ताः कुरुते [२]सनात्मा ।।७१४।।

❖ ❖ ❖

---

१. अरिष्टलक्षणञ्च चरके—

क्रियापथमतिक्रान्ताः केवलं देहमाप्लुताः।
चिह्नं कुर्वन्ति यद्दोषास्तदरिष्टं निरुच्यते ।।

इन्द्रियविमाने (अ० १० श्लो० २६)

२. सना=सदा, आत्मा=शरीरी। विकलाङ्गो न तथा प्रवर्तते यथा सकलाङ्गः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद् भोक्ता कपीन्द्रो भूरिदक्षिणः।।६६।।

४६४ उत्तरः, ४६५ गोपतिः, ४६६ गोप्ता, ४६७ ज्ञानगम्यः, ४६८ पुरातनः। ४६६ शरीरभूतभृद्, ५०० भोक्ता, ५०१ कपीन्द्रः, ५०२ भूरिदक्षिणः।।६६।।

उत्तरः—४६४

उत्तरः—''इति—'उत्पूर्वकः'' तृ प्लवनसन्तरणयो' रिति भौवादिको धातुः, तस्मात् ***''अकर्तरि च कारके''*** इत्यधिकारे ***''ऋदोरप्''*** (पा० ३।३।५६) इति सूत्रेण 'अप्' प्रत्ययो, गुणो रपरश्चर्त्त्वं दस्य 'तः'।

यद्वा—उदिति उत्कृष्टवाचिन 'उच्'छब्दात् ***''द्विवचनविभज्योपपदे तरबीयसुनौ''*** (पा० ५।६।५७) सूत्रेण द्वयोरेकस्यातिशये द्योत्ये 'तरप्'प्रत्ययः। 'उत्तरो' नाम विष्णुः। यतो हि स विश्वस्य तरणसाधनो विश्वस्मादूर्ध्वङ्गतश्च भवति।

मन्त्रलिङ्गञ्च—

विश्वस्मादिन्द्र उत्तरः। अथर्व० २०।१२६।१।।
नकिरिन्द्र त्वदुत्तरो न ज्यायाँ अस्ति वृत्रहन्।
न किरेवा यथा त्वम्।। ऋक्० ४।३०।१।।
नास्मै तृणं नोदकमा भरन्त्युत्तरो धुरो वहति प्रदेदिशत्।
ऋक्० १०।१०२।१०।।
उद् वयं तमसस्परि स्वः पश्यन्त उत्तरम्। यजु० २०।२१।।

लोकेऽप्येवं विचार्यते—आत्मशरीरयोः श्रेष्ठत्वे विचार्यमाणे विश्वेन्द्रियोपकरण-युताच्छरीरादात्मैव श्रेष्ठतरः। 'उत्तरः' सूर्य उत्थिततर इति सर्वत्र योजनीयम्।

भवति चात्रास्माकम्—

स उत्तरो विष्णुरिदं समस्तं
वितत्य तत्रास्ति न तेन लिप्तः।
तथा यथात्मा कथितोऽस्ति देही
देहेन नाक्तस्तत उत्तरः सः ।।७१५।।

गोपतिः—४६५

'गोपति'रिति—'गम्लृ गतौ' भौवादिकाद्धातोः ***''गमेर्डोस्''*** (उणादि० २।६८)

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्यौणादिको 'डोस्' प्रत्ययो, डित्त्वाट्टिलोपो='गो'रिति सिध्यति। 'पा रक्षणे' आदादिकाद्धातोः **''पातेर्डतिः''** (उणादि० ४।५८) इति 'डतिः' प्रत्ययः टिलोपश्च, डित्यभस्यापीति नियमात्='पतिः'। गोशब्दस्य सर्वनामस्थाने ***''गोतो णित्''*** (पा० ७।१।९०) इति णिद्वद्भावविधानात् णिन्निमित्तका वृद्धिः। तेन गौः गावौ गावः, गां गावौ इत्यादीनि रूपाणि भवन्ति। 'गो'शब्दः सास्नालांगूलवतः पशोर्वाचकः, वाग् भूमिश्चाप्यस्य वाच्यार्थः। तत्र प्राञ्चः—***'गावो घृतस्य मातरः'।***

एवञ्च—गावो वाचो, गावः पशवो गौर्भूमिश्च विश्वनिर्माणे कारणमिति भावार्थः। एवञ्च गोपतिः चतुष्पदां गवां वाचां भूमेश्च रक्षक इत्यर्थः। अत एव विष्णु'र्गोपतिः'। अथवा—सर्व एव पशवो 'गो'शब्दाभिधाः, गच्छतीति गौरित्यर्थात्। जातेर्भेदान्नामभेदः पशूनां, व्यवहारसौकर्याय।

गौणेन नाम्नेन्द्रियाण्यपि 'गावः' उच्यन्ते, यतो हि तानि विषयान् प्रति गच्छन्ति। मनोऽपि दूरं दूरतरञ्च गमनाद् 'गौ'रित्युक्तं भवति। आत्मापि देहाद्देहान्तरं गच्छतीति 'गौ' रुक्तो भवति। देहोऽपि 'गौ'र्देशाद् देशान्तरं गमनात्। इत्थं स 'गोपति' र्भगवान् विष्णुः सर्वत्र व्याप्तः। प्राथ्यर्ते गृह्यते वा। एवं कल्पनावैविध्ये चास्मदिमानि पद्यानि स्मर्तव्यानि—

दृश्यं काव्यं जगद् विष्णोः, श्रव्यं वेद उदाहृतः।
जगद्वेदस्य व्याख्यानं, वेदो विश्वप्रकाशकः।।१।।

लोकज्ञो यश्च वेदज्ञो, वेदज्ञो यश्च लोकवित्।
वाक्यं तस्य प्रमाणं, स्यादितरस्तत्रापराध्यति।।२।।

लोकज्ञो न च वेदज्ञो, वेदज्ञो न च लोकवित्।
एकपक्षखगस्येव, ज्ञानं तस्यावसीदति।।३।।

एवं लोकवेदानुसारं विविधमूहितव्यम्।

मन्त्रलिङ्गञ्च—

यो अश्वानां यो गवां गोपतिर्वशी य आरितः कर्मणि कर्मणि स्थिरः।
ऋक् १।१०१।४।।

त्वामिन्मे गोपतिं विश्व आहा न इन्द्रः सुमतिं गन्त्वच्छ।
ऋक् ७।१८।४।।

अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे।
सूनुं सत्यस्य सत्पतिम्।। अथर्व० २०।२२।४।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ते सत्येन मनसा गोपतिं गा इयानास इषणयन्त धीभिः।

अथर्व० २०।६१।८।।

भवतश्चात्रास्माकं गोपतिशब्दमधिकृत्य—

स गोपतिर्विष्णुरुदात्तवीर्यो
गां पाति भूमिं बत पाति वाचम् ।
आत्मा मनः खानि वपुश्च सर्वं
गौस्तन्मिथः पाति जगत् प्रसिद्धम् ।।७१६।।

एवं हि यो वेत्ति गवां पतिं तं
विष्णुं जगत्यां विततं समन्तात् ।
स एव योगी स हि पण्डितो वा
स एव गोपालपदेन गीतः ।।७१७।।

गोप्ता—४६६

'गोप्ते'ति—गुपूरक्षणे' भौवादिको धातुः, तस्मात्तृच् तन् वा औणादिकः। ***'गुपूधूपविच्छि०'*** (पा० १।२८) इति सर्वत्र प्राप्त 'आय' प्रत्यय ***'आयादय आर्धधातुके वा'*** (पा० ३।१।३१) इत्यनेनार्धधातुके विकल्प्यते। ***''स्वरतिसूतिसूयतिधूञूदितो वा'*** (पा० ७।२।४) इति सूत्रेणोदित्त्वादिडपि विकल्प्यते। तत्रोभयाभावपक्षे सावनडादौ सति 'गोप्ते'ति। गोप्ता रक्षकः स च विष्णुरेव सर्वस्य जगतो गोप्तृत्वात्।

अन्नं भुक्तं बहुधा विपरिणममानं धातूपधातून् मलोपमलांश्च जनयति। गोप्त्रा विष्णुना कृतव्यवस्था वातपित्तकफाश्च पञ्चधा विभक्ताः सकलं विश्वं व्याप्नुवन्ति। इति दिङ्मात्रमुदाहृतम्।

मन्त्रलिङ्गञ्च—

अग्निर्मे गोप्ता मरुतश्च सर्वे विश्वे देवा अभिरक्षन्तु पक्वम्।

अथर्व० ११।१।३३।।

अग्निर्मा गोप्ता परिपातु विश्वत उद्यन् सूर्यो नुदतां मृत्युपाशान्।

अथर्व० १७।१।३०।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः। यजु० ३४।४३।।

विशां गोपा जनिता रोदस्योर्देवा अग्निं धारयन् द्रविणोदाम्।

ऋक्० १।६६।४।।

भवति चात्रास्माकम्—

गोप्ता स लोकस्य सनातनोऽजः
कर्तापि लोकस्य यतः स विष्णुः।
माता प्रसूते परिपाति सर्व्यं
गोप्तारमाख्याति दिने-दिने सा ।।७१८।।

ज्ञानगम्यः—४६७

'ज्ञान'मिति—ज्ञानशब्दो 'ज्ञा अवबोधने' धातुः, तस्मात् करणे 'ल्युट्' प्रत्ययः। ज्ञायतेऽनेनेति 'ज्ञानम्'। 'गम्यः' गतौ' भौवादिकधातोः ***"पोरदुपधात्"*** (पा० ३।१।९८) इति कर्मणि अर्हार्थे वा 'य'त्प्रत्ययः। ज्ञानेन गम्यते प्राप्यते प्राप्तुमर्हो वा 'ज्ञानगम्यो' विष्णुः।

लोके यथा शिल्पी किञ्चित्कार्यविषयकज्ञानवान् भवति पूर्वं, पश्चाच्च तत्कार्यं कुरुते। तद् दृष्ट्वा चापरस्तज्ज्ञानमधिगच्छति, तज्ज्ञानं परम्परया प्रसृतं भवति। ज्ञानिना च यथा ज्ञातुं शक्यते स्वविषयो न तथा मूढेन। अतो विष्णु'र्ज्ञानगम्य' इत्युच्यते।

मन्त्रलिङ्गञ्च—

तमेव विदित्वा मृत्युमेति नान्यः पन्था विद्यतेऽयनाय।

यजु० ३१।१८।।

अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते। यजु० ४०।१४।।

अपूर्वेणेषिता वाचस्ता वदन्ति यथायथम्।

वदन्तीर्यत्र गच्छन्ति तदाहुर्ब्राह्मणं महत्।। अथर्व० १०।८।३३।।

विदन्तीमत्र नरो धियन्धा हृदा यत्तष्टान् मन्त्राँ अशंसन्।

ऋक्० १।६७।२।।

युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः।

ऋक्० ५।८१।१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

स ज्ञानगम्यः, कथितः पुराणो
ज्ञाने समाप्तिं लभते हि सर्वम्।
ज्ञानात्प्रसूतं सकलं हि दृश्यं
तस्मिन् समायाति च बोधगम्ये[१] ।।७१८।।

पुरातनः—४६८

'पुरा' शब्दः ***''स्वरादिनिपातमव्ययम्''*** (पा० १।१।३७) इत्यनेनाव्ययसंज्ञकः। तस्मात्कालवचनाद् 'भवार्थे' ***''सायञ्चिरप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च''*** (पा० ४।३।२३) सूत्रेण 'ट्युः' प्रत्ययः 'तुडागमश्च'। पुरातनः पुराणः सदातनः सनातनः इत्यादयः शब्दाः समानार्थका भगवन्तं विष्णुं ब्रुवन्ति। भगवति कालपरिच्छेदाभावात् स न नूतनत्वेन पुरातनत्वेन वा परिच्छिद्यते, स यथा पुरातनस्तथा नूतनोऽपि सर्वरूपः। पुराभवतीति 'पुरातनः'।

मन्त्रलिङ्गञ्च—

ब्रह्म जज्ञान प्रथमं पुरस्तात् वि सीमतः सुरुचो वेन आवः।
अथर्व० ४।१।१।।

यस्माज्जातं न पुरा किञ्चनैव य आबभूव भुवनानि विश्वा।।
यजु० ३२।५।।

एषो ह देवः प्रदिशोऽनुसर्वाः पूर्वो ह जातः स उ गर्भे अन्तः।
यजु० ३२।४।।

यज्ञैरथर्वा प्रथमो विधारयत् देवा दक्षैर्भृगवः स चिकित्रिरे।
ऋक्० १०।६२।१०।।

सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। ऋक्० १०।१९०।३।।

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत।
स देवाँ एह वक्षति।। ऋक्० १।१।२।।

१. बोधगम्ये=ज्ञानगम्ये भगवति विष्णौ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भवति चात्रास्माकम्—

पुरातनो विष्णुरिदं समस्तं
पुरातनं सन्ततयन् सदावत् ।
पुरातनस्तत्र पुरातनेऽस्मिन् विश्वे
[1]सदाभाति पुरा च यद्वत् ॥७२०॥

शरीरभूतभृत्—४६६

'शरीर'मिति—'शॄ हिंसायां' क्रैयादिको धातुः, तस्मादौणादिकः ***"कृशॄपृकटिपटिशौटिभ्य ईरन्"*** (उणादि० ४।३०) इती'रन्' प्रत्ययः, रपरो गुणः=शरीरमिति। 'भूत'मिति—'भू सत्तायां' धातोरकर्मकत्वात् कर्तरि 'क्तः'। ***"श्र्युकः किति"*** (पा० ७।२।११) इतीण्निषेधः। भवतीति भूतमिति। 'भृदि'ति 'डुभृञ् धारणपोषणयो'रिति जौहोत्यादिको, 'भृञ् भरणे' इति भौवादिको वा धातुः, तस्मात् 'क्विपि' 'तुकि' गुणाभावे च=भृदिति। एवञ्च शरीरं शीर्णशीलं विनाशि विकारजातं भूतं सत्यात्मकं प्रकृतितत्त्वञ्च यो बिभर्ति धारयति पोषयति वा स 'शरीरभूतभृदि' ति समुदितार्थः।

यद्वा—शरीरे स्थितानि भूतानि शरीराधिष्ठातॄणि, शरीरस्वरूपनिष्पादयितॄणि, दैवतानि बिभर्तीति=शरीरभूतभृदिति। तद्यथा—प्राणादिरूपा वायवः, कामसङ्कल्पादिरूपं मनः चक्षुरादीनीन्द्रियाणि, बुद्धिः, अहङ्कारः सन्धयो वर्ण इत्येतत् सर्वं शरीरसम्भारमेकीभूय शरीरेति नाम्नोच्यते। केशाः स्नायवो मांसमज्जादयोऽप्यत्र सम्भारशब्देन ज्ञेयाः। तदेतान् सम्भारान् कस्कुतः सञ्चित्य आभरत्, कश्चैतान् समदधात्, सन्धिमकरोत्—अस्य प्रश्नस्योत्तरमथर्ववेद उक्तम्—तथा हि—

संसिचो नाम ते देवा ये सम्भारान्त्समभरन् ।
सर्वं संसिच्य मर्त्यं देवाः पुरुषमाविशन् ॥

अथर्व० ११।८।१३॥

शिरो हस्तावथो मुखं जिह्वां ग्रीवाश्च कीकसाः।
त्वचा प्रावृत्य सर्वं तत् सन्धा समदधान्मही ॥

अथर्व० ११।८।१५॥

---

१. सदाभाति=सद आभाति सत उद्भूतम् आभाति प्रकाशते। अथवा—सत्त्वरूपमापन्नः प्रकाशते।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एवञ्च शरीरस्थानां समनस्कानामिन्द्रियाणां धातूनाञ्च सञ्चेतारो धातारः, सन्धातारश्च देवाः शरीराधाराः शरीरधारका उच्यन्ते। यथा सूर्यश्चक्षुषः, चन्द्रमा मनसः, वातस्त्वच इत्यादि। तान् देवान् बिभर्त्ति इति 'शरीरभूतभृद' विष्णुः। तथा च–

या आपो याश्च देवता या विराड् ब्रह्मणा सह।
शरीरं ब्रह्म प्राविशच्छरीरेऽधि प्रजापतिः ।।

अथर्व० ११।८।३०।।

सूर्यश्चक्षुवतिः प्राणं पुरुषस्य वि भेजिरे ।
अथास्येतरमात्मानं देवाः प्रायच्छन्नग्नये ।।

अथर्व० ११।८।३१।।

तस्माद्वै विद्वान् पुरुषमिदं ब्रह्मेति मन्यते ।
सर्वा ह्यस्मिन् देवता गावो गोष्ठ इवासते ।।

अथर्व० ११।८।३२।।

एतन्मूलकमेवेदं यदुच्यते "**सर्वं खल्विदं ब्रह्म**" इति।

भवतश्चात्रास्माकम्–

शरीरभूतभृल्लोके, गीतः सोऽस्ति पुरातनः ।
स बिभर्ति सदा सूर्यं, मृत्युं निद्रां श्रियं तथा ।।७२१।।

एवं वेत्ति च यो लोके, व्याप्तं सत्यं सनातनम्।
स तमेवैति तत्त्वज्ञः, सत्ये सत्यं प्रतिष्ठितम्।।७२२।।

भोक्ता–५००

भोक्तेति–'भुज पालनाभ्यवहारयो'रिति रौधादिको धातुरनिट्। तस्मात् कर्तरि 'तृच्', गुणः कुत्वं चर्त्वञ्च=भोक्तेति। भुनक्ति भुंक्ते वा जगद्- भोक्ता रक्षको भक्षकश्च। उत्पादयिता रक्षिता भक्षिता च भवतीत्यर्थः।

यथा कृषीवलोऽन्नमुत्पादयति रक्षति लवनादिकं विधाय वितुषीकृत्य चात्ति। सर्वत्रैवं योजनीयम्। अमुथैव भगवान् विष्णुरिदं विश्वं लोकालोकात्मकं सृजति, रक्षति भुंक्ते संहरति च। संहरणमेव भक्षणम्। तस्माद्विष्णुर्भोक्ता।

मन्त्रलिङ्गञ्च–

अपादग्रे समभवत् सो अग्रे स्वराभरत् ।
चतुष्पदि भूत्वा भोग्यः सर्वमादत्त भोजनम्।। अथर्व० १०।८।२१।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तस्मिन्निदं सं च विचैति सर्वम्। यजु० ३२।८।।
स धाता स विधर्ता स वायुर्नभ उच्छ्रितम्।
सो अग्निः स उ सूर्यः स उ एव महायमः। अथर्व १३।४।३, ५।।

भवति चात्रास्माकम्—

भोक्ता स विष्णुः कुरुते ह विश्वं
भुनक्ति तत् सर्वमिदं स एव।
स एव सर्गं कुरुते स्वगर्भे
तथा यथा पाकमुपैति[1] पक्ता।।७२२।।

इति श्री १०८ पण्डितसत्यदेववासिष्ठकृते
महाभारतानुशासनपर्वान्तर्गतस्य (अ० १४६)
विष्णुसहस्रनामस्तोत्रस्य
वेदप्रमाणोपवृंहितसत्यभाष्ये
पञ्चमं नामशतकं
सम्पूर्णम्।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परिशिष्टम् (क)

श्रीविष्णुसहस्रनाम्नां (००१ – ५००) वर्णानुपूर्व्या सूची

{अस्यां सूच्यां संस्कृतवर्णमालानुसारं नामानि दीयन्ते। अनुस्वारान्तानि सविसर्गाणि च अक्षराणि प्रथमं दीयन्ते। वर्गाणां पञ्चमवर्णसंयुक्तान्यक्षराणि यथाक्रममवलोकनीयानि। सूच्याः क्रमस्त्वित्थं ज्ञेयः—अं (ं), अः (ः), अ (–), आ (ा), इ (ि), ई (ी), उ (ु), ऊ (ू), ऋ (ृ), ॠ (ॄ), ए (े), ऐ (ै), ओ (ो), औ (ौ), क्, ख्, ग्, घ्, ङ्, च्, छ्, ज्, झ्, ञ्, ट्, ठ्, ड्, ढ्, ण्, त्, थ्, द्, ध्, न्, प्, फ्, ब्, भ्, म्, य्, र्, ल्, व्, श्, ष्, स्, ह्। सङ्केतः— **श्लोकपृ०**=विष्णुसहस्रनामश्लोकपृष्ठाङ्कः, **स० भा० पृ०**= सत्यभाष्यपृष्ठाङ्कः}

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	स०भा०पृ०
	अ				
१	अक्षरः	१७	१५	३६	४५
२	अक्षरम्	४८१	६४	५४३	५४६
३	अग्रणीः	२१८	३७	२४२	२४२
४	अग्राह्यः	५५	२०	८५	८५
५	अच्युतः	१००	२४	११८	१२३
६	अच्युतः	३१८	४८	३६५	३६६
७	अजः	६५	२४	११८	११६
८	अजः	२०४	३५	२२०	२२६
९	अतीन्द्रः	१५७	३०	१६८	१७८
१०	अतीन्द्रियः	१६६	३१	१८४	१९०
११	अतुलः	३५५	५२	४०६	४०६
१२	अदृश्यः	३०४	४६	३४२	३४६
१३	अधिष्ठानम्	३२४	४८	३६५	३७२
१४	अधोक्षजः	४१५	५७	४५६	४७१
१५	अनघः	१४६	२९	१६२	१६५
१६	अनन्तजित्	३०७	४६	३४२	३४८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	स०भा०पृ०
१७	अनयः	४००	५६	४४८	४५२
१८	अनर्थः	४३१	५६	४८५	४९१
१९	अनलः	२९३	४५	३३२	३३४
२०	अनादिनिधनः	४२	१८	६४	७३
२१	अनिमिषः	२१५	३६	२३१	२३८
२२	अनिरुद्धः	१८५	३३	२०३	२०६
२३	अनिर्देश्यवपुः	१७७	३२	१८४	१९६
२४	अनिर्विण्णः	४३५	६०	४६६	४६६
२५	अनिलः	२३४	३८	२५६	२६३
२६	अनुकूलः	३४२	५०	३८५	३९२
२७	अनुत्तमः	८०	२२	१०२	१०६
२८	अपां निधिः	३२३	४८	३६५	३७२
२९	अप्रमत्तः	३२५	४८	३६५	३७३
३०	अप्रमेयः	४६	१९	७७	७७
३१	अप्रमेयात्मा	२४८	४०	२७९	२९१
३२	अभूः (भूः)	४३७	६०	४६६	४६६
३३	अमरप्रभुः	४९	१९	७७	८१
३४	अमिताशनः	३७२	५३	४१६	४२५
३५	अमृतः	११९	२६	१३६	१४१
३६	अमृतांशूद्भवः	२८३	४४	३२२	३२२
३७	अमृत्युः	१९८	३५	२२०	२२०
३८	अमेयात्मा	१०२	२४	११८	१२६
३९	अमेयात्मा	१७९	३२	१८४	२०२
४०	अमोघः	११०	२५	१२९	१३४
४१	अमोघः	१५४	३०	१६८	१७३
४२	अरविन्दाक्षः	३४७	५१	३९७	४००
४३	अर्थः	४३०	५६	४८५	४९०
४४	अविज्ञाता	४८२	६४	५४३	५४९

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	स०भा०पृ०
४५	अविशिष्टः	३०६	४७	३४६	३५०
४६	अव्यङ्गः	१२६	२७	१४३	१४६
४७	अव्ययः	१३	१५	३६	४१
४८	अशोकः	३३६	५०	३८५	३८६
४६	असंख्येयः	२४७	४०	२७६	२७६
५०	असत्	४७६	६४	५४३	५४७
५१	अहः	६०	२३	११०	११४
५२	अहःसंवर्तकः	२३२	३८	२५६	२६०
	आ				
५३	आत्मवान्	८४	२२	१०२	१०६
५४	आदित्यः	३६	१८	६४	६५
५५	आदिदेवः	३३४	४६	३७६	३८३
५६	आदिदेवः	४६०	६५	५५४	५५८
५७	आवर्तनः	२२८	३८	२५६	२५६
	इ				
५८	इज्यः	४४६	६१	५०८	५०६
५६	इष्टः	३०८	४७	३४६	३४६
	ई				
६०	ईशानः	६४	२१	८५	६२
६१	ईश्वरः	३६	१७	५४	६३
६२	ईश्वरः	७४	२२	१०२	१०२
	उ				
६३	उग्रः	४२१	५८	४७४	४८०
६४	उत्तरः	४६४	६६	५६३	५६३
६५	उद्भवः	३७३	५४	४२६	४२६
६६	उपेन्द्रः	१५१	३०	१६८	१६८
	ऊ				
६७	ऊर्जितः	१५६	३०	१६८	१७६

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	स०भा०पृ०
	ऋ				
६८	ऋतुः	४१६	५८	४७४	४७६
६९	ऋद्धः	२७८	४३	३१३	३१५
७०	ऋद्धः	३५१	५१	३६७	४०३
	ओ				
७१	ओजस्तेजोद्युतिधरः	२७५	४३	३१३	३१३
	औ				
७२	औषधम्	२८७	४४	३२२	३२६
	क				
७३	करणम्	३७८	५४	४२६	४३२
७४	कर्ता	३८०	५४	४२६	४३४
७५	कविः	१३२	२७	१४३	१५०
७६	कान्तः	२६६	४५	३३२	३३७
७७	कामः	२६७	४५	३३२	३३८
७८	कामकृत्	२६५	४५	३३२	३३६
७९	कामप्रदः	२६८	४५	३३२	३४१
८०	कामहा	२६४	४५	३३२	३३६
८१	कारणम्	३७९	५४	४२६	४३३
८२	कालः	४१८	५८	४७४	४७७
८३	कृतज्ञः	८२	२२	१०२	१०८
८४	कृतलक्षणः	४८५	६४	५४३	५५२
८५	कृताकृतः	१३६	२८	१५२	१५४
८६	कृतिः	८३	२२	१०२	१०८
८७	कृष्णः	५७	२०	८५	८६
८८	केशवः	२३	१६	४६	५०
८९	क्रतुः	४४८	६१	५०८	५११
९०	क्रमः	७९	२२	१०२	१०५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	स०भा०पृ०
९१	क्रोधकृत्कर्ता	३१५	४७	३५६	३६१
९२	क्रोधहा	३१४	४७	३४६	३५८
	क्ष				
९३	क्षमः	४४२	६०	४६६	५०४
९४	क्षरम्	४८०	६४	५४३	५४८
९५	क्षामः	४४३	६०	४६६	५०५
९६	क्षेत्रज्ञः	१६	१५	३६	४४
९७	क्षोभणः	३७४	५४	४२६	४२८
	ग				
९८	गभस्तिनेमिः	४८६	६५	५५४	५५४
९९	गरुडध्वजः	३५४	५१	३९७	४०५
१००	गहनः	३८२	५४	४२६	४३६
१०१	गुरुः	२०९	३६	२३१	२३१
१०२	गुरुतमः	२१०	३६	२३१	२३४
१०३	गुहः	३८३	५४	४२६	४३३
१०४	गोपतिः	४९५	-६६	५६३	५६३
१०५	गोप्ता	४९६	६६	५६३	५६५
१०६	गोविदांपतिः	१८८	३३	२०३	२०९
१०७	गोविन्दः	१८७	३३	२०३	२०८
१०८	ग्रामणीः	२१९	३७	२४२	२४४
	च				
१०९	चतुरात्मा	१३७	२८	१५२	१५५
११०	चतुर्दंष्ट्रः	१३९	२८	१५२	१५७
१११	चतुर्भुजः	१४०	२८	१५२	१५८
११२	चतुर्व्यूहः	१३८	२८	१५२	१५६
११३	चन्द्रांशुः	२८१	४३	३१३	३१९
	ज				
११४	जगतःसेतुः	२८८	४४	३२२	३२८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	स०भा०पृ०
११५	जगदादिजः	१४५	२६	१६२	१६४
११६	जनार्दनः	१२६	२७	१४३	१४५
११७	जनेश्वरः	३४१	५०	३८५	३६१
११८	जह्नुः	२४४	३६	२६६	२७४
११६	जितक्रोधः	४६२	६२	५१८	५२८
१२०	जेता	१४८	२६	१६२	१६६
	ज्ञ				
१२१	ज्ञानगम्यः	४६७	६६	५६३	५६६
१२२	ज्ञानमुत्तमम्	४५४	६१	५०८	५१७
१२३	ज्येष्ठः	६७	२१	८५	६४
	त				
१२४	तारः	३३८	५०	३८५	३८७
१२५	तारणः	३३७	५०	३८५	३८७
१२६	तुष्टः	३६१	५५	४३८	४४६
१२७	त्रिककुब्धाम	६१	२०	८५	८६
१२८	त्वष्टा	५२	१६	७७	८३
	द				
१२६	दक्षः	४२३	५८	४७४	४८३
१३०	दमनः	१६०	३४	२१०	२११
१३१	दामोदरः	३६७	५३	४१६	४१६
१३२	दुराधर्षः	८१	२२	१०२	१०७
१३३	दुर्धरः	२६६	४२	३००	३०२
१३४	दुर्मर्षणः	२०५	३५	२२०	२२७
१३५	देवः	३७५	५४	४२६	४२६
१३६	देवभृद्गुरुः	४६३	६५	५५४	५६१
१३७	देवेशः	४६२	६५	५५४	५६०
	ध				
१३८	धन्वी	७६	२२	१०२	१०३

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	स०भा०पृ०
१३६	धनेश्वरः	४७४	६३	५२६	४४२
१४०	धरणीधरः	२३५	३८	२५६	२६४
१४१	धर्मः	४०३	५६	४४८	४५६
१४२	धर्मकृत्	४७६	६४	५४३	५४४
१४३	धर्मगुप्	४७५	६४	५४३	५४३
१४४	धर्मयूपः	४३८	६०	४६६	५००
१४५	धर्मविदुत्तमः	४०४	५६	४४८	४५७
१४६	धर्माध्यक्षः	१३५	२८	१५२	१५४
१४७	धर्मी	४७७	६४	५४३	५४५
१४८	धाता	४३	१८	६४	७४
१४६	धातुरुत्तमः	४५	१८	६४	७६
१५०	धाम	२११	३६	२३१	२३५
१५१	धुर्यः	३२६	४६	३७६	३७७
१५२	धृतात्मा	१६०	३०	१६८	१८१
१५३	ध्रुवः	३८८	५५	४३८	४४३
	न				
१५४	नक्षत्रनेमिः	४४०	६०	४६६	५०२
१५५	नक्षत्री	४४१	६०	४६६	५०४
१५६	नयः	३६६	५६	४४८	४५२
१५७	नरः	२४६	३६	२६६	२७८
१५८	नहुषः	३१२	४७	३४६	३५५
१५६	नारसिंहवपुः	२१	१६	४६	४६
१६०	नारायणः	२४५	३६	२६६	२७५
१६१	निधिरव्ययः	३०	१७	५४	५६
१६२	निमिषः	२१४	३६	२३१	२३८
१६३	नियमः	१६१	३०	१६८	१८१
१६४	निवृत्तात्मा	२२६	३८	२५६	२५७
१६५	नेता	२२२	३७	२४२	२४८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	स०भा०पृ०
१६६	नेयः	३६८	५६	४४८	४५१
१६७	नैककर्मकृत्	४६६	६३	५२६	५३३
१६८	नैकमायः	३०२	४६	३४२	३४४
१६६	नैकरूपः	२७१	४२	३००	३०८
१७०	नैकात्मा	४६८	६३	५२६	५३४
१७१	न्यायः	२२१	३७	२४२	२४७
	प				
१७२	पद्मगर्भः	३४८	५१	३६७	४०१
१७३	पद्मनाभः	४८	१६	७७	८०
१७४	पद्मनाभः	१६६	३४	२१०	२१८
१७५	पद्मनाभः	३४६	५१	३६७	३६८
१७६	पद्मनिभेक्षणः	३४५	५०	३८५	३६६
१७७	पद्मी	३४४	५०	३८५	३६६
१७८	परमस्पष्टः	३६०	५५	४३८	४४५
१७६	परमात्मा	११	१५	३६	३७
१८०	परमेश्वरः	३७७	५४	४२६	४३१
१८१	परमेष्ठी	४१६	५८	४७४	४७८
१८२	परर्द्धिः	३८६	५५	४३८	४४४
१८३	परिग्रहः	४२०	५८	४७४	४७६
१८४	पवनः	२६१	४५	३३२	३३३
१८५	पवित्रम्	६२	२०	८५	८६
१८६	पावनः	२६२	४५	३३२	३३४
१८७	पुण्डरीकाक्षः	१११	२५	१२६	१३४
१८८	पुनर्वसुः	१५०	२६	१६२	१६७
१८६	पुरन्दरः	३३५	४६	३७६	३८४
१६०	पुरातनः	४६८	६६	५६३	५६७
१६१	पुरुषः	१४	१५	३६	४२
१६२	पुरुषः	४०६	५७	४५६	४६२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	स०भा०पृ०
१६३	पुरुषोत्तमः	२४	१६	४६	५२
१६४	पुष्कराक्षः	४०	१८	६४	७१
१६५	पुष्टः	३६२	५५	४३४	४४२
१६६	पूतात्मा	१०	१५	३६	३६
१६७	पृथुः	४१०	५७	४५६	४६७
१६८	प्रकाशनः	२७४	४२	३००	३११
१६६	प्रकाशात्मा	२७६	४३	३१३	३१४
२००	प्रजापतिः	६६	२१	८५	८६
२०१	प्रजापतिः	१६७	३४	२१०	२१८
२०२	प्रजाभवः	८६	२३	११०	११३
२०३	प्रणवः	४०६	५७	४५६	४६५
२०४	प्रतर्दनः	५६	२०	८५	८८
२०५	प्रतापनः	२७७	४३	३२३	३२५
२०६	प्रतिष्ठितः	३२६	४८	३६५	३७४
२०७	प्रत्ययः	६३	२३	११०	११६
२०८	प्रथितः	३१६	४८	३६५	३६७
२०६	प्रधानपुरुषेश्वरः	२०	१६	४६	४८
२१०	प्रभवः	३४	१७	५४	६२
२११	प्रभुः	३५	१७	५४	६२
२१२	प्रभुः	२६६	४५	३३२	३४१
२१३	प्रभूतः	६०	२०	८५	८८
२१४	प्रमाणम्	४२८	५६	४८५	४८८
२१५	प्रसन्नात्मा	२३७	३६	२६६	२६७
२१६	प्रांशुः	१५३	३०	१६८	१७२
२१७	प्राणः	६६	२१	८५	६३
२१८	प्राणः	३२०	४८	३६५	३६६
२१६	प्राणः	४०७	५७	४५६	४६३
२२०	प्राणदः	६५	२१	८५	६२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	स०भा०पृ०
२२१	प्राणदः	३२१	४८	३६५	३६६
२२२	प्राणदः	४०८	५७	४५६	४६४
	ब				
२२३	बभ्रुः	११६	२६	१३६	१३६
२२४	बहुशिरा	११५	२६	१३६	१३८
२२५	बीजमव्ययम्	४२६	५६	४८५	४८६
२२६	बृहद्भानुः	३३३	४६	३७६	३८२
२२७	बृहद्रूपः	२७२	४२	३००	३१०
	भ				
२२८	भर्ता	३३	१७	५४	६१
२२६	भानुः	२८४	४४	३२२	३२३
२३०	भावः	७	१४	२४	३०
२३१	भावनः	३२	१७	५४	६१
२३२	भास्करद्युतिः	२८२	४३	३१३	३२१
२३३	भीमः	३५७	५२	४०६	४०८
२३४	भुजगोत्तमः	१६३	३४	२१०	२१४
२३५	भूगर्भः	७१	२१	८५	६८
२३६	भूतकृत्	५	१४	२४	२६
२३७	भूतभव्यभवत्प्रभुः	४	१४	२४	२८
२३८	भूतभव्यभवन्नाथः	२६०	४५	३३२	३३२
२३६	भूतभावनः	६	१४	२४	३५
२४०	भूतभृत्	६	१४	२४	३०
२४१	भूतमहेश्वरः	४८६	६५	५५४	५५८
२४२	भूतात्मा	८	१४	२४	३३
२४३	भूतादिः	२६	१७	५४	५८
२४४	भोक्ता	१४३	२६	१६२	१६३
२४५	भोक्ता	५००	६६	५६३	५६६
२४६	भोजनम्	१४२	२६	१६२	१६२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	स०भा०पृ०
२४७	भ्राजिष्णुः	१४१	२६	१६२	१६२
	म				
२४८	मङ्गलं परम्	६३	२०	८५	६१
२४६	मधुः	१६८	३१	१८४	१६०
२५०	मधुसूदनः	७३	२१	८५	१००
२५१	मनुः	५१	१६	७७	८२
२५२	मनोहरः	४६१	६२	५१८	५२६
२५३	मन्त्रः	२८०	४३	३१३	३१७
२५४	मरीचिः	१८६	३४	२१०	२१०
२५५	महर्द्धिः	३५०	५१	३६७	४०३
२५६	महाकोशः	४३२	५६	४८५	४६२
२५७	महाक्षः	३५३	५१	३६७	४०४
२५८	महातपाः	१२२	२६	१३६	१४२
२५६	महादेवः	४६१	६५	५५४	५५६
२६०	महाद्युतिः	१७६	३२	१८४	१६८
२६१	महाद्रिधृक्	१८०	३२	१८४	२०२
२६२	महाधनः	४३४	५६	४८५	४६५
२६३	महाबलः	१७२	३१	१८४	१६४
२६४	महाबुद्धिः	१७३	३२	१८४	१६६
२६५	महाभागः	३७०	५३	४१६	४२२
२६६	महाभोगः	४३३	५६	४८५	४६४
२६७	महामखः	४३६	६०	४६६	५०१
२६८	महामायः	१७०	३१	१८४	१६२
२६६	महावीर्यः	१७४	३२	१८४	१६७
२७०	महाशक्तिः	१७५	३२	१८४	१६८
२७१	महाशनः	३०३	४६	३४२	३४५
२७२	महास्वनः	४१	१८	६४	७२
२७३	महीधरः	३१७	४७	३४६	३६३

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	स०भा०पृ०
२७४	महीधरः	३६६	५३	४१६	४२१
२७५	महीभर्ता	१८२	३३	२०३	२०४
२७६	महेज्यः	४४७	६१	५०८	५१०
२७७	महेन्द्रः	२६८	४२	३००	३०५
२७८	महेष्वासः	१८१	३३	३०३	३०३
२७९	महोत्साहः	१७१	३१	१८४	१९३
२८०	माधवः	७१	२१	८५	९९
२८१	माधवः	१६७	३१	१८४	१८६
२८२	मार्गः	३६५	५३	४१६	४१७
२८३	मार्गः	३६७	५६	४४८	४५१
२८४	मुक्तानां परमा गतिः	१२	१५	३६	४०
२८५	मेधावी	७७	२२	१०२	१०४
	य				
२८६	यज्ञः	४४५	६१	५०८	५०८
२८७	यमः	१६२	३०	१६८	१८१
२८८	युगादिकृत्	३००	४६	३४२	३४२
२८९	युगावर्तः	३०१	४६	३४२	३४४
२९०	योगः	१८	१६	४६	४६
२९१	योगविदां नेता	१९	१६	४६	४७
	र				
२९२	रत्नगर्भः	४७३	६३	५२६	५३६
२९३	रामः	३९४	५६	४४८	४४८
२९४	रुद्रः	११४	२६	१३६	१३७
२९५	रोहितः	३६४	५३	४१६	४१७
	ल				
२९६	लक्ष्मीवान्	३६१	५२	४०६	४१३
२९७	लोकाध्यक्षः	१३३	२८	१५२	१५२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	स०भा०पृ०
२९८	लोहिताक्षः	५८	२०	८५	८७
	व				
२९९	वत्सरः	४७०	६३	५२९	५३६
३००	वत्सलः	४७१	६३	५२९	५३७
३०१	वत्सी	४७२	६३	५२९	५३९
३०२	वरदः	३३०	४९	३७६	३७८
३०३	वरारोहः	१२१	२६	१३६	१४२
३०४	वर्धनः	२६१	४१	२६१	२६७
३०५	वर्धमानः	२६२	४१	२६१	२६८
३०६	वषट्कारः	३	१४	२४	२७
३०७	वसुः	१०४	२५	१२९	१२९
३०८	वसुः	२७०	४२	३००	३०७
३०९	वसुदः	२६९	४२	३००	३०६
३१०	वसुमनाः	१०५	२५	१२९	१३०
३११	वह्निः	२३३	३८	२५६	२६२
३१२	वाग्मी	२६७	४२	३००	३०३
३१३	वाचस्पतिरुदारधीः	२१७	३६	२३१	२४०
३१४	वामनः	१५२	३०	१६८	१७०
३१५	वायुः	४१४	५७	४५९	४७१
३१६	वायुवाहनः	३३१	४९	३७६	३७९
३१७	वासवानुजः	३२२	४८	३६५	३६६
३१८	वासुदेवः	३३२	४९	३७६	३८१
३१९	विकर्ता	३८१	५४	४२६	४३५
३२०	विक्रमः	७८	२२	१०२	१०४
३२१	विक्रमी	७५	२२	१०२	१०३
३२२	विक्षरः	३६३	५३	४१६	४१६
३२३	विजयः	१४७	२९	१६२	१६५
३२४	विदारणः	४६४	६२	५१८	५३०

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	स०भा०पृ०
३२५	विधाता	४४	१८	६४	७५
३२६	विधाता	४८४	६४	५४३	५५१
३२७	विभुः	२४०	३६	२६६	२७०
३२८	विमुक्तात्मा	४५२	६१	५०८	५१५
३२९	विरतः	३६६	५६	४४८	४५०
३३०	विरामः	३६५	५६	४४८	४४९
३३१	विविक्तः	२६३	४१	२९१	२९८
३३२	विशिष्टः	२४६	४०	२७६	२८२
३३३	विश्रामः	४२४	५८	४७४	४८३
३३४	विश्रुतात्मा	२०७	३५	२२०	२२९
३३५	विश्वम्	१	१४	२४	२४
३३६	विश्वकर्मा	५०	१९	७७	८२
३३७	विश्वदक्षिणः	४२५	५८	४७४	४८५
३३८	विश्वधृक्	२३८	३६	२८६	२८९
३३९	विश्वबाहुः	३१६	४७	३४९	३६२
३४०	विश्वभुक्	२३९	३६	२६६	२६९
३४१	विश्वयोनिः	११७	२६	१३६	१३९
३४२	विश्वयोनिः	१४९	२९	१६२	१६६
३४३	विश्वरेताः	८८	२३	११०	११२
३४४	विश्वात्मा	२२५	३७	२४२	२५२
३४५	विष्णुः	२	१४	२४	२६
३४६	विष्णुः	२५८	४१	२९१	२९३
३४७	विष्वक्सेनः	१२५	२७	१४३	१४४
३४८	विस्तारः	४२६	५९	४८५	४८५
३४९	वीरः	४०१	५६	४४८	४५४
३५०	वीरबाहुः	४६३	६२	५१८	५२९
३५१	वीरहा	१६६	३१	१८४	१८७
३५२	वृद्धात्मा	३५२	५१	३६७	४०३

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	स०भा०पृ०
३५३	वृषः	३१३	४७	३४६	३५७
३५४	वृषकर्मा	११२	२५	१२६	१३५
३५५	वृषपर्वा	२५६	४१	२६१	२६४
३५६	वृषभः	२५७	४१	२६१	२६३
३५७	वृषाकपिः	१०१	२४	११८	१२५
३५८	वृषाकृतिः	११३	२५	१२६	१३६
३५९	वृषाही	२५६	४१	२६१	२६१
३६०	वृषोदरः	२६०	४१	२६१	२६५
३६१	वेगवान्	३७१	५३	४१६	४२४
३६२	वेदः	१२७	२७	१४३	१४६
३६३	वेदवित्	१२८	२७	१४३	१४८
३६४	वेदवित्	१३१	२७	१४३	१५०
३६५	वेदाङ्गः	१३०	२७	१४३	१४६
३६६	वेद्यः	१६३	३१	१८४	१८४
३६७	वैकुण्ठः	४०५	५७	४५६	४६०
३६८	वैद्यः	१६४	३१	१८४	१८५
३६९	व्यक्तरूपः	३०५	४६	३४२	३४७
३७०	व्यवसायः	३८४	५५	४३८	४३८
३७१	व्यवस्थानः	३८५	५५	४३८	४४०
३७२	व्यापी	४६७	६३	५२६	५३३
३७३	व्याप्तः	४१३	५७	४५६	४७०
३७४	व्यालः	६२	२३	११०	११५
	श				
३७५	शक्तिमतां श्रेष्ठः	४०२	५६	४४८	४५५
३७६	शतावर्तः	३४३	५०	३८५	३९४
३७७	शत्रुघ्नः	४१२	५७	४५६	४६६
३७८	शम्भुः	३८	१८	६४	६५
३७९	शरणम्	८६	२३	११०	१११

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	स०भा०पृ०
३८०	शरभः	३५६	५२	४०६	४०८
३८१	शरीरभूतभृत्	४६६	६६	५६३	५६८
३८२	शरीरभृत्	३४६	५१	३६७	४०२
३८३	शर्म	८७	२३	११०	११२
३८४	शर्वः	२६	१७	५४	५५
३८५	शशबिन्दुः	२८५	४४	३२२	३२४
३८६	शाश्वतः	५६	२०	८५	८६
३८७	शाश्वतस्थाणुः	१२०	२६	१३६	१४१
३८८	शास्ता	२०६	३५	२२०	२२८
३८९	शिखण्डी	३११	४७	२४६	३५३
३९०	शिपिविष्टः	२७३	४२	३००	३११
३९१	शिवः	२७	१७	५४	५६
३९२	शिष्टकृत्	२५०	४०	२७६	२८३
३९३	शिष्टेष्टः	३१०	४७	२४६	२५१
३९४	शुचिः	१५५	३०	१६८	१७५
३९५	शुचिः	२५१	४०	२७६	२८५
३९६	शुचिश्रवाः	११८	२६	१३६	१४०
३९७	शुभेक्षणः	३६३	५५	४३८	४४७
३९८	शूरः	३३६	५०	३८५	३८६
३९९	शौरिः	३४०	५०	३८५	३९०
४००	श्रीगर्भः	३७६	५४	४२६	४२६
४०१	श्रीनिवासः	१८३	३३	२०३	२०५
४०२	श्रीमान्	२२	१६	४६	५०
४०३	श्रीमान्	१७८	३२	१८४	२०१
४०४	श्रीमान्	२२०	३७	२४२	२४५
४०५	श्रुतिसागरः	२६४	४१	२९१	२९६
४०६	श्रेष्ठः	६८	२१	८५	९५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	स०भा०पृ०
	स				
४०७	संवत्सरः	६१	२३	११०	११५
४०८	संवत्सरः	४२२	५८	४७४	४८१
४०९	संवृतः	२३०	३८	२५६	२५८
४१०	संस्थानः	३८६	५५	४३८	४४०
४११	सङ्ग्रहः	१५८	३०	१६८	१७६
४१२	सत्	४७८	६४	५४३	५४६
४१३	सतांगतिः	१८४	३३	२०३	२०६
४१४	सतांगतिः	४५०	६१	५०८	५१३
४१५	सत्कर्ता	२४१	३६	२६६	२७१
४१६	सत्कृतः	२४२	३६	२६६	२७२
४१७	सत्त्रम्	४४६	६१	५०८	५१२
४१८	सत्त्वस्थः	४८७	६५	५५४	५५५
४१९	सत्यः	१०६	२५	१२६	१३१
४२०	सत्यः	२१२	३६	२३१	२३६
४२१	सत्यधर्मपराक्रमः	२८६	४४	३२२	३३१
४२२	सत्यपराक्रमः	२१३	३६	२३१	२३६
४२३	सदायोगी	१६५	३१	१८४	१८६
४२४	सन्धाता	२०१	३५	२२०	२२४
४२५	सन्धिमान्	२०२	३५	२२०	२२४
४२६	समः	१०६	२५	१२६	१३३
४२७	समयज्ञः	३५८	५२	४०६	४०६
४२८	समात्मा	१०७	२५	१२६	१३१
४२९	समितिञ्जयः	३६२	५२	४०६	४१४
४३०	समीरणः	२२३	३७	२४२	२४६
४३१	समीहनः	४४४	६०	४६६	५०७
४३२	सम्प्रमर्दनः	२३१	३८	२५६	२५८
४३३	सम्भवः	३१	१७	५४	५६

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	स०भा०पृ०
४३४	सम्मितः	१०८	२५	१२६	१३२
४३५	सर्गः	१५६	३०	१६८	१८०
४३६	सर्वः	२५	१७	५४	५४
४३७	सर्वगः	१२३	२७	१४३	१४३
४३८	सर्वज्ञः	४५३	६१	५०८	५१६
४३६	सर्वदर्शनः	६४	२३	११०	११७
४४०	सर्वदर्शी	४५१	६१	५०८	५१४
४४१	सर्वदृक्	१६६	३५	२२०	२२१
४४२	सर्वयोगविनिःसृतः	१०३	२४	११८	१२८
४४३	सर्वलक्षणलक्षण्यः	३६०	५२	४०६	४१२
४४४	सर्वविद्धानुः	१२४	२७	१४३	१४४
४४५	सर्वादिः	६६	२४	११८	१२२
४४६	सर्वेश्वरः	६६	२४	११८	१२०
४४७	सहः	३६८	५३	४१६	४२१
४४८	सहस्रजित्	३०६	४६	३४२	३४८
४४६	सहस्रपात्	२२७	३७	२४२	२५४
४५०	सहस्रमूर्धा	२२४	३७	२४२	२५१
४५१	सहस्रांशुः	४८३	६४	५४३	५५०
४५२	सहस्राक्षः	२२६	३७	२४२	२५३
४५३	सहिष्णुः	१४४	२६	१६२	१६४
४५४	साक्षी	१५	१५	३६	४३
४५५	साधुः	२४३	३६	२६६	२७३
४५६	सिंहः	२००	३५	२२०	२२२
४५७	सिंहः	४८८	६५	५५४	५५६
४५८	सिद्धः	६७	२४	११८	१२१
४५६	सिद्धसंकल्पः	२५३	४०	२७६	२८७
४६०	सिद्धार्थः	२५२	४०	२७६	२८५
४६१	सिद्धिः	६८	२४	११८	१२१

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	स०भा०पृ०
४६२	सिद्धिदः	२५४	४०	२७६	२८८
४६३	सिद्धिसाधनः	२५५	४०	२७६	२६०
४६४	सुखदः	४५६	६२	५१८	५२३
४६५	सुघोषः	४५८	६२	५१८	५२२
४६६	सुतपाः	१६५	३४	२१०	२१७
४६७	सुदर्शनः	४१७	५८	४७४	४७६
४६८	सुपर्णः	१६२	३४	२१०	२१३
४६९	सुप्रसादः	२३६	३६	२६६	२६६
४७०	सुभुजः	२६५	४२	३००	३००
४७१	सुमुखः	४५६	६२	५१८	५१६
४७२	सुराध्यक्षः	१३४	२८	१५२	१५३
४७३	सुरानन्दः	१८६	३३	२०३	२०७
४७४	सुरारिहा	२०८	३५	२२०	२३०
४७५	सुरेशः	८५	२३	११०	११०
४७६	सुरेश्वरः	२८६	४४	३२२	३२५
४७७	सुव्रतः	४५५	६२	५१८	५१८
४७८	सुहृत्	४६०	६२	५१८	५२५
४७९	सूक्ष्मः	४५७	६२	५१८	५२०
४८०	स्कन्दः	३२७	४६	३७६	३७६
४८१	स्कन्दधरः	३२८	४६	३७६	३७६
४८२	स्थविरो ध्रुवः	५४	१६	७७	८४
४८३	स्थविष्ठः	५३	१६	७७	८४
४८४	स्थविष्ठः	४३६	६०	४६६	४६७
४८५	स्थाणुः	२८	१७	५४	५७
४८६	स्थानदः	३८७	५५	४३८	४४१
४८७	स्थावरस्थाणुः	४२७	५६	४८५	४८६
४८८	स्थिरः	२०३	३५	२२०	२२५
४८९	स्पष्टाक्षरः	२७६	४३	३१३	३१६

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	स०भा०पृ०
४६०	स्रग्वी	२१६	३६	२३१	२३६
४६१	स्वयम्भूः	३७	१८	६४	६४
४६२	स्ववशः	४६६	६३	५२६	५३२
४६३	स्वापनः	४६५	६३	५३१	५३१
	ह				
४६४	हंसः	१९१	३४	२१०	२१२
४६५	हविर्हरिः	३५६	५२	४०६	४११
४६६	हिरण्यगर्भः	७०	२१	४५६	४६८
४६७	हिरण्यगर्भः	४११	५७	८५	६७
४६८	हिरण्यनाभः	१६४	३४	२१०	२१६
४६९	हृषीकेशः	४७	१६	७७	७६
५००	हेतुः	३६६	५३	४१६	४१८

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
स्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दि

श्री १०८ पं० सत्यदेवो वासिष्ठः

जन्मतिथिः -२७.८.१९१२

जन्मस्थानम् पञ्चाम्बुप्रान्तस्थजालन्धर- मण्डलान्तर्गत माहलगहिला-ग्रामः

पिता पं० अनन्तराम सहजपालः

माता श्रीमती द्रौपदी

गुरवः श्री ब्रह्मदत्त जिज्ञासुः (विद्यारम्भगुरुः)
श्री नाथूराम मौद्गल्यः
श्री तिलकराम ब्रह्मचारी
(आयुर्वेदगुरू)
श्री शङ्करराम त्रिपाठी (सामवेदगुरुः)
श्री रामचन्द्रभट्ट रटाटे (ऋगथर्वगुरुः)
पं० केदारनाथ सारस्वतः (काव्यगुरुः)
श्री त्रिलोकचन्द्र वसुः (संगीतशिक्षकः)

अधीतानि शास्त्राणि वेद-व्याकरण-निरुक्त-छन्दः-साहित्य-ज्योतिषायुर्वेदादिशास्त्राणि

लब्धा उपाधयः सामस्वरभास्करः, आयुर्वेदाचार्यः, साङ्गोपवेदवेदचतुष्टयी, आयुर्वेदानूचानः

अध्युष्टपदानि लवपुर-दिल्ली-भिवानीस्थ-सनातनधर्मायुर्वेदमहाविद्यालय-प्रधानाध्यापकचरः गुरुकुलझज्जरस्थायुर्वेदविभागाध्यक्षचरः

प्रणीता ग्रन्थाः नाडीतत्त्वदर्शनम् सत्याग्रहनीतिकाव्यम् विष्णुसहस्रनाम-सत्यभाष्यम्

आवासः देवसदनम्, महम मार्गः, भिवानी-१२५०२१ (भारतम्)

आवरणपृष्ठे
ग्रन्थकर्तुश्छायाचित्रम्
श्री १०८ पं० सत्यदेवो वासिष्ठः
छायाचित्रकारः- श्री आर. के. शर्मा

Kirtikant Sharma Collection, Najafgarh

ization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh